
॥ अथ श्रीमहाभारते भीष्मपर्व प्रारभ्यते ॥

श्रीगणेशायनमः॥ ॥ श्रीलक्ष्मणार्यगुरवेजडजंतुचक्षुर्वैधापनोदनमलेनहिरोचतेऽन्यत्॥ पादावनेजनमुखाःपचितिस्ततस्तुश्रीभीष्मपर्वणिविदध्महिभावदीपं॥१॥ पूर्वस्मिन्पर्वणिभगवद्गुणकःसत्यपिसामर्थ्ये यःसत्यंपालयत्यैश्वर्यैश्चनप्रकाशयतिकालेप्राप्तेऽन्यस्मैउपकरोतिचेतिपांडवाचारप्रदर्शनव्याजेनदर्शितंतमेवंभूतंस्वयंभगवान्हितोपदेशेनानुगृह्णातिनदीयांप्रतिज्ञांचस्वप्रतिज्ञावाधनेवसत्यांकरोतीत्यर्जुनोप देशेनभीष्मवधार्थंभगवतःशस्त्रधारणेनचदर्शयिष्यन्भीष्मपर्वारभते पूर्वंचयुद्धोद्योगंश्रुत्वायुद्धंश्रोतुकामोजनमेजयउवाच कथंयुयुधिरेवीराइति ॥ १ ॥ तपःक्षेत्रेइति खड्गधारातीर्थेऽस्मिन्स्नानमत्युचित

श्रीगणेशायनमः॥ ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं॥ देवींसरस्वतींचैवततोजयमुदीरयेत्॥१॥ ॥ जनमेजयउवाच॥ ॥कथंयुयुधिरेवीराःकुरुपांडव सोमकाः॥पार्थिवाःसुमहात्मानोनानादेशसमागताः॥१॥ ॥वैशंपायनउवाच॥ ॥ यथायुयुधिरेवीराःकुरुपांडवसोमकाः॥ कुरुक्षेत्रेतपःक्षेत्रेभृणुत्वंपृथिवी पते॥ २॥तेऽवतीर्यकुरुक्षेत्रंपांडवाःसहसोमकाः॥ कौरवाःसमवर्त्ततजिगीषंतोमहाबलाः॥३॥वेदाध्ययनसंपन्नाःसर्वेयुद्धाभिनंदिनः॥आशंसंतोजयंयुद्धेव लेनाग्निमुखारणे॥४॥अभियायचदुर्धर्षोधार्त्तराष्ट्रस्यवाहिनीम्॥ प्राङ्मुखाःपश्चिमेभागेन्यविशंतससैनिकाः॥ ५॥समंतपंचकाद्वात्यंशिविराणिसहस्रशः॥ कारयामासविधिवत्कुंतीपुत्रोयुधिष्ठिरः॥६॥शून्याचपृथिवीसर्वाबालवृद्धावशेषिता॥ निरश्वपुरुषेवासीद्रथकुंजरवर्जिता॥ ७॥ यावत्तपतिसूर्योहिजंबूद्वी पस्यमंडलम्॥तावद्देवसमायातंबलंपार्थिवसत्तम॥८॥एकस्थाःसर्ववर्णास्तेमंडलंबहुयोजनम्॥ पर्याक्रामंतदेशांश्चनदीःशैलान्वनानिच॥ ९॥तेषांयुधिष्ठि रोराजासर्वेषांपुरुषर्षभ॥व्यादिदेशसवात्यानांभक्ष्यभोज्यमनुत्तमम्॥ १०॥शय्याश्चविविधास्तातेषांराज्ञौयुधिष्ठिरः॥एवंवेदीवेदितव्यःपांडवेयोयमित्युत ॥ ११॥ अभिज्ञानानिसर्वेषांसंज्ञाश्चाभरणानिच॥ योजयामासकौरव्योयुद्धकालउपस्थिते॥ १२॥ दृष्ट्वाध्वजाग्रंपार्थस्यधार्त्तराष्ट्रोमहामनाः॥ सहसर्वैर्म हीपालैःप्रत्यव्यूहतपांडवम्॥ १३॥पांडुरेणातपत्रेणध्रियमाणेनमूर्द्धनि॥ मध्येनागसहस्रस्यभ्रातृभिःपरिवारितः॥ १४॥दृष्ट्वादुर्योधनंहृष्टाःपंचालायुद्धनंदि नः॥दध्मुःप्रीतामहाशंखान्भेर्यश्चमधुरस्वनाः॥ १५॥

मितिज्ञावः॥ २॥ जिगीषंतोऽन्योन्यंजेतुमिच्छंतः॥ ३॥ ४॥ अभियायअभ्येत्यन्यविशंत पांडवीयाइतिशेषः॥ ५॥ बालंवहिः॥ ६॥ ७॥ यावत्तपतिसूर्यइत्यनेनकृत्स्नंसप्तद्वीपालंकंभूवलयंज बूद्विपशब्देनोच्यते लिंगसमवायाच्छत्रिणोगच्छंतीतिवत्॥ ८॥ ९॥ सवाह्यानांकैवर्त्तम्लेच्छांध्रादिप्रांत्यदेशवासिनोबाह्यास्तत्संहितानां॥ १०॥ भक्ष्यादिदानफलमाह एवमिति एववेदीविद्वानइति अन्यैःपांडवेयोज्ञातव्यइत्येतदर्थमित्यर्थः॥ ११॥ अभिज्ञानानित्वकीयचिह्नानित्वीयाएवत्वीयान्मानिहन्युरित्येतदर्थं॥ १२॥ १३॥ १४॥ १५॥

॥ १६ ॥ १७ ॥ शकटपुरीषं ॥ १८ ॥ असीदतअवसन्नमभूत्॥ १९॥ २०॥ २१॥ २२॥ शर्कराःस्थूलवालुकाःकर्षयतीतितथा विनिघ्नन्शर्कराभिरित्यर्थः॥ २२॥ सागरक्षुभितोपमेक्षुभितसागरोपमे॥ २३॥ २४॥ ॥ २५॥ २६॥ धर्मान्पराङ्मुखस्यक्तशस्त्रःशरणागतोऽन्येनसंयुक्तश्चनहंतव्यइत्यादीन् ॥ २७ ॥ धर्मसंस्थापनमेवाह तथापरमिति यथायोगंतुल्ययोर्योगस्यानतिक्रमणं यथायेनप्रकारेणअपरंअनुत्कृष्टंअ

ततःप्रहृष्टांतांसेनामभिवीक्ष्याथपांडवाः ॥ बभूवुर्हृष्टमनसोवासुदेवश्चवीर्यवान् ॥ १६ ॥ ततोहर्षसमागम्यवासुदेवधनंजयौ ॥ दध्मतुःपुरुषव्याघ्रौदिव्यौशंखौरथेस्थितौ ॥ १७ ॥ पांचजन्यस्यनिर्घोषंदेवदत्तस्यचोभयोः॥ श्रुत्वातुनिनदंयोधाःशस्त्रन्मूत्रंप्रसुस्रुवुः ॥ १८ ॥ यथासिंहस्यनदतःस्वनंश्रुत्वेतरेमृगाः ॥ त्रसंयुर्निनदंश्रुत्वातथासीदततद्बलम् ॥ १९ ॥ उद्तिष्ठद्रजोभौमंनप्राज्ञायतकिंचन ॥ अस्तंगतइवादित्येसैन्येनसहसाऽऽते ॥ २० ॥ ववर्षतत्रपर्जन्योमांसशोणितवृष्टिमान् ॥ दिक्षुसर्वाणिसैन्यानितद्द्भुतमिवाभवत् ॥ २१ ॥ वायुस्ततःप्रादुरभून्नीचैःशर्करकर्षणः॥ विनिघ्नंस्तान्यनीकानिशतशोथसहस्रशः ॥ २२ ॥ उभेसैन्येचराजेंद्रयुद्धायमुदितेभृशम्॥ कुरुक्षेत्रेस्थितेयत्तेसागरक्षुभितोपमे ॥ २३॥ तयोस्तुसेनयोरासीद्द्भुतःसतुसंगमः॥ युगांतेसमनुप्राप्तेद्वयोःसागरयोरिव॥ २४॥ शून्यासीत्पृथिवीसर्वाऽद्धबालावशेषिता ॥ निरश्वपुरुषेवासीद्रथकुंजरवर्जिता ॥ २५ ॥ तेनसेनासमूहेनसमानीतेनकौरवैः ॥ ततस्तेसमयंचक्रुःकुरुपांडवसोमकाः॥ २६ ॥ धर्मान्संस्थापयामासुर्युद्धानांभरतर्षभ ॥ निवृत्तेविहितेयुद्धेस्यात्प्रीतिर्नःपरस्परम् ॥ २७ ॥ यथापरंयथायोगंनचस्यात्कस्यचित्पुनः॥ वाचा युद्धप्रवृत्तानांवाचैवप्रतियोधनम्॥ निष्क्रांताःपृतनामध्यान्नहंतव्याःकदाचन ॥ २८ ॥ रथीचरथिनायोध्योगजेनगजधूर्गतः॥ अश्वेनाश्वीपदातिश्चपादातेनैवभारत ॥ २९ ॥ यथायोगंयथाकामंयथोत्साहंयथाबलम्॥ समाभाष्यप्रहर्त्तव्यंनविश्वस्तेनविह्वले ॥ ३० ॥ एकेनसहसंयुक्तःप्रपन्नोविमुखस्तथा ॥ क्षीणशस्त्रोविवर्माचनहंतव्यःकदाचन ॥ ३१ ॥ नसूतेषुनधुर्येषुनचशस्त्रोपनायिषु ॥ नभेरीशंखवादेषुप्रहर्त्तव्यंकथंचन ॥ ३२ ॥ एवंतेसमयंकृत्वाकुरुपांडवसोमकाः॥ विस्मयंपरमंजग्मुःप्रेक्षमाणाःपरस्परम् ॥ ३३ ॥ निर्विश्यचमहात्मानस्ततस्तेपुरुषर्षभाः ॥ हृष्टरूपाःसुमनसोबभूवुःसहसैनिकाः॥ ३४ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिजंबूखंडविनिर्माणप०सैन्यशिक्षणेप्रथमोऽध्यायः ॥ १ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ ततःपूर्वापरेसैन्येसमीक्ष्यभगवान्ऋषिः॥ सर्ववेदविदांश्रेष्ठोव्यासःसत्यवतीसुतः॥ १ ॥ भविष्यतिरणेघोरेभरतानांपितामहः॥ प्रत्यक्षदर्शीभगवान्भूतभव्यभविष्यवित्॥ २ ॥

न्याय्यमित्यर्थः तथानकस्यचित्तुल्ययोगातिक्रमःस्यादिति भावः ॥ २८ ॥ गजधूर्गतःगजस्कंधगतः॥ २९॥ ३०॥ ३१॥ ३२॥ ३३॥ ३४ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेप्रथमोऽध्यायः ॥ १ ॥ ॥ ७ ॥ ॥ ततइति॥ १॥ भविष्यतिभाविनि ॥ २ ॥

॥ ३ ॥ हिंसंतीवनाशयिष्यंत्येव ॥ ४ ॥ पर्यायंवैपरीत्यं ॥ ५ ॥ निशामयपश्य ॥ ६ ॥ नपरोक्षमितिपाठेप्रत्यक्षं ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४॥ १५ ॥ १६ ॥ नगाग्रेषुदक्षायेषुसंपतंतिएकीभूयपतंति समवायानसंघान् ॥ १७॥ अभ्यर्थसमीपं क्रव्यादामांसभक्षकाःसृगालकाकादयः ॥ १८॥ वाशंतःशब्दंकुर्वंतः ॥ १९॥ २०॥ परिघाःपरिवेषाःकृष्णग्रीवाःश्वेतलोहितपर्वताश्च मध्येक

वैचित्रवीर्यंराजानंसरहस्यंब्रवीदिदम्॥ शोचंतमार्त्तंध्यायंतंपुत्राणामनयंतदा ॥ ३ ॥ ॥ व्यासउवाच ॥ ॥ राजन्परीतकालास्तेपुत्राश्चान्येचपार्थिवाः॥ तेहिंसंतीवसंग्रामेसमासाद्येतरेतरम् ॥ ४ ॥ तेषुकालपरीतेषुविनश्यत्स्वेवभारत ॥ कालपर्यायमाज्ञायमास्मशोकेमनःकृथाः॥ ५॥ यदिचेच्छसिसंग्रामेद्रष्टुमेतान्विशांपते ॥ चक्षुर्ददानितेपुत्रयुद्धंतत्रनिशामय ॥ ६ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ नरोचयेज्ञातिवधंद्रष्टुंब्रह्मर्षिसत्तम ॥ युद्धमेतत्त्वशेषेणश्रुणुयांतवतेजसा ॥ ७ ॥ वैशंपायनउवाच ॥ ॥ एतस्मिन्नेच्छतिद्रष्टुंसंग्रामंश्रोतुमिच्छति ॥ वराणामीश्वरोव्यासःसंजयायवरंददौ ॥ ८ ॥ एषतेसंजयोराजन्युद्धमेतद्दिष्यति ॥ एतस्यसर्वसंग्रामेनपरोक्षंभविष्यति ॥ ९ ॥ चक्षुषासंजयोराजन्दिव्येनैवसमन्वितः॥ कथयिष्यतितेयुद्धंसर्वज्ञश्चभविष्यति ॥ १० ॥ प्रकाशंवाऽप्रकाशंवादिवावायदिवानिशि॥ मनसाचिंतितमपिसर्ववेत्स्यतिसंजयः॥ ११ ॥ नैनंशस्त्राणिच्छेत्स्यंतिनैनंबाधिष्यतेश्रमः ॥ गावल्गणिरयंजीवन्युद्धादस्माद्विमोक्ष्यति ॥ १२ ॥ अहंतुकीर्तिमेतेषांकुरूणांभरतर्षभ ॥ पांडवानांचसर्वेषांप्रवक्ष्यामिभारत ॥ १३ ॥ दिष्टमेतन्नरव्याघ्रनाभिशोचितुमर्हसि ॥ नचैवशक्यंसंयंतुंयतोधर्मस्ततोजयः॥ १४ ॥ ॥ वैशंपायनउवाच ॥ ॥ एवमुक्त्वासभगवान्कुरूणांप्रपितामहः॥ पुनरेवमहाभागोधृतराष्ट्रमुवाचह ॥ १५ ॥ इहयुद्धेमहाराजभविष्यतिमहानृक्षयः॥ तथेहचनिमित्तानिभयदान्युपलक्षये ॥ १६ ॥ श्येनगृध्राश्वकाकाश्चकंकाश्चसहितावकैः॥ संपतंतिनगाग्रेषुसमवायांश्चकुर्वते ॥ १७ ॥ अभ्यग्रंचप्रशंसंतियुद्धमानंदिनोद्विजाः॥ क्रव्यादाभक्षयिष्यंतिमांसानिगजवाजिनाम् ॥ १८ ॥ निर्दयंचाभिवाशंतोभैरवाभयवेदिनः॥ कंकाःप्रयांतिमध्येनदक्षिणामभितोदिशम्॥ १९ ॥ उभेपूर्वापरेसंध्येनित्यंपश्यामिभारत॥ उदयास्तमनेसूर्यंकबंधैःपरिवारितम्॥ २० ॥ श्वेतलोहितपर्वताःकृष्णग्रीवाःसविद्युतः॥ त्रिवर्णाःपरिघाःसंधौभानुमंतमवारयन्॥ २१ ॥ ज्वलितार्केंदुनक्षत्रंनिर्विशेषदिनक्षयम्॥ अहोरात्रंमयादृष्टंतद्भयायभविष्यति ॥ २२ ॥

ण्णास्तनोवहिःश्वेतास्तनोवहिर्लोहिताइतित्रिवर्णाः संधौसंध्यायां अवारयन्अवेष्टयन् ॥ २१ ॥ निर्विशेषदिनक्षयंअहोरात्रं निश्चयेनविगतःशेषोयस्यतत्स्यतिथेःक्षयोयस्मिन् सूर्योदयद्वयास्पर्शीनीक्षयतिथिर्यस्मिन्अहोरात्रेतन्मयादृष्टं तदेवविशिनष्टि ज्वलितेति अर्केंद्वोर्नक्षत्रंममाबास्यायामुभाभ्यामाक्रांतंनक्षत्रंतदेवज्वलितंपापपहाक्रांतंयस्मिन् दर्शेक्षयतिथिःतन्नक्षत्रंचपापपहइत्यर्थंमहान् दुर्योगइत्यर्थः ॥ २२ ॥

पद्मवर्णेरक्तपद्मवर्णे लोहिनीयौर्भवनियथामंजिष्ठेतिश्रुतेर्दिवोरक्तत्वमशुभसूचकं ॥ २३ ॥ २४ ॥ वराहोगृहकोलोष्टपदंशोमार्जारस्तयोर्भूचरयोरप्यंतरिक्षेउत्प्लुत्ययुध्यतोःप्रणादं ॥ २५ ॥ २६ ॥ अयुक्ताअश्वैरयोजिताअपिप्रवर्त्तंतेचलंति महांतोरथामहारथाः ॥ २७ ॥ २८ ॥ गृहीतशस्त्राआत्तलोहालोहतुंडाइतियावत् शस्त्रमायुधलोहयोरित्यमरः चर्मिणोभृंगरिटिसंज्ञाःकृष्णशलभविशेषाः

अलक्ष्यःप्रभयाहीनःपौर्णमासींचकार्तिकीम्॥ चंद्रोभूदग्निवर्णश्चपद्मवर्णेनभस्तले॥ २३॥ स्वप्स्यंतिनिहतावीराभूमिमाददत्यपार्थिवाः॥ राजानोराजपुत्राश्च शूराःपरिघबाहवः॥ २४॥ अंतरिक्षेवराहस्यदृष्टदंशस्यचोभयोः॥ प्रणादंयुध्यतोराज्ञोरौद्रंनित्यंप्रलक्षये॥ २५॥ देवताप्रतिमाश्चैवकंपंतिचहसंतिच॥ वमंति रुधिरंचास्यैःस्विद्यंतिप्रपतंतिच॥ २६॥ अनाहताद्दुंदुभयःप्रणदंतिविशांपते॥ अयुक्ताश्चप्रवर्तंतेक्षत्रियाणांमहारथाः॥ २७॥ कोकिलाःशतपत्राश्चचाषाभासाःशुकास्तथा॥ सारसाश्चमयूराश्चवाचोमुंचंतिदारुणाः॥ २८॥ गृहीतशस्त्राःक्रोशंतिचर्मिणोवाजिपृष्ठगाः॥ अरुणोदयेप्रदृश्यंतेशतशःशलभव्रजाः॥ २९॥ उभेसंध्येप्रकाशंतेदिशोदाहसमन्विते॥ पर्जन्यःपांसुवर्षीचमांसवर्षीचभारत॥ ३०॥ याचैषाविश्रुताराजंस्त्रैलोक्येसाधुसंमता॥ अरुंधतीतयाप्येषवसिष्ठः पृष्ठतःकृतः॥ ३१॥ रोहिर्णीपीडयन्नेषस्थितोराजन्शनैश्चरः॥ व्यावर्त्तंलक्ष्मसोमस्यभविष्यतिमहद्भयम्॥ ३२॥ अनभ्रेचमहाघोरस्तनितःश्रूयतेस्वनः॥ वाहनानांचरुदतांनिपतंत्यश्रुबिंदवः॥ ३३॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिजंबूखंडविनिर्माणपर्वणिश्रीवेदव्यासदर्शनेद्वितीयोऽध्यायः॥ २॥ ॥ ७॥

व्यासउवाच॥ ॥खरागोषुप्रजायंतेरमंतेमात्रभिःसुताः॥ अनार्तवंपुष्पफलंदर्शयंतिवनद्रुमाः॥ १॥ गर्भिण्योऽजातपुत्राश्चजनयंतिविभीषणान्॥ क्रव्यादाः पक्षिभिश्चापिसहाश्नंतिपरस्परम्॥ २॥ त्रिविषाणाश्चतुर्नेत्राःपंचपादाद्विमेहनाः॥ द्विशीर्षाश्चद्विपुच्छाश्चदंष्ट्रिणःपशवोऽशिवाः॥३॥ जायंतेविकृतास्याश्चव्याहरंतोऽशिवागिरः॥ त्रिपदाःशिखिनस्तार्क्ष्याश्चतुर्दंष्ट्राविषाणिनः॥ ४॥ तथैवान्याश्चदृश्यंतेस्त्रियोवैब्रह्मवादिनाम्॥ वैनतेयान्मयूरांश्चजनयंतिपुरेतव॥ ५॥ गोवत्संवडवासूतेश्वास्तुगालंमहीपते॥ कुक्कुरान्करभाश्चैवशुकाश्वाशुभवादिनः॥ ६॥

चर्मीफलकपाणौस्याद्भृंगैरिटावपीतिमेदिनी तेवाजिपृष्ठगाअश्वांस्तुदंतोदृश्यंतइत्यर्थः ॥ २९ ॥ ३० ॥ ३१ ॥ व्यावर्त्तनंनष्टं लक्ष्महीनश्चंद्रोदृश्यतइत्यर्थः ॥३२॥स्तनितःस्वनोगर्जितरूपःशब्दः ॥३३॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ खराःप्रजायंतेमिथुनीभवंति उत्पद्यंतइतिवा ॥ १ ॥ क्रव्यादाःसारमेयादयः ॥ २ ॥ ३ ॥ विषाणिनः शृंगवंतस्तार्क्ष्याएव ॥ ४ ॥ ५ वडवाअश्वा श्वाशुनी करभोमृगविशेषः करभःकलभोवाटापदेप्रोक्तोमृगांतरेइतिविश्वः ॥ ६ ॥

प्रजायतेजनयंति ॥ ७ ॥ पृथग्जनस्यनीचजनस्यसंबंधिनःक्षुद्रकाःव्यंगाःचंडालादिषुजाताःकाणकुब्जादयइत्यर्थः क्षुद्राव्यंगानटीत्यादिमेदिनी ॥ ८ ॥ ९ ॥ नगराणिकृत्रिमाणिशिशवएवावबृंहंति पद्मानिमहांतिउत्पलानिक्षुद्राणीतिभेदः कुमुदानिचंद्रोदयविकासीनितान्येव ॥ १० ॥ वर्त्ततेवर्त्स्यतेदीप्यतइत्यर्थः नित्यंदावदाहोभवतीतियावत् कल्पतइतिपाठेपिसएवार्थः कार्तिक्याःपरंहिसंयामारंभस्तत्र तुलास्थमर्कंराहुरुपैति ॥ ११ ॥ तदैवश्वेतोग्रहःकेतुश्चित्रामतिकामतिस्वात्यादीवर्त्तते नित्यंसमसमकस्थौराहुकेतूइदानीमेकराशिगतौमहानिष्टसूचकाविति भावः ॥ १२ ॥ धूमकेतुरुपग्रहविशेषःसप्तपुप्यंक्षत्रियनक्षत्रमाक्रम्यतिष्ठति तथावक्ष्यमाणरीत्याज्येष्ठास्थेनापिकेतुनापुष्योविद्धस्तथाचस्वनक्षत्रेक्रूराकांतेक्रूरविद्धेचसत्यवश्यंक्षत्रियाणांनाशोभवतीत्यर्थः यथोक्तं कृत्तिकायांतथापुष्येरेवत्यांच

स्त्रियःकाश्चित्प्रजायंतेचतस्रःपंचकन्यकाः॥ जातमात्राश्चनृत्यंतिगायंतिचहसंतिच॥ ७॥ पृथग्जनस्यसर्वस्यक्षुद्रकाःप्रहसंतिच॥ नृत्यंतिपरिगायंतिवेदयंतो महद्भयम्॥ ८॥ प्रतिमाश्चालिखंत्येताःसशस्त्राःकालचोदिताः॥ अन्योन्यमभिधावंतिशिशवोदंडपाणयः॥ ९॥ अन्योन्यमभिहृद्यंतिनगराणियुयुत्सवः॥ पद्मोत्पलानिवृक्षेषुजायंतेकुमुदानिच॥ १०॥ विष्वग्वाताश्चवांत्युग्रारजोनाप्युपशाम्यति॥ अभीक्ष्णंवर्त्ततेभूमिरर्कंराहुरुपैतिच॥ ११॥ श्वेतोग्रहस्तथाचित्रांसमतिक्रम्यतिष्ठति॥ अभावंहविशेषेणकुरूणांतत्रपश्यति॥ १२॥ धूमकेतुर्महाघोरःपुष्यंचाक्रम्यतिष्ठति॥ सेनयोरशिवंघोरंकरिष्यतिमहाग्रहः॥ १३॥ मघास्वंगारकोवक्रःश्रवणेचबृहस्पतिः॥ भगंनक्षत्रमाक्रम्यसूर्यपुत्रेणपीड्यते॥ १४॥ शुक्रःप्रोष्ठपदेपूर्वेसमारुह्यविरोचते॥ उत्तरेतुपरिक्रम्यसहितःसमुदीक्षते॥ १५॥ श्वेतोग्रहःप्रज्वलितःसधूमइवपावकः॥ ऐंद्रंतेजस्विनक्षत्रंज्येष्ठामाक्रम्यतिष्ठति॥ १६॥ ध्रुवंप्रज्वलितोघोरमपसव्यंप्रवर्तते॥ रोहिर्णीपीडयत्येवमुभौचशशिभास्करौ॥ चित्रास्वात्यंतरेचैवविष्ठितःपरुषग्रहः॥ १७॥ वक्रानुवक्रंकृत्वाचश्रवणंपावकप्रभः॥ ब्रह्मराशिसमावृत्यलोहितांगोव्यवस्थितः॥ १८॥ सर्वसस्यपरिच्छन्नापृथिवीसस्यमालिनी॥ पंचशीर्षायवाश्चापिशतशीर्षाश्चशालयः॥ १९॥

पुनर्वसौ वेधसतिक्रमाद्वेधोवर्णेपुत्राह्मणादिक्षितिनरपतिविजये ॥ १३ ॥ भगंनक्षत्रंपूर्वाफल्गुनी श्रुतिमतेत्तूत्तराफल्गुनी ॥ १४ ॥ पूर्वेप्रोष्ठपदेपूर्वाभाद्रपदानक्षत्रंसमारुह्यपरिक्रम्यपरिघाख्यउपग्रहस्तेन सहितःउत्तरेउत्तराभाद्रपदानक्षत्रंउदीक्षतेआक्रांतुमिच्छति ॥ १५ ॥ श्वेतोद्वितीयउपग्रहःकेतुसंज्ञःऐंद्रंज्येष्ठांनक्षत्रमितियोज्यं ॥ १६ ॥ ध्रुवमिति परुषग्रहोराहुरेकनक्षत्रस्थौशशिभास्करौपीडयति अपसव्यंप्रवर्त्ततेसर्वदावक्रीसन् सर्वतोभद्रचक्रेवेधेनस्वातीस्थःसन्रोहिणीनक्षत्रंचपीडयतीत्यर्थः ॥ १७ ॥ वक्रेति तत्रैवसर्वतोभद्रचक्रेमघास्थोलोहितांगोंऽगारकोवक्रानुवक्रंकृत्वापुनःपुनर्वक्रीभूयब्रह्मणा बृहस्पतिनाकांतंराशिनक्षत्रंश्रवणंसमाहृत्यसम्यक्पूर्णदृष्ट्याविद्धातिष्ठति ॥ १८ ॥ परिच्छन्नाआच्छादिता पंचशीर्षाणिशबीसदृशानियेषांतेपंचशीर्षाः ॥ १९ ॥

॥ २० ॥ २१ ॥ २२ ॥ शोणितमयाआवर्त्ताःयस्यां रक्तप्रवाहवतीत्यर्थः अतएवध्वजाएवउडुपानिक्षुद्रनावस्तैःसमाकुला वैशसेविरोधे ॥ २३ ॥ २४ ॥ छर्दयन्प्रोतॄणांछेशकरत्वेनरक्तवमनंकारयन्नि व ॥ २५ ॥ शस्त्राणिप्रभयाज्वलंतीव ॥ २६ ॥ संवत्सरेति पूर्वंश्रवणस्थोबृहस्पतिर्भगनक्षत्रस्थःसूर्यपुत्रइत्युक्तावुभौविशाखासमीपेतिर्यग्वेधेनशतपदेचकेविशाखानक्षत्रंविध्यतइत्यर्थः तथाहि तस्मिंश्च केखखेखोइतिश्रवणांत्यपादत्रयंव्युत्क्रमेणविशाखाद्यपादत्रयेणतितुतेइत्यनेनविध्यते तृतीयेनचतुर्थोद्वितीयेनतृतीयःप्रथमेनद्वितीयइति तथाउत्तराफल्गुन्याअंत्यपादत्रयेणटोपापीत्येनेनक्रमेणतितुतेइ

प्रधानाःसर्वलोकस्ययास्वायत्तमिदंजगत्॥तागावःप्रस्रुतावत्सैःशोणितंप्रक्षरंत्युत॥ २०॥ निश्वेरुरर्चिषश्चापात्खड्गाश्चज्वलिताभृशम्॥ व्यक्तंपश्यंतिशस्त्राणिसंग्रामंसमुपस्थितम्॥२१॥ अग्निवर्णाययाभासःशस्त्राणामुदकस्यच॥कवचानांध्वजानांचप्रविष्यंतिमहाक्षयः॥ २२॥ पृथिवीशोणितावर्ताध्वजोडुप समाकुला॥ कुरूणांवैशसेराजन्पांडवैःसहभारत॥ २३॥ दिक्षुप्रज्वलितास्याश्चव्याहरंतिमृगद्विजाः॥ अत्याहितंदर्शयंतोवेदयंतिमहद्भयम्॥ २४॥एकपक्षा क्षिचरणःशकुनिःखचरोनिशि॥ रौद्रंवदतिसंरब्धःशोणितंछर्दयन्निव ॥ २५॥ शस्त्राणिचैवराजेंद्रप्रज्वलंतीवसंप्रति॥ सप्तर्षीणामुदाराणांसमवच्छाद्यतेप्रभा ॥ २६॥ संवत्सरस्थायिनौचग्रहौप्रज्वलितावुभौ ॥ विशाखायाःसमीपस्थौबृस्पतिशनैश्चरौ ॥ २७॥ चंद्रादित्यावुभौग्रस्तावेकाह्नाहित्रयोदशीम्॥ अपर्वणि ग्रहंयातौप्रजासंक्षयमिच्छतः॥ २८॥ अशोभितादिशःसर्वाःपांसुवर्षैःसमंततः ॥ उत्पातमेघारौद्राश्चरात्रौवर्षंतिशोणितम् ॥ २९ ॥ कृत्तिकांपीडयंस्तीक्ष्णैर्न क्षत्रंपृथिवीपते॥ अभीक्ष्णवातावायंतेधूमकेतुमवस्थिताः॥ ३० ॥

तिविशाखाद्यपादत्रयंतत्रैवचकेविध्यतइतित्वकविदांप्रत्यक्षं ॥ २७॥ चंद्रादित्याविति अपर्वणिपर्वदर्शाख्यंपंचदशेह्निभवतिएकतिथिरद्धौषोडशेवाएकतिथिक्षयेचतुर्दशेवाह्निभवति तिथिद्वयक्षयस्तु लोकेऽत्यंतमप्रसिद्धइत्यपर्वणीत्युक्तं ग्रहंयातौराहुणाग्रहणंग्राप्तौ एतदेवप्रजासंक्षयहेतुत्वेनशास्त्रेदृष्टमित्याह प्रजेति ॥ २८ ॥ अशोभिताअमंगलाः ॥ २९ ॥ चित्रास्वात्यंतरस्थःपरुषोग्रहोरौद्रिणीपीड यतीत्युक्तंतत्रचित्रांशेस्थित्वारोहिणीमष्टादशत्वेनसामुदायिकनक्षत्रंपीडयति स्वात्यंशेस्थित्वाकृत्तिकांषोडशकत्वेनसांघातिकनक्षत्रंपीडयति सर्वतोभद्रचक्रेतथादर्शनात् तदेतदाहकृत्तिकांमित्यर्धेन ती क्ष्णैःक्रूरैःकर्मभिरुपलक्षितोराहुरित्यर्थः धूमकेतुमुत्पातविशेषमनुलक्ष्यावस्थिताः ॥ ३० ॥

एतेवायवः विषमंवैरंयुद्धमितियावत् त्रिष्विति त्रिष्वपिच्छत्रेषुनरपतिविजयप्रोक्तेषु यथाःश्विन्यादिभिर्नवभिर्नक्षत्रैरौदीच्यस्याश्वपतेश्छत्रे चामरंकलशोवीणाच्छवंदंडःपतद्ग्रहआसनंकीलकंरज्जुरित्यव यवाःकल्प्यंते एवंमघादिनवकेनप्राच्यस्यगजपतेः तथामूलादिनवकेनदक्षिणस्यनरपतेः एवंविधेषुत्रिष्वपिच्छत्रेषुतत्रापिसर्वेषुनक्षत्रेषुनास्तिक्षत्रमेभिरितियोगेनक्षत्रविरोधिषुनक्षत्रेषुनक्षत्रप्रणिचतानिनक्ष त्राण्यिभानितेषुकूराक्रांतत्वादिनाक्षत्रियाजावकरेषुनक्षत्रेषुगृध्रः पापग्रहःशीर्षैकलशस्थानंसंपतते तेनच्छत्रभयस्यतदंतर्गतानामन्येषांचमांडलिकानांराज्ञांनाशःसूच्यते तत्रैवंसतिमघासुकुजोस्ति तथाय दाभगनक्षत्रंपूर्वाफल्गुनीनदातत्रत्यःशनैश्चरोऽवश्ययुद्धादिनागजपतेर्महद्भयंकरिष्यति यथोक्तंतत्रैव कलशस्थेभवेद्युद्धंरणेरोगेमहद्भयं घातपातादिकंसर्वंजायतेनात्रसंशयइति कलशस्थेशनैश्चरेइतिशेषः तथाविशाखाज्येष्ठेअप्यत्रैवच्छत्रेकूरविद्धेकूराक्रांतेवर्तेतइत्यवश्यंगजपतेश्छत्रभंगः एवंप्रथमच्छत्रेपिकृत्तिकारोहिण्योःपुण्यस्यचपीडास्ति तथांतिमच्छत्रेश्रवणप्रोष्ठपदयोर्बृहस्पतिशुक्रौवर्त्तेइतितथा पितावनिष्टफलावेव एवंपूर्वस्यनिरन्वयोनाशः इतरयोश्छत्रयोराजनाशेपितत्रुत्राणांछत्रप्राप्तिरस्तीतिविशेषः तथाचमध्यमच्छत्रेमघासुसौमःस्वात्यांसूर्यचंद्रराहवः पूर्वस्यामुत्तरस्यांवाफल्गुन्यांशनैश्चरः

विषमंजनयंत्येतआक्रंदजननंमहत्॥ त्रिषुसर्वेषुनक्षत्रनक्षत्रेषुविशांपते॥ गृध्रःसंपततेशीर्षेजनयन्भयमुत्तमम्॥३१॥चतुर्दशींपंचदशींभूतपूर्वांचषोडशीं॥ इमांतुनाभिजानेहममावास्यांत्रयोदशीम्॥ चंद्रसूर्यावुभौग्रस्तावेकमासींत्रयोदशीम्॥ ३२॥ अपर्वणिग्रहेणैतौप्रजाःसंक्षपयिष्यतः॥ मांसवर्षंपुनस्तीव्रमा सीत्कृष्णचतुर्दशीम्॥ शोणितैर्वक्रसंपूर्णाअहमास्तत्ररात्रसाः॥ ३३॥

विशाखायांवेधेनबृहस्पतिश्चास्ति तेषांफलंतत्रैवोक्तं क्रूरग्रहचतुष्कंचबुधचंद्रेणसंयुतं पूर्वच्छत्रविनाशायकथितंपूर्वसूरिभिरिति तत्रसिंधुसागरसंगमाद्गोदावरीसागरसंगमपर्यंतमेकारेखातद्दक्षिणेनरपतिः ततएवकर्णप्रावरणपर्यंतंद्वितीया तदुत्तरेगजपतिः तयोरेखयोर्मध्येऽश्वपतिःहस्तिनापुरंतुईशानदेशस्थत्वाद्गंगाद्वारात्पूर्वभागेऽस्तीतिगजपतिच्छत्रांतर्गतमेव हरिद्वारंतुदेहलीदीपन्यायेनाश्वपतिगजपत्यो रंतर्गतमिति तेनहस्तिनापुरस्थानांप्राच्यत्वादत्यंतंक्षयस्तथैवपांचालादीनामपीति एतच्चनरपतिविजयदर्शिनांस्पष्टं ईशानदेशाःकूर्मचक्रेप्रोक्ताः रेवतीअश्विनीयाम्येपादेईशानगोचरे गंगाद्वारंकुरुक्षेत्रंश्री कंठंहस्तिनापुरं अश्ववक्त्रैकपादाश्वकर्णप्रावरणास्तथा विनश्यंतिचतेसर्वेदेशास्त्वीशानगोचरेइतिदिक् ॥ ३१ ॥ चंद्रादित्यावुभौग्रस्तावित्येतेनश्लोकेनोक्तमर्थंविशदयतिद्वाभ्यां चतुर्दशीमिति त्रयोदशीं त्रयोदशानाममावास्यांभूतपूर्वांनाभिजानेनजानामि अतिभूयसाकालेनायंदुर्योगआगतइतिभावः एकमासींएकस्मिन्नेवमासेभवां पूर्वत्रयोदश्यांराज्ञौपक्षसमाप्तासूर्यग्रहणमेवोक्तं इदानीं तुएकस्मिन्मासेचंद्रः पूर्णमास्यांराहुणाग्रहेणग्रस्तःसूर्योऽमावास्यायां यदासूर्योग्रस्तस्तदाचंद्रोपिग्रस्तएव दर्शेतयोःसंहतत्वात् ॥ ३२ ॥ अपर्वणीति लोकाग्रसिद्धपर्वणीतिपूर्ववत्ज्ञेयं ॥ ३३ ॥

प्रतिस्रोतसोमहानद्यःविपरीतप्रवाहाः विभक्तिलोपआर्षः विशेषणंविशेष्येणबहुलमितिसमासोवा क्रियाविशेषणंवा कूपाजलाशयाःकूर्दंतिक्रीडंतिवातैःक्षुभ्यंतइत्यर्थः ॥३४॥अनयंअनीतिफलं ॥३५॥ महोल्काग्निःदीप्ताग्नावात्शणकाष्ठज्वालयाराशौविनिःसृत्यगृहाद्बहिर्निर्गत्य ॥ ३६ ॥ ३७ ॥ महाशब्दः कियतइतिशेषः महाभूताद्भीभूताः अभूतताद्भावेमहच्छब्दाद्भवतौपरेडाच् मर्यादामुल्लंघितवंत

प्रतिस्रोतोमहानद्यःसरितःशोणितोदकाः ॥ फेनायमानाःकूपाश्चकूर्दंतिदृषभाइव ॥ ३४ ॥ पतंत्युल्काःसनिर्घाताःशक्राशनिसमप्रभाः ॥ अद्यचैवनिशांव्युष्टामनयंसमवाप्स्यथ ॥३५॥ विनिःसृत्यमहोल्काग्निस्तिमिरंसर्वतोदिशम् ॥ अन्योन्यमुपतिष्ठद्भिस्तत्रचोक्तंमहर्षिभिः ॥३६॥ भूमिपालसहस्राणांभूमिःपास्यतिशोणितम् ॥ कैलासमंदराभ्यांतुतथाहिमवताविभो ॥ ३७ ॥ सहस्रशोमहाशब्दःशिखराणिपतंतिच ॥ महाभूताभूमिकंपेचत्वारःसागराःपृथक् ॥ वेलामुद्वर्त्तयंतीवक्षोभयंतोवसुंधराम् ॥ ३८ ॥ वृक्षानुन्मथ्यवांत्युग्रावाताःशर्करकर्षिणः ॥ आभग्नाःसुमहावातैरशनीभिःसमाहताः ॥ ३९ ॥ वृक्षाःपतंतिचैत्याश्चग्रामेषु नगरेषुच ॥ नीललोहितपीतश्चभवत्यग्निर्हुतोद्विजैः ॥ ४० ॥ वामार्चिर्दुष्टगंधश्चमुंचन्वैदारुणंस्वनम् ॥ स्पर्शागंधारसाश्चैवविपरीतामहीपते ॥ ४१ ॥ धूमंध्वजाः प्रमुंचंतिकंपमानामुहुर्मुहुः ॥ मुंचंत्यंगारवर्षंचभेर्यश्चपटहास्तथा ॥ ४२ ॥ शिखराणांसहृद्धानामुपरिष्टात्समंततः ॥ वायसाश्चरुवंत्युग्रंवामंमंडलमाश्रिताः ॥ ४३ ॥ पक्कापक्केतिसुभृशंवाशास्यंतेवयांसिच ॥ निलीयंतेध्वजाग्रेषुक्षयायाचपृथिवीक्षिताम् ॥ ४४ ॥ ध्यायंतःप्रकिरंतश्चव्यालावेपथुसंयुताः ॥ दीनास्तुरंगमाः सर्वेवारणाःसलिलाश्रयाः ॥ ४५ ॥ एतच्छ्रुत्वाभवानत्रप्राप्तकालंव्यवस्यताम् ॥ यथालोकःसमुच्छेदंनायंगच्छेतभारत ॥ ४६ ॥ ॥ वैशंपायनउवाच ॥ ॥ पितुर्वचोनिशम्यैतद्धृतराष्ट्रोब्रवीदिदम् ॥ दिष्टमेतत्पुरामन्येभविष्यतिनरक्षयः ॥ ४७ ॥ राजानःक्षत्रधर्मेणयदिवध्यंतिसंयुगे ॥ वीरलोकंसमासाद्यसुखंप्राप्स्यंतिकेवलम् ॥ ४८ ॥ इहकीर्तिंपरेलोकेदीर्घकालंमहत्सुखम् ॥ प्राप्स्यंतिपुरुषव्याघ्राःप्राणांस्त्यक्त्वामहाहवे ॥ ४९ ॥ ॥ वैशंपायनउवाच ॥ ॥ एवंमुनिस्तयेत्युक्त्वा कर्वींद्रोराजसत्तम ॥ धृतराष्ट्रेणपुत्रेणध्यानमन्वगमत्परम् ॥ ५० ॥

इवेत्यर्थः ॥ ३८ ॥ अशनीभिःअशनिर्द्वयोरितिकोशात्स्त्रीत्वं ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ शिखराणांद्रुमाणां शिखरोस्त्रीद्रुमापेचेतिमेदिनी ॥ ४३ ॥ पक्कापक्केति विनाशाग्निमुखानांपरस्परंयुद्धमिति पक्वंपरिणतेपिस्याद्विनाशाग्निमुखेत्रिष्विति मेदिनी पक्कापक्केतिपक्षिरुतानुकरणं वावाश्यंतेअतिशयेनशब्दंकुर्वंति ॥ ४४ ॥ प्रकिरंतःशब्दन्मूत्रमितिशेषः व्यालाःदुष्टहस्तिनः सलिलाश्रयाःअत्यंतंप्रस्वेदयुक्ताः ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ मुनिःएवंतथेत्युक्त्वेतिसंबंधः धृतराष्ट्रेणहेतुना तदर्थमित्यर्थः ध्यानंचिंतां ॥ ५० ॥

संक्षयतेक्षिणोति ॥ ५१ ॥ ५२ ॥ धर्म्यंधर्मादनपेतंपंथानंदेशयशिक्षय ॥ ५३ ॥ अयंदुर्योधनः ॥ ५४ ॥ सःधर्मः एनंधर्महंतारंशक्येनापदिसत्यांकिमर्थमापदीवउन्मार्गगामीभवसीत्यर्थः ॥ ५५ ॥ ५६ ॥ परेणअतिशयेन ॥ ५७ ॥ ५८ ॥ आक्षिप्यवाक्यंब्रुवनीतिसंबंधः ॥ ५९ ॥ वेत्ताज्ञातास्मीतिशेषः ज्ञावाज्ञावौस्थितिविनाशौपरेषांस्वेषांच ॥ ६० ॥ गतिःपरायणं दर्शयितावपदेष्टा ॥ ६१ ॥ त्वंहिधर्मा

समुद्वर्त्ततयाध्यात्वापुनरेवाब्रवीद्वचः ॥ असंशयंपार्थिवेंद्रकालःसंक्षयतेजगत् ॥ ५१ ॥ सृजतेचपुनर्लोकान्नेहविद्यतिशाश्वतम् ॥ ज्ञातीनांवैकुरूणांचसंबंधिसुहृदांतया ॥ ५२ ॥ धर्म्यंदेशयपंथानंसमर्थोत्यसिवारणे ॥ क्षुद्रंजातिवधंप्राहुर्माकुरुष्वममाप्रियम् ॥ ५३ ॥ कालोयंपुत्ररूपेणतवजातोविशांपते ॥ नवधःपूज्यतेवेदेहिंतंनैवकर्यंचन ॥ ५४ ॥ हन्यात्सएनंयोहन्यात्कुलधर्मस्विकांतनुम् ॥ कालेनोत्पथगंतासिशक्येसतियथापदि ॥ ५५ ॥ कुलस्यास्यविनाशायतथैवचमहीक्षिताम् ॥ अनर्योराज्यरूपेणतवजातोविशांपते ॥ ५६ ॥ लुप्तधर्मापरेणासिधर्मंदर्शयवैसुतान् ॥ किंतेराज्येनदुर्धर्षयेनप्राप्तोसिकिल्बिषं ॥ ५७ ॥ यशोधर्मंचकीर्तिंचपालयन्स्वर्गमाप्स्यसि ॥ लभंतांपांडवाराज्यंसमंगच्छंतुकौरवाः ॥ ५८ ॥ एवंब्रुवतिविप्रेंद्रेधृतराष्ट्रोंबिकासुतः ॥ आक्षिप्यवाक्यंवाक्यज्ञोवाक्यंचैवाब्रवीत्पुनः ॥ ५९ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ यथाभवान्वेत्तियथैववेत्ताभावाभावौविदितौमेयथार्थौ ॥ स्वार्थेहिसंमुत्यतितातलोकोमांचापिलोकात्मकमेवविद्धि ॥ ६० ॥ प्रसादयेत्वामतुलप्रभावंत्वंनोगतिर्दर्शयिताचधीरः ॥ नचापितेमद्दृशगामहर्षेनचाधर्मकर्तुमहीहिमेमतिः ॥ ६१ ॥ त्वंहिधर्मप्रवृतिश्चयशःकीर्तिश्चभारती ॥ कुरूणांपांडवानांचमान्यश्चापिपितामहः ॥ ६२ ॥ ॥ व्यासउवाच ॥ ॥ वैचित्रवीर्यनृपतेयत्तेमनसिवर्तते ॥ अग्निधत्स्वयथाकामंछेत्तास्मितवसंशयम् ॥ ६३ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ यानिलिंगानिसंग्रामेभवंतिविजयिष्यताम् ॥ तानिसर्वाणिभगवञ्छ्रोतुमिच्छामितत्त्वतः ॥ ६४ ॥ ॥ व्यासउवाच ॥ ॥ प्रसन्नभाःपावकऊर्ध्वरश्मिःप्रदक्षिणावर्तशिखोविधूमः ॥ पुण्यागंधाश्चाहुतीनांप्रवांतिजयस्यैतद्भाविनोरूपमाहुः ॥ ६५ ॥ ॥ गंभीरघोषाश्वमहास्वनाश्वशंखाश्च दंगाश्वनदंतियत्र ॥ विशुद्धरश्मिस्तपनःशशीचजयस्यैतद्भाविनोरूपमाहुः ॥ ६६ ॥ इष्टावाचःप्रस्तावायसानांसंप्रस्थितानांचगमिष्यतांच ॥ येपृष्ठतस्तेत्वरयंतिराजन्येचाग्रतस्तेप्रतिषेधयंति ॥ ६७ ॥

दीहेतुरित्यर्थः ॥ ६२ ॥ ६३ ॥ ६४ ॥ कृपंगमकंचिह्नं ॥ ६५ ॥ ६६ ॥ इष्टाइति येपृष्ठतोभाषमाणाबायसास्तेगंतारंत्वरयंतिसिद्धिसूचकाइत्यर्थः येपुरतोभाषमाणास्तेगमननिषेधंतीत्यर्थः ॥ ६७ ॥

॥ ६८ ॥ ६९ ॥ ७० ॥ प्रविष्टस्य परसैन्यमितिशेषः इष्टामारितोमारितइति दक्षिणाःदाक्ष्ययुक्ताहतोसीहतोसित्याद्याः पश्चादर्थंपाश्चात्यंप्रयोजनंजयाख्यंसंधारयंतिनिश्चिन्वंति याश्चाग्रेप्रतिषेधिका मायुद्धास्त्वमरिप्यसीत्येवंजातीयकास्ताअपिमरणस्यैवसूचिकास्ताश्चदुर्योधनंप्रत्येवप्रवर्त्ततइतिभावः ॥ ७१ ॥ ७२ ॥ अनुगाःअनुकूलाः ॥ ७३ ॥ ७४ ॥ ७५॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ उपायविजयंलाभपूर्वकंजयंसाम्नाप्रार्थनयादानेनवा शत्रुणावाचाप्रार्थितस्यधनेनवासंतर्पितस्यमुख्योजयः शत्रुंभेदयतोमध्यमः निघ्नतोऽधमइत्यर्थः ॥ ८१ ॥ सन्निपातोयोधानांसंघर्षः व्यवधूताः दारा

कल्याणवाचःशकुनाराजहंसाःशुकाःक्रौंचाःशतपत्राश्चयत्र ॥ प्रदक्षिणाश्चैवभवंतिसंख्येध्रुवंजयस्तत्रवदंतिविप्राः ॥ ६८ ॥ अलंकारैःकवचैःकेतुभिश्चसुखप्रणादैर्हेषितैर्वाहयानाम् ॥ भ्राजिष्मतीदुष्प्रतिवीक्षणीयायेषांचमूस्तेविजयंतिशत्रून् ॥६९॥ हृष्टावाचस्तथासत्त्वंयोधानांयत्रभारत ॥ नम्लायंतिस्रजश्चैवतेतरंतिरणोदधिम् ॥ ७० ॥ इष्टावाचःप्रविष्टस्यदक्षिणाःप्रविविक्षतः ॥ पश्चात्संधारयंत्यर्थमग्रेचप्रतिषेधिकाः ॥ ७१ ॥ शब्दरूपरसस्पर्शगंधाश्चाविकृताःशुभाः ॥ सदाहर्षश्चयोधानांजयतामिहलक्षणम् ॥ ७२ ॥ अनुगावायवोवांतितथाभ्राणिवयांसिच ॥ अनुप्लवंतिमेघाश्चतथैवेंद्रधनूंषिच ॥ ७३ ॥ एतानिजयमानानांलक्षणानिविशांपते ॥ भवंतिविपरीतानिमुमूर्षूणांजनाधिप ॥ ७४ ॥ अल्पायांवामहत्यांवासेनायामितिनिश्चयः ॥ हर्षोयोधगणस्यैकोजयलक्षणमुच्यते ॥ ७५ ॥ एकोदीर्णोदारयतिसेनांसुमहतीमपि ॥ तांदीर्णामनुदीर्यंतेयोधाःशूरतराअपि ॥ ७६ ॥ दुर्निवर्त्यातदाचैवप्रभग्नामहतीचमूः ॥ अपामिवमहावेगास्त्रस्तामृगगणाइव ॥ ७७ ॥ नैवशक्यासमाधातुंसन्निपातेमहाचमूः ॥ दीर्णामित्येवदीर्यंतेसुविद्वांसोपिभारत ॥ ७८ ॥ भीतान्भग्नांश्चसंप्रेक्ष्यभयंभूयोभिवर्द्धते ॥ प्रभग्नासहसाराजन्दिशोविद्रवतेचमूः ॥ ७९ ॥ नैवस्थापयितुंशक्याशूरैरपिमहाचमूः ॥ सत्कृत्यमहतींसेनांचतुरंगांमहीपतिः ॥ उपायपूर्वंमेधावीयतेतसततोत्थितः ॥ ८० ॥ उपायविजयंश्रेष्ठमाहुर्भेदेनमध्यमम् ॥ जघन्यएषविजयोयोयुद्धेनविशांपते ॥ ८१ ॥ महान्दोषःसन्निपातस्ततस्याद्यःक्षयउच्यते ॥ परस्परज्ञाःसंहृष्टाव्यवधूताःसुनिश्चिताः ॥ ८२ ॥ अपिपंचाशतंशूराम्रद्नंतिमहतींचमूम् ॥ अपिवापंचषट्सप्तविजयंत्यनिवर्त्तिनः ॥ ८३ ॥ नवैनतेयोगरुडःप्रशंसतिमहाजनम् ॥ दृष्ट्वासुपर्णोऽपचितिंमहत्याअपिभारत ॥ ८४ ॥

दिष्वनासक्ताः ॥ ८२ ॥ ८३ ॥ शूराणांसहायसंपत्तिर्नापेक्षितेत्यत्रदृष्टांतमाह नवैनतेयइति महत्याअपिसेनायाअपचितिंप्रतिकारंनाशंवाएकेनैवात्मनाकर्त्तुंशक्यंदृष्ट्वाआलोच्यसुपर्णःशोभनपतत्रोगरुडो नाम तोवैनतेयोविनतायाःपुत्रोमहाजनंबहुजनसमूहंनप्रशंसतिनकामयतेइत्यर्थः भवेदपचितिःपूजाव्ययनिष्कृतिहानिष्विति मेदिनी शूराणांनसहायापेक्षास्तीत्यक्षौहिणीबाहुल्यान्मत्पुत्राणांजयोऽवश्यंभावीति त्वयानमंतव्यमितिभावः ॥ ८४ ॥

॥ ८५ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेतृतीयोऽध्यायः ॥ ३ ॥ ॥४॥ ॥ एवमुक्त्वेति ॥ १ ॥ २ ॥ ३ ॥ नवाशाम्यंतिनैवशाम्यंतियमक्षयंयमलोकं ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ दिव्येति यथादीपेनांधकारेनाशितेचक्षुषाघटोदृश्यतेएवंधीवृत्त्यासर्वविषयावरकाज्ञानतमसिनाशितेसतिचिदात्मरूपेणचक्षुषासर्वंप्रकाशतइत्यर्थः ॥ ८ ॥ शास्त्रचक्षुरिति यदाऽहंब्रह्मास्मीतिवाक्योत्थयाधियात्मानंयोगीपश्यतितदांऽधोऽप्यनंधोभवति तथाचश्रुतिः तंवाएतंसेतुंतीर्त्वाऽधःसन्ननंधोभवतीति सेतुंमर्यादाविधारकंपरमेश्वरंतीर्त्वाप्राप्येतिश्रुतिपदयोरर्थः अनेनैवाभिप्रायेणावेक्षस्वेत्याह नम

नबाहुल्येनसेनायाजयोभवतिनित्यशः ॥ अध्रुवोहिजयोनामदैवंचात्रपरायणम् ॥ जयवंतोहिसंग्रामेकृतकृत्याभवंतिहि ॥ ८५ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिजंबूखंडविनिर्माणप० निमित्ताख्यानेतृतीयोऽध्यायः ॥ ३ ॥ ॥४॥ ॥ वैशंपायनउवाच ॥ ॥ एवमुक्त्वाययौव्यासोधृतराष्ट्रायधीमते ॥ धृतराष्ट्रोपितच्छ्रुत्वाध्यानमेवान्वपद्यत ॥ १ ॥ समुहूर्तमिवध्यात्वाविनिःश्वस्यमुहुर्मुहुः ॥ संजयंसंशितात्मानमपृच्छद्भरतर्षभ ॥ २ ॥ संजयेमेमहीपालाःशूरायुद्धाभिनंदिनः ॥ अन्योन्यमभिनिघ्नंतिशस्त्रैरुच्चावचैरिह ॥ ३ ॥ पार्थिवाःपृथिवीहेतोःसमभित्यज्यजीवितम् ॥ नवाशाम्यंतिनिघ्नंतोवर्धयंतियमक्षयम् ॥ ४ ॥ भौममैश्वर्यमिच्छंतोनमृष्यंतेपरस्परम् ॥ मन्येबहुगुणाभूमिस्तन्ममाचक्ष्वसंजय ॥ ५ ॥ बहूनिचसहस्राणिप्रयुतान्यर्बुदानिच ॥ कोट्यश्चलोकवीराणांसमेताःकुरुजांगले ॥ ६ ॥ देशानांचपरीमाणंनगराणांचसंजय ॥ श्रोतुमिच्छामितत्त्वेनयतएतेसमागताः ॥ ७ ॥ दिव्यबुद्धिप्रदीपेनयुक्तस्त्वंज्ञानचक्षुषा ॥ प्रभावात्तस्यविप्रर्षेर्व्यासस्यामिततेजसः ॥ ८ ॥ ॥ संजयउवाच ॥ ॥ यथाप्रज्ञंमहाप्राज्ञभौमान्वक्ष्यामितेगुणान् ॥ शास्त्रचक्षुरवेक्षस्वनमस्तेभरतर्षभ ॥ ९ ॥ द्विविधानीहभूतानिचराणिस्थावराणिच ॥ त्रसानांत्रिविधायोनिरंडस्वेदजरायुजाः ॥ १० ॥ त्रसानांखलुसर्वेषांश्रेष्ठाराजन्जरायुजाः ॥ जरायुजानांप्रवरामानवाःपशवश्चये ॥ ११ ॥ नानारूपधराराजंस्तेषांभेदाश्चतुर्दश ॥ वेदोक्ताःपृथिवीपालयेषुयज्ञाःप्रतिष्ठिताः ॥ १२ ॥ ग्राम्याणांपुरुषाःश्रेष्ठाःसिंहाश्चारण्यवासिनाम् ॥ सर्वेषामेवभूतानामन्योन्येनोपजीवनम् ॥ १३ ॥

स्वइति विनयःस्वस्योपदेष्टृत्ववारणाय व्यासेनैवत्वमुपदिष्टोसीतिभावः ॥ ९ ॥ त्रसानांजंगमानांयोनिरुत्पत्तिस्थानं अंडजाःपक्षिसरीसृपाद्याः स्वेदजाःयूकालिक्षाद्याः जरायुजाःमनुष्यपश्वाद्याः ॥ १० ॥ येषुचतुर्दशसुयज्ञाःप्रतिष्ठिताः तेमानवास्त्रैवर्णिकाः पशवश्वगोऽजाद्याजरायुजानांमध्येप्रवराइतियोजना ॥ ११ ॥ १२ ॥ ग्राम्याणांवक्ष्यमाणानांपशूनांमध्ये तथारण्यवासिनामित्यपि पुरुषंवैदेवाः पशुमालभंत तस्मात्त्रयःपशूनांहस्तादानाःपुरुषोहस्तीमर्कटइतिविध्यर्थवादादिषुपुरुषेपिपशुत्वमस्त्येवेतिग्राम्यपशुषुपुरुषस्यगणनं ॥ १३ ॥

उद्भिज्जाःभूमिमुद्भिद्यजाताः वृक्षाअश्वत्थादयः गुल्माःकुशकाशादिस्तंबाः लतावृक्षाद्यारूढागुडूच्यादयः वल्ल्योभूमिप्रसारावर्षमात्रस्थायिन्यःकूष्मांड्याद्याः त्वक्सारावेण्वादयः तएववृणजातयोनतुवृक्षाः ॥१४॥ तेषामिति समग्राम्याःपशवःसमारण्याःपंचोद्भिज्जाइत्येकोनविंशतिसंख्यानांविकाराणांप्रकृतिभूतेषुपंचसुमहाभूतेषुप्रक्षेपेसतिचतुर्विंशत्यक्षरसंख्यासाम्यात्प्रकृतिविकृत्यात्मिकागायत्रीयंभवति अत्रस्वेदजानामुद्भिज्जेष्वंतर्भावः तेहिभूमिमुद्भिद्यजायंते स्वेदजास्तुजलमुद्भिद्यजायंतइतिसाम्यात् तृतीयेनावरोधःसंशोकजस्येतिन्यायाच्च अंडजानामपिमैथुनजत्वसाम्याज्जरायुजेष्वेवांतर्भावः जरायुर्गर्भवेष्टमंतद्रूपस्यअंडस्यैवतत्रसत्त्वादित्याशयेनचतुर्विंशतिः तदिदंकार्यकारणसमुदायात्मकंगायत्र्याख्यंब्रह्म गायत्रीवाइदंसर्वंभूतमित्युपक्रम्यसैषाचतुष्पदाषड्विधागायत्रीतदेतदृचाभ्यनूक्तंतावानस्य

उद्भिज्जाःस्थावराःप्रोक्तास्तेषांपंचैवजातयः ॥ वृक्षगुल्मलतावल्ल्यस्त्वक्सारास्तृणजातयः ॥ १४ ॥ तेषांविंशतिरेकोनामहाभूतेषुपंचसु ॥ चतुर्विंशतिरुद्दिष्टा गायत्रीलोकसंमता ॥ १५ ॥ यएतांविदुगायत्रींपुण्यांसर्वगुणान्विताम् ॥ तत्त्वेनभरतश्रेष्ठसलोकेनप्रणश्यति ॥ १६ ॥ अरण्यवासिनःसमसमैषांग्रामवासिनः ॥ सिंहाव्याघ्रावराहाश्वमहिषावारणास्तथा ॥ १७ ॥ ऋक्षाश्ववानराश्चैवसमारण्याःस्मृतानृप ॥ गौरजाविमनुष्याश्चअश्वाश्वतरगर्दभाः ॥ १८ ॥ एतेग्राम्याःसमाख्याताःपशवःसमसाधुभिः ॥ एतेवैपशवोराजन्ग्राम्यारण्याश्चतुर्दश ॥ १९ ॥ भूमौचजायतेसर्वंभूमौसर्वंविनश्यति ॥ भूमिःप्रतिष्ठाभूतानांभूमिरेवसनातनम् ॥ २० ॥ यस्यभूमिरस्तस्यसर्वंजगत्स्थावरजंगमम् ॥ तत्रातिगृद्धाराजानोविनिघ्नंतीतरेतरम् ॥ २१ ॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिजंबूखंडविनिर्माणपर्वणिभौमगुणकथनेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ९३ ॥ ॥धृतराष्ट्रउवाच ॥ ॥नदीनांपर्वतानांचनामधेयानिसंजय ॥ तथाजनपदानांचयेचान्येभूमिमाश्रिताः ॥ १ ॥ प्रमाणंचप्रमाणज्ञपृथिव्याममसर्वतः ॥ निखिलेनसमाचक्ष्वकाननानिचसंजय ॥ २ ॥

महिमातत्रोज्यायांश्चपूरुषः पादोस्यसर्वाभूतानित्रिपादस्यामृतंदिवीतिच्छांदोग्येउपसंहारदर्शनात् ॥ १५ ॥ १६॥१७॥ १८॥१९॥२०॥ यस्यभूमिरिति राजाहिसार्वभौमोराजसूयेनेड्वास्वाराज्यंशमोति अश्वमेधेनेड्वाकममुक्तिस्थानंप्राप्नोतीतियस्यकृत्स्नाभूमिस्तस्यइदंसर्वंयज्ञद्वारावशेभवति तथाचवाजसनेयकेश्रूयते पुरुषोहवैनारायणोऽकामयतात्मतिष्ठेयंसर्वाणिभूतान्यहमेवेदंसर्वंस्यामितिसएतंपुरुषमेधंपंचरात्रयज्ञकतुमपश्यदित्यादिना ॥ २१ ॥ ॥ इतिश्रीमत्पर्वणिनैलकंठीयेभारतभावदीपेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ एवंवक्ष्यमाणभगवद्गीतोपनिषदर्थज्ञानाधिकारार्थंकर्मणामनुष्ठेयत्वंप्रकारांतरेणोपपाद्याधिकृतानामुत्पन्नात्मविविदिषाणामपिसूक्ष्मतमात्मतत्त्वग्रहणयोग्यतासिध्यर्थंस्थूलेभगवतोरूपेकृत्स्नब्रह्मांडात्मकेचित्तसंयमःकर्त्तव्यइत्याशयेनभुवनकोशंवर्णयति नदीनांपर्वतानांचेत्यादिनातत्सर्वंश्रुतवानसीत्यंतेनाध्यायाष्टकेन ॥ १ ॥ २ ॥

तत्रतावत्पंचेमानिमहाराजेत्यादिनातदेषांरूपमैश्वरमित्यंतेनसर्वंवियदादिकंभगवदुपादानकत्वात्कुंडलकनकन्यायेनभगवतएवरूपमितिप्रतिपादयति महाभूतानिपृथिव्यादीनितान्येवजगतीकृत्स्नब्रह्मांडरूपाणिपिंडरूपाणिचतत्स्थानिचसर्वाणिचैतन्यपदवाच्यानिसमानितुल्यान्येव बहुत्वमुपाधिभेदाभिप्रायेण नहिकुंभद्रोण्याद्युपाधिष्वाकाशस्येवमशकमतंगजादिशरीरेषुचैतन्यस्यस्वतोविषमत्वंदृश्यते तस्मात्सर्वाणिजगतीस्थानिसमान्येव वक्ष्यतिचभगवान् पंडिताःसमदर्शिनइति ॥ ३ ॥ भूमिरिति वायोरग्निरितिश्रुतेरग्नेहेतुर्वायुरग्नेःपरोद्रष्टव्यः गुणोत्तराणिपूर्वपूर्वापेक्षयाउत्तरमुत्तरमेकैकगुणाधिकं इदं चआकाशाद्वायुर्वायोरग्निरग्नेरापोद्भ्यःपृथिवीतिश्रूयमाणजन्मक्रमाभिप्रायेणोक्तम् ॥ ४ ॥ शब्दादयोगुणाःप्रसिद्धाः ॥ ५ ॥ ६ ॥ एतेपंचेति महाभूतेषुपंचमहाभूतात्मकेषुसर्वेषुलोकेषुभोग्यवस्तुशरीरादिघटितेषुएतेपंचगुणाःसंति एतेके येषुगुणेषुभोक्तारोभूताःनित्यनिर्दृत्ताश्चेतनाःपुरुषाःप्रतिष्ठिताः देहेंद्रियादीनांभोग्यानांधिष्ठायकचेतनाःशब्दादीनिभोग्यांतराणिभुंजते देहादीनामपिभोगोपकरणत्वाद्भोग्यत्वमेवनभो

संजयउवाच ॥ ॥ पंचेमानिमहाराजमहाभूतानिसंग्रहात् ॥ जगतीस्थानिसर्वाणिसमान्याहुर्मनीषिणः ॥ ३ ॥ भूमिरापस्तथावायुरग्निराकाशमेवच ॥ गुणोत्तराणिसर्वाणितेषांभूमिःप्रधानतः ॥ ४ ॥ शब्दःस्पर्शश्चरूपंचरसोगंधश्चपंचमः ॥ भूमेरेतेगुणाःप्रोक्ताऋषिभिस्तत्त्ववेदिभिः ॥ ५ ॥ चत्वारोऽप्युगुणाराजन्गंधस्तत्रनविद्यते ॥ शब्दःस्पर्शश्चरूपंचतेजसोथगुणास्त्रयः ॥ शब्दःस्पर्शश्चवायोस्तुआकाशेशब्दएवतु ॥ ६ ॥ एतेपंचगुणाराजन्महाभूतेषुपंचसु ॥ वर्त्ततेसर्वलोकेषुयेषुभूताःप्रतिष्ठिताः ॥ ७ ॥ अन्योन्यंनाभिवर्त्ततेसाम्यंभवतिवैयदा ॥ ८ ॥ यदातुविषमीभावमाविशंतिपरस्परम् ॥ तदादेहैर्दहवंतोव्यतिरोहंतिनान्यथा ॥ ९ ॥ आनुपूर्व्याविनश्यंतिजायंतेचानुपूर्वशः ॥ सर्वाण्यपरिमेयाणितदेषांरूपमैश्वरम् ॥ १० ॥

कृत्वमित्यर्थः॥७॥ अन्योन्यमिति समस्यभावःसाम्यंब्रह्मभावः समआत्मेतिविद्यात् निर्दोषंहिसमंब्रह्मेतिश्रुतिस्मृत्योर्ब्रह्मणिसमशब्ददर्शनात् भोक्तृभोग्ययोर्यदासुषुप्तिप्रलयसमाधिमोक्षेषुब्रह्मभावोभवतितदातेउभेअन्योन्यंनाभिवर्त्तेते व्यवहारतोविद्यमानमपिभोग्यंभोक्तारंनोपसर्पति नापिभोक्ताऽलुप्तदृगपिभोगायतनस्यदेहेंद्रियादेरभावाद्भोग्यजातमुपसर्पतीत्यर्थः॥८॥यदातिवि भोगप्रदकर्मौद्भवकालेविषमीभावंसाम्यात्प्रच्युतिआविशंतिप्रामुवंतितदातएवभोक्तारोभोग्यपदार्थाश्चदेहैः स्वस्वरूपैःदेहवंतःलब्धस्वरूपाभूत्वातैरेवस्वैरूपैःपरस्परंव्यतिरोहंति भोक्तारोभोग्येषुनिपतंतिभोग्यार्थाश्चभोक्तरिसूक्ष्मरूपेणस्ववासनांजनयंतीत्यर्थः ॥ ९ ॥ आनुपूर्व्याभूम्यादिक्रमेणविनश्यंति जायंतेचआनुपूर्वशआकाशादिक्रमेण विपर्ययेणक्रमोतउपपद्यतेचेतिन्यायेनसृष्टिक्रमविपरीतत्वात्संहारक्रमस्य अतएवउत्पत्तिविनाशशीलत्वादेवसर्वाण्येतानिभोक्तृभोग्यान्यपरिमेयाणिअनंतानिमरीचिकोदकफेनतुल्यत्वात् नहिमरीचिकोदकफेनियत्प्रमाणमितिपरिमातुंशक्यं यतएतान्यपरिमेयाणितत्तस्माद्धेतोःएषांरूपंऐश्वरमेवनतुभौतिकं नह्यध्यस्तस्याधिष्ठानादन्यद्रूपमस्ति अतएवसर्वंखल्विदंब्रह्म आत्मैवेदंसर्वं ब्रह्मैवेदंसर्वमितिसर्वस्यब्रह्मभावश्रवणमुपपद्यतइत्यर्थः ॥ १० ॥

अपरिमेयत्वमेवाह तत्रतत्रेति सिद्धाअपियत्रब्रह्मांडंभित्त्वागच्छंतितत्रापिवासनामयाधातवोव्यक्तयःपांचभौतिकादृश्यंतेऽतोऽपरिमेयाएवते एवंसत्यपिमनुष्यागणकादयस्तर्केणसूर्यगत्यादेशभेदेनदिनमा नभेदपादच्छायाभेदादिनाचतेषांप्रमाणानि एतच्चोपलक्षणंआकारभेदस्यापि तथाहि केचित्कंडुकाकारंकेचिद्भुतुरंभंकेचित्रिकोणंकेचिच्चकाकारंचभूमिसंस्थानंकल्पयंति तथाप्रमाणभेदोपिजंबूद्वीपप रिणाहगणकाःतद्व्यासःकुभुजंगसायकभुवःसिद्धांशकेनाधिकाइतिवदंति पंचदशशतान्येकाशीतियोजनानियोजनचतुर्विंशांशसहितानि तथालक्षयोजनंतत्परिणाहइतिपुराणांतरे अत्रापिअष्टादशसहस्रा णिषट्शतानिचेतिवक्ष्यति ॥ ११ ॥ कस्तर्ह्यत्रसिद्धांतइत्याशंक्यानिर्वचनीयएवायमर्थोनतर्केणसाधयितुंयोग्यइत्याह अचिंत्याइति येभावाःजगज्जन्मोपादाननिमित्तपरिमाणधर्माधर्मादयःपदार्थाश्चित यितुमयोग्यास्तान्नतर्केणसाधयेत् नहितेतर्केणसाधयितुंशक्यंते तर्कोतरेणतस्यबाधसंभवात्तर्काप्रतिष्ठानादित्यन्यायाच्च अतएवास्यश्लोकस्योतरार्द्धमन्यत्रपठंति नाप्रतिष्ठिततर्केणगंभीरार्थस्यनिश्चयइ ति तथाहि कंडुकाकारेभुवनकोशेकल्प्यमानेयेकंडुकपृष्ठेकमठपृष्ठोपमेतिष्ठंतितेषांकियानपिदेशोजलपशुमनुष्याश्रययोग्योस्तीतिवक्तुंयुक्तं येतुतन्चिंतंबेतदधश्चवसंतितेषांगुरुत्ववतामर्थानामधस्तादाश्रया भावेनावश्यंपतनंभवतीतितावान्देशोरिक्तएवास्तीतिवक्तव्यं तथाचतदाश्रयातत्कृताद्वीपांतरकल्पनालोकदृष्टिविरुद्धेतिपामराअपिप्रतियंति ननुयथापृथिव्याअंतरिक्षेऽवस्थानशक्तिर्दिगंबरादन्यैःसर्वैर्वा दिभिःकल्प्यतेतथावयमपितस्याआकर्षणशक्तिमन्यांकल्पयामहे ययासर्वदिक्स्थाःप्राणिनःपृथिवीपादाधस्थामेवमन्यंतेखंचोपरिस्थमिति तर्हिलोकदृष्टिविरुद्धकल्पनापेक्षयासर्वप्राणिप्रत्यक्षत्वममार्ये

तत्रतत्रहिदृश्यंतेधातवःपांचभौतिकाः ॥ तेषांमनुष्यास्तर्केणप्रमाणानिप्रचक्षते ॥ ११ ॥ अचिंत्याःखलुयेभावानतांस्तर्केणसाधयेत् ॥ प्रकृतिभ्यःपरंयत्तुतदचिंत्यस्यलक्षणम् ॥ १२ ॥ सुदर्शनंप्रवक्ष्यामिद्वीपंतुकुरुनंदन ॥ परिमंडलोमहाराजद्वीपोसौचक्रसंस्थितः ॥ १३ ॥

द्रजालादितुल्यतैवास्याःकुतोनकल्प्यते ननुस्वप्नादिवदस्याबाधोनदृश्यतइतिचेत् प्राक्ब्रह्मात्मज्ञानात्मादर्शकिंनश्छिन्नंश्रुत्यातुज्ञातेद्वैतंनविद्यते नेहनानास्तिकिंचनेत्यादिकयाब्रह्मदर्शनेनरज्जुदर्शनेनसर्प स्येवप्रपंचबाधआम्नायते तथाचनिष्कलंकात्श्रुतिप्रमाणात्ब्रह्माद्वैतमेवादर्त्तव्यंनतुसकलंकात्तर्काज्जगतोऽनिर्वचनीयत्वमितिभावः ॥ १२ ॥ तर्हिकिमस्यप्रमाणंकावाआकृतिस्तवाभिमतेत्याशंक्याह सुदर्श नमिति सुदर्शनोनामजंबूद्वक्षविशेषस्तन्नामांकितोयंद्वीपःसुदर्शनद्वीपः कृत्स्नंब्रह्मांडमित्यर्थः तंप्रमाणतआकृतितश्चप्रकर्षेणवक्ष्यामि तुशब्दःपक्षांतरव्याद्यर्थः परिमंडलःपरमाणुमात्रंपरिमाणतोदुर्लक्ष्य इत्यर्थः एषोणुरात्मा चेतसावेदितव्यइत्यात्मवदितिभावः परिमंडलइत्यस्यसर्वतोवृत्तरूपःकंदुकाकारइतिव्याख्यानेभागेवदोषउक्तः अथचकाकारइत्युच्यतेचेन्न चिपिटाकारेतस्मिन्परिमंडलशब्दस्यायो गात् चक्रसंस्थितइत्यनेनचक्रवत्संस्थितंसंस्थानमाकारोऽस्येत्यनेनैवसिद्धत्वाच्च अथंहिशब्दस्तार्किकाणांपरमाणुपरिमाणेप्रसिद्धः नचानेनपरिमाणेनोपेतंनिरंशंवस्तुसिध्यति यस्यकस्याप्यल्पपरिमाण स्यदशदिगवच्छेदभेदवत्त्वेनतस्यापिनिरंशत्वायोगात् नहिपरमाणोःपूर्वदिगवच्छिन्नोदेशःप्रतीच्याप्यवच्छिद्यतइतिवक्तुंशक्यं दृष्टविरोधात् तस्मात्परिमंडलशब्दोदुर्लक्ष्यसद्वस्तुमात्रवचनः तार्किका णांपरमाणुरपितादृशएव तत्रापारिज्ञाषिकपरिमाणकल्पनंप्रस्थानभेदापादनार्थंशून्यकारणतानिरासार्थंचेतिदिक् एवंसुदर्शनद्वीपस्यपरिमाणमुक्त्वाआकारमाह चक्रसंस्थितइति परिदृश्यमानराष्ट्राकार इत्यर्थः चक्रंराष्ट्राऽह्नयोरपीतिविश्वः ॥ १३ ॥

तदेवसंस्थानमाहद्वाभ्यां नदीति ॥ १४ ॥ १५ ॥ नन्वेवंविधस्यकथमतिसूक्ष्मत्वमुच्यतेऽतआह यथाहीति चंद्रमंडलेचंद्राधिष्ठितेमनसीत्यर्थः यद्येतद्ब्रह्मांडंमहाप्रमाणंस्यात्कथंतर्हिगिरिगुहैकदेशस्थो योगीस्वीयेसूक्ष्मेंद्रियावकाशेतत्कृत्स्नमादर्शेमुखवत्पश्येत् नह्यल्पप्रमाणेसर्षपादौमहाप्रमाणानांमेर्वादीनांसंनिवेशोयुज्यतेप्रपंचस्यत्वमादिवदनिर्वचनीयत्वांगीकारेविनेतिभावः ॥ १६ ॥ द्विरंशइति तत्र चंद्रमंडलाख्येमनसिअंशेएकदेशेवृत्त्यानंत्यादनंतस्यमनसएकदेशएकाकारासूक्ष्मावृत्तिरंशस्तत्रद्विःकार्यकारणरूपेणस्थूलसूक्ष्मरूपेणवाद्विराद्यत्तःपिप्पलोगीतामुवक्ष्यमाणःसंसाराश्वत्थोस्ति सर्वमेतन्म नोमात्रमित्यर्थः द्विरंशेचशशोमहान् चकारात्तत्रेत्यनुवर्त्तते तस्मिन्नेवमनसिमहान्परमात्माशशइवशशः प्लुतगतिःशीघ्रगामी मनसोजवीयइति तद्भावतोऽन्यानत्येतीतिचश्रुतेः अंशेएकदेशेद्विर्वर्त्तते निय म्यनियामकभावेनेत्यर्थः तथाचकार्यकारणप्रपंचोजीवईश्वरश्चपरब्रह्मण्यधिष्ठानेमनसैवकल्पितइत्यर्थः ॥ १७ ॥ अस्यशशस्यप्रत्यगभेदंवक्ष्यन्प्रपंचादिभ्यःपृथक्त्वमाह आपइति आपइत्यंबूपलक्षितंभूत पंचकमुच्यते आपःपुरुषवचसोभवंतीत्यादिश्रुतौतथादर्शनात् एतेनकृत्स्नंभूतभौतिकंकार्यंततःशशादन्यत् तर्हिकारणंवस्तुतदभिन्नंस्यादित्याशंक्याह शेषःसंक्षेपउच्यतेइति समस्तकार्यप्रलयेसतिशिष्य

नदीजलप्रतिच्छन्नःपर्वतैश्चाभ्रसन्निभैः ॥ पुरैश्चविविधाकारैरम्यैर्जनपदैस्तथा ॥ १४ ॥ वृक्षैःपुष्पफलोपेतैःसंपन्नधनधान्यवान् ॥ लवणेनसमुद्रेणसमंतात्परिवारितः ॥ १५ ॥ यथाहिपुरुषःपश्येदादर्शेमुखमात्मनः ॥ एवंसुदर्शनद्वीपोदृश्यतेचंद्रमंडले ॥ १६ ॥ द्विरंशेपिप्पलस्तत्रद्विरंशेचशशोमहान् ॥ सर्वौषधिसमावायःसर्वतःपरिवारितः ॥ १७ ॥ आपस्तत्रोन्याविज्ञेयाःशेषःसंक्षेपउच्यते ॥ ततोन्यउच्यतेचायमेनंसंक्षेपतःशृणु ॥ १८ ॥

॥ इतिश्रीमहाभारतेभीष्मपर्वणिजंबूखंडनिर्माणपर्वणिसुदर्शनद्वीपवर्णनेपंचमोऽध्यायः ॥ ५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच ॥ उक्तोद्वीपस्यसंक्षेपोविधिवद्बुद्धिमंस्त्वया ॥ तत्त्वज्ञश्चासिसर्वस्यविस्तरंब्रूहिसंजय ॥ १ ॥ यावान्भूम्यवकाशोयंदृश्यतेशशलक्षणे ॥ तस्यप्रमाणंब्रूहितोवक्ष्यसिपिप्पलम् ॥ २ ॥

तइतिशेषः कारणंतदपिसंक्षेपःकार्यस्यैवसूक्ष्मंरूपमाकुंचितावयवकूर्मसमानमुच्यतेऽतोऽव्याकृतंकारणमप्यापइवानालैवेत्यर्थः ततोव्याकृताव्याकृताद्व्यादन्यःशशःशुद्धंब्रह्मतदेवअयंप्रत्यगात्माजीवइत्यु च्यतेवेदेतत्त्वमस्यहंब्रह्मास्मिअयमात्माब्रह्मेत्यादौ परमात्मनएवप्रत्यगात्मत्वमुच्यतेनततोन्योजीवोनामकश्चिच्चिद्धातुरस्तीत्यर्थः एनंप्रत्यगभिन्नंपरमेश्वरंशशाख्यंसंक्षेपतोमयाप्रोच्यमानंशृणु ॥ १८ ॥ इति करणे जंबूइतिजंबूद्वीपःखंडएकदेशोयस्यतस्यब्रह्मांडस्यनिर्माणेविस्तारेइत्यर्थः ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेपंचमोऽध्यायः ॥ ५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ पिप्पलशशयोः स्वरूपश्रवणेस्वस्थानधिकारंपश्यन्स्थूलमेवतावत्भगवतोरूपंश्रोतुमिच्छन्धृतराष्ट्रउवाच उक्तोद्वीपस्येति द्वीपस्यविस्तरमितिसंबंधः ॥ १ ॥ यावानिति शशलक्षणेपरमात्मनोज्ञापकेमायाशबलेहार्देब्रह्म णिमायाकल्पितोभूम्यवकाशोयावान्व्यवहारदृष्ट्यासत्यवत्प्रतीयमानोयोगिभिर्दृश्यतेतस्यप्रमाणंप्रब्रूहि ननुकारणमेवादौज्ञातव्यंयज्ज्ञानात्सार्वज्ञ्यंभवतीतिवेदेप्रसिद्धंकिंद्वीपज्ञानेनेत्याशंक्याह ततोवक्ष्य सिपिप्पलमिति शशंचवक्ष्यसीतिशेषः प्रागेवकारणज्ञानात्तत्तद्विभूतिकार्यमेववदंत्येतेनतत्रात्यंतमादरोभवतीतिभावः ॥ २ ॥

प्रागायताःपूर्वपश्चिमसमुद्रस्पर्शिनः अत्रेयंशास्त्रानुभवयोरविरोधेनभूकल्पनाप्रतिभाति यथाहस्तमात्रस्यचतुरस्रत्यचतुर्विंशत्यंगुलानिपरिणाहः षण्णवत्यंगुलानिपरिधिः किंचिन्न्यूनानिचतुस्त्रिंशदंगुलानिकर्णोभवति एवंअष्टादशसहस्राणिषट्शतानिचजंबूपर्वसंज्ञितायाभुवःप्रमाणमुक्तंतदेवात्रप्रधित्वेनकल्पितंतच्चतुर्थांशत्वेनचत्वारिसहस्राणिषट्शतानिपंचाशच्चयोजनान्येकैकोभुजइतिदेवसमचतुरस्रत्वविष्कंभप्रमाणं अस्यकर्णःशुल्बशास्त्रोक्तरीत्याषट्सहस्राणिपंचशतानिषट्सप्ततिश्चयोजनानि तस्यास्यभूचतुरस्रत्यचतुर्भिःसमुद्रैर्वेष्टितस्यकोणादिक्षुवर्त्तते तेनदक्षिणस्यांदिशिरामसेतौद्वयोःसमुद्रयोःसंधिः एवमितरास्वपिदिक्षुसमुद्रसंधयोज्ञेयाः यस्त्वत्रज्योतिर्विदांभूपरिधिःसप्तांगनंदाब्धियोजन४९६७संमितोऽभिमतःसएवास्माकंचतुरस्रविष्कंभःखबाणरसवेदमितः ४६५० यत्तुएतयोरंतरंसप्तेंदुरामाः३१७ तदपियजमानेनोर्ध्वबाहुनाप्रपदोच्छ्रितेनसमपादस्थितेनवाउन्मितस्यसूत्रस्यायःपंचमोंशःसहस्तइतिविकल्पस्यकात्यायनादिभिरुक्तत्वाद्धस्तप्रमाणभेदकल्पनयायोजनबहुत्वाल्पत्ववचनेनसमाधेयं तथाभूमेश्चतुरस्रत्वेपितन्मध्यस्थमत्युच्छ्रितंमेरुंपदक्षिणीकुर्वतःसूर्यस्यमार्गोमंडलाकारोस्तीतिनबौद्धाभिमतंसूर्यद्वयंकल्प्यंभवति अन्यत्सर्वंयुक्त्यविरुद्धंज्योतिर्विन्मतमेवात्रानुसर्तव्यं यत्तुपुराणेपंचाशत्कोटियोजनंभूगोलप्रमाणमित्युक्तंतदप्यचिंत्याःखलुयेभावानतांस्तर्केणसाधयेदित्यनेनैवप्रत्युक्तं अव्यवस्थितत्वान्मतानामनिर्वचनीयवादएवशरणीकरणीयइत्येववरं यद्वासर्वत्रयत्प्रमाणंदृष्टंतद्विशां

वैशंपायनउवाच॥ ॥एवंराज्ञासपृष्टस्तुसंजयोवाक्यमब्रवीत्॥ ॥संजयउवाच॥ ॥ प्रागायतामहाराजषडेतेवर्षपर्वताः॥ अवगाढाल्युभयतःसमुद्रौपूर्वपश्चिमौ ॥ ३ ॥ हिमवान्हेमकूटश्चनिषधश्चनगोत्तमः॥ नीलश्चवैदूर्यमयःश्वेतश्चशिसन्निभः ॥ ४ ॥ सर्वधातुविचित्रश्चशृंगवान्नामपर्वतः॥ एतेवैपर्वताराजन्सिद्धचारणसेविताः॥ ५॥ एषामंतरविष्कंभोयोजनानिसहस्रशः॥ तत्रपुण्याजनपदास्तानिवर्षाणिभारत॥ ६॥

शेनतद्वोध्यं तेनपंचाशत्कोटिस्थानेसार्द्धकोटिद्वयविस्ताराभूमिः लक्षस्थानेपंचसहस्रविस्तारोजंबूद्वीपः नवसहस्रस्थानेसार्द्धचतुःशतयोजनायामंभरतखंडमिति अस्मिन्पक्षेउदाहरिष्यमाणवैष्णवादिवाक्येभ्योजंबूद्वीपश्चतुर्दलकमलाकारः तस्याश्रांतःपरिधिःषट्शताधिकान्यष्टादशयोजनसहस्राणि त्रयस्त्रिंशच्छतानिमध्यव्यासः तेनफलतःपंचसहस्रव्यासताज्ञेया एवंसतियदाभागायतोहिमाचलःपूर्वपश्चिमसमुद्रौस्पृशत्तदाऽयंभरतवर्षस्त्रिकोणोभवतितेनपृथिवीत्रिकोणेतिलोकप्रवादोऽनुभवश्चानुसृतोभवति अन्यथाभरतवर्षस्यधनुराकारत्वेभूमध्यरेखायालंकातःसेतुमार्गेणप्रस्थितायाः पुरीरक्षसांदेवकन्याथकांचीसितःपर्वतःपर्यलीवत्सगुल्मं पुरीचोज्जयिन्याह्वयागर्गराटंकुरुक्षेत्रमेषाभुवोमध्यरेखेतिस्मर्यमाणयामध्यरेखयाकुरुक्षेत्रस्यरामसेतुःसन्निहितोद्वारकाचदूरेस्यात् द्वारकासमीपेसेतुश्चदूरेइतिप्रत्यक्षमुपलभ्यते भरतवर्षस्यत्रिकोणत्वमित्येषैवकल्पनासाधीयसीतिदिक् ॥ ३ ॥ ४ ॥ ५ ॥ एवंदक्षिणांदिशमारभ्ययावदुत्तरसमाप्तिषट्प्राक्पश्चिमायताःपर्वतास्तैश्चसप्तवर्षाणिभवंतिमध्येमध्येवासयोग्यानिस्थानानिभवंतितेषांस्थानानांवर्षाख्यानामंतरमाह एषामिति विष्कंभोविस्तारः सहस्रशःशब्दएषशतशःशब्दपरःकर्तव्यः लंकाहिमाचलयोरनेकसहस्रयोजनांतराभावात् षष्ट्यधिकंशतचतुष्कयोजनसंमितस्यैवांतरस्यप्रसिद्धेः तत्रापिशतंसेतोःपरतःषष्ट्यधिकत्रिशतंयोजनानिसेतुतोहिमालयइतिप्रत्यक्षसिद्धं वर्षाणिवर्षैतिकामैःसिंचंतिपूरयंतीतिवर्षाणिरम्यस्थानानि ॥ ६ ॥

॥ ८ ॥

वसंत्येषुतानिवर्षाणीतियोगांतरमाह वसंतीति हिमवतोदक्षिणेभारतंवर्षं उत्तरतोहैमवतंवर्षंद्वितीयम्॥ ७॥ हेमकूटनिषधयोर्मध्येहरिवर्षं निषधनीलयोर्मध्येवर्षविभागमाह दक्षिणेनेति दक्षिणेनदक्षिणतः समीपइत्यर्थः एवमुत्तरेणेत्यादौज्ञेयम॥ ८॥ नीलनिषधयोर्मध्येमेरुस्तस्यप्राक्माल्यवान्पूर्वसमुद्रावधिः पश्चिमसमुद्रावधिर्गंधमादनइत्यर्थः॥ ९ ॥ परिमंडलशब्दस्यपूर्वोक्तएवार्थः अत्याश्चर्यमयोमेरुः प्रतिक्षणंनवोनवइत्यर्थः आदित्यतरुणोबालादित्यः॥ १० ॥ चतुरशीतिसहस्रस्थानेद्विचत्वारिंशच्छतीउच्छ्रायोबोध्यः अधस्तात्भूमेर्गर्भे ॥ ११ ॥ तस्यपार्श्वेष्विति पार्श्वेषुचतुर्दिक्षु द्वीपाइवद्वीपाःनचांत

वसंतितेषुसत्त्वानिनानाजातीनिसर्वशः॥ इदंतुभारतंवर्षंततोहैमवतंपरम्॥७॥ हेमकूटात्परंचैवहरिवर्षंप्रचक्षते॥ दक्षिणेनतुनीलस्यनिषधस्योत्तरेणतु॥ ८॥ प्रागायतोमहाभागमाल्यवान्नामपर्वतः॥ ततःपरंमाल्यवतःपर्वतोगंधमादनः॥ ९ ॥ परिमंडलस्तयोर्मध्येमेरुःकनकपर्वतः॥ आदित्यतरुणाभासोविधूमइवपावकः॥ १० ॥ योजनानांसहस्राणिचतुरशीतिरुच्छ्रितः ॥ अधस्ताच्चतुरशीतियोजनानांमहीपते॥ ११॥ ऊर्ध्वमधश्चतिर्यक्चलोकानावृत्यतिष्ठति॥ तस्यपार्श्वेष्वमीद्वीपाश्चत्वारःसंस्थिताविभो ॥ १२ ॥ भद्राश्वःकेतुमालश्चजंबूद्वीपश्चभारत॥ उत्तराश्चैवकुरवःकृतपुण्यप्रतिश्रयाः॥ १३ ॥ विहगःसुमुखोयस्तुसुपर्णस्यात्मजःकिल॥ सवैविचिंतयामासौवर्णान्वीक्ष्यवायसान्॥ १४॥ मेरुरुत्तममध्यानामधमानांचपक्षिणाम्॥ अविशेषकरोयस्मात्तस्मादेनंत्यजाम्यहं॥ १५॥ तमादित्योनुपर्येतिसततंज्योतिषांवरः॥ चंद्रमाश्चसनक्षत्रोवायुश्चैवप्रदक्षिणः॥ १६॥ सपर्वतोमहाराजदिव्यपुष्पफलान्वितः॥ भवनैरावृतःसर्वैर्जांबूनदपरिष्कृतैः॥ १७॥ तत्रदेवगणाराजन्गंधर्वाःसुरराक्षसाः॥ अप्सरोगणसंयुक्ताःशैलेक्रीडंतिसर्वदा॥ १८॥ तत्रब्रह्माचरुद्रश्चशक्रश्चापिसुरेश्वरः॥ समेत्यविविधैर्यज्ञैर्यजंतेऽनेकदक्षिणैः॥ १९॥ तुंबुरुर्नारदश्चैवविश्वावसुर्हाहाहूहूः॥ अभिगम्यामरश्रेष्ठांस्तुष्टुवुर्विविधैःस्तवैः॥ २०॥ समर्षयोमहात्मानःकश्यपश्चप्रजापतिः॥ तत्रगच्छंतिभद्रंतेसदापर्वणिपर्वणि॥ २१॥ तस्यैवमूर्ध्न्युशनाःकाव्योदैत्यैर्महीपते॥ इमानितस्यरत्नानितस्येमेरत्नपर्वताः॥ २२॥ तस्मात्कुबेरोभगवांश्चतुर्थंभागमश्नुते॥ ततःकलांशंवित्तस्यमनुष्येभ्यःप्रयच्छति॥ २३॥

रत्नाद्वर्षाणि ॥ १२ ॥ भद्राश्वादिसाहचर्याज्जंबूद्वीपशब्दोत्रभरतवर्षपरस्तस्यतत्सारत्वज्ञापनार्थः तानेवस्तौति कृतपुण्यप्रतिश्रयाइत्यादिना कृताविहिताःपुण्यैःपुण्यवद्भिःप्रतिश्रयाआश्रमायेषुते ॥ १३॥ तत्रसुमुखाख्येनपक्षिणाभेरुंत्यक्त्वाप्रश्रयःकृतइत्याह विहगइतिद्वाभ्याम् ॥ १४ ॥ एनंत्यजामित्यक्त्वाउत्तरान्कुरूनेवगच्छामीतिशेषः ॥ १५ ॥ तंमेरुमादित्योऽनुपर्येतिप्रदक्षिणीकरोति ॥ १६॥ १७ ॥ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ काव्यःकविश्रेष्ठःशुक्रोरमतइतिशेषः तस्यकाव्यस्य ॥ २२ ॥ तस्मात्काव्यात् ततःकुबेरात् कलांशंषोडशभागस्यापिलेशम् ॥ २३ ॥

कर्णिकाराजदक्षास्तेषांवनम् ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ क्षीरवत्श्वेताधारायस्याःसागंगा विश्वरूपाविश्वोविष्णुस्तद्रूपा तथाचस्मरंति योसौसर्वगतोविष्णुश्चित्स्वरूपीनिरंजनः सएवद्रवरूपेणगंगा भोनाचसंशयइति ॥ २८ ॥ २९ ॥ तयैवप्रवेगेनमेरुप्राकारात्पतनजनितबलेनखनंत्यासह्रदउत्पादितइतिसंबंधः ॥ ३० ॥ ३१ ॥ ३२ ॥ सुवर्णवर्णाःगौराः ॥ ३३ ॥ निष्टमेति पीतभास्वराइत्यर्थः॥३४॥ अपरगंडिकांःअन्येगंधमादनस्यैवावयवभूताबुद्बुदोपमाःक्षुद्रशैलाः मंडोभूषणबुद्बुदेइतिमेदिनी स्वार्थिकःकः ॥ ३५ ॥ उत्पलवर्णेनआभांतिताःउत्पलवर्णाभाः ॥ ३६ ॥ नीलात्परतरमिति नीलोत्पलधर

पार्श्वेतस्योत्तरेदिव्यंसर्वर्तुकुसुमैश्चितम्॥ कर्णिकारवनंरम्यंशिलाजालसमुद्गतम्॥२४॥तत्रसाक्षात्पशुपतिर्दिव्यैर्भूतैःसमावृतः॥उमासहायोभगवान्रमतेभूत भावनः ॥ २५ ॥ कर्णिकारमयींमालांबिभ्रत्पादावलंबिनीं ॥ त्रिभिर्नेत्रैःकृतोद्योतस्त्रिभिःसूर्यैरिवोदितैः॥२६॥ तमुग्रतपसःसिद्धाःसुव्रताःसत्यवादिनः ॥ प श्यंतिनहिदुर्दृत्तैःशक्योद्रष्टुंमहेश्वरः॥ २७॥ तस्यशैलस्यशिखरात्क्षीरधारानरेश्वर ॥ विश्वरूपापरिमिताभीमनिर्घातनिःस्वना ॥ २८ ॥ पुण्यापुण्यतमैर्जुष्टागं गाभागीरथीशुभा ॥ प्लवंतीवप्रवेगेनह्रदेचंद्रमसःशुभे ॥ २९ ॥ तयात्युत्पादितःपुण्यःसह्रदःसागरोपमः ॥ तांधारयामासतदादुधरांपर्वतैरपि ॥३० ॥ शतंवर्ष सहस्राणांशिरसैवपिनाकधृक् ॥ मेरोस्तुपश्चिमेपार्श्वेकेतुमालोमहीपते॥३१॥जंबूखंडेतुतत्रैवमहाजनपदोन्नप ॥ आयुर्दशसहस्राणिवर्षाणांतत्रभारत॥३२॥ सुवर्णवर्णाश्चनराःस्त्रियश्चाप्सरसोपमाः ॥ अनामयावीतशोकानित्यंमुदितमानसाः ॥ ३३ ॥ जायंतेमानवास्तत्रनिष्टप्तकनकप्रभाः ॥ गंधमादनशृंगेषुकुबे रःसहराक्षसैः॥ ३४॥ संवृतोऽप्सरसांसंघैर्मोदतेगुह्यकाधिपः॥ गंधमादनपार्श्वेतुपरेत्वपरगंडिकाः॥ ३५॥ एकादशसहस्राणिवर्षाणांपरमायुषः ॥ तत्रहृष्टा नराराजंस्तेजोयुक्तामहाबलाः ॥ स्त्रियश्चोत्पलवर्णाभाःसर्वाःसुप्रियदर्शनाः॥ ३६ ॥ नीलात्परतरंश्वेतंश्वेताद्धैरण्यकंपरं ॥ वर्षमैरावतंराजन्नानाजनपदावृतं ॥ ३७॥ धनुःसंस्थेमहाराजद्वेवर्षेदक्षिणोत्तरे ॥ इलावृतंमध्यमंतुपंचवर्षाणिचैवहि ॥ ३८ ॥उत्तरोत्तरमेतेभ्योवर्षमुद्रिच्यतेगुणैः ॥ आयुःप्रमाणमारोग्यंधर्म तःकामतोर्थतः॥ ३९ ॥

मित्यपपाठः एवंहिमवतोदक्षिणेभरतवर्षं तदुत्तरेहैमवतंवर्षं हेमकूटादुत्तरेहरिवर्षं निषधादुत्तरेनीलाच्चदक्षिणेमेरोःपरितइलावृतमेकमेवचतुर्थंवर्षं अत्रैवकेचिद्भद्राश्वकेतुमालयोर्वर्षांतरत्वंप्रकल्प्यनववर्षा णीत्याचक्षते ततोनीलात्पर्वतादुत्तरतःश्वेतंपंचमंवर्षं श्वेतात्पर्वतादुत्तरतोहैरण्यकंवर्षषष्ठं ततःशृंगवत्पर्वतादैरावतंसप्तमंवर्षम् ॥ ३७ ॥ धनुःसंस्थेधनुष्कोटी संस्थाशब्दःसमानिवचनः संतिष्ठतेग्निहोत्रमि त्यादिप्रयोगदर्शनात् तेनमिश्रितधनुष्कोटिद्वयाकारेइत्यर्थः शार्ङ्गस्यहिधनुषोद्वेकोटीएकीकृतेभवतस्तदामध्येकिंचिन्नतंत्रिकोणंभवति अतएवरामसेतौधनुष्कोटिशब्देनैवरत्नाकरमहोदध्याख्यंसमुद्रद्वय संगमप्रदेशोव्यवक्रियते एवमाकारंदक्षिणेभरतवर्षमुत्तरेऐरावतंचमध्येपंचेतिसप्तवर्षाणि ॥ ३८ ॥ ३९ ॥

समन्वितानिभिन्नभावेनसंगतानि ॥ ४० ॥ हेमेति हेमकूटएवकैलासस्तस्योत्तरेमैनाकस्तस्योत्तरतोहिरण्यशृंगः एतयोरंतरालेबिंदुसरोस्तीतिश्लोकत्रयार्थः ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ भूतप तीरुद्रः ॥ ४६ ॥ ४७ ॥ पावनीसरस्वतीत्येका ॥ ४८ ॥ प्रभोरीश्वरस्यैषसप्तनद्यात्मकःसंविधिःसमीचीनंलोकोपकारार्थंविधानं एषैवेतिसंधिरार्षः कारुण्यात्परमेश्वरेणपावनाःपदार्थानिर्मिताइत्यर्थः ॥

समन्वितानिभूतानितेषुवर्षेषुभारत ॥ एवमेषामहाराजपर्वतैःपृथिवीचिता ॥ ४० ॥ हेमकूटस्तुसुमहान्कैलासोनामपर्वतः ॥ यत्रवैश्रवणोराजन्गुह्यकैःसह मोदते ॥ ४१ ॥ अरुत्युत्तरेणकैलासंमैनाकंपर्वतंप्रति ॥ हिरण्यशृंगःसुमहान्दिव्योमणिमयोगिरिः॥ ४२ ॥तस्यपार्श्वेमहद्दिव्यंशुभ्रंकांचनवालुकम्॥ रम्यंबिंदु सरोनामयत्रराजाभगीरथः॥ ४३॥ दृष्ट्वाभागीरथींगंगामुवासबहुलाःसमाः॥ यूपामणिमयास्तत्रचैत्याश्चापिहिरण्मयाः॥ ४४॥ तत्रेष्ट्वातुगतःसिद्धिंसहस्रा क्षोमहायशाः॥ सृष्टाभूतपतिर्यत्रसर्वलोकैःसनातनः ॥ ४५ ॥ उपास्यतेतिग्मतेजायत्रभूतैःसमंततः ॥ नरनारायणौब्रह्मामनुःस्थाणुश्चपंचमः ॥ ४६ ॥ तत्र दिव्याश्रियगाप्रयमंतुप्रतिष्ठिता॥ ब्रह्मलोकादपक्रांतासप्तधाप्रतिपद्यते ॥ ४७ ॥ वस्वौकसारानलिनीपावनीचसरस्वती॥ जंबूनदीचसीताचगंगासिंधुश्चस प्तमी॥ ४८ ॥अर्चित्यादिव्यसंकाशांप्रभोरेषैवसंविधिः॥ उपासतेयत्रसत्रंसहस्रयुगपर्यये ॥ ४९॥ दृश्याऽदृश्याचभवतितत्रतत्रसरस्वती॥ एतादिव्याःसप्तगं गास्त्रिषुलोकेषुविश्रुताः॥ ५० ॥रक्षांसिवैहिमवतिहेमकूटेतुगुह्यकाः ॥ सर्पानागाश्चनिषधेगोकर्णंचतपोवनम् ॥ ५१ ॥ देवासुराणांसर्वेषांश्वेतपर्वतउच्यते॥ गंधर्वानिषधेनित्यंनीलेब्रह्मर्षयस्तथा॥ शृंगवांस्तुमहाराजदेवानांप्रतिसंचरः॥ ५२ ॥इत्येतानिमहाराजसप्तवर्षाणिभागशः॥ भूतान्युपनिविष्टानिगतिमंतिधु वाणिच॥ ५३॥तेषान्तद्विर्वहुविधादृश्यतेदैवमानुषी॥ अशक्यापरिसंख्यातुंश्रद्धेयातुबुभूषता॥ ५४॥

॥ ४९ ॥ ५० ॥ ५१ ॥ श्वेतपर्वतःस्थाइतिशेषः गंधर्वावसंतीतिशेषः प्रतिसंचरःव्यवहारस्थानम् ॥ ५२ ॥ इतीति वर्षाणितत्रउपनिविष्टानिगतिमंतिजंगमानिध्रुवाणिस्थावराणिचसर्वाणिभूतान्येव स दृश्यमाश्रयाश्रितरूपंपांचभौतिकमेवेत्यर्थः ॥ ५३ ॥ बुभूषताश्रेयःप्राप्तुमिच्छताश्रद्धेया अदृष्टेष्वर्थेषुश्रद्धावान्हितत्वात्स्वर्थंचोदितानिकर्माणिकरोतिनत्वश्रद्दधानइत्यर्थः ॥ ५४ ॥

एवंभूतसंस्थानमुक्त्वाएतदेवपरमात्मनःशरीरमितिचिंतनीयमित्याशयेनाह यांत्विति दिविमायाशबलेभवांदिव्यांमायिकींशशस्यचिदात्मनःआकृतिंपिप्पलाख्यां ततोवक्ष्यसिपिप्पलमितिपूर्वंत्वयैवोक्त त्वात् इदानींपृच्छसिअवसरंप्राप्यप्रक्ष्यसि वर्तमानसामीप्येवर्तमानवन्निर्देशः तामहंत्वयाऽपृष्टामपिवक्ष्यामीतिशेषः तामेवाह पार्श्वेइति भुक्तस्यान्नादेःसंग्रहस्थानंपार्श्वद्वयंयथाएवंकर्मसंचयस्थानंभरतव र्षमेकंपरमेश्वरस्यदक्षिणपार्श्वत्वेनज्ञेयं तथाऐरावतवर्षमपियोगसंचयस्थानमुत्तरपार्श्वत्वेनज्ञेयं तत्रहिब्रह्मलोकच्युतायोगभ्रष्टाविदेहप्रकृतिलयाख्याएवजायंतेतेचपूर्वसंस्कारात्पुनर्योगमभ्यस्यंति भरतव र्षंतुकर्मयोगयोर्द्वयोरप्यनुष्ठानायोग्यमितिदक्षिणकुक्षित्वेनाभ्यर्हितत्वमस्यसूचितं यथालौकिकेशशशरीरेकर्णाबत्युच्छ्रितंस्थानंतत्तुल्यौपरमेश्वरशरीरेनागद्वीपकाश्यपद्वीपौकमेणदक्षिणोत्तरौ अर्चिरा दिमार्गप्राप्यःसत्यलोकोयोगिप्राप्यः धूमादिमार्गप्राप्योदेवलोकःकर्मप्राप्यश्च विश्वकोशे नागंतुसीसकेरंगेइत्युपक्रम्यश्रेष्ठस्यादुत्तरस्थितइतिसर्वोपरिस्थेश्रेष्ठेहिरण्यगर्भेनागशब्दप्रयोगदर्शनात्तस्यद्वीपइव द्वीपोलोकइतैरंगम्यइतिनागद्वीपःसत्यलोकः तथाकश्यंमयंसुरासोमादिरूपंमादकंकतौयेपिबंतितेकश्यपाःकर्मिणस्तेषामयंकाश्यपद्वीपःस्वर्गः एवंशशस्यकुक्षिकर्णानुसारेणयेब्रह्मांडेउच्चप्रदेशास्तेकुक्ष्युप

यांतुपृच्छसिमांराजन्दिव्यामेतांशशाकृतिम्॥ पार्श्वेशशस्यद्वेवर्षेउक्तेयेदक्षिणोत्तरे॥ कर्णौतुनागद्वीपश्चकाश्यपद्वीपएवच ॥ ५५॥ ताम्रपर्णशिलो राजञ्छ्रीमान्मलयपर्वतः॥ एतद्वितीयंद्वीपस्यदृश्यतेशशसंस्थितम्॥५६॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिजंबूखंडविनिर्माणपर्वणिभूम्यादिपरि माणविवरणेषष्ठोऽध्यायः॥६॥ ॥७॥ ॥ धृतराष्ट्रउवाच॥ ॥ मेरोरधोत्तरंपार्श्वंपूर्वंचाचक्ष्वसंजय॥ निखिलेनमहाबुद्धेमाल्यवंतंचपर्वतं ॥ १॥संजयउवाच॥ ॥दक्षिणेनतुनीलस्यमेरोःपार्श्वंतथोत्तरे॥ उत्तराःकुरवोराजन्पुण्याःसिद्धनिषेविताः॥ २॥ तत्रवृक्षामधुफलानित्यपुष्पफं लोपगाः॥ पुष्पाणिचसुगंधीनिरसवंतिफलानिच॥ ३॥

रिभागत्वेन येवाधःप्रदेशास्तेकुक्षेरधोभागत्वेनचकल्पनीयाः तथाचश्रुतिः अग्निर्मूर्द्धाचक्षुषीचंद्रसूर्यौदिशःश्रोत्रेवाग्विवृताश्चवेदाः वायुःप्राणोहृदयंविश्वमस्यपद्भ्यांपृथिवीह्येषसर्वभूतांतरात्मेति अत्रापिचं द्रसूर्यपदेनरुष्णशुक्लमार्गावेवगृह्येते दिक्शब्देनचतत्प्राप्यौशशकर्णस्थानीयौदेशभेदाविहिज्ञेयम् ॥ ५५ ॥ एवंशशस्यमायिकंबाह्यंपथमंरूपमुक्तंतद्वासनोत्थंद्वितीयमांतरंरूपमाह तांमेति रंजनात्मकत्वात् रक्तंरजस्तामसशब्दितंतथाधानंमनोपितामभेवतन्मयानिपर्णोपलक्षितानिवस्त्रान्नपानफलपुष्पादीनिशिलोपलक्षितानिहर्म्यादीनिचयत्रासौताम्रपर्णशिलः अतएवश्रीमान्मलयपर्वतःमलयेषुआरामेषुपर्व तइवउच्छ्रितः श्रेष्ठतमआरामइत्यर्थः मलयोदेशआरामइतिविश्वः आरामस्यपश्यंतिनतंपश्यतिकश्चनेतिबृहदारण्यकषष्ठेत्रामप्रपंचेआरामपदप्रयोगदर्शनात् एतत्मलयरूपंद्वीपस्यजंबूखंडस्यद्वितीयंवा सनामयंशशसंस्थितंशशत्वरूपं एतेनद्वेवावब्रह्मणोरूपेमूर्तंचैवामूर्तंचेतिश्रुतिप्रसिद्धेस्थूलसूक्ष्मेपरमेश्वरस्यद्वेरूपेचिंत्यत्वेनदर्शिते तेउभेधृताष्ट्रेणापिचिंतनीयेइतिवक्तुराशयः॥ ५६ ॥ ॥इतिभीष्मपर्वणि नैलकंठीयेभारतभावदीपेषष्ठोऽध्यायः॥ ६ ॥ ॥७॥ ॥एवमुक्तेपिध्यानमार्गेचित्तदोषेणानधिकारात्कर्मप्राप्याण्येवस्वर्गच्युतानांस्थानानिपृच्छति मेरोरिति ॥ १ ॥२ ॥ मधुफलाःस्वादुफलाः ॥३॥

॥ १० ॥

॥ ४ ॥ ५ ॥ ६ ॥ शुक्लाभिजनोविष्णुभक्तजनस्तेनसंपन्नास्तत्संगिनः ॥ ७ ॥ ८ ॥ ९ ॥ चक्रवाकौसहचरौपक्षिदंपती ॥ १० ॥ नजहति सममेवद्वावपिशरीरंत्यजतइत्यर्थः ॥ ११ ॥ १२ ॥ १३ ॥

सर्वकामफलास्तत्रकेचिद्वृक्षाजनाधिप ॥ अपरेक्षीरिणोनामवृक्षास्तत्रनराधिप ॥ ४ ॥ येक्षरंतिसदाक्षीरंषड्रसंचामृतोपमम्॥ वस्त्राणिचप्रसूयंतेफलेष्वाभर णानिच॥ ५॥ सर्वामणिमयीभूमिःसूक्ष्मकांचनवालुका ॥ सर्वर्तुसुखसंस्पर्शानिष्पंकाचजनाधिप ॥ पुष्करिण्यःशुभास्तत्रसुखस्पर्शामनोरमाः ॥ ६ ॥ देव लोकच्युताःसर्वेजायंतेतत्रमानवाः॥ शुक्लाभिजनसंपन्नाःसर्वेसुप्रियदर्शनाः॥ ७॥ मिथुनानिचजायंतेस्त्रियश्चाप्सरसोपमाः ॥ तेषांतेक्षीरिणांक्षीरंपिबंत्यमृत संनिभम्॥ ८॥ मिथुनंजायतेकालेसमंतच्चप्रवर्धते ॥ तुल्यरूपगुणोपेतंसमवेषंतथैवच ॥ ९ ॥ एवमेवानुरूपंचचक्रवाकसमंविभो ॥ निरामयाश्चतेलोकानित्यं मुदितमानसाः॥ १०॥ दशवर्षसहस्राणिदशवर्षशतानिच॥ जीवंतितेमहाराजनचान्योन्यंजहत्युत॥ ११ ॥ भारुंडानामशकुनास्तीक्ष्णतुंडामहाबलाः॥ तान्नि र्हरंतीहवृतान्दरीपुप्रक्षिपंतिच ॥ १२ ॥ उत्तराःकुरवोराजन्व्याख्यातास्तेसमासतः ॥ मेरोःपार्श्वमहंपूर्ववक्ष्याम्यथयथातथम् ॥ १३ ॥ तस्यमूर्धाभिषेकस्तुभद्रा श्वस्यविशांपते ॥ भद्रसालवनंयत्रकालाम्रश्चमहाद्रुमः ॥ १४ ॥ कालाम्रस्तुमहाराजनित्यपुष्पफलःशुभः ॥ द्रुमश्चयोजनोत्सेधःसिद्धचारणसेवितः ॥ १५॥ तत्रतेपुरुषाःश्वेतास्तेजोयुक्तामहाबलाः ॥ स्त्रियःकुमुदवर्णाश्चसुंदर्यःप्रियदर्शनाः ॥ १६ ॥ चंद्रप्रभाश्चंद्रवर्णाःपूर्णचंद्रनिभाननाः ॥ चंद्रशीतलगात्र्यश्चनृत्यगी तविशारदाः॥ १७॥ दशवर्षसहस्राणितत्रायुर्भरतर्षभ ॥ कालाम्रवरसंराजंस्तस्मिन्रजतसन्निभम्॥ २३॥ तस्याजंब्वाःफलरसोनदीभूत्वाजनाधिप॥ मेरुंप्रदक्षिणंकृत्वासंप्रयात्युत्तरान्कु रून्॥ २४॥तत्रतेषांमनःशांतिर्नपिपासाजनाधिप॥ तस्मिन्फलरसेपीतेनजराबाधतेचतान्॥ २५॥

मूर्धाभिषेकोमूर्धाभिषिक्तं मुख्यमितियावत्॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ योजनानामिति अत्राप्येकादशत्यार्विंशोंशःपंचपंचाशत् ॥ २१ ॥ एवंसतिसार्धसहस्रद्वयमरत्नीनां तस्यपरिणाहोयत्रतत्रसपादशतंअरत्नयःफलपरिणाहोयुज्यते रसभेदिनांकर्कटीफलवत्पक्वतादशायांभेदशीलानां ॥ २२ ॥ २३ ॥ २४ ॥२५॥

॥ २६ ॥ २७ ॥ गंडिकास्रुद्रपर्वतः ॥ २८ ॥ पंचषट्पंचाधिकाःषट्एकादशेत्यर्थः महाराजनंकांचनंतत्संकाशाः ॥ २९ ॥ ब्रह्मलोकेति येइतःकर्मणाब्रह्मलोकंगतास्तेततश्च्युताःसंतोमाल्यवतिपर्वतेजन्मलब्ध्वाभूतानांरक्षणार्थंतपस्तप्त्वादिवाकरंप्रविशंतेतत्समीपंप्राप्नुवंति ॥ ३०॥३१॥ तत्रापिआदित्यालोकेनरुत्संविराट्पुरुषंबहुकालमुपास्यचंद्रमनसोधिष्ठातारंप्रविशंति सूत्रात्मनाचप्राप्नुवंतीत्यर्थः॥३२॥

तत्रजांबूनदंनामकनकंदेवभूषणम्॥ इंद्रगोपकसंकाशंजायतेभास्वरंतुतत्॥ २६॥तरुणादित्यवर्णाश्चजायंतेतत्रमानवाः ॥ तथामाल्यवतःशृंगेदृश्यतेहव्यवाट्सदा ॥ २७ ॥ नाम्नासंवर्त्तकोनामकालाग्निर्भरतर्षभ॥तथामाल्यवतःशृंगेपूर्वपूर्वानुगंडिका ॥ २८ ॥ योजनानांसहस्राणिपंचषण्माल्यवानथ ॥ महाराजतसंकाशाजायंतेतत्रमानवाः ॥ २९ ॥ ब्रह्मलोकच्युताःसर्वेसर्वेसर्वेषुसाधवः ॥ तपस्तप्यंतितेतीव्रंभवंतित्यूर्ध्वरेतसः॥ रक्षणार्थंतुभूतानांप्रविशंतिदिवाकरं ॥ ३० ॥षष्टिस्तानिसहस्राणिषष्टिरेवशतानिच ॥ अरुणस्याग्रतोयांतिपरिवार्यंदिवाकरम्॥ ३१ ॥ षष्टिर्वर्षसहस्राणिषष्टिमेवशतानिच॥ आदित्यतापतप्तास्तेविशंतिशशिमंडलम्॥ ३२॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिजंबूखंडविनिर्माणप०माल्यवद्वर्णनेसप्तमोऽध्यायः॥७॥ ॥ ७ ॥ ॥धृतराष्ट्रउवाच॥ ॥ वर्षाणांचैवनामानिपर्वतानांचसंजय ॥ आचक्ष्वमेयथातत्त्वंयेचपर्वतवासिनः॥ १॥ ॥संजयउवाच॥ ॥ दक्षिणेनतुश्वेतस्यनिषधस्योत्तरेणतु॥ वर्षंरमणकंनामजायंतेतत्रमानवाः ॥ २ ॥ शुक्लाभिजनसंपन्नाःसर्वेसुप्रियदर्शनाः ॥ निःसपत्नाश्चतेसर्वेजायंतेतत्रमानवाः॥ ३ ॥ दशवर्षसहस्राणिशतानिदशपंच च ॥ जीवंतितेमहाराजनित्यंमुदितमानसाः ॥ ४ ॥ दक्षिणेनतुनीलस्यनिषधस्योत्तरेणतु ॥ वर्षंहिरण्मयंनामयत्रहैरण्वतीनदी ॥ ५॥ यत्रचायंमहाराजपक्षिराट्पतगोत्तमः॥यक्षानुगामहाराजधनिनःप्रियदर्शनाः॥ ६॥ महाबलास्तत्रजनाराजन्मुदितमानसाः॥ एकादशसहस्राणिवर्षाणांतिजनाधिप॥ ७॥ आयुःप्रमाणंजीवंतिशतानिदशपंचच॥ शृंगाणिचविचित्राणित्रीण्येवमनुजाधिप॥ ८॥ एकंमणिमयंतत्रतथैकंरौक्ममद्भुतम्॥ सर्वरत्नमयंचैकंभवनैरुपशोभितं ॥ ९॥ तत्रस्वयंप्रभादेवीनित्यंवसतिशांडिली॥ उत्तरेणतुशृंगस्यसमुद्रांतेजनाधिप॥ १०॥

इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेसप्तमोऽध्यायः ॥ ७ ॥ ॥ ७ ॥ ॥ वर्षाणामिति ॥ १ ॥ दक्षिणेनत्विति यद्यपिश्वेतस्यदक्षिणेनीलस्तस्यदक्षिणेनिषधस्तथापिनिषधोत्तरत्वसत्त्वेवेत्यविरोधः रमणकंयत्पूर्वंनीलादुत्तरतःश्वेताद्दक्षिणतश्चश्वेतवर्षमित्युक्तंतस्यैवरमणकमितिसंज्ञांतरं दक्षिणेननुनीलस्यनीलमाल्यवतोर्नीलगंधमादनयोश्चसंधाविवेत्यर्थः निषधस्योत्तरेणतथैवतयोरेवसंधिद्वयेइत्यर्थः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ शृंगाणिशृंगवतःषष्ठस्यवर्षपर्वतस्यसानूनि ॥ ८ ॥ ९ ॥ शृंगस्यशृंगवतः ॥ १० ॥ ॥ ११ ॥

शृंगंशृंगवत् यस्मात्सर्वधातुविचित्रश्चशृंगवान्नामपर्वतइत्युक्तमहिम्नापर्वतेनपरिच्छिन्नंइदंऐरावताख्यंवर्षंतस्मात्अतःपूर्वोक्ताद्वर्षगणात्परंश्रेष्ठमिदंवर्षमित्यर्थः एतदेवाह ननत्रेत्यादिना॥ ११॥१२॥अनिष्यंदाअस्वेदाःदेवतुल्याइत्यर्थः ॥ १३॥ १४ ॥ आदित्यतापतप्तास्तेविशंतिशशिमंडलमितिविराड्वाक्यंत्वत्वासूत्रात्मभावंगच्छंतीत्युक्तंस्थूलसूक्ष्मरूपंकार्यद्वयंइदानींपिप्पलंतुवदिष्यसीत्युक्तःसंजयोऽवसरंप्राप्यपिप्पलाख्यंकारणमप्याह क्षीरोदस्येति तत्राधिदैवंलक्षणेक्षुसुरासर्पिर्दधिक्षीरशुद्धोदकानांसप्तसमुद्राणामुपांत्यःक्षीरोदःअध्यात्मं अन्नमयःकोशआत्मा प्राणमयस्तुइंद्रियमयप्राणमयभेदेनद्विविधइति द्वौचतुर्थौमनोमयःपंचमोविज्ञानमयः षष्ठआनंदमयःसर्वकारणभूतःसप्तमःशुद्धब्रह्मेति तत्रक्षीरोदात्परतोमहाविष्णोर्जगज्जन्मादिहेतोःस्थानमस्तियदिदंदहराद्युपासकैःप्राप्यते यत्रारण्यश्वार्णवीयत्रप्रभुविमितंहिरण्मयंवेदमयत्राश्वत्थःसोमसवनइत्यादिचिह्नमुक्तंश्रुतिप्रसिद्धं सप्रभुरंतर्यामी हरिःसर्वसंहर्त्तावैकुंठोऽकुंठितसामर्थ्यःशकटेशकटवदचेतनेकनकामयेकनकवद्भास्वरज्योतिर्मये अन्येभ्योपिदृश्यतेइतिदीर्घः चिन्मयेशरीरेवसति ॥ १५ ॥ अस्यवस्तुवृत्त्यायत्रापिचिन्मयत्वंतथापिहिलोकप्रसिद्धंअष्टचक्रंअष्टाभिर्भगवत्तनुभिरुद्यतइतिअष्टचक्रंयानंइहलोकपरलोकगतिसाधनं अष्टौचक्राणितु

वर्षमैरावतंनामतस्माच्छृंगमतःपरम्॥ नतत्रसूर्यस्यपतिनजीर्यंतेचमानवाः॥ ११॥ चंद्रमाश्चसनक्षत्रोज्योतिर्भूतइवावृतः॥ पद्मप्रभाःपद्मवर्णाःपद्मपत्रनिभेक्षणाः॥ १२ ॥ पद्मपत्रसुगंधाश्चजायंतेतत्रमानवाः ॥ अनिष्यंदाइष्टगंधानिराहाराजितेंद्रियाः॥ १३॥ देवलोकच्युताःसर्वेतथाविरजसोनृप॥ त्रयोदशसहस्राणिवर्षाणांतिजनाधिप ॥ १४॥ आयुःप्रमाणंजीवंतिनराभरतसत्तम॥ क्षीरोदस्यसमुद्रस्यतथैवोत्तरतःप्रभुः ॥ हरिर्वसतिवैकुंठःशकटेकनकामये॥ १५॥ अष्टचक्रंहितद्यानंभूतयुक्तंमनोजवम्॥अग्निवर्णंमहातेजोजांबूनदविभूषितम्॥ १६॥ सप्रभुःसर्वभूतानांविभुश्चभरतर्षभ॥ संक्षेपोविस्तरश्चैवकर्त्ताकारयितातथा॥ १७॥ पृथिव्यापस्तथाकाशंवायुस्तेजश्चपार्थिव ॥ सयज्ञःसर्वभूतानामास्यंतस्यहुताशनः॥ १८॥ ॥वैशंपायनउवाच॥ ॥एवमुक्तःसंजयेनधृतराष्ट्रोमहामनाः॥ध्यानमन्वगमद्राजापुत्रान्प्रतिजनाधिप॥ १९॥सविचिंत्यमहातेजाःपुनरेवाब्रवीद्वचः॥ असंशयंसूतपुत्रकालःसंक्षिपतेजगत्॥ २०॥

कर्मेंद्रियपंचकंज्ञानेंद्रियपंचकंमनआदिचतुष्कंप्राणपंचकंसूक्ष्मभूतपंचकंअविद्याकामःकर्मचेतिपुर्यष्टकात्मकंलिंगंशकटवदचेतनमचलमपिभूतयुक्तंभूतेननित्यसिद्धेनब्रह्मणाअनुप्रविष्टंसत्मनोजवंशीघ्रंगच्छतीति प्राणनादिक्रियाःकरोतीत्यर्थः अतएवश्रूयतेकोह्येवान्याल्काःप्राण्यात् यदेषआकाशआनंदोनस्यादिति अग्निवर्णंअग्निवत्वर्णोवर्णनायस्यअत्यंतंसंसारदुःखप्रदमित्यर्थः महातेजःअनेकविधज्ञानेंद्रियप्रधानं जांबूनदंदिव्यसुवर्णंचेनोहरणंवासनाजालंतेनविभूषितंतन्मयमित्यर्थः अधिदैवंतुस्पष्टएवार्थः ॥ १६ ॥ सप्रभुरिति योसिन्शकटेवसतिसएवसर्वेषांजीवानांप्रभुर्नियंता विभुर्व्यापकः संक्षेपःसंहर्ता विस्तरःसम्यक्विरचयिता कर्ताजीवरूपेण कारयिताईश्वररूपेण ॥ १७ ॥ एवमप्यात्मादिदैवरूपत्वमुक्त्वाअधिभूताधियज्ञरूपत्वमपितस्यैवाह पृथिवीति सर्वेषांभूतानांसंबंधीयथाधिकारंनिर्वर्त्योयज्ञःसएवआस्यंतस्यहुताशनःविशेषतस्तुसयज्ञेनैवतृप्यतीतिभावः॥ १८ ॥ एवंसंजयेनउक्तःउपदिष्टोधृतराष्ट्रोमहामनाःमहत्पिप्पलापरपर्यायविश्वरूपदर्शनयोग्यंमनोयस्यसएवंभूतोध्यानंसविकल्पसमाधिअन्वगमत्संजयवाक्यश्रवणमनुप्राप्तवान् ॥ १९ ॥ तत्रचयथाऽर्जुनेनविश्वरूपदर्शनकालेभावीक्षत्रक्षयोदृष्टस्तद्वत्सोऽपिनरनारायणाभ्यांक्रियमाणंसर्वक्षत्रक्षयंदृष्ट्वात्मपुत्रान्प्रतिविचिंत्यपुनरेवाब्रवीत् तदेववचनमाह असंशयमिति ॥ २० ॥

इहलोकेत्वइत्युक्तेजंबूखंडेशाश्वतंशश्वद्भवंमेवांदिकमपिनास्तिकिंतुसर्वंदृष्टनष्टस्वभावंसंकल्पमात्रोत्थं किंतर्हिशाश्वतमस्तिनरोनारायणश्चेति जीवेश्वरावेवशाश्वतौनेत्याह उभयंमिलित्वाएकएवसर्वज्ञःसर्वभूतहृच्च तमेवेश्वरंदेवावैकुंठमाहुः अधिदैवंसएववैकुंठाधिपतिरित्युच्यतइत्यर्थः नराजीवास्तुतमेवविष्णुंअध्यात्मंअंतःप्रविष्टंजनानांशास्तारंअष्टचक्रस्यशकटस्यचालकमाहुः तथापिप्रभुंकृत्वापिलेपशू

सृजतेचपुनःसर्वंनेहविद्यतिशाश्वतम्॥ नरोनारायणश्चैवसर्वज्ञःसर्वभूतहृत्॥२१॥देवावैकुंठमित्याहुर्नराविष्णुमितिप्रभुम्॥ २२॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिजंबूखंडविनिर्माणपर्वणिधृतराष्ट्रवाक्येऽष्टमोऽध्यायः॥८॥७॥ ॥ ॥धृतराष्ट्रउवाच॥ ॥यदिदंभारतंवर्षंयत्रेदंभूर्छितंबलम्॥ यत्रातिमात्रलुब्धोयंपुत्रोदुर्योधनोमम॥ १॥यत्रगृद्धाःपांडुपुत्रायत्रमेसज्जतेमनः॥एतन्मेतत्त्वमाचक्ष्वत्वंहिमेबुद्धिमान्मतः॥ २॥ ॥संजयउवाच॥ ॥नतत्रपांडवागृद्धाःशृणुराजन्वचोमम॥ गृद्धोदुर्योधनस्तत्रशकुनिश्चापिसौबलः॥ ३॥ अपरेक्षत्रियाश्चैवनानाजनपदेश्वराः॥ येगृद्धाभारतेवर्षेनमृष्यंतिपरस्परम्॥४॥अत्रतेकीर्तयिष्यामिवर्षंभारतभारतम्॥ प्रियमिंद्रस्यदेवस्यमनोर्वैवस्वतस्यच॥५॥पृथोस्तुराजन्वैन्यस्यतथेक्ष्वाकोर्महात्मनः॥ ययातेरंबरीषस्यमांधातुर्नहुषस्यच॥ ६॥तथैवमुचुकुंदस्यशिबेरौशीनरस्यच॥ ऋषभस्यतथैलस्यनृगस्यनृपतेस्तथा॥ ७॥ कुशिकस्यचदुर्द्धर्षगाधेश्चैवमहात्मनः॥ सोमकस्यचदुर्द्धर्षदिलीपस्यतथैवच॥ ८॥ अन्येषांचमहाराजक्षत्रियाणांबलीयसां॥ सर्वेषामेवराजेंद्रप्रियंभारतभारतं॥ ९॥ तत्तेवर्षंप्रवक्ष्यामियथायथमरिंदम॥ शृणुमेगदतोराजन्यन्मांत्वंपरिपृच्छसि॥ १०॥ महेंद्रोमलयःसह्यःशुक्तिमानृक्षवानपि॥ विंध्यश्चपारियात्रश्चसप्तैतेकुलपर्वताः॥ ११॥ तेषांसहस्रशोराजन्पर्वतास्तेसमीपतः॥ अविज्ञाताःसारवंतोविपुलाश्चित्रसानवः॥ १२॥ अन्येततोऽपरिज्ञाताह्यस्वाह्यस्वोपजीविनः॥ आर्याम्लेच्छाश्चकौरव्यतैर्मिश्राःपुरुषाविभो॥१३॥ नदींपिबंतिविपुलांगंगांसिंधुंसरस्वतीम्॥गोदावरींनर्मदांचब्राह्मदुदांचमहानदीम्॥१४॥शतद्रूंचंद्रभागांचयमुनांचमहानदीम्॥दृषद्वतींविपाशांचविपाप्यांस्थूलवालुकां॥ १५॥नदींवेत्रवतींचैवकृष्णवेणांचनिम्नगाम्॥ इरावतींवितस्तांचपयोष्णींदेविकामपि॥१६॥वेदस्मृतांवेदवतींत्रिदिवामिक्षुलांकृमिम्॥ करीषिणींचित्रवाहांचित्रसेनांचनिम्नगां॥ १७॥ गोमतींधुतपापांचवंदनांचमहानदीम्॥ कौशिकींत्रिदिवांकृत्यांनिचितांलोहितारणीम्॥ १८॥

न्यं अनईश्वरस्यचिकीर्षितःक्षत्रक्षयोनास्मद्दोषजइतिभावः॥ २१॥२२॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेऽष्टमोऽध्यायः॥ ८॥ ॥७॥ ॥ यदिदमिति॥ १॥ गृद्धाःलोभयुक्ताः एतत्एतस्य मेमह्यं तत्त्वंयाथार्थ्यं॥ २॥ ३॥ ४॥ प्रियमिति कर्मभूमित्वादिंद्रादीनामिदंप्रियम्॥ ५॥ अपेक्ष्यंस्पष्टार्थोपंथः॥ ६॥ ७॥ ८॥ ९॥ १०॥ ११॥ १२॥ १३॥ १४॥ १५॥ १६॥ १७॥ १८॥

॥ १२ ॥

॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

रहस्यांशतकुंभांचसरयूंचतथैवच॥ चर्मण्वतींवेत्रवतींहस्तिसोमांदिशंतथा॥ १९॥ शरावतींपयोष्णींचवेणांभीमरथीमपि॥कावेरींचुलुकांचापिवाणींशतवलामपि॥ २०॥नीवारामहितांचापिसुप्रयोगांजनाधिप॥पवित्रांकुंडलींसिंधुंराजनींपुरमालिनीम्॥ २१॥पूर्वाभिरामांवीरांचभीमामोघवतींतथा॥पाशाशिनींपापहरांमहेंद्रांपाटलावतीम्॥२२॥करीषिणीमसिक्नींचकुशचीरांमहानदीम्॥मकरींप्रवरांमेनांहेमांघृतवतींतथा॥२३॥पुरावतीमनुष्णांचशैब्यांकापींचभारत॥ सदानीरामधृष्यांचकुशधारांमहानदीम्॥ २४॥सदाकांतांशिवांचैवतथावीरवतीमपि॥वस्रांसुवस्रांगौरींचकंपनांसहिरण्वतीम्॥२५॥वरांवीरकरांचापिपंचमींचमहानदीम्॥रथचित्रांज्योतिरथांविश्वामित्रांकपिंजलां॥२६॥उपेंद्रांबहुलांचैवकुवीरामंबुवाहिनीम्॥विनदींपिंजलांविणांतुंगवेणांमहानदीम्॥ २७॥विदिशांकृष्णवेणांचतामाघांचकपिलामपि॥ खलुंसुवामांवेदाश्वांहरिश्रावांमहापगाम्॥२८॥शीघ्रांचपिच्छिलांचैवभारद्वाजींचनिम्नगाम्॥कौशिकींनिम्नगांशोणांवाहुदामथचंद्रमाम्॥ २९॥दुर्गांचित्रशिलांचैवब्रह्मवेध्यांबृहद्वतीम्॥ यवक्षामथरोहींचतथाजांबूनदीमपि॥३०॥सुनसांतमसांदासींवसामन्यांवराणसीम्॥ नीलांधृतवतींचैवपर्णाशांचमहानदीम्॥ ३१॥मानवींवृषभांचैवब्रह्ममेध्यांबृहद्धनीम्॥एताश्चान्याश्चबहुधामहानद्योजनाधिप॥३२॥सदानिरामयांकृष्णांमंदगांमंदवाहिनीम्॥ ब्राह्मणींचमहागौरींदुर्गामपिचभारत॥ ३३॥ चित्रोपलांचित्ररथांमंजुलांवाहिनींतथा॥मंदाकिनींवैतरणींकोषांचापिमहानदीम्॥ ३४॥शुक्तिमतीमनंगांचतथैवऋषभाह्वयाम्॥लोहित्यांकरतोयांचतथैवऋषकाह्वयाम्॥३५॥कुमारीमृषिकुल्यांचमारिषांचसरस्वतीम्॥मंदाकिनींसुपुण्यांचसर्वागंगांचभारत॥ ३६॥ विश्वस्यमातरःसर्वाःसर्वाश्चैवमहाफलाः॥तथानद्यस्त्वप्रकाशाःशतशोयसहस्रशः॥ ३७॥ इत्येताःसरितोराजन्समाख्यातायथास्मृति॥ अतऊर्ध्वंजनपदान्निबोधगदतोमम॥ ३८॥ तत्रेमेकुरुपांचालाःशाल्वामाद्रेयजांगलाः॥शूरसेनाःपुलिंदाश्चबोधामालास्तथैवच॥३९॥मत्स्याःकुशल्याःसौशल्याःकुंतयःकांतिकोसलाः॥ चेदिमत्स्यकरूषाश्चभोजाःसिंधुपुलिंदकाः॥ ४०॥ उत्तमाश्चदशार्णाश्चमेकलाश्चोत्कलैःसह॥ पंचालाःकोसलाश्चैवनैकपृष्ठाधुरंधराः॥ ४१॥गोधामद्रकलिंगाश्चकाशयोपरकाशयः॥ जठराःकुकुराश्चैवसदशार्णाश्चभारत॥ ४२॥

॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

कुंतयोऽवंतयश्चैवतथैवापरकुंतयः ॥ गोमंतामंदकाःसंडाविदर्भारूपवाहिकाः ॥ ४३ ॥ अश्मकापांडुराष्ट्राश्चगोपराष्ट्राःकरीतयः ॥ अधिराज्यकुशाद्यश्चमल्लराष्ट्रंचकेवलम् ॥ ४४ ॥ वारवास्यायवाहाश्चचक्राश्चक्रातयःशकाः ॥ विदेहामगधाःस्वक्षामलजाविजयास्तथा ॥ ४५ ॥ अंगावंगाःकलिंगाश्चयक्रुल्लोमानएव च ॥ मल्लाःसुदेष्णाःप्रह्लादामाहिकाःशशिकास्तथा ॥ ४६ ॥ बाह्लिकावाटधानाश्चआभीराःकालतोयकाः ॥ अपरांताःपरांताश्चपंचालाश्चर्ममंडलाः ॥ ४७ ॥ अटवीशिखराश्चैवमेरुभूताश्चमारिष ॥ उपावृत्तानुपावृत्ताःस्वराष्ट्राःकेकयास्तथा ॥ ४८ ॥ कुंदापरांतामाहेयाःकक्षाःसामुद्रनिष्कुटाः ॥ अंधाश्चबहवोराजन्नंतर्गिर्यास्तथैवच ॥ ४९ ॥ बहिर्गिर्यांगमलजामगधामानवर्जकाः ॥ समंतराःप्रावृषेयाभार्गवाश्चजनाधिप ॥ ५० ॥ पुंड्राभर्गाःकिराताश्चसुदृष्टायामुनास्तथा ॥ शकानिषादानिषधास्तथैवानर्तनैर्ऋताः ॥ ५१ ॥ दुर्गालाःप्रतिमत्स्याश्चकुंतलाःकोसलास्तथा ॥ तीरग्रहाःशूरसेनाईजिकाःकन्यकागुणाः ॥ ५२ ॥ तिलभारामसीराश्चमधुमंतःसुकंदकाः ॥ काश्मीराःसिंधुसौवीरागांधारादर्शकास्तथा ॥ ५३ ॥ अभीसाराउलूताश्चशैवलावाह्लिकास्तथा ॥ दार्वीचवानवादर्वा वातजामरथोरगाः ॥ ५४ ॥ बह्वृवाद्याश्चकौरव्यसुदामानःसुमल्लिकाः ॥ वधाःकरीषकाश्चापिकुलिंदोपत्यकास्तथा ॥ ५५ ॥ वनायवोदशापार्श्वरोमाणःकुशविंदवः ॥ कच्छागोपालकक्षाश्चजांगलाःकुरुवर्णकाः ॥ ५६ ॥ किरातावर्बराःसिद्धावैदेहास्ताम्रलिप्तकाः ॥ ओंड्राम्लेच्छाःसैसिरिध्राःपार्वतीयाश्चमारिष ॥ ५७ ॥ अथापरेजनपदादक्षिणाभरतर्षभ ॥ द्रविडाःकेरलाःप्राच्याभूषिकावनवासिकाः ॥ ५८ ॥ कर्णाटकामहिषकाविकल्पामूषकास्तथा ॥ झिल्लिकाःकुंतलाश्चैवसौहृदानभकाननाः ॥ ५९ ॥ कौकुट्टकास्तथाचोलाःकोंकणामालवानराः ॥ समंगाःकरकाश्चैवकुकुरांगारमारिषाः ॥ ६० ॥ ध्वजिन्युत्सवसंकेतास्त्रिगर्त्ताःशाल्वसेनयः ॥ व्यूकाःकोकवकाःप्रोष्ठाःसमवेगवशास्तथा ॥ ६१ ॥ तथैवविंध्यचुलिकाःपुलिंदावल्कलैःसह ॥ मालवाबल्लवाश्चैवततथैवापरबल्लवाः ॥ ६२ ॥ कुलिंदाःकालदाश्चैवकुंडलाःकरटास्तथा ॥ मूषकास्तनवालाश्चसनीपाघटसंजयाः ॥ ६३ ॥ अठिदापाशिवाटाश्चतनयाःसुनयास्तथा ॥ ऋषिकाविदभाःकाकास्तंगणाःपरतंगणाः ॥ ६४ ॥ उत्तराश्चापरम्लेच्छाःकूराभरतसत्तम ॥ यवनाश्चीनकांबोजादारुणाम्लेच्छजातयः ॥ ६५ ॥ सकृद्ग्रहाःकुलत्थाश्चहूणाःपारसिकैःसह ॥ तथैवरमणाश्चीनास्तथैवदशमालिकाः ॥ ६६ ॥ क्षत्रियोपनिवेशाश्चवैश्यशूद्रकुलानिच ॥ शूद्राभीराश्चदरदाःकाश्मीराःपशुभिःसह ॥ ६७ ॥

॥ १३ ॥

॥ ६८ ॥ ६९ ॥ ७० ॥ यथागुणबलमिति यथागुणंसत्त्वादिगुणान्अनतिक्रम्य तद्वत्यथाबलंशौर्यंचानतिक्रम्य त्रिवर्गस्यधर्मार्थकामात्मकस्यमहाफलंउत्कृष्टफलहैरण्यगर्भपदप्राप्त्यंतंसगम्यनुष्ठितासम्यक्पालिताभूमिर्दुहेतप्रपूरयेत् धेनुरिवकामान्अन्यांश्चदुग्धेइतिकामधुक् ॥ ७१ ॥ गृध्यंतिअभिकांक्षांकुर्वंति वसुगृद्धाःधनलुब्धाः ॥ ७२ ॥ देवकायानांयज्ञेनमानुषकायानामन्नप्रसवेनभूमिःपरायणंशरणं ॥ ७३ ॥ ७४ ॥ तस्मात्अन्नमत्वात् ॥ ७५ ॥ एवमाधिदैविकंभूमिजयफलमुक्तंअथाध्यात्मंभूमिजयफलमाह पितेति अछिद्रंसंपूर्णदर्शनंयस्याःसाभूमिःयोगमार्गरीत्याकात्स्न्येनदृष्टासतीपित्रादिवदि

खाशीराश्चांतचाराश्चपह्लवागिरिगह्वराः ॥ आत्रेयाःसभरद्वाजास्तथैवस्तनपोषिकाः ॥ ६८ ॥ प्रोषकाश्चकलिंगाश्चकिरातानांचजातयः ॥ तोमराहन्यमानाश्चतथैवकरभंजकाः ॥ ६९ ॥ एतेचान्येजनपदाःप्राच्योदीच्यास्तथैवच ॥ उद्देशमात्रेणमयादेशाःसंकीर्त्तिताविभो ॥ ७० ॥ यथागुणबलंचापित्रिवर्गस्यमहाफलम् ॥ दुह्येतधेनुःकामधुक्भूमिःसम्यगनुष्ठिता ॥ ७१ ॥ तस्यांगृध्यंतिराजानःशूराधर्मार्थकोविदाः ॥ तेत्यजंत्याहवेप्राणान्वसुगृद्धास्तरस्विनः ॥ ७२ ॥ देवमानुषकायानांकामंभूमिःपरायणम् ॥ अन्योन्यस्यावलुंपंतिसारमेयायथामिषम् ॥ ७३ ॥ राजानोभरतश्रेष्ठभोक्तुकामावसुंधराम् ॥ नचापित्वभिःकामानांविद्यतेद्यापिकस्यचित् ॥ ७४ ॥ तस्मात्परिग्रहेभूमेर्यतंतेकुरुपांडवाः ॥ साम्नाभेदेनदानेनदंडेनैवचभारत ॥ ७५ ॥ पिताभ्राताचपुत्राश्चखंद्यौश्चनरपुंगव ॥ भूमिर्भवतिभूतानांसम्यगच्छिद्रदर्शना ॥ ७६ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिजंबूखंडविनिर्माणपर्वणिभारतीयनदीदेशादिनामकथनेनवमोऽध्यायः ॥ ९ ॥ ॥ ७ ॥ ॥ धृतराष्ट्र उवाच ॥ ॥ भारतस्यास्यवर्षस्यतथाहैमवतस्यच ॥ प्रमाणमायुषःसूतवलंचापिशुभाशुभम् ॥ १ ॥ अनागतमतिक्रांतंवर्तमानंचसंजय ॥ आचक्ष्वमेविस्तरेणहरिवर्षंतथैवच ॥ २ ॥ ॥ संजयउवाच ॥ ॥ चत्वारिभारतेवर्षेयुगानिभरतर्षभ ॥ कृतंत्रेताद्वापरंचतिष्यंचकुरुवर्धन ॥ ३ ॥ पूर्वंकृतयुगंनामततस्त्रेतायुगंप्रभो ॥ संक्षेपाद्वापरस्यायततस्तिष्यंप्रवर्तते ॥ ४ ॥ चत्वारितुसहस्राणिवर्षाणांकुरुसत्तम ॥ आयुःसंख्याकृतयुगेसंख्यातराजसत्तम ॥ ५ ॥ तथात्रीणिसहस्राणित्रेतायांमनुजाधिप ॥ द्वेसहस्रेद्वापरेतुभुवितिष्ठंतिसांप्रतम् ॥ ६ ॥ नप्रमाणस्थितिर्त्यस्तिस्तिष्येऽस्मिन्भरतर्षभ ॥ गर्भस्थाश्चधियंतेऽत्रतथाजाताधियंतिच ॥ ७ ॥ महाबलामहासत्त्वाःप्रज्ञागुणसमन्विताः ॥ प्रजायंतेचजाताश्चशतशोऽथसहस्रशः ॥ ८ ॥ जाताःकृतयुगेराजन्धनिनःप्रियदर्शनाः ॥ प्रजायंतेचजाताश्चमुनयोवैतपोधनाः ॥ ९ ॥ महोत्साहामहात्मानोधार्मिकाःसत्यवादिनः ॥ प्रियदर्शनावपुष्मंतोमहावीर्याधनुर्धराः ॥ १० ॥

हुभौतिकेभ्यआघातेभ्यःपाति वज्रकायत्वंप्रयच्छतीत्यर्थः स्वंस्वस्थंसूर्यादीनांपदंद्यौःस्वर्गपदंचसैवभवति तत्तत्पापयतीत्यर्थः ॥ ७६ ॥ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेनवमोऽध्यायः ॥ ९ ॥ ॥ ७ ॥ भारतस्येति ॥ १ ॥ २ ॥ तिष्यंकलियुगं ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ प्रजायंतेप्रजांजनयंति ॥ ८ ॥ ९ ॥ वपुष्मंतःप्रशस्तदेहाः ॥ १० ॥

॥ ११ ॥ सर्वेवर्णाःपरस्परजयैषिणोजायंतइतिसंबंधः ॥ १२ ॥ १३॥ ईर्ष्यापरोत्कर्षासहिष्णुत्वं मानःस्वस्मिन्पूज्यतानबुद्धिः क्रोधोऽभिज्वलनं मायाकपटं असूयापरगुणेषुदोषाविष्करणं रागोविषयेषुप्रीतिः लोभस्तल्लिप्सा ॥ १४ ॥ संक्षेपोगुणानामितिशेषः ॥ १५ ॥ ॥ इतिश्रीमत्पर्वणिनैलकंठीयेभारतभावदीपेदशमोऽध्यायः ॥ १० ॥ ॥ ७ ॥ ॥ ५ ॥ ॥ जंबूखंडइति ॥१॥२॥३॥पृहंराङ्ग॥४॥ अष्टादशसहस्राणिषट्शतानिचयोजनानिविष्कंभश्चतुर्दशकमलाकारस्यजंबूद्वीपस्यपत्रांतपरिधिः तादृशविस्तारएवपिंडप्रमाणमंतर्भाव्यपर्वताकृतित्वाज्जंबूपर्वतइत्युच्यते ॥५॥लावणस्येति क्षेत्रफलतःपं

वरार्हायुधिजायंतेक्षत्रियाःशूरसत्तमाः॥ त्रेतायांक्षत्रियाराजन्सर्वेवैचक्रवर्त्तिनः॥११॥ सर्ववर्णाश्चजायंतेसदाचैवचद्वापरे॥ महोत्साहावीर्यवंतःपरस्परजयैषिणः॥ १२॥ तेजसाल्पेनसंयुक्ताःक्रोधनाःपुरुषानृप॥ लुब्धाअनृतकाश्चैवतिष्येजायंतिभारत॥ १३॥ ईर्ष्यामानस्तथाक्रोधोमायाऽसूयातथैवच॥ तिष्येभवतिभूतानांरागोलोभश्चभारत॥ १४॥ संक्षेपोवर्ततेराजन्द्वापरेस्मिन्नराधिप॥ गुणोत्तरंहैमवतंहरिवर्षततःपरम्॥ १५॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणि जंबूखंडविनिर्माणपर्वणिभारतवर्षकृताद्यनुरोधेनायुर्निरूपणेदशमोऽध्यायः॥१०॥ ॥७॥ ॥समाप्तंचजंबूखंडविनिर्माणपर्व॥ ॥अथभूमिपर्व॥ ॥धृतराष्ट्रउवाच॥ ॥जंबूखंडस्त्वयाप्रोक्तोयथावद्दिहसंजय॥ विष्कंभमस्यप्रब्रूहिपरिमाणंतुतत्त्वतः॥१॥ समुद्रस्यप्रमाणंचसम्यगच्छिद्रदर्शनम्॥ शाकद्वीपंचमेब्रूहि कुशद्वीपंचसंजय॥ २॥ शाल्मलिंचैवतत्त्वेनक्रौंचद्वीपंतथैवच॥ ब्रूहिगावल्गणेसर्वंराहोःसोमार्कयोस्तथा॥ ३॥ ॥संजयउवाच॥ ॥ राजन्सुवहवोद्वीपायैरिदंसंततंजगत्॥ समुद्रीपान्प्रवक्ष्यामिचंद्रादित्यौग्रहंतथा॥ ४॥ अष्टादशसहस्राणियोजनानिविशांपते॥ षट्शतानिचपूर्णानिविष्कंभोजंबुपर्वतः॥ ५॥ लावणस्यसमुद्रस्यविष्कंभोद्विगुणःस्मृतः॥ नानाजनपदाकीर्णोमणिविद्रुमचित्रितः॥ ६॥ नैकधातुविचित्रैश्चपर्वतैरुपशोभितः॥ सिद्धचारणसंकीर्णःसागरः परिमंडलः॥ ७॥ शाकद्वीपंचवक्ष्यामियथावद्दिहपार्थिव॥ शृणुमेत्वंयथान्यायंब्रुवतःकुरुनंदन॥ ८॥ जंबूद्वीपप्रमाणेनद्विगुणःसनराधिप॥ विष्कंभेणमहाराजसागरोपिविभागशः॥ ९॥ क्षीरोदोभरतश्रेष्ठयेनसंपरिवारितः॥ तत्रपुण्याजनपदास्तत्रनघ्रियतेजनः॥ १०॥

चसहस्रायामत्वाज्जंबूद्वीपस्यतदुभयतःपंचपंचभिःसहस्रैःसमुद्रस्यविष्कंभोविस्तारःतेनससमुद्रस्यद्वीपस्यपंचदशसहस्रयोजनोव्यासः द्विगुणःदशसहस्रयोजनःपरिमंडलश्चेदुभयतःसमुद्रवेष्टनेनसहचत्वारिंशत्सहस्रः एवंतृतीयोऽशीतिसहस्रः चतुर्थःषष्टिसहस्राधिकलक्षं पंचमोलक्षत्रयंविंशतिसहस्राणि षष्ठोलक्षषट्कंचत्वारिंशत्सहस्राणि सप्तमोद्वादशलक्षाण्यशीतिसहस्राणि एतेषांसंकलनेपंचविंशतिलक्षाणि पंचत्रिंशत्सहस्राणियोजनानिसप्तानांद्वीपानांससमुद्राणांविस्तारः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७॥ रेवतीज्योतिर्मंडलरूपेणदिविविभज्यमाणापिदिव्येनरूपेणात्रापिवर्त्ततेएवंविधिर्मर्यादापितामहेनकृता ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ पतगवर्णव्याच

कुतएवहिदुर्भिक्षंक्षमातेजोयुताहिते॥ शाकद्वीपस्यसंक्षेपोयथावद्भरतर्षभ॥ ११॥ उक्तएषमहाराजकिमन्यत्कथयामिते॥ ॥धृतराष्ट्रउवाच॥ ॥शाकद्वीपस्यसंक्षेपोयथावदिहसंजय॥ १२॥ उक्तस्त्वयामहाप्राज्ञविस्तरंब्रूहितत्त्वतः॥ ॥संजयउवाच॥ ॥ तथैवपर्वताराजन्समात्रमणिभूषिताः॥१३॥ रत्नाकरास्तथानद्यस्तेषांनामानिमेशृणु॥ अतीवगुणवत्सर्वंतत्रपुण्यंजनाधिप॥ १४॥ देवर्षिगंधर्वयुतःप्रथमोमेरुरुच्यते॥ प्रागायतोमहाराजमलयोनामपर्वतः॥ १५॥ ततोमेघाःप्रवर्तंतेप्रभवंतिचसर्वशः॥ ततःपरेणकौरव्यजलधारोमहागिरिः॥ १६॥ ततोनित्यमुपादत्तेवासवःपरमंजलम्॥ ततोवर्षंप्रभवतिवर्षकालेजनेश्वर ॥ १७॥ उच्चैर्गिरीरैवतकोयत्रनित्यंप्रतिष्ठिता॥ रेवतीदिविनक्षत्रंपितामहकृतोविधिः॥ १८॥ उत्तरेणतुराजेंद्रश्यामोनाममहागिरिः॥ नवमेघप्रभःप्रांशुःश्रीमानुज्ज्वलविग्रहः॥ १९॥ यतःश्यामत्वमापन्नाःप्रजाजनपदेश्वर॥ ॥धृतराष्ट्रउवाच॥ ॥सुमहान्संशयोमेद्यप्रोक्तोयंसंजयत्वया॥ २०॥ प्रजाःकथंसूतपुत्रसंग्रामाःश्यामतामिह॥ ॥संजयउवाच॥ ॥सर्वेष्वेवमहाराजद्वीपेषुकुरुनंदन॥२१॥ गौरःकृष्णश्चपतगस्तयोर्वर्णांतरेनृप॥ श्यामोयस्मात्परत्तोवैतस्माच्छ्यामोगिरिःस्मृतः॥ २२॥ ततःपरंकौरवेंद्रदुर्गशैलोमहोदयः॥ केसरःकेसरयुतोयतोवीतःप्रवर्तते॥२३॥ तेषांयोजनविष्कंभोद्विगुणःप्रविभागशः॥ वर्षाणितेषुकौरव्यसमोक्तानिमनीषिभिः॥ २४॥ महामेरुर्महाकाशोजलदःकुमुदोत्तरः॥ जलधारोमहाराजसुकुमारइतिस्मृतः॥ २५॥ रेवतस्त्वतुकौमारःश्यामस्यमणिकांचनः॥ केसरस्त्वथमौदाकीपरेणतुमहापुमान्॥ २६॥ परिवार्यतुकौरव्यदैर्घ्यह्रस्वत्वमेवच॥ जंबूद्वीपेनसंख्यातस्तस्यमध्येमहाद्रुमः॥ २७॥ शाकोनाममहाराजप्रजातस्यसदानुगा॥ तत्रपुण्याजनपदाःपूज्यतेतत्रशंकरः॥२८॥ तत्रगच्छंतिसिद्धाश्चचारणादैवतानिच॥ धार्मिकाश्चप्रजाराजंश्चत्वारोतीवभारत॥२९॥ वर्णाःस्वकर्मनिरतानचस्तेनोत्रदृश्यते॥ दीर्घायुषोमहाराजजरामृत्युविवर्जिताः॥ ३०॥ प्रजास्तत्रविवर्द्धंतेवर्षास्विससमुद्रगाः॥ नद्यःपुण्यजलास्तत्रगंगाचबहुधागता॥ ३०॥ सुकुमारीकुमारीचशीताशीवेणिकातथा॥ महानदीचकौरव्यतथामणिजलानदी॥ ३२॥

ष्टे तयोरिति मिश्रोवर्णःपतगइत्यर्थः कारणगुणाःकार्यगुणानारभंतइतिन्यायेनश्यामपर्वतभवःश्यामवर्णः शाकाद्यन्नपरिणामेनमनुष्याअपिश्यामत्वंगताइत्यर्थः यस्मात्श्यामोगिरिस्तस्मात्तस्थानांश्यामोवर्णःप्रदत्तइत्यर्थः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेएकादशोऽध्यायः ॥ ११ ॥ ॥ ७ ॥ ॥७॥ ॥ उत्तरेष्विति ॥ १ ॥ २ ॥ ३ ॥ मानः

चक्षुर्वर्धनिकाचैवनदीभरतसत्तम ॥ तत्रप्रदत्ताःपुण्योदानद्यःकुरुकुलोद्वह ॥ ३३ ॥ सहस्राणांशतान्येवयतोवर्षतिवासवः ॥ नतासांनामधेयानिपरिमाणंतथैवच ॥ ३४ ॥ शक्यंतेपरिसंख्यातुंपुण्यास्ताहिसरिद्वराः ॥ तत्रपुण्याजनपदाश्चत्वारोलोकसंमताः ॥ ३५ ॥ मंगाश्चमशकाश्चैवमानसामंदगास्तथा ॥ मंगाब्राह्मण भूयिष्ठाःस्वकर्मनिरतानृप ॥ ३६ ॥ मशकेषुतुराजन्याधार्मिकाःसर्वकामदाः ॥ मानसाश्चमहाराजवैश्यधर्मोपजीविनः ॥ ३७ ॥ सर्वकामसमायुक्ताःशूराधर्मार्थनिश्चिताः ॥ शूद्रास्तमंदगानित्यंपुरुषाधर्मशीलिनः ॥ ३८ ॥ नतत्रराजाराजेंद्रनदंडोनचदंडिकः ॥ स्वधर्मेणैवधर्मज्ञास्तेरक्षंतिपरस्परम् ॥ ३९ ॥ एतावदेवशक्यंतुतत्रद्वीपेप्रभाषितुम् ॥ एतदेवचश्रोतव्यंशाकद्वीपेमहौजसि ॥ ४० ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभूमिपर्वणिशाकद्वीपवर्णनेएकादशोऽध्यायः ॥ ११ ॥

॥ संजयउवाच ॥ ॥ उत्तरेषुचकौरव्यद्वीपेषुश्रूयतेकथा ॥ एवंतत्रमहाराजबुवतश्चनिबोधमे ॥ १ ॥ घृततोयःसमुद्रोत्रदधिमंडोदकोपरः ॥ सुरोदःसागरश्चैव तथान्योजलसागरः ॥ २ ॥ परस्परेणद्विगुणाःसर्वेद्वीपानराधिप ॥ पर्वताश्चमहाराजसमुद्रैःपरिवारिताः ॥ ३ ॥ गौरस्तुमध्यमेद्वीपेगिरिर्मानःशिलोमहान् ॥ पर्वतःपश्चिमेकृष्णोनारायणसखोनृप ॥ ४ ॥ तत्ररत्नानिदिव्यानिस्वयंरक्षतिकेशवः ॥ प्रसन्नश्चाभवत्तत्रप्रजानांव्यदधत्सुखम् ॥ ५ ॥ कुशस्तंबःकुशद्वीपेमध्ये जनपदैःसह ॥ संपूज्यतेशाल्मलिश्चद्वीपेशाल्मलिकेनृप ॥ ६ ॥ क्रौंचद्वीपेमहाक्रौंचोगिरीरत्नचयाकरः ॥ संपूज्यतेमहाराजचातुर्वर्ण्येननित्यदा ॥ ७ ॥ गोमंतः पर्वतोराजन्सुमहान्सर्वधातुकः ॥ यत्रनित्यंनिवसतिश्रीमान्कमललोचनः ॥ ८ ॥ मोक्षिभिःसंगतोनित्यंप्रभुर्नारायणोहरिः ॥ कुशद्वीपेतुराजेंद्रपर्वतोविद्रुमैश्चितः ॥ ९ ॥ स्वनामनामाद्रुद्वर्षोद्वितीयोहेमपर्वतः ॥ द्युतिमान्नामकौरव्यतृतीयःकुमुदोगिरिः ॥ १० ॥ चतुर्थःपुष्पवान्नामपंचमस्तुकुशेशयः ॥ षष्ठोहरिगिरिर्नामषडेतेपर्वतोत्तमाः ॥ ११ ॥ तेषामंतरविष्कंभोद्विगुणःसर्वभागशः ॥ औद्भिदंप्रथमंवर्षंद्वितीयंवेणुमंडलम् ॥ १२ ॥ तृतीयंसुरथाकारंचतुर्थंकंबलंस्मृतम् ॥ धृतिमत्पंचमंवर्षंषष्ठंवर्षंप्रभाकरम् ॥ १३ ॥ सप्तमंकापिलंवर्षंसप्तैतेवर्षलंभकाः ॥ एतेषुदेवगंधर्वाःप्रजाश्चजगतीश्वर ॥ १४ ॥ विहरंतेरमंतेचनतेषुक्षियतेजनः ॥ न तेषुदस्यवःसंतिम्लेच्छजात्योपिवानृप ॥ १५ ॥ गौरप्रायोजनःसर्वःसुकुमारश्चपार्थिव ॥ अवशिष्टेषुसर्वेषुवक्ष्यामिमनुजेश्वर ॥ १६ ॥

शिलोमनःशिलामयः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ चतुरस्रंचतुर्दलकमलाकारंजंबूमंडलमितिशेषः तस्यपूर्वेअश्रांतपरिधिरुक्तः अष्टादशसहस्राणिषट्शतानिचभारतेति इहयत्रमध्यमंडलपरिधिस्त्रयस्त्रिंशच्छतयोजनइत्युच्यते ततश्चपंचसहस्रीतोयावान्यत्राप्यभागोबहिर्दद्धस्तावानेवत्रयस्त्रिंशतोयेपंचसहस्रीतोगर्भेभागऊनइतिज्ञेयं ॥ ३२ ॥

यथाश्रुतंमहाराजतदव्यग्रमनाःशृणु ॥ क्रौंचद्वीपेमहाराजक्रौंचोनाममहागिरिः ॥ १७ ॥ क्रौंचात्परोवामनकोवामनादंधकारकः ॥ अंधकारात्परोराजन्मैनाकःपर्वतोत्तमः ॥ १८ ॥ मैनाकात्परतोराजन्गोविंदोगिरिरुत्तमः ॥ गोविंदात्परतोराजन्निविडोनामपर्वतः ॥ १९ ॥ परस्तुद्विगुणस्तेषांविष्कंभोवंशवर्द्धन ॥ देशांस्तत्रप्रवक्ष्यामितन्मेनिगदतःशृणु ॥ २० ॥ क्रौंचस्यकुशलोदेशोवामनस्यमनोनुगः ॥ मनोनुगात्परश्चोष्णोदेशःकुरुकुलोद्वह ॥ २१ ॥ उष्णात्परःप्रावरकः प्रावाराद्धंधकारकः ॥ अंधकारकदेशात्तुमुनिदेशःपरःस्मृतः ॥ २२ ॥ मुनिदेशात्परश्चैवप्रोच्यतेदुंदुभिस्वनः ॥ सिद्धचारणसंकीर्णोगौरप्रायोजनाधिप ॥ २३ ॥ एतेदेशामहाराजदेवगंधर्वसेविताः ॥ पुष्करेपुष्करोनामपर्वतोमणिरत्नवान् ॥ २४ ॥ तत्रनित्यंप्रभवतिस्वयंदेवःप्रजापतिः ॥ तंपर्युपासतेनित्यंदेवाःसर्वेमहर्षयः ॥ २५ ॥ वाग्भिर्मनोनुकूलाभिःपूजयंतोजनाधिप ॥ जंबूद्वीपात्प्रवर्तंतेरत्नानिविविधान्युत ॥ २६ ॥ द्वीपेषुतेषुसर्वेषुप्रजानांकुरुसत्तम ॥ ब्रह्मचर्येणसत्येनप्रजानांहिदमेनच ॥ २७ ॥ आरोग्यायुःप्रमाणाभ्यांद्विगुणंद्विगुणंततः ॥ एकोजनपदोराजन्द्वीपेष्वेतेषुभारत ॥ उक्ताजनपदायेषुधर्मश्चैकःप्रदृश्यते ॥ २८ ॥ ईश्वरोदंडमुद्यम्यस्वयमेवप्रजापतिः ॥ द्वीपानेतान्महाराजरक्षंस्तिष्ठतिनित्यदा ॥ २९ ॥ सराजासशिवोराजन्सपिताप्रपितामहः ॥ गोपायतिनरश्रेष्ठप्रजाःसजडपंडिताः ॥ ३० ॥ भोजनंचात्रकौरव्यप्रजाःस्वयमुपस्थितम् ॥ सिद्धमेवमहाबाहोतद्भिुंजंतिनित्यदा ॥ ३१ ॥ ततःपरंसमानामदृश्यतेलोकसंस्थितिः ॥ चतुरस्रंमहाराजत्रयस्त्रिंशत्तुमंडलम् ॥ ३२ ॥ तत्रतिष्ठंतिकौरव्यचत्वारोलोकसंमताः ॥ दिग्गजाभरतश्रेष्ठवामनैरावतादयः ॥ ३३ ॥ सुप्रतीकस्तदाराजन्प्रभिन्नकरटामुखः ॥ तस्याहंपरिमाणंतुनसंख्यातुमिहोत्सहे ॥ ३४ ॥ असंख्यातःसनित्यंहितिर्यगूर्ध्वमधस्तथा ॥ तत्रवैवायवोवांतिदिग्भ्यःसर्वाभ्यएवहि ॥ ३५ ॥ असंबद्धामहाराजतान्निगृण्हंतितेगजाः ॥ पुष्करैःपद्मसंकाशैर्धिकसद्भिर्महाप्रभैः ॥ ३६ ॥

तत्रपद्मसंधिस्थानेषुचतुर्षु ॥ ३३ ॥ तस्यगजचतुष्टयस्यपृथिव्याआश्रयभूतस्य तत्कस्योपरिवर्त्ततेइतिदुर्वचं तेनईश्वरशक्त्यैवदिग्गजाधियंतइतिभावः ॥ ३४ ॥ सःगजसमूहः वातरज्जुभिर्गजाबद्धाइत्येतन्मतांतरंतदपिदूषयति तत्रेति ॥ ३५ ॥ प्रत्युतवायोरेवनिषहंतेकुर्वंतीत्याह तानिति पुष्करैःशुंडाग्रैः ॥ ३६ ॥

॥ ३७ ॥ ३८ ॥ उत्तरस्यैंदुराड्रूपमाणं ॥ ३९ ॥ ४० ॥ परिणाहेनपरिधिनाषट्त्रिंशत्सहस्राणि विपुलत्वेनततोप्याधिक्येन इदमुत्तरान्वयि ॥ ४१ ॥ षष्टियोजनानिपरिणाहएवेत्यर्थः ॥ ४२ ॥ ४३ ॥

शतधापुनरेवाशुतेतान्मुंचंतिनित्यशः॥ श्वसद्भिर्मुच्यमानास्तुदिग्गजैरिहमारुताः॥ ३७॥ आगच्छंतिमहाराजततस्तिष्ठंतिवैप्रजाः॥ ॥ धृतराष्ट्रउवाच॥ ॥ परोवैविस्तरोत्यर्थंत्वयासंजयकीर्त्तितः॥ ३८॥ दर्शितंद्वीपसंस्थानमुत्तरंब्रूहिसंजय॥ ॥ संजयउवाच॥ ॥ उक्ताद्वीपामहाराजग्रहंवैशृणुतत्त्वतः॥ ३९॥ स्वर्भानोःकौरवश्रेष्ठयावदेवप्रमाणतः॥ परिमंडलोमहाराजस्वर्भानुःश्रूयतेग्रहः॥ ४० ॥ योजनानांसहस्राणिविष्कंभोद्वादशास्यवै॥ परिणाहेनषट्त्रिंशद्विपुलत्वेन चानघ॥ ४१ ॥ षष्टिमाहुःशतान्यस्यबुधाःपौराणिकास्तथा॥ चंद्रमास्तुसहस्राणिराजन्नेकादशस्मृतः॥ ४२ ॥ विष्कंभेणकुरुश्रेष्ठत्रयस्त्रिंशत्तुमंडलम्॥ एकोनषष्टिविष्कंभंशीतरश्मेर्महात्मनः॥ ४३॥ सूर्यस्त्वष्टौसहस्राणिद्वेचान्येकुरुनंदन॥ विष्कंभेणततोराजन्मंडलंत्रिंशतासमम्॥ ४४॥ अष्टपंचाशतंराजन्विपुलत्वेनचानघ॥ श्रूयतेपरमोदारःपतगोसौविभावसुः॥ ४५॥ एतत्प्रमाणमर्कस्यनिर्दिष्टमिहभारत॥ सराहुश्छादयत्येतौयथाकालंमहत्तया॥ ४६॥ चंद्रादित्यौमहाराज संक्षेपोयमुदाहृतः॥ इत्येवत्तेमहाराजपृच्छतःशास्त्रचक्षुषा॥ ४७॥ सर्वमुक्तंयथातत्त्वंतस्माच्छममवाप्नुहि॥ यथोद्दिष्टंमयाप्रोक्तंसनिर्माणमिदंजगत्॥ ४८॥ तस्मादाश्वसकौरव्यपुत्रंदुर्योधनंप्रति॥ श्रुत्वेदंभरतश्रेष्ठभूमिपर्वमनोनुगम्॥ ४९॥ श्रीमान्प्रवतिराजन्यःसिद्धार्थःसाधुसंमतः॥ आयुर्वलंचकीर्त्तिश्चतस्यते जश्चवर्धते॥ ५०॥ यःशृणोतिमहीपालपर्वणीदंयतव्रतः॥ प्रीयंतेपितरस्तस्यतथैवचपितामहाः॥ ५१॥ इदंतुभारतंवर्षंयत्रवर्त्तामहेवयम्॥ पूर्वैःप्रवर्त्तितंपुण्यं तत्सर्वंश्रुतवानसि॥ ५२॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभूमिपर्वणिउत्तरद्वीपादिसंस्थानवर्णनेद्वादशोऽध्यायः॥ १२॥ ॥ समाप्तमिदंभूमिपर्व॥

अथभगवद्गीतापर्व॥ ॥ वैशंपायनउवाच॥ ॥ अथगावल्गणिर्विद्वान्संयुगादेत्यभारत॥ प्रत्यक्षदर्शीसर्वस्यभूतभव्यभविष्यवित्॥ १॥ ध्यायतेधृतराष्ट्रा यसहसोत्पत्यदुःखितः॥ आचष्टनिहतंभीष्मंभरतानांपितामहम्॥ २॥ ॥ संजयउवाच॥ ॥ संजयोहंमहाराजनमस्तेभरतर्षभ॥ हतोभीष्मःशांतनवोभरतानां पितामहः॥ ३॥ ककुदंसर्वयोधानांधामसर्वधनुष्मताम्॥ शरतल्पगतःसोद्यशेतेकुरुपितामहः॥ ४॥

॥ ४४ ॥ पतगःशीघ्रगः विभावसुःसूर्यः ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५०॥५१ ॥ ५२ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेभूमिपर्वार्थप्रकाशेद्वादशोऽध्यायः ॥ १२ ॥ ॥ ७॥

अथेति ॥ १ ॥ २ ॥ ३ ॥ ककुदंराज्ञांमध्येध्वजतुल्यं ककुदोप्यस्मीत्यंगेराट्ध्वजेवरेइतिमेदिनी धामतेजः ॥ ४ ॥

॥ ५ ॥ ६ ॥ अपसंभमोनिर्भयः ॥ ७ ॥ ८॥९॥१०॥११॥अर्बुदंकोटिदशकंलक्षंवा पूर्वमयुतस्यप्रत्यहंप्रतिज्ञानात्॥१२॥१३॥इतिभीष्मपर्वणिनैलकंठीयेभा०त्रयोदशोऽध्यायः॥१३॥कथमिति ॥१॥२॥

यस्यवीर्यंसमाश्रित्यद्यूतंपुत्रस्तवाकरोत्॥ सशेतेनिहतोराजन्संख्येभीष्मःशिखंडिना ॥ ५ ॥ यःसर्वान्पृथिवीपालान्समवेतान्महाम्रधे ॥ जिगायैकरथेनैवकाशिपुर्यांमहारथः ॥ ६ ॥ जामदग्न्येरणेरामंयोयुध्यदपसंभ्रमः॥ नहतोजामदग्न्येनसहतोद्यशिखंडिना ॥ ७ ॥ महेंद्रसदृशःशौर्येस्थैर्येचहिमवानिव ॥ समुद्रइव गांभीर्येसहिष्णुत्वेधरासमः॥ ८॥ शरदंष्ट्रोधनुर्वक्त्रःखड्गजिह्वोदुरासदः॥ नरसिंहःपितातेद्यपांचाल्येननिपातितः ॥ ९॥ पांडवानांमहासैन्यंयंदृष्ट्वोद्यतमाहवे॥ प्रावेपतभयोद्विग्नंसिंहंदृष्ट्वेवगोगणः॥ १०॥ परिरक्ष्यससेनांतेदशरात्रमनीकहा॥ जगामास्तमिवादित्यःकृत्वाकर्मसुदुष्करम्॥ ११ ॥ यःसशक्रइवाक्षोभ्योव र्षन्बाणान्सहस्रशः ॥ जघानयुधियोधानामर्बुदंदशभिर्दिनैः ॥ १२ ॥ सशेतेनिहतोभूमौवातभग्नइवद्रुमः ॥ तवदुर्मंत्रितेराजन्यथानार्हःसभारत॥ १३॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीतापर्वणिभीष्मस्वर्गारोहणेत्रयोदशोऽध्यायः॥ १३॥ ॥ ७॥ ॥ ७॥ ॥ धृतराष्ट्रउवाच॥ ॥ कथंकुरूणामृषभो हतोभीष्मःशिखंडिना ॥ कथंरथात्सन्यपतत्पितामेवासवोपमः ॥ १॥ कथमाचक्ष्वमेयोधाहीनाभीष्मेणसंजय॥ बलिनादेवकल्पेनगुर्वर्थेब्रह्मचारिणा॥ २॥ तस्मिन्हतेमहाप्राज्ञेमहेष्वासेमहाबले॥ महासत्वेनरव्याघ्रेकिमुआसीन्मनस्तव॥ ३॥ आर्तिपरामाविशतिमनःशंससिमेहतम्॥ कुरूणामृषभंवीरमकंपंपुरुषर्षभम्॥ ४॥ केतंयांतमनुप्राणाःकेवास्यासन्पुरोगमाः॥ केतिष्ठन्केन्यवर्तंतकेऽन्ववर्तंतसंजय॥ ५॥ केशूरारथशार्दूलमद्भुतंक्षत्रियर्षभम्॥ तथानीकंगाहमानंसहसा पृष्ठतोन्वयुः॥ ६॥ यस्तमोर्कइवापोहन्परसैन्यममित्रहा॥ सहस्ररश्मिप्रतिमःपरेषांभयमादधत्॥ ७॥ अकरोदुष्करंकर्मरणेपांडुसुतेषुयः॥ ग्रसमानमनीकानियएनंपर्यवारयन्॥ ८॥ कृतिनंतंदुराधर्षंसंजयास्यत्वमंतिके॥ कथंशांतनवंयुद्धेपांडवाःप्रत्यवारयन्॥ ९॥ निकृंतंतमनीकानिशरदंष्ट्रंमनस्विनम्॥ चापव्यात्ताननंघोरमसिजिह्वंदुरासदम्॥ १०॥ अनर्हंपुरुषव्याघ्रंकीमंतमपराजितम्॥ पातयामासकौंतेयःकथंतमजितंयुधि॥ ११॥ उग्रधन्वानमुग्रेषुंवर्तमानंरथोत्तमे॥ परेषामुत्तमांगानिप्रचिन्वंतमयेषुभिः॥ १२॥ पांडवानांमहत्सैन्यंयंदृष्ट्वोद्यतमाहवे॥ कालाग्निमिवदुर्धर्षंसमचेष्टतनित्यशः॥ १३॥ परिरक्ष्यससेनांतुदशरात्रमनीकहा॥ जगामास्तमिवादित्यःकृत्वाकर्मसुदुष्करम्॥ १४॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ अस्यत्वमंतिकेस्थित्वासर्वंदृष्टवानसीतिशेषः ॥ ९ ॥ १० ॥ ११ ॥ प्रचिन्वंतंपुष्पवदाददानं ॥ १२ ॥ समचेष्टतम्रियमाणपशुवद्धस्तपादविक्षेपंकृतवत् ॥ १३ ॥ १४॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ अजङ्गुस्सक्तवंतः॥२३॥२४॥२५॥२६॥ मौर्वीघोषेणस्तनयित्नुर्गर्जन्मेघइव पृषत्कपृषतोबाणविंदुः धनुर्षवक्षादरूपोमहाशब्दोऽशनिध्वनिरूपो

यःसशक्रइवाक्षय्यंवर्षंशरमयंक्षिपन्॥ जघानयुधियोधानामर्बुदंदशभिर्दिनैः ॥ १५ ॥ सशेतेनिहतोभूमौवातभुग्नइमद्रुमः॥ ममदुर्मत्रितेनाजौयथानार्हति भारतः॥ १६॥ कथंशांतनवंदृष्ट्वापांडवानामनीकिनी॥ प्रहर्तुमशकत्तत्रभीष्मंभीमपराक्रमम् ॥ १७ ॥ कथंभीष्मेणसंग्रामंप्राकुर्वन्पांडुनंदनाः॥ कथंचनाज यद्भीष्मोद्रोणेजीवतिसंजय ॥ १८ ॥ रुपेसन्निहितेतत्रभरद्वाजात्मजेतथा॥ भीष्मःप्रहरतांश्रेष्ठःकथंसनिधनंगतः॥ १९॥कथंचातिरथस्तेनपांचाल्येनशिखंडिना॥ भीष्मोविनिहतोयुद्धेदेवैरपिदुरासदः॥ २० ॥ यःस्वद्धैतरणेनित्यंजामदग्न्यंमहाबलम्॥अजितंजामदग्न्येनशक्रतुल्यपराक्रमम्॥ २१॥तंहतंसमरेभीष्मं महारथकुलोदितम्॥ संजयाचक्ष्वमेवीरंयेनशर्मनविद्महे॥ २२॥मामकाःकेमहेष्वासानाजहुःसंजयाच्युतम्॥दुर्योधनसमादिष्टाःकेवीराःपर्यवारयन्॥२३॥ यच्छिखंडिमुखाःसर्वेपांडवाभीष्ममभ्ययुः॥ कच्चित्तेकुरवःसर्वेनाजहुःसंजयाच्युतम्॥ २४॥ अप्रमसारमयंनूनंहृदयंसुदृढंमम॥यच्छ्रुत्वापुरुषव्याघ्रंहतंभीष्मं नदीर्यते ॥ २५ ॥ यस्मिन्सत्यंचमेधाचनीतिश्चभरतर्षभे ॥ अप्रमेयाणिदुर्धर्षंकथंसनिहतोयुधि ॥ २६ ॥ मौर्वीघोषस्तनयित्नुःपृषत्कपृषतोमहान् ॥ धनुर्ह्रा दमहाशब्दोमहामेघइवोन्नतः॥ २७ ॥ योऽभ्यवर्षतकौंतेयान्सपांचालान्ससृंजयान्॥ निघ्नन्ररथान्वीरोदानवानिववज्रभृत् ॥ २८॥ इष्वस्त्रसागरंघोरंबाण ग्राहंदुरासदम्॥ कार्मुकोर्मिणमक्षय्यमद्रीपंचलमप्लवम्॥ २९॥गदासिमकरावासंहयावर्त्तंगजाकुलम्॥पदातिमत्स्यकलिलंशंखदुंदुभिनिःस्वनम्॥३०॥हया न्गजपदातींश्चरथांश्चतरसावहून्॥ निमज्जयंतंसमरेपरवीरापहारिणम्॥ ३१ ॥ विदत्यमानंकोपेनतेजसाचपरंतपम्॥ वेलेवमकरावासंकेवीराःपर्यवारयन् ॥ ३२ ॥ भीष्मोयदकरोत्कर्मसमरेसंजयारिहा॥ दुर्योधनहितार्थायकेतस्यास्यपुरोऽभवन्॥ ३३॥ केरक्षन्दक्षिणंचक्रंभीष्मस्यामिततेजसः॥ पृष्ठतःकेपरान्वी रानपासेधन्यतव्रताः॥ ३४॥ केपुरस्तादवर्त्ततरक्षंतोभीष्ममंतिके ॥ केरक्षन्नुत्तरंचक्रंवीरावीरस्ययुध्यतः ॥ ३५॥ वामेचक्रेवर्तमानाःकेऽग्रन्संजयस्ंजयान्॥ अग्रतोऽग्रमनीकेषुकेऽभ्यरक्षन्दुरासदम्॥ ३६ ॥ पार्श्वतःकेऽभ्यरक्षंतगच्छंतोदुर्गमांगतिम्॥ समूहेकेपरान्वीरान्प्रत्ययुध्यंतसंजय ॥३७॥रक्ष्यमाणःकथंवीरैर्गो प्यमानाश्चतेनते॥ दुर्जयानामनीकानिनाजयंस्तरसायुधि॥ ३८॥

यस्य ॥ २७ ॥ २८ ॥ कार्मुकोर्मिणंचापोर्मिमंतं अद्रीपंनिराश्रयं अप्लवंतरणोपायहीनं ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ अपासेधन्न्यवारयन् ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

॥ १७ ॥

यःप्रजातेर्दक्षादेःपरमेष्ठीपरमेपदेतिष्ठतीतितथाहिरण्यगर्भइवतस्मिन्निति शेषः ॥ ३९॥४०॥४१॥४२॥पुत्रलक्ष्मणिपुत्रोत्तमे लक्ष्मचिह्नेप्रधानेचेतिविश्वः॥४३॥प्रोक्तंलोकेख्यातं॥४४॥सर्वास्त्रविनयोपेतंस

सर्वलोकेश्वरस्येवपरमेष्ठीप्रजापतेः॥ कथंप्रहर्त्तुमपितेशेकुःसंजयपांडवाः॥ ३९॥ यस्मिन्द्वीपेसमाश्वस्ययुध्यंतेकुरवःपरैः ॥ तंनिमग्ंनरव्याघ्रंभीष्मंशंससिसंजय॥ ४० ॥ यस्यवीर्यंसमाश्रित्यममपुत्रोबृहद्बलः॥ नपांडवानगणयत्कथंसनिहतःपरैः॥४१॥ यःपुराविबुधैःसर्वैःसहायेयुद्धदुर्मदः॥ कांक्षितोदानवान्यद्भिः पितामममहाव्रतः॥ ४२॥ यस्मिन्जातेमहावीर्येशांतनुर्लोकविश्रुतः॥ शोकंदैन्यंचदुःखंचप्राजहात्पुत्रलक्ष्मणि॥ ४३॥ प्रोक्तंपरायणंप्राज्ञंस्वधर्मनिरतंशुचिम्॥ वेदवेदांगतत्त्वज्ञंकथंशंससिमेहतम्॥४४॥सर्वास्त्रविनयोपेतंशांतंदांतंमनस्विनम्॥हतंशांतनवंश्रुत्वामन्येशेषंहतंबलम्॥४५॥धर्मादधर्मोबलवान्संप्रामइतिमेमतिः॥ यत्रवृद्धंगुरुंहत्वाराज्यमिच्छंतिपांडवाः॥ ४६॥ जामदग्न्यःपुरारामःसर्वास्त्रविदनुत्तमः॥ अंबार्थमुद्यतःसंख्येभीष्मेणयुधिनिर्जितः॥४७॥ तमिंद्रस मकर्माणंककुदंसर्वधन्विनाम्॥ हतंशंससिमेभीष्मंकिंनुदुःखमतःपरम्॥४८॥ असकृत्क्षत्रियव्राताःसंख्येयेनविनिर्जिताः ॥ जामदग्न्येनवीरेणपरवीरनिघातिना॥ ४९॥ नहतोयोमहाबुद्धिःसहतोग्रशिखंडिना॥ तस्मान्नूनंमहावीर्याद्भार्गवाद्युद्धदुर्मदात्॥ ५० ॥ तेजोवीर्यबलैर्भूयान्शिखंडीद्रुपदात्मजः ॥ यःशूरंरुक्मिणंयुद्धेसर्वशास्त्रविशारदम्॥ ५१ ॥ परमास्त्रविदंवीरंजघानभरतर्षभम्॥ केवीरास्तममित्रघ्नमन्वयुःशस्त्रसंसदि॥५२॥शंसमेतद्यथाचासीद्युद्धंभीष्मस्यपांडवैः योषेवहतवीरामेसेनापुत्रस्यसंजय॥ ५३॥ अगोपमिवचोद्धांतंगोकुलंतद्बलंमम॥ पौरुषंसर्वलोकस्यपरंयस्मिन्महाहवे॥ ५४॥ परासक्तेचवस्तस्मिन्कथमासीन्मनस्तदा॥ जीवितेप्ययसामर्थ्यंकिमिवास्मासुसंजय॥ ५५॥ घातयित्वामहावीर्यंपितरंलोकधार्मिकम्॥ अगाधेसलिलेमग्नांनावंदृष्ट्वेवपारगाः॥५६॥ भीष्मेहतेभृशंदुःखान्मन्येशोचंतिपुत्रकाः॥ अद्रिसारमयंनूनंहृदयंममसंजय ॥ ५७॥ यच्छ्रुत्वापुरुषव्याघ्रंहतंभीष्मंनदीर्यते॥ यस्मिन्नस्त्राणिमेधाचनीतिश्च पुरुषर्षभे॥ ५८॥ अप्रमेयाणिदुर्धर्षंकथंसनिहतोयुधि॥ नचास्त्रेणनशौर्येणतपसामेधयानच॥ ५९ ॥ नवृत्यानपुनस्त्यागान्मृत्योःकश्चिद्विमुच्यते ॥ कालोनूनंमहावीर्यःसर्वलोकदुरत्ययः॥ ६० ॥ यत्रशांतनवंभीष्मंहतंशंससिसंजय॥पुत्रशोकाभिसंतप्तोमहद्दुःखमचिंतयन्॥ ६१ ॥ आशंसेहंपरंत्राणंभीष्माच्छांतनुनंदनात्॥ यदादित्यमिवापश्यत्पतितंभुविसंजय॥ ६२ ॥

वास्त्रशिक्षायुक्तं विनयातुबलायांत्रीशिक्षायांप्रणतौपुमानितिमेदिनी ॥४५॥४६॥४७॥४८॥४९॥५०॥५१॥५२॥५३॥५४॥ परासक्तेपरलोकप्रिये ॥५५॥५६॥५७॥५८॥५९॥६०॥६१॥६२॥

दुर्योधनःशांतनवंकिंतदाप्रत्यपद्यत ॥ नाहंस्वेषांपरेषांवाबुद्ध्यासंजयचिंतयन् ॥ ६३ ॥ शेषंकिंचित्यपश्यामिप्रत्यनीकेमहीक्षिताम् ॥ दारुणःक्षत्रधर्मोयमृषि
भिःसंप्रदर्शितः॥६४॥ यत्रशांतनवंहत्वाराज्यमिच्छंतिपांडवाः॥ वयंवाराज्यमिच्छामोघातयित्वामहाव्रतम्॥६५॥क्षत्रधर्मेस्थिताःपार्थानापराध्यंतिपुत्रकाः॥
एतदार्येणकर्तव्यंकृच्छ्रात्स्वापत्सुसंजय ॥ ६६ ॥ पराक्रमःपराशक्तिस्तुतस्मिन्प्रतिष्ठितम् ॥ अनीकानिविनिघ्नंतंह्रीमंतमपराजितम् ॥ ६७ ॥ कथंशांतनवंता
तंपांडुपुत्रान्यवारयन् ॥ यथायुक्तान्यनीकानिकथंयुद्धंमहात्मभिः ॥ ६८ ॥ कथंवानिहतोभीष्मःपितासंजयमेपरैः ॥ दुर्योधनश्चकर्णश्चशकुनिश्चापिसौबलः
॥ ६९ ॥ दुःशासनश्चकितवोहतेभीष्मेकिमब्रुवन् ॥ यच्छरीरैरुपास्तीर्णानरवारणवाजिनाम्॥७०॥शरशक्तिमहाखड्गतोमराक्षांमहाभयाम् ॥ प्राविशन्कितवा
मंदाःसभांयुद्धदुरासदाम् ॥ ७१ ॥ प्राणद्यूतेप्रतिभयेकेऽदीव्यंतनरर्षभाः ॥ केजीर्यतेजितास्तत्रकृतलक्ष्यानिपातिताः ॥ ७२ ॥ अन्येभीष्माच्छांतनवात्तन्ममाच
क्ष्वसंजय ॥ नहिमेशांतिरस्तीहश्रुत्वादेवव्रतंहतम्॥७३॥पितरंभीमकर्माणंभीष्ममाहवशोभिनम्॥आर्तिंमेहृदयेरूढांमहतींपुत्रहानिजाम्॥७४॥त्वंहिमेसर्पिषे
वाग्निमुद्दीपयसिसंजय॥महांतंभारमुद्यम्यविश्रुतंसार्वलौकिकम्॥ ७५॥ दृष्ट्वाविनिहतंभीष्मंमन्येशोचंतिपुत्रकाः॥ श्रोष्यामितानिदुःखानिदुर्योधनकृतान्यहम्
॥ ७६ ॥ तस्मान्मेसर्वमाचक्ष्वयद्दृत्तंतत्रसंजय ॥ यद्दृत्तंतत्रसंग्रामेमंदस्याबुद्धिसंभवम् ॥ ७७ ॥ अपनीतंसुनीतंयत्तन्ममाचक्ष्वसंजय ॥ यत्कृतंतत्रसंग्रामेभी
ष्मेणजयमिच्छता ॥ ७८ ॥ तेजोयुक्तंकृताक्षेणशंसतच्चाप्यशेषतः ॥ तथातदभवद्युद्धंकुरुपांडवसेनयोः ॥ ७९ ॥ क्रमेणयेनयस्मिंश्चकालेयच्चयथाभवत् ॥ ८० ॥
इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीतापः धृतराष्ट्रप्रश्नेचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ त्वयुक्तोयमनुप्रश्नोमहाराजयथा
र्हसि ॥ नतुदुर्योधनेदोषमिममासंकुमर्हसि ॥ १ ॥ यआत्मनोदुश्चरितादशुभंप्राप्नुयान्नरः ॥ एनसातेननान्यंसउपाशंकितुमर्हति ॥ २ ॥ महाराजमनुष्येषुनिंद्यं
यःसर्वमाचरेत् ॥ सवध्यःसर्वलोकस्यनिंदितानिसमाचरन् ॥ ३ ॥ निकारोनिकृतिप्रज्ञैःपांडवैस्त्वत्प्रतीक्षया ॥ अनुभूतःसहामात्यैःक्षांतश्चसुचिरंवने ॥ ४ ॥ हया
नांचगजानांचराज्ञांचामिततेजसाम् ॥ प्रत्यक्षंयन्मयादृष्टंदृष्टंयोगबलेनच ॥ ५ ॥ ॥ १८ ॥

व्याग्रः ॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ त्वयुक्तइति आसंकुंआसंजयितुं ॥ १ ॥ एनसापापेन ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

॥ ६ ॥ ७ ॥ ८ ॥ व्युत्थितस्यउच्छास्त्रवर्त्तिनउत्पत्तिःकारणंतस्यविज्ञानं ॥ ९ ॥ १० ॥ व्यूढेषुव्यूहरचनयास्थितेषु ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ ॥ इति

शृणुतत्पृथिवीपालमाचशोकेमनःकृथाः ॥ दिष्टमेतत्पुरानूनमिदमेवनराधिप ॥ ६ ॥ नमस्कृत्वापितुस्तेहंपाराशर्यायधीमते ॥ यस्यप्रसादाद्दिव्यंतत्प्राप्तंज्ञानमनु
त्तमम् ॥ ७ ॥ दृष्टिश्चार्तींद्रियाराजन्दूराच्छ्रवणमेवच ॥ परचित्तस्यविज्ञानमतीतानागतस्यच ॥ ८ ॥ व्युत्थितोत्पत्तिविज्ञानमाकाशेचगतिःशुभा ॥ अस्त्रैरसंगोयु
द्धेषुवरदानान्महात्मनः ॥ ९ ॥ शृणुमेविस्तरेणेदंविचित्रंपरमाद्भुतम् ॥ भरतानामभूद्युद्धंयथातल्लोमहर्षणम् ॥ १० ॥ तेष्वनीकेषुयत्तेषुव्यूढेषुचविधानतः ॥ दुर्योध
नोमहाराजदुःशासनमथाब्रवीत् ॥ ११ ॥ दुःशासनरथास्तूर्णंयुज्यंतांभीष्मरक्षिणः ॥ अनीकानिचसर्वाणिशीघ्रंत्वमनुचोदय ॥ १२ ॥ अयंसमाभिप्रायोव
र्षपूगाभिचिंतितः ॥ पांडवानांससैन्यानांकुरूणांचसमागमः ॥ १३ ॥ नातःकार्यंतमंमन्येरणेभीष्मस्यरक्षणात् ॥ हन्याद्धिमोत्यसौपार्थान्सोमकांश्चसस्त्रंजया
न् ॥ १४ ॥ अब्रवीच्चविशुद्धात्मानाहंहन्यांशिखंडिनम् ॥ श्रूयतेस्मीत्यसौपूर्वंतस्माद्वर्ज्योरणेमम ॥ १५ ॥ तस्माद्भीष्मोरक्षितव्योविशेषेणेतिमेमतिः ॥ शिखंडिनो
वधेयत्ताःसर्वेतिष्ठंतुमामकाः ॥ १६ ॥ तथाप्राच्याःप्रतीच्याश्चदक्षिणात्योत्तरापथाः ॥ सर्वथाशस्त्रेषुकुशलास्तेरक्षंतुपितामहम् ॥ १७ ॥ अरक्ष्यमाणंहिशिखं
त्सिहंमहाबलम् ॥ मासिंहंजंबुकेनेवघातयामःशिखंडिना ॥ १८ ॥ वामंचक्रंयुधामन्युरुत्तमौजाश्चदक्षिणम् ॥ गोमारौफाल्गुनःप्राग्रौफाल्गुनोपिशिखंडिनः ॥ १९ ॥
संरक्ष्यमाणःपार्थेनभीष्मेणचविवर्जितः ॥ यथानहन्याद्भांगेयंदुःशासनतथाकुरु ॥ २० ॥ ॥ इतिश्रीमः भीष्मपर्वणिभगवद्गीतापः दुर्योधनदुःशासनसं
वादेपंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ ततोरजन्यांव्युष्टायांशब्दःसमभवन्महान् ॥ क्रोशतांभूमिपालानांयुज्यतांयुज्यतामिति ॥ १ ॥ शं
खदुंदुभिघोषैश्चसिंहनादैश्चभारत ॥ हयहेषितनादैश्चरथनेमिस्वनैस्तथा ॥ २ ॥ गजानांबृंहतांचैवयोधानांचापिगर्जताम् ॥ क्ष्वेलितास्फोटितोत्कृष्टैस्तुमुलंसर्व
तोभवत् ॥ ३ ॥ उदतिष्ठन्महाराजसर्वयुक्तमशेषतः ॥ सूर्योदयेमहत्सैन्यंकुरुपांडवसेनयोः ॥ ४ ॥ राजेंद्रतवपुत्राणांपांडवानांतथैवच ॥ दुष्प्रधृष्याणिचास्त्राणि
सशस्त्रकवचानिच ॥ ५ ॥ ततःप्रकाशेसैन्यानिसमदृश्यंतभारत ॥ त्वदीयानांपरेषांचशस्त्रवंतिमहांतिच ॥ ६ ॥ तत्रनागारथाश्चैवजांबूनदपरिष्कृताः ॥ विभ्रा
जमानादृश्यंतेमेघाइवसविद्युतः ॥ ७ ॥ रथानीकान्यदृश्यंतनगराणीवभूरिशः ॥ अतीवशुशुभेतत्रपितातेपूर्णचंद्रवत् ॥ ८ ॥

भीष्मपर्वणिनैलकंठीयेभारतभावदीपेपंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ततइति ॥ १ ॥ २ ॥ ३ ॥ युक्तंसन्नद्धं अशेषतःसर्वप्रकारैः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

॥ ९ ॥ वागुराकाराःपरेषांबंधनार्थमित्यर्थः ॥ १० ॥ १ १ ॥ १ २ ॥ १ ३ ॥ तलबद्धाःतलंज्याघातत्राणंबद्धंयैस्ते कलापिनःतूणवंतः ॥ १ ४ ॥ १ ५ ॥ १ ६ ॥ १ ७ ॥ १ ८ ॥ बद्धकृष्णाजिनाइति युद्धेमरणदीक्षांकृतवंतइत्य

धनुर्भिर्कृष्टिभिःखड्गैर्गदाभिःशक्तितोमरैः॥ योधाःप्रहरणैःशुभ्रैस्तेष्वनीकेष्ववस्थिताः॥ ९॥ गजाःपदातारथिनस्तुरगाश्वविशांपते॥ व्यतिष्ठन्वागुराकाराःशत शोथसहस्रशः॥ १०॥ ध्वजावद्गुविधाकाराव्यदृश्यंतसमुच्छ्रिताः॥स्वेषांचैवपरेषांचद्युतिमंतःसहस्रशः॥११॥कांचनामणिचित्रांगाज्वलंतइवपावकाः॥अश्चि ष्मंतोव्यरोचंतगजारोहाःसहस्रशः॥ १२ ॥ मेहेंद्रकेतवःशुभ्रामर्हेंद्रसदनेष्विव॥सन्नद्धास्तेप्रवीराश्चदृढशुर्युद्धकांक्षिणः॥ १३॥ उद्यतैरायुधैश्चित्रास्तलबद्धाः कलापिनः॥ ऋषभाक्षामनुर्ग्रेंद्राश्वमूमुखगतावभुः॥ १४॥ शकुनिःसौबलःशल्यआवंत्योथजयद्रथः॥ विंदानुविंदौकैकेयाःकांबोजश्चसुदक्षिणः॥ १५॥ श्रुतायुधश्चकालिंगोजयत्सेनश्चपार्थिवः॥ बृहद्बलश्चकौशल्यःकृतवर्माचसात्वतः॥ १६॥ दशैतेपुरुषव्याघ्राःशूराःपरिघबाहवः॥ अक्षौहिणीनांपतयोयज्वा नाभूरिदक्षिणाः॥ १७॥एतेचान्येचबहवोदुर्योधनवशानुगाः॥राजानोराजपुत्राश्चनीतिमंतोमहारथाः॥१८॥ सन्नद्धाःसमदृश्यंतस्वेष्वनीकेष्ववस्थिताः॥ बद्धकृष्णाजिनाःसर्वेबलिनोयुद्धशालिनः॥ १९॥हृष्टाद्युर्योधनस्यार्थेब्रह्मलोकायदीक्षिताः॥समर्थादशवाहिन्यःपरिगृह्यव्यवस्थिताः॥ २०॥ एकादशीधा त्तराष्ट्रीकौरवाणांमहाचमूः॥ अग्रतःसर्वसैन्यानांयत्रशांतनवोऽग्रणीः॥ २१॥ श्वेतोष्णीषंश्वेतहयंश्वेतवर्माणमच्युतम्॥ अपश्याममहाराजभीष्मंचंद्रमिवोदि तं॥ २२॥हेमतालध्वजंभीष्मंराजतेस्यंदनेस्थितं॥ श्वेताभ्रइवतीक्ष्णांशुंदृष्ट्वाःकुरुपांडवाः॥ २३॥ स्रंजयाश्चमहेष्वासाधृष्टद्युम्नपुरोगमाः॥ जृंभमाणंमहा सिंहंदृष्ट्वाक्षुद्रमृगायथा॥ २४॥ धृष्टद्युम्नमुखाःसर्वेसमुद्विविजरेमुहुः॥ एकादशौताःश्रीजुष्टावाहिन्यस्तवपार्थिव॥ २५ पांडवानांतथासन्नमहापुरुषपालि ताः॥ उन्मत्तमकरावर्तौमहाग्राहसमाकुलौ॥ २६॥युगांतसमवेतौद्वौदृश्येतेसागराविव॥ नैवनस्तादृशोराजन्दृष्टपूर्वोनचश्रुतः॥ अनीकानांसमेतानांकौरवा णांतथाविधः॥ २७॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीतापर्व०सैन्यवर्णनेषोडशोऽध्यायः॥ १६॥ ॥७॥ ॥संजयउवाच॥ ॥यथासन्नगवान्व्या सःकृष्णद्वैपायनोब्रवीत्॥ तथैवसहिताःसर्वेसमाजग्मुर्महीक्षितः॥ १॥

र्थः ॥ १९॥ २०॥ २१॥ २२॥ २३॥ २४॥ २५॥ २६॥ तथाविधःसंमर्दइतिशेषः ॥ २७॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेषोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ यथासइति ॥ १ ॥

मघाविषयगःसोमस्तद्दिनंप्रत्यपद्यतेति मघापिञ्यंनक्षत्रंतस्यविषयोदेशःपितृलोकस्तद्गतःसोमः कुरुपांडवयुद्धारंभदिनमुक्तंभारतसाविञ्यां हेमंतेप्रथमेमासिशुक्लपक्षेत्रयोदशी प्रदत्तंभारतंयुद्धंनक्षत्रेत्रयमदै वते प्रथमेमार्गशीर्षे अत्रत्रयोदशीशब्देनतथुक्ताचतुर्दश्येवग्राह्या अर्जुनेनहतोभीष्मोमाघमासेऽसिताष्टमीति त्रयोदश्यांतुमध्याह्नेभारद्वाजोनिपातितइति तत्रैवयुद्धस्यदशमेपंचदशेचाह्निहतयोर्भीष्मद्रो णयोरष्टमीत्रयोदशीसंयोगदर्शनात् अत्रपौषेपिमाघशब्दोमकरायनाभिप्रायेण तदानींतत्संभवात् असिताष्टमीतिच्छेदः अन्यथासप्तमीद्वादश्योरेवतयोर्हननंप्राप्नोति यत्तुअमावास्यायांदुर्योधनहननंत चैवोक्तं तत्राप्यमावास्याशब्दइष्टिदिनेप्रतिपद्येवप्रयुक्तोवेदितव्यः यमदैवतेइतिभरणीनपाद्याकिंनुयुग्मदैवतंकृशीर्षमेवग्राह्यं तस्यहिपूर्वदलंशुक्लदैवत्यत्वादासुरंउत्तरार्द्धंवुधदैवत्यत्वाद्दैवं तेनतत्राप्यसुराणामु परमोदेवानामभ्युदयश्चसिद्धाति किंच चत्वारिंशदहान्यद्धेचमेनिःसृतस्यवै पुष्येणसंप्रयातोस्मिश्रवणेपुनरागत इतियुद्धारंभादष्टादशेह्नितीर्थंयाद्यातआगतस्यबलदेवस्यवचनात्श्रवणेयुद्धसमाप्तिर्दृश्य ते ततःप्राचीनेऽष्टादशर्क्षेमृगशीर्षएवयुद्धारंभःसंभवतिनत्वेकविंशेभरण्यां अष्टादशदिनमध्येनक्षत्रत्रयक्षयस्यकल्पयितुमयुक्तत्वात् कार्त्तिकीरुत्तिकायोगानुपपातेनचतुर्दश्यांमृगंस्पैवसंभावनाच्च एतेनयु द्धारंभप्रकृत्यमघाविषयगःसोमस्तद्दिनंप्रत्यपद्यतेतिभीष्मपर्वणिसंजयवाक्यान्मघायांयुद्धारंभइत्यपिनिरस्तं बलदेववाक्यविरुद्धत्वात् शब्दार्थस्तुमघापदेनतत्सहचराःपितरोलक्ष्यंते तेनयुद्धेहतानामुत्तम देहप्रदानार्थंचंद्रस्तदापितृलोकेसन्निहितोभूदिति स्वर्गिणांदिव्यदेहलाभश्चंद्राधीनइतिशास्त्रप्रसिद्धेः तथाद्वादश्यांरात्रियुद्धेचंद्रोदयकालेत्रिभागमात्रशेषायांरात्रौयुद्धमवर्त्ततेत्युक्तं तत्रत्रिभागेत्यस्यत्रि

मघाविषयगःसोमस्तद्दिनंप्रत्यपद्यत॥ दीप्यमानाश्वसंपेतुर्दिविसप्तमहाग्रहाः॥ २॥
द्विधाभूतइवादित्यउदयेप्रत्यदृश्यत॥ ज्वलंत्याशिखयाभूयोभानुमानुदितोरविः॥ ३॥

मुहूर्त्तशेषायामित्यर्थः तथाअष्टपंचाशतंरात्र्यःशयानस्यास्यमेगताइतिभीष्मवचनंतुमाघोर्यसमनुप्राप्तःत्रिभागमात्रःपक्षोयंमितिवाक्यशेषानुसारात् अशतंशतहीनंयथास्यात्तथाअष्टपंचअष्टपंचाशद्रात्र योव्यतीताइतिव्याख्येयं विलोमशोधनात्अष्टपंचाशद्रात्रेर्नशतंरात्रयोद्वाचत्वारिंशद्रात्रयोव्यतीताइत्यर्थः तथाचपौषकृष्णाष्टमीतोमाघशुक्लपंचम्यांतावतीदिनसंख्यापूर्यते पक्षस्यचतुर्दशीयोभागोगतोभवति तत्राप्येकतिथिक्षयात्पंचम्याःद्विचत्वारिंशत्तमत्वंज्ञेयं शेषोभवितुमर्हतीत्यत्रकार्यशेषोदेहत्यागादिरेवशेषोनतुपक्षशेषइतिव्याख्याज्ञेया तत्रायंनिष्कर्षः कार्त्तिकशुक्लद्वादश्यारेवत्यांकृष्णप्रयाणं ततोमा र्गशीर्षकृष्णपंचम्यांपुष्येसेनयोर्निर्याणं ततःपंचम्याउपरिषष्ठीमारभ्यसप्तदिनानिगणयित्वातदुपर्यष्टमेह्निअमावास्यांभविष्यतीत्यनेनत्रयोदशदिनात्मकोयंकृष्णपक्षोमहोत्पातजनकइतिसूचितं क्षीणयो श्चतिथ्योःपक्षांतरेपुनर्दृद्धासंख्यापूरणंभवतीतिमार्गशीर्षकृष्णपंचमीमारभ्यपौषशुक्लप्रतिपत्पर्यंतंद्विचत्वारिंशीतिथिर्भवतीतिबलदेववाक्योक्तादिनसंख्यानक्षत्रसंख्याचानुगृहीताभवति यत्तुसप्तमाच्चापिदि वसादमावास्याभविष्यति संग्रामंयोजयेत्तत्रतांह्याहुःशक्रदैवतां प्रयाध्वंवैकुरुक्षेत्रंपुष्योयेतिपुनःपुनरितिद्वुर्योधनवाक्यं तत्रसंग्राममित्यनेनसंग्रामेजयसाधनंधाराबंधादिकंतस्यांयोजयेदित्युक्तं शक्रदैवता मित्यनेनतस्यांज्येष्ठानक्षत्रयोगउच्यते सचतिथिद्वयक्षयात्तत्रासंभवन्पितृतिथिवदेवनक्षत्रक्षयाद्वातिथिनक्षत्रयोरायंतयोगाद्वाज्ञेयइतिसर्वंसमंजसं महाग्रहाःराहुकेतोरुपग्रहत्वात्सप्तैव ॥ २ ॥ ३ ॥

वशिरोरेशब्दंकृतवंतः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ अयोनिधनंअथसाशस्त्रेणमरणं ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ तालेनध्वजभूतेन ॥ १८ ॥ १९ ॥ गोवासनःशत्रु

ववाशिरेचदीप्तायांदिशिगोमायुवायसाः ॥ लिप्समानाःशरीराणिमांसशोणितभोजनाः ॥ ४ ॥ अहन्यहनिपार्थानांवृद्धःकुरुपितामहः ॥ भरद्वाजात्मजश्चैवद्रा
तरुत्थायसंयतौ ॥ ५ ॥ जयोस्तुपांडुपुत्राणामित्यूचतुरिंदमौ ॥ युयुधातेतवार्थायययथासमयंकृतः ॥ ६ ॥ सर्वधर्मविशेषज्ञःपितादेवव्रतस्तव ॥ समानीय
महीपालानिदंवचनमब्रवीत् ॥ ७ ॥ इदंवःक्षत्रियाद्वारंस्वर्गायापावृतंमहत् ॥ गच्छध्वंतेनशक्रस्यब्रह्मणःसहलोकताम् ॥ ८ ॥ एषवःशाश्वतःपंथाःपूर्वैःपूर्वतरैः
कृतः ॥ संभावयध्वमात्मानमव्यग्रमनसोयुधि ॥ ९ ॥ नाभागोययातिश्चमांधातानहुषोनृगः ॥ संसिद्धाःपरमंस्थानंगताःकर्मभिरीदृशैः ॥ १० ॥ अधर्मःक्ष
त्रियस्यैषयद्याधिमरणंगृहे ॥ यदयोनिधनंयातिसोस्यधर्मःसनातनः ॥ ११ ॥ एवमुक्तामहीपालाभीष्मेणभरतर्षभ ॥ निर्ययुःस्वान्यनीकानिशोभयंतोरथोत्त
मैः ॥ १२ ॥ सतुवैकर्त्तनःकर्णःसामात्यःसहबंधुभिः ॥ न्यासितःसमरेशस्त्रंभीष्मेणभरतर्षभ ॥ १३ ॥ अपेतकर्णाःपुत्रास्तेराजानश्चैवतावकाः ॥ निर्ययुःसिंहनादे
ननादयंतोदिशोदश ॥ १४ ॥ श्वेतैश्छत्रैःपताकाभिर्ध्वजवारणवाजिभिः ॥ तान्यनीकानिशोभंतेगजैरथपदातिभिः ॥ १५ ॥ भेरीपणवशब्दैश्चदुंदुभीनांचनिः
स्वनैः ॥ रथनेमिनिनादैश्चवभूवाकुलितामही ॥ १६ ॥ कांचनांगदकेयूरैःकार्मुकैश्चमहारथाः ॥ भ्राजमानाव्यराजंतसाग्रयःपर्वताइव ॥ १७ ॥ तालेनमहता
भीष्मःपंचतारेणकेतुना ॥ विमलादित्यसंकाशस्तस्थौकुरुचमूपरि ॥ १८ ॥ येत्वदीयामहेष्वासाराजानोभरतर्षभ ॥ अवर्ततयथादेशंराजन्शांतनवस्यते
॥ १९ ॥ सतुगोवासनःशैब्यःसहितःसर्वराजभिः ॥ ययौमातंगराजेनराजार्हेणपताकिना ॥ पद्मवर्णस्त्वनीकानांसर्वेषामग्रतःस्थितः ॥ २० ॥ अश्वत्थामाययौ
यत्तःसिंहलांगूलकेतुना ॥ श्रुतायुधश्चित्रसेनःपुरुमित्रोविविंशतिः ॥ २१ ॥ शल्योभूरिश्रवाश्चैवविकर्णश्चमहारथः ॥ एतेसमहेष्वासाद्रोणपुत्रपुरोगमाः ॥ २२ ॥
स्यंदनैर्वरवर्माणोभीष्मस्यासन्पुरोगमाः ॥ तेषामपिमहोत्सेधाःशोभयंतोरथोत्तमान् ॥ २३ ॥ भ्राजमानाव्यरोचंतजांबूनदमयाध्वजाः ॥ जांबूनदमयीवेदी
कमंडलुविभूषिता ॥ २४ ॥ केतुराचार्यमुख्यस्यद्रोणस्यधनुषासह ॥ अनेकशतसाहस्रमनीकमनुकर्षतः ॥ २५ ॥ महानदुर्योधनस्यासीन्नागोमणिमयोध्वजः
तस्यपौरवकालिंगकांबोजाःससुदक्षिणाः ॥ २६ ॥

श्यः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

॥ २० ॥

॥ २७ ॥ अंगपतिनाकर्णपुत्रेणवृषकेतुना ॥ २८ ॥ वराहेणकेतुमुख्येनेतिसंबंधः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ निष्केणकंठाभरणेन ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ॥ इतिभीष्मपर्व

क्षेमधन्वाचशल्यश्चतस्युःप्रमुखतोरथाः ॥ स्यंदनेनमहार्हेणकेतुनावृषभेणच ॥ प्रकर्षन्नेवसेनाग्रंमागधस्यकुपोययौ ॥ २७ ॥ तदंगपतिनागुप्तंरुरुपेणचमनस्वि
ना ॥ शारदांबुधरप्रख्यंप्राच्यानांसुमहद्बलम् ॥ २८ ॥ अनीकप्रमुखेतिष्ठन्वराहेणमहायशाः ॥ शुशुभेकेतुमुख्येनराजतेनजयद्रथः ॥ २९ ॥ शतंरथसहस्राणांत
स्यासन्वशवर्त्तिनः ॥ अष्टौनागसहस्राणिसादिनामयुतानिषट् ॥ ३० ॥ तस्मिंधुपतिनाराज्ञापालितंध्वजिनीमुखम् ॥ अनंतरथनागाश्वमशोभतमहद्बलम् ॥ ३१ ॥
षष्ट्यारथसहस्रैस्तुनागानामयुतेनच ॥ पतिःसर्वकलिंगानांययौकेतुमतासह ॥ ३२ ॥ तस्यपर्वतसंकाशाव्यरोचंतमहागजाः ॥ यंत्रतोमरतूणीरैःपताकाभिःसु
शोभिताः ॥ ३३ ॥ शुशुभेकेतुमुख्येनपावकेनकलिंगकः ॥ श्वेतच्छत्रेणनिष्केणचामरव्यजनेनच ॥ ३४ ॥ केतुमानपिमातंगंविचित्रपरमांकुशम् ॥ आस्थितःस
मेरेराजन्मेघस्थइवभानुमान् ॥ ३५ ॥ तेजसादीप्यमानस्तुवारणोत्तममास्थितः ॥ भगदत्तोययौराजायथावज्रधरस्तथा ॥ ३६ ॥ गजस्कंधगतावास्तांभगद
त्तेनसंमितौ ॥ विंदानुविंदावावंत्यौकेतुमंतमनुव्रतौ ॥ ३७ ॥ सरथानीकवान्व्यूहोहस्त्यंगोनृपशीर्षवान् ॥ वाजिपक्षःपतत्युग्रःप्रहसन्सर्वतोमुखः ॥ ३८ ॥ द्रो
णेनविहितोराजन्राज्ञाशांतनवेनच ॥ तथैवाचार्यपुत्रेणवाह्लीकेनरुपेणच ॥ ३९ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीतापर्सैन्यवर्णनेसमदशोऽ
ध्यायः ॥ १७ ॥ ॥ ७ ॥ ॥ ॥ संजयउवाच ॥ ततोमुहूर्त्तात्तुमुलःशब्दोहृदयकंपनः ॥ अश्रूयतमहाराजयोधानांप्रयुयुत्सताम् ॥ १ ॥ शंखदुंदु
भिघोषैश्चवारणानांचबृंहितैः ॥ नेमिघोषैश्चयानांचदीर्यतीववसुंधरा ॥ २ ॥ हयानहिषमाणानांयोधानांचैवगर्जताम् ॥ क्षणेनैवनभोभूमिःशब्देनापूरितंतदा
॥ ३ ॥ पुत्राणांतवदुर्धर्षपांडवानांतथैवच ॥ समकंपंतसैन्यानिपरस्परसमागमे ॥ ४ ॥ तत्रनागारथाश्चैवजांबूनदविभूषिताः ॥ भ्राजमानाव्यदृश्यंतमेघाइव
सविद्युतः ॥ ५ ॥ ध्वजावृद्धविधाकारास्तावकानांनराधिप ॥ कांचनांगदिनोरेजुर्ज्वलिताइवपावकाः ॥ ६ ॥ स्वेषांचैवपरेषांचसमदृश्यंतभारत ॥ महेंद्रकेतवः
शुभ्रामहेंद्रसदनेष्विव ॥ ७ ॥ कांचनैःकवचैर्वीराज्वलनार्कसमप्रभैः ॥ सन्नद्धाःसमदृश्यंतज्वलनार्कसमप्रभाः ॥ ८ ॥ कुरुयोधवराराजन्विचित्रायुधकार्मुकाः ॥
उद्यतैरायुधैश्चित्रैस्तलवद्धाःपताकिनः ॥ ९ ॥

णिनैलकंठीयेभारतभावदीपेसमदशोऽध्यायः ॥ १७ ॥ ॥७॥ ॥ ७ ॥ ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ शतानामयुतानिषट् षट्शतान्ययुतगुणानि षष्टिलक्षाणीतियावत् ॥ १६ ॥१७॥१८॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेअष्टादशोऽध्यायः

ऋषभाक्षामहेष्वासाश्वमूमुपगताबभुः ॥ पृष्ठगोपास्तुभीष्मस्यपुत्रास्तवनराधिप ॥ दुःशासनोदुर्विषहोदुर्मुखोदुःसहस्तथा ॥ १० ॥ विविंशतिश्चित्रसेनोविकर्णश्चमहारथः॥ सत्यव्रतःपुरुमित्रोजयोभूरिश्रवाःशलः॥ ११ ॥ रथाविंशतिसाहस्रास्तथैषामनुयायिनः ॥ अभीषाहाःशूरसेनाःशिबयोथवसातयः॥ १२ ॥ शाल्वामत्स्यास्तथांबष्ठास्त्रैगर्त्ताःकेकयास्तथा॥ सौवीराःकैतवाःप्राच्याःप्रतीच्योदीच्यवासिनः ॥ १३ ॥ द्वादशैतेजनपदाःसर्वेशूरास्तनुत्यजः ॥ महतारथवंशेनतेररक्षुःपितामहम् ॥१४॥ अनीकंदशसाहस्रंकुंजराणांतरस्विनाम्॥मागधोयत्रनृपतिस्तद्रथानीकमन्वयात्॥१५॥रथानांचक्ररक्षाश्वपादरक्षाश्वदंतिनाम्॥ अभवन्वाहिनीमध्येशतानामयुतानिषट् ॥ १६ ॥ पादाताश्चाग्रतोगच्छन्धनुश्चर्मासिपाणयः ॥ अनेकशतसाहस्रानखरप्रासयोधिनः ॥ १७ ॥ अक्षौहिण्योद्शैकाचतवपुत्रस्यभारत ॥ अदृश्यंतमहाराजगंगेवयमुनांतरा ॥ १८ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीतापर्वणिसैन्यवर्णनेअष्टादशोऽध्यायः॥ ॥ १८ ॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ अक्षौहिण्योदशैकाचव्यूढादृष्ट्वायुधिष्ठिरः॥ कथमत्यनसैन्येनप्रत्यव्यूहतपांडवः॥ १ ॥ योवेदमानुषंव्यूहंदैवंगांधर्वमासुरम्॥ कथंभीष्मंसकौंतेयःप्रत्यव्यूहतसंजय॥ २ ॥ ॥ संजयउवाच ॥ ॥ धार्तराष्ट्राण्यनीकानिदृष्ट्वाव्यूढानिपांडवः॥अभ्यभाषतधर्मात्माधर्मराजोधनंजयम्॥ ३ ॥ महर्षेर्वचनात्तातवेदयंतिबृहस्पतेः॥ संहतान्योधयेदल्पान्कामंविस्तारयेद्बहून्॥ ४ ॥ सूचीमुखमनीकंस्यादल्पानांबहुभिःसह॥ अस्माकंचतथासैन्यमल्पीयःसुतरांपरैः॥ ५ ॥ एतद्वचनमाज्ञायमहर्षेर्व्यूहपांडव॥ एतच्छ्रुत्वाधर्मराजंप्रत्यभाषतपांडवः॥ ६ ॥ एष्यूहामितेव्यूहंराजसत्तमदुर्जयम्॥ अचलंनामवज्राख्यंविहितंवज्रपाणिना ॥ ७ ॥ यःसवातइवोद्धूतःसमरेदुःसहःपरैः॥ सनःपुरोयोत्स्यतेवैभीमःप्रहरतांवरः ॥ ८ ॥ तेजांसिरिपुसैन्यानांन्यद्वन्पुरुषसत्तमः॥ अग्रेऽग्रणीर्योत्स्यतिनोयुद्धोपायविचक्षणः ॥ ९ ॥ यंदृष्ट्वाकुरवःसर्वेदुर्योधनपुरोगमाः॥ निवर्त्तिष्यंतिसंत्रस्ताःसिंहंक्षुद्रमृगायथा ॥ १० ॥ तंसर्वेसंश्रयिष्यामः प्राकारमकुतोभयाः॥ भीमंप्रहरतांश्रेष्ठंदेवराजमिवामराः ॥ ११ ॥ नहिसोस्तिपुमाँल्लोकेयःसंक्रुद्धंवृकोदरम्॥ द्रष्टुमत्युग्रकर्माणंविषहेतनरर्षभम्॥ १२ ॥

॥ २१ ॥

॥ १८ ॥ ॥७॥ ॥ अक्षौहिण्यइति ॥ १ ॥ २ ॥ ३ ॥ संहतानिति अल्पैःसंहत्यैवयोद्धव्यंबहुभिस्तुविशकलितैरपियोद्धुंशक्यमित्यर्थः॥४॥५॥ व्यूहव्यूहंकुरु ॥ ६ ॥ ७ ॥ ८॥९॥१०॥११ ॥ १२ ॥

॥ १३ ॥स्पंदमानार्किंचिच्चलंती ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ धृतराष्ट्रस्यदायादाइत्यनेनतंवैवैतेभागइतिसूचयति ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७॥ २८ ॥

एवमुक्त्वामहाबाहुस्तथाचक्रेधनंजयः ॥ व्यूह्यतानिबलान्याशुप्रययौफाल्गुनस्तथा ॥ १३ ॥ संप्रयातान्कुरून्दृष्ट्वापांडवानांमहाचमूः॥ गंगेवपूर्णास्तिमितास्पंदमानाव्यदृश्यत ॥ १४ ॥ भीमसेनोऽग्रणीस्तेषांधृष्टद्युम्नश्चवीर्यवान्॥ नकुलःसहदेवश्चधृष्टकेतुश्चपार्थिवः ॥ १५ ॥ विराटश्चततःपश्चाद्राजाथाक्षौहिणीवृतः ॥ भ्रातृभिःसहपुत्रैश्चसोभ्यरक्षतपृष्ठतः ॥ १६ ॥ चक्ररक्षौतुभीमस्यमाद्रीपुत्रौमहाद्युती ॥ द्रौपदेयाःससौभद्राःपृष्ठगोपास्तरस्विनः ॥ १७ ॥ धृष्टद्युम्नश्चपांचाल्यस्तेषांगोप्तामहारथः ॥ सहितःपृतनाशूरैरथमुख्यैःप्रभद्रकैः ॥ १८ ॥ शिखंडीतुततःपश्चादर्जुनेनाभिरक्षितः ॥ यत्तोभीष्मविनाशायप्रययौभरतर्षभ ॥ ॥ १९ ॥ पृष्ठतोप्यर्जुनस्यासीद्युयुधानोमहाबलः ॥ चक्ररक्षौतुपांचाल्योयुधामन्यूत्तमौजसौ ॥ २० ॥ कैकेयोधृष्टकेतुश्चचेकितानश्चवीर्यवान् ॥ भीमसेनोगदांबिभ्रद्वज्रसारमयींदृढाम्॥ चरन्वेगेनमहतासमुद्रमपिशोषयेत्॥ २१ ॥ एतेतिष्ठंतिसामात्याःश्रेक्षंतस्तेजनाधिप ॥ धृतराष्ट्रस्यदायादाइतिबीभत्सुरब्रवीत् ॥ ॥ २२ ॥ भीमसेनंतदाराजन्दर्शयस्वमहाबलम् ॥ ब्रुवाणंतुतथापार्थंसर्वसैन्यानिभारत ॥ २३ ॥ अपूजयंस्तदावाग्भिरनुकूलाभिराहवे ॥ राजातुमध्यमानीकेकुंतीपुत्रोयुधिष्ठिरः ॥ २४ ॥ बृहद्भिःकुंजरैर्मत्तैश्चलद्भिरचलैरिव ॥ अक्षौहिण्याथपांचाल्योयज्ञसेनोमहामनाः ॥ विराटमन्वयात्पश्चात्पांडवार्थंपराक्रमी ॥ २५ ॥ तेषामादित्यचंद्राभाःकनकोत्तमभूषणाः ॥ नानाचित्रधराराजन्रथेष्वासन्महाध्वजाः ॥ २६ ॥ समुत्सार्यततःपश्चाद्धृष्टद्युम्नोमहारथः ॥ भ्रातृभिःसहपुत्रैश्चसोभ्यरक्षद्युधिष्ठिरम् ॥ २७ ॥ त्वदीयानांपरेषांचरथेषुविपुलान्ध्वजान् ॥ अभिभूयार्जुनस्यैकोरथेतस्यौमहाकपिः॥ २८ ॥ पदातास्त्वग्रतोगच्छन्नसिशक्त्यृष्टिपाणयः॥ अनेकशतसाहस्राभीमसेनस्यरक्षिणः॥ २९ ॥ वारणादशसाहस्राःप्रभिन्नकरटामुखाः ॥ शूराहेममयैर्जालैर्दीप्यमानाइवाचलाः ॥ ३० ॥ क्षरंतइवजीमूतामहार्हाःपद्मगंधिनः ॥ राजानमन्वयुःपश्चाज्जीमूताइववार्षिकाः ॥ ३१ ॥ भीमसेनोगदांभीमांप्रकर्षन्परिघोपमाम् ॥ प्रचकर्षमहासैन्यंदुराधर्षोमहामनाः ॥ ॥ ३२ ॥ तमर्कमिवदुष्प्रेक्ष्यंतपंतमिववाहिनीम्॥ नशेकुःसर्वयोधास्तेप्रतिवीक्षितुमंतिके ॥ ३३ ॥ वज्रोनामैषसव्यूहोनिर्भयःसर्वतोमुखः॥ चापविद्युद्ध्वजोघोरोगुप्तोगांडीवधन्वना॥ ३४ ॥ यंप्रतिव्यूत्यतिष्ठंतिपांडवास्तववाहिनीम्॥ अजेयोमानुषेलोकेपांडवैरभिरक्षितः॥ ३५ ॥

॥ २९ ॥ वारणाराजानमन्वयुरितिसंबंधः अचलाःनिष्कंपाः ॥ ३० ॥ जीमूताःपर्वताः जीमूतोऽद्रावितिमेदिनी ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

प्रावात्प्रववौ सपृषतःसर्विद्युः ॥ ३६ ॥ वाताःरूक्षावायवः ॥ ३७ ॥ आहत्यआस्कान्य ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३॥ मज्जानइति नोस्माकंयोधानांमज्जाःधातुविशेषान्यूयंसंतइवेतियोज्यं ॥ ४४ ॥ भीमसेनंदृष्ट्वाव्यवस्थिताइतिसंबंधः ॥४५॥ ॥इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेएकोनविंशोऽध्यायः॥१९॥ ॥७३॥ ॥भीष्मोनेतानिर्वोढायेषांतेभीष्मनेत्राः ॥ १ ॥ मेवंपुष्क

संध्यांतिष्ठत्सुसैन्येषुसूर्यस्योदयनंप्रति॥ प्रावात्सृपृषतोवायुर्निरभ्रेस्तनयिलुमान्॥ ३६ ॥ विष्वग्वाताश्चविववुर्नीचैःशर्करकर्षिणः॥ रजश्चोद्धूयतमहत्तमआच्छादयज्जगत्॥ ३७॥ पपातमहतीचोल्काप्राङ्मुखीभरतर्षभ॥ उद्यंतंसूर्यमाहत्यव्यशीर्यतमहास्वना॥ ३८॥ अयसंनत्यमानेषुसैन्येषुभरतर्षभ॥निष्प्रभोऽभ्युद्ययौसूर्यःसघोषंभूश्चचालच॥ ३९॥ व्यशीर्यतसनादाचभूत्पदाभरतर्षभ॥ निर्घाताबहवोराजन्दिक्षुसर्वासुचाभवन्॥ ४० ॥ प्रादुरासीद्रजस्तीव्रंनप्राज्ञायत किंचन॥ ध्वजानांधूयमानानांसहसामातरिश्वना॥ ४१ ॥किंकिणीजालबद्धानांकांचनस्रग्वरांवरैः॥ महतांसपताकानामादित्यसमतेजसाम्॥ ४२ ॥ सर्वंझणझणीभूतमासीत्तालवनेष्विव॥ एवंतेपुरुषव्याघ्राःपांडवायुद्धनंदिनः॥ ४३॥ व्यवस्थिताःप्रतिव्यूह्यतवपुत्रस्यवाहिनीम्॥ ग्रसंतइवमज्जानोयोधानांभरतर्षभ॥४४॥दृष्ट्वाग्रतोभीमसेनंगदापाणिमवस्थितम्॥४५॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीतापर्वणिपांडवसैन्यव्यूहेएकोनविंशोऽध्यायः॥१९॥ ॥७३॥

॥ धृतराष्ट्रउवाच॥ ॥ सूर्योदयेसंजयकेनुपूर्वंयुयुत्सवोह्यमाणाइवासन्॥ मामकावाभीष्मनेत्राःसमीपेपांडवावाभीमनेत्रास्तदानीम्॥ १ ॥ केषांजघन्यौसोमसूर्यौसवायूकेषांसेनांश्चापदाश्चाभषंत ॥ केषांयूनांमुखवर्णाःप्रसन्नाःसर्वंमेत्वंबृहिमेवंयथावत्॥ २॥ ॥संजयउवाच॥ ॥उभेसेनेतुल्यमिवोपयाते उभेव्यूहेहृष्टरूपेनरेंद्र ॥ उभेचित्रेवनराजिप्रकाशेतथैवोभेनागरथाश्वपूर्णे ॥ ३ ॥उभेसेनेबृहत्यौभीमरूपेतथैवोभेभारतदुर्विषह्ये ॥ तथैवोभेस्वर्गजयायस्तष्टे तथैवोभेसत्पुरुषोपजुष्टे॥ ४॥पश्चान्मुखाःकुरवोधार्त्तराष्ट्राःस्थिताःपार्थाःप्राङ्मुखायोत्स्यमानाः॥दैत्येंद्रसेनेवचकौरवाणांदेवेंद्रसेनेवचपांडवानाम्॥५॥ चक्रेवायुःपृष्ठतःपांडवानांधार्त्तराष्ट्रान्श्वापदाव्याहरंत ॥ गर्जेद्राणांमदगंधांश्चतीव्रान्नसेहिरेतवपुत्रस्यनागाः ॥ ६ ॥ दुर्योधनोहस्तिनंपद्मवर्णंसुवर्णकक्षंजालवंतंप्रभिन्नम् ॥ समास्थितोमध्यगतःकुरूणांसंस्तूयमानोवंदिभिर्मागधैश्च॥ ७॥ चंद्रप्रभंश्वेतमथातपत्रंसौवर्णस्रग्भ्राजतिचोत्तमांगे॥ तंसर्वतःशकुनिःपार्वतीयैःसार्द्धंगांधारैर्यातिगांधारराजः॥ ८ ॥

॥ २२ ॥

लंयथास्यात्तथाब्रूहि मेवमितिमीवतेःपुष्ट्यर्थस्यघञिबाद्बुलकादुपधाह्रस्वेततोगुणेरूपं गौडास्त्विहपाठांतरंकल्पयंतिसर्वमेतद्बूहिमेत्वंयथावदिति ॥ २ ॥ व्यूहेस्वेस्वेइतिशेषः ॥३॥४॥५ ॥ ६ ॥ ७ ॥ ८ ॥

॥ ९ ॥ १० ॥ भूमींद्रइवपर्वतइवअप्रकंप्यइत्यर्थः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ येनयत्र तेननत्र ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ अनंतरूपाबह्वीत्वदीयानतुपांडवानांसेनाबह्वीतथापितांबृहती

भीष्मोग्रतःसर्वसैन्यस्यरुद्धःश्वेतच्छत्रःश्वेतधनुःसखड्गः॥ श्वेतोष्णीषःपांडुरेणध्वजेनश्वेतैरश्वैःश्वेतशैलप्रकाशैः॥ ९ ॥ तस्यसैन्येधार्त्तराष्ट्राश्चसर्वेबाह्लीकानामेकदेशाःशलश्च ॥ येचांवष्ठाःक्षत्रियायेचसिंधोस्तथासौवीराःपंचनदाश्चशूराः ॥ १० ॥ शोणैर्हयैरुक्मरथोमहात्माद्रोणोधनुष्पाणिरदीनसत्वः॥ आस्तेगुरुःप्रायशःसर्वराज्ञांपश्चाच्चभूमींद्रइवाभियाति ॥ ११ ॥ वार्द्धक्षत्रिःसर्वसैन्यस्यमध्येभूरिश्रवाःपुरुमित्रोजयश्च ॥ शाल्वामत्स्याःकेकयाश्चेतिसर्वेगजानीकैर्व्रातरोयोत्स्यमानाः ॥ १२ ॥ शारद्वतश्चोत्तरधूर्महात्मामहेष्वासोगौतमश्चित्रयोधी ॥ शकैःकिरातैर्यवनैःपह्लवैश्चसार्धंचमूमुत्तरतोभियाति ॥ १३ ॥ महारथैर्दक्षिणतोजैःसुगुप्तंसुराष्ट्रकैर्विहितैरात्तशस्त्रैः॥ बृहद्बलंकृतवर्माभिगुप्तंबलंत्वदीयंदक्षिणेनाभियाति ॥ १४ ॥ संशप्तकानामयुतंरथानांम्रत्युर्जयोवार्जुनस्येतिस्तृष्टः॥ येनार्जुनस्तेनराजन्कृतास्त्राःप्रयातारस्तेत्रिगर्त्ताश्चशूराः॥ १५॥ साग्रंशतसहस्रंतुनागानांतवभारत॥ नागेनागेरथशतंशतमश्वारथेरथे ॥ १६ ॥ अश्वेऽश्वेदशधानुष्काधानुष्केशतचर्मिणः॥ एवंव्यूढान्यनीकानिभीष्मेणतवभारत॥ १७॥ संव्यूह्यमानुषंव्यूहंदैवंगांधर्वमासुरम्॥दिवसेदिवसेप्राप्तेभीष्मःशांतनवोग्रणीः॥ १८॥ महारथौघविपुलःसमुद्रइवघोषवान्॥भीष्मेणधार्त्तराष्ट्राणांव्यूहःप्रत्यङ्मुखोयुधि॥ १९॥अनंतरूपाध्वजिनीनरेंद्रभीमात्वदीयानतुपांडवानाम्॥ तांचैवमन्येबृहतींदुष्प्रधर्षांयस्यानेताकेशवश्चार्जुनश्च ॥ २० ॥ ॥इतिश्रीम०भी०भ०सैन्यवर्णनेविंशोऽध्यायः॥ २० ॥ ॥ ७३ ॥ ॥संजयउवाच॥ ॥ बृहतींधार्त्तराष्ट्रस्यसेनांदृष्ट्वासमुद्यताम्॥ विषादमगमद्राजाकुंतीपुत्रोयुधिष्ठिरः॥ १॥ व्यूहंभीष्मेणचाभेद्यंकल्पितंप्रेक्ष्यपांडवः॥अभेद्यमिवसंप्रेक्ष्यविवर्णोऽर्जुनमब्रवीत्॥ २॥ धनंजयकथंशक्यमस्माभिर्योद्धुमाहवे॥ धार्त्तराष्ट्रैर्महाबाहोयेषांयोद्धापितामहः॥ ३॥ अक्षोभ्योयमभेद्यश्चभीष्मेणामित्रकर्षिणा ॥कल्पितःशास्त्रदृष्टेनविधिनाभूरिवर्चसा॥ ४॥ तेवयंसंशयंप्राप्ताःससैन्याःशत्रुकर्षण ॥ कथमस्मान्महाव्यूहाद्व्युत्थानंनोभविष्यति ॥ ५ ॥ अथार्जुनोब्रवीत्पार्थंयुधिष्ठिरममित्रहा॥ विषण्णमिवसंप्रेक्ष्यतवराजन्ननीकिनीम्॥ ६॥ प्रज्ञयाभ्यधिकान्शूरान्गुणयुक्तान्बहूनपि ॥ जयंत्यल्पतरायेनतन्निबोधविशांपते॥ ७॥ तत्रतेकारणंराजन्प्रवक्ष्याम्यनसूयवे॥ नारदस्त्वृषिर्वेदभीष्मद्रोणौचपांडव ॥ ८॥एनमेवार्थमाश्रित्ययुद्धेदेवासुरेऽब्रवीत्॥ पितामहःकिलपुरामर्हेंद्रादीन्दिवौकसः॥ ९॥

मेवमन्येइतिसंबंधः ॥२०॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेविंशोऽध्यायः ॥२०॥ ॥७३॥ ॥७३॥ ॥ बृहतीमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ उत्थानंजयः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

॥ १० ॥ ११ ॥ १२ ॥ गुणभूतोदासभूतः ॥ १३ ॥ १४ ॥ अकुंठसायकःअप्रतिहतायुधः ॥ १५ ॥ १६ ॥ १७ ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेएकविंशोऽध्यायः ॥ २१ ॥ ॥ ७ ॥

नतथाबलवीर्याभ्यांजयंतिविजिगीषवः॥ यथासत्यान्नृशंस्याभ्यांधर्मेणैवोद्यमेनच ॥ १० ॥ ज्ञात्वाधर्ममधर्मंचलोभंचोत्तममास्थिताः ॥ युद्ध्यध्वमनहंकारा यतोधर्मस्ततोजयः॥ ११ ॥ एवंराजन्विजानीहिध्रुवोस्माकंरणेजयः॥ यथातुनारदःप्राहयतःकृष्णस्ततोजयः॥ १२ ॥ गुणभूतोजयःकृष्णेपृष्ठतोभ्येतिमांधवम्॥ तद्यथाविजयश्चास्यसन्नतिश्चापरोगुणः॥ १३ ॥ अनंततेजागोविंदःशत्रुपूगेषुनिर्व्ययः ॥ पुरुषःसनातनमयोयतःकृष्णस्ततोजयः॥ १४ ॥ पुराव्येषहरिर्भूत्वा विकुंठोऽकुंठसायकः॥ सुरासुरानवरंपूर्जन्नब्रवीत्केजयंत्विति ॥ १५ ॥ कथंकृष्णजयेमेतियैरुक्तंतत्रतैर्जितम्॥ तत्प्रसादाद्धिदैत्यैर्लोक्यंप्राप्तंशक्रादिभिःसुरैः॥ १६ तस्यतेनव्यथांकांचिद्दिहपश्यामिभारत॥ यस्यतेजयमाशास्तेविश्वभुक्त्रिदिवेश्वरः ॥ १७ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीताप० युधिष्ठिरार्जुन संवादेएकविंशोऽध्यायः ॥ २१ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ ततोयुधिष्ठिरोराजास्वांसेनांसमनोदयत् ॥ प्रतिव्यूहन्ननीकानिभीष्मस्यभरतर्षभ ॥ १ ॥ यथोद्दिष्टान्यनीकानिप्रत्यव्यूहंतपांडवाः ॥ स्वर्गंपरममिच्छंतःसुयुद्धेनकुरूद्वहाः ॥ २ ॥ मध्येशिखंडिनोऽनीकंरक्षितंसव्यसाचिना ॥ धृष्टद्युम्नश्चरन्नग्रेभीमसेने नपालितः॥ ३ ॥ अनीकंदक्षिणंराजन्युयुधानेनपालितम्॥ श्रीमतासात्वताग्र्येणशक्रेणेवधनुष्मता ॥ ४ ॥ महेंद्रयानप्रतिमंरथंतुसोपस्करंहाटकरत्नचित्रम्॥ यु धिष्ठिरःकांचनभांडयोक्त्रंसमास्थितोनागपुरस्यमध्ये ॥ ५ ॥ समुच्छ्रितंदंतशलाकमस्यसुपांडुरंछत्रमतीवभाति ॥ प्रदक्षिणंचैनमुपाचरंतमहर्षयःसंस्तुतिभिर्म हेंद्रं ॥ ६ ॥ पुरोहिताःशत्रुवधंवदंतोब्रह्मर्षिसिद्धाःश्रुतवंतएनम्॥ जप्यैश्चमंत्रैश्चमहौषधीभिःसमंततःस्वस्त्ययनंब्रुवंतः ॥ ७ ॥ ततःसवस्त्राणितथैवगाश्चफलानिपु ष्पाणितथैवनिष्कान्॥ कुरूत्तमोब्राह्मणसान्महात्माकुर्वन्ययौशक्राइवामरेशः ॥ ८ ॥ सहस्रसूर्यःशतकिंकिणीकःपरार्द्धजांबूनदहेमचित्रः॥ रथोर्जुनस्याग्निरि वार्चिमालीविभ्राजतेश्वेतहयःसुचक्रः ॥ ९ ॥ तमास्थितःकेशवसंगृहीतंकपिध्वजोगांडिवबाणपाणिः ॥ धनुर्धरोयस्यसमःपृथिव्यांनविद्यतेनोभवितोकदा चित्॥ १० ॥ उद्वर्त्तयिष्यंस्तवपुत्रसेनामतीवरौद्रंसबिभर्तिरूपम्॥ अनायुधोयःसुभुजोभुजाभ्यांनराग्र्यनागान्युधिभस्मकुर्यात् ॥ ११ ॥ सभीमसेनःसहितो यमाभ्यांदृकोदरोवीररथस्यगोप्ता॥ तंतत्रसिंहर्षभमत्तखेलंलोकेमहेंद्रप्रतिमानकल्पम्॥ १२ ॥

॥ २३ ॥

ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ पुरस्यमध्येस्थितंइदानीमानीतमितिभावः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ सहस्रंसूर्यतुल्यान्यादर्शचकाणियस्मिन्ससहस्रसूर्यः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

॥ १३ ॥ १४ ॥ पाठांतरेयोनःसेनांयोभीष्मोनोऽस्मभ्यंअस्मत्तःसेनांस्त्रांआररक्षअभेद्यव्यूहरचनयारक्षितवान् ॥ १५ ॥ गूहंतिपरिवारयंति ॥ रतर्षभेणभीष्मेण ॥ १६ ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीये भारतभावदीपेद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ ७ ॥ ॥ इदानींस्वस्यदिव्यंज्ञानमस्तीतिदर्शयन्संजयउवाच धार्तराष्ट्रबलमिति हितार्थायहितश्चासावर्थश्चहितार्थोजयस्तद र्थं ॥ १ ॥ दुर्गाग्राःअसुरनि हंतृत्वेनप्रसिद्धायाःस्तोत्रंउदीरयअसुरांशानांशत्रूणांपराजयाय ॥ २ ॥ संख्येसंग्रामे ॥ ३ ॥ हेसिद्धसेनानिसिद्धानांयोगिनांसेनासमुदायस्तस्यनेत्रीपरमपदप्रापिकायोगसिद्धिकरीत्यर्थः आर्ये ऋगतौअ

समीक्ष्यसेनाग्रगतंदुरासदंसंविव्यथुःपंकगतायथाद्विपाः॥ दकोदरंवारणराजदर्पयोधास्त्वदीयाभयविघ्नसत्त्वाः॥ १३ ॥ अनीकमध्येतिष्ठंतंराजपुत्रंदुरासद म्॥ अब्रवीद्भरतश्रेष्ठंगुडाकेशंजनार्दनः॥ १४ ॥ ॥ वासुदेवउवाच ॥ ॥ यएषरोषात्प्रतपन्बलस्योयोनःसेनांसिंहइवेक्षतेच ॥ सएषभीष्मःकुरुवंशकेतुर्योनाह तान्त्रिंशतंवाजिमेधाः ॥ १५ ॥ एतान्यनीकानिमहानुभावंगूहंतिमेघाइवरश्मिमंतम्॥ एतानिहत्वापुरुषप्रवीरकांक्षस्वयुद्धंभरतर्षभेण॥ १६ ॥ ॥ इतिश्रीमहा भारतेभीष्मपर्वणिभगवद्गी० श्रीकृष्णार्जुनसंवादेद्वाविंशोऽध्यायः॥ २२ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ धार्त्तराष्ट्रबलंदृष्ट्वायुद्धायसमुपस्थितं ॥ अर्जुनस्य हितार्थायकृष्णोवचनमब्रवीत्॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शुचिर्भूत्वामहाबाहोसंग्रामाभिमुखेस्थितः॥ पराजयायशत्रूणांदुर्गास्तोत्रमुदीरय ॥ २ ॥ ॥ सं जयउवाच ॥ ॥ एवमुक्तोर्जुनःसंख्येवासुदेवेनधीमता ॥ अवतीर्यरथात्पार्थःस्तोत्रमाहकृतांजलिः॥ ३ ॥ ॥ अर्जुनउवाच ॥ ॥ नमस्तेसिद्धसेनानिआर्येमंदरवा सिनि॥ कुमारिकालिकापालिकपिलेकृष्णपिंगले ॥ ४ ॥ भद्रकालिनमस्तुभ्यंमहाकालिनमोस्तुते ॥ चंडिचंडेनमस्तुभ्यंतारिणिवरवर्णिनि ॥ ५ ॥ कात्यायनिम हाभागेकरालिविजयेजये ॥ शिखिपिच्छध्वजधरेनानाभरणभूषिते ॥ ६ ॥ अट्टशूलप्रहरणेखड्गखेटकधारिणि ॥ गोपेंद्रस्यानुजेज्येष्ठेनंदगोपकुलोद्भवे ॥ ७ ॥ महिषास्रकृप्रियेनित्यकौशिकिपीतवासिनि ॥ अट्टहासेकोकमुखेनमस्तेस्तुरणप्रिये ॥ ८ ॥

स्मात्ऋहलोर्ण्यत् प्राप्यब्रह्मस्वरूपेइत्यर्थः मंदरेमंदरवनेवसतीतिवा कुमारिअविप्लुतब्रह्मचर्येजराहीनेइतिवा कालिकालशक्ते कापालिकपालस्थायंपतिःकापालोरुद्रस्तत्पत्नि कपिलःकृष्णपिंगल श्ववर्णविशेषौतद्वति ॥ ४ ॥ भद्रंकल्याणंकालयतिभक्तान्प्रत्यानयतिसाभद्रकाली महतीचासौकालीचकालयित्रीसंहर्त्रीकालरूपामहाकाली चंडिचंडस्यकालांतकस्यभार्ये चंडेप्रगल्भे तारिणिसंक टोत्तरणकर्त्रि वरवर्णिनीसर्वसौभाग्यलक्षणोपेतास्त्रीतद्रूपे ॥ ५ ॥ कात्यायनिकतगोत्रोद्भवे महाभागेअतिपूज्ये करालिकूरे विजयेविशिष्टोजयोयथासाजयप्रदेइत्यर्थः जयेजयस्वरूपे ॥ ६ ॥ अट्टंअ ट्टयुत्कटंशूलंतदेवप्रहरणमायुधंयस्याः खेटकंचर्म ॥ ७ ॥ कौशिकिकुशिककुलोत्पन्ने अट्टहासेप्रशस्तस्मिते कोकंचकवत्दत्तंवारक्तबीजवधेःसुरादानशीलंवामुखंयस्याःसाकोकमुखा ॥ ८ ॥

श्वेतेमहेश्वररूपे कृष्णेवासुदेवरूपे हिरण्याक्षिपीतनेत्रे विरूपाक्षिविविधरूपयुक्तनैत्रेमनुष्यादौ सुधूम्राक्षिमार्जारादौ एतेनसार्वात्म्यमुक्तंभवति ॥ ९ ॥ ब्रह्मण्येयज्ञकर्मविप्रादिषुसाध्वीब्रह्मण्या जातवेदसिअतीतज्ञेअतीतज्ञातिवा जंबूकटकेषुजंबुद्वीपराजधानीषु चैत्येषुदेवृतालयेषुनित्यंसन्निहितआलयःस्थानंयस्याःसातथा ॥ १० ॥ महानिद्राब्रह्मविद्याफलभूतामुक्तिः स्कंदमातरितिसर्वदेवतारूपत्वोपलक्षणं ॥ ११ ॥ स्वाहेतिसर्वकर्मरूपत्वं कलेतिसर्वस्थूलसूक्ष्मकालरूपत्वं सावित्रीतिसर्ववाङ्मयरूपत्वंचउच्यते ॥ १२ ॥ रणाजिरेयुद्धांगने ॥ १३ ॥ १४ ॥ जंभनीतंद्रा मोहिनीनिद्रा मायाअद्भुतप्रदर्शनं ह्रीर्लज्जाख्याचेतोवृत्तिः एतच्चकामादिवृत्तीनामप्युपलक्षणं श्रीर्लक्ष्मीः विभूतापोधनादिसमृद्धिरूपा संध्यासंधीआदावतेचभवासंध्यासृष्टिप्रलयकर्त्रीत्यर्थः प्रभावतीचंद्रसूर्यप्रभायुक्ताहोरात्ररूपा सावित्रीसवितुःसूर्यस्यसंबंधिनीप्रभाप्रकाशनशक्तिस्तद्रूपा जननीमातृवत्पालयित्री ॥ १५ ॥ तुष्टिःसंतोषः पुष्टिरुपचयः धृतिर्धैर्यं दीप्तिर्ज्योतिः ययाकांत्याचंद्रादित्यौवर्धेतेअत्यंतंकांतिमतौभवतः वक्ष्यतिच यदादित्यगतंतेजोजगद्भासयतेखिलं यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकमिति येनसूर्यस्तपतितेजसेद्धइतिश्रुतिश्च परंचिन्मात्रंब्रह्मैवेत्यर्थः भूतिःऐश्वर्यंभूतिमतांमहेश्वरादीनां एषास्यपरमासंपदिति

उमेशाकंभरिश्वेतेकृष्णेकैटभनाशिनि॥ हिरण्याक्षिविरूपाक्षिसुधूम्राक्षिनमोस्तुते ॥ ९॥ वेदश्रुतिमहापुण्येब्रह्मण्येजातवेदसि ॥ जंबूकटकचैत्येषुनित्यंसन्निहितालये ॥ १० ॥ त्वंब्रह्मविद्याविद्यानांमहानिद्राचदेहिनाम्॥ स्कंदमातर्भगवतिदुर्गेकांतारवासिनि ॥ ११ ॥ स्वाहाकारःस्वधाचैवकलाकाष्ठासरस्वती॥ सावित्रिवेदमाताचतथावेदांतउच्यते ॥ १२ ॥ स्तुतासित्वंमहादेविविशुद्धेनांतरात्मना ॥ जयोभवतुमेनित्यंत्वत्प्रसादाद्रणाजिरे ॥ १३ ॥ कांतारभयदुर्गेषुभक्तानां चालयेषुच ॥ नित्यंवससिपातालेयुद्धेजयसिदानवान् ॥ १४ ॥ त्वंजंभनीमोहिनीचमायाह्रीःश्रीस्तथैवच ॥ संध्याप्रभावतीचैवसावित्रीजननीतथा ॥ १५ ॥ तुष्टिःपुष्टिर्धृतिर्दीप्तिश्चंद्रादित्यविवर्धिनी ॥ भूतिर्भूतिमतांसंख्येवीक्ष्यसेसिद्धचारणैः ॥ १६ ॥ ॥ संजयउवाच ॥ ॥ ततःपार्थस्यविज्ञायभक्तिंमानववत्सला॥ अंतरिक्षगतोवाचगोविंदस्याग्रतःस्थिता ॥ १७ ॥

तिश्रुतेर्ब्रह्मरूपैव संख्येसम्यक्कृख्यानंप्रकाशनंयत्रतस्मिन्वात्मानात्मविवेकरूपेसमाधौ सिद्धैर्जीवन्मुक्तैश्चारणैराजानसिद्धैश्चवीक्ष्यसेऽनुभूयसेप्रत्यगात्मत्वेन तदेवमाकारविशेषोपहितंब्रह्माभिध्यातंसत्सर्वामोक्षादर्वाचीनाराज्यविजयादिसिद्धीःप्रयच्छतीतिप्रदर्शितं तदेववक्ष्यतिभगवान् येप्यन्यदेवताभक्तायजंतेश्रद्धयान्विताः तेपिमामेवकौंतेययजंत्यविधिपूर्वकं लभंतेचततःकामान्यथैवविहितान्हितानिहितं तथामहतीविमोक्षाख्यासिद्धिरपिसर्वाकारानुपहितब्रह्मज्ञानादेवभवतीतिप्रतिपादनायगीताशास्त्रमारीप्समानेनतत्रविश्वासोत्पत्त्यर्थंसद्यःप्रत्ययकरंदेवीस्तोत्रंकुर्वितिनियुक्तोऽर्जुनोदेवीप्रत्यक्षतोदृष्ट्वाजातप्रत्ययोगीतास्वपिश्रद्धांबध्नीयादित्याशयवताभगवताएतदुक्तमितिप्रघट्टकार्थः एवमेववेदेपिकारीर्यादीनांसयोदृष्ट्यादिफलानांकर्मणांविधानमदृष्टार्थेषुकर्मसुश्रद्धोत्पादनार्थमेवेतिनिर्णीतंपूर्वाचार्यैः ॥ १६ ॥ ततःपार्थस्येति अंतरिक्षगतेत्यैश्वर्यप्रदर्शनार्थंविशेषणं ॥ १७ ॥

नरस्त्वमित्यर्जुनायपूर्वंनरनारायणात्मकंरूपंस्मारयति तेनचतत्स्मृत्यैवसर्वंभयनिवृत्तिर्भवतितद्विस्मरणादेवतुपराजयभयमित्यपिदर्शितं एवमयंगीताशास्त्रस्यवक्ष्यमाणस्योपोद्घातोदर्शितः ॥ १८ ॥ १९ ॥ कथामनुसंधत्ते लब्ध्वेत्यादिना ॥ २० ॥ एतत्स्तोत्रपाठफलमाह यइदमिति कल्येप्रभाते ॥ २१ ॥ तेभ्योनभयमितिपूर्वेणसंबंधः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ यत्रेति धर्मफलंयुतिप्रभृतयः

देव्युवाच ॥ ॥ स्वल्पेनैवतुकालेनशत्रून्जेष्यसिपांडव ॥ नरस्त्वमसिदुर्धर्षनारायणसहायवान्॥१८॥ अजेयस्त्वंरणेऽरीणामपिवज्रभृतःस्वयम्॥ इत्येवमुक्त्वा वरदाक्षणेनांतरधीयत ॥ १९ ॥लब्ध्वावरंतुकौंतेयोमनेविजयमात्मनः ॥ आरुरोहततःपार्थोरथंपरमसंमतम् ॥ २० ॥ कृष्णार्जुनावेकरथौदिव्यौशंखौप्रदध्मतुः॥ यइदंपठतेस्तोत्रंकल्युत्थायमानवः ॥ २१ ॥ यक्षरक्षःपिशाचेभ्योनभयंविद्यतेसदा॥ नचापिरिपवस्तेभ्यःसर्पाद्यायेचदंष्ट्रिणः॥ २२ ॥ नभयंविद्यतेतस्यसदाराजकुलादपि ॥ विवादेजयमाप्नोतिबद्धोमुच्यतिबंधनात् ॥ २३ ॥ दुर्गोतरतिचावश्यंतथाचोरैर्विमुच्यते ॥ संग्रामेविजयेन्नित्यंलक्ष्मींप्राप्नोतिकेवलाम् ॥ २४ ॥ आरोग्यबलसंपन्नोजीवेद्वर्षशततथा ॥ एतदृष्टंप्रसादात्तुमयाव्यासस्यधीमतः ॥ २५ ॥ मोहादेतौनजानंतिनरनारायणावृषी ॥ तवपुत्रादुरात्मानःसर्वेमन्युवशानुगाः॥ २६ ॥ प्राप्तकालमिदंवाक्यंकालपाशेनगुंठिताः ॥ द्वैपायनोनारदश्चकण्वोरामस्तथानघः ॥ अवारयंस्तवसुतंनचासौतद्ग्रहीतवान्॥ २७ ॥ यत्रधर्मोद्युतिःकांतिर्यत्रश्रीःश्रीस्तथामतिः॥ यतोधर्मस्ततःकृष्णोयतःकृष्णस्ततोजयः॥२८॥ ॥इतिश्रीम०भीष्मपर्वणिभगवद्गी०दुर्गास्तोत्रेत्रयोविंशोऽध्यायः ॥२३॥ ॥ धृतराष्ट्रउवाच ॥ ॥ केषांप्रहृष्टास्तत्रायेयोधायुध्यंतिसंजय॥ उद्यमनसःकेवाकेवादीनाविचेतसः॥ १ ॥ केपूर्वंप्राहरंस्तत्रयुद्धेहृदयकंपने॥ मामकाःपांडवेयावातन्ममाचक्ष्वसंजय ॥ २ ॥ कस्यसेनासमुदयेगंधमाल्यसमुद्भवः ॥ वाचःप्रदक्षिणाश्चैवयोधानामभिगर्जताम्॥ ३ ॥ ॥ संजयउवाच ॥ ॥ उभयोःसेनयोस्तत्रयोधाजहृषिरेतदा ॥ स्रजःसमाःसुगंधानामुभयत्रसमुद्भवः॥ ४ ॥ संहतानामनीकानांव्यूढानांभरतर्षभ ॥ संसर्गात्समुदीर्णानांविमर्दःसुमहानभूत्॥ ५ ॥ वादित्रशब्दस्तुमुलःशंखभेरीविमिश्रितः॥ शूराणांरणशूराणांगर्जतामितरेतरम्॥ ६ ॥ उभयोःसेनयोराजन्महान्व्यतिकरोभवत्॥ अन्योन्यंवीक्ष्यमाणानांयोधानांभरतर्षभ॥ कुंजराणांचनदतांसैन्यानांचप्रहृष्यताम्॥ ७ ॥ ॥ इ०म०भी०प०भगवद्गीतापo धृतराष्ट्रसंजयसंवादेचतुर्विंशोऽध्यायः॥ २४ ॥

तर्हिमत्पक्षेपिधर्मोस्त्येवेतिमन्वानंप्रत्याह यत्रधर्मस्तत्रकृष्णः त्वत्पक्षेकृष्णाभावाद्धर्मोपिनास्तितत्फलभूताद्युत्यादयोपिनसंतीत्यर्थः फलितमाह यतःकृष्णस्ततोजयइति ॥ २८ ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ ७ ॥ केषामित्यध्यायःस्पष्टार्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ॥ इतिश्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोःश्रीनीलकंठस्यकृतौभारतभावदीपेभीष्मपर्वणिजंबूखंडनिर्माणकाव्यायनीस्तवांतर्ग्रंथार्थप्रकाशेचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

ओंनमोब्रह्मादिभ्योब्रह्मविद्यासंप्रदायकर्तृभ्योवंशऋषिभ्योनमोगुरुभ्यः प्रणम्यभगवत्पादान्श्रीधरादींश्चसद्गुरून् संप्रदायानुसारेणगीताव्याख्यांसमारभे ॥ १ ॥ भारतेसर्ववेदार्थोभारतार्थश्चकृत्स्नशः गी
तायामस्तितेनेयंसर्वशास्त्रमयीमता ॥ २ ॥ कर्मोपास्तिज्ञानभेदैःशास्त्रंकांडत्रयात्मकं अन्येतूपासनाकांडान्तृतीयोनातिरिच्यते ॥ ३ ॥ तदेवब्रह्मविद्धित्वंनेदंयत्तदुपासते इतिश्रुत्यैववेद्यस्यह्युपास्यादन्यतेरि
ता ॥ ४ ॥ इयमष्टादशाध्यायीक्रमात्षट्कत्रिकेणहि कर्मोपास्तिज्ञानकांडत्रितयात्मानिगद्यते ॥ ५॥ तत्रयुद्धोद्यमंश्रुत्वौत्सुक्यादपिमंदृत्तांतंबुभुत्सुर्धृतराष्ट्रउवाच धर्मक्षेत्रइति तत्रवेदेतेषांकुरुक्षेत्रंदेवयज
नमासेतिकर्मकांडप्रसिद्धंकुरुक्षेत्रमन्यत् अविमुक्तंवैकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनमित्यविमुक्ताख्यंब्रह्मप्राप्तिस्थानभूतंकुरुक्षेत्रमन्यत् ब्रह्मसदनत्वंचास्यात्रहिजंतोःप्राणेषूत्क्रममाणेषुरुद्र
स्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवतीतिवाक्यशेषेणव्युत्पादितं एतद्व्यावृत्त्यर्थंधर्मक्षेत्रइतिविशेषणं कुरुदेशांतरगतंहिकुरुक्षेत्रंधर्मक्षेत्रमेवनतुतत्ब्रह्मसदनं प्रवर्ग्यकांडेतस्यधर्मक्षेत्रत्वमात्रश्रव

धृतराष्ट्रउवाच ॥ ॥ धर्मक्षेत्रेकुरुक्षेत्रेसमवेतायुयुत्सवः ॥ मामकाःपांडवाश्चैवकिमकुर्वतसंजय ॥ १ ॥ ॥ संजयउवाच ॥ ॥ दृष्ट्वातुपांडवानीकंव्यूढंदुर्यो
धनस्तदा ॥ आचार्यमुपसंगम्यराजावचनमब्रवीत् ॥ २ ॥ पश्यैतांपांडुपुत्राणामाचार्यमहतींचमूम् ॥ व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता ॥ ३ ॥ अत्रशूरामहेष्वा
साभीमार्जुनसमायुधि ॥ युयुधानोविराटश्चद्रुपदश्चमहारथः ॥ ४ ॥ धृष्टकेतुश्चेकितानःकाशिराजश्चवीर्यवान् ॥ पुरुजित्कुंतिभोजश्चशैब्यश्चनरपुंगवः ॥ ५ ॥
युधामन्युश्चविक्रांतउत्तमौजाश्चवीर्यवान् ॥ सौभद्रोद्रौपदेयाश्चसर्वएवमहारथाः ॥ ६ ॥ अस्माकंतुविशिष्टायेतान्निबोधद्विजोत्तम ॥ नायकाममसैन्यस्यसं
ज्ञार्थंतान्ब्रवीमिते ॥ ७ ॥ भवान्भीष्मश्चकर्णश्चकृपश्चसमितिंजयः ॥ अश्वत्थामाविकर्णश्चसौमदत्तिर्जयद्रथः ॥ ८ ॥ अन्येचबहवःशूरामदर्थेत्यक्तजीविताः ॥
नानाशस्त्रप्रहरणाःसर्वेयुद्धविशारदाः ॥ ९ ॥

णात् तत्रसमवेताःमिलिताः युयुत्सवोयोद्धुमिच्छवः पांडवानांपृथग्ग्रहणंतेषुममत्वाभावसूचनार्थं ॥ १ ॥ व्यूढंव्यूहरचनयास्थितं आचार्यंद्रोणं राजादुर्योधनः राजाब्रवीदित्येवसिद्धेवचनपदेनसंक्षिप्तबह्वर्थ
त्वादिगुणवत्त्वंवाक्यस्यसूच्यते ॥ २ ॥ द्रुपदपुत्रेणेति पूर्ववैरसूचनेनक्रोधोद्दीपनार्थंविशेषणं ॥ ३ ॥ महेष्वासामहांतइष्वासाःधनूंषियेषांते युयुधानःसात्यकिः द्रुपदश्चमहारथइत्येकः ॥ ४ ॥ धृष्टकेत्वाद
यःषट् ॥ ५ ॥ युधामन्यूत्तमौजसौसौभद्रोभिमन्युःपंचद्रौपदेयाःप्रतिविंध्यादयश्चेत्यष्टौ चकारात्पांडवाघटोत्कचादयश्चातिप्रसिद्धायाह्याः सर्वेपिमहारथाएव तल्लक्षणंतु एकोदशसहस्राणियोधयेद्यस्तु
धन्विनां शस्त्रशास्त्रप्रवीणश्चसवैप्रोक्तोमहारथः अमितान्योधयेद्यस्तुसंप्रोक्तोतिरथस्तुसः रथस्त्वेकेनयोद्धास्यात्तन्न्यूनोर्द्धरथःस्मृतइति ॥ ६ ॥ विशिष्टाःश्रेष्ठाः निबोधबुध्यस्व भौवादिकस्यपरस्मैपदिनो
बुधेरिदंरूपं संज्ञार्थंअस्मत्पक्षेपिशूराःसंतीतिज्ञापनार्थं परेषुप्राबल्यंदृष्ट्वातवोत्साहभंगोमाभूदित्यर्थः ॥ ७ ॥ विकर्णःस्वभ्राता सौमदत्तिर्भूरिश्रवाः जयद्रथपदस्थानेतथैवचेतिक्वचित्पाठः ॥ ८ ॥ अन्येश
ल्यकृतवर्मप्रभृतयः शस्त्राणिविदारकाणिखड्गादीनिप्रहरणानिकेवलंप्रहारार्थानिगदादीनि नानाविधानियेषांतेनानाशस्त्रप्रहरणाः ॥ ९ ॥

पर्याप्तंपरितआप्तंपरिवेष्टितं पांडवसैन्यंहिसप्ताक्षौहिणीमितत्वादल्पंबहुनैकादशाक्षौहिणीमितेनास्मत्सैन्येनवेष्टयितुंशक्यंनतुतदीयेनास्मदीयमित्यर्थः एवंचपर्याप्तमित्यस्यपारणीयमित्यर्थः ॥ १० ॥ अय
नेषुव्यूहरचनयास्थितेसैन्येप्रवेशमार्गेषुस्वेस्वेस्थानेस्थितायूयंमध्यस्थंभीष्ममेवाभिरक्षंतु अस्यसेनापतेश्चांचल्येसर्वापिसेनाआकुलीभवेत्ततस्थैर्येस्थिराचभवेदतःसएवरक्ष्यइत्यर्थः ॥ ११ ॥ तस्यैवंवदतोदु
र्योधनस्य संजयवाक्यमिदं सिंहनादमितिणमुलंतं तेनविनद्येत्यस्यानुप्रयोगःकषादित्वात् समूलकाषंकषतिस्मदैत्यानित्यादिवत् कुरुवृद्धोभीष्मः प्राग्विराटनगरादौदृष्टप्रभावान्पांडवान्दृष्ट्वाराज्ञोभयंमाभू
दितिशंखंदध्मौ हर्षंयुद्धोत्साहं जनयन् हेत्वर्थेशतृप्रत्ययः हर्षजननार्थमित्यर्थः ॥ १२ ॥ अभ्यहन्यंतअभिहताः कर्मकर्त्तरिप्रयोगः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ व्यवस्थिता

अपर्याप्तंतदस्माकंबलंभीष्माभिरक्षितम् ॥ पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितम् ॥ १० ॥ अयनेषुचसर्वेषुयथाभागमवस्थिताः ॥ भीष्ममेवाभिरक्षंतुभवंतः
सर्वएवहि ॥ ११ ॥ तस्यसंजनयन्हर्षंकुरुवृद्धःपितामहः ॥ सिंहनादंविनद्योच्चैःशंखंदध्मौप्रतापवान् ॥ १२ ॥ ततःशंखाश्चभेर्यश्चपणवानकगोमुखाः ॥ सहसैवा
भ्यहन्यंतसशब्दस्तुमुलोभवत् ॥ १३ ॥ ततःश्वेतैर्हयैर्युक्तेमहतिस्यंदनेस्थितौ ॥ माधवःपांडवश्चैवदिव्यौशंखौप्रदध्मतुः ॥ १४ ॥ पांचजन्यंहृषीकेशोदेवदत्तंध
नंजयः ॥ पौंड्रंदध्मौमहाशंखंभीमकर्मावृकोदरः ॥ १५ ॥ अनंतविजयंराजाकुंतीपुत्रोयुधिष्ठिरः ॥ नकुलःसहदेवश्चसुघोषमणिपुष्पकौ ॥ १६ ॥ काश्यश्चपरमे
ष्वासःशिखंडीचमहारथः ॥ धृष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः ॥ १७ ॥ द्रुपदोद्रौपदेयाश्चसर्वशःपृथिवीपते ॥ सौभद्रश्चमहाबाहुःशंखान्दध्मुःपृथक्पृथ
क् ॥ १८ ॥ सघोषोधार्तराष्ट्राणांहृदयानिव्यदारयत् ॥ नभश्चपृथिवींचैवतुमुलोव्यनुनादयन् ॥ १९ ॥ अथव्यवस्थितान्दृष्ट्वाधार्तराष्ट्रान्कपिध्वजः ॥ प्रवृत्ते
शस्त्रसंपातेधनुरुद्यम्यपांडवः ॥ २० ॥ हृषीकेशंतदावाक्यमिदमाहमहीपते ॥ ॥ अर्जुनउवाच ॥ ॥ सेनयोरुभयोर्मध्येरथंस्थापयमेच्युत ॥ २१ ॥ यावदेतान्नि
रीक्षेहंयोद्धुकामानवस्थितान् ॥ कैर्मयासहयोद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेऽहंयएतेत्रसमागताः ॥ धार्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचिकी
र्षवः ॥ २३ ॥ ॥ संजयउवाच ॥ ॥ एवमुक्तोहृषीकेशोगुडाकेशेनभारत ॥ सेनयोरुभयोर्मध्येस्थापयित्वारथोत्तमम् ॥ २४ ॥

नुभयोद्विग्नतयावैषम्येणावस्थितान् कपिध्वजपांडवपदाभ्यांभीषणध्वजत्वंशौर्यंचप्रदृश्यते ॥ २० ॥ हृषीकेशंसर्वेषामिंद्रियाणांप्रवर्त्तकत्वेनपरचित्ताभिज्ञं वाक्यमेवाहनतुकंचिदर्थमितिद्योतनार्थंवाक्य
पदं वाक्यमेवाह सेनयोरिति ॥ २१ ॥ रथस्थापनप्रयोजनमाह यावदिति कैःसहमयायोद्धव्यंमयासहवाकैर्योद्धव्यमित्युभयत्रसहशब्दसंबंधः केवामांजेतुंयततेमयावाकेजेतव्याइत्यालोचनार्थमित्यर्थः
॥ २२ ॥ योत्स्यमानान् नतुशांतिकामान् यतोदुर्बुद्धेः प्रियंचिकीर्षंतितेनतेषामपितत्तुल्यत्वंसूचितं ॥ २३ ॥ रथोत्तमंस्थापयित्वाउवाचेतिद्वयोःसंबंधः ॥ २४ ॥

महीक्षितांपृथिवीश्वराणां ॥ २५ ॥ पितॄनपितृव्यादीन्भूरिश्रवःप्रभृतीन् पितामहान्भीष्मादीन् मातुलान्शल्यादीन् भ्रातॄनदुर्योधनादीन् पुत्रान्लक्ष्मणादिपुत्रान् सखीन्अश्वत्थामादीन् ॥ २६ ॥ सुहृदःकृतवर्मादीन् ॥ २७ ॥ कृपयास्नेहेन सचस्वजनमितिविशेषणेनप्रदर्श्यते ॥ २८ ॥ सीदंतिमिश्रेष्टानिभवंति रोमहर्षोरोमांचः ॥ २९॥३० ॥ निमित्तानिलोकक्षयकराणिभूमिकंपादीनि ॥ ३१॥३२॥३३॥ स्यालाइतिस्यालशब्दोदंत्यादिः विजामातुरुतवाघास्यालादितिमंत्रवर्णात् स्याड्ढाजानावपनीतिवालाजालाजतेःस्यंशूर्पस्यतेरितियास्कः॥३४॥ हंतुंइच्छापिममनभवतिकिमुत हंतृत्वमित्यर्थः महीकृतेपृथिव्यर्थे ॥३५॥ आततायिनः अग्निर्दोगरदश्चैवशस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैवषडेतेआततायिनः आततायिनमायांतंहन्यादेवाविचारयन् नाततायिवधेदोषोहंतुर्भवतिकश्च

भीष्मद्रोणप्रमुखतःसर्वेषांचमहीक्षिताम् ॥ उवाचपार्थपश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥ तत्रापश्यत्स्थितान्पार्थःपितॄनथपितामहान् ॥ आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥ श्वशुरान्सुहृदश्चैवसेनयोरुभयोरपि ॥ तान्समीक्ष्यसकौंतेयःसर्वान्बंधूनवस्थितान् ॥ २७ ॥ कृपयापरयाविष्टोविषीदन्निदमब्रवीत् ॥ ॥ अर्जुनउवाच ॥ ॥ दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थितम् ॥ २८ ॥ सीदंतिममगात्राणिमुखंचपरिशुष्यति ॥ वेपथुश्चशरीरेमेरोमहर्षश्चजायते ॥ २९ ॥ गांडीवंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते ॥ नचशक्नोम्यवस्थातुंभ्रमतीवचमेमनः ॥ ३० ॥ निमित्तानिचपश्यामिविपरीतानिकेशव ॥ नचश्रेयोनुपश्यामिहत्वास्वजनमाहवे ॥ ३१ ॥ नकांक्षेविजयंकृष्णनचराज्यंसुखानिच ॥ किंनोराज्येनगोविंदकिंभोगैर्जीवितेनवा ॥ ३२ ॥ येषामर्थेकांक्षितंनोराज्यंभोगाःसुखानिच ॥ तइमेऽवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच ॥ ३३ ॥ आचार्याःपितरःपुत्रास्तथैवचपितामहाः ॥ मातुलाःश्वशुराःपौत्राःस्यालाःसंबंधिनस्तथा ॥ ३४ ॥ एतान्नहंतुमिच्छामिघ्नतोपिमधुसूदन ॥ अपित्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते ॥ ३५ ॥ निहत्यधार्तराष्ट्रान्नःकाप्रीतिःस्याज्जनार्दन ॥ पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥ तस्मान्नार्हावयंहंतुंधार्तराष्ट्रान्सबांधवान् ॥ स्वजनंहिकथंहत्वासुखिनःस्याममाधव ॥ ३७ ॥ यद्यप्येतेनपश्यंतिलोभोपहतचेतसः ॥ कुलक्षयकृतंदोषंमित्रद्रोहेचपातकम् ॥ ३८ ॥

नेति यद्यप्येवंतथापिएतान्हत्वाअस्मान्पापमेवआश्रयेत् आततायिवधोहिअर्थशास्त्रविहितः नहिंस्यात्सर्वभूतानीतितुधर्मशास्त्रं तच्चपूर्वस्माच्चबलं यथोक्तंयाज्ञवल्क्येन स्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतः अर्थशास्त्रात्तुबलवद्धर्मशास्त्रमितिस्थितिरिति अस्मान्हत्वाएतान्आततायिनःपापमेवाश्रयेदित्यपरायोजना तथाचएतएवास्मद्धनेनस्थंतुननुवयमेतेषांधनेननंक्ष्यामइतिभावः ॥ ३६ ॥ ३७ ॥ ३८ ॥

ननुआहृतोननिवर्त्तेतयूतादपिरणादपीतिविजितंक्षत्रियस्येतिचयुद्धादनिवृत्तिर्हिसयाचवृत्तिःक्षत्रियस्येष्टातत्कथंयुद्धान्निवृत्तिमिच्छसीत्याशंक्याह कथमिति साहिलोभमूलिकास्मृतिःकुलक्षयदोषविधिनाबाध्यते यथा औदुंबरीस्पृष्ट्वोद्वायेदितिस्पर्शनविधिनाविरुद्धासतीऔदुंबरीसर्ववेष्टयितव्येतिसर्ववेष्टनस्मृतिर्बाध्यते लोभमूलकत्वात्तद्वत् नहिविधिमात्रायत्किंचित्कर्त्तव्यं श्येनादीनामधर्मरूपाणामप्यवश्यानुष्ठेयत्वापत्तेः तस्मात्यत्फलतोनदुष्यतितदेवविहितंधर्मरूपमनुष्ठेयं यथोक्तं फलतोपिचयत्कर्मनानर्थेनानुबध्यते केवलंप्रीतिहेतुत्वात्तद्धर्मइतिकथ्यतइति श्येनादिवत्यापानुबंधित्वात्युद्धंत्याज्यमेवेत्यर्थः ॥ ३९ ॥ प्रणश्यंतिअनुष्ठातॄणांश्रद्धानामभावात् अवशिष्टंबालादिरूपंवंशधर्मलोपाद्धर्मोभिभवति ॥ ४० ॥ दुष्टासुपुत्रार्थंवर्णांतरमुपासीनासु ॥ ४१ ॥ कथंतर्हिजामदग्न्येनरामेणक्षत्रियेषुह

कथंनज्ञेयमस्माभिःपापादस्मान्निवर्त्तितुम् ॥ कुलक्षयकृतंदोषंप्रपश्यद्भिर्जनार्दन ॥ ३९ ॥ कुलक्षयेप्रणश्यंतिकुलधर्माःसनातनाः ॥ धर्मेनष्टेकुलंकृत्स्नमधर्मोभिभवत्युत ॥ ४० ॥ अधर्माभिभवात्कृष्णप्रदुष्यंतिकुलस्त्रियः ॥ स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसंकरः ॥ ४१ ॥ संकरोनरकायैवकुलघ्नानांकुलस्यच ॥ पतंतिपितरोह्येषांलुप्तपिंडोदकक्रियाः ॥ ४२ ॥ दोषैरेतैःकुलघ्नानांवर्णसंकरकारकैः ॥ उत्साद्यंतेजातिधर्माःकुलधर्माश्चशाश्वताः ॥ ४३ ॥ उत्सन्नकुलधर्माणांमनुष्याणांजनार्दन ॥ नरकेनियतंवासोभवतीत्यनुशुश्रुम ॥ ४४ ॥ अहोबतमहत्पापंकर्तुंव्यवसितावयम् ॥ यद्राज्यसुखलोभेनहंतुंस्वजनमुद्यताः ॥ ४५ ॥ यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः ॥ धार्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत् ॥ ४६ ॥ ॥ संजयउवाच ॥ ॥ एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत् ॥ विसृज्यसशरंचापंशोकसंविग्नमानसः ॥ ४७ ॥ ॥ इतिश्रीमहाभारतेश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगोनामप्रथमोऽध्यायः ॥ १ ॥ ॥पर्वणितुपंचविंशोऽध्यायः ॥ २५ ॥ ॥ ९ ॥ ॥ ॥ ॥ ९ ॥

तेषुतत्स्त्रियःपुनःपुनर्ब्राह्मणेभ्यःपुत्रान्जनयामासुरित्युपाख्यायते कथंवाधृतराष्ट्रादीनांअसंकरजत्वमित्याशंक्याह पतंतीति हिशब्दोवैदिकीप्रसिद्धिद्योतयति साहिनशेषोऽग्रेऽन्यजातमस्तीतिश्रुतिः अन्यस्माज्जातंशेषोऽपत्यंनास्तीतिदर्थः अन्योदर्योमनसापिनमंतव्योममायंपुत्रइतियास्कवचनाच्च येयजामहइतिशाखात्येवयंस्मस्तेवयंयजामहइत्यर्थकाद्दृश्यमानस्यपित्रादेःसंशयपस्तत्वादयंममपितेवेतिनिश्चयस्यदुःसाध्यत्वात् मंत्रश्चयोहमस्मिसन्यज्ञे ब्राह्मणेर्थवाद्श्च नचैतद्विद्योब्राह्मणाःस्मोवयमब्राह्मणावेति तस्माद्दीजपतेरेवपिंडादिप्राप्तिर्नतुक्षेत्रपतेरितिलुप्तपिंडोदककियत्वादवश्यंपितॄणांपातोभवतिक्षेत्रजपुत्रस्तितुइहलोकैकवंशस्थापनमात्रपरानतुतेनक्षेत्रपतेःकश्चिदामुष्मिकउपकारोस्ति उदाहृतश्रुतिविरोधात् अयंचसंकरोस्माभिःस्वयंकृतश्चेदवश्यमस्मान्बाधिष्यतएवेतिभावः ॥ ४२ ॥ एतदेवविवृणोतिद्वाभ्यां दोषैरिति ॥ ४३ ॥ ॥ ४४ ॥ ४५ ॥ ४६ ॥ संख्येसंयामे ॥ ४७ ॥ ॥ इतिश्रीनैलकंठीयेभारतभावदीपेभीष्मपर्वप्रकाशेभगवद्गीतासुप्रथमोऽध्यायः ॥ १ ॥ पर्व० ॥ २५ ॥

अर्जुनेयुद्धाद्धुपरतेमत्पुत्रानिष्कंटकंराज्यंप्राप्स्यंतीत्याशावंतंराजानंप्रतिसंजयउवाच तंतथेति तमर्जुनं तथात्वजनंहिकथंहत्वासुखिनःस्याममाधवेत्युक्तप्रकारेण कृपयास्नेहेननुदययापरदुःखप्रहाणे च्छा रूपया तस्याःपरदौर्बल्यनिश्चयोत्तरभाविन्याःअर्जुनेयदिवानोजयेयुरितित्वपराजयमाशंकमानेदुर्भणत्वात् यानेवहत्वानजिजीविषामइतिस्नेहातिशयसूचकंवाक्यशेषविरोधाच्च आविष्टंव्याप्तंविषीदंतं सीदंतिममगात्राणीत्यादिनाउक्तरूपंविषादंप्राप्तुवंतं इदंवक्ष्यमाणंवाक्यंवचनीयंउवाच मधुसूदनइतिदुष्टहंतृत्वादेवार्जुननिमित्तीकृत्यत्वत्पुत्रानपिहतिष्यत्येवेतिवयाजयाशानकार्येतिभावः ॥ १ ॥ अर्जुनमुवोजयनृश्रीभगवानुवाच कुतइति कश्मलंवैक्लव्यं विषमेयुद्धसंकटे अनार्यैर्भीरुभिर्जुष्टंसेवितंनतुत्वादृशैःशूरैःनआर्यैर्जुष्टमितिवा यत्तुआर्यैरजुष्टमितिविषहोदर्शितस्तदर्थैक्येपिपदव्युक्रमदोषाडुपेक्ष्यं अतएवास्वर्ग्यमकीर्त्तिकरंच हेअर्जुनत्वच्छत्रुभाव तवनैतयुक्तमितिभावः ॥२॥ तदेवाह क्लैब्यमिति क्लैब्यंनिर्वीर्यत्वंनचशक्नोम्यवस्थातुमित्युक्तरूपंमागाः नैतत्त्वयिमहादेवप्रतिभटेयुक्तं अतःक्षुद्रंतुच्छं हृदयरुतमेवतवदौर्बल्यंनतुशक्तिसहायाद्यभावरुतं तत्त्यक्त्वाउत्तिष्ठयुद्धाय परंतपशत्रुतापन ॥३॥ननुशत्रवोवास्वज्ञावदुष्टावातापनीयाःननुबांधवाःसाधवश्चेत्यर्जुनउवाच कथमिति मधुसूदनारिसूदने तिसंबोधयन्नतवापिदुष्टानपिशत्रूनेवंतापयतःपूजार्हौंअदुष्टौगुरूंचभीष्मद्रोणौजहीतिवक्तुमयुक्तमितिसूचयतिसमानार्थकमिदंसंबोधनद्वयंवक्तुःशोकेनविक्लवत्वान्नपौनरुक्त्यदोषावहमित्यन्येइषुभिरिति

संजयउवाच॥ ॥तंतथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणम्॥ विषीदंतमिदंवाक्यमुवाचमधुसूदनः॥ १ ॥ ॥श्रीभगवानुवाच॥ ॥कुतस्त्वाकश्मलमिदंविषमेसमुपस्थितम्॥ अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन॥२॥ क्लैब्यंमास्मगमःपार्थनैतत्त्वय्युपपद्यते॥ क्षुद्रंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठपरंतप॥३॥ ॥अर्जुनउवाच॥ कथंभीष्ममहंसंख्येद्रोणंचमधुसूदन॥ इषुभिःप्रतियोत्स्यामिपूजार्हावरिसूदन॥ ४॥ गुरूनहत्वाहिमहानुभावान्श्रेयोभोक्तुंभैक्षमपीहलोके॥ हत्वार्थकामांस्तुगुरूनिहैवभुंजीयभोगान्रुधिरप्रदिग्धान्॥ ५॥ नचैतद्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुः॥ यानेवहत्वानजिजीविषामस्तेवस्थिताःप्रमुखेधार्तराष्ट्राः॥ ६ ॥

ताभ्यांसहवाचापियोद्धुमशक्यंकिमुतबाणैरितिभावः ॥ ४ ॥ ननुयुद्धोद्यतानांगुरूणामपिवधःश्रेयानित्याशंक्याह गुरूनिति यद्यपित्वदुक्तंप्रशस्तमेवतथापिमहानुभावानगुरूनहत्वाभैक्षमेवभोक्तुंश्रेयःप्रशस्ततरं एवंतर्हिगुरूंस्त्यक्त्वादुर्योधनादीनेवदुष्टान्जहीत्याशंक्याह अर्थकामानिति धनार्थिनोगुरवोवध्यंदुर्योधनसाहाय्यंकरिष्यंतितेननतद्वधोपिप्रसक्तएवेत्यर्थः तुशब्दःपक्षांतरोपन्यासार्थः इहैवनतुपरलोके भुंजीयेतिसंप्रश्नेलिङ् गुरूनहत्वाभैक्षंश्रेयःउतहत्वाभोगसंपादनंश्रेयइतिसंप्रश्नेत्वयमेवांत्यपक्षेदूषणमाह रुधिरप्रदिग्धानिति॥५॥ एवंतर्हिभैक्षमेवतवश्रेयइत्याशंक्याह नचैतदिति यद्यप्यक्षचियस्यभैक्षमेवेष्टंतथापि नःअस्माकंक्षत्रियाणांभैक्षभोगयोर्मध्येकतरत्गरीयइतिवयंनविद्मः ननूक्तंयुद्धमेवगरीयइतित्राह यद्वेति यदिवावयंजयेमशत्रूनूयदिवानोस्मान्शत्रव एवजयेयुःइदमपिनविद्मः अंत्यपक्षेपुनर्मरणमप्रार्थितंनैक्षमेववापद्यतइतिभावः ननुमयिसहायेसतितवजयएवनिश्चितइत्यतआह यानेवेति इष्टनाशाज्जयोपिपराजयरूपएवेत्यर्थः यत्तुनिश्चितेपिभैक्षश्रेयस्त्वेपुनर्युद्धंभैक्षयोःकतरत्श्रेयइतिसंशयोनोचितःअतोनःअस्माकंमध्येकतरत्सैन्यंगरीयइतिव्याख्येयमिति तदसत् धर्मसंमूढचेताइतिवाक्यशेषादुक्तसंशयस्यैवोचितत्वात् सैन्यगरीयस्त्वसंशयेनैवजयसंशयेऽन्यथासिद्धेःन्यतरसंशयस्यवैयर्थ्यात् विशेषाध्याहारदोषाच्च ॥ ६ ॥

उक्तसंशयवानेवपृच्छति कार्पण्येति कार्पण्यंदीनत्वं स्वभावःशौर्यंतेजोधृतिर्दाक्ष्यमित्यादिनावक्ष्यमाणलक्षणः शेषंस्पष्टं ॥ ७ ॥ ननुक्षुद्रंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठपरंतपेतियुद्धमेवश्रेयइत्युक्तंकिंपुनःपृच्छसीत्यतआह नहीति बंधुनाशनिमित्तःशोकोराज्यलाभेनस्वर्गाधिपत्यलाभेनवाननिवर्त्तयिष्यतइतियुद्धादन्यंकंचित्निवृत्तिरूपंशमोपायंब्रूहीत्याशयः अंत्रार्जुनविषादव्याजेनब्रह्मविद्याधिकारिविशेषणंभैक्षचर्याइहामुत्रार्थफलभोगविरागश्चदर्शितः ॥ ८ ॥ ९ ॥ तमिति मूढोप्ययममूढवद्वदतीतिप्रहसन्निव इदंवक्ष्यमाणं ॥ १० ॥ अर्जुनस्यदेहनाशेआत्मनाशधीःस्वधर्मेयुद्धेचाधर्मधीरितिमोहद्वयं तच्चायंब्रह्मविद्यासूत्रभूतैर्विंशत्याश्लोकैरपनिनीषन्श्रीभगवानुवाच अशोच्यानन्वशोचस्त्वमिति जीवापेतेवावकिलेदंम्रियतेनजीवोम्रियतइतिश्रुतेर्देहायुपाधिनाशेप्याकाशवन्नाशरहितत्वेनअशोचनीयान्

कार्पण्यदोषोपहतस्वभावःपृच्छामित्वांधर्मसंमूढचेताः॥ यच्छ्रेयःस्यान्निश्चितंब्रूहितन्मेशिष्यस्तेऽहंशाधिमांत्वांप्रपन्नम् ॥७॥ नहिप्रपश्यामिममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणाम्॥ अवाप्यभूमावसपत्नमृद्धंराज्यंसुराणामपिचाधिपत्यम्॥ ८॥ ॥संजयउवाच॥ ॥एवमुक्त्वाहृषीकेशंगुडाकेशःपरंतप॥ नयोत्स्यइतिगोविंदमुक्त्वातूष्णींबभूवह॥ ९॥ तमुवाचहृषीकेशःप्रहसन्निवभारत ॥ सेनयोरुभयोर्मध्येविषीदंतमिदंवचः ॥ १०॥ ॥श्रीभगवानुवाच॥ ॥अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे॥ गतासूनगतासूंश्चनानुशोचंतिपंडिताः॥ ११ ॥

भीष्मादीनन्वशोचःकथमेतेगुरवोमयाहंतव्याःकथंवानैर्विनाहंजीविष्यामीतिशोकंकृतवानसि एवंमूढोपित्वंप्रज्ञावादान्प्रज्ञावतांदेहादन्यमात्मानंजानतांवादान्शब्दान्नूनरकेनियंतवासःपतंतिपितरोश्नेषामित्यादीन्भाषसेपरंतुप्रज्ञावानसि तत्रहेतुः गतासूनिति गतासून्गतप्राणान्देहान्नानुशोचंतिप्रत्युतनिर्हरंत्येव एतेनप्राणएवदेहनतुदेहः तथाचश्रुतिः प्राणोहपिताप्राणोमाताप्राणआचार्यइत्यादिः अतएवसप्राणानेतानवगणयंतंनरंपित्रादिर्हतात्मसिधिक्त्वामितिवदंतिउत्क्रांतप्राणान्दहंतमपिनैवंवदंतीतिलोकवेदप्रसिद्धिः तस्मात्आत्मादेहादन्यः चेतनत्वात् व्यतिरेकेणघटवत् देहोनचेतनः दृश्यत्वात् घटवत् यदिदेहश्चेतनःस्यात्मृतेपित्रचैतन्यमुपलभ्येततस्माद्देहनाशेनात्मनाशंमन्वानोमूर्खएवासीत्यर्थः यत्तुप्रज्ञानांपंडितानांअवादान्वक्तुमयोग्यान्भाषसेइतितार्किकव्याख्यानंतत्अर्हार्थेघञोदुर्लभत्वात्विशेषाध्याहारसापेक्षत्वाच्चोपेक्ष्यं ॥ ११ ॥

ननुदेहादन्योपिदेहनाशेननश्यतांकोशकारइवकोशनाशेनेतित्राह नत्वेवाहमिति त्वमहमिमेचसर्वेअनादयोऽनंताश्चस्मइत्यर्थः जातुकदाचित्अहंनआसंदतिनअपितुआसमेव तथात्वमपिनासीरितिनअपित्वासीरेव इमेजनाधिपाःराजानइत्युपलक्षणंसर्वस्यजंतुजातस्य नासन्नितिनअपित्वासन्नेवेतियोजना अनादित्वादनंताश्चेत्याह नचेति नभविष्यामइतिनैवकिंतुसर्वेभविष्यामएव ननुदेहस्यानात्मत्वेक थंतत्पीडयायंपीड्यतइतिचेत्यक्षवत्तद्भिमानमात्रादितिब्रूमः यदाहियक्षःपरशरीरेविशातितदातत्पीडयादेहपतिर्नबाध्यतेतस्यतदानींदेहाभिमानाभावात्यक्षस्तुबाध्यतेऽभिमानसत्वादितिलोकेप्रसिद्धं किंच प्राचीनकर्मव्यतिरेकेणजीवनंनोपपद्यते कृतहानाकृताभ्यागमप्रसंगात्दृष्टक्षादिष्वपिप्राक्कर्मास्तीत्यनुमेयं स्थावरजीविकाप्राक्कर्मपूर्विकाजीविकात्वात्पाकादिक्रियापूर्वकास्मदादिजीविकावत् अपिचकि यावैचित्र्यात्कार्यवैचित्र्यंदृष्टंघटशरावोदंचनादिषुतद्वदिहापिसुखदुःखादिवैचित्र्यंप्राक्कर्मवैचित्र्यादनुमेयंतथासत्योजातस्यगोवत्सस्यस्तनपानादौप्रवृत्तिर्जैतुमात्रस्यमरणात्रासश्चप्राग्भवीयानुभवजनित संस्कारजन्यौभोजनादिप्रवृत्तिश्चेल्लासादिवदित्यतोस्तिप्राचीनंकर्म अपिचकौलिकशास्त्रप्रसिद्धमेतत् यथादेवदत्तःस्वशरीरेकंटकवेधेनखिद्यतेएवंशत्रुकृतायदिवदत्तप्रतिमायांकंटकेनविद्धायांदेवदत्तो व्यथते तत्रव्यथाहेतुर्नौतरंधातुर्वैषम्यंनापिबाह्यंकंटकवेधादिकिंतुकेवलंप्राक्कर्ममात्रं एवंचबीजांकुरन्यायेनकर्मतज्जन्यसंस्कारपरंपरयाऽनादिःसंसारइतिनदेहनाशादात्मनाशोस्तीतिनभीष्मादयःशोचनी

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः॥ नचैवनभविष्यामःसर्वेवयमतःपरम्॥ १२॥
देहिनोऽस्मिन्यथादेहेकौमारंयौवनंजरा॥ तथादेहांतरप्राप्तिर्धीरस्तत्रनमुह्यति॥ १३॥

याः अत्रपूर्वस्मिन्श्लोकेआत्मनोदेहादन्यत्वमुक्तंगतासून्देहानितिविशेषणेन अत्रसूक्ष्मशरीरविशिष्टस्यात्मनोव्यवहारदृष्ट्यानित्यत्वंसाधितमितिभेदः ॥ १२ ॥ यद्यप्येवंतथापीष्टदेहवियोगजःशोको भवत्येवेत्याशंक्याह देहिनइति देहौस्थूलसूक्ष्मौविद्येतेअस्यसदेहीचिदात्मातस्ययथास्मिन्स्थूलशरीरेकौमाराद्यवस्थासुदेहभेदेपिएकएवाहंबालआसमिदानींदद्धोस्मीत्यभेदप्रत्यभिज्ञानादैक्यंबालादि शरीरेभ्योन्यत्वंच व्याद्यत्तेभ्योनुद्यत्तंभिन्नंकुसुमेभ्यःसूत्रमिवेतिन्यायात् एवंदेहांतरप्राप्तिरपिस्थूलाच्छरीरादन्येपांलिंगशरीराणांसूक्ष्माणांस्थूलशरीरानुकारिणांप्राप्तिः अयमर्थः यथाएकमपिस्थूलंश रीरंकौमाराद्यवस्थाभेदादनेकरूपंएवंनित्यमपिलिंगशरीरंप्राणिकर्मभेदात्सुरनरतिर्यगाद्यवस्थाभेदादनेकंभवति ततश्चोक्तन्यायेनस्थूलादिवत्सूक्ष्मादपिशरीरादात्माविविक्तएव एवंचशोकादिधर्मैर्णोलि गादपिविभिन्नस्यतवइष्टवियोगजःशोकोपिनयुक्तः अतएवतत्रतस्मिन्विषयेधीरोनमुह्यति आभिमानिकौशोकमोहौदेहद्वयाभिमानत्यागाद्धीरंनबाधेतेअतस्त्वमपिधीरोभवेतिभावः पूर्वश्लोकयोर्गतासू नितिवयमितिचबहुवचनंउपाधिभेदाभिप्रायं अत्रनुदेहिनइत्येकवचनंउपधेयचिदात्मैक्याभिप्रायमितिज्ञेयं तथाचश्रुतिरेकस्यात्मनऔपाधिकंभेदमाह यथाह्ययंज्योतिरात्माविवस्वानपोभिन्नाबहुधै कोनुगच्छन् उपाधिनाक्रियतेभेदरूपोदेवःक्षेत्रेष्वेवमजोयमात्मेति क्षेत्रेषुवक्ष्यमाणलक्षणेषुस्थूलसूक्ष्मदेहद्वयात्मकेषु एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मेतिच एकत्वाच्चविभुत्वमप्यस्यसिद्धं तेनदेहादीनामनित्यानामविभूनांचपराभिमतमात्मत्वंप्रत्याख्यातंवेदितव्यं ॥ १३ ॥ ॥ २८ ॥

ननुआत्मनोलिंगशरीरादन्यत्वेप्यहंदुःखीत्याद्यनुभवाद्दुःखादिधर्माश्चयत्वंदुर्वारं ततश्चभीष्मादिबंधुवर्गनाशेसतिदुःखसंबंधोभवत्येवेत्याशंक्याह मात्रास्पर्शाइति मीयंतेविषयाआभिस्तामात्राइंद्रियवृत्त यः यद्वा दशप्रज्ञामात्राःवागादयःदशभूतमात्राःनामादयःकौपीतकिप्रसिद्धाइंद्रियविषयरूपापाह्याः तासांस्पर्शाःपरस्परंविषयविषयिभावेनसंबंधाइतिव्याख्येयं यद्वा मात्राप्रमात्रासहस्पर्शाःविषयेंद्रि यसंबंधाः स्पर्शशब्दस्यतद्वाचित्वंस्पर्शान्कृत्वावहिर्बाह्यानित्यचदृष्टं तत्रस्पर्शपदेनतद्वतोर्विषयेंद्रिययोरभिलाभः तेनप्रमातुःप्रमाणद्वाराप्रमेयेणसहसंबंधाःसर्वेशीतोष्णादिवदागमापायिनउत्पत्तिविनाश शीलाअतएवानित्याश्चतद्वदेवसुखदुःखदाश्च अतस्तान्तितिक्षस्वसहस्व हेकौंतेय भारतेत्युत्तमवंश्यत्वेनधीरत्वमस्यसूचयति प्रमातृत्वादिरनर्थोहिसुप्तिसमाधिप्रहावेशादिष्वंभावाज्जायत्स्वमादौभावा च्चकादाचित्कतयाआत्मनिप्रतीयमानोपिरज्जूरगादिवन्मिथ्याभूतःसन्नतद्धर्मत्वंभजते यद्धियत्राभेदेनकदाचिद्भातिकदाचिन्नतत्तत्राध्यस्तंरज्ज्वामिवसर्पः प्रमात्रादिश्चप्रतीचिप्रत्यगभेदेनकदाचिद्भातिअतो मिथ्येतिनिश्चितं तेनप्रतीचिप्रमातृसंबंधएवनास्ति सत्यमिथ्यावस्तुनोर्वास्तवसंबंधायोगात् प्रमातृधर्माणांदुःखादीनांतुप्रतीचिसंबंधोदूरापेतएव कथंतर्ह्यात्मनिदुःखित्वप्रत्ययः तत्तदुपाधितादात्म्याद्यासा

मात्रास्पर्शास्तुकौंतेयशीतोष्णसुखदुःखदाः॥ आगमापायिनोनित्यास्तांस्तितिक्षस्वभारत
॥ १४॥ यंहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ॥ समदुःखसुखंधीरंसोऽमृतत्वायकल्पते॥ १५॥

दितिब्रूमः अतएवजायतिदृष्टंदुःखंत्वमेनानुवर्त्तते त्वमदृष्टंवाजायतिनदृश्यते तथाचश्रुतिः सयत्तत्रपश्यतिपुण्यंचपापंचानन्वागतस्तेनभवत्यसंगोह्ययंपुरुषइति कामःसंकल्पोविचिकित्सेत्यादिश्रुतिरेतत्सर्वं मनएवेतिअभेदनिर्देशात्कामादिसर्वविकारोपादानत्वंमनसएवाह तस्मात्त्वमइवात्मनिदुःखित्वप्रतीतिर्भ्रांतिरेवेतीष्टवियोगजनितांतांतितिक्षस्वेतिभावः॥ १४॥ तितिक्षाफलंप्रत्यक्षमेवेत्याह यंहीति एतेमा त्रास्पर्शाःप्राक्त्व्याख्यातरीत्यात्रिविधाअपियंजायतित्वमेःसंप्रज्ञातसमाधौवानव्यथयंतित्वास्थान्मप्रच्यावयंति पुरुषंपूर्षुअष्टासुवसतीतिपुरुषस्तं पुरश्च कर्मेंद्रियाणिखलुपंचतथापराणिज्ञानेंद्रियाणि मनआदिचतुष्टयंच प्राणादिपंचकमथोवियदादिकंचकामश्चकर्मचतमःपुनरष्टमीपूरितिप्रसिद्धाः यद्वास्थूलसूक्ष्मोपाधिमध्येएवइतरासामंतर्भावादत्रपूरितिनमएवपाठः तेनकारणोपाधेरप्यात्मनोविवि क्तत्वंदर्शितं पुरुषर्षभेतित्वमप्येतदनुज्ञावितुंयोग्योसिसर्वपुरुषश्रेष्ठत्वादितिसूचयति उपाधित्रयत्यागादेवसमेदुःखसुखेयस्यतं नहिसमाधिस्थस्यसुखायदुःखायवाशीतोष्णस्पर्शौभवतइतियुक्तमस्यसमदुः खसुखत्वं धीरंध्यायिनंयोगिनंनव्यथयंतिसोऽमृतत्वायमोक्षायकल्पतेयोग्योभवति ॥ १५॥

ननुसुप्तिसमाध्यादौत्यक्तोपाधेरात्मनःसमदुःखसुखत्वेपिसोपाधिकदशायांतमायःपिंडस्यदंगृह्यत्वमिवतस्यदुःखित्वंदुर्वारं उपाधिश्चमूलप्रकृतेर्व्यापिकायामात्माऽरूपइतितत्सत्त्वेतुनिर्मूलोच्छेदमर्हत्यतःसो
मृतत्वायकल्पतइत्यनुपपन्नमित्याशंक्याह नासतइति प्रमात्रादेरागमापायित्वेनकादाचित्कत्वात्रज्जूरगादिवत्असतःभावःसत्ताकालत्रयेपिनास्ति अयमर्थः प्रमात्रादिर्मूलाज्ञानेनचिदात्मनिकल्पितः मू
लाज्ञानस्यचात्मज्ञानेननिवृत्तौकारणाभावान्नपुनःप्रमात्राद्युद्भवोस्तीतिनिश्चित्यहमनृतंवंज्ञानात्सिद्धातीति नन्वप्रतीतिमात्रात्मात्रादेर्मिथ्यात्वोपगमेआत्मनोपिसुप्त्यादावप्रतीयमानत्वाविशेषान्मिथ्यात्व
मस्तुउभयोर्वासत्यत्वमस्तुइत्याशंक्याह नाभावोविद्यतेसतइति स्वस्तुनःअभावोऽसत्त्वंकदाचिदपिनविद्यते सुषुप्त्यादावप्यनुभूतयोःसुखाज्ञानयोः सुखमहमस्वाप्संनकिंचिदवेदिषमित्युत्थानेपरामर्शाद
र्शनात् तदनुभवमंतरेणतयोःपरामर्शासंभवात् अतःसतोऽसत्त्वंनास्ति श्रुतिरपिसुप्तिकैवल्ययोःप्रमात्राद्यभावंदर्शयतीत्यर्थंचाह यद्वैतन्नपश्यतिपश्यन्वैतन्नपश्यतिनहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविना
शित्वान्नतुतद्द्वितीयमस्तितोन्यद्विभक्तंयत्पश्येदिति यदिप्रमात्रादिःसत्यस्तर्हिसतोर्थस्यसुषुप्त्यादावदर्शनंसान्निध्याभावाद्वाद्रष्टुर्दृग्लोपाद्वावक्तव्यं नाद्यः आत्मनिदृष्टनष्टस्वभावस्याम्यत्रसद्भावकल्पना

नासतोविद्यतेभावोनाभावोविद्यतेसतः॥ उभयोरपिदृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिः॥ १६॥

योगात् नांत्यः उदाहृतयाश्रुत्यैवतन्निषेधात् तस्मादुभयोरपिसत्यत्वेनमिथ्यात्वेनवासाम्यंदुर्वचं ननुसतआकाशादेःक्वचिदपिदेशेकालेचाभावोयद्यपिनास्तितथापिसतएवपरमाणोर्देशांतरेऽभावोस्तिप्रा
गसतोपिघटादेर्भावश्चदृष्टःतत्कथमुच्यतेनासतोविद्यतेभावोनाभावोविद्यतेसतइत्याशंक्यविद्वदनुभवेननिरस्यति उभयोरपीति अंतोयाथात्म्यं यथात्मनोनाःकुंभरज्जूरगादयोनित्यत्वानित्यत्वसत्यत्वासत्य
त्वादिधर्मोपेततयानिश्चिताअपिप्रबोधेनबाध्यंतेतद्ज्ञापद्दृष्टाअपितेतत्त्वज्ञानेनबाध्यंते ननुज्ञापद्वासनावशात्तत्त्वमगतनभआदौनित्यत्वादिनिश्चयोभमइतिचेत् अनादिकालप्रवृत्तप्राग्भवीयसंस्कारवशा
त्जाग्रन्नभआदावपिसभमएवेतितुल्यं ननुस्वरूपसदेवरजतादिकंशुक्त्यादावध्यस्यतेनत्वसत्शशशृंगादिकं गगनादिकंतुत्वद्वीत्यास्वरूपेणासदपिकथमात्मन्यध्यस्यतइतिचेन्न अध्यासेहिपूर्वानुभवमात्र
मपेक्षतेनत्वनुभूतस्यस्वरूपेणसत्त्वमपि दर्पणप्रतिबिंबितेगगनेपिनैल्याध्यासदर्शनात् नचगगनेनैल्यंस्वरूपेणसत्यमस्ति अथचान्यत्राध्यस्यते तस्मात्भमपरंपरायाःसंभवात् स्वमद्दृष्टिरिवास्माभिरदृष्ट
मपिसदसतोर्याथात्म्यंप्रबुद्धैर्द्रष्टुंशक्यमेव तथाचश्रुतयः नेहनानास्तिकिंचन अस्तीत्येवोपलब्धव्यः अतोन्यदार्त्तंमित्याद्याःअनात्मनोऽसत्त्वंचात्मनश्चसत्त्वंप्रतिपादयंति एवंसतोज्ञानेनासतोबाधात्कैव
ल्यंसिद्धातीतिभावः॥ १६ ॥

यस्याभावोनास्तितस्यसतःसत्त्वेकिंमानमित्याशंक्याह अविनाशीति तच्छब्देनप्रकृतंसत्परामृश्यते येनसताइदंसर्वंवियदादितंव्याप्तं घटःसन्पटःसन्तिसर्वस्यसदंशेदानुभवात् यथाघटोमृत्शरावो
मृदितिघटादीनांमृदंशेदानुभवान्मृदुपादानकत्वंतद्वत्सर्वस्यापिसदुपादानकत्वंबोध्यं ननुमृद्वत्सदपिकिंविकारवद्भवतीत्याशंक्याह अविनाशीति तत्सत्अविनाशिविद्धि अयमर्थः पूर्वावस्थापरित्यागेत्र
विनाशः मृद्भिंडाकारतांत्यक्त्वाघटीभवतिअतःसाविनाशशीला विकारधाराश्रयत्वात् ब्रह्मतुनतथा किंतर्हिरज्जुवत्स्वयमविनश्यदेवकार्याकारंभवति स्वकीयेचसत्तास्फुरणेकार्येपैयति अतोऽविनाशि
तथाचश्रुतयः अजायमानोबहुधाविजायते जातएवनजायतेकोन्वेनंजनयेत्पुनः अजायमानोजन्माख्यंविकारमलभमानोपिविजायतेवियदादिरूपेणाविर्भवति तथालोकदृष्ट्याजातोघटादिःपरमार्थ
दृष्ट्यानजायते परिणाम्युपादानस्याभावात् मृदादेस्तुस्वाममृदादिवत्तुच्छत्वात् अतएनंघटादिकोनुजनयेन्नकोपि कुतस्तर्हिभासतइतिचेत्रज्जूरगादिवदितिदत्तोत्तरमेतत् तथाप्राणावैसत्यंतेषामेषसत्यं त
स्यभासासर्वमिदंविभातीति सतःसत्यत्वेनप्राणोपलक्षितस्यप्रपंचस्यसत्यत्वंसतोभानमेवप्रपंचस्यभानमिति तथाचप्रपंचगतेसत्तास्फूर्तीसतःसत्त्वेप्रमाणमित्यर्थः श्रुतिश्चअन्नेनसोम्यशुंगेनापोमूलमन्विच्छ
अद्भिःसोम्यशुंगेनतेजोमूलमन्विच्छतेजसासोम्यशुंगेनसन्मूलमन्विच्छसन्मूलाःसोम्येमाःप्रजाःसदायतनाःसत्प्रतिष्ठाइतिसतोजगदुपादानत्वंकार्यालिंगेनद्रढयति सतोऽविनाशित्वंचविनाशहेत्वभावादित्या

अविनाशितुतद्विद्धियेनसर्वमिदंततं॥ विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति॥ १७॥
अंतवंतइमेदेहानित्यस्योक्ताःशरीरिणः॥ अनाशिनोप्रमेयस्यतस्माद्युद्ध्यस्वभारत॥ १८॥

ह विनाशमिति नव्येतिनापक्षीयतइत्यव्ययं एतेनसर्वविकारशून्यस्यविनाशोनास्तीत्यर्थः अपक्षयोहिजन्मादिविकारवतएवभवतीतिसएवात्रसर्वविकारोपलक्षणतयाबोध्यः नकश्चिदित्यनेनतदन्यस्य
विनाशहेतोरभावोदर्शितः द्वितीयाद्वैभयंभवतीतिश्रुतेः॥ १७॥ एवंसतआत्मनोनित्यत्वंमसतोदेहादेरनित्यत्वंचोक्तमुपसंहरन्नेनंयुद्धाभिमुखंकरोति अंतवंतइति यद्यपिनासतोविद्यतेभावइत्यसतांदेहानां
कालत्रयेपिसत्त्वंनास्तीतिपरमार्थदृष्ट्योक्तंतथापितांदृष्टिमप्रतिपद्यमानस्यनरकादिभयमनुरुध्यमानस्यव्यवहाराभिप्रायेणनित्यानित्यविभागमभिप्रेत्यदेहानामंतवत्त्वमुच्यतइतिनदोषः नित्यत्वंकालाप
रिच्छेद्यत्वंतच्चव्यवहारेनभसोप्यस्तीत्यतउक्तमनाशिनइति नाशःअदर्शनंतद्वान्हिआकाशः नभआत्मनिलीयतइतिस्मृतेः अयंतुनतथेत्यनाशी सर्वदैवप्रकाशमानइत्यर्थः एतदपिनघटादिवद्दृश्यत्वेनेत्याह
अप्रमेयस्येति तथाचश्रुतिरात्मनोऽप्रमेयत्वमाह एतदप्रमयंध्रुवमिति अप्रमयमित्यस्याप्रमेयमित्यर्थः एतच्चात्मनिप्रमाणाप्रसराज्ज्ञेयं तथाचश्रुतिः येनेदंसर्वंविजानातितंकेनविजानीयाद्विज्ञातारमरेकेनवि
जानीयादिति प्रसिद्धिस्त्वस्यप्रत्यगात्मत्वादेव यत्साक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरइतिश्रुतेः उक्तंच प्रमाणमप्रमाणंचप्रमाभासास्तथैवच. यत्प्रसादात्प्रसिद्धंतितदसंभावनाकुतइति तस्माद्युद्धस्वभारतभी
ष्मादिदेहानांमिथ्यात्वादनित्यत्वाच्चस्वयमेवनष्टप्रायतयाहननान्निवृत्त्यात्वयास्वधर्मोननाशनीयइतिभावः॥ १८॥

ननुनासतोविद्यतेभावइतिन्यायेनासतोमात्रादेर्मिथ्यात्वेननिःस्वरूपत्वात्कर्तृत्वंनसंभवति अतःसतएवकर्तृत्वंबंधमोक्षभाक्त्वंचवाच्यं अन्यथांतःकरणेबंधआत्मनश्चमोक्षइतियोर्वैयधिकरण्यंस्यात्तत थायेनसर्वमिदंततमितिसतोदेहाद्युपादानत्वंचोक्तं तथाचहननक्रियांप्रत्येकस्यैवकर्तृत्वंकर्मत्वंचापततिततश्चविरुद्धं स्वात्मनिस्वव्यापारायोगात् नहिवह्निर्वह्निंदहतीतियुक्तमित्याशंक्याह यएनमिति यश्चना किंकादिरेनमात्मानंहंतारंहननक्रियायाःकर्त्तारंमन्यते यश्चचार्वाकादिरेनंहतंहननक्रियायाःकर्मीभूतंमन्यते तावुभावपिनजानीतः आत्मतत्त्वमितिशेषः यस्मान्नायंहंतिनहन्यते नहियःकर्त्तासआत्माना पिदेहआत्मा तयोःप्रागेवानात्मत्वावधारणात् अयंभावः यथाधःपिंडेवह्निसंबंधादेवदग्धृत्वंननुस्वतः एवंमात्राद्युदयसमनियतंकर्तृत्वंमात्रादिधर्मएवनात्मनः आत्मनिनुकर्तृत्वप्रतीतिर्मात्रादिसंबंधादेव अतोमात्रादिविशिष्टस्यैवबंधोनकेवलस्य मोक्षश्चमात्रादिवियोगएवेतिनबंधमोक्षयोर्वैयधिकरण्यं नचमात्रादेर्निःस्वरूपत्वमस्तिसत्त्वासत्त्वाभ्यामनिर्वचनीयस्यव्यवहारयोग्यस्याब्रह्मज्ञानैकबाध्यस्यत्वम

यएनंवेत्तिहंतारंयश्चैनंमन्यतेहतम्॥उभौतौनविजानीतोनायंहंतिनहन्यते॥ १९॥

मायागंधर्वनगरादितुल्यस्यतत्त्वरूपस्याभ्युपगमात् तस्मान्नकर्तृत्वमात्मधर्मः यथोक्तं आत्माकर्त्रादिरूपश्चेन्मोक्षांक्षीस्तर्हिमुक्ततां नहित्वभावोभावानांव्यावर्त्तेतेष्णवद्रवेरिति किंच कर्तृत्वंरागद्वेषादि विकारवतएवसंभवतिदुःखीत्यात्मनोनुभूयमानंसाक्षित्वंबाध्येत यथोक्तं नर्त्तेस्याद्विक्रियांदुःखीसाक्षिताकाविकारिणः धीविक्रियासहस्राणांसाक्ष्यतोहमविक्रियइति नचसतोदेहाद्युपादानत्वेनह ननक्रियाकर्मत्वंसंभवति विवर्त्तवादाभ्युपगमात् नह्यध्यस्तस्यधर्मैरधिष्ठानेविकारोदृश्यते यथोक्तंभाष्ये यत्रयद्ध्यस्तंसत्तत्कृतेनगुणेनदोषेणवाऽणुमात्रेणापिनसंबध्यतइति विवर्तंचैतद्द्वैः नहिभूमिरूपरव तीमृगतृट्जलवाह्निर्नीसरितमुद्वहति मृगवारिपूरपरिपूरवतीननदीतथोवरभुवंस्पृशतीति एतेनकर्तृत्वकर्मत्वयोरनात्मधर्मत्वादनात्मनश्चानेकरूपत्वादेकत्रात्मनिनदुभयविरोधोद्भावनमपिनिरस्तंवेदितव्यं एवं चार्वाकतार्किकाभिमतोदेहात्मकर्त्रात्मवादी हंतायेन्मन्यतेहंतुंहतश्चेन्मन्यतेहतं उभौतौनविजानीतोनायंहंतिनहन्यतइतिकाठकोक्तेनमंत्रेणपूर्वार्धेपाठभेदात्पठितेनपरिहर्त्तव्यो वेदितव्यौ ॥ १९ ॥

॥ ३० ॥

नायंहंतिनहन्यतइत्युक्तंतन्नहन्यतइत्येतदुपपादयतितत्रस्थेनैवद्वितीयेनमंत्रेण नजायतइति अयंआत्माकदाचित्नजायतेअभिनवोनोत्पद्यते नवाम्रियतेनिरन्वयोननश्यति नार्किकाभिमतघटवत् तत्रकमे णहेतुद्वयं अजोनित्यइति अजत्वान्नजायते नित्यत्वान्नवाम्रियतइत्यर्थः अस्तुतर्हिक्षणिकविज्ञानधारारूपः तस्याविज्ञानवादिभिरजत्वनित्यत्वाभ्युपगमादित्याशंक्याह भूत्वाभवितावानभूयइति अय मित्यनुवर्तते अयंभूत्वाभूयोभवितान भूयोऽसकृत्भूत्वाभवितेतिभवनक्रियाद्वयस्यकत्वाप्रत्ययोक्तंसमानकर्तृत्वंधरैक्याभिप्रायेण भूत्वैवभवितानतुभूत्वास्थित्वाविनश्यति तार्किकाणांहिविज्ञानमुत्पत्ति स्थितिनाशक्षणव्यापित्वाक्षिणावस्थायि विज्ञानवादिनातुपूर्वस्यनाशक्षणएवोत्तरस्योत्पत्तिक्षणःसएवतस्यस्थितिक्षणश्चेतिक्षणिकत्वाद्विज्ञानानांभवनक्रियाद्वयस्याव्यवधानाद्भूत्वाभवितेत्युक्तं तादृ शोप्ययंनयतःशाश्वतःशश्वदेकरूपःयोहंबाल्येपितरावन्वभूवंसोहंस्थाविरेप्रणम्ननुभवामीतिबाल्यस्थाविरयोरालैक्यप्रत्यभिज्ञानात् नचसादृश्यात्प्रत्यभिज्ञानं सादृश्यंहीतुःस्थिरस्याभावात् यद्वाजन्मम

नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभवितावानभूयः॥अजोनित्यःशाश्वतोयंपुराणोनहन्यतेहन्यमानेशरीरे॥ २०॥

रणहीनोपिधर्मांतरविशिष्टःपूर्वंभूत्वापुनर्धर्मांतरविशिष्टोभवितेत्यपिन भूत्वैवभवितानत्वभूत्वेतियोजना आर्हनाहिशरीरपरिमाणमात्मानमभ्युपगच्छंतोनित्यस्यैवात्मनःक्रमेणव्युत्क्रमेणवामशकमनुज मतंगजशरीरप्राप्तौपरिमाणभेदंमन्यमानाभूतस्यैवात्मनोविशेषणीभूतपरिमाणभवनादौपचारिकंभवनमभ्युपगच्छंतिनदपिन शाश्वतत्वादेवउपचयापचयवतोमध्यमपरिमाणस्यवस्तुनोनित्यत्वायोगात् अनेनैवसुखदुःखादिधर्मांतरोत्पत्त्यात्मनोभाक्तंभूत्वाभवनंप्रत्याख्येयं नहिदुःखादिर्धर्मिणःस्वनाशमंतरेणात्यंतिकदुःखोच्छेदःसंभवति घटादौयावद्रूपनाशादर्शनात् नन्वजत्वंनित्यत्वंशाश्वतत्वंचाकाशे प्यस्तिअतआह पुराणइति पुराविवयदादिस्रष्टेःप्रागपिनवएव एतेनअपक्षयादिधर्मराहित्यान्मुख्यमजत्वादिकंआत्मनएवविवयदादेस्त्वमुख्यंतदितिदर्शितं अतएवशरीरेहन्यमानेनहन्यते भाष्येतुवाशब्दश्चा र्थेनजायतेम्रियतेश्चेत्यर्थः तत्रोपपत्तिः अयंनभूत्वाअनुत्पद्यनभवितापटादिवदतोनजायते अथवानजःपूर्वान्वयित्वंनजायतेनवाम्रियतइति यतोभूत्वाअभवितापटवद्विनाशीनअतोनम्रियतइति शाश्व तःपुराणइत्येताभ्यामुपचयापचयौनिषिध्येतेइतिनहन्यतेनविपरिणम्यतइतिचव्याख्यातं केचिदेवमाहुः नजायतेम्रियतइतिप्रतिज्ञा कदाचिदित्यादिनातस्याउपपादनं अजइत्यादिरुपसंहारइति ॥२०॥

नायंहंतीत्येतदुपपादयति वेदेति विनष्टुंअदर्शनंगंतुंशीलमस्येतिविनाशिरजूरगतुल्यमुपाधित्रयंस्थूलसूक्ष्मकारणशरीराख्यंततोन्यंअविनाशिनं अतएवनित्यंनाशहीनं तत्रहेतुः अजं जन्मवान्हिअनित्यः अयंतुअजत्वान्नित्यश्चेत्यर्थः ननुविनाशिनःस्वकार्योपेक्षयाअन्यत्वमजत्वंनित्यत्वंचसांख्याग्निमतेप्रधानेतार्किकाग्निमतेनभसिचास्ति अतउक्तंअव्ययमिति नन्येतिपूर्वावस्थांत्यजतीत्यव्ययमपरिणामिप्रधानंतुचलंगुणदत्तमितिन्यायेनगुणसाम्यावस्थायामपिपरिणममाणमेवसर्वदास्तीतितेषामभ्युपगमात् आकाशस्यापितस्माद्वाएतस्मादात्मनआकाशःसंभूतइतिउत्पत्तिश्रवणादजत्वाभावादेवनाव्ययत्वंतादृशंआत्मानंयोवेदअपरोक्षीकरोतिसपुमान्कथंकेनप्रकारेणकमन्यंघातयतिहननक्रियायांप्रवर्त्तयति कंवाहंति नकेनचित्प्रकारेणकमपिघातयतिनवाहंतीत्यर्थः द्वैताभावात् तथाहि श्रुतिर्विद्यावस्थायांसर्वकारकव्यापारंनिषेधति यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादि अविद्यावस्थायामेवचसर्वकारकव्यवहारंदर्शयति यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादि एतेनसर्वकारकोपमर्दिन्याविद्यायाःसर्वकारकसापेक्षैःकर्मभिःसहसमुच्चयोनिरस्तः परस्परविरुद्धस्वभावत्वेनशीतोष्णयोरिवद्वयोरेककार्यकारित्वस्यरथाश्वन्यायेनासंभवादित्यन्यत्रविस्तरः मादृशानांज्ञानिनांव्युत्था

वेदाविनाशिनंनित्यंयएनमजमव्ययम् ॥ कथंसपुरुषःपार्थकंघातयतिहंतिकम् ॥ २१ ॥ वासांसिजीर्णा
नियथाविहायनवानिगृह्णातिनरोपराणि ॥ तथाशरीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही
॥ २२ ॥ नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः ॥ नचैनंक्लेदयंत्यापोनशोषयतिमारुतः ॥ २३ ॥

नकालेअविद्यालेशानुवृत्त्याघातयितृत्वादेःप्रसक्तावपिविद्ययातस्याबाधितत्वादागामिकर्मणामश्लेषाच्चनदोषः तथाचवक्ष्यते हत्वापिसइमाँल्लोकान्नहंतिननिबध्यतेइति ॥ २१ ॥ननुब्राह्मणोयंजेतजातपुत्रः कृष्णकेशोग्नीनादधीतेतिआत्मानंवयोवर्णादिविशेषणवंतमेवाधिकृत्यकर्मविधयःप्रवर्त्ततेतेननीलादुत्पलमिवदेहादन्यआत्मावधारयितुंनशक्यतइत्याशंक्याह वासांसीति दंडीप्रैषानन्वाहेतिदंडस्यविशेषणत्वेपिनप्रैषानुवक्तृस्वरूपांतर्गतत्वं एवंब्राह्मणत्वादेरपिनस्वर्गकामस्वरूपांतर्गतत्वमितिवस्त्रदेवदत्तयोरिवजडाजडयोर्देहात्मनोरत्यंतविलक्षणत्वमस्तीतिवस्त्रनाशेनदेवदत्तनाशंमन्वानस्येवतवदेहनाशादात्मनाशंमन्वानस्यात्यंतमौढ्यंस्पष्टमितिभावः स्पष्टार्थश्चश्लोकः ॥ २२ ॥ कीदृशोसौदेहीत्यतआह नैनमिति एनंशस्त्राणिनछिंदंतिनद्वेधाकुर्वंति अस्थूलत्वात् तर्हिपार्थिवपरमाणुवत्पाकजरूपाद्याश्रयोभविष्यतिइत्याशंक्याह नैनंदहतिपावकइति अनणुत्वात् आपश्चैनंनक्लेदयंति अस्पर्शत्वात् स्पर्शवद्द्रव्यमद्भिरार्द्रीकर्त्तव्यंनत्वस्पर्शी नशोषयतिमारुतः अश्लेहत्वात् एतेनअदीर्घमस्थूलमननुअशब्दमस्पर्शमरूपमव्ययंतथाऽरसंनित्यमगंधवच्चयदितिश्रुतिप्रसिद्धानामदीर्घत्वाशब्दत्वादीनामपिसंग्रहोज्ञेयः ॥ २३ ॥

कुतोहेतोरस्यशस्त्रादीनिच्छेदादीन्नकुर्वंतीत्याशंक्यतस्यच्छेदाद्ययोग्यत्वादित्याह अच्छेद्योयमिति अत्राच्छेद्यत्वादौपूर्वोक्तान्येवअस्थूलत्वादीनिकारणानिज्ञेयानि एवमच्छेद्यत्वादिनास्थूलादीनभावरूपानगुणानुक्त्वाभावरूपानपिगुणानाह नित्यइति सर्वैर्विशेषणैरखंडैकरसस्यैववस्तुनोलक्ष्यत्वात्नित्यत्वादिभिरुत्पाद्यत्वादिकंनिराक्रियते यतोनित्यःअतोघटवदनुत्पाद्यःयतःसर्वगतःअतोयांमवदप्राप्यः यतःस्थाणुःपूर्वरूपापरित्यागेनस्थिरस्वभावःअतःक्षीरादिवदविकार्यः अचलःयथादर्पणःस्वतःस्वाच्छ्यादप्रच्युतोपिमलरूपेणावरणेनस्वाच्छ्यात्यच्याव्यते एवंस्वयंस्थाणुरपिअन्यसंयोगाच्चांचल्यमश्नुवीतसचदोषापकर्षणलक्षणंसंस्कारमपेक्षते अयंतुअचलत्वान्नतथा एवंचउत्पत्त्यादिविकृतिसंस्कृतिरूपंचतुर्विधंक्रियाफलमात्मनिनसंभवतीत्युक्तं तत्रहेतुः सनातनइति सनाइत्यव्ययंनैरंतर्ये तच्चदेशतःकालतोवस्तुतश्चपरिच्छेदराहित्यं परमतेपरमाणूनांकालतःपरिच्छेदाभावेपिदेशतःपरिच्छेदोस्ति आकाशस्यतदुभयाभावेपिवस्तुतःपरिच्छेदोस्ति सोपित्रिविधःसजातीयविजातीयस्वगतभेदरूपः यथा

अच्छेद्योयमदाह्योयमक्लेद्योशोष्यएवच ॥ नित्यःसर्वगतःस्थाणुरचलोयंसनातनः ॥ २४ ॥
अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते ॥ तस्मादेवंविदित्वैननानुशोचितुमर्हसि ॥ २५ ॥
अथचैनंनित्यजातंनित्यंवामन्यसेमृतं ॥ तथापित्वंमहाबाहोनैनंशोचितुमर्हसि ॥ २६ ॥

वृक्षस्यस्वगतोभेदःपत्रपुष्पफलादितः वृक्षांतरात्सजातीयोविजातीयःशिलादितः ततश्चसनानैरंतर्येणत्रिविधपरिच्छेदराहित्येनभवतिअस्तीतिसनातनोऽखंडैकरसोयस्मात्तस्मान्नोत्पत्त्याद्याश्रयइत्यर्थः ॥ २४ ॥ एवंज्ञेयंवस्तूक्तंतच्चतत्राध्यस्तदेहत्रयनिरासेनअपरोक्षीकर्त्तव्यमित्याह अव्यक्तोयमिति व्यक्तंस्थूलशरीरंप्रत्यक्षगम्यंतदन्योयंप्रत्यगात्मा तथाअचिंत्योयंचिंत्यंचिंतायोग्यंरूपादिप्रकाशकार्येणानुमेयंचक्षुरादिसमुदायात्मकंलिंगशरीरंअप्रत्यक्षंततोप्यन्योयं तथाअविकार्योयंविकारंस्थूलसूक्ष्मकार्यभावेनावस्थानमर्हतीतिविकार्यैस्त्रिगुणात्मकंमूलाज्ञानंकारणशरीरंमुक्तोत्थितस्यनकिंचिदवेदिषमितिपरामर्शदर्शनादहंनजानामीत्यनुभवाच्चसाक्ष्येकगम्यंततोप्यन्योयं उच्यतेव्यक्तादिनिषेधमुखेननतुभंगयाहिकथाऽयमेवंविधइतिविधिमुखेनोच्यते यस्मादेवमयमुच्यते तस्मादेनंविदित्वानानुशोचितुमर्हसि तरतिशोकमात्मविदितिश्रुतेरात्मविद्भूत्वाबंधुवियोगजंशोकंमाकार्षीरित्यर्थः उक्तंचात्मनोवस्थात्रयातीतत्वं स्वमनिद्रायुतावाद्यौप्राज्ञस्त्वस्वमनिद्रया ननिद्रांनैवचस्वमंतुर्येपश्यंतिनिश्चिताइति ॥ २५ ॥ एवंतत्त्वदृष्ट्याशोकोनोचितइत्युक्तंइदानींप्राकृतजनदृष्ट्यापिशोकोनोचितइत्याह अथचेति नित्यंनियमेनजातंनित्यजातमितिचार्वाकपक्षः नित्यंसर्वदाजातमितिक्षणिकविज्ञानवादिपक्षः नित्यश्चासौअपूर्वदेहेंद्रियसंबंधाज्जातश्चेतितार्किकादिपक्षः एवंनित्यंवामन्यसेन्मृतमित्यपियोज्यं पक्षत्रयेपिशोकोनयुक्तः महाबाहोइतियुद्धार्थमुत्साहयति ॥ २६ ॥

शोचितुंनार्हसीत्युक्तंतत्रहेतुमाहजातस्येति ध्रुवोऽपरिहार्यः मृत्युर्मरणं अपरिहार्येऽर्थेमरणाख्येत्वदुद्योगंविनापिअवश्यंभाविनिविषयेनत्वंशोचितुमर्हसि वक्ष्यतिच मयैवैतेनिहताःपूर्वमेवेति ॥ २७ ॥ अ स्वात्मनोऽशोच्यत्वंतथापिइष्टदेहविनाशजःशोकोऽनवत्येवेत्याशंक्यसकारणस्यदेहादेर्मिथ्यात्वंसाधयति अव्यक्तादीनीति भूतानिवियदादीनितद्विकारभूतानिजरायुजादीनिच नव्यक्तमव्यक्तमज्ञानंआ दिर्येषांतथाविधानि व्यक्तःस्पष्टःमध्यःउत्पत्तिमारभ्यमरणात्प्रागवस्थायेषां अव्यक्तेएवनिधनंलयोयेषामिति अयमर्थः रज्जूरगादिकारणमज्ञानंनरज्जुवत्उरगवद्व्याव्यक्तमस्ति परीक्ष्यमाणंचनदृष्टिपथम वतरति अतस्तद्व्यक्तं ततउत्पन्नःसर्पस्तत्रैवलीयतेनरज्ज्वां एवंआत्मनिकल्पितानांभूतानांआदिरंतश्चाव्यक्तमेव तेनआदावंतेचयन्नास्तिवर्त्तमानेपितत्तथेतिन्यायेनमध्येभासमानान्यपितानिरज्जूरगवत्

जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच ॥ तस्मादपरिहार्येऽर्थेनत्वंशोचितुमर्हसि ॥ २७ ॥
अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत ॥ अव्यक्तनिधनान्येवतत्रकापरिदेवना ॥ २८ ॥

असंत्येव एवंविधेतत्रतस्मिन्विषयेकापरिदेवनाकोवाविलापः नहिमरुमरीचिकाह्रदोनदृष्टइतिकश्चित्तत्त्ववित्विलपति अतएवभूतानांरज्जूरगादीनामिवप्रतीतिसमकालिकींसृष्टिमभिप्रेत्यकौपीतकिब्राह्म णेस्वापप्रबोधयोर्जगल्लयोदयौपद्येते सयदास्वपितिदैनंवाकसर्वैर्नामभिःसहाप्येतिचक्षुःसर्वैरूपैःसहाप्येतिश्रोत्रंसर्वैःशब्दैःसहाप्येतिमनःसर्वैर्ध्यानैःसहाप्येतिसयदाप्रबुध्यतेऽथैतस्मादात्मनःसर्वेप्राणायथा यतनंविप्रतिष्ठंतेप्राणेभ्योदेवादेवेभ्योलोकाइति प्राणाश्चक्षुरादींद्रियाणि देवास्तदनुग्राहकाःसूर्यादयः लोकाःरूपादयः नन्विहान्यत्रचआत्मैवसर्वभूतानांलयोदयस्थानमित्युच्यतेनान्यत् तत्कथमेषामव्य क्तंलयोदयस्थानमित्युच्यते सत्यं अज्ञानाश्रयत्वाद्ब्रह्मणितथात्वव्यपदेशोनवस्तुगत्या नहिअपरिणामिनःकूटस्थस्यमृद्वत्कार्यप्रविलयोदयस्थानत्वंसंभवति यथोक्तं अस्यैद्वैतेंद्रजालस्ययदुपादानकारणं अज्ञानंतदुपाश्रित्यब्रह्मकारणमुच्यतइति ॥ २८ ॥ ॥ ३२ ॥

ननुवज्रपंजरतुल्यस्यसर्वप्रमाणसिद्धस्यवियदादिप्रपंचस्यकथंरज्जूरगादिवदज्ञानप्रभवत्वेनात्यंततुच्छत्वमुच्यते कथंवाकर्मज्ञानकांडापेक्षितमात्मनोयज्ञादिकर्तृत्वंश्रवणादिकर्तृत्वंचापह्नूयतइत्याशंक्याह आश्चर्यवदिति कश्चित्तज्ज्ञातात्मतत्त्वएनमतीतानंतरश्लोकोक्तंभूतयाथात्म्यमाश्चर्यवत्आश्चर्यमद्भुतंत्वमायेंद्रजालादिकंतेनतुल्यंआश्चर्यवत्तथाभूतंपश्यतितथाकश्चिदेनंआश्चर्यवद्वदतिसत्त्वेनअसत्त्वेनवानि र्वक्तुमशक्यमपिअनिर्वचनीयेनैवलोकाप्रसिद्धेनरूपेणोपपादयति तथाहि रज्जूरगवत्प्रपंचःसंश्चेन्नेहनानास्तिकिंचनेतिश्रुत्यानबाध्येत असंश्चेन्नप्रतीयेत तस्मादनिर्वचनीयोयमिति तदिदंसर्वव्यवहारा स्पदस्यापिप्रपंचस्यमिथ्यात्वोपपादनमत्याश्चर्यमित्यर्थः तथाएनंप्रपंचमन्यआश्चर्यवत्शृणोति इमेलोकाइमेदेवाइमेवेदाइदंसर्वंयदयमात्मेतिप्रत्यक्षेणानात्मतयाउपलभ्यमानस्यापिप्रपंचस्ययत्प्रत्यगभि न्नत्वेनश्रवणंतदत्यंतमाश्चर्यं नहीयंश्रुतिर्यंजमानःप्रस्तरइत्यादिवदुपचरितार्था प्रपंचस्यात्मनःपृथक्त्वेआत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञानेनेदंसर्वंविदितंभवतीत्येकविज्ञाबात्सर्वविज्ञानप्रतिज्ञोपरोधा पत्तेः नचप्रतिज्ञाप्यौपचारिकी प्रदेशांतरेश्रुतस्ययथासौम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्यादितिदृष्टांतस्योपरोधापत्तेः तस्मात्प्रतिज्ञादृष्टांतनिगमनानामेकवाक्यत्वात्तनप्रपंचस्यात्मान्यत्वं तच्चभेदग्राहिप त्यक्षविरोधादाश्चर्यमिवशृणोति तथाकश्चिदेनंप्रपंचंप्रत्यगनन्यत्वेनश्रुत्वाअपिशब्दात्उक्त्वास्वमादिदृष्टांतैरुपपाद्यदृष्ट्वाध्यानेनचसाक्षात्कृत्वापितत्त्वतोनवेदनजानाति तथाहि प्राप्तापिप्रज्ञातीव्रविक्षेपवतः

आश्चर्यवत्पश्यतिकश्चिदेनमाश्चर्यवद्वदतितथैवचान्यः ॥ आश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवेदनचैवकश्चित् ॥ २९ ॥

परिहीयतइतिवक्ष्यति तस्मादालैक्यात्संभवत्येवप्रपंचस्यरज्जूरगादितुल्यत्वेनतुच्छत्वं यद्वाएनंआत्मानंकर्तृत्वभोक्तृत्वदुःखित्वानित्यत्वजडत्वसंगित्वपरिच्छिन्नत्वादिधर्मवत्तयाप्रसिद्धमपितत्त्वमसीत्यागमो त्थयाब्रह्माकारांतःकरणवृत्त्याब्रह्मविद्याख्यया अकर्त्तारमभोक्तारमानंदघनंसत्यचिद्रूपमसंगमनंतमपरोक्षीकरोतीतिमहदाश्चर्यंयत्पश्यतितदाश्चर्यवदितिक्रियाविशेषणंवाआविद्यकमपिदर्शनमविद्यांस्वा त्मानंचकतकरजोवन्निवर्त्तयतीति यद्वायःपश्यतिसआश्चर्यवदितिकर्तृविशेषणंयतएकएवविद्वान्समाधिव्युत्थानयोःपरस्परविरुद्धमात्मनोब्रह्मभावंजीवभावंचयावदारब्धकर्मक्षयमनुभवतीतितथावाङ्म नसातीतमप्यात्मानंयद्वाचावदतितदप्याश्चर्यं अगृहीतसंगतिकेमापिशब्देनयथासुप्तःप्रबोध्यतेतद्वत् यथोक्तंवार्त्तिके अगृहीत्वैवसंबंधमभिधानाभिधेययोः हित्वानिद्रांप्रबुध्यंतेसुषुप्तेबोधिताःपरैः जायद्वन्न यतःशब्दंसुषुप्तेवेत्तिकश्चन ध्वस्ततोज्ञाननोज्ञानेब्रह्मास्मीतिभवेत्फलं अविद्याघातिनःशब्दाद्याहंब्रह्मेतिधीर्भवेत् नश्यत्यविद्ययासार्द्धंहत्वारोगमिवौषधमिति तथायःशृणोतिसोपिआश्चर्यवत्अतिदुर्लभइ त्यर्थः श्रवणार्थापिवहुभिर्योनलभ्यइतिश्रुतेः शृण्वंतोपिवहवोयन्नविद्युरितिश्रुतिद्वितीयपादार्थंसंगृह्णाति श्रुत्वाप्येनमिति आश्चर्योवक्ताकुशलोस्यलब्धाआश्चर्योज्ञाताकुशलेनानुशिष्टइतिउत्तरार्द्धस्तु श्लोकपूर्वार्द्धेनसंगृहीतइतिज्ञेयं दुर्विज्ञेयोयमात्मातस्त्वंतज्ज्ञानार्थंयतस्वेतिभावः ॥ २९ ॥

प्रकृतमर्थमुपसंहरति देहीति सर्वाणिभूतानिकथमेतेदीनाअल्पबलाबलवत्तरेणमयाहंतव्याःकथमेषांपुत्रादयएतैर्विनाजीविष्यंतिकथंवाहंभीष्मादिभिर्गुरुभिर्विनाजीविष्यामीतिशोचितुंनार्हसीत्यर्थः॥३०
अर्जुनस्यअनात्मनिदेहेआत्मधीरूपोमोहोनिवारितः इदानींस्वधर्मेयुद्धेअधर्मधीरूपंमोहंनिवारयति स्वधर्ममपीत्यादिना युद्धंक्षत्रियस्यस्वोधर्मःतमवेक्ष्यापिविकंपितुंचलितुंनार्हसि ह्रियस्मात्धर्म्यात्धर्मा
दनपेताद्युद्धादन्यत्क्षत्रियस्यश्रेयःप्रशस्ततरंनास्ति ॥३१॥किंच यदृच्छयाअप्रार्थितमप्युपपन्नमुपस्थितंस्वर्गद्वारमपावृतमुद्घाटितंयेक्षत्रियालभंतेसुखिनोधन्याभवंतीतिसंबंधः ॥ ३२ ॥ युद्धत्यागेइष्टना
शोनिष्टप्राप्तिश्चभवतीत्याह अथचेदिति ॥ ३३ ॥ अव्ययांदीर्घकालां ॥ ३४ ॥ अकीर्त्तिमेवाह भयादिति लंबद्रुमतोभूत्वास्थतएवअतिश्लाघ्यदत्तःसन्लाघवंलघुभावंकानर्याख्यंयेषांपुरतोयास्यसि
तेमहारथास्त्वांभयाद्रणादुपरतंमंस्यंतइतियोजना ॥ ३५ ॥ किंच अवाच्यवादान्वक्तुमयोग्यान्शब्दान्षंढतिलोर्जुनइत्यादीन् सामर्थ्यैर्निंदंतःधिगस्यशौर्यंयोभीष्मादिभयात्पलायितइति इदंवचनंमरणा

देहीनित्यमवध्योयंदेहेसर्वस्यभारत॥ तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि॥ ३०॥ स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि॥ धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्ष त्रियस्यनविद्यते॥ ३१॥ यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतम्॥ सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशम्॥ ३२॥ अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि॥ ततःस्वधर्मंकीर्त्तिंचहित्वापापमवाप्स्यसि॥ ३३॥ अकीर्त्तिंचापिभूतानिकथयिष्यंतितेव्ययाम्॥ संभावितस्यचाकीर्त्तिर्मरणादतिरिच्यते॥ ३४॥ भयाद्र णादुपरतंमंस्यंतेत्वांमहारथाः॥ येषांचत्वंबहुमतोभूत्वायास्यसिलाघवम्॥ ३५॥ अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः॥ निंदंतस्तवसामर्थ्यंततोदुःख तरंनुकिम्॥ ३६॥ हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीम्॥ तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः॥ ३७॥ सुखदुःखेसमेकृत्वालाभालाभौजयाज यौ॥ ततोयुद्धायय्युज्यस्वनैवंपापमवाप्स्यसि॥ ३८॥

दप्यधिकंदुःखं इतोऽन्यद्दुःखतरमधिकंदुःखंकिंनकिमपीत्यर्थः ॥ ३६ ॥ यद्वाजयेमयदिवानोजयेयुरित्युक्तंतत्राह हतोवेति रणेस्थितस्यस्वर्गोवाराज्यंवासिद्धमस्तीतिपक्षद्वयमपिहितावहमित्यर्थः॥३७॥
स्वधर्मस्ययुद्धस्याकरणेधर्मकीर्त्योर्नाशःपापावाप्तिश्चाथचेदितिश्लोकेनभगवतायद्यप्युक्तातथापियुद्धस्यअर्जुनाभिमतेकाम्यत्वपक्षेअहोबतमहत्पापंकर्त्तुंव्यवसितावयं यद्राज्यसुखलोभेनहंतुंस्वजनमु
द्यताइतित्वत्करणेपापप्रसक्तिरस्तितांनिवारयितुंसिद्धासिद्धोःसमत्वलक्षणंयोगमाह सुखदुःखेइति समेकृत्वासुखदुःखयोस्तद्धेत्वोःराज्यलाभालाभयोस्तद्धेत्वोश्चजयाजययोःरागद्वेषावकृत्वेत्यर्थः केवलं
स्वधर्मोयमितिमत्वायुद्धायय्युज्यस्वघटस्व एवंकुर्वैस्त्वंपापंनावाप्स्यसि यस्तुराज्यलोभेनसुहृद्वधंकरोतितस्यास्त्येवपापमितिभावः कथंतर्हिस्वधर्मत्वेनानुष्ठितेपियुद्धेहतोवाप्राप्स्यसिस्वर्गमित्यादिफलस्मरणं ॥ ३३ ॥
आनुषंगिकमितिब्रूमः तथाचापस्तंबः तद्यथाश्येफलार्थैर्निर्मितेळायागंधइत्यनूत्पद्येतेएवंधर्मैश्चर्यमाणमर्थाअनूत्पद्यंतेनधर्महानिर्भवतीतिआत्मनिदर्शनेनप्रतिपादयति ॥ ३८ ॥

एवमर्जुनस्यपूर्वोक्तौद्वावपिमोहावपनीतौतत्रकंघातयतिहंतिकमितिकर्तृत्वकारयितृत्वयोरात्मन्यसंभवउक्तःततोयुद्धाययुज्यस्वेतिनियोगश्चोक्तः नन्वकर्तुराकाशवत्सर्वगतस्यनियोज्यत्वंसंभवतीतिपरस्प
रव्याहतमेतदितीमामाशंकांअधिकारिभेदेनोभयंव्यवस्थापयन्पूर्वपरिहरति एषातेइति एषातेतुभ्यंअभिहिताअशोच्यानन्वशोचस्त्वमित्यादिनास्वधर्ममपिचावेक्ष्येत्यतःप्राक्तनेनसंदर्भेणउक्तासांख्येसम्यक्
ख्यायतेप्रकथ्यतेवस्तुतत्त्वमनयेतिसंख्याउपनिषत्तत्रविदितेसांख्येऔपनिषदेब्रह्मणिविषयेबुद्धिर्ज्ञानंसंसारनिवर्त्तकंएषातेसांख्येबुद्धिरभिहितेतिसंबंधः योगेसिद्धासिद्धोःसमोभूत्वासमत्वंयोगउच्यतइति
वक्ष्यमाणलक्षणेविषये तुशब्दःपूर्ववैलक्षण्यद्योतनार्थः वक्ष्यतिचज्ञानकर्मनिष्ठयोर्वैभिन्नाधिकारिकत्वं लोकेस्मिन्द्विविधानिष्ठापुरावोक्तामयानघ ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनामिति एनेनज्ञा
नकर्मणोःसमुच्चयशंकाप्यपास्ता इमांस्वधर्ममपिचावेक्ष्येत्यादिनाःनंतरग्रंथेनोक्तामपिविस्तरेणाभिधीयमानांशृणु इमामेववुद्धिंस्तौतिसार्धेनबुद्ध्येत्यादिना ननुकर्मबंधप्रहाणमात्मज्ञानेनैवश्रूयते तपसैवा
त्मपदंविदित्वानलिप्यतेकर्मणापापकेनेतिश्रुतेः कर्मयोगस्तुकर्मबंधंदृढीकरिष्यत्येवेतिकथमुच्यतेकर्मबंधप्रहास्यसीतिचेत् श्रुतिबलादितिब्रूमः तथाहि ईशावास्यमिदंसर्वंयत्किंचिज्जगत्यांजगत् तेनत्यक्तेन
भुंजीथामागृधःकस्यचिद्धनं कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाः एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरेइतिश्रुतिरीश्वरेणेदंसर्वंस्तंभितमस्तीतिनकश्चित्किंचित्स्वेच्छयाकर्तुंप्रभवतिअतःसर्वत्रममता
हीनःसन्भोक्तृत्वकर्तृत्वाभिमानत्यागेनैवभोगान्भुंक्ष्वकर्माणिचकुरु एवंकुर्वतित्वयिकर्मलोपोनास्तिइतोन्यदुपायांतरंचनास्तीतिवदति तस्मात्कनककार्ष्णायसादिवत्केनचिद्विशेषरूपेणोपेतंकर्मैवसजा

एषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृणु॥ बुद्ध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि॥ ३९॥
नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते॥ स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात्॥ ४०॥

तीयोच्छेदनिमित्तंभविष्यतीतियुक्तंमुक्तंकर्मयोगेनापिकर्मबंधंप्रहास्यसीति ॥ ३९ ॥ एतदेवोपपादयति नेहेति इहकर्मबंधप्रहाणार्थेकर्मयोगेनुष्ठीयमाने अभिक्रम्यतेव्याप्यतइत्यभिक्रमःकर्मारंभःकर्मैववा
तस्यनाशोनास्तिअन्यत्तुफलंदत्वानश्यतिनत्विदमिष्टफलस्यात्जननात् नन्वेतस्यापिकाम्यांतःपातितयानित्याकरणजनितःप्रत्यवायउत्पद्यतेवसकृदनुष्ठितस्यबंधप्रहाणप्रत्यवायपरिहाराख्यफलद्वयहेतुत्वा
योगादित्याशंक्याह प्रत्यवायोनविद्यतइति तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेतिश्रुत्यासंयोगपृथक्त्वन्यायेनदर्ग्रेद्रियकामस्यजुह्वादित्यनेननित्यस्यदर्शोवीर्यार्थत्वमिवनि
त्यानामपिकर्मणांविविदिषार्थत्वंविनियोगबलात्सिद्धति ततश्चकाम्येनैवप्रयोगेणनित्यस्यापिसिद्धेर्नैनित्याकरणनिमित्तोवाकाम्यत्वात्सर्वौगानुपसंहारनिमित्तोवाप्रत्यवायोविद्यते नित्यानामेवविनियो
गात् नित्येषुचयथाशक्त्युपबंधस्यानुज्ञानात् वार्त्तिकेतुकाम्यानामप्यत्रविनियोगोदृष्टः यथा वेदानुवचनादीनामैकाम्यज्ञानजन्मने तमेतमितिवाक्येननित्यानांवक्ष्यतेविधिः यद्वा विविदिषार्थत्वंकाम्या
नामपिकर्मणां तमेतमितिवाक्येनसंयोगस्यपृथक्त्वनइति अस्मिन्पक्षेकाम्यानामपितुल्यफलत्वात्नित्यवद्यथाशक्त्युपबंधोभविष्यतीतिनसर्वौगानुपसंहारजनितःप्रत्यवायोविद्यते स्वल्पमपिअस्ययोगधर्म
स्यानुष्ठितंअनुपभुक्तबीजकल्पं जन्मजन्मांतराभ्यस्तंदानमध्ययनंतपः तेनैवाभ्यासयोगेनतच्चैवाभ्यसतेपुनरितिस्मृतेरुत्तरोत्तरसंस्काराधानद्वारास्वसजातीयदृढेनैमित्तसत्कामादिदोषक्षपणद्वारामहतो
भयात्संसाराज्जायते तस्मात्सांख्यानधिकारिणाकर्मयोगएवानुष्ठेयइतिभावः ॥ ४० ॥

नत्वेवंसांख्ययोगयोर्महाभयाज्ञाणहेतुत्वंतुल्यंचेत्कोनयोर्विशेषइत्याशंक्यसांख्यानांपातशंकानास्तियोगिनांतुयावद्विदेहैकैवल्यंपातशङ्कास्तीत्याहव्यवसायात्मिकेति व्यवसायस्तत्त्वनिश्चयस्तदात्मिकात दाकारावुद्धिरंतःकरणवृत्तिःअहंब्रह्मास्मीतिवाक्यजन्याब्रह्माकारांतःकरणवृत्तिर्ब्रह्मविद्याभिधानासमस्तदृश्यंतरबाधेनसम्यगभ्युदिताएकाएकैव सकृद्विभातोऽप्येषब्रह्मलोकइतिश्रुतेः ब्रह्मैवलोकोब्रह्मलोक इहब्रह्मैव नहिसकृत्ज्ञातेब्रह्मणिज्ञातव्यंकर्त्तव्यंवाकिंचिदवशिष्यते कृतकृत्यत्वाद्ब्रह्मविदोऽतोऽस्यपातशंकानास्ति अव्यवसायिनामज्ञानिनांतुबुद्धयोनंताःताश्चप्रत्येकंबहुशाखाइतिइदमेवममश्रेयइतिनि श्चयस्यदुर्लभत्वात्कदाचिदश्रेयस्यापिश्रेयोबुद्धौसत्यांपातशंकास्तीतिमहांस्तयोर्विशेषइतिभावः ॥४१॥उत्तरार्धमेवविवृणोति यामिमामित्यादिना यांपुष्पितांपुष्पितद्रुमवद्दूरतोरमणीयांवाचं अक्षय्यंहवै चातुर्मास्ययाजिनःसुकृतंभवतिअपामसोममभूमेत्येवंरूपांप्रवदंतिअविपश्चितः अव्यवसायिनोमूढाःयतोवेदवादरताः वेदांतर्गतेषुअर्थवादेषुयस्यपर्णमयीजुहूर्भवतिनपापꣳश्लोकꣳशृणोतीत्येवमा

व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन॥ बहुशाखाह्यनंताश्चबुद्धयोऽव्यवसायिनाम्॥ ४१॥यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः॥ वेदवादरताःपार्थनान्यदस्तीतिवादिनः॥ ४२॥ कामात्मानःस्वर्गपराजन्मकर्मफलप्रदाम्॥ क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति॥ ॥४३॥भोगैश्वर्यप्रसक्तानांतयापहृतचेतसाम्॥व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते॥४४॥

दिपुरताःबद्धश्रद्धाःअतएवकर्मणोन्यत्आत्मज्ञानंनतत्फलंमोक्षश्चनास्तीतिवादिनोवदनशीलाः ॥४२॥ तथाभोगश्वऐश्वर्यंचतयोर्गतिःप्राप्तिस्तांप्रतिदर्थमित्यर्थः कामात्मानःकामयस्तचित्ताःअतएवस्वर्गप राःकीदृशीभोगैश्वर्यगतिं जन्मकर्मफलप्रदां प्राप्तभोगैश्वर्योहिपुरुषस्तद्वासनावासितःपुनर्भोगैश्वर्यप्राप्तयेजन्मलभतेतदर्थंकर्माणिचकुरुतेफलंचततोभोगादिकंप्राप्तोतीतिचक्रमनिशमावर्त्तते तेननिष्ठातश्च्यु तोभवतीत्यर्थः किंचक्रियाविशेषेणबहुलांयथायथावित्तव्ययायासाद्याधिक्यंतथातथाभोगैश्वर्यप्राप्तेरप्याधिक्यमित्यर्थः एतेनात्यंतायाससाध्येष्वपिकर्मसुफललोभात्सज्जंतइत्युक्तं भाष्येभोगैश्वर्यग तिंप्रतिसाधनभूताःयेक्रियाविशेषाअग्निहोत्रादयःतद्बहुलांजन्मरूपंयत्कर्मफलंतत्प्रदांचवाचमेवेतिव्याख्यातं॥४३॥ भोगेति तयापुष्पितयावाचाअपहृतचेतसांपुंसांबुद्धिःसमाधौसमाध्यनुष्ठानकालेव्यव सायात्मिकाव्यवसायोज्ञानंतदात्मिकाशुद्धचिन्मात्राकारानविधीयतेनभवति कर्मकर्त्तरिलकारः विरक्तस्यहिबुद्धिःसमाधौचिन्मात्राकाराभवतिनतुभोगाद्यासक्तस्येतिस्पष्टमेव भाष्येतुसमाधौअंतःकरणे व्यवसायात्मिकाबुद्धिर्नभवतीतिव्याख्यातं यद्वासमाध्यनुष्ठानार्थमेवनिश्चयात्मिकातेषांबुद्धिर्नभवतीतिव्याख्येयं ॥ ४४ ॥

॥ ३४ ॥

कस्यतर्हिसमाधौबुद्धिर्भवतीत्यतआह त्रैगुण्येति त्रैगुण्यंगुणत्रयकार्यमूर्ध्वमध्याधोगतिरूपंसंसरणंतदेवप्रकाश्यत्वेनविषयोयेषांतादृशाःकर्मकांडपरावेदाः त्वंतुनिस्त्रैगुण्योभव ऊर्ध्वगतावपिविरक्तोभवेत्य र्थः वक्ष्यतिचतत्तद्गुणप्रधानंगतित्रयं ऊर्ध्वंगच्छंतिसत्त्वस्थाइति दिव्येभ्योपिविषयेभ्योविरक्तःसमाधावधिकियतइतिभावः किंलक्षणोसौनिस्त्रैगुण्यइत्यतआह निर्द्वंद्वइति सुखदुःखेमानापमानौशत्रुमित्रे शीतोष्णेइत्यादीनिर्द्वंद्वानिसप्रतिपक्षपदार्थरूपाणितेभ्योनिर्गतोनिर्द्वंद्वः सर्वत्रसमबुद्धिरित्यर्थः ननुबाधमानमुष्णादिकंकथंशीतादिवत्क्षंतुंशक्यमतआह नित्यसत्वस्थइति नित्यंसर्वदासत्त्वंधैर्यंसत्त्वगुणो वातदाश्रितोभूत्वा धीरोहिसर्वंसोढुंशक्तः सात्त्विकोवाप्रारब्धकर्मोपस्थापितमिदंदुःखमपरिहार्यंकिमुतमतयेतिजानन्नसर्वंसोढुंशक्तोत्येव नन्वत्यंतदुःसहंक्षुधादिदुःखंकथंनिस्त्रैगुण्येनसर्वथाप्रवृत्तिशून्येनसो ढुंशक्यमतआह निर्योगक्षेमइति अप्राप्तस्यप्राप्तिर्योगः प्राप्तसंरक्षणंक्षेमः एतद्व्यमपिप्रारब्धकर्माधीनमितिततोपिनिर्गतइत्यर्थः तत्रहेतुः यतआत्मवान्जितचित्तः सहिसर्वात्मप्याप्तत्वनाकुलोनित्यतृप्त तयानिरुद्यमश्चभवतीतित्वमप्येतादृशोनिस्त्रैगुण्योभवेत्यर्थः॥४५॥ नन्वात्मवत्त्वंचित्तशुद्धौसत्याभेवभवतिसाचसकलवेदोक्तकर्मानुष्ठानसाध्या अतोनिस्त्रैगुण्यवंदुर्लभमित्याशंक्याह यावानिति सर्वतःसं प्लुतोदकेमहतिउदपानेजलाशयेपुरुषस्यायावान्अर्थोयावत्स्नानपानादिकंप्रयोजनंघटमात्रजलनिर्वर्त्यंभवतिनकृत्स्नजलाशयव्ययनिर्वर्त्यं तावानेवार्थोविजानतोब्युत्पन्नचित्तस्यब्राह्मणस्यब्रह्मबुभूषोःस

त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन॥ निर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेमआत्मवान्॥ ४५॥ यावानर्थउदपानेसर्वतःसंप्लुतोदके॥तावान्सर्वेषुवेदेषुब्रा ह्मणस्यविजानतः॥ ४६॥ कर्मण्येवाधिकारस्तेमाफलेषुकदाचन॥ माकर्मफलहेतुर्भूर्मातेसंगोस्त्वकर्मणि॥ ४७॥ योगस्थःकुरुकर्माणिसंगंत्यक्त्वाधनंज य॥ सिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोगउच्यते॥ ४८॥

र्वेषुवेदेषुवेदैकदेशोपनिषच्छ्रवणमात्रनिर्वर्त्योभवति नकृत्स्नवेदार्थानुष्ठानंत्वसिद्ध्यर्थमपेक्षते एकेनजन्मनाकृत्स्नवेदार्थानुष्ठानासंभवात् ऐहिकेनजन्मांतरीयेणवाजपादिनाचित्तशुद्धौसत्यामुपनिषच्छ्रव णान्निस्त्रैगुण्यतासंभवतीतिभावः दृद्धास्तुसर्वतःसंप्लुतोदकस्थानीयेआत्मज्ञानेपुरुषस्यतावानर्थःकृत्स्नोपिभवतियावान्अनेककूपरूपोदपानस्थानीयेषुसकलवेदोक्तकर्मस्वनुष्ठितेषुभवति ब्रह्मानंदेक्षुद्रानंदा नामंतर्भावात् तथाचश्रुतिर्ज्ञानिसर्वकर्मफलांतर्भावंदर्शयति यथा कृताया विजिताया धेरयाःसंयंत्येवमेवैनंसर्वंतदभिसमेतियत्किंचप्रजाःसाधुकुर्वंतियस्तद्वेदयत्सवेदेति वक्ष्यतिच सर्वकर्माखिलंपार्थज्ञानेप रिसमाप्यतइति गंगातुल्यज्ञानोदयात्मागेवकूपोपमानिकर्माणिकर्त्तव्यानीतिभावइतिव्याचख्युः अस्मिन्पक्षेपूर्वार्धेअनेकस्मिन्यथातथाभवतीतिपदचतुष्टयाध्याहारः यावानृतावान्पदयोरनुषंगश्वदार्ष्टी तिकेद्रष्टव्यः ॥ ४६ ॥ ननुमाप्यौपनिषदात्मज्ञानार्थिनःशमएवेष्टस्तत्कर्थमांयुध्यस्वेतिप्रेरयसीत्याशंक्याह कर्मण्येवेति कर्मण्येवाधिकारोनज्ञाननिष्ठायां माफलेषुसंगोस्त्वित्यपरुष्यतेकर्मफलंस्वर्गपश्वा दिहेतुःकर्मसुप्रवर्त्तकेयस्यतादृशोमाभूः अकर्मणिकर्माकरणेपितवंसंगोमास्तु ॥ ४७ ॥ एतदेवविवृणोति योगस्थइति योगस्थःसन्संगफलतृष्णांकर्तृत्वाभिमानंचत्यक्त्वाकर्माणिज्ञानार्थंकुरु हेधनंजयसि द्ध्यसिद्ध्योःकर्मफलस्यविविदिषादेःसिद्धावसिद्धौवासमोहर्षविषादशून्योभूत्वाकर्माणिकुर्वितिसंबंधः इदमेवसिद्ध्यसिद्ध्योःसमत्वंयोगइत्युच्यते ॥ ४८ ॥

इममेववुद्धियोगंस्तौति दूरेणेति कर्मफलकामेनकियमाणंबुद्धियोगात्पूर्वोक्तान्निष्कामात्कर्मणःदूरेण हिप्रसिद्धं अवरंअत्यंतनिकृष्टं अतोबुद्धौयोगरूपायांतत्फलभूतायांसांख्यरूपायांवातन्निमित्तंशरणंरक्षितारंआश्रयंवाईश्वरंअन्विच्छप्रार्थयस्वतत्प्रीत्यर्थंकर्माणिकुर्वित्यर्थः यतःफलहेतवःफलमेवहेतुःप्रवर्त्तकंयेषांतादृशाःफलतृष्णावंतःकृपणादीनाभवंति योवाएतदक्षरंगार्ग्यविदित्वास्माल्लोकात्प्रैतिस कृपणइतिश्रुतेः ॥ ४९ ॥ किंच बुद्धीति बुद्धियुक्तःसमत्वबुद्धियुक्तोयोगायसमत्वबुद्धियोगायुज्यस्वघटस्व योगःसिद्धसिद्ध्योःसमत्वबुद्धिःकर्मसुबंधकेष्वपिकौशलंबंधनिवर्त्तकत्वसंपाद्दनं ननुबुद्धियुक्तःकर्मजिर्दुष्कृतंत्यजतु धर्मेणपापमपनुदतीतिश्रुतेः सुकृतंतुसज्जतीयत्वात्तैर्दुष्परिहरमितिकथमुभेसुकृतदुष्कृतेजहातीत्युच्यते सत्वशुद्धिज्ञानोत्पत्तिद्वारेतिप्राज्ञः अर्वाक्त्वस्तुदुष्कृतत्यागमुकृरीत्याभ्युपेत्य फलत्यागात्सुकृतत्यागोपिकर्मयोगिनोभवति दुष्कृतफलवन्मोक्षप्रतिबंधकतत्फलस्यानुत्पादात् यत्तुआपस्तंबोक्ताश्रद्दक्षनिदर्शनेननांतरीयकंसुकृतफलमुत्कंनतत्फलत्वेनोपपद्यते नांतरीयकत्वादेव तस्मात्फलद्वारामोक्षप्रतिबंधकेकियमाणेएवसुकृतदुष्कृतेकर्मयोगीजहातिज्ञानीतुसंचितेअपितेजहातीतियोविशेषइत्याहुः ॥ ५० ॥ एतदेवाह कर्मजमिति बुद्धियुक्ताःसमत्वबुद्धियुक्ताःकियमाणकर्मजंफलंत्यक्त्वामनीषिणोमनोनिपहसमर्थाभूत्वाजन्मरूपेणबंधेनमुक्ताःसंतोऽनामयंनिरुपद्रवंपदंमोक्षाख्यंगच्छंति ॥ ५१ ॥ कदामनीषिणोभवंतीत्यतआह यदेति तेतवमोहइष्टानिष्टवियोगसंयोगजपरितापजन्यं

दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजय ॥ बुद्धौशरणमन्विच्छकृपणाःफलहेतवः ॥ ४९ ॥ बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृते ॥ तस्माद्योगायुज्यस्वयोगःकर्मसुकौशलम् ॥ ५० ॥ कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वामनीषिणः ॥ जन्मबंधविनिर्मुक्ताःपदंगच्छंत्यनामयम् ॥ ५१ ॥ यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति ॥ तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ॥ ५२ ॥ श्रुतिविप्रतिपन्नातेयदास्थास्यतिनिश्चला ॥ समाधावचलाबुद्धिस्तदायोगमवाप्स्यसि ॥ ५३ ॥ ॥ अर्जुन उवाच ॥ ॥ स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेशव ॥ स्थितधीःकिंप्रभाषेतकिमासीतव्रजेतकिम् ॥ ५४ ॥

वैचित्त्यंतदेवकलिलमिवकलिलंकालुष्यंबुद्धिगतंबुद्धिर्व्यतितरिष्यतिव्यतिक्रमिष्यति बुद्धिःप्रसन्नाभविष्यतितदाश्रोतव्यस्यशास्त्रभागस्यश्रुतस्यचनिर्वेदंवैराग्यंगंतासि अयंभावः मलिनायांबुद्धावसरुद्धहीतस्यापिशास्त्रार्थस्यास्फुरणात्श्रोतव्यंश्रुतंचतथैवतद्वत्श्रुद्धायामपिबुद्धौसत्यःशास्त्रार्थस्फुरणात्तयोर्वैयर्थ्यमित्युभयथापितत्रनिर्वेदउचितः प्रसन्नाचबुद्धिर्निपहीतुंयोग्याभवतीतिश्रवणादिकंत्यक्त्वाध्याननिष्ठएवभेवेदिति ॥ ५२ ॥ ननुबुद्धिप्रसादोपिकेनलिंगेनज्ञेयइत्यतआह श्रुतीति श्रुतिर्भिन्नानाविधशास्त्रश्रवणैर्विप्रतिपन्नाआत्मानित्योऽनित्योवानित्योपिकर्ताऽकर्त्तावाअकर्त्ताप्येकोऽनेकोवेत्येवमादिसंशययुक्तासतीयदाअसंभावनाविपरीतभावनानिरासपूर्वकं श्रुतितात्पर्यविषयीभूतेब्रह्मात्मैक्येनिश्चलापुनःकुतर्कैरनास्कंदनीयानिर्विचिकित्सापरोक्षनिश्चयवतीभूत्वासमाधौनिर्विकल्पकेप्रत्यगात्मनिअचलालयविक्षेपशून्यास्थास्यतिस्थिराभविष्यतितदायोगंविवेकप्रज्ञांप्राप्स्यसि निश्चलसमाधिलाभएवबुद्धिप्रसादलिंगमितिभावः ॥ ५३ ॥ लब्धसमाधेःस्थितप्रज्ञापरनाम्नोलक्षणानिबुभुत्सुरर्जुनउवाच स्थितप्रज्ञस्येति स्थितप्रज्ञत्वंगतात्मनिप्रतिष्ठिताप्रज्ञायस्यतस्यस्थितप्रज्ञस्यसमाधिस्थस्यसमाधौस्थितस्यकाभाषाभाषणंवचनंकथमसौपरैर्ज्ञाप्यतेइत्येकःप्रश्नः स्थितधीःस्थितप्रज्ञःअर्थाद्व्युत्थितःसन् किंप्रभाषेतकथंवदतिकथमास्तेकथंवाव्रजतिविषयान्भुंक्तेइतिप्रश्नत्रयं ॥ ५४ ॥

॥ ३५ ॥

एतेषांक्रमेणोत्तराण्याहभगवान्प्रजहातीत्यादिना अत्रयान्येवकृतार्थैलक्षणानितानिज्ञानसाधनानीतिमत्वाउपदिश्यंतेस्थितप्रज्ञलक्षणानितेषामकृतार्थेषुयत्नसाध्यत्वात्कृतार्थेषुस्वाभाविकत्वात् यथोक्तं उत्पन्नात्मप्रबोधस्यश्रद्धेदृढत्वादयोगुणाः भवंत्ययत्नतस्तस्यनतुसाधकरूपिणइति यदायंयोगीसर्वान्स्थूलसूक्ष्मकारणशरीरभोग्यान्कामान्कामयमानान्विषयान्प्रकर्षेणसमूलंजहातित्यजति कीदृशान्कामान् मनोगतान्नमनस्येवसंकल्पविकल्पात्मकेस्थितान्ननुबहिः यथोक्तमक्षपादाचार्यैः दोषनिमित्तंरूपादयोविषयाःसंकल्पकृताइतितत्रस्थूलानांकामानांत्यागएकांतसेवनमात्राद्भवतीतिसस्थवीयानेवविलीनकरणग्रामस्यसमनस्कस्यजाग्रद्वासनामयाःस्वमेयेकामाःस्फुरंतितेषामपित्यागोभगवद्ध्यानादिरूपसद्वासनाभ्यासबलेनभवति येनूपसंहृतकरणस्यसंप्रज्ञातसमाधिकालेदिव्याःकामाःसंकल्पमात्रोपनतादहरविद्यादिषुप्रसिद्धास्तेषामपित्यागोऽसंप्रज्ञातसमाध्यभ्यासबलेनभवति एवंत्रिविधानकामान्त्यक्त्वाआत्मन्येवास्वैवस्वरूपानंदेनतुष्टोबाह्यविषयनिरपेक्षोयदाभवतितदायंस्थितप्रज्ञइत्युच्यते॥ ५५॥ दुःखेषुशास्त्रपातादिषुदुःखसाधनेषुप्राप्तेष्वपिअनुद्विग्नमनाअचंचलमनाः वक्ष्यतिचयस्मिन्हियतोनदुःखेनगुरुणापिविचाल्यतइति सुखेषुसुखसाधनेषुलब्धेषुनकंदनादिषुप्राप्तेष्वपिविगतस्पृहो निर्वृत्तिकत्वाद्भवति अतएववीतारागभयक्रोधायस्मात्सतथा नहितस्यामवस्थायांरागादयोदुःखादयोवासंभवंति एवंविधःसमाधिस्थःस्थितधीःस्थितप्रज्ञउच्यते॥ ५६॥ स्थितधीःकिंप्रभाषेतेत्यस्योत्तरमा

श्रीभगवानुवाच ॥ ॥ प्रजहातियदाकामान्सर्वान्पार्थमनोगतान् ॥ आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥ दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः ॥ वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यते ॥ ५६ ॥ यःसर्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभाशुभम् ॥ नाभिनंदतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता ॥ ५७ ॥ यदासंहरतेचायंकूर्मोंगानीवसर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ॥ ५८ ॥ विषयाविनिवर्त्तंतेनिराहारस्यदेहिनः ॥ रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्त्तते ॥ ५९ ॥

ह यःसर्वत्रेति सर्वेपुधनदारदेहजीवनादिपुअनभिस्नेहः अभिस्नेहवान्हिधनदारादिषुविकलेषुसकलेषुवाऽहमेवविकलःसकलोऽस्मीतिदैन्यदर्पपेतःपूर्वापरानुसंधानरहितोजल्पतिअयंतुनतथेतिभावः तथाशुभंप्राप्यनाभिनंदतिसंतुष्टोभूत्वाशुभप्रापयितारंनप्रशंसति तथाअशुभंप्राप्यनद्वेष्टिदुःखीभूत्वाअशुभप्रापयितारंनर्निंदतियस्तस्यप्रज्ञाप्रतिष्ठिता ॥ ५७ ॥ किमासीतेत्यस्योत्तरमाह यदेति इंद्रियार्थेभ्यःशब्दादिविषयेभ्यःप्रारब्धकर्मवशेनव्युत्थितोपियोगीद्वैतदर्शनाद्बिभ्रःसन्निरोधसंस्कारप्राबल्यात्प्रीत्यासमाधिमनुतिष्ठन्नेवास्तेइत्यर्थः शेषंस्पष्टं ॥ ५८ ॥ ननुविषयेभ्यइंद्रियाणांनिवृत्तिश्चेत्स्थितप्रज्ञताहेतुस्तर्हिसुप्तिमूर्च्छालयप्रहावेशादावपिसास्तीतिसर्वोपिस्थितप्रज्ञएवेत्याशंक्याह विषयाइति सत्यंदेहिनोदेहाभिमानवतोमूढस्यसुप्त्यादौनिराहारस्यइंद्रियैर्विषयाननाहरतोऽभुंजानस्यविषयाविनिवर्त्तंत एवतथापिरसवर्जंरसोरागस्तद्वर्जंनिवर्त्तते तदापिसूक्ष्मरूपेणरागोस्तिरागमूलस्यात्माज्ञानस्यादाहान्नासौस्थितप्रज्ञइत्यर्थः अस्यैवपुनःपरंदृष्ट्वाआत्मानंसाक्षात्कृत्यनिराहारस्यशब्दादीनगृह्णतोरसोपिनिवर्त्ततेमूलाज्ञानदाहादित्यस्तिसुप्तादेःसमाधिस्थस्यचमहान्विशेषइतिभावः प्राञ्चस्तुरोगिणःकाष्ठतपस्विनोवामूढस्यापिविषयाननाहरतोरसवर्जंविषयाविनिवर्त्ततेतस्यैवपरंदृष्ट्वास्थितस्यरसोपिनिवर्त्ततइत्याचख्युः ॥ ५९ ॥

किंच सुप्तादेरिंद्रियाणिश्रांत्यात्स्वयमेवलीयंते समाहितेननुतानिकूर्मेणांगानीवस्वेच्छयासंक्रियंते एतच्चात्यंतायाससाध्यमित्याह यततइति विपश्चितःशास्त्राचार्योपदेशवतोयततोपिसमाधिसिद्ध्यर्थंयतमान स्यापिपुरुषस्यइंद्रियाणिकर्तृणिमनःप्रतीचिस्थिरीक्रियमाणंकर्मीभूतंहरंतिविषयप्रवणंकुर्वंति यतःप्रमाथीनि यथाबहवश्रोरावनेएकंपुरुषंप्रमथ्यतस्यविवेकंहरंति एवंमिंद्रियाणियततोमनोहरंति यतःप्रसभ मतिशयेनप्रमथनशीलानि ॥ ६० ॥ यद्यप्येवंतथापितानिनियंतव्यान्येवान्यथास्थितप्रज्ञत्वस्यैवासिद्धेरित्याह तानीति संयम्यवशीकृत्ययुक्तःसंनद्धोमत्परःअहमेवसर्वेषांप्रत्यगात्मापरःख्यादिभ्योवासे भ्योदेहेंद्रियादिभ्यआंतरेभ्यश्चउत्कृष्टःप्रियतमोयस्यसमत्परःसन्नासीत हियस्मात्ववशेआज्ञायां शेषंस्पष्टं ॥ ६१ ॥ यदापंचावतिष्ठंतेज्ञानानिमनसासह बुद्धिश्चनविचेष्टतितामाहुःपरमांगतिमितिश्रुतौइंद्रि यमनोबुद्धीनांनिपहेपरमपदप्राप्तिरित्युक्तं तच्चउपसंहृतकरणस्यवाह्यान्शब्दादीनगृह्णतोमनोमात्रेणावस्थितस्ययोगिनोमनसोऽनिग्रहेकिंस्यादित्याह ध्यायतइतिद्वाभ्यां विषयान्शब्दादीन्ध्यायतश्चित्तय नःपुंसःपुरुषस्यतेषुशब्दादिषुसंगःसंबंधोजायते वाह्यार्थेभ्योनिगृहीतान्यपिइंद्रियाणिमनोदोषात्पुनर्बाह्यार्थान्गृह्णंतीत्यर्थः ततःसंगात्कामस्तस्मिन्विषयेऽभिलाषःसंजायते कामात्कुतश्चिद्धेतोःप्रतिहतादभि

यततोह्यपिकौंतेयपुरुषस्यविपश्चितः ॥ इंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनः ॥ ६० ॥ तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः ॥ वशेहियस्येंद्रियाणितस्यप्र ज्ञाप्रतिष्ठिता ॥ ६१ ॥ ध्यायतोविषयान्पुंसःसंगस्तेषूपजायते ॥ संगात्संजायतेकामःकामात्क्रोधोभिजायते ॥ ६२ ॥ क्रोधाद्भवतिसंमोहःसंमोहात्स्मृतिविभ्र मः ॥ स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति ॥ ६३ ॥ रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन् ॥ आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति ॥ ६४ ॥

ज्वलनात्माक्रोधोभिजायते ॥ ६२ ॥ ततःक्रोधात्संमोहःकार्याकार्यविवेकाभावोभवति ततःस्मृतिविभ्रमःशास्त्रार्थानुसंधानस्यविभ्रंशरूपंचलनंभवति स्मृतिभ्रंशात्बुद्धिनाशःशास्त्रार्थस्यनिश्चितस्यापिति रोधानंभवति तस्मिंश्चशास्त्रज्ञेपरोक्षज्ञानेपिनष्टेपुरुषोनश्यतिपुरुषार्थायोग्योभवति योहितादृशःसनष्टएवेतिलोकेवदंति ॥ ६३ ॥ ननुविषयानध्यायतोपियोगिनोव्युत्थानेप्रमाणस्वाभाव्यादिंद्रियाणांवि षयेषुसंगोदुष्परिहरस्ततश्चोक्तरीत्यात्स्यापिनाशप्रसक्तिरित्याशंक्याह रागद्वेषेति विधेयात्माकिंकरीकृतमनास्तुआत्मवश्यैर्मनोऽधीनैरिंद्रियैःस्वामिनश्चित्तस्यकिंकरीकृतस्यकामक्रोधहीनत्वात्स्वयमपि रागद्वेषवियुक्तैःविषयानुपथितनतृणादीनीवानास्थयाचरन्पश्यन्नपिपुमान्तृतत्रकामाद्यनुदयात्प्रसादंसंकल्पविकल्पपंकलेपप्रक्षालनेनमनसःस्वाच्छ्यंअधिगच्छति मनसःस्वाच्छ्यमेवप्रत्यगात्मनःस्वा च्छ्यंतस्यतद्गुणसारत्वात् अजितमनस्कमिवजितमनस्कंविषयसंगोनबाधतेऽतोमनोजयोवश्यंकर्त्तव्यइत्यर्थः ॥ ६४ ॥

किंच चित्तस्यप्रसादेहिअस्यपुंसःसर्वदुःखानांकाममूलकानांकामाभावात्हानिःपरिहारोजायते कामानुदयेहेतुमाह प्रसन्नेति हियस्मात्प्रसन्नचेतसःपुंसोबुद्धिर्बह्मात्मैक्यनिश्चय आशुशीघ्रंपर्यवतिष्ठतेसु दृढोभवति तस्मिंश्चसतिप्राप्ताभावान्नकामोदयइत्यर्थः ॥६५॥ समनस्कानामिंद्रियाणामनियहेदोषउक्तः बुद्धेरपर्यवस्थानेकोदोषइत्यतआह नास्तीति अयुक्तस्यश्रवणमननयोरनासक्तस्यबुद्धिर्ब्रह्मा त्मैक्यनिश्चयोनास्ति प्रमाणविषयासंभावनायाःप्रमेयविषयासंभावनायाश्चानिरासात् तथाअयुक्तस्यासमाहितमनसोभावनाब्रह्माकारांतःकरणवृत्तिप्रवाहोनास्ति मनसश्चांचल्येनबुद्धेरपिचांचल्यात् अभावयतोध्यानमकुर्वतः शांतिःसर्वदुःखोपरमश्चनास्ति चेतसोनवस्थितत्वेनदुःखावश्यंभावात् अशांतस्यानुपरतसर्वदुःखस्यसुखंप्रत्यगद्वयानंदात्मकंकुतोनकुतश्चित् दुःखित्वादेव आत्ममयुक्तस्येतिपदं युजिर्योगेइत्यस्यरूपं द्वितीययुजसमाधावित्यस्य तस्माद्बुद्धेःपर्यवस्थानमावश्यकं ॥ ६६ ॥ तदभावेदोषमाह इंद्रियाणांहीति हियस्मादिंद्रियाणांचरतांस्वस्वविषयेप्रवर्त्तमानानां कर्मणिषष्ठी यत् रागादिकलुषितंमनः तान्यनुलक्षीकृत्यविधीयतेप्रवर्त्यते कर्मकर्तरिलकारः प्रवर्तनइत्यर्थः तत्इंद्रियानुसारिमनोऽस्यसाधकस्यप्रज्ञामात्मतत्वविषयांबुद्धिंहरति तस्यामनोनुसारित्वात् दृष्टांतःस्पष्टार्थः अन्येतुइंद्रियाणांमध्येयदिंद्रियमनुलक्षीकृत्यमनःप्रवर्त्ततेतदिंद्रियमस्यसाधकस्यमनसोवाप्रज्ञांहरतीतियोजयंति आत्मविषयांप्रज्ञांहृत्वामनोविषयविषयांकरोतीतिज्ञाप्यमप्यालोचनीयं ॥ ६७ ॥ यत

प्रसादेसर्वदुःखानांहानिरस्योपजायते ॥ प्रसन्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठते ॥ ६५ ॥ नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना ॥ नचाभावयतःशांतिरशां तस्यकुतःसुखं ॥ ६६ ॥ इंद्रियाणांहिचरतांयन्मनोनुविधीयते ॥ तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसि ॥ ६७ ॥ तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः ॥ इंद्रि याणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ॥ ६८ ॥ यानिशासर्वभूतानांतस्यांजागर्त्तिसंयमी ॥ यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः ॥ ६९ ॥

तोक्षपीत्यत्रोपकांतमर्थंबहुधाउपपाद्यउपसंहरति तस्मादिति यस्मादिंद्रियाधीनंमनोमनोनुगाचप्रज्ञातस्मात्हेमहाबाहोयस्ययतेरिंद्रियाणिसर्वशः सर्वप्रकारेणस्वकारणेनमनसासहितानीतियावत् इंद्रि यार्थेभ्यःशब्दादिभ्योनिगृहीतानिभवंतितस्यप्रज्ञाप्रतिष्ठितेतिविद्धि ॥६८॥ यदापंचावतिष्ठंतइत्युदाहृतश्रुतेस्तामाहुः परमांगतिमित्येतंचतुर्थपादंव्याचष्टे यानिशेति सर्वेषांभूतानामज्ञानांयानिशेवनिशाय स्यांमध्यंदिनेउलूकाइवानंधाअप्यंधाएवसर्वेप्राणिनोभवंतितस्यांतस्मिन्प्रत्यग्ज्योतिषिसंयमीइंद्रियमनोबुद्धीनांनिपहणशीलोयोगीजागर्त्तिइंद्रियादीनांदृक्शक्तिलोपेप्युनुपरतदृक्शक्तिरेवास्ते तथाचश्रु तिः नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वादिति यस्यामविद्याख्यायांनिशायांक्रियाकारकादिद्वैतस्वप्नप्रवृत्तिकायांसर्वाणिभूतानिजाग्रतिनिशीथेउलूकाइवस्वस्वव्यापारेप्रवर्त्तंते साअविद्यापश्यतो मुनेःआत्मदर्शनवतोयोगिनःप्रारब्धकर्मणाविदेहकैवल्यप्रतिबंधात्लेशतोनुवर्त्तमानाव्युत्थानकालेव्यवहरतोस्यगाढांधकारवतीनिशेवज्ञेशकरीभवति अतिसुकुमाराहियोगिनोबाह्यव्यवहारादुद्विजंतेन राइवगाढांधकारेसंचारात् यथोक्तंयोगभाष्ये अक्षिमात्रकल्पोहिविद्वान्नत्यल्पदुःखलेशेनाप्युद्विजतइति अत्रवार्त्तिकानि कारकव्यवहारेहिशुद्धंवस्तुनवीक्ष्यते शुद्धेवस्तुनिसिद्धेचकारकव्यापृतिस्तथा काकोलूकनिरीक्षायंसंसारोऽज्ञात्मवेदिनोः यानिशासर्वभूतानामित्यवोचत्स्वयंहरिरिति बुद्धतत्त्वस्यलोकोयंजडोन्मत्तपिशाचवत् बुद्धतत्त्वोपिलोकस्यजडोन्मत्तपिशाचवदिति तदेवंकिमासीतेत्यस्योत्तरं यदासंहरतेचायमित्यादिनाएतदंतेनग्रंथेनस्थितप्रज्ञःसदासमाधिमनुतिष्ठन्परमांगतिंप्राप्यास्तइत्युक्तं ॥ ६९ ॥

ननुप्रजहातियदाकामान्पृंइंद्रियार्णीद्रियार्थैभ्योनिगृहीतानीत्यादिनाःसकद्विषयाणांप्रहाणंतेभ्यश्चइंद्रियादीनांप्रत्याहरणमुक्तं तेनतेषामात्मनःपृथक्सत्त्वमस्तीतिसिद्धं नचनेहनानास्तिकिंचनेत्यादिश्रुत्या तेषांबाधान्नतदस्तीतिवाच्यं इहेतिप्रतीत्येवतन्निषेधात् नहिइहभूतलेघटोनास्तीत्युक्तेघटस्यस्वरूपंनिषिध्यतेकिंतुतस्यभूतलसंबंधमात्रं तस्मात्कामानांपृथक्सत्त्वमस्त्यतोनाद्वैतसिद्धिरित्याशंक्यसदृष्टांतंप रिहरति आपूर्यमाणमिति प्रविशंतीभिरद्रिरापूर्यमाणमप्यचलप्रतिष्ठमनुद्विग्नं दृढिहीनत्वात् एवंनिर्गच्छंतीभिरद्भीरिच्यमानमप्यचलप्रतिष्ठमरिक्तंक्लासहीनत्वादित्यपिबोध्यं एवंविधंसमुद्रंयद्वत्आत्मप्र ज्ञवाआपःप्रविशंतिनद्वत्यंपुरुषंकामैरापूर्यमाणंह्रीयमानंवाअचलप्रतिष्ठंनिर्विकारंदृढिक्लासहीनत्वात्आत्मप्रज्ञवाःसर्वेकामाः प्रविशंतिसएवशांतिंमोक्षमात्यंतिकंदुःखोपरमंप्राप्नोतिननुकामकामीविषया र्थी अयंभावः कूटस्थादात्मनःसर्वस्योत्पत्तिस्तत्रैवचलयइतिसर्वश्रुतिस्मृतिप्रसिद्धं तेनकामानांप्रहाणंतेभ्यश्चेंद्रियाणांप्रत्याहरणंस्मर्यमाणंननेषांपरमार्थतःपृथक्सत्त्वंसाधयति बह्वप्रमाणविरोधात् किंतु पामरप्रसिद्धंपृथक्सत्त्वमभिप्रेत्यप्रहाणादिकमुक्तं प्रविलापनंत्वेवमेवव्याख्येयं यथाग्नेयेपथिरूतेष्टाकपालंनिर्वपेदित्यादौनिर्वपतिनायागउच्यतेननुश्रौतार्थमात्रंतद्वदिहापिज्ञेयं नेहनानास्तीत्यपीहपरिदृ

आपूर्यमाणमचलप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत् ॥ तद्वत्कामायंप्रविशंतिसर्वेसशांतिमाप्नोतिनकामकामी ॥ ७० ॥
विहायकामान्यःसर्वान्पुमांश्चरतिनिःस्पृहः ॥ निर्ममोनिरहंकारःसशांतिमधिगच्छति ॥ ७१ ॥

श्यमानेप्रपंचेआत्मातिरिक्तंनानाकिमपिनास्तीत्येवंपरतयाव्याख्येयं तथाच आत्मैवेदंसर्वंब्रह्मैवेदंसर्वंसर्वंखल्विदंब्रह्मेत्यादयःश्रुतिवादाःसंगच्छंते आत्मनिकल्पितस्यास्यतत्रैवनिषेधेनान्यत्रसत्त्वानुपपत्तेर्न कामानांपृथक्सत्त्वमस्तीतियुक्तएवसमुद्रदृष्टांतः यत्तुसमुद्रात्पृथग्गंगायाःसत्त्वमस्तीति तन्न कार्यैकारणसत्तातिरिक्तसत्तायाअभावात् वाचारंभणंविकारोनामधेयमितिकार्यस्यवागालंबनमात्रत्वश्रव णादित्यन्यत्रविस्तरः ॥ ७० ॥ प्रासंगिकीमाशंकांपरित्यज्यप्रकृतमेवाह विहायेति पूर्वोक्तान्त्रिविधान्कामान्विहायययश्चरतिविषयान्भुंक्तेनिस्पृहश्चयतोनिर्ममः ममतावान्हिद्दं ममभूयादित्यन्यधनाद्यर्थंस्पृहांकरोति निर्ममोपिकुतः यतोनिरहंकारः नह्यहंकारशून्यस्यसुप्तादौममतादृष्टा तस्मादहंकारप्रविलयात्शांतिंमोक्षंप्राप्नोति अथयःसर्वज्ञानज्ञेन्नेहइतिसर्वत्रयच्छब्ददर्श नात्साधनविधिपरएवायंग्रंथः अन्यथास्थितप्रज्ञस्यप्रकृतत्वात्तदनुवादार्थोयच्छब्दोनर्थकःप्राप्नोति लोकेपिहिपरस्वभावकथनेसएवंकरोतीतितच्छब्दएवप्रयुज्यतेननुयच्छब्दः विधौतुयएवंकरोतिसइदं प्राप्नोतीद्विद्योरपिप्रयोगोदृश्यते लक्षणकथनार्थत्वेपितत्रतात्पर्याभावाद्विधावेवपर्यवस्यतीतिदिक् ॥ ७१ ॥ ॥ ३७ ॥

प्रतिपादितांकर्मयोगप्राप्यांसांख्ययोगनिष्ठांफलेनस्तुवन्नुपसंहरतिएषेति एषास्थितप्रज्ञलक्षणप्रसंगात्कथिताब्राह्मीब्रह्मशब्देनात्रब्रह्मविद्रुच्यतेब्रह्मविद्ब्रह्मैवभवतीतिश्रुतेः तस्येयंब्राह्मीस्थितिर्निष्ठाएनांनि ष्ठांप्राप्यनरोनविमुह्यतिपुनर्मोहंनप्राप्नोति अस्यामंतकालेपिस्थित्वेतिसकृज्जातापीयंफलवतीनतूपासनावच्चिराभ्याससापेक्षेत्युक्तं ब्रह्मकृच्छतिप्राप्नोति किंलोकांतरवत्गतिप्राप्यब्रह्मनेत्याह निर्वाणमिति निर्गतंवानंगमनंयस्मिन्प्राप्येब्रह्मणितन्निर्वाणं तथाचश्रुतिः नतस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयंतेब्रह्मैवसन्ब्रह्माप्येतीतिगतिमंतरेणप्राणरूपोपाधिप्रविलयमात्रात्घटाकाशस्यमहाकाशत्वप्राप्तिवत्जीवस्य ब्रह्मप्राप्तिमाह अंतकालेपीत्यपिशब्दात्योब्रह्मचर्यादारभ्याव्रतिष्ठतिसब्रह्मनिर्वाणंकैमुतिकन्यायेनप्राप्नोतीतिगम्यते अस्याध्यायस्यार्थःसंगृहीतोमधुसूदनश्रीपादैः ज्ञानंतत्साधनंकर्मसत्त्वशुद्धिश्चतत्फलं तत्फलंज्ञाननिष्ठेत्यध्यायेस्मिन्प्रकीर्त्तितं ॥ ७२ ॥ ॥ इतिश्रीमत्पदवाक्य० मर्या० चतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्यकृतौभार० ाग्वद्गीताप्रकाशेद्वितीयेऽध्यायः ॥ २ ॥ पर्व० ॥ २६ ॥
पूर्वस्मिन्नध्यायेएषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृण्वितिद्वेबुद्धीप्रदर्श्यव्यवसायात्मिकाबुद्धिरितिश्लोकेनसांख्यनिष्ठावतांपातशंकानास्तिकर्मयोगनिष्ठावतांतुसास्तीत्युक्त्वायावानर्थउदपानेइतिसां

एषाब्राह्मीस्थितिःपार्थनैनांप्राप्यविमुह्यति॥स्थित्वास्यामंतकालेपिब्रह्मनिर्वाणमृच्छति॥ ७२॥ ॥इतिश्रीम० भी० श्रीमद्भ० सू० सांख्ययोगो नामद्वितीयोऽध्यायः॥ २॥ ॥पर्वणितुषष्ठ्युत्तरशततमोऽध्यायः॥२६॥ ॥ ७॥ ॥अर्जुनउवाचः॥ ॥ ज्यायसीचेत्कर्मणस्तेमतावुद्धिर्जनार्दन॥ तत्किंकर्मणिघोरेमांनियोजयसिकेशव ॥ १॥ व्यामिश्रेणेववाक्येनबुद्धिंमोहयसीवमे ॥ तदेकंवदनिश्चित्ययेनश्रेयोहमाप्नुयाम्॥ २॥

ख्यनिष्ठायांसर्वकर्मफलांतर्भावश्रवणात्तामेवप्रशमालिकांस्वाशयानुकूलांमन्वानोर्जुनउवाच ज्यायसीति हेजनार्दनकर्मणोनिष्कामकर्मयोगापेक्षयाबुद्धिःसांख्यनिष्ठालक्षणंज्ञानंज्यायसीप्रशस्ततराचे त्तेतवमतातर्त्तर्हिमांनैक्ष्यदत्त्यापितुष्यंतंघोरेवंधुवधाख्येकर्मणिकिंकुतोहेतोर्नियोजयसिपुनःपुनर्युध्यस्वेतिवदन् ॥ १ ॥ ननुतवज्ञाननिष्ठायामनधिकारात्कर्मैवकुर्वितित्वांब्रवीमीत्याशंक्याह व्यामिश्रेणे ति व्यामिश्रेणअविविक्तेन इवशब्दोविविक्तेपिबुद्धिदोषात्अविविक्तांगृह्णामीतिसूचयति तेनवाक्येनत्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुनेतिकचिद्वेदनिष्ठांत्याजयसि कर्मण्येवाधिकारस्तेइतिताभेवच याहयसि तथानिर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेमआत्मवान्भवेतिनिवृत्तिमार्गमुपदिशसि धर्म्याद्धियुद्धात्श्रेयोन्यत्क्षत्रियस्यनविद्यतइतिप्रवृत्तिमप्युपदिशसि नस्रेकेनमयायुगपदुभयंस्थितिगतिवदनुष्ठातुं शक्यमतोमेममबुद्धिंमोहयसीववस्तुतस्तुममंमोहंनाशयितुंप्रवृत्तोसीतिइवशब्देनोच्यते तत्तयोर्मध्येयदेकंप्रधानंमद्योग्यंतत्निश्चित्यवदयेनानुष्ठितेनाहंश्रेयःकल्याणमामुयां ॥ २ ॥

अत्रोत्तरंश्रीभगवानुवाच लोकेस्मिन्निति पुरापूर्वाध्यायेमयानिष्ठाएकैवप्रोक्तापरंतुसाद्विविधाद्विप्रकारा एकस्याएवब्रह्मनिष्ठायाःप्रकारद्वयमुक्तमधिकारिभेदेननतुब्रह्मप्राप्तयेपरस्परनिरपेक्षमार्गद्वयमुक्तमितिभावः हेःनघविशुद्धांतःकरणमद्वचनस्यार्थसम्यगालोचयेत्यर्थः तदेवप्रकारद्वयमाह ज्ञानयोगेनेति सांख्यानांप्रकृतिपुरुषयोर्विवेकत्वंजानतामात्मानात्मविवेकज्ञानवतां ज्ञानार्थंयुज्यतेइतिज्ञानयोगःज्ञानोपायोवेदांतश्रवणमननिदिध्यासनात्मकस्तेनज्ञानयोगेनब्रह्मणिनिष्ठांपरिसमाप्तिसांख्याःप्रामुवंतीत्यर्थः योगिनांसिद्धासिद्धोःसमोभूत्वासमत्वंयोगउच्यतइत्युक्तलक्षणयोगवतांकर्मयोगेनसंन्यासनादिनिर्विकल्पकसमाध्यनुष्ठानांतमिहकर्मयोगपदार्थः तेनयोगिनोब्रह्मनिष्ठांप्रामुवंतीत्यर्थः अयंभावः इहजन्मनिजन्मांतरेवाईश्वरप्रीत्यर्थमनुष्ठितैःकर्मभिर्विशुद्धसत्वोविविकवैराग्यशमादिषट्कोपेतोमुमुक्षुःप्रत्यक्प्रवणचित्तःश्रवणमननाभ्यामेवकृतकृत्योभवति सचेत्श्रवणादेःप्रागसमाहितचित्तस्तर्हिनिदिध्यासनमस्यापेक्षितं अतएवसहकार्यंतरविधिःपक्षेणेतिसूत्रकृतानिदिध्यासनस्यपाक्षिकत्वमुक्तं

श्रीभगवानुवाच॥ ॥लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघ॥ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनाम्॥ ३॥

सोयंसांख्यमार्गः तथासर्वाणिकर्माणिपरमगुरावर्पयन्श्रवणमननात्मकंविचारमंतरेणैवकेवलंश्रद्धामात्रात्प्रतीचोनिर्विशेषब्रह्मरूपत्वंगुरुवाक्यतोनिश्चित्यासंभावनादिदोषरहितआचार्यान्निर्गुणब्रह्मोपासिप्रकारमधिगम्यकर्मच्छिद्रेषुसमाध्यभ्यासंकुर्वन्निष्कलंप्रत्यगात्मस्वरूपंसाक्षात्करोतिसोयंयोगमार्गः तेनऊहापोहकौशलंयेषामस्तितेसांख्याः येषांतन्नास्तितेयोगिनइति अतइयंद्विप्रकारानिष्ठाननुद्वेनिष्ठेइतिभमितव्यं यथोक्तंवसिष्ठेन द्वौक्रमौचित्तनाशस्ययोगोज्ञानंचराघव योगोवृत्तिनिरोधोहिज्ञानंसम्यगवेक्षणं असाध्यःकस्यचिद्योगःकस्यचित्तत्त्वनिश्चयः प्रकारौद्वौतयोर्देवोजगादपरमःशिवइति चित्तादर्शनोपलक्षितस्यब्रह्मसाक्षात्कारस्यद्वौक्रमौ चित्तादेर्मिथ्यात्वपक्षेज्ञानमेवयथारज्जूरगादिसम्यगवेक्षणेनैवनश्यतितद्वत् तस्यसत्यत्वपक्षेयोगएव यच्चासत्यउरगोमंत्रादिनानिरुद्धप्रचारःस्वयमेवनश्यतितद्वच्चित्तमपियोगेननिरुद्धमाननंनश्यति तस्यनिरन्वयोच्छेदस्तुप्रारब्धकर्मातेपक्षद्वयेपितुल्यइति ॥ ३ ॥ ॥ ३८ ॥

अनयोःप्रकारयोरंगांगिभावमाह नकर्मणामिति कर्मणांयज्ञादीनामनारंभादननुष्ठानात्नैष्कर्म्यंज्ञाननिष्ठांनाश्नुतेनप्राप्नोति विविदिषंतियज्ञेनेतिश्रुत्यायज्ञादीनांविद्यांगत्वेनविधानात् ननुसन्न्यत्ययप्रोधान्यात्कर्मणांविविदिषांगत्वमत्रगम्यते तेनविविदिषायांयज्ञादिनासिद्धायामेतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंतीतिश्रुतेःप्रव्रज्यारूपमेवनैष्कर्म्यमिहज्ञाननिष्ठासाधनंप्राप्तं नज्ञाननैष्कर्म्यसिद्धिंपरमामित्यादाविवात्रतद्ग्राहकस्यपरमत्वविशेषणस्याभावात् ननुकर्मयोगजनितचित्तशुद्ध्यभावेकेवलात्संन्यासात्सिद्धिंसमधिगच्छतीतियोजनायांविप्रकृष्टयोर्ज्ञानकर्मणोःसमुच्चयासंभवस्याभीष्टस्यसिद्धेःकिमितिनैष्कर्म्यशब्देननिष्ठाग्रहणइतिचेत्सत्यं गुणैःकर्मकार्यतइतिवाक्यशेषान्नैर्गुण्यहेतुकंमुख्यंज्ञानमेवेहनैष्कर्म्यपदार्थोनतुप्रव्रज्या विविदिषंतियज्ञेनेत्यत्रापिजिगमिषत्यश्वेनजिघांसत्यसिनेत्यादाविवतृतीयांतस्यधात्वर्थेनैवान्वयादश्वादीनांगमनादाविवयज्ञादीनांवेदनएवान्वयोज्ञेयः एतमेवेतिश्रुतिस्तुविविदिषासंन्यासाभिप्रायेणप्रवृत्ता एतंवैतमात्मानंविदित्वाब्राह्मणाःपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंतीतिज्ञानपरिपाकार्थस्यजीवन्मुक्तिसुखार्थस्यवायाज्ञवल्क्यादिभिरनुष्ठितस्यविद्वत्संन्यासस्यापिशास्त्रेदर्शनात् असंन्यासिनोज्ञानमेवनोत्पद्यतइतिप्राचामापद्होविक्षेपककर्मत्यागरूपसंन्यासविषयोनतुकाषायपरिधानमात्रविषयःगर्गोव्याधवासिष्ठादीनामतथाविधानामपिज्ञानोत्पत्त्यवगमादित्यास्तांतावत् कर्मभिरशोधितचित्तस्यमंदबुद्धेः रागद्वेषादिपस्तस्यात्मानात्म

नकर्मणामनारंभान्नैष्कर्म्यंपुरुषोश्नुते॥ नचसंन्यसनादेवसिद्धिंसमधिगच्छति॥ ४॥
नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत्॥ कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः॥ ५॥
कर्मेंद्रियाणिसंयम्ययआस्तेमनसास्मरन्॥ इंद्रियार्थान्विमूढात्मामिथ्याचारःसउच्यते॥ ६॥

विवेकद्वाराचित्तरोधद्वारावानैष्कर्म्यप्राप्तिर्नास्तीतिपूर्वार्द्धार्थः नन्वभयंसर्वभूतेभ्योदत्वानैष्कर्म्यमाचरेदितिकेवलात्कर्मसंन्यासादपिनैष्कर्म्यसिद्धिः स्मर्यतेतत्कथमुच्यतेनकर्मणामनारंभान्नैष्कर्म्यमस्तीतित्राहनचेतिकर्मजचित्तशुद्ध्यभावेकृतादपिसंन्यासान्नमोक्षसिद्धिः उदाहृतस्मृतिस्तुचित्तशुद्धिपूर्वकसंन्यासाभिप्राया नहिरागादिग्रस्तः सर्वभूतेभ्यःसर्वात्मनाऽभयंदातुमीष्टेःतोयुक्तमुक्तंनचसंन्यसनादेवेति ॥४॥ एतदेवप्रपंचयति नहीति अवशः कर्मजशुद्ध्यभावादजितचित्तः कश्चिदपिजातुकदाचित्समाधिकालेपिक्षणमपिअकर्मकृत्कर्माणिदुर्मनोरथादीनिअकुर्वन्नहिप्रसिद्धंनतिष्ठति हियस्मात्सर्वोपिलोकः प्रकृतिजैर्गुणैः सत्त्वरजस्तमोभिः स्वभावप्रभवैः रागद्वेषादिभिर्वाकर्मकायिकंवाचिकंमानसिकंवाकार्यतेऽवश्यंतत्रप्रवर्त्यते ॥ ५ ॥ ननुसंन्यासपूर्वकंध्यानेनैवचित्तशुद्धिमपिसंपादयिष्यामिर्किकर्मभिरित्याशंक्याहकर्मेंद्रियाणीति योविमूढात्मारागाद्याक्रांतचित्तः कर्मेंद्रियाणिवागादीनिसंयम्यनिगृह्यआस्तेएकांतिध्यानापदेशेनोपविशतिसमिथ्याचारः तस्यतदासननियमनादिकमाचरणंमिथ्याअलीकमेवनिष्फलत्वात् तत्रहेतुः इंद्रियार्थान्मनसास्मरन्निति यतःइंद्रियार्थान्शब्दादीन्श्रोत्रादिभिर्गृह्णातिमनसाचस्मरतिअतोमिथ्याचारःसविषयांश्चेतयन्योगनिष्ठामात्मनोलोकेऽभिव्यनक्त्यतःकपटीत्यर्थः तस्मात्कर्मव्यतिरिक्तश्चित्तशुद्ध्युपायोनास्तीतिभावः ॥ ६ ॥

यस्तुपूर्वस्मान्मिथ्याचाराद्विलक्षणःपुरुषधौरेयइंद्रियाणिमनसासंहनियम्यरागद्वेषवियुक्तानिकृत्वाकर्मेंद्रियैःकर्मयोगंआरभतेहेअर्जुनसःकर्मफलेस्वर्गादावैहिकेवाशब्दादावसक्तोऽनासक्तोऽतोविशिष्यते पूर्वस्मादधिकोभवतीत्यर्थः ॥ ७ ॥ नियतमिति यस्मादेवंतस्माच्चंनियतंसंध्योपासनादिकर्मैवकुरु यद्वा नियतंनियमेनत्वंकर्मनित्यकाम्यसाधारणंयत्यापनिवर्त्तकस्वभावंतत्तदेवकुरु हियस्मात्अकर्मणः सकलकर्मेंद्रियनिग्रहेणतदकरणात्चित्तजयशून्यात्कर्मैवज्यायःप्रशस्ततरं अपिचतेतवक्षत्रियस्यअकर्मणःसत्यामपिचित्तशुद्धौसर्वकर्मत्यागिनःशरीरयात्रादेहव्यवहारोनप्रसिद्धोत् नैष्क्यचर्यायामनधिकारात् ब्राह्मणाःपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंतीतिसंन्यासविधायकेवाक्येराजाराजसूयेनस्वाराज्यकामोयजेतेत्यत्रराजपदवद्ब्राह्मणपदस्यविवक्षितस्वार्थत्वात् तृचत्वारआश्रमाब्राह्मणस्यत्रयोराजन्यस्यद्वौवैश्यस्येतिस्मृतेश्च अन्यत्राप्युक्तंपारिव्राज्यंप्रकृत्य मुखजानामयंधर्मोवैष्णवंलिंगधारणं बाह्मजातोरुजातानांनायंधर्मोविधीयतइति ॥ ८ ॥ननुकर्मणाबद्धा तेजंतुरितिकर्मणांबंधकत्वस्मृतेःकथंमुमुक्षुंमांतत्रनियोजयसीत्याशंक्याह यज्ञार्थादिति यज्ञःपरमेश्वराराधनं यजदेवपूजांयामितिधात्वर्थानुगमात् तदर्थं यज्ञोवैविष्णुरितिश्रुतेर्विष्णुर्वातदाराधनार्थंयत्कर्म तनोन्यत्रकर्मणिस्वर्गाद्यर्थेप्रवृत्तोयंलोकःकर्मबंधनःकर्मणाबध्यतेनत्वीश्वराराधनार्थेन अतस्तदर्थंईश्वराराधनार्थंकर्मवर्णाश्रमोचितंहेकौंतेयमुक्तसंगःफलाभिलाषशून्यःसन्समाचरसम्यक्कुरु ॥ ९ ॥ एतदेवा

यस्त्विंद्रियाणिमनसानियम्यारभतेर्जुन ॥ कर्मेंद्रियैःकर्मयोगमसक्तःसविशिष्यते ॥ ७ ॥ नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः ॥ शरीरयात्रापिचतेनप्रसिद्ध्येदकर्मणः ॥ ८ ॥ यज्ञार्थात्कर्मणोन्यत्रलोकोयंकर्मबंधनः ॥ तदर्थंकर्मकौंतेयमुक्तसंगःसमाचर ॥ ९ ॥ सहयज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः ॥ अनेनप्रसविष्यध्वमेषवोस्त्विष्टकामधुक् ॥ १० ॥ देवान्भावयतानेनतेदेवाभावयंतुवः ॥ परस्परंभावयंतःश्रेयःपरमवाप्स्यथ ॥ ११ ॥ इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः ॥ तैर्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनएवसः ॥ १२ ॥ यज्ञशिष्टाशिनःसंतोमुच्यंतेसर्वकिल्बिषैः ॥ भुंजतेतेत्वघंपापायेपचंत्यात्मकारणात् ॥ १३ ॥

र्थवादेनद्वयंयति सहेति यज्ञैःसहेतिसहयज्ञाः वोपसर्जनस्येतिपक्षेसादेशाभावः कर्माधिकृताइतियावत् प्रजाश्चैवर्णिकाः अनेनयज्ञेनप्रसविष्यध्वंप्रसवोवृद्धिस्तांलभध्वं एषयज्ञोवोयुष्माकमिष्टकामधुक्इष्टार्थपूरकोस्तु ॥ १० ॥ इष्टार्थपूरकत्वमेवाह देवानिति भावयतनर्पयत अनेनदेवतापूजात्मकेनयज्ञेनवःयुष्मान्भावयंतुवृद्ध्यादिदानेनपरस्परंभावयंतोदेवाश्चयूयंचश्रेयःपरंप्राप्स्यथ॥ ११॥किंच इष्टा न्पुत्रपश्वादीन्वःयुष्मभ्यं एभ्योदेवेभ्यस्तद्दत्तानेवह्विर्हिपश्वाज्यादीन्अप्रदायअदत्वादेवतोद्देशेनद्रव्यत्यागात्मकंयागंनित्यनैमित्तिकरूपंवैश्वदेवाग्निहोत्रजातेष्ट्यादिरूपमकृत्वेत्यर्थः अदत्वायोभुंक्तेसस्ते नएव॥ १२॥येतुयज्ञशिष्टाशिनःवैश्वदेवादिशेषान्नभोजनशीलाःसंतःऋणापाकरणात्तेमुच्यंतेसर्वकिल्बिषैःप्रमादकृतैर्विहिताकरणनिमित्तैःपंचसूनानिमित्तैर्वा येत्वात्मकारणात्स्वार्थमेवपचंतिननुपंचमहा यज्ञार्थंतेपापाःस्वयंपापरूपाएवसंतःपापमेवभुंजते तथाचस्मृतिः कंडनीपेषणीचुल्ल्युदकुंभीचमार्जनी पंचसूनागृहस्थस्यताभिःस्वर्गंनविंदतीति पंचसूनाकृतंपापंपचयद्वैर्व्यपोहतीतिच श्रुतिश्च इदमेवास्य तत्साधारणमन्नंयदिदमद्यतेसयएतदुपास्तेनसपाप्मनोव्यावर्त्ततेमिश्रंश्लेतदिति मंत्रवर्णोपि मोघमन्नंविंदतेअपचेताःसत्यंब्रवीमिवधइत्सतस्य नार्यमणंपुष्यतिनोसखायंकेवलाघोभवतिकेवलादीति ॥ १३ ॥

जगच्चकप्रवृत्तिहेतुत्वादपिकर्मकर्त्तव्यमित्याह अन्नादिति अन्नाद्येनोरूपेणपरिणतात्भूतानिप्राणिशरीराणिभवंति अन्नंचपर्जन्याद् एतत्सिद्धमेव यज्ञाद्भवतिपर्जन्यः अग्नौप्रास्ताद्हुतिःसम्यगादित्य मुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मृतेः यज्ञोदेवतारा धनजोधर्मः कर्मभ्योयागहोमदानादिभ्यःसमुद्भवतीतिकर्मसमुद्भवः ॥ १४ ॥ कर्मब्रह्मोद्भववेदोद्भवं वेदएवधर्मैप्रमाणंननुपाखंडादि प्रणीतागमः ब्रह्मवेदोपिअक्षरसमुद्भवं अस्यमहतोभूतस्यनिःश्वसितमेतद्यग्वेदोयजुर्वेदइत्यादिश्रुतेः साक्षात्परमेश्वरादेवोत्पन्नोऽतोनतत्रअभवित्प्रलंभकत्वादिदोषाकांतपाखंडादिवाक्यवदप्रामाण्यशंका स्तीतिभावः यस्मादेवंतस्मात्सर्वस्मिन्देशेकालेचवर्त्तमानंब्रह्मवेदः एतेनवेदस्यनित्यत्वंशब्दस्यविभुत्वंचदर्शितं नित्यंनियमेनयज्ञेप्रतिष्ठितंतात्पर्येणपर्यवसन्नं ॥ १५ ॥ भवत्वेवंततःकिफलितमित्यतआह एव मिति भूतानामादौवेदाधिगमस्ततःकर्मानुष्ठानंततोदेवानांतृप्तिस्ततोवृष्टिस्ततोन्नंततोभूतानितेषांवेदाधिगमइत्येवंरूपंचक्रमिवचक्रंनिरंतरमावर्त्तमानंजगद्यात्रानिर्वाहकंनानुवर्त्तयतिनानुतिष्ठतिसःअघायुः पापजीवनः इंद्रियारामोनतुधर्मारामआत्मारामोवा मोघंव्यर्थंदंशमशकादिवत्जीवति यस्त्वेतदनुवर्त्तयतिसजगदुपकारकोधन्यइतिभावःतथाचश्रुतिः अथोअयंवाआत्मासर्वेषांभूतानांलोकःसयज्जुहो

अन्नाद्भवंतिभूतानिपर्जन्यादन्नसंभवः॥ यज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमुद्भवः॥ १४॥ कर्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवम्॥ तस्मात्सर्वगतंब्रह्मनित्यंयज्ञेप्रतिष्ठितम्॥ १५॥ एवंप्रवर्तितंचक्रंनानुवर्त्तयतीहयः॥ अघायुरिंद्रियारामोमोघंपार्थसजीवति॥ १६॥ यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः॥ आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यते॥ १७॥

तियद्यजतेतेनदेवानांलोकोथयदनुब्रूतेतेनऋषीणामथयत्पितृभ्योनिपृणातियत्प्रजामिच्छतितेनपितॄणामथयन्मनुष्यान्वासयतेयदेभ्योशनंददातितेनमनुष्याणामथयत्पशुभ्यस्तृणोदकंविंदतितेनपशूनांयद स्यगृहेषुश्वापदावायांस्यापिपीलिकाभ्यउपजीवंतितेननेषांलोकःकदनि ॥ १६ ॥ एवमीश्वरेणवेदयज्ञपूर्वकंजगच्चक्रंप्रवर्त्तितमज्ञैरधिकृतैरनुवर्तितव्यमित्युक्तं अस्यानुवर्त्तनेचमहान्प्रत्यवायउक्तः सब्रह्म विदमपिस्मरोदितिसंज्ञाविताभाशंकांपरिहरति यस्त्विति आत्मन्येवरतिःप्रीतिर्यस्यननुरुध्यादौसतथा नन्वात्मनिप्रीतिःप्राणिमात्रस्यानौपाधिकीअस्तिप्रत्युततदर्थंत्वनैवरूढ्यादिष्वपिप्रीतिर्भवतीत्यतउक्तं आ त्मतृप्तइति आत्मनैवपरमानंदरूपेणतृप्तोनमिष्टान्नादिना ननुमंदाग्निरपिरूढ्यादीनरमतेनापिमिष्टान्नेननृप्यतिअतउक्तं आत्मन्येवचसंतुष्टइति मंदाग्निर्हिधातुदृद्धिजाठरोद्दीपनंचकामयमानऔषधाद्यर्थं मितस्ततोधावतिनत्वात्मन्येवतुप्यतिविद्वांस्तुरतितृप्तिनुष्टीरात्मनैवानुभवतिनरूढ्यन्नधनादिभिरितिस्तस्यकार्यंकर्त्तव्यंकिमपिनास्ति क्रियाप्राप्यस्यकस्यचिदप्यर्थस्याभावात् ॥ १७ ॥

एतदेवाह नैवेति तस्यात्मरतेःकृतेनकर्मणाअर्थःप्रयोजनंनास्ति स्वर्गादौलिप्साभावात् मोक्षस्यचाक्रियासाध्यत्वात् नास्यकृतःकृतेनेतिश्रुतेः अकृतोमोक्षःकृतेनकर्मणानास्तीतिश्रुत्यर्थः अकृतेनविरुद्धक र्मणापिअर्थोनरकादिरस्यनास्ति अत्रकृताकृतशब्दौमित्रामित्रपदवत्परस्परविरुद्धार्थवाचितयापुण्यपापवचनौ येतुअकृतेनेतिभावेनिष्ठा नित्याकरणात्गर्हितत्वरूपोवाप्रत्यवायप्रामिरूपोवाकश्चना र्थोविद्युषोनास्तीतिव्याचक्षते तेषामप्यभावात्प्राप्तावोत्पत्तेरनभ्युपगमान्नित्यानांकालेयदन्यदविहितंक्रियतेततएवप्रत्यवायोत्पादोवक्तव्यइतिघट्टकुट्यांप्रभातदत्तांतआपद्यते अत्रोपपत्तिमाह नचेति चो हेतौ यस्मात्आत्मरतेःसर्वभूतेषुचेतनाचेतनेषुउत्तममध्यमाधमेषुकश्चिदपिअर्थव्यपाश्रयःसुखभोगात्मकप्रयोजनाभिसंबंधोनास्ति आत्मरतित्वादेव निष्कामत्वाद्विदुषःपुण्यपापफलसंबंधोनास्तीत्यर्थः ॥ १८ ॥ यस्मान्निष्कामस्यकर्मलेपोनास्तितस्मात्त्वमपिअसक्तःफलासक्तिशून्यःसततंसर्वदाकार्यंअवश्यकर्त्तव्यंकर्मनित्यनैमित्तिकंसमाचर हियस्मात्असक्तःकर्माचरन्परंमोक्षंसत्त्वशुद्धिद्वारेणाप्नोति ॥ १९ ॥ अत्रशिष्टाचारंप्रमाणयति कर्मणेति कर्मणैवसहसंसिद्धिश्रवणादिसाध्यांज्ञाननिष्ठांगंतुंआस्थिताःप्रवृत्ताःजनकादयस्त्वादृशाःक्षत्रियाःनतुसंन्यासेन ननुशुद्धचित्तस्यममनास्तिकर्मापेक्षेत्याशं क्ष्याह लोकेतिलोकस्यसंग्रहःस्वधर्मैप्रवर्त्तनं ननुस्वप्रयोजनाभावेपिकेवलंलोकसंग्रहार्थंचेत्कर्मकर्त्तव्यंतदाविदुषांब्राह्मणानामपिसंन्यासोनस्यात् यतीनेवसंन्यासधर्मान्नृपाहयियुर्तेषांसंन्यासइतिचेत्

नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन ॥ नचास्यसर्वभूतेषुकश्चिदर्थव्यपाश्रयः ॥ १८॥ तस्मादसक्तःसततंकार्यंकर्मसमाचर ॥ असक्तोह्याचरन्कर्मपरमाप्नोति पूरुषः ॥ १९॥ कर्मणैवहिसंसिद्धिमास्थिताजनकादयः॥ लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसि ॥ २० ॥ यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः ॥ सयत्प्रमाणंकुरुतेलोकस्तदनुवर्त्तते ॥ २१ ॥ नमेपार्यास्तिकर्त्तव्यंत्रिषुलोकेषुकिंचन ॥ नानवाप्तमवाप्तव्यंवर्त्तएवचकर्मणि ॥ २२ ॥ यदिह्यहंनवर्त्तेयंजातुकर्मण्यतंद्रितः ॥ ममवर्त्मानुवर्त्तंतेमनुष्याःपार्थसर्वशः ॥ २३ ॥ उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहं ॥ संकरस्यचकर्त्तास्यामुपहन्यामिमाःप्रजाः ॥ २४ ॥ सक्ताःकर्मण्यविद्वांसोय थाकुर्वंतिभारत ॥ कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं ॥ २५ ॥

अर्जुनेपिनतदंडवारितमस्ति ननुक्षत्रियस्यसंन्यासेधिकारोनास्तीतिचेत्लिंगधारणेधिकाराभावेपिभरतकृष्णभादिवद्विक्षेपकर्मत्यागमात्रेधिकारात् वार्त्तिके सर्वाधिकारविच्छेदिज्ञानंचेदभ्युपेयते कुतो धिकारनियमोव्युत्थानेकियतेबलादितिविद्वत्संन्यासेक्षत्रियादेरपिअधिकारस्यसाधितत्वात् अतोलोकसंग्रहोनमुख्यंकर्मप्रयोजनमितिचेत्सत्यं नमेपार्थास्तिकर्त्तव्यमितिस्वदृष्टांतेनाधिकारिकत्वादर्जु नएवैवंनियोज्यतेनक्षत्रियमात्रमितिनुप्यनुभवात् ॥ २० ॥ २१ ॥ कर्मणिवर्त्तेएवअहंकर्मकरोम्येवेत्यर्थः ॥ २२ ॥ यथहंकर्मणिनवर्त्तेयंतर्हिमनुष्याःममैववर्त्मानुवर्त्तंतेअनुवर्त्तेरन्कर्मनकुर्वीरन्नित्यर्थः अतंद्रितोऽनलसः सर्वशःसर्वप्रकारैः ॥ २३ ॥ ततश्चकिमित्यतआह उत्सीदेयुरिति यद्यदाचरतीत्यादेरपरायोजना नकेवलंलोकसंग्रहंपश्यन्कर्तुमर्हसिअपितुश्रेष्ठाचारत्वादपीत्याह यद्यदिति तथाचमम श्रेष्ठस्यह्यादृशआचारस्तादृश एवमदनुवर्त्तिनात्वयानुष्ठेयःनस्वातंत्र्येणान्यइत्यर्थः कीदृशस्तवाचारोयोमयानुवर्त्तनीयइत्याकांक्षायांनमेपार्थेत्यादिभिस्त्रिभिःश्लोकैस्तत्प्रदर्शनमितिमधुसूदनश्रीपादाः ॥ २४ ॥ यदिमादृशएवत्वंकृतार्थोसितथापिपरानुपहार्थंकर्माणिकुर्वित्याह सक्ताइति कर्मणिकर्मफले कुर्वंतिकर्माणीतिशेषः असक्तइतिच्छेदः ॥ २५ ॥

विद्वान्अज्ञानांकर्मस्वासक्तानांबुद्धिभेदंबुद्धेश्चालनंनजनयेत्नोत्पादयेत्किंतुतान्सर्वाणिकर्माणिजोषयेत्सेवयेत् कथं युक्तआदृतोभूत्वासमाचरन् ॥ २६ ॥ अविद्वान्कथंकर्मसुसज्जतइत्यतआह प्र कृतेरिति प्रकृतेःपारमेश्वर्याःसत्वरजस्तमोगुणात्मिकायादेवात्मशक्तिस्वगुणैर्निगूढामितिश्रुतिप्रसिद्धायाःशक्तेर्गुणैःकार्यकारणसंघातात्मकैःक्रियमाणानिकर्माणिअहंकारेणस्वस्मिन्मध्यस्तेनविमूढःतदीया नूकर्तृत्वादीनात्मधर्मत्वेनपश्यन्नात्मनश्चअसंगानंदसंविद्रूपतामपश्यन्नात्माअहंकारेणविमूढश्चासावात्माचेतिविपहः अहंकर्माणिकर्मणांकर्त्तेतिमन्यतेकर्त्रध्यासेन कर्ताहमितितून्प्रत्ययस्तेननलोका व्ययनिष्ठाखलर्थतृनामितिषष्ठीनिषेधः अन्यथातृच्प्रत्ययेकर्मणांकर्त्ताहमितिषष्ठ्याभाव्यं ॥ २७ ॥ एवंसक्तस्यकर्माचरणंप्रदर्श्यासक्तस्यतत्प्रदर्शयति तत्त्ववित्तिति गुणकर्मविभागयोःगुणविभागस्यकर्मवि भागस्यचतत्त्ववित्तिमाभ्यं नाहंगुणात्मकइतिगुणेभ्यआत्मनोविभागः नाहंकर्मात्मकइतिकर्मभ्यश्चात्मनोविभागः तयोर्गुणकर्मविभागयोस्तत्त्ववेत्तीतिश्रीधरः मधुसूदनस्तुगुणाःदेहेंद्रियांतःकरणानिअहं कारास्पदानि कर्माणिचतेषांव्यापारभूतानिममकारास्पदानि गुणकर्मेतिद्वंद्वैकवद्भावः विभज्यतेसर्वेषांजडानांभासकत्वेनपृथक्क्रियतीतिविभागः स्वप्रकाशज्ञानरूपोःसंगआत्मा गुणकर्मचविभागश्चेतिद्व द्वः तयोर्जडाजडयोस्तत्त्वंयोवेत्तिसः गुणाःकरणात्मकाःगुणेषुविषयेषुवर्त्तंतेइतिमत्वानसज्जतेकर्तृत्वाभिनिवेशंनकरोतीत्यर्थः गुणविभागस्यकर्मविभागस्यचतत्त्वविदितिपक्षेगुणकर्मणोरित्येवसिद्धेविभाग

नबुद्धिभेदंजनयेद्ज्ञानांकर्मसंगिनां ॥ जोषयेत्सर्वकर्माणिविद्वान्युक्तःसमाचरन् ॥ २६ ॥
प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः ॥ अहंकारविमूढात्माकर्त्ताहमितिमन्यते ॥ २७ ॥
तत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः ॥ गुणागुणेषुवर्त्तंतइतिमत्वानसज्जते ॥ २८ ॥

पदंव्यर्थमिति यद्वायस्तत्त्ववित्सगुणाःगुणेषुवर्त्तंतइतिमत्वागुणविभागेकर्मविभागेचनसज्जतेइतियोजना गुणानांसत्त्वरजस्तमसांविभागोबुद्ध्यहंकारज्ञानेंद्रियकर्मेंद्रियविषयरूपेणविभज्यावस्थानंतस्मि न्नसज्जतेइदमहमितिनमन्यते तथाहि शरीरेगौरेऽहंगौरोस्मिहस्ताभ्यामान्नेमयेदमात्तमितिचक्षुषादृष्टेमयेदंदृष्टमितिअहंकारेणाभिमतेममेदमित्यभिमन्यते बुद्धौविकियमाणायाश्चहंसुखीतिचसर्वेषुबुद्धा दिषुविभज्यगृह्यमाणेष्वपिप्रत्येकंप्रत्यक्त्वमध्यस्याहमिदमितिममेदंकर्मेतिचमन्यते एतेनकर्मविभागोप्यावश्यकत्वेनव्याख्यातः अन्यथाचिदात्मन्येवआदानादिकर्तृत्वंदुःखादिमत्त्वंचापतति अयंचकर्म विभागःश्रुत्यापिदर्शितः अंधोमणिमविंदत् तमनंगुलिराबयत् अपीवःप्रत्यमुंचत् तमजिह्वोअसश्वतेति अंधःस्वयंप्रकाशहीनोपिचक्षुरादिर्मणिरूपादिकंविषयमविंदत्प्रकाशयति अनंगुलिःकाष्ठलोष्टादि वत्जडत्वात्स्वयंकर्मकर्तुमशक्तोपिपाण्यादिःआबयत्आसीव्यत्विषयंउपादत्ते अपीवःछिन्नशिरस्कबन्धिजींवोहंकारस्तंप्रत्यमुंचत्पीवार्यांधारयतिममयेदंलब्धमितिमन्यते अजिह्वोधीधातुःजडत्वात्स्व यंस्वगतसुखदुःखयोःपटइवस्वगतरूपादेःप्रकाशनेअसमर्थोपिअहंसुखीदुःखीतिचानुभवति तथाचआत्मानात्मनोर्याथात्म्यज्ञोव्याढत्तेष्वहंकारादिपुत्तकर्मसुचाभिमानादिपुकुसुमेषुसूत्रमिवानुवर्त्तमान मात्मानंतेभ्यःपृथक्भूतंजानन्गुणाधीचक्षुरादयोगुणेषुदुःखरूपादिषुवर्त्तंतेनत्वात्मेतिमत्वानसज्जतेऽहमेवहस्तादिसंघातरूपोममैवेदमादानादिकंकर्मेतिनसक्तोभवतीत्यर्थः ॥ २८ ॥

एवंसक्तासक्तयोःकर्माणिविभज्यसक्तकर्मानुवादपूर्वकंनबुद्धिभेदंजनयेदज्ञानामित्युपक्रांतमुपसंहरति प्रकृतेरिति गुणैरहंकारादिभिःस्वस्मिन्ध्यस्तैःसंमूढाःएकीभावेनअभेदाध्यासेनमूढास्तुप्रकृतेःप्रकृतिसंबंधिषुगुणेषुदेहादिषुकर्मसुगमनादिषुचसज्जंतेअहमयंब्राह्मणोममैवेदंयज्ञादिकंकर्मेतिसज्जंतेसक्ताभवंतितान्मूढत्वात्अकृत्स्नविदःआत्मज्ञानहीनान् आत्मविद्विकृत्स्नवित् आत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञाननेनेदंसर्वंविदितमितिश्रुतेः मंदान्शास्त्रार्थग्रहणासमर्थान्कृत्स्नवित्आत्मविन्नविचालयेत्कर्मनिष्ठातोनप्रच्यावयेत् तेषामुभयभ्रष्टत्वापत्तेः प्रकृतेर्गुणैःसंमूढाःगुणानांकर्मसुसज्जंतइतिप्राचांयोजना॥२९॥मयीति त्वंतुअज्ञोमुमुक्षुश्चमयिसर्वाणिकर्माणिसंन्यस्यसमर्प्यअध्यात्मचेतसाआत्मानमधिकृत्यप्रवृत्तंशास्त्रंअध्यात्मंतत्रप्रवणेनचेतसा शाकपार्थिवादिवन्मध्यमपदलोपीसमासः आत्मानात्मविवेकवतेत्यर्थः ईश्वरप्रेरितोहंकरोमीत्यनयाबुद्ध्यानिराशीःफलमनिच्छन्निर्ममोलब्धेममत्वाभिमानशून्यश्चभूत्वायुध्यस्वविगतज्वरोविशोकःसन्॥३०॥येमइति येन्येपित्वादृशाःमेममतं असत्त्याकर्मानुष्ठानंअनुतिष्ठंतिअनुवर्त्तंतेमानवाःश्रद्धावंतःअनसूयंतःअत्रदोषमपश्यंतःतेपिस्वकर्मभिर्धर्माधर्माख्यैःमुच्यंते॥३१॥ विपक्षेदोषमाह येत्विति सर्वशब्दईश्वरवाची सर्वैसमामोचितोसिसर्व इतिनिर्वचनात् तस्यज्ञानेविषयेविशेषेणमूढान्परोक्ष्येणापितेईश्वरमजानंतोदेहमात्रनिष्ठास्तान्नष्टान्नष्टत्वगपवर्गभ्रष्टान्अचेतसःविवेकशून्यान्॥३२॥ननुतेचेत्तवमतंनानुतिष्ठंतिहिकथंतवांतर्यामित्वमि

प्रकृतेर्गुणसंमूढाःसज्जंतेगुणकर्मसु॥ तानकृत्स्नविदोमंदान्कृत्स्नविन्नविचालयेत्॥ २९ ॥ मयिसर्वाणिकर्माणिसंन्यस्याध्यात्मचेतसा॥ निराशीर्निर्ममोभूत्वायुध्यस्वविगतज्वरः॥३० ॥येमेमतमिदंनित्यमनुतिष्ठंतिमानवाः॥ श्रद्धावंतोनसूयंतोमुच्यंतेतेपिकर्मभिः॥ ३१ ॥ येत्वेतदभ्यसूयंतोनानुतिष्ठंतिमेमतम् ॥ सर्वज्ञानविमूढांस्तान्विद्धिनष्टानचेतसः॥ ३२॥ सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि॥ प्रकृतिंयांतिभूतानिनिग्रहःकिंकरिष्यति॥ ३३ ॥ इंद्रियस्येंद्रियस्यार्थे रागद्वेषौव्यवस्थितौ॥ तयोर्नवशमागच्छेत्तौह्यस्यपरिपंथिनौ॥ ३४॥

त्यतआह सदृशमिति स्वस्याःप्रकृतेःस्वकीयस्यप्राग्भवीयधर्माधर्मसंस्कारस्यसदृशमनुरूपंज्ञानवानपिचेष्टतेकिमुमूर्खः पश्वादिभिश्चाविशेषादितिन्यायात् तस्मात्प्रकृतिंयांतिअनुसरंतिभूतानिप्राणिनस्तत्रममवान्यस्यवानिग्रहःकिंकरिष्यतिनकिमपि अहमपिपूर्वकर्मापेक्षयैवतान्प्रवर्त्तयामीतिभावः॥ ३३॥ एवंतर्हिपुरुषस्यस्वातंत्र्याभावाद्विधिनिषेधशास्त्रंव्यर्थमित्याशंक्याह इंद्रियस्येति इंद्रियस्येंद्रियस्येतिद्विर्वचनंवीप्सायां प्रतींद्रियंस्वेस्वेर्थेशब्दादौवचनादौचविषयेरागद्वेषौअनुकूलेरागःप्रतिकूलेद्वेषश्चव्यवस्थितौनित्यसंबद्धौ तत्रतयोर्वशंनागच्छेदितिशास्त्रस्याभ्युन्नुज्ञा पुरुषस्यचतदनुष्ठानेस्वातंत्र्यमस्तिहियतःतौरागद्वेषावेवास्यप्राणिनःपरिपंथिनौविरोधिनौदृष्टद्वारेणप्रवर्त्तकत्वात्ननुप्रकृत्यनुसारीईश्वरोस्यपरिपंथी तस्यवैषम्यादिदोषापत्तेः अयंभावः यथाह्यस्तनेनस्वाज्ञोल्लंघनजेनापराधेनकुपितोराजाःपराधिनंहिनिगडादौनियम्यहीतुंस्त्रीयानूभटान्प्रवर्त्तयतिसएवाद्यतनेनदानमानेनप्रसादितएनंतेषामेवभटानामाधिपत्येनियुंक्ते एवंपूर्वकर्मानुसारीईश्वरोरागादिद्वारापुरुषंबाधमानोपिविधिप्रतिषेधशास्त्रानुसारिणातेनैवभक्तिध्यानप्रणिधानेनावर्जितःएनंरागादिजयेनियुंक्तेतस्माद्विधिप्रतिषेधशास्त्रस्यनानर्थक्यं पुरुषस्यस्वातंत्र्यसत्त्वात् नापीश्वरेवैषम्यादिकं प्राणिकर्मायत्तत्त्वादिति॥ ३४ ॥

॥ ४१ ॥

यस्मादेवंतस्मात्श्रेयान्प्रशस्ततरःस्वधर्मः स्वस्यवर्णाश्रमानुरूप्येणईश्वरेणविहितत्वात् विगुणोहिंसादिमिश्रोपिकिंचिदंगहीनोपिपरधर्मात्हिंसादिदोषरहितपरधर्मापेक्षयास्वनुष्ठितात्सर्वांगोपसंहारेणसम्यगनुष्ठितादपिसएवश्रेयान् स्वधर्मेयुद्धादौनिधनंमरणमपिश्रेयः विहितत्वात् परस्यधर्मोत्रैक्षचर्यादिर्भयावहः क्षत्रियस्यतबनिषिद्धत्वात् तस्मात्स्वतंत्रेणत्वयास्वधर्मएवानुष्ठेयइतिभावः॥ ३५॥ ईश्वरोधर्माधर्मौरागद्वेषौवापुरुषस्यप्रवर्त्तकौभवतइत्यात्मनोःस्वातंत्र्यमन्वानोर्जुनउवाच अथकेनेति केनईश्वरादीनामन्यतमेनान्येनवाप्रयुक्तःप्रवर्तितःसन्अयंपुरुषःपापमनिष्टंचरतिकरोति अनिच्छन्नित्यनेनरागद्वेषयोःप्रवर्त्तकत्वंनिरस्तं सतिहिरागेइच्छाभवति अतइच्छायाअभावाद्रागाभावः रागस्याप्रवर्तकत्वेतन्मूलभूतसंस्कारहेत्वोर्धर्माधर्मयोरप्रवर्त्तकत्वंततश्चतत्सापेक्षस्यईश्वरस्यापीतिसर्वैषामाक्षेपः तस्मान्मुख्यंप्रवर्त्तकंयत्तद्वाच्यमित्यर्थः बलादिवनियोजितःविष्टिगृहीतइवेत्यर्थः॥ ३६॥ अत्रोत्तरंकाममयएवायंपुरुषइत्यादिश्रुतिसिद्धंभगवानुवाच कामएषइति एषप्रसिद्धःकामःसोकामयतजायामेस्याद्यप्रजायेयाथवित्तमेस्यादथकर्मकुर्वीयेतिश्रुतेरिदंमेभूयादिदंमेभूयादितिनीत्राभिलाषहेतुभूतश्चेतसोऽनवस्थितत्वापादकोदत्तिविशेषःसचचेतोरूपएव कामःसंकल्पइत्युपक्रम्यैतत्सर्वंमनइत्युपसंहारात् सएषकामःकेनचिन्निमित्तेनप्रतिहतःक्रोधरूपेणपरिणमतेऽतःक्रोधोग्निज्वलनात्माप्येषएवतमेनमिहशारीरेतःस्थितंवैरिणंविद्धि कुतोवैरी यतःरजोगुणसमुद्भवःरजोरंजनात्मकःप्राकृतोगुणस्तस्यगुणोकार्यभू

श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात्॥ स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः॥ ३५॥ ॥ अर्जुनउवाच॥ ॥ अथकेनप्रयुक्तोयंपापंचरतिपूरुषः॥ अनिच्छन्नपिवार्ष्णेयबलादिवनियोजितः॥३६॥ ॥श्रीभगवानुवाच॥ ॥कामएषक्रोधएषरजोगुणसमुद्भवः॥महाशनोमहापाप्माविद्ध्येनमिहवैरिणम्॥३७॥धूमेनाव्रियतेवह्निर्यथादर्शोमलेनच॥ यथोल्बेनावृतोगर्भस्तथातेनेदमावृतम्॥३८॥ आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा॥ कामरूपेणकौंतेयदुष्पूरेणानलेनच॥ ३९

नीतृष्णासंगीतावेवउद्भवोयस्यसःरजःकार्यत्वात्दुःखैकफलोयमनोवैरी यद्वारजोगुणस्यलोभप्रवृत्त्यादिलक्षणस्यसमुद्भवोयस्मात् ननुविषयाभिलाषात्मकःकामोविषयार्पणेनशाम्यतिविषयस्यदौर्लभ्यनिश्चयेस्वतएवानिवर्त्ततेअंधइवरूपदर्शनाभिलाषादित्याशंक्याह महाशनोमहापाप्मेति महद्दातुमपारणीयंअशनमस्यसतथा यथोक्तं नजातुकामःकामानामुपभोगेनशाम्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्धतेइति यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः नालमेकस्यतत्सर्वमितिमत्वाशमंव्रजेदिति तथामहापाप्माअत्युग्रः सहिसहस्रशःप्रबोधितोपिननिवर्त्ततेतद्वदयमपिदुश्चिकित्स्यः महाशनत्वान्नायंवैरीदानसाध्यः नापिसामभेदसाध्यः अत्युग्रत्वात् अतोहंतव्यएवेति॥३७॥अस्यवैरित्वमेवविवृणोति धूमेनेत्यादिना उल्बेनगर्भवेष्टनेनजरायुणा तेनकामेनइदंवक्ष्यमाणंज्ञानमावृतं आवरणीयस्यचैविध्यात्तदनुगुणंदृष्टांतत्रयंज्ञेयं ॥ ३८ ॥ आवृतमिति ज्ञानंअंतःकरणसत्त्वं ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेतिश्रुतेः एतेनकामेनरजोगुणात्मकेनआवृतं ज्ञानिनःअंतःकरणविशिष्टस्यप्रमातुर्नित्यवैरिणाकामरूपेणदुष्पूरेणपूरयितुमयोग्येन अयंहिपूर्यमाणोऽनर्थनिवर्त्तकत्वेन अनलेन अथापिपूर्यतेचेत्अनलःनास्यलंपर्याप्तिर्यस्यसतथातेनानलेन नह्यनलःकाष्ठैस्तर्पयितुंशक्यः किंतुवर्धतएवतद्वदयमपीत्यर्थः अयंभावः अंतःकरणसत्वंहिवह्निवत्प्रकाशात्मकंतत्सहजेनकामेनवह्निरिवधूमेनावृतंचेत्प्रमातारमनर्थेपातयति अन्यथातदेवस्वभावशुद्धत्वात्विवेकवैराग्योपगंभूत्वात्मुद्धरेत् अतोयंकामोज्ञानिनोनित्यवैरीति॥ ३९ ॥

किंच इंद्रियाणीति अयमर्थः इंद्रियमनोबुद्धयोहिकामेनाधिष्ठिताबाह्यार्थप्रवणाभवंति तैश्चतथाभूतैरयंकामोज्ञानंचिदाकाशरूपमादर्शतलप्रख्यं यत्रयोगिनोव्यवहितंविप्रकृष्टमतीतमनागतंवापश्यंति यथोक्तमाचार्यैः विश्वंदर्पणदृश्यमाननगरीतुल्यंनिजांतर्गतंपश्यंत्यात्मनीति निजांतर्गतंशरीरांतर्गतं आत्मनिहार्दाकाशाख्येब्रह्मणि तत्मलेनादर्शमिवात्यल्पदेहिनंदेहाभिमानिनंविशेषेणमोहयति विशब्दा त्देहाभिमानशून्यंयोगिनमपिव्युत्थानावस्थायांकिंचिन्मोहयतीतिगम्यतइति अक्षरयोजनास्पष्टा ॥ ४० ॥ तस्मादिति यस्मादिंद्रियाण्यस्याधिष्ठानंसामंतस्येवगिरिदुर्गादिकंतस्मात्तान्येवनियम्यवशीकृ त्यएनंकामंहिनिश्चयेनप्रजहिप्रकर्षेणनाशय गिरिदुर्गादीनूत्साद्यत्तीकृत्येवतस्थंसामंतंग्रंतिराजानस्तद्वत् हंतव्यत्वेहेतुः पाप्मानमत्युग्रं तत्रापिहेतुः ज्ञानविज्ञाननाशनमिति ज्ञानस्यशास्त्राचार्योपदेशजस्यप रोक्षस्यविज्ञानस्यनिदिध्यासनपरिपाकजस्यापरोक्षस्यचनाशनं ॥ ४१ ॥ नकेवलंबाह्येंद्रियजयेनैवकृतार्थत्वंकिंतुमनोबुद्ध्योरपिजयःकर्तव्यःकामस्यसमूलोच्छेदाय त्रिप्राकारदुर्गस्थस्यसामंतस्येवाभ्यंत रप्राकारद्वयजयेन अतोमनोबुद्ध्योर्जयार्थंयोगंदर्शयति इंद्रियाणीति अत्रपरत्वंसूक्ष्मत्वेनकारणत्वेनबाबोध्यं इंद्रियाणिचक्षुरादीनिपराणिस्वविषयेभ्यः पृथिव्यादिस्थाश्रयसहितेभ्योगंधादिभ्योवित्तपुत्र

इंद्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते ॥ एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनम् ॥ ४० ॥
तस्मात्त्वमिंद्रियाण्यादौनियम्यभरतर्षभ ॥ पाप्मानंप्रजहित्येनंज्ञानविज्ञाननाशनम् ॥ ४१ ॥
इंद्रियाणिपराण्याहुरिंद्रियेभ्यःपरंमनः ॥ मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसः ॥ ४२ ॥

शरीरेभ्यश्च तेषांतत्कारणत्वात् तथाचकौषीतकिनःसमामनंतिब्राह्मणे प्राणेभ्योदेवादेवेभ्योलोकाइति व्युच्चरंतीत्यनुषज्यते प्राणेभ्यइंद्रियेभ्योदेवास्तदधिष्ठात्र्योदेवताउत्पद्यंते देवेभ्यश्चलोकाभूतभौतिका उत्पद्यंतइतिश्रुत्यर्थः इंद्रियेभ्यःपरंमनःमनसाह्येवपश्यतिमनसाशृणोतीतिश्रुतेरिंद्रियाणांमनोविकारत्वात् तेनबाह्यार्थेभ्यइंद्रियाण्याकृष्यमननसिप्रविलापनीयानीतिदर्शितं केवलंपरत्वमात्रप्रतिपादनेप्रयो जनाभावात्मनसस्तुपराबुद्धिः तस्माद्वाएतस्मान्मनोमयात् अन्योंतरआत्माविज्ञानमयइतिश्रुतेः मनसःप्रविलापनंतत्कारणेबुद्धौकर्त्तव्यमित्यर्थः समष्टिबुद्धेरप्यत्रैवांतर्भावः योबुद्धेःपरतस्तुसः यस्तुतुश ब्दोह्यस्यवर्गात्वुद्ध्यादेर्नासकस्यज्ञानस्यवैलक्षण्यंगमयति योबुद्धेरपिपरतःसज्ञानपदाभिधेयःकामेनउल्बेनगर्भइवआवृतइतिव्यवहितेनसंबंधः तथाचश्रुतिः यच्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्म नि ज्ञानमात्मनिमहतिनद्यच्छेच्छांतआत्मनीति एतदुक्तंभवति वागादिबाह्येंद्रियव्यापारमुत्सृज्यमनोमात्रेणावतिष्ठेत मनोपिविषयविकल्पाग्निमुखंज्ञानात्मशब्दोदितायांबुद्धौधारयेत् तामपिमहत्यात्म निसमष्टिबुद्धौधारयेत् ततूंतंमहांतमात्मानंशांतेनिष्कलेपरस्मिन्ज्योतिषिप्रत्यगात्मनिधारयेदिति ॥ ४२ ॥ ॥ ४२ ॥

योगफलमाह एवमिति आत्मानंमनः हार्दाकाशेपितस्थान्नित्यान्कामान्कामयानं श्रूयतेहिदहरविद्यायांहार्दाकाशंप्रकृत्ययच्चास्मेहास्तियच्चनास्तिसर्वंतदत्रगत्वाविंदतइतितत्रयानांकामानांसत्त्वं तेषांचसत्यत्वं तइमेसत्याःकामाइतिश्रुतेः आत्मानंमनःआत्मनामनसैववुद्ध्यैववासंस्तभ्यनिर्देत्तिकंकृत्वाबुद्धेःपरंपरमात्मानंबुद्धासमूलघातंकामरूपशत्रुंशातयितारंजहिनाशय हेमहाबाहोइतिसंबोधयं स्तन्नाशेवसामर्थ्यमस्तीतिदर्शयति अयमर्थः यावत्कामामूलस्याज्ञानस्योच्छेदआत्मतत्त्वज्ञानेनक्रियतेतावत्पर्यंतंकामस्यनिर्मूलोच्छेदेनाभवनीतिबुद्धेःपरंबुद्धाकामोनाशनीयः तस्मिश्चनष्टेसंसारानर्थो च्छेदोभवतीति दुरासदंपरबोधंविनाहुःखेनापिनाशयितुमशक्यं उपायःकर्मनिष्ठात्रप्राधान्येनोपसंहृता उपेयाज्ञाननिष्ठातुतद्गुणत्वेनकीर्त्तिता ॥ ४३ ॥ ॥ इतिनैलकंठीयेभारतभावदीपेतृतीयोऽध्यायः ॥ ३ ॥ अध्यायद्वयोक्तैर्यैःप्रामाण्यशंकामाभूदितिविद्यावंशसंप्रदायमात्मनश्चभमविप्रलंभकत्वादिनिरासायेश्वरत्वंसर्वज्ञत्वंचदर्शयति इमंमित्यादिना इमंसांख्ययोगंकर्मयोगरूपोपायसहितं संन्यास मितिभाष्यंइमंसंप्योपासनादिनिर्विकल्पकसमाध्यनुष्ठानांतंकर्मयोगंज्ञाननिष्ठोपसर्जनंपारिव्राज्यानधिकारिणांराज्ञामेवयोग्यं विवस्वतेसूर्यायमंडलाभिमानिनेसर्वेषांक्षत्रियाणामादिभूतायाहमादित्यां

एवंबुद्धेःपरंबुद्धासंस्तभ्यात्मानमात्मना ॥ जहिशत्रुंमहाबाहोकामरूपंदुरासदम् ॥ ४३ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीतासूपनिषत्सुब्रह्मविद्यायां योगशास्त्रेश्रीकृष्णार्जुनसंवादेकर्मयोगोनामषष्ठतीयोऽध्यायः ॥ ३ ॥ पर्वणितुसमर्विंशोऽध्यायः ॥ २७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ इमंविवस्वतेयोगंप्रोक्तवानहमव्ययं ॥ विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥ एवंपरंपराप्राप्तमिमंराजर्षयोविदुः ॥ सकालेनेहमहतायोगोनष्टःपरंतप ॥ २ ॥ सएवायंमयातेद्ययोगः प्रोक्तःपुरातनः ॥ भक्तोसिमेसखाचेतिरहस्यंह्येतदुत्तमं ॥ ३ ॥ ॥ अर्जुनउवाच ॥ ॥ अपरंभवतोजन्मपरंजन्मविवस्वतः ॥ कथमेतद्विजानीयांत्वमादौप्रोक्तवानिति ॥ ४ ॥ ॥ श्रीभगनुवाच ॥ ॥ बहूनिमेव्यतीतानिजन्मानितवचार्जुन ॥ तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप ॥ ५ ॥

तर्यामी यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यतेहिरण्यश्मश्रुर्हिरण्यकेशआप्रणखात्सर्वएवसुवर्णस्तस्ययथाकप्यासंपुंडरीकमेवमक्षिणीतस्योदितिनामेत्यादिश्रुतिप्रसिद्धःप्रोक्तवानपुरा अव्ययंअविच्छिन्न संप्रदायं तेनानादित्वमपि मनवेस्वपुत्रायविवस्वान्प्राह इक्ष्वाकवेमनुःस्वपुत्रायाब्रवीत् ॥ १ ॥ एवमिति एवंपरंपराप्राप्तमिक्ष्वाकोर्निमिनाभागादिकमेण राजर्षयःजनकाजातशत्रुकैकेयप्रभृतयोराजा नः ऋषयश्चसनकवसिष्ठाद्याःसूक्ष्मार्थदर्शिनस्ते राजानएवऋषयइतिवा अविदुर्ज्ञातवंतः सिजभ्यस्तविदिभ्यश्चेतिलढोलोपेर्जुसु नष्टःअदर्शनंगतः ॥ २ ॥ सइति अयसंप्रदायविच्छेदेसति भक्तःशरणागतः सखाप्रीतिविषयः रहस्यंगोप्यंअभक्तादिभ्योनदेयं अन्यथानिर्वीर्याविद्याभवेदित्यर्थः तथाचमंत्रवर्णः विद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टेहमस्मि असूयकायानृजवेयतायनमाब्रूयावीर्यवती तथास्यामिति ॥ ३ ॥ भगवद्देहस्यसमुद्देवादुत्पत्तिमन्वानोर्जुनउवाच अपरमिति अपरंअर्वाक्कालिकं परंबह्मकालिकं विजानीयां यथपिशब्दादयमर्थोज्ञातस्तथापिविरुद्धस्यवाक्यस्याबोधकत्वात्कथ मेतद्विजानीयामित्युक्तं पदयोजनास्पष्टा ॥ ४ ॥ स्वदेहस्याजत्वंसाधयितुंस्वस्यसर्वज्ञत्वंतावदाह बहूनीति स्पष्टोर्थःश्लोकः ॥ ५ ॥

किंतर्हियोगिनांसर्वज्ञत्वप्रसिद्धेस्त्वंजातिस्मरोजीवोसीत्याशंक्याह अजइति देहान्निष्कृष्टस्याजत्वान्व्ययत्वेनत्वेवाहंजातुनासमित्यत्रसाधिते इहतुदेहविशिष्टस्यैवतेउच्येते ईश्वरोपीत्यनेनदेहान्निष्कृष्टस्या स्मादेरपीश्वरत्वंतत्त्वमस्यहंब्रह्मास्मीत्यादिश्रुतिप्रसिद्धमतोदेहविशिष्टस्यैवाजत्वनित्यत्वेदृढीकियतेऽन्यथानीश्वरत्वप्रसंगात् नस्मादित्यांतर्यामिणःपरमेश्वरस्यहिरण्यदृग्मश्रुत्वादिविशिष्टदेहोजन्मव्यय वानितिवक्तुंशक्यं अकर्मजत्वात्कर्मफलस्यहिपराकाष्ठहिरण्यगर्भशरीरप्राप्तिः नचपुरुषोहवैनारायणोकामयतअत्यतिष्ठंयंसर्वाणिभूतानिअहमेवेदंसर्वस्यामितिसएतंपुरुषमेधंपंचरात्रंयज्ञक्रतुमपश्यदि त्यादिनाशतपथेनारायणास्व्यस्यपरमात्मनःसहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलमितिपादोस्यसर्वाभूतानित्रिपादस्यामृतंदिवीतिचपुरुषसूक्तप्रतिपाद्यस्यसर्वाणिभूता न्यतिक्रम्यस्थितस्येश्वरस्यापिशरीरंपंचरात्राख्यकर्मविशेषफलमितिश्रूयतेइतिवाच्यं तत्रनारायणसब्देनहिरण्यगर्भस्यैवविवक्षितत्वात् नहिपरमेश्वरस्यपूर्णकामस्यसर्वानतिक्रम्यस्थितस्यपुनरत्पत्तिर्युक्तेयं सर्वाणिभूतानीतिकामनाभवति ननुपरमेश्वरेपिकामनादृष्टासोकामयतबहुस्यांप्रजायेयेतीतिचेत्श्लाघनीयप्रज्ञोदेवानांप्रियोयतआप्तकामस्यकास्पृहेतिश्रुतेर्लोकवत्तुलीलाकैवल्यमितिन्यायाच्चनिस्पृह स्यलीलयैवब्रह्मांडकोटीःसृजतोभगवतोराजगोपालस्यकर्मकिंकरेण्यकर्मणासार्वात्म्यंशार्थयतासाम्यमापादयति तस्माच्चकर्मफलंभगवतःशरीरं अतएवनगौतिकं विराट्सूत्रात्मातिरिक्तस्यगौतिकस्याभा वात्तस्माद्युक्तमजोपिसन्निति ननुतर्हिभगवच्छरीरस्यकिमुपादानमवियेतिचेन्न परमेश्वरेतदभावात् जीवाविद्याचेन्न शुक्तिरजतादेरिवतुच्छत्वापत्तेः चिन्मात्रंचेन्न चितःसाकारत्वायोगात् तथात्वेवान

अजोपिसन्नव्ययात्माभूतानामीश्वरोपिसन्॥ प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया॥६॥

स्यातींद्रियत्वापत्तिः तस्मात्किमालंबोभगवद्देहोदेवकीगर्भप्रवेशजननबाल्यकौमारपौगंडयौवनाद्यिप्रतीतिविषयइतिचेत् शृणु प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममाययेति अयमर्थः जीवात्मानोहिअना त्मभूतांप्रकृतिंतेजोबन्नात्मिकांपंचभूतात्मिकांवाअधिष्ठायसंभवंतिजन्मादीञ्जंते अहंतुस्वांप्रत्यगनन्यांप्रकृतिंप्रत्यक्चैतन्यमेवेत्यर्थः तदेवाधिष्ठायनतूपादानांतरं आत्ममायययास्वीयमाययासंभवामि यथा कश्चिन्मायावीस्वयंस्वस्थानादप्रच्युतस्वभावोप्यदृश्योभूत्वास्थूलसूक्ष्मभूतान्यनुपादायैवकेवलयामाययाद्वितीयंमायाविनंस्वसदृशमेववसूत्रमार्गेणगगनमारोहंतंस्वजति एवमहंकूटस्थचिन्मात्रोप्यात्मःस्व माययाचिन्मयमात्मनःशरीरंसृजामितस्यबाल्याद्यवस्थाश्चसूत्रारोहणवद्दर्शयामि एतावांस्तुविशेषः लौकिकमायावीमायापुपसंहरतिद्वितीयंमायाविनमप्युपसंहरति अहंतुतामनुपसंहरन्स्वविषयहमपिनो पसंहरामीति एवंहिसतिहिरण्यदृग्मश्रुत्वादिलक्षणविग्रहयोगिनश्चैतन्यस्यअंतस्तद्धर्मोपदेशादित्यादिन्यायसिद्धंवियदायुपादानत्वलक्षणंसर्वेश्वरत्वंयुज्यतेनान्यथेति तस्मात्सिद्धंपरमेश्वरस्यमायामयंशरी रंनित्यमित्येकेनैवदेहेनविवस्वंतमुपदिश्यत्वामप्युपदिशामीति अन्यत्रापिनित्यैवसाजगन्मूर्त्तिरितिसावधारणंप्रतिज्ञायते देवानांकार्यसिद्ध्यर्थमाविर्भवतिसायदा उत्पन्नेतिदालोकेसानित्याप्यभिधीयतइ तिनित्यायाअप्याविर्भावापेक्षयासूर्यस्येवबाल्यादिकमुत्पत्त्याद्युपगम्यते भाष्येतुस्वांप्रकृतिंवैष्णवींत्रिगुणात्मिकांमायांअधिष्ठायवशीकृत्यआत्ममाययासंभवामिदेहवान्जातइवात्मनोमाययानपरमार्थ तोलोकवदितिव्याख्यातं ॥ ६ ॥

कदासंभवसीत्यपेक्षायामाह यदेति ग्लानिर्ह्रासः अभ्युत्थानंवृद्धिः ॥ ७ ॥ किमर्थमात्मानंमायायासृजसीत्यतआह परित्राणायेति दुष्कृतांदुष्टंकर्मकुर्वतांपापिनां संभवामिआविर्भवामि ॥ ८ ॥ जन्मभा यामर्थंकर्मसाधुत्राणंदिव्यंअप्राकृतंयोवेत्तिसत्यक्त्वादेहंपुनःजन्मनप्राप्नोतिकिंतुमामेवैमाप्नोति एतेनभगवतोजन्मानिकर्माणिचभगवत्प्राप्तिकामेनगेयानीतिदर्शितं ॥ ९ ॥ एतस्यापिभगवत्प्राप्तेर्द्वा रमाह वीतेति रागोविषयेषुप्रीतिः भयंस्वोच्छेदाशंका क्रोधःस्वपरपीडाहेतुरभिज्वलनंतेत्रयोवीताः येभ्यस्तेवीतरागभयक्रोधाः अतएवमन्मयाः मदेकप्रधानाः किंजारिणीयथाजारमपिभर्त्तारंचाश्रि तायोगक्षेमार्थंतद्वन्मेत्याह मामुपाश्रिताःज्ञानतपसाज्ञानमयंतपआलोचनंममजन्मकर्मणोःस्वरूपस्यचनिरंतरंचिंतनंयस्यज्ञानमयंतपइतिश्रुतिप्रसिद्धंज्ञानतपःतेनपूताःसंतोमद्भावंमत्तादात्म्यंप्राप्ताइत्यर्थः ॥ १० ॥ननुसाध्यसाध्योत्साणविनाशौकुर्वतस्तवैवंधर्म्यनैर्घृण्येस्तोऽतःकितवात्मदादितुल्यस्यजन्मकर्मस्वरूपाणांचिंतनेनेत्याशंक्याह येयथेति येमनुष्याःमांसर्वशरीरस्थंयथायेनप्रकारेणशत्रुत्वेनमित्रत्वेन

यदायदाहिधर्मस्यग्लानिर्भवतिभारत॥ अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहम् ॥७॥परित्राणायसाधूनांविनाशायचदुष्कृताम्॥धर्मसंस्थापनार्थायसं भवामियुगेयुगे ॥ ८॥ जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्त्वतः॥ त्यक्त्वादेहंपुनर्जन्मनैतिमामेतिसोर्जुन ॥ ९ ॥ वीतरागभयक्रोधामन्मयामामुपाश्रिताः॥ बहवोज्ञानतपसापूतामद्भावमागताः ॥ १० ॥येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहम्॥ ममवर्त्मानुवर्त्तंतेमनुष्याःपार्थसर्वशः ॥ ११ ॥कांक्षंतःकर्मणांसिद्धिं यजंतइहदेवताः॥क्षिप्रंहिमानुषेलोकेसिद्धिर्भवतिकर्मजा॥ १२॥

वाप्रपद्यंतेप्रामुवंतितांस्तथैवप्रकारेणाहमपिभजामिअनुसरामि येतुममवर्त्मभक्तिध्यानप्रणिधानात्मकमनुवर्त्ततेतानूषमात्मभूतांस्तथैवसर्वशःसर्वैःप्रकारैरनुवर्त्तेहमितियोजना ततश्चमद्भिन्नभूतेप्राणिजाते यथायःप्रीतिद्वेषवाकरोतितस्मिन्मत्प्रतिबिंबभूतेहमपितथैवप्रीतिद्वेषंचकरोमि बिंबपूजापरिश्रमोवौप्रतिबिंबेएवसंक्रामतीतोनममवैषम्यनैर्घृण्येस्तः तस्मात्श्रेयोर्थिनासर्वस्यकल्याणायैवयतितव्यमितिभा वः भाष्येनुयेयथायेनप्रकारेणयेनप्रयोजनेनआर्तादिजिज्ञासवोर्थार्थिनोज्ञानिनोवाप्रतिपद्यंतेतांस्तथैवपीडापरिहारेणज्ञानदानेनअर्थदानेनमोक्षदानेनवाऽनुगृह्णामि सर्वथातेममैववर्त्मानुवर्त्ततइतिअन्यदे वताभक्ताइतिचैतद्व्याचक्ष्यते ॥ ११ ॥ कांक्षंतइति हियस्मात्मानुषेलोकेकर्मसिद्धिःकाम्यकर्मफलंपुत्रपश्वादिकंक्षिप्रंभवतिनतुनिष्कामकर्मजाचित्तशुद्धिः अतोयेकर्मणांसिद्धिंफलंइहैवक्षिप्रंकांक्षंतः कांक्षमाणाःदेवताःइंद्रादीनृयजंतेतेपिममैववर्त्मानुवर्त्ततइतिपूर्वेणान्वयः वक्ष्यतिचयेप्यन्यदेवताभक्ताइत्यादि ॥ १२ ॥

अन्यदेवताभक्ताअपिकस्मात्पुनःकारणात्त्वैववर्त्मानुवर्त्ततेनान्यस्येत्यतआह चातुर्वर्ण्यमिति चतुर्णांवर्णानांहितंचातुर्वर्ण्यं गुणाश्चकर्माणिचेतिगुणकर्म द्वंद्वैकवद्भावः कर्माणिअग्निहोत्रादीनिगुणाश्चेन्द्र व्यदेवतादिरूपाः विभागशःसाधारणासाधारणविभागेन तथाहि दानजपादिकंसर्वसाधारणं अग्निहोत्रादिकंत्रैवर्णिकस्यैवनशूद्रस्य राजसूयादिकंराज्ञएवनेतरेषामितिविभागोदृश्यते यतश्चातुर्वर्ण्यंगुण कर्ममयास्रष्टंततोऽन्यदेवतानामपिमद्दुत्थत्वात्पुत्रप्रीत्यापितुरिवतत्प्रीत्याममैवतृप्तिरस्तीत्यर्थः यद्वागुणविभागशःकर्मविभागशइतियोज्यं तथाहि सत्वप्रधानाब्राह्मणास्तेषांकर्मशमदमादिकं सत्वोपसर्जन नरजःप्रधानाःक्षत्रियास्तेषांकर्मशौर्यादि तमउपसर्जनरजःप्रधानावैश्यास्तेषांकर्मकृष्यादि रजउपसर्जनतमःप्रधानाःशूद्रास्तेषांकर्मशुश्रूषैवेतिगुणकर्मविभागोदृश्यते तदाचातुर्वर्ण्यमितिस्वार्थेष्यञ् चत्वा रोवर्णाःगुणकर्मविभागशोमयास्रष्टाइत्यर्थः अन्यदेवताभक्ताअपिमदुक्तकर्मकारित्वान्मद्भक्ताएवेतिभावः ननुयद्येवंत्वंस्वसंततितर्पणेनस्वाज्ञाकरणेनप्रीयसेतदर्थंचत्वयाचातुर्वर्ण्यंस्रष्टंतर्हिमहान्संसारी त्वमसीत्याशंक्याह तस्येति कर्त्तारंमायायोगात् वस्तुतोऽकर्त्तारं अतएवाव्ययंअविकारिणं ॥ १३ ॥ ननुकर्त्तुरपिकथमकर्त्तृत्वमतआह नमामिति कर्मलेपोपिकुतोनास्तीत्यतआह नमेइति यःकर्त्तृत्वा

चातुर्वर्ण्यंमयास्रष्टंगुणकर्मविभागशः॥ तस्यकर्त्तारमपिमांविद्ध्यकर्तारमव्ययम्॥ १३॥
नमांकर्माणिलिंपंतिनमेकर्मफलेस्पृहा॥ इतिमांयोभिजानातिकर्मभिर्नसबध्यते॥ १४॥
एवंज्ञात्वाकृतंकर्मपूर्वैरपिमुमुक्षुभिः॥ कुरुकर्मैवतस्मात्त्वंपूर्वैःपूर्वतरंकृतम्॥ १५॥ किंकर्म
किमकर्मेतिकवयोप्यत्रमोहिताः॥ तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेऽशुभात्॥ १६॥
कर्मणोह्यपिबोद्धव्यंबोद्धव्यंचविकर्मणः॥ अकर्मणश्चबोद्धव्यंगहनाकर्मणोगतिः॥ १७॥

भिमानीसलिप्यतेयस्तुफलेच्छुःसएवात्मनःकर्त्तृत्वंमनुतइतिफलेच्छाभावादकर्त्ताअकर्त्तृत्वाच्चनलिप्यतेऽयंइतिमांयोभिजानातिसकर्मफलस्पृहात्यागात्कर्मभिर्नबध्यते ॥ १४ ॥ एतदेवशिष्टाचारप्रदर्शन पूर्वकंग्राहयति एवंज्ञात्वेति पूर्वतरंवेदोक्तत्वात् नत्वधुनाकेनचित्कल्पितमित्यर्थः पूर्वतरंप्रथमतरंकृतंअत्यावश्यकत्वादितिवार्थः ॥ १५ ॥ आवश्यकत्वेपिनकर्मणोगतानुगतिकतयानुष्ठानंकर्त्तव्यंकिंतुज्ञा त्वाकर्माणिकुर्वीतेतिवचनात्कर्माश्रितंकिंचिद्विशेषंज्ञापयितुमुपोद्घातयति किंकर्मेति यतः कर्माकर्मणीकवीनामपिदुर्निरूपेतत्तस्मात्तेतुभ्यंकर्मअकर्मचाकारप्रश्लेषेणग्राह्यं तेउभेप्रवक्ष्यामियत्द्वयंज्ञा त्वाऽशुभात्संसारात्मोक्ष्यसे ॥ १६ ॥ एतज्ज्ञानमावश्यकमित्याह कर्मणइति तत्त्वंबोद्धव्यमस्तीतिस्थलत्रयेपितत्त्वमस्तीतिपदद्वयाध्याहारः कर्मणःशास्त्रविहितस्य विकर्मणःप्रतिषिद्धस्य अकर्मणस्तू ष्णींभावस्यगहनाकर्मणइत्यत्रकर्मणइतित्रितयोपलक्षणं कर्मविकर्माकर्मणांगतिर्याथात्म्यंतत्त्वंगहनं ॥ १७॥

यत्कर्मादिस्तत्त्वंवक्ष्यामीतिप्रतिज्ञातंतदाह कर्मणीति कर्मणिकर्माकर्मविकर्मात्मकेदेहेंद्रियादिव्यापारेअविद्ययाप्रत्यगात्मनिआरोपितेसतितत्रअकर्मकर्माभावंनौस्थेनतीरतरौचलनेआरोपितेसतितत्त्वबु द्ध्यातत्रचलनाभावमिवयःपश्येत् तथाचलंगुणवृत्तमितिन्यायेनत्रिगुणात्मकेषुदेहेंद्रियादिषुनित्यकर्मवत्सुयश्चंद्रतारकादौगत्यभावमिवतूष्णींभूतोहमस्मिनकिंचित्करोमीत्यध्यस्तेअकर्मणिकर्माभावेकर्म तन्निग्रहाख्यप्रयत्नरूपंयःपश्यतिसमनुष्येषुबुद्धिमान्तत्त्वदर्शी आत्मनिभ्रांतिजनितव्यापारस्यअनात्मनिचतादृशनिर्व्यापारत्वस्यबाधात्सएवचयुक्तोयोगीकृत्स्नकर्मकृच्चकर्मयोगफलस्यतत्त्वज्ञानस्य प्राप्तत्वादितिस्तुतिमात्रं आत्मनोऽकर्त्तृत्वंसंघातस्यैवकर्त्तृत्वमितिभावयताकर्माणिकर्त्तव्यानीत्यर्थः यद्यप्येतद्बहुधाप्रपंचितंअव्यक्तोयमित्यादौतथापितत्त्वस्यदुर्ज्ञेयत्वात्पुनःपुनरुच्यतइतिप्रांचः यत्तुकर्म णिनित्येपरमेश्वरार्थेनुष्ठीयमानेबंधहेतुत्वाभावादकर्मेदमितियःपश्येत्तथाऽकर्मणिनित्यकर्माकरणेप्रत्यवायहेतुत्वेनकर्मेदमितिचयःपश्येत्सबुद्धिमानितितदसंगतमेव नित्यकर्मणिअकर्मेदमितिज्ञानस्याशु भमोक्षहेतुत्वाभावान्मिथ्याज्ञानत्वेनतस्यैवाशुभत्वाच्च नचैतादृशंमिथ्याज्ञानंबोद्धव्यंतत्त्वंनाप्येतादृशज्ञानेबुद्धिमत्त्वादिस्तुत्युपपत्तिरितिदिक् येतुकर्मणिज्ञानकर्मणिदृश्येजडेसद्रूपेणस्फुरणरूपेणवानुस्यू तंसर्वभ्रमाधिष्ठानंअकर्मअवेद्यंस्वप्रकाशचैतन्यंपरमार्थदृष्ट्यायःपश्येत् तथाअकर्मणिस्वप्रकाशेदृग्वस्तुनिकल्पितंकर्मदृश्यंमायामयंनपरमार्थंसदितियःपश्यतिसबुद्धिमानितिपरमार्थदर्शित्वाद्ब्रह्मस्तवैरेवगु णैःस्तूयतइत्यपिव्याचख्युः तदप्यसंगतमेव कर्मकुरुकर्मप्रवक्ष्यामीत्यनुष्ठेयकर्मप्रस्तावेतत्त्वज्ञानानवसरात्नापिकर्तुरीप्सिततमंकर्मेतिपारिभाषिक्याकर्मसंज्ञयादृश्यस्यकर्मशब्दार्थत्वंग्रहीतुंशक्यं तस्यापु

कर्मण्यकर्मयःपश्येदकर्मणिचकर्मयः॥

टिभादिसंज्ञानामिवागमार्थनिर्णयानर्हत्वादितिसंक्षेपः वस्तुतस्तुकर्मणोह्यपीतिश्लोकेकर्मविकर्माकर्मणांगतिशब्दितंपर्यवसानंगहनत्वाद्बोद्धव्यमित्युपक्षिप्तंतद्व्याख्यानंकर्मण्यकर्मयःपश्येत्समनुष्येषुबुद्धि मानिति तथाहि कर्मणिकर्माकर्मविकर्मरूपेअकर्मतद्वैपरीत्यंशास्त्रतोदृश्यते यथाक्रतुःकर्मणिश्रद्धाहीनस्यकृतोप्यकृतएवभवतीत्यकर्मणिपर्यवस्यति दांभिकस्यतुविकर्मणिपर्यवस्यति यथोक्तंअश्रद्ध याहुतंदत्तंतपस्तप्तंकृतंचयत् असदित्युच्यतेपार्थनचतत्प्रेत्यनोइहेतिचत्वारिकर्माण्यभयंकराणिभयंप्रयच्छंत्ययथाकृतानि मानाग्निहोत्रमुतमानमौनंमानेनाधीतमुतमानयज्ञइतिच एवमौदासीन्यमकर्मा पिशक्तस्यार्त्तपरित्राणाभावाद्विकर्मणिपर्यवस्यति दीक्षितस्यभगवद्ध्यानाद्यासक्तस्यवास्वकालेपंचयज्ञाद्यकरणंदीक्षितोनददातीत्यादिवचनात्सर्वधर्मान्परित्यज्येत्यादिवचनाच्चकर्मण्येवपर्यवस्यति नि त्यकर्मकालेप्रत्यवायहेतोरन्यस्याविहितस्याकरणात् एवंविकर्मापिहिंसाअग्नीषोमीयंपशुमालभेतेतिवचनाद्यज्ञेकर्मैवभवति सैवदृथानष्टेपशौनकर्म विध्यर्थानिष्पत्तेः नापिविकर्म कामकारेणाकृतत्वात् किंतुपरिशेषात्कृताप्यकृतैवेत्यकर्मणिपर्यवस्यति एवंस्तेनप्रमोचनंतत्सयूथ्यानांकर्मापिराज्ञोविकर्म स्तेनःप्रमुक्तोराजनिपापंमार्ष्टीतिवचनात् तदेवयतीनामुपेक्षणीयत्वादकर्म एवंहिंसाफलकेसत्यादौ दानफलकेअनृतादौचविकर्मत्वकर्मत्वेबोध्ये तस्मात्कर्माकर्मविकर्माख्येकर्मणिअकर्मतद्वैपरीत्यंयःपश्येत्सकार्याकार्यविभागज्ञोबोद्धव्यानामेषांप्रबोधात्बुद्धिमानित्युच्यते तथाकिंकर्मेतिश्लोकेयत्रक वीनामपिमोहोस्तिययोश्चज्ञानमशुभमोक्षहेतुस्तेकर्माकर्मणीप्रवक्ष्यामीत्युपक्षिप्तंतद्व्याख्यानमकर्मणिचकर्मयःपश्येत्सयुक्तइति चकारोदर्शनद्वयसमुच्चयार्थः तेनयोबुद्धिमान्युक्तश्चसएवकृत्स्नकर्मकृत्न

त्वेकैकइत्यपिज्ञेयं तथाहि अकर्मणिसंदशून्येकूटस्थेवस्तुनिकर्मसत्संदंवासंवियदादिआभ्यंतरंप्रमात्रादिकंचाधाराधेयभावेनवाउपादानोपादेयभावेनवाअधिष्ठानाध्यस्तभावेनवापश्यंतःशास्त्रविदःक र्माणिकुर्वंति तत्राथःसांख्यःअसंगेमयिसंघातधर्मएवसन्कर्त्रादिरविवेकात्स्फटिकेलौहित्यमिवभातीतिमन्यतेद्वितीयस्तुकनककुंडलवत्ब्रह्मोद्भवंसर्वंब्रह्मैवेतिकर्मतत्साधनादिकंअहंचब्रह्मैवेतिभावयन्करो ति एतौयुक्तावप्यैतिबुद्धिमानप्ययुक्तःकरोतितस्यसर्वंअसदेवभवतिनत्वशुभमोक्षाय योवाएतदक्षरंगार्ग्यविदित्वास्मिंल्लोकेयजतिदद्यातितपस्तप्यतेपिबहूनिवर्षसहस्राण्यंतवदेवास्यतद्भवतीतिश्रुतेः यस्तु युक्तोपिनिर्बुद्धित्वादकार्यमपिकरोतिसप्रत्यवेति पापाश्लेषनिमित्तस्यापरोक्षज्ञानस्याभावात् अनयोश्चाविद्याविद्याशब्दितयोःकर्मपरोक्षज्ञानयोःसमुच्चयःश्रूयतेविद्यांचाविद्यांचेतिमंत्रे यद्वा द्विविधंकर्म णिकर्मदर्शनंपरोक्षमपरोक्षंचं तत्राद्यवान्ज्ञानकर्मसमुच्चयानुष्ठातावुद्विमानुच्यते अपरोक्षमपिद्विविधं उपास्यसाक्षात्कारूपंच तत्राद्यमपिव्याकृताव्याकृतरूपोपास्यभेदेनद्विविधं त त्रापिव्याकृतंसूत्रंकार्यं तद्दर्शीविगतदेहाहंकारत्वात्योगशास्त्रेविदेहउच्यते अव्याकृतंकारणंतद्दर्शीप्रकृतिलयउच्यते अनयोरुपासनयोःसंभवासंभवसंज्ञयोःसमुच्चयोविधीयते अन्यदेवाहुःसंभवादित्यादि ना सोयंयुक्तइत्युच्यते अस्याप्यपेकर्त्तव्यमवशिष्टमस्तीतिनायमपिकृत्स्नकर्मकृत् किंतुयस्यकर्मबाधेनाकर्मदर्शनंमुख्यमस्तिसएवकृतकृत्यत्वान्मुख्यःकृत्स्नकर्मकृदितिएतेष्वाश्रमेषुदेहाभिमानि ष्वेवबुद्धिमानित्यकांतदर्शित्वादकविरेव मध्यमौकांतदर्शिनावपितत्त्वविषयेमूढत्वात्कवयोप्यत्रमोहिताइत्युक्तौ एतयोर्व्यवधानेनाशुभान्मुक्तिः उत्तमस्तुजीवन्नेवाशुभान्मुक्तइतिश्लोकार्थःप्रतिभाति

सबुद्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत् ॥ १८ ॥

व्याख्यातुरपिमेनास्तिभाष्यकारेणतुल्यता गुहावद्योतिनोप्यस्तिकिंदीपस्यार्कतुल्यता यद्वाकर्माकर्मणीवक्तव्यत्वेनबोद्धव्यत्वेनचोपक्षिप्यात्रतयोर्लक्षणप्रदर्शनमुचितं अतोयदकर्मणाविरोपितंतदेवकर्म नान्यदितिकर्मलक्षणं यच्चकर्मणाविशेषितंतदेवाकर्मेत्यकर्मलक्षणमितिव्याख्येयं अक्षरार्थस्तुकर्मयज्ञादिकंससाधनं तत्राकर्मस्पंदशून्यंकूटस्थंब्रह्मयःपश्येत् कर्मतदंगेषुब्रह्मदृष्टिमध्यस्येत् अहंकर्तुरहंय ज्ञःस्वधाहमहमौषधं मंत्रोहमहमेवाज्यमहमग्निरहंहुतमित्युक्तप्रकारेण अन्यथायल्लक्षंतद्दृथाचेष्टारूपमेवातोगहनाकर्मणोगतिः किंतदकर्मयत्कर्मण्यध्यस्यतइत्याकांक्षायांयत्रैतत्कर्मपुण्यपापात्मकंदृश्य ते पुण्योवैपुण्येनकर्मणाभवतिपापःपापेनेतितत्फलंचसुखदुःखादिकं अहंसुखीअहंदुःखीतिसप्रत्यक्चेतनोऽकर्म तत्रैवेदंकर्मअस्पंदेस्पदात्मकमसर्पेसर्पइवाध्यस्तमितियःपश्येदिति अयंभावः यथारज्वा मध्यस्तंसर्पंपश्यन्नायंसर्पोरज्जुरियमितिवाक्यात्तस्यरज्जुत्वंविक्षेपप्रावल्यादप्रतिपद्यमानोनरःसर्पमिमंरज्जुदृष्ट्योपास्त्वेतिनियोज्यते सचोपासनादार्ढ्येसर्पंविस्मृत्यरज्जुतत्वमेवविंदति यस्तुवाक्यादेवरज्जुत त्त्वंविंदतिनतस्यप्रत्ययादृत्तिलक्षणयाउपास्त्याप्रयोजनमस्ति एवमकर्मण्यध्यस्तंकर्त्रादित्त्वमसीतिवाक्याद्बाधित्वाऽकर्मप्रतिपत्तिर्भवतिशुद्धसत्वस्य अन्यस्यतुकर्त्रादीनेवाकर्मदृष्ट्याउपासीनस्यभाव नादार्ढ्यात्कर्त्रादिरूपतिरोधानेनाकर्मतत्त्वप्रतिपत्तिरिति यद्वाकर्मणीवअकर्मण्यपिविकर्मसहितेअकर्मदृष्टिर्माभूदित्याशंक्याह कर्मणीति विहिताकरणेप्रतिषिद्धाचरणेचकर्मदृष्टिरेवभवेत् अकर्मतोबि भ्यत्कर्मब्रह्मादृष्ट्याकुर्यान्नत्वकर्मापितादृशदृष्ट्याकुर्यादित्यर्थः ॥ १८ ॥

अविदुषांकर्मण्यकर्मभावनांद्रढयितुंविदुषांकर्मदर्शनंस्तौति यस्यसर्वेसमारंभाइत्यादिभिःषड्भिः यस्यविदुषःसर्वे समारभ्यंतइतिसमारंभाःकर्माणि कामेनफलेच्छयासंकल्पेनअहमिदंकरोमीत्यभिमानेन चवर्जिताःतंज्ञानाग्निनाकर्मादावकर्मादिदर्शनेनदग्धानिअंकुरीभावाद्व्यावितानिकर्माणिशुभाशुभानियेनतंपंडितंबुधाआहुः ॥ १९ ॥ ननुप्रायश्चित्तेनेवज्ञानाग्निनापूर्वकर्मदाहेपिक्रियमाणंतत्फलायभवे दित्यतआह त्यक्त्वेति आत्मलाभेननित्यतृप्तत्वात्फलासंगंत्यक्त्वानिराश्रयत्वात् अहंकाराद्याश्रयेणहिकर्मक्रियते निराश्रयोनिरहंकारोयस्मात्ततःकर्मसंगंअहंकरोमीत्यभिमानंचत्यक्त्वाकर्मणिलौकि केवैदिकेवाअभितःसर्वांगोपसंहारेणप्रवृत्तोपिसनैवकिंचित्करोतिअतोऽस्यक्रियमाणमपिकर्मनफलायप्रभवतीत्यर्थः ॥ २० ॥ नन्वेतस्माद्दौणात्कर्मकरणादकरणंमुख्यमेवतद्ग्रहमित्याशंक्याह कर्मग्रहस्थस्यतत्प्र वायावहमितिव्यतिरेकमुखेनाह निराशीरिति योनिष्परिग्रहःस्त्र्यादिपरिग्रहरहितःसंन्यासीसचेन्निराशीर्योगैश्वर्यमप्यनिच्छन् यतंचित्तंबुद्धिःआत्माचदेहेंद्रियसंघातोयेनसयतचित्तात्मा समाधिकालेनि

यस्यसर्वेसमारंभाःकामसंकल्पवर्जिताः॥ ज्ञानाग्निदग्धकर्माणंतमाहुःपंडितंबुधाः॥ १९ ॥त्यक्त्वाकर्मफलासंगंनित्यतृप्तोनिरा श्रयः॥ कर्मण्यभिप्रवृत्तोपिनैवकिंचित्करोतिसः॥ २० ॥ निराशीर्यतचित्तात्मात्यक्तसर्वपरिग्रहः॥ शारीरंकेवलंकर्मकुर्वन्नाप्नोतिकिल्बिषम्॥ २१ ॥ यदृच्छालाभसंतुष्टोद्वंद्वातीतोविमत्सरः ॥ समःसिद्धावसिद्धौचकृत्वापिननिबध्यते ॥ २२ ॥

रुद्धबाह्याभ्यंतरवृत्तिरित्यर्थः सव्युत्थानकालेशारीरंशरीरस्थितिमात्रप्रयोजनंभिक्षाटनादिवदपिकेवलंकर्तृत्वाभिमानशून्यंपराध्यारोपितकर्तृत्वेनकुर्वन्नपिकिल्बिषंयावज्जीवमग्निहोत्रंजुह्वयादितियाव ज्जीवाधिकारश्चोदिताग्निहोत्राद्यकरणजंप्रत्यवायंनाप्नोति विधितस्तेषांत्यागात् यस्तुसपरिग्रहःसनिराशीरपियतचित्तात्मापिकेवलमपिशारीरंकर्मकुर्वन्विहितात्करणात्किल्बिषंप्राप्नोत्येवेत्यर्थः ॥ २१ ॥ ननुसपरिग्रहःकुटुंबभरणव्यर्थतयाकथंवित्तव्ययायाससाध्यान्नित्याग्निहोत्रादीन्यनुतिष्ठेदित्याशंक्याह यदृच्छेति यदृच्छयाआप्रार्थितोपनतोलाभोयदृच्छालाभस्तेनसंतुष्टः तथाहि ऋतामृताभ्यांजीवनंब्रा ह्मणस्यविधायव्याख्यातं ऋतमुंछशिलंप्रोक्तममृतंस्यादयाचितमिति द्वंद्वातीतःबहुलाभेऽलाभेवासुखदुःखाद्यतीतः विमत्सरःपरस्यलाभंदृष्ट्वासंतापहीनः समःयदृच्छालाभेनैवेष्टिपशुचातुर्मास्यादिनित्य कर्मणःसिद्धौअसिद्धौवासमोनिर्विकारएवंभूतइष्ट्यादीनिकृत्वापितत्फलेनत्सर्गादिनाननिबध्यते अपिशब्दात्तज्जेनप्रत्यवायेननिबध्यते बंधहेतोःकर्मणस्तत्त्वज्ञानेनैवदाहात् तथाचस्मृतिः न्यायागत धनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः श्राद्धकृत्सत्यवादीचगृहस्थोपिविमुच्यतइति भाष्येत्वयंश्लोकःसन्यासिपरत्वेनैवव्याख्यातः ॥ २२ ॥

त्यक्त्वाकर्मफलासंगमित्यादिनाश्लोकत्रयेणविद्वान्कर्माणिकुर्वन्नपिनकरोतिअतोनलिप्यतेलेपाभावाच्चनबध्यतइत्युक्तं तत्किंकर्मणांफलदानशक्तिप्रतिबंधोवाज्ञानेनक्रियतेउतनिरन्वयोच्छेदएवेत्या शंक्यायेमुक्तस्यापिपुनःसंसारप्रसक्तिंपश्यन्द्वितीयमभ्युपगच्छति गतसंगस्येति यतोविद्वान्गतसंगःकर्तृत्वाभिमानशून्योऽतोनकरोतीत्युक्तं यतोमुक्तःफलकामनामुक्तःअतोनलिप्यतइत्युक्तं यंतोयज्ञायैव यज्ञेश्वरप्रीत्यर्थमेवाचरतिनफलांतरार्थं प्राप्याभावात् अतस्तामेवोत्पाद्यकृतार्थैःकर्मभिर्नबध्यतइत्युक्तं यतोयंज्ञानेसम्यग्दर्शनेऽवस्थितचेताःप्रतिष्ठितप्रज्ञः अतईश्वरप्रीतिफलस्यज्ञाननिष्ठाप्राप्तिरूपस्या पिप्रागेवलाभात् अस्यगतसंगस्यमुक्तस्ययज्ञायकर्माचरतोज्ञानावस्थितस्यसर्वकर्मक्रियमाणादिकंसर्वप्रकारेणनिरयोजनंसत्समर्पंअर्पणफलेनवासनयावासहसमर्पप्रकर्षेणनिरन्वयंविलीयतेनश्यत्यतो नकदाचिदपिप्रादुर्भवति अयंचक्रियमाणकर्मप्रलयोविद्वद्दृष्ट्यैव स्वाभाविकस्यतेषांफलजननसामर्थ्यस्यब्रह्मौष्ण्यवदप्रत्याख्येयत्वात् अतएवज्ञानेनपूर्वकर्मणांदाहउत्तरेषामश्लेषश्चश्रूयतेननूत्तरेषाम पिदाहः तथथैषीकतूलमग्नौप्रोतंप्रदूयेतैवंहास्यसर्वेपाप्मानःप्रदूयंतेइति तंविदित्वानकर्मणालिप्यतेपापकेनेतिच तस्यपुनादायमुपयंतिमुद्दंदःसाधुकृत्यांद्विषंतःपापकृत्यामिति विदुषोधनस्येवकर्मणामप्य न्यत्रगमनदर्शनान्नतेषांवस्तुतस्त्याप्रलयोस्तीतिध्येयं ॥ २३ ॥ कुतोविद्वषांकर्माणिप्रविलीयंतइत्याशंक्याह ब्रह्मार्पणमिति यतस्तेविद्वांसःसविकल्पसमाधौसर्वंजगत्यत्यक्तिशक्तिर्निर्मितंपश्यंति तथाच

गतसंगस्यमुक्तस्यज्ञानावस्थितचेतसः॥ यज्ञायाचरतःकर्मसमग्रंप्रविलीयते॥ २३॥ ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतम्॥ ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिना॥ २४॥ दैवमेवापरेयज्ञंयोगिनःपर्युपासते॥ ब्रह्माग्नावपरेयज्ञंयज्ञेनैवोपजुह्वति॥ २५॥

श्रुतिः किंकारणमित्युपक्रम्यकालःस्वभावइति कालादीनिलोकदृष्ट्यानेकानिकारणान्युपक्षिप्यकारणंनिर्णीयतेध्यानयोगानुगताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढामितिसमाधिनादर्शयति तथाचसमा धिनासर्वस्यब्रह्मणिकल्पितत्वंपश्यतांतेषांयदर्पणंअर्पणसाधनंमंत्रजुह्वादितत्ब्रह्मैव एवशब्दःसर्वत्रानुषंजनीयः यदर्पणीयंहविस्तदपिब्रह्मैव यद्धुतंहवनक्रियाद्धुतंतर्पितंदेवब्राह्मणादिवातदपिब्रह्मैव यत्अ ग्नौहुतंतदपिब्रह्मण्येवहुतं अत्रब्रह्मणीतिपदमध्याहर्तव्यं यत्यजमानेनहुतंतद्ब्रह्मणैवहुतं यत्तेनकर्मणागंतव्यंप्राप्तव्यंफलंतदपिब्रह्मैव किंबहुना यत्किंचित्तस्यकर्मशयनासनादिकंतत्सर्वंब्रह्मैव तत्रकारणंस माधिनासमाधिजेनात्मसाक्षात्कारेण यतःसर्वमस्यब्रह्मात्मकंब्रह्मचप्रत्यगनन्यत्अतःप्रदेयस्यफलस्याभावात्कर्माणिप्रविलीयंतेदाह्याभावाद्दहनइवेतिभावः यत्तुकर्मणितदंगेषुचनामादिष्वेवब्रह्मदृष्टिरत्र विधीयतइतिव्याख्यानंतत्उपकमादिविरोधात्ब्रह्मविद्यायाःप्रकृतत्वाच्चासंगतमितिभाष्येएवनिरस्तं याहिब्रह्मविदांकर्मांगेषुनात्विकीब्रह्मदृष्टिःकीर्त्तितासास्थितप्रज्ञलक्षणवद्ब्रह्मविदामनुष्ठानायैवफल तोभवतीतिननत्रस्यास्तात्पर्यवर्णनीयमितिदिक् ॥ २४ ॥ एवंसम्यग्दर्शनस्ययज्ञत्वंसंपाद्यतत्स्तुत्यर्थंयज्ञांतराण्युपक्षिपति दैवमेवेत्यादिना दैवंदेवनाप्रधानमेवदर्शपूर्णमासादियज्ञंनान्यंएकेयोगिनःकर्मयो गिनःपर्युपासतेअपरेतुब्रह्मैवसत्यज्ञानानंतानंदात्मकमखंडैकरसंवस्तुतदेवज्ञातंसत्सर्वकर्मदग्धृत्वादग्निरिवाग्निर्ब्रह्माग्निस्तत्र यज्ञंजीवं यज्ञशब्दस्यात्मनामसुपाठात् सोपाधियज्ञेनैवआत्मनैवनिरुपाधिकेनरू पेणजुह्वतिघटाकाशमिवमहाकाशेउपाधिप्रहाणेनप्रविलापयंतिसोऽयंज्ञानयज्ञोमुख्यः ॥ २५ ॥

यज्ञांतरमाह श्रोत्रादीनीति तत्रकंचित्बाह्यमाभ्यंतरंवाविशेषमुपादायतत्रचेतसोनियमनंक्रियते तेचसंयमाःअनेकविषयत्वादनेकेपृथक्फलाश्च तथाचयोगसूत्रकृताप्रोक्तं भुवनज्ञानंसूर्यसंयमात्चंद्रेता राव्यूहज्ञानंकंठकूपेक्षुत्पिपासानिवृत्तिरित्यादि तएवाग्नयइंद्रियेधनसंहारहेतुत्वात्तेषुसंयमाग्निषुश्रोत्रादीनिजुह्वतिप्रक्षिपंति तत्रश्रोत्रंअनाहतेध्वनौसंनियम्यहंसोपनिषद्वुक्तरीत्याघंटानादादीन्दशनादाननु भवंति नहितत्रसन्नियतेचेतसिशब्दांतरयहणंतदाभवति सोयंश्रोत्रस्यसंयमाग्नौहोमोबोध्यः एवमन्यत्रापितद्वाराचनिष्कलंतत्त्वंप्रतिपद्यते तथान्येविषयेभ्यःप्रत्याहृतकरणाःधारणाध्यानसमाध्यात्मकं मनसःसंयमंएकत्रमूलाधाराद्यन्यतमचक्रेकर्तुमशक्ताः समनस्केंद्रियेषुविषयवियोगाद्ग्धेंधनानलवत्स्वयंविलीनेषुयेषांसमाधिबुद्धिस्तैरिंद्रियेषुविषयाएवोपसंहृतानित्विंद्रियादीनिमनआदिषुपूर्वोक्तरी त्याउपसंहृतानि तानेतानिंद्रियचित्तकान्प्रकृत्योक्तंवायवीये दशमन्वंतराणीहतिष्ठंतींद्रियचिंतकाइति ॥ २६ ॥ इतोविशिष्टयोगांतरमाह सर्वाणीति इंद्रियाणांकर्माणिशब्दादिग्रहणानि प्राणकर्माणि आकुंचनप्रसारणश्वासप्रश्वासादीनि अपरेयोगिनः आत्मनिबुद्धौसंयमःसएवयोगोग्निश्चनस्मिन् ज्ञानेनदेहेंद्रियप्राणमनोव्यतिरिक्तात्मज्ञानेनदीपितेप्रकाशितेजुह्वतिप्रविलापयंति इंद्रिययोगिनोहिसुप्ता विवप्राणोनुपसंहृतएवास्तेतत्सहचरस्यमनसोनुपसंहारात् बुद्धियोगिनांतुमनसोप्युपसंहारोऽवतीतिविशेषः एतेषामपिबुद्धौबोद्धव्याभावात्पूर्ववल्लीनायांसमाधिबुद्धिर

श्रोत्रादीनींद्रियाण्यन्येसंयमाग्निषुजुह्वति॥ शब्दादीन्विषयानन्येइंद्रियाग्निषुजुह्वति ॥ २६॥सर्वाणींद्रियकर्माणिप्राणकर्मा णिचापरे ॥ आत्मसंयमयोगाग्नौजुह्वतिज्ञानदीपिते॥ २७॥ द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथापरे ॥ स्वाध्यायज्ञानयज्ञा श्चयतयःसंशितव्रताः॥ २८ ॥ अपानेजुह्वतिप्राणंप्राणेपानंतथापरे ॥ प्राणापानगतीरुद्धाप्राणायामपरायणाः॥ २९॥

स्तिनत्वेनैर्बुद्धेरन्यत्वेनआत्माज्ञातोनापितस्मिन्बुद्धिरुपसंहृता अतएवैतान्प्रकृत्योक्तंवायवीये बौद्धादशसहस्राणितिष्ठंतिविगतज्वराइति बौद्धावुद्धौलीनाः दशसहस्राणिमन्वंतराणीत्यनुषंगात् ॥२७॥ए वंयज्ञपंचकंश्लोकत्रयेणोक्तं अथैकेनैवश्लोकेनपंचयज्ञानाह द्रव्येति द्रव्यसाध्याःकापीकूपारामातीर्थेबहिर्वेदिकादानंश्रौतयज्ञानांप्रागेवग्रहणात् तएवयज्ञायेषांतेद्रव्ययज्ञाः तथातपःकृच्छ्रचांद्रायण मासोपवासादितदेवयज्ञस्थानीयंयेषांतेतपोयज्ञाः तथायोगयज्ञाःसंगफलत्यागपूर्वकंसंध्योपासनादिनिर्विकल्पसमाध्यंतानांकर्मणामनुष्ठानंतृतीयाध्यायोक्तंयोगः सएवयज्ञोयेषांतेयोगयज्ञाः यद्वायम नियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपोष्टांगोपेतोयोगश्चित्तवृत्तिनिरोधइतिसूत्रितोयोगएवयज्ञोयेषांइति तथास्वाध्याययज्ञाःनित्यंवेदाध्ययनरतास्तेस्वाध्याययज्ञाः ज्ञानंस्वाध्याया र्थस्यपूर्वोत्तरमीमांसाविचारःसएवयज्ञोयेषां स्वाध्याययज्ञाज्ञानयज्ञाश्चेतिस्वाध्यायज्ञानयज्ञाइतिसूत्रसमासः यतधोयतनशीलाः संशितव्रताःसम्यक्शितंतीक्ष्णंव्रतंअहिंसादिकंयेषांतेइतिसर्वैषांविशेषणं ॥ २८ ॥ एकादशंयज्ञमाहअपानेइति अपरेअपानेअपानवृत्तौजुह्वतिप्रक्षिपंतिप्राणंप्राणवृत्तिं पूरकाख्यंप्राणायामंकुर्वंतीत्यर्थः तथाप्राणेचअपानंप्रक्षिपंति रेचकाख्यंप्राणायामंकुर्वंतीत्यर्थः प्राणापान गतीरुद्धा मुखनासिकाभ्यांवायोर्निर्गमनंप्राणस्यगतिः तद्विपर्ययेणाधोगमनमपानस्यगतिः तेप्राणापानगतीएतेनिरुध्य प्राणायामपरायणाःप्राणायामतत्पराः कुंभकाख्यंप्राणायामंकुर्वंतीत्यर्थः ॥ २९ ॥

द्वादशंयज्ञमाह अपरेइति नियतोनिगृहीतआहारोविषयभोगोयैस्तेनियताहारावैराग्यादिमंतः प्राणान् अत्रसमनस्कानींद्रियाणिप्राणशब्देनगृह्यंते तान्प्राणेषुमनश्चित्ताहंकारेष्वंतःकरणवृत्तिभेदेषु बुद्धेःप्राग्गृहीतत्वादग्रहणं जुह्वतिप्रविलापंयंति इंद्रियाणिसंकल्पात्मकेमनसिसंहृत्यमनोपिस्मरणात्मकेचित्तेसंहृत्यतदपिअहंकारेसंहरंति सचाभिमानरूपोहंकारोभिमंतव्याभावात्क्षयमेवदग्धेधनानल वद्विलीयतेतत्रयेषांसमाधिबुद्धिरस्तिते आभिमानिकाबुद्धियोगिभ्यःपूर्वोक्तेभ्योनिकृष्टाः अतएवएतान्प्रकृत्योक्तंवायवीये सहस्रंत्वाभिमानिकाइति सहस्रंमन्वंतराणिइत्यनुषंगः भौतिकस्तुयोगोत्रनो क्तः यदनुष्ठातृन्प्रकृत्यतत्रैवोक्तं भौतिकास्तुशतंपूर्णमिति अत्रापिशतंमन्वंतराणीत्यनुषंजनीयं सर्वेप्येतेयज्ञविदोयज्ञक्षपितकल्मषायेषांतेतथाविधाभवंति सर्वेयज्ञाःकल्मषक्षयायैवभवंतिनपु नःसाक्षान्मोक्षायेत्यर्थः ॥ २० ॥ सर्वेषामेतेषांमध्येन्यतममप्यनुष्ठातुमशक्तंप्रतिप्राह यज्ञेति यज्ञाःपंचमहायज्ञाःतेभ्यःशिष्टमवशिष्टमन्नममृताख्यंयेभुंजतेतेपिचित्तशुद्धिद्वारासनातनंब्रह्मयांतिप्रामुवंति अय ज्ञस्यपूर्वोक्तेषुद्वादशत्वन्यतमोवानित्याःपंचवायस्ययज्ञानसंतिसअयज्ञस्तस्यअयमपिलोकोनास्ति अन्यःपरलोकआत्मलोकोवाकुतोभवेन्नकुतश्चिदित्यर्थः ॥ २१ ॥ एवमिति ब्रह्मणोवेदस्यमुखेद्वारे वेद

अपरेनियताहाराःप्राणान्प्राणेषुजुह्वति ॥ सर्वेप्येतेयज्ञविदोयज्ञक्षपितकल्मषाः ॥ ३० ॥ यज्ञशिष्टाम्रतभुजोयांतिब्रह्मसनातनम् ॥ नायंलोकोस्त्ययज्ञस्यकुतोन्यःकुरुसत्तम ॥ ३१ ॥ एवंबहुविधायज्ञावितताब्रह्मणोमुखे ॥ कर्मजान्विद्धितान्सर्वानेवंज्ञात्वाविमोक्ष्यसे ॥ ३२ ॥ श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञःपरंतप ॥ सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यते ॥ ३३ ॥ तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया ॥ उपदेक्ष्यंतितेज्ञानंज्ञाननस्तत्त्वदर्शिनः ॥ ३४ ॥ यज्ज्ञात्वानपुनर्मोह मेवंयास्यसिपांडव ॥ येनभूतान्यशेषेणद्रक्ष्यस्यात्मन्यथोमयि ॥ ३५ ॥ अपिचेदसिपापेभ्यःसर्वेभ्यःपापकृत्तमः ॥ सर्वंज्ञानप्लवेनैववृजिनंसंतरिष्यसि ॥ ३६ ॥

द्वारेणैववितताविस्तारिताःगुरुभिरुपदिष्टाइत्यर्थः कर्मजान्कायिकवाचिकमानसिककर्मजान्नतुनैष्कर्म्यरूपान् एवंज्ञात्वाअस्मादशुभात्मोक्ष्यसे तत्त्वज्ञानोत्पत्तिद्वारेणेत्यर्थः ॥ ३२ ॥ यदर्थमेतेयज्ञाउपन्य स्तास्तंज्ञानयज्ञंस्तौति श्रेयानिति द्रव्यंबाह्यमाभ्यंतरंचदेहेंद्रियादितत्साध्यात्द्रव्यमयात्यज्ञात् ज्ञानयज्ञःनिःशेषबाह्यनःकायप्रवृत्युपरमात्मकःश्रेयान्प्रशस्ततरः ईयसुन्प्रत्ययेनतेषामपिप्रशस्ततरत्वंयो त्यते तत्रहेतुः सर्वमिति कर्मकर्मफलंसर्वंअखिलंसर्वांगोपसंहारयुक्तंज्ञानेपरिसमाप्यतेअंतर्भवति यथाकृतायाविजिताया धरेयाःसंयत्येवमेवैनंसर्वंतद्गमिसमेतियत्किंचप्रजाःसाधुकुर्वंतियस्तद्वेदयत्सवेदेति ॥ ३३ ॥ तद्विद्धीति ज्ञानिनःयंथज्ञाः तत्त्वदर्शिनःअनुभववंतः ज्ञानंब्रह्म स्पष्टार्थःश्लोकः ॥ ३४ ॥ यज्ज्ञात्वेति यत्चिन्मात्रस्वरूपंब्रह्मज्ञात्वा एवंइदानीमिवपुनर्मोहंनयास्यसि अथोअपिचयेनज्ञानेनभू तानिब्रह्मादिस्तंबपर्यंतानिआत्मनिमय्यिचत्वंपदलक्ष्यार्थादनन्यभूतेपरमेश्वरेद्रक्ष्यसि नान्योतोस्तिद्रष्टेतिप्रतीचोन्यस्यद्रष्टुर्निषेधात् भाष्येनुसाक्षादात्मनिमस्थानीमानीतिद्रक्ष्यसि अथोअपिमयिवाशुदेवेप रमेश्वरेचात्मनीतिक्षेत्रज्ञेश्वरैकत्वंसर्वोपनिषत्प्रसिद्धंद्रक्ष्यसीत्यर्थइति ॥ ३५ ॥ अपिचेदिति वृजिनंदुरितार्णवं धर्मोपीहमुमुक्षोःपापमित्युच्यते ॥ ३६ ॥

॥ ४७ ॥

यथेति एधांसिकाष्ठानि कर्माणिप्रारब्धादन्यानि ॥ ३७ ॥ नहीति योगेननिष्कामकर्मानुष्ठानेनसमाधियोगेनवासंसिद्धःसंस्कृतोयोग्यतामापन्नः कालेनेतिचिरप्रयत्नसाध्यत्वंज्ञानस्योच्यते ॥ ३८ ॥ श्रद्धा वान्ज्ञानंलभते श्रद्धावानपिमंदप्रयत्नोमाभूदतआह तत्परइति तत्परोप्यजितेंद्रियोमाभूदतआह संयतेंद्रियइति परांशांतिंविदेहकैवल्यं अचिरेणप्रारब्धकर्मसमाप्तौसत्यां ॥ ३९ ॥ अज्ञइति अज्ञःसुखेन चिकित्सितुंशक्यः अश्रद्दधानोयत्नेन संशयात्मात्वसाध्यएव यतोमिश्रादिष्वपिसंशयंकुर्वतोस्यायंलोकोपिनास्तिनापिपरःवेदवाक्येपिसंशयात् अतएवसर्वदासंशयाकुलत्वात्सुखमपितस्यनास्तितस्मात्सं

यथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेर्जुन ॥ ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथा ॥ ३७ ॥
नहिज्ञानेनसदृशंपवित्रमिहविद्यते ॥ तत्स्वयंयोगसंसिद्धःकालेनात्मनिविंदति ॥ ३८ ॥
श्रद्धावाँल्लभतेज्ञानंतत्परःसंयतेंद्रियः ॥ ज्ञानंलब्ध्वापरांशांतिमचिरेणाधिगच्छति ॥ ३९ ॥
अज्ञश्चाश्रद्दधानश्चसंशयात्माविनश्यति ॥ नायंलोकोस्तिनपरोनसुखंसंशयात्मनः ॥ ४० ॥
योगसंन्यस्तकर्माणंज्ञानसंछिन्नसंशयम् ॥ आत्मवंतंनकर्माणिनिबध्नंतिधनंजय ॥ ४१ ॥
तस्मादज्ञानसंभूतंहृत्स्थंज्ञानासिनात्मनः ॥ छित्त्वैनंसंशयंयोगमातिष्ठोत्तिष्ठभारत ॥ ४२ ॥
इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुन संवादेयज्ञविभागयोगोनामचतुर्थोऽध्यायः ॥ ४ ॥ पर्वणितुअष्टाविंशोऽध्यायः ॥ २८ ॥

शयोनकर्त्तव्यः ॥ ४० ॥ किंच योगेति योगेनकर्मण्यकर्मदर्शनात्मकेनसंन्यस्तानिफलतःस्वरूपतोवात्यक्तानिकर्माणियेनतंयोगसंन्यस्तकर्माणंज्ञानेनसम्यक्दर्शनेनसम्यक्कृछिन्नाःसंशयाःआत्मादेहोऽन्यो वाअन्योपिविभुरविभुराविभुरपिकर्त्ताऽकर्त्तावाअकर्त्ताप्येकोनेकोवाएकोपिसगुणोनिर्गुणोवेत्येवमादयःयस्यसज्ञानसंछिन्नसंशयस्तं आत्मवंतंशमदमादिपरं कर्माणिकृतानिननिबध्नंतिहेधनंजय ॥ ४१ ॥ तस्मादिति हृत्स्थंबुद्धिस्थं ज्ञानासिनाज्ञानखड्गेन योगंसम्यग्दर्शनोपायं निष्कामकर्मआतिष्ठकुरु उत्तिष्ठ युद्धायेतिशेषः ॥ ४२ ॥ ॥ इतिश्री० भगवद्गी० भा० चतुर्थोऽध्यायः ॥ ४ ॥ प० ॥ २८ ॥ ॥ ७ ॥

तृतीयेऽध्यायेश्लोकेस्मिन्द्विविधानिष्ठेतिविभिन्नाधिकारिकंनिष्ठाद्वयंप्रस्तुत्यनकर्मणामनारंभान्नैष्कर्म्यपुरुषोश्नुतइत्यादिनाकर्मनिष्ठायाज्ञाननिष्ठांगत्वेनभूयसानिर्बंधेनानुष्ठेयत्वमुक्तं कर्मण्येवाधिकार स्तइत्यादिनाचतुर्थेतूत्पन्नसम्यग्दर्शनैःकृतमपिकर्माकृतमेवभवतिज्ञानेनकर्तृत्वादिबाधात् अतस्तैर्दथाचेष्टावत्कर्मबाकर्त्तव्यंसंन्यासोवाकर्त्तव्यइत्यनास्थयाप्रोक्तं अथेदानींपंचमषष्ठयोरज्ञानिनाज्ञाना धिनावैराग्योत्पत्तेःप्राक्कर्मैवानुष्ठेयं संपन्नेतुवैराग्येदृष्टविक्षेपनिरस्यर्थंकर्मसंन्यासंकृत्वाज्ञानोत्पत्त्यर्थंयोगोनुष्ठेयइत्युच्यते तत्रचतुर्थेत्यक्तसर्वपरिग्रहइतिसंन्यासोयोगमातिष्ठेतिकर्मयोगश्चैवंकर्मांप्रतिविहि तः नचैतयोःस्थितिगतिवद्युगपदेकेनमयानुष्ठानंकर्तुंशक्यतेपरस्परविरुद्धत्वादितिमन्वानोऽर्जुनउवाच संन्यासमिति हेकृष्णपापकर्षण मेमसंज्ञानार्थिनेसंन्यासंकर्मयोगंचेतिद्वयंपरस्परविरुद्धंकथंशंससिक थयसि पुनरित्यनेनप्रागपित्वयावेदकर्त्राइदंद्वयंविहितमस्तीतिगम्यते तथाचश्रुतिस्मृतीभवतः एतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंति संसारमेवंनिःसारंदृष्ट्वासारदिदृक्षया प्रव्रजंत्यकृतोद्वाहाःपरंवैराग्य मास्थिताइतिच तथातमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेननतपसानाशकेनेति महायज्ञैश्चयज्ञैश्चब्राह्मीयंक्रियतेतनुरितिच ब्राह्मीब्रह्मदर्शनयोग्या अतएतयोःश्रुतिविहितत्वेनप्रशस्तयोर्मध्येए

॥ अर्जुनउवाच॥ ॥ संन्यासंकर्मणांकृष्णपुनर्योगंचशंससि ॥ यच्छ्रेयएतयोरेकंतन्मेब्रूहिसुनिश्चितं ॥ १॥
॥ श्रीभगवानुवाच॥ ॥ संन्यासःकर्मयोगश्चनिःश्रेयसकरावुभौ ॥ तयोस्तुकर्मसंन्यासात्कर्मयोगोविशिष्यते ॥ २॥
॥ ज्ञेयःसनित्यसंन्यासीयोनद्वेष्टिनकांक्षति ॥ निर्द्वंद्वोहिमहाबाहोसुखंबंधात्प्रमुच्यते ॥ ३॥

कंश्रेयःप्रशस्ततरंयत्तन्मेसुनिश्चितंब्रूहीतिप्रश्नः ॥ १ ॥ अस्योत्तरंभगवानुवाच संन्यासइति निःश्रेयसकरौज्ञानोत्पत्तिहेतुनया तथापिकर्मसंन्यासादविरक्तकृतात्कर्मयोगएवविशिष्यते चित्तशुद्धिद्वारावैरा ग्यादिहेतुत्वात् ॥ २ ॥ ननुप्रत्यक्षःकर्मयोगिनांविक्षेपःसंन्यासिनांतुसनास्तीतिकथमुच्यतेकर्मयोगोविशिष्यतइत्याशंक्याह ज्ञेयइति योरागद्वेषरहितःसकर्मसुस्वरूपतस्यक्तेष्वत्यक्तेषुवानित्यंसंन्यास्येव एतेनसाधनभूतयोःसांख्ययोगयोःरागद्वेषराहित्यरूपसाम्यमुक्तं फलभूतयोस्तुसर्वविकल्पराहित्यरूपसाम्यमनंतरश्लोकाभ्यामुच्यते तथापिचित्तस्वाभाव्यात्कदाचित्संन्यासिनोरागोदयेपातार्शकास्तिने तरस्येतिसएवश्रेयानितिभावः यद्यप्येवंतथापिहिप्रसिद्धं निर्द्वंद्वोद्वंद्वंसत्याऋतयोरात्मानात्मनोर्मिथुनंपरस्परा ध्यासस्तद्रहितः सांख्योरागाद्युदयहेतोरज्ञानस्यात्यंतोच्छेदात् सुखंकर्मकरणायासंविनापिबंधा त्संसारात्केवलज्ञानेनैवमुच्यतेनकर्माण्यपेक्षते यद्वानिर्द्वंद्वोद्वंद्वंवैमिथुनंतस्माद्बंधान्मिथुनंप्रजायतेइतिश्रुतेर्द्वंद्वंस्त्रीपुंसयोर्मिथुनंतद्रहितःस्त्र्यादित्यागीसंन्यासीअनायासेनमुच्यते रागादिजयस्योभयत्रतुल्य त्वात् अत्रचकुटुंबभरणवैयर्थ्याभावात्सुखंमुच्यतइत्यर्थः ॥ ३ ॥

॥ ४८ ॥

नन्वेकत्रपातार्शकाएकत्रकर्मश्रमस्तदनयोःपथोःकतरःश्रेयानित्याशंक्यद्वयोरपिफलतःसाम्यमित्याह सांख्ययोगाविति सांख्यं समित्येकीभावेइनियास्कः एकीभावेनात्मानन्यत्वेनख्यायतेप्रकाश्यतेवस्तु स्वरूपमनयेतिसंख्यास्थूलसूक्ष्मकारणप्रपंचात्यनिर्विकल्पेप्रत्यगात्मनिप्रविलापनेनोदितात्तेतदृत्तिस्तत्साधनभूतोयंसांख्यःसंन्यासः सचदारादिबुद्ध्यंतानांपदार्थानामात्मन्येकीभावेनन्यसनंत्यागःप्रविला पनं तथायोगोप्यग्निहोत्रसंध्योपासनादिनिर्विकल्पसमाध्यंतमनुष्ठानं तत्रमुख्यस्ययोगस्यलक्षणंयोगश्चित्तवृत्तिनिरोधइति वृत्तयश्चप्रमाणविपर्ययविकल्पनिद्रास्मृतयइतिपंच तत्रप्रत्यक्षानुमानागमाःप्र माणानि तेषुप्रत्यक्षमिंद्रियंतज्जावृत्तिःशुक्त्यादिविषयंयाथार्थ्येनज्ञानं विपर्ययस्तुतत्रैवरजतादिविषयंभ्रांतिरूपंज्ञानं संशयोपिइयंशुक्तिर्वारजतंवेतिअनिर्धारितान्यतरकोटिकंज्ञानं सविपर्ययएवांतर्भवति विकल्पस्तुशब्दज्ञानानुपातीवस्तुशून्यः यथापुरुषस्यचैतन्यंबंध्यापुत्रइति नहिपुरुषचैतन्यतत्संबंधानांपृथक्त्वमस्तिकिंतुचैतन्यमेवहिशब्दत्रयेणोच्यते नापिबंध्यासुतस्यस्वरूपमस्त्यपिशब्देनाभिलप्य तेसोयंविकल्पःशब्दज्ञानानुपातीवस्तुशून्यः एकस्मिन्ननेकबुद्धिरसतिचसद्बुद्धिरिति निद्रास्मृतीलोकप्रसिद्धे एतासांनिरोधेपिनिर्विकल्पःप्रत्यगात्मैवावशिष्यते तावेतौफलभूतौसांख्ययोगौसाधनभूतौ

सांख्ययोगौपृथग्बालाःप्रवदंतिनपंडिताः ॥ एकमप्यास्थितःसम्यगुभयोर्विंदतेफलम् ॥ ४॥ यत्सांख्यैःप्राप्यतेस्थानंतद्योगैरपिगम्यते ॥
एकंसांख्यंचयोगंचयःपश्यतिसपश्यति ॥ ५॥ संन्यासस्तुमहाबाहोदुःखमाप्तुमयोगतः ॥ योगयुक्तोमुनिर्ब्रह्मनचिरेणाधिगच्छति ॥ ६॥

तावेवसंन्यासकर्मयोगाख्यौ तत्रांत्ययोःसाम्यंज्ञेयःसनित्यसंन्यासीत्यनेनसूचितं आद्ययोस्तैक्यमत्रोच्यते आस्थितःअनुतिष्ठन् फलंनिर्विकल्पात्मनाःवस्थितिरूपं ॥ ४ ॥ योगैर्योगिभिः अर्शआद्यच्च त्ययांतोयंयोगशब्दः स्थानंमोक्षाख्यं एकमभिन्नं स्पष्टायोजनाश्लोकद्वयस्य ॥ ५ ॥ नन्वेवंनिर्विकल्पस्थानप्राप्तयेद्वौमार्गावुक्तौस्यातांतत्रनान्यःपंथाविद्यतेयनायेतिश्रुतिविरुद्धमित्याशंक्याह सं न्यासस्त्विति संन्यासोनैष्कर्म्यं अयोगतोयोगंविना अबाप्तुंदुःखंहेमहाबाहो अयमर्थः निर्विकल्पकसमाधिरपितत्त्वसमीक्षेत्येतद्वाक्यार्थप्रतिपक्षयुपायभूतएवनस्वतःपुरुषार्थइतिद्वितीयमार्गस्याभावान्नोदाह तश्रुतिविरोधः शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्यतीतिश्रुत्येवशमादिवत्समाधेरप्यात्मदर्शनार्थत्वस्यदर्शितत्वात् तथाचसमाहितपदंवार्त्तिककारैर्व्याख्यातं स्यात्कर्त्तव्येषुकर्तुःस्या त्करणाकरणंप्रति तान्येवतुनिषिद्धानिकर्माणीहशमादिभिः शमादिश्रुत्या अस्यात्कर्त्तव्यंतुयेषुस्यात्कर्णाकरणंप्रति समाहितोज्ञात्वाथेदानींतन्निरोधोविधीयते अस्यात्कर्त्तव्यंगुरूपदेशापेक्षत्वं येषुमानमेयव्यव हारनिरोधेषुपिंडीकृत्येंद्रियग्रामंबुद्धावारोप्यनिश्चलं विषयांस्तत्स्मृतीस्यक्त्वातिष्ठेच्चिन्वनुरोधतः एषोभ्युपायःसर्वत्रवेदानिषुप्रतिष्ठितः तत्त्वमस्यादिवाक्यार्थज्ञानोत्पत्त्यर्थमादरादिनि एवंव्यतिरेकमुक्त्वा न्वयमाह योगयुक्तइति मुनिःसंन्यासीनचिरेणशीघ्रमेवब्रह्माधिगच्छतिवाक्यश्रवणमात्रेण नतुकेवलसंन्यासी यथोक्तं नचसंन्यसनादेवसिद्धिंसमधिगच्छतीति ॥ ६ ॥

योगेति योगेननिर्विकल्पसमाधिनायुक्तोयोगयुक्तः अतएवविशुद्धात्मा दृत्तिसारूप्यदोषेणहीनआत्माप्रत्यक्चेतनोयस्य निर्विकल्पावस्थायकिवलएवचेतनोस्तिनान्यदेत्युक्तं तदाद्रद्दुःस्वरूपेवस्थानंवृत्ति सारूप्यमितरत्रेति तदाद्दत्त्यभावेइतरत्रवृत्तिकालेइतिसौत्रपदद्वयार्थः अत्रहेतुः यतोयंविजितात्माविजितचित्तोजितेंद्रियश्च एवंशुद्धस्वंपदार्थउक्तस्तस्यतत्पदार्थाभेदमाह सर्वभूतात्मेति सर्वेषांभूतानांब्रह्मादिस्तंबपर्यंतानांवियदादीनांचचेतनाचेतनानामात्मभूतः उपादानत्वेनस्वरूपभूतः कनकमिवकुंडलादीनांस्वरूपभूतं कारणानन्यत्वात्कार्यस्य सर्वभूतात्मभूतआत्माप्रत्यक्चेतनोयस्यससर्वभूतात्मभूतात्मा यत्तुसर्वेषांभूतानामात्मभूतआत्मायस्येतिभाष्यंसर्वभूतात्मेत्येतावतैवार्थलाभादात्मभूतइत्यधिकमितिदूषितंस्वयंचसर्वभूतआत्मभूतश्चात्मायस्येतिविग्रहोदर्शितः तत्रसंकोचेकारणाभावात्सर्वपदेनैव चिज्जडयोर्ग्रहेपरस्याप्यात्मभूतेत्यधिकमेव सर्वभूतश्चेतनाचेतनप्रपंचभूतआत्मायस्येतितत्रापीष्टार्थलाभात् सर्वैचआत्मानश्चतद्भूतआत्मायस्येतिविगृह्यससर्वात्मभूतात्मेत्येतावतैवसिद्धेप्रथमभूतपदस्यवैयर्थ्यंचभाष्यमतेब्रह्मादीनांप्रत्यग्भूतआत्मायस्येतिश्रुत्यैवजीवेशाभेदउच्यते परस्यतुउपादानत्वलिंगेनजडसाधारण्येनजीवस्यब्रह्माभेदोवगम्यतइतिविद्वद्भिरविनयःक्षंतव्यः यतोयंसर्वेषांप्रत्यगात्माअतोहमि

योगयुक्तोविशुद्धात्माविजितात्माजितेंद्रियः॥ सर्वभूतात्मभूतात्माकुर्वन्नपिनलिप्यते॥ ७॥नैवकिंचित्करोमीतियुक्तोमन्येततत्त्ववित्॥ पश्यन्शृण्वन्स्पृशन् जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन्॥ ८॥ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि॥ इंद्रियाणींद्रियार्थेषुवर्त्ततइतिधारयन्॥ ९॥ ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वाकरोतियः॥ लिप्यतेनसपापेनपद्मपत्रमिवांभसा॥ १०॥कायेनमनसाबुद्धाकेवलैरिंद्रियैरपि॥ योगिनःकर्मकुर्वंतिसंगंत्यक्त्वात्मशुद्धये॥ ११॥

वसोपिकुर्वन्नपिनलिप्यतेअसंगात्मज्ञानात्कर्त्रादेर्बाधितत्वाच्च व्युत्थानेनत्वतीतावप्युत्खातदंष्टोरगवदबाधकत्वाच्चेत्यर्थः ॥ ७ ॥ नलिप्यतइत्येतदुपपादयति नैवेतिद्वाभ्यां तत्त्ववित्अहंनैवकिंचित्करोमीतिमन्येतमन्यते तत्रहेतुः इंद्रियाणिउपलक्षणमिदंप्राणादेरपि इंद्रियादयइंद्रियार्थेषुत्सेषुविषयेषुवर्त्तेइतिधारयन्निश्चिन्वन्त्वहंविषयेषुवर्त्तेइतिमन्यते धारयन्निहेतौशतृप्रत्ययः अत्रदर्शनादयःपंचज्ञानेंद्रियाणांव्यापाराःगमनविसर्गप्रलपनग्रहणानिकर्मेंद्रियाणां तानिचानंदस्योपलक्षणानि श्वसन्नितिप्राणस्य स्वपन्नितिबुद्धेः उन्मेषणनिमेषणेकूर्माख्यप्राणस्येतिविभागः क्रमस्त्वविवक्षितः एतानि कुर्वन्नप्यभिमानाभावान्नलिप्यतेइत्यर्थः ॥ ८ ॥ ९ ॥ ब्रह्मणीति यतोविद्वानसंगत्वात्कुर्वन्नपिनलिप्यते तस्मादविद्वानपिब्रह्मणिसर्वांतर्यामिणिकर्माण्याधायअयमेवकारयितानत्वहंकर्त्तेतिसमर्प्ययःकर्माणिकरोतिसपापेननलिप्यतेंऽभसापद्मपत्रमिव ॥ १० ॥ कायेनेति केवलैरितिविपरिणामेनसर्वत्रसंबंधनीयं केवलेनकायेनअहमयंब्राह्मणोयुवेत्यात्माध्यासशून्येन एवमन्यत्रापि संगंत्यक्त्वादेहादिभ्यो विविक्तेप्यात्मनितार्किकादिवदहंकरोमीत्यभिनिवेशंत्यक्त्वायोगिनः कर्मकुर्वंति आत्मशुद्धयेचित्तशुद्ध्यर्थं तस्मात्तवापितत्रैवाधिकारोस्तीतिदेवत्वंकुरु ॥ ११ ॥

॥ ४९ ॥

किंच युक्तइति युक्तोब्रह्मण्याधायकर्माणीत्यादिनाउक्तलक्षणःकर्मणांफलंत्यक्त्वाईश्वरेसमर्प्यशांतिंकैवल्यं नैष्ठिकींसत्वशुद्ध्यादिक्रमप्राप्तब्रह्मनिष्ठाफलभूतांप्राप्नोति अयुक्तस्तद्विपरीतःकामकारेणस्वैरवृत्त्याफलेसक्तःसन्नितरांबध्यते ॥ १२ ॥ एवमविद्वान्फलासक्त्यनासक्तिवशात्कर्मभिर्बध्यतेनबध्यतेचेत्युक्तं विद्वांस्तुतद्विपरीतइत्याह सर्वकर्माणीति वशीजितचित्तःसमाधिस्थोयोगीनवद्वारेनैवंपंचज्ञानेंद्रियाणिषट्पाणस्तैर्नवतत्प्रवर्त्यानांकर्मेंद्रियाणांसंग्रहः बुद्ध्यहंकारचित्तानीतिनव एतानिद्वाराणीवपुरपनेजीवस्यभोगार्थंविषयप्रवेशस्थानानियस्मिन्नवद्वारेशरीराख्येपुरेविचित्रवासनाकल्पितानंतविषयवतिअनेकैःकर्मसंचिवैरधिष्ठितेसुखदुःखादिनानापण्यवतिमनसासर्वद्वारोद्घाटनकुंचिकयासहसर्वाणिकर्माणिपुरपतिरिवराजकार्याणिसंन्यस्यसुखंनिर्विकल्पसंविन्मात्ररूपेणास्ते कर्माणिक्षेत्रस्यैवधर्मोनत्वात्मनइतिक्षेत्रेत्युक्तंशक्यान्येव तथाचश्रुतिः शरीरेपाप्मनोहित्वेति यत्रसुहार्दःसुकृतोमदंतेविहायरोगंतन्वाश्चयायामितिच देहीसन्देहाभिमानकाले व्युत्थानेपीत्यर्थः तदापिनैवकुर्वन्नास्ते नापिकारयन्नास्तेराजेवामात्येपुनिहितभारःसमाधौक्षेत्रेणसहात्मनःसंबंधाभावदर्शनात् यद्वानवद्वाराणिचक्षुःश्रोत्रनासाबिलद्वंद्वानिषट्सप्तमंमुखंअधस्तनेद्वेइति अस्मिन्पक्षेइंद्रियाणिपरिचारिकाबुद्धिर मात्योऽहंकारोयुवराजइत्यादिकमूह्यं विदुषःकर्मसंबंधएवनास्तिदूरेतत्फलासक्त्यनासक्तीइतिभावः ॥ १३ ॥ नन्वेवंभूत्यवत्कर्तृत्वंस्वामिवत्कारयितृत्वंवास्यमास्तु अयस्कांतवदविकारस्यैवसतःकर्त्रादिधर्मकाहंकारादिप्रवर्त्तकत्वमस्त्वित्याशंक्याह नकर्तृत्वमिति कर्तृत्वमहंकारस्य कर्माणिइंद्रियाणांवचनादानादीनिश्रवणदर्शनादीनिच लोकस्यलोक्यतेप्रकाश्यतइतिलोकोजडवर्गः प्रभुश्चिदात्मासूर्य

युक्तःकर्मफलंत्यक्त्वाशांतिमाप्नोतिनैष्ठिकीं॥ अयुक्तःकामकारेणफलेसक्तोनिबध्यते॥ १२॥सर्वकर्माणिमनसासंन्यस्यास्तेसुखंवशी॥ नवद्वारे पुरेदेहीनैवकुर्वन्नकारयन्॥ १३॥नकर्तृत्वंनकर्माणिलोकस्यसृजतिप्रभुः॥ नकर्मफलसंयोगंस्वभावस्तुप्रवर्त्तते॥ १४॥ नादत्तेकस्यचित्पापंनचैवसुकृतंविभुः॥ अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवः॥१५॥

इवासमादीनांप्रकाशकोपिनकर्मादौप्रवर्त्तकस्तद्वत् अस्यकर्मफलसंयोगंवानसृजतिकिंतुयोयादृक्स्वस्यस्वभावःसतथाप्रवर्त्ततेयथासूर्येभ्युदितेकमलानांविकसनंकुमुदानामुन्मुद्रणंचेति तद्वदेवमात्मनिप्रकाशमानेघटादयोनचेष्टंतेमनुष्यादयस्तुचेष्टंते नत्वात्माकस्यचित्प्रवर्त्तकोनिवर्त्तकोवा लोहायस्कांतयोरिवसत्यानृतयोरात्मानात्मनोःसंबंधाभावादितिभावः ॥ १४ ॥ ननुएषस्रेवसाधुकर्मकारयतिनंयमेभ्योलोकेभ्यउन्निनीषतेएषस्रेवासाधुकर्मकारयतिनंयमधोनिनीषतइतिश्रुत्यापरमेश्वरेकारयितृत्वंबोध्यते तत्कथमुच्यतेस्वभावस्तुप्रवर्त्ततइतित्राह. नादत्तइति कस्यचित्कर्त्तुःपापंअयंनादत्तेनापिसुकृतं कारयितृत्वाभावात्यतोविभुर्व्यापकःनिष्क्रियइतियावत् सकियोऽन्यंप्रवर्तयतिदीर्घंपापंपुण्यंबालभतेअयंतुनतथाकिंतुसूर्यवत्प्रकाशतएवननुत्सप्रकाश्यानांकर्त्रादीनांकर्मणांसंबध्यतेइतिभावः कारयितृत्वमप्यस्यसत्तामात्रेणसूर्यवत् यथाघटःप्रकाशतेसविताप्रकाशयतीतिनोदाहृतश्रुतिविरोधः कथंतर्हिईश्वराराधनार्थंकर्माणिकुर्वैतिनदकरणाच्चविभ्यतीत्याशंक्याह अज्ञानेनेति यथाहिमहाराजस्यसार्वभौमस्याहंसर्वैश्वरोनिर्दंतोस्मीतिज्ञानंअज्ञानेनसौषुप्तेनावृतंचेत्ततत्रविविधानिपरचक्रादीनिमहांतिसंकटशतानिपश्यतिअहोअहंदीनोस्मिदुःख्यस्मीतिचमुह्यतितद्वदेतेजंतवःस्वस्याहंब्रह्मास्मीतिप्रमाणेनब्रह्मभावमजानंतईश्वरादात्मानंपृथक्त्वेनमानाईशात्मनोःसेव्यसेवकभावंचप्रश्यंतोमुह्यंति तथाचश्रुतिःअथयोन्यांदेवतामुपास्तेन्योसावन्योहमितिनसवेदयथापशुरेवंसदेवानामितिएषस्रेवेतिश्रुतिरपिभांतजनव्यवहारविषयैवेतिभावः १५

तदात्मनआवरकमज्ञानंयेषांज्ञानेनब्रह्मास्मीतिप्रमाणजेननाशितंतेषांतज्ज्ञानंकर्तृआदित्यवदादित्योयथाकृत्स्नंजगद्व्यंप्रकाशयतितद्वत्परंपुरमार्थवस्तुप्रकाशयति अज्ञानजानर्थनिवृत्त्यर्थंज्ञानमेष्टव्यमिति भावः ॥ १६ ॥ तद्बुद्धयइति यत्परंब्रह्मप्रशांतंतत्रैवबुद्धिःअस्तिब्रह्मेतिनिश्चयोयेषामापाततःश्रुत्यर्थविदितंतद्बुद्धयः तदेवआत्माप्रत्यक्तत्त्वंयेषांश्रवणमननात्मकविचारेणप्रमाणप्रमेयगतासंभावनाविही नानीतेतदात्मानः तत्रैवनिष्ठाविजातीयवृत्त्यनंतरितसजातीयवृत्तिप्रवाहोयेषांदेहादावनात्मनिआत्मधीरूपविपरीतभावनारहितानांतेतन्निष्ठाःतदेवपरंअयनंअज्ञानरूपोपाधिनिरासेनप्राप्ययेषामस्तंगतं दग्धज्ञानेनितत्परायणाःअपुनरावृत्तिंमोक्षंगच्छंति यतःज्ञानेनविधूतंकल्मषंमूलाज्ञानंसंसारबीजभूतंयेषांतेज्ञाननिर्धूतकल्मषाः ॥ १७॥ एतेषांजगतिदृष्टिमाह विद्येति उत्तमब्राह्मणेचंडालादौवासमंब्रह्मैव सद्रूपेणस्फुरणरूपेणचभासमानंद्रष्टुंशीलंयेषांतेसमदर्शिनः यथोक्तं अस्तिभातिप्रियंरूपंनामचेत्यंशपंचकं आद्यंत्रयंब्रह्मरूपंजगद्रूपंततोद्वयमिति चराचरंजगद्ब्रह्मदृष्ट्यैवपश्यंतीत्यर्थः ॥१८॥ ननुसमासमा

ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनः॥ तेषामादित्यवज्ज्ञानंप्रकाशयतितत्परम्॥१६॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥ १७॥ विद्याविनयसंपन्नेब्राह्मणेगविहस्तिनि॥ शुनिचैवश्वपाकेचपंडिताःसमदर्शिनः॥ १८॥ इहैवतैर्जितःसर्गोयेषांसाम्येस्थितंमनः॥ निर्दोषंहिसमंब्रह्मतस्माद्ब्रह्मणितेस्थिताः॥ १९॥ नप्रहृष्येत्प्रियंप्राप्यनोद्विजेत्प्राप्यचाप्रियं॥ स्थिरबुद्धिरसंमूढोब्रह्मविद्ब्रह्मणिस्थितः॥ २० ॥

भ्यांविषमसमेपूजातइतिनुल्यश्वपाकशीलायब्राह्मणद्वयायविषमांपूजांप्रयुक्तवतः तथाअतुल्यश्वपाकशीलायब्राह्मणद्वयायसमांपूजांप्रयुक्तवतश्चाभोज्यान्नत्वंगौतमेनस्मर्यतेतत्कथंब्राह्मणचंडालयोःसमदर्शी त्वंयुक्तमित्याशंक्याह इहैवेति येषांमनःसर्वभूतेषुसाम्येब्रह्मभावेस्थितंतेनिश्चलैतैरिहैवजीवद्भिरेवसर्गोजन्मजितोवशीकृतः हियस्मान्निर्दोषंसमंसर्वत्राविषमंब्रह्मास्तियथाहिरण्मययोर्दैवतातत्पीठयोःस्वर्ण दृक्साम्यंपश्यतिपूजकस्तुआकारदृक्तारतम्यंपश्यतितद्वत् पूजास्मृतिभोक्तिकृततारतम्यविषया साम्यदृष्टिस्तुतत्त्वविषयेतिभावः यस्मादेवंतेसाम्यंपश्यंतितस्मात्ब्रह्मणिअखंडैकरसेतेद्रष्टारःस्थिताएकी भावेनसमाधिंगताः ॥१९॥ नप्रहृष्येदिति यस्मान्निर्दोषंसमंब्रह्मतस्मात्प्रियंपुत्रादिंप्राप्यनप्रहृष्येत् अप्रियंशत्रुंदुःखदंप्राप्यनोद्विजेत् बुद्धस्थिरबुद्धेनानुष्ठेयेतिज्ञापयितुमुभयत्रलिङ्प्रयोगः स्थिरबुद्धिः प्रत्यगद्वैतेश्रुतियुक्तिभ्यांस्थिरीकृतप्रज्ञःअसंमूढोध्यानजसाक्षात्कारेणनिर्गतमोहःअतएवब्रह्मवित्ब्रह्मभावस्यलब्ध्वा ब्रह्मभावंगतइत्यर्थः ब्रह्मण्येवप्रत्यगद्वयेव्युत्थानावस्थायामपिस्थितः सर्वंब्रह्मेत्येवपश्य न्नित्यर्थः ॥ २० ॥

॥ ५० ॥

नन्वननुभूतात्मसुखेसयाप्रसिद्धंबाह्यसुखंत्यक्तुमशक्यमतोनप्रहृष्येदित्यसंगतमतआह बाह्येति बहिर्भवाःबाह्याःस्पर्शाविषयेंद्रियसंबंधास्तेषु असक्तात्माअनासक्तचित्तःसन्नात्मनिप्रत्यगद्वयानंदेसुषुप्ति कालेस्थित्वायत्सुखंविंदतिलभतेसतदेवसुखं विधेयापेक्षंपुंस्त्वं कस्तत्सुखं योब्रह्मयोगेब्रह्मणियोगःसमाधिस्तन्मयुक्तोयोजितआत्माबुद्धिर्येनसब्रह्मयोगयुक्तात्मा ब्रह्मविदित्यर्थः ब्रह्मविद्ब्रह्मैवभवतीतिश्रुतेः ब्रह्मयोगयुक्तात्मानदेवसुखंविंदतीतिवक्तव्येब्रह्मविदेवतत्सुखमितितस्यसुखाभिन्नत्वविवक्षयाइदमुक्तं ननूभयत्रएकमेवसुखंचेत्कःसुप्तसमाधिस्थयोर्विशेषइत्याशंक्याह सुखमिति अक्षय्यंसुखंमोक्ष स्तमश्नुतेव्याप्नोतिद्वैतादर्शनस्यतुल्यत्वाद्धनयत्रैकमेवसुखंतथापियोगीमूलाविद्यायानष्टत्वादक्षय्यंसुखमश्नुतेनसुप्तः अविद्यानुच्छेदात् तथाचमोक्षसुखस्यमुख्यस्याप्यनुभूतत्वात्तदर्थंवाञ्छंसुखंसुत्यजमित्य र्थः ॥ २१ ॥ ननुसुप्तिनुल्यस्यमोक्षसुखस्यार्थैकःप्राप्तमेववाञ्छंदिव्यरूपन्नपानगीतवाद्यादिसुखंत्यजेदित्याशंक्यबाह्यसुखमनित्यत्वार्त्तिदति येहीति संस्पर्शजाविषयसंबंधजाः दुःखयोनित्वेहेतुः आ

वात्यस्पर्शेष्वसक्तात्माविंदत्यात्मनियत्सुखम्॥ सब्रह्मयोगयुक्तात्मासुखमक्षय्यमश्नुते॥ २१॥ येहिसंस्पर्शजाभोगादुःखयोनयएवते॥ आ द्यंतवंतःकौंतेयनतेषुरमतेबुधः॥ २२॥ शक्नोतीहैवयःसोढुंप्राक्शरीरविमोक्षणात्॥ कामक्रोधोद्भवंवेगंसयुक्तःससुखीनरः॥ २३॥ योंऽतः सुखोंतरारामस्तथांतर्ज्योतिरेवयः॥ सयोगीब्रह्मनिर्वाणंब्रह्मभूतोधिगच्छति॥ २४॥ लभंतेब्रह्मनिर्वाणमृषयःक्षीणकल्मषाः॥ छिन्नद्वैधा यतात्मानःसर्वभूतहितेरताः॥ २५॥ कामक्रोधवियुक्तानांयतीनांयतचेतसाम्॥ अभितोब्रह्मनिर्वाणंवर्त्ततेविदितात्मनाम्॥ २६॥

यंतवंतइति जातेपुत्रेयत्सुखंतत्तस्मिन्नष्टेनश्यतिदुःखंचमहत्प्रयच्छतीतितेषुभोगेषुबुधःपरिपाकदर्शीनरमते ॥ २२ ॥ कःपुनर्मुख्यःसुखीत्याह शक्नोतीति इहैवजीवत्येवदेहेप्राक्शरीरविमोक्षणात्पूर्वंयावद्देह पातंमयाकामक्रोधौजितावितिविश्वासोनकर्त्तव्यइत्यर्थः श्रुतेदृष्टेअनुमितेवाविषयेयोगर्द्धस्तृष्णारूपोऽतृप्तिश्चसकामःक्रोधस्तादृशेएवविषयेद्वेषस्तौकामक्रोधौउद्भवोयस्यवेगस्यसरोमांचरूपनेत्रवक्त्रलिं गोंऽतःकरणप्रक्षोभरूपःकामोद्भवोवेगः गात्रप्रकंपप्रस्वेदसंदष्टोष्ठपुटरक्तनेत्रादिलिंगःक्रोधोद्भवोवेगस्तंकामक्रोधोद्भवंवेगंसोढुंयःशक्नोतिसएवयुक्तोयोगीमुख्यःसुखीचनान्यः ॥ २३ ॥ कोसौयोगीयोमुख्यः सुखीत्युक्तंतमाह यइति सुखंविषयसंगजाप्रीतिः आरामःप्रीतिहेतुःस्त्र्यादिभिःसहक्रीडा ज्योतिःक्रीडोपकरणानांप्रकाशः तदेतत्रयंयस्यांतरेवसोंऽतःसुखोंतरारामोंतर्ज्योतिश्चनर्त्तेद्रियद्वारकमितिएवशब्दा र्थः यएवंभूतःसयोगीकिमतोयत्रेवंब्रह्मनिर्वाणंगत्यप्राप्यपरमानंदंब्रह्मइहैवाधिगच्छति यतोब्रह्मभूतोजीवन्नेवब्रह्मदर्शनेनब्रह्मभावंगतः ॥ २४ ॥ लभंतइति ऋषयःसम्यग्दर्शिनः छिन्नद्वैधाश्छिन्नसंशायाः यतात्मानोजितचित्ताः ॥ २५ ॥ किंचकामेति अभितोजीवतांमृतानांच विदितात्मनांज्ञातात्मतत्त्वानां ॥ २६ ॥

एवंसम्यग्दर्शननिष्ठानांसद्योमुक्तिरुक्ता कर्मयोगश्चसंगफलत्यागेनईश्वरप्रीत्यर्थंमनुष्ठितःसत्वशुद्धिज्ञानप्राप्तिद्वारेणमोक्षायभवतीत्यपयुक्तं अथेदानींसम्यग्दर्शनस्यांतरंगसाधनंध्यानयोगंविस्तरेणवक्ष्यामी तितत्सूत्रभूतांस्त्रीन्श्लोकानुपदिशति स्पर्शानिति अत्रोत्तरार्धेनप्राणायामउक्तःस्पर्शान्कृत्वाबहिर्बाह्यानितिप्रत्याहारउक्तः भुवोरंतरेचक्षुःकृत्वेतिधारणाउक्ताविगते च्छाभयक्रोधइतिसाधनभूताःफलभूता श्चद्विविधायमानियमाश्चोक्ताः यतेंद्रियइतिवितर्काख्यःसंप्रज्ञातोयतमानइतिविचाराख्यःयतबुद्धिरित्यानंदास्मिताख्यौमोक्षपरायणइत्यसंप्रज्ञातउक्तः शेषेणयोगफलमितिविभागः पाठक्रममननुरुध्यार्थ क्रमेणाक्षरार्थःस्पष्टीक्रियते तत्रविगतेच्छोविगतभयोविगतक्रोधइतिसंबंधः योहिइच्छावान्सदृष्टसिद्ध्यर्थंहिंसानृतस्तेयस्त्रीपरिग्रहानिच्छेदतोविगतेच्छपदेनतद्विपर्ययानहिंसासत्यास्तेयब्रह्मचर्यापरिग्र हायमाइतिसूत्रोक्तान्यमान्गृह्णलक्षयति तथाभयंत्यक्त्वोच्छेदशंकातयासुद्विग्नोनशौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाइतिसूत्रोक्तान्नियमान्स्वीकर्तुमिच्छेदतोविगतभयइत्यनेनतेषांग्रहणं तथाक्रो धाकांतोमैत्र्यादीन्भावयितुमशक्तश्चित्तप्रसाधनंकर्तुंनशक्नोति तच्चमैत्रीकरुणामुदितोपेक्षाणांसुखदुःखपुण्यापुण्यविषयाणांभावनातश्चित्तप्रसाधनमितिसूत्रितं तत्रविगतक्रोधःशांतप्रकृतित्वात्दुःखितेषुमै

स्पर्शान्कृत्वाबहिर्बाह्यांश्चक्षुश्चैवांतरेभ्रुवोः ॥

त्रीपरस्येष्टेनममैवेष्टमिदंजातमितिभावयेत्तथादुःखितेषुकरुणांपुण्यवत्सुमुदितांपापवत्सूपेक्षांचभावयेत् नचैतेनप्रसाधनेनविनाचित्तादर्शस्यनैर्मल्यंभवति एवंसाधनावस्थायांयमनियमचित्तप्रसाधनानां सिद्ध्यर्थंविगतेच्छाभयक्रोधत्वमीप्सितं एवंफलावस्थायामपितदीप्सितं तथाहि संप्रज्ञातसमाधिफलभूतायांमधुमत्यांयोगभूमौस्थितंयोगिनंप्रतिदिव्याःकामाउपतिष्ठंतेतत्रापिविगतेच्छत्वमिष्टं तथाहि स्था न्युपनिमंत्रणेसंगस्मयाकरणंपुनरनिष्टप्रसंगादितिसूत्रं स्थानिनोदेवास्तैरुपनिमंत्रणेइहास्तांइमेरम्यावसथाइमारम्यारामाइमानिजरामरणहराणिरसायनानिइमेवयंकिंकराःत्वपुण्याँजितमिदंस्थानंत्व याभुज्यतामितिप्रार्थनायांक्रियमाणायांसंगोलिप्सातत्रनकर्त्तव्या नापितच्छाभेनात्मनोमहाभागत्वंदेवप्रार्थ्यत्वंमत्वागर्वोपिकर्त्तव्यस्तयोःसंगस्मययोर्भेशहेतुत्वादितिसूत्रार्थः तथाभयमपिद्विविधं योगांत रायजंवितर्कजंच तत्रायं व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानिचित्तविक्षेपास्तेंतरायाःदुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासाविक्षेपसहभुवइतिसूत्राभ्यामुक्तं स्त्यानमकर्मण्यता अविरतिरवैराग्यं अंगमेजयत्वंकंपवायुः वितर्काहिंसादयस्तज्जंचभयं आद्यस्यनिवारणमीश्वरप्रणिधानेन तथाचसूत्रितं ततःप्रत्यक्चेतनाधिगमोंतरायाभावश्चेति ततईश्वरप्रणिधानात्

द्वितीयस्यप्रतिपक्षभावनेन तथाचसूत्रितं वितर्कबाधनेप्रतिपक्षभावनमिति वितर्काहिंसादयःकृतकारितानुमोदितालोभक्रोधमोहमूलामृदुमध्याधिमात्रादुःखाज्ञानानंतफलाइतिप्रतिपक्षभावनमितिच आदिपदादनृतस्तेयादयः हिंसादयःप्रत्येकंकृतकारितानुमोदितभेदेनत्रिविधाः तेपिप्रत्येकंलोभादिमूलकत्वेनत्रिविधाः तेपिमृदुमध्यमाधिमात्रभेदेनप्रत्येकंत्रिविधाः तेचमूलभूतावितर्काश्चयश्चत्वारःपंच अधिकावात्रिंशत्त्रिगुणिताएकाशीतिरष्टोत्तरशतंपंचत्रिंशदधिकंशतंअधिकावाभवंति शाखाप्रशाखाभेदेनानंताश्च दुःखरूपंअज्ञानरूपंचअनंतफलंयेषांतेदुःखाज्ञानानंतफलाइत्यनयाप्रतिपक्षभावनयाते निवर्त्तनीयाइति एवंयमनियमचित्तप्रसाधनप्रतिपक्षभावनैर्निरंतरायंमृदूकृतचित्तोयोगीविविक्तेदेशेआसीनःसंभवादितिन्यायेनस्थिरसुखमासनमध्यासीत तत्रदेशासनेश्रूयेते समेशुचौशर्करवह्निवालु काविवर्जितेशब्दजलाश्रयादिभिः मनोनुकूलेनतुचक्षुपीडनेगुहानिवातात्रयणेप्रयोजयेत् त्रिरुन्नतंस्थाप्यसमंशरीरंहृदींद्रियाणिमनसासंनिरुध्य ब्रह्मोडुपेनप्रतरेतविद्वान्स्रोतांसिसर्वाणिभयावहानीति च

प्राणापानौसमौकृत्वानासाभ्यंतरचारिणौ॥ २७॥

क्षुरित्यत्रविसर्गलोपश्छांदसः त्रिरुन्नतंकटिवक्षःकंधराप्रदेशेषून्नतं ततोजिह्मासनःप्राणायामभ्यसेत् तेनहिभेदगतौप्राणेसतितदनुसारिमनोपिचांचल्यंत्यजति नोचेद्वायुविक्षेपेणविक्षिप्यते तत्रप्राणजय प्रमाणं प्राणान्प्रपीड्येहसयुक्तचेष्टःक्षीणेप्राणेनासिकयोच्छ्वसीतितिश्रुत्युक्तमेवसंगृह्णाति प्राणापानौसमौकृत्वानासाभ्यंतरचारिणाविति प्राणापानौसमौतुल्यौऊर्ध्वाधोगतिविच्छेदेननासाभ्यंतरचारिणौकुं भकेनकृत्वाततोबाह्यान्गृहिर्भवात्स्पर्शान्विषयसंबंधान्हृदींद्रियद्वारानित्यंअंतर्नुद्धीकियमाणान्योगीद्वियाणांप्रत्याहरणेनान्तर्बहिरेवकुर्यात् ततोविषयेभ्योव्याहृत्तेषुकरणेषुक्षमकालेइवांतर्मनोमात्रेणा वतिष्ठतेइत्यर्थः इमंप्रत्याहारंकर्तुमशक्तस्याविरक्तस्यकागतिरित्यतआह चक्षुश्चैवांतरेभ्रुवोरिति चक्षश्चोबार्थे चक्षुरेवबाभ्रुवोरंतरेकुर्यात् खेचरीमुद्रामभ्यसेदित्यर्थः साचोक्तायोगसारे लंबिकोर्ध्व स्थितेगर्त्तेजिह्वांव्यावृत्यधारयेत् दृढासनश्चिरंतिष्ठेन्मुद्रैषाखेचरीमता भ्रूमध्यदृष्टिरप्येषाशंभवीमुद्रिकेरिता यएवंसर्वोपिबाह्येविषयेसूर्यादौसंयमोयथोक्तंप्रत्याहारमनुष्ठातुमशक्तान्प्रत्येवोपदिश्यतइति ज्ञेयं॥ २७॥

यतेंद्रियेति यस्मिन्कस्मिंश्चित्स्थूलेविषयेसूर्यैतद्दृष्टमपुवाविष्णुप्रतिमायांवाऽऽहतध्वनौवान्यत्रवाचक्षुराद्यन्यतमद्वारामनोधारयेत्तत्तन्मनस्तद्विषयाकारतांप्राप्तंतत्रैवस्थिराभ्यासेनविश्रांतंस्वदेहमपिनपश्यतिसेयंमहाविदेहानामधारणा अस्यांसिद्धायामिंद्रियगणःस्वंस्वंविषयंनगृह्णाति सोयंबहिर्विषयप्रत्याहारः पूर्वोक्तस्त्वांतरइतिभेदः अतएवतयोस्तुल्यफलत्वंसूत्रितं ततःक्षीयतेप्रकाशावरणमिति ततः अभ्यंतरप्रत्याहारात् तथाबहिरकल्पितादृत्तिर्महाविदेहानांसंयमात्प्रकाशावरणक्षयइति यदाचित्तंदेहमविस्मृत्यैवहठेनपुरःस्थितमूर्त्याद्याकारंक्रियतेतदासाचित्तस्यमूर्त्याकारतारूपादृत्तिःकल्पिता यदातु निरवशेषेणदेहंविस्मृत्यचेतःकेवलंध्येयाकारमात्रंभवतितदासामहाविदेहानामधारणा तस्याअपिफलंतदेव तत्संयमात्तस्यांचेतसोनिपहातूप्रकाशावरणक्षयोभवतिसोयंबाह्यविषयःसमाधिः वितर्कांख्यो द्विविधः सवितर्कनिर्वितर्कभेदात् तत्राद्यस्यलक्षणंसूत्रितं शब्दार्थज्ञानविकल्पैःसंकीर्णासवितर्केति सवितर्कानामसमापत्तिःसमाधिरित्यर्थः यदाविष्णुप्रतिमादौपूर्वापरानुसंधानेनशब्दार्थोल्लेखेनचभावना प्रवर्त्ततेतदासवितर्कासमापत्तिः अस्मिन्नेवालंबनेपूर्वापराननुसंधानेनशब्दार्थोल्लेखनमंतरेणभावनाप्रवर्त्ततेनदानिर्वितर्कानामसमापत्तिः तथाचसूत्रं स्मृतिपरिशुद्धौस्वरूपशून्येवार्थमात्रनिर्भासानिर्वितर्का स्मृतेःशब्दार्थस्मरणस्यपरिशुद्धौवर्जनेसतिभावयितुःस्वरूपेणशून्यादाहमिदंभावयामीत्येवमाकारादृत्तिरपिभावयितुर्नास्तीवेतिभाति यतोर्थमात्रनिर्भासाध्येयार्थमात्रमस्यांज्ञासतेनत्वन्यदितिसूत्रार्थः अस्यांसिद्धायांयोगीजितेंद्रियइत्युच्यतेजितमनाइति आभ्यंतरप्रत्याहारपूर्वकंयदामनःकल्पितेसूक्ष्मेविषयेपूर्ववत्शब्दार्थोल्लेखपूर्वकंतद्दर्जनसोभावनाप्रवर्त्ततेतदातेउभेसमापत्तीसविचारनिर्विचाराख्येभवतः तथाचसूत्रं एतयैवसविचारानिर्विचारासूक्ष्मविषयाव्याख्यातेति अत्रसूक्ष्मविषयेतिपहणात्पूर्वस्यांस्थूलविषयत्वंगम्यते एतयैवद्विविधवितर्कसमापत्त्यैवनिर्विचारसमापत्तौदृढायांयोगी

यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छाभयक्रोधोयःसदामुक्तएवसः॥ २८॥

जितमनाइत्युच्यतेयदापुनश्चेतसोमूर्त्याकारतांपरित्यज्यसत्त्वोद्रेकात्समष्टिमनोमयविषयाअहमेवेदंसर्वोस्मीत्येवमाकाराभावनाप्रवर्त्ततेसोयंसानंदःसमाधिः यदातुतास्मिंश्चभावनांपरित्यज्यविषयवेदनमंतरेणास्मीत्येतावन्मात्राकाराभावनाप्रवर्त्ततेसास्मिता अस्मिताहंकारयोर्भेदस्तुक्रमेणविषयवैमुख्यतदाभिमुख्यमात्रकृतः यथैकएवपूर्वाभिमुखःपश्चिमाभिमुखश्चेतिवद्वत् अस्यामवस्थायांयोगीबुद्धितोविविक्तस्यत्वंपदार्थस्यसाक्षात्कारात्जितबुद्धिरित्युच्यतेतदेतदुक्तंयतेंद्रियमनोबुद्धिरिति एताग्येवप्रसाधनानिगुणपर्वाण्युच्यंते तथाचसूत्रं विशेषाविशेषलिंगमात्रालिंगानिगुणपर्वाणीति तत्रविशेषाःस्थूलभूतानिएकादशेंद्रियाणिच अविशेषाःपंचतन्मात्राणिअहंकारश्च लिंगमात्रंमहत्तत्वंअलिंगंप्रधानं तत्रविशेषादविशेषंप्रविविक्षतोयोगिनोदैनंदिनलयाभ्यासात्समनस्कानींद्रियाणिलीयंतेसलयः बहिर्मुखान्येववाज्ञवंतिसविक्षेपः एवंअविशेषेभ्योलिंगयात्रंविविक्षतोपिलयविक्षेपौत्सुक्यात्लिंगमात्रात्परंपुरुषंप्रविविक्षतोपितौस्तः तावेतौलयविक्षेपौहेयौभूयेते लयविक्षेपरहितंमनःकृत्वासुनिश्चलं यदायात्युन्मनीभावंतदातत्परमंपदमिति एतेषुत्रिषुलीनेष्वाद्यःसुप्तएव द्वितीयोविगलितदेहाहंकारत्वाद्विदेहसंज्ञः तृतीयःप्रकृतिलयइति एतयोःसमाधिर्गौणः अतएवसूत्रितं भवप्रत्ययोविदेहप्रकृतिलयानामिति भवप्रत्ययोजन्मांतरहेतुरेषांसमाधिर्भवति यद्वा जन्मांतरेएतेषांजन्मनैवसमाधिसिद्धिः पक्षिणामाकाशगमनसिद्धिवद्भवतीतिसूत्रार्थः सर्वथापितेषांसयोमुक्तिर्नास्तीतिसिद्धं यदातुअस्मितामात्रस्यापिनिर्विकल्पेचिन्मात्रेलयोभवतिदायंविद्वान्कैवल्यंधर्ममेघसमाध्यारूयमनुभवति यमधिकृत्यश्रूयते क्षणमेकंकनुशतस्यचतुःसप्तत्यायत्फलंतदवाप्नोतीति अयमेवमोक्षाख्यः परंअयनंप्राप्यंस्थानंयत्यसमुनिर्मोक्षपरायणइत्युच्यते यतोस्यामेवावस्थायांयोगीजीवन्मुक्तइत्युच्यतेंविगतेच्छाभयक्रोधइतिपादःप्रागेवव्याख्यातः यएवंभूतःससदामुक्तःबंधप्रतीतिकालेपिसमुक्तएवास्ति अज्ञानमात्रव्यवधानान्मुक्तेः एतेनाहंकारादेर्बंधस्यकालत्रयेपिअसत्त्वोक्त्या,मिथ्यात्वंदर्शितं ॥ २८ ॥

॥५२॥

एवंसमाहितचित्तेनकिंविज्ञेयमित्युच्यते ओंकारमिति सोपाधिकेनरूपेणयज्ञानांतपसांचकर्त्तृरूपेणदेवतारूपेणचओंकारं तथासर्वेषांभूतानांहिरण्यगर्भादीनामपिमहांतंव्यापकमीश्वरमीशितारमंतर्यामिणं सुहृदंसर्वभूतानांप्राणिनांप्रत्युपकारनिरपेक्षतयोपकारिणंसर्वप्रत्ययसाक्षिणंनारायणमांप्रत्यभेदेनज्ञात्वासाक्षात्कृत्यतद्भावंप्राप्यशांतिमनुपाध्यवस्थांनिरुपाख्यांकैवल्यसंज्ञांकृच्छतिप्राप्नोति एवंचसोपाधिब्रह्मभावप्राप्तिपूर्वकैवनिरुपाधिप्राप्तिरितिगम्यते यथोक्तंवार्त्तिकसारे सोपाधिर्निरुपाधिश्चद्वेधाब्रह्मविदुच्यते सोपाधिकःस्यात्सर्वात्मानिरुपाख्योनुपाधिकः जक्षन्क्रीडन्ररंतिप्रामइतिसोपाधिकस्यतु छांदोग्येसर्वकामाप्तिःसार्वात्म्यात्स्पष्टमीरिता अहमन्नंतथान्नादःश्लोकार्थप्यहोअहं इतितत्त्वविदःसामगानेसर्वात्मताश्रुता अत्रापिचकृदंतात्सोपाधिस्तत्त्वविच्छुतः अपूर्वानपराबुक्त्याश्रोव्यतेनिरुपाधिकइति ॥२९॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेश्रीमद्भगवद्गीतार्थप्रकाशेपंचमोऽध्यायः॥ ५ ॥ प० ॥ २९ ॥ ॥७॥ ॥ ७ ॥ ॥ पूर्वाध्यायांतेसूत्रितंध्यानयोगंविस्तरीतुमिच्छंस्तत्राधिकारहेतुत्वात्कर्मयोगंतावत्स्तौतिद्वाभ्यां अनाश्रितइति यःकर्मणांफलमनाश्रितोऽनपेक्षमाणःकार्यमवश्यकर्त्तव्यंनित्यंकर्मकरोतिसएवफलसंकल्पत्यागात्संन्यासीचयोगीचभवति नतुनिरग्निर्योविधितःश्रौतस्मार्त्तकर्मत्यागीसएवसंन्यासीनापिअक्रियस्यक्तवाङ्मनःकायक्रियएववायोगीति ॥ १ ॥ केनसाम्येनायंसंन्यासीयोगीचेतित्यूयतेअतआह यमिति योहित्यक्तसर्वसंकल्पःससंन्यासीतादृशश्चध्यानयोगीअतोननयोर्भेदःनिःसंकल्पस्तटस्थस्तिष्ठेदेतन्मोक्षलक्षणमितिमैत्रायणीयोपनिषच्छुतस्यमोक्षलक्षणस्यनिःसंकल्पत्वस्योभयत्रापितुल्यत्वात् अतोऽयमपिकर्मयोगीफलसंकल्पत्यागान्निःसंकल्पत्वसाम्यात्संन्यासीयोगीचभवतीतिस्तूयतइत्यर्थः योगाधिकारसिद्धयेनिष्कामकर्माण्यनुष्ठेयानीतिश्लोकद्वयतात्पर्यार्थः ॥ २ ॥ तत्रकर्मानुष्ठानस्यावधिमाह आरुरुक्षोरिति यावद्धियोगंयमनियमाद्यष्टांगोपेतमत्यौत्कंठ्यादारोढुमिच्छतिनावत्कर्माण्यनुतिष्ठेत् तस्यारुरुक्षोर्मुनेरारुरुक्षाकारणंनाद्यवैराग्योत्पादनद्वाराकर्मभवति तस्यैवयोगारूढस्ययोगांगानुष्ठानेप्रवृत्तस्यविक्षेपासहस्ययोगारोहेकर्मणांशमःसंन्यासःकारणमुच्यते नहिकर्मसुव्यापृतोऽनन्यचित्ततयायोगमनुष्ठातुमीष्टे ॥ ३ ॥ ननुयोगपदेनमुख्ययादृच्यानिर्बीजःसमाधिरुच्यतेनमारूढस्यकर्मणांत्यागःस्यात्सिद्धत्वादविधेयइत्याशंक्याप्रकृतेयोगारूढपदस्यार्थमाह यदाहीति इंद्रियार्थेषुशब्दादिषुरमणीयेषुकर्मसुचतत्प्राप्तिसाधनेषुतद्दर्शनमननसज्जतेवैराग्यदार्ढ्यात्सक्तोनभवति नापिमननसादृश्यमेभूयादेतदर्थमहमिदंकर्मकुर्यामितिसंकल्पयतिं तादृशश्चसर्वसंकल्पसंन्यासीयदाभवतितदायोगारूढइत्युच्यते यथानीव्रबुभुक्षयोपेतोन्यत्रनीरागोव्यासंगांतरंत्यक्त्वाभोजनारूढएवभवतितथातीव्रारुरुक्षावान्सर्वत्रवीतरागस्यक्तसर्वकर्मायोगारूढएवभवतितावत्कर्माणिकर्तव्यानितःपरंत्याज्यानीत्यर्थः ॥ ४ ॥

उद्धरेदिति एवंक्रमेणकर्मद्वाराचित्तशुद्धिंसंपाद्ययोगारूढोभ्यासवैराग्यबलेनात्मानमुद्धरेत् हियस्मादात्मैवात्मनोबंधुर्नपुत्रादयउद्धर्तुंक्षमाः आत्मैवरिपुरात्मनःनत्वन्येशत्रवःसंसारेमज्जयितुमेनंक्षमाइत्यर्थः ॥ ५ ॥ आत्मानः आत्मनामनसा अनात्मनोऽजितचेतसः आत्मामनएवशत्रुः ॥६॥ मनसोजयेफलमाह जितात्मनइति शीतोष्णादिषुप्राप्तेषुजितात्मनोनिर्विकारचित्तस्यात्माचित्तंपरमुत्कर्षेणसमाहितःसमाधिंप्राप्तोभवति अतःसमाधिसिद्ध्यर्थंमनोजेतव्यमेवेत्यर्थः ॥ ७ ॥ समाधिसिद्धेरपिकिंफलमतआह ज्ञानेति ज्ञानंशास्त्रोपदेशजाबुद्धिः विज्ञानंशास्त्रार्थध्यानजःप्रमारूपोनुभवस्ताभ्यांतृप्तःसंजातालंप्रत्ययआत्माचित्तंयस्यसज्ञानविज्ञानतृप्तात्मा यतस्तृप्तात्माऽतःकूटस्थोऽप्रकंप्यःसंसारतापानास्कंदितोभवतीतिसमाधिफलं अस्यलोकप्रसिद्धंलक्षणमाह विजितेंद्रियइति समलोष्टाश्मकांचन इत्येवंविधोयोगीसयुक्तःप्राप्तयोगइत्युच्यतेविद्वद्भिः॥ ८ ॥ समत्वमेवस्तौति सुहृदिति सुहृत्प्रत्युपकारमनपेक्ष्योपकर्त्ता मित्रंस्नेहवान् अरिःशत्रुः उदासीनउभयत्रपक्षपातशून्यः मध्यस्थउभयहितैषी द्वेष्यआत्मनोऽप्रियः बंधुःसंबंधी तेषुसाधुषुपुण्यकृत्सुपापेषुपापाचारेषुकस्यकिंकर्मैत्यनालोचयन्तेषुसर्वेषुच्यःसमबुद्धिःसविशिष्यते ॥९॥ योगीति योगीयोगाभ्यासपरोरहसिएकांतेस्थितःसन्आत्मानंबुद्धि

उद्धरेदात्मनात्मानंनात्मानमवसादयेत्॥ आत्मैवह्यात्मनोबंधुरात्मैवरिपुरात्मनः॥ ५॥ बंधुरात्मात्मनस्तस्ययेनात्मैवात्मनाजितः॥ अनात्मनस्तुशत्रुत्वेवर्तेतात्मैवशत्रुवत्॥ ६॥ जितात्मनःप्रशांतस्यपरमात्मासमाहितः॥ शीतोष्णसुखदुःखेषुतथामानापमानयोः॥ ७॥ ज्ञानविज्ञानतृप्तात्माकूटस्थोविजितेंद्रियः॥ युक्तइत्युच्यतेयोगीसमलोष्टाश्मकांचनः॥ ८॥ सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु॥ साधुष्वपिचपापेषुसमबुद्धिर्विशिष्यते ॥ ९ ॥ योगीयुंजीतसततमात्मानंरहसिस्थितः॥ एकाकीयतचित्तात्मानिराशीरपरिग्रहः ॥ १० ॥ शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः ॥ नात्युच्छ्रितंनातिनीचंचैलाजिनकुशोत्तरं ॥ ११ ॥ तत्रैकाग्रंमनःकृत्वायतचित्तेंद्रियक्रियः॥ उपविश्यासनेयुंज्याद्योगमात्मविशुद्धये॥ १२॥

युंजीतसमाद्ध्यात् सततमितिनैरंतर्यमुक्तं निराशीर्योगसिद्धेरन्यदप्रार्थयानस्तदेकनिष्ठइतियावत्तेनसत्कारउक्तः एकाकीअसहायःसंन्यासीत्यर्थः यतौस्थिरीकृतौचित्तंमनआत्मासेंद्रियंशरीरंयेनसयतचित्तात्मा तथाअपरिग्रहःएकाकित्वेपिकंथापुस्तकादिबहुपरिग्रहशून्यः ॥ १० ॥ योगंयुंजीतेत्युक्तंतत्कथमित्याकांक्षायांतदंगान्यासनादीन्याह शुचौदेशेइत्यादिना शुचौस्वभावतःसंस्कारतोवापुण्येदेशेस्थानेप्रतिष्ठाप्यसुस्थितंकृत्वास्थिरंनिश्चलं आस्तेस्मिन्नित्यासनंस्थंडिलं निश्चलमित्यनेननृन्मयमेवस्थंडिलंनतुकाष्ठमयंपीठं आसनमितिपरासनव्याहृत्यर्थं नात्युच्छ्रितंनात्युच्चं नातिनीचंचैलाजिनकुशाउत्तरेउपर्युपरियस्यतच्चैलाजिनकुशोत्तरं अजिनाद्युपरिचैलंकुशेभ्यउपरिअजिनंस्थंडिलस्योपरिकुशाइत्यर्थः ॥ ११ ॥ प्रतिष्ठाप्यकिंकुर्यादितिआह तत्रेति तत्रासनेपद्मस्वस्तिकाद्यन्यतमेनासनेनोपविश्य यताःनिगृहीताश्चित्तस्यक्रियाविषयाणांस्मरणानिइंद्रियक्रियास्तेषांग्रहणंयेनासौयतचित्तेंद्रियक्रियः अतएवमनोबाह्याभ्यंतरविषयानुपरक्ततयाएकंध्येयमेवप्रत्यक्तत्वमयेयस्यस्फुरतिनान्यत् तदेकाग्रंदत्त्यंतरानंतरितब्रह्मैकाकारवृत्तिप्रवाहिकृत्वाआत्मविशुद्धयेचित्तशुद्ध्यर्थंयोगंवृत्तिप्रवाहस्यापिनिरोधंयुंज्यादनुतिष्ठेच्चित्तस्यस्थैर्यतापादनेन ॥ १२ ॥

आसनउपविश्येत्युक्तंतत्कथमित्यतआह सममिति कायःशरीरमध्यंशिरोग्रीवाचकायशिरोग्रीवंसमंमूलाधारमारभ्यमूर्धांतंअवक्रंअचलंनिष्कंपंधारयन्स्थिरोभूत्वासंप्रेक्ष्यनासिकाग्रंस्वनासिकाग्रावेक्षणंनविधीयतेकिंतुनिमीलनेलयभयमुन्मीलनेविक्षेपभयमतोदिशोपिस्पृष्वादिविक्षेपकविषयदर्शनभयादनवलोकयन्धर्म्यैलिंतनेत्रआसीतेतिउत्तरेणान्वयः ॥ १३ ॥ एवमासनेउपविष्टेनयत्कर्त्तव्यंतदाह प्रशांतात्मेति योगयुक्तोयोगीब्रह्मचारिव्रतेनैक्षचर्यायांस्थितः संन्यासीत्यर्थः मच्चित्तोमयिपरमेचित्तंयस्यसएवंभूतोमय्येवमनःसैयम्यमत्परआसीतसप्रशांतात्माभूत्वाविगतभीर्भवतीतियोजना भवतिहि कश्चिदात्मनोन्यभीश्वरंमत्वातच्चित्तस्तमेवाराध्यत्वेनाभिगतस्तत्रैवचमनसःसंयमंकरोतिनतुसतत्परस्तमेवपरमपुरुषार्थतयाप्राप्यत्वेनमन्यतेकिंतुतत्प्रीत्यान्यदेवफलंकामयते अयंतुमच्चित्तोमय्येवमनःसंयम्यमत्परोमामेवसर्वोत्तरंप्रत्यगद्वयंकामयतइति यतोमत्परोऽतएवप्रशांतात्माप्रकर्षेणबाह्याभ्यंतरविषयत्यागेनसमाधिसुखास्वादत्यागेनचशांतउपरतःआत्माचित्तंयस्यसोस्मितामात्रावशेषोविगतभीर्भवति इयमेवावस्थासत्पुरुषान्यताख्यातिरितिब्रह्मसाक्षात्कारइतिचविकल्प्यते सर्वथातस्यांसिद्धायांपुरुषःपरमपुरुषार्थंप्राप्नुवति ॥ १४ ॥ अस्याःफलमाह युंजन्नेवमिति एवमनेनप्रकारेणसदानि

समंकायशिरोग्रीवंधारयन्नचलंस्थिरः॥ संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलोकयन्॥ १३॥ प्रशांतात्माविगतभीर्ब्रह्मचारिव्रतेस्थितः॥ मनःसंयम्यमच्चित्तोयुक्तआसीतमत्परः॥ १४॥ युंजन्नेवंसदात्मानंयोगीनियतमानसः॥ शांतिंनिर्वाणपरमांमत्संस्थामधिगच्छति ॥ १५॥ नात्यश्नतस्तुयोगोस्तिनचैकांतमनश्नतः॥ नचातिस्वप्नशीलस्यजाग्रतोनैवचार्जुन॥ १६॥ युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु॥ युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहा॥ १७॥

रंतरंदीर्घकालंचात्मानंमनोयुंजन्समादधानोयोगी नियतंख्यातिफलादपिनिगृहीतंमानसंयेनसनियतमानसः शांतिंपरमवैराग्यबलात्ख्यातिमपिनिरुध्यनिर्विकल्पंपदंनिर्वाणंमोक्षस्तदेवपरमानिष्ठायस्याः शांतेस्तांमत्संस्थांमय्येवसंस्थाएकीभावेनावस्थानंसमाप्तिर्वायस्यास्तामधिगच्छतिप्राप्नोति ख्यातिफलंचसूत्रकृतादर्शितंप्रसंख्यानेप्यकुसीदस्यसर्वथाविवेकख्यातेर्धर्ममेघःसमाधिरितितत्परंपुरुषख्याते र्गुणवैतृष्ण्यमितिसत्वपुरुषान्यताख्यातिमात्रात्सर्वज्ञातृत्वंसर्वज्ञातृत्वंचेतिसूत्रत्रयेण प्रसंख्यानेध्याने अकुसीदस्यवणिजइवफलानिच्छोःसर्वथाविवेकख्यातिरेवभवतिस्याश्चफलंधर्ममेघःसमाधिःसचप्रागेवव्याख्यातः तद्वैराग्यंपरंपरसंज्ञंपुरुषख्यातेःफलं तस्यचक्षणंगुणेषुदिव्यादिव्यविषयेषुवैतृष्ण्यं एतस्यैवहिनांतरीयकंफलंकैवल्यमितियोगवदंति तृतीयसूत्रोक्तंफलंसार्वज्ञ्यादिकंत्वभिप्रेत्यश्रूयते कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीतिसर्वस्यवशीसर्वस्येशानःसर्वस्याधिपतिरित्यादिकं ॥ १५ ॥ एवंयोगाभ्यासनिष्ठस्याहारादिनियममाहद्वाभ्यां नात्यश्नतइति एकांतमतिशयेन जायतइत्यत्राप्यतिशब्दोयोज्यः ॥ १६ ॥ युक्ताःपरिमिताआहारादयोयस्यसतथा ॥ १७ ॥

निर्वाणपरमांशांतिप्राप्तस्यलक्षणान्याह यदेत्यादिभिःषड्भिः विनियतंविशेषेणएकाग्रतानाभूमेरपिनिरुद्धमात्मनिप्रत्यगात्मन्येवावतिष्ठतेनेत्यस्मिंतादिरूपेणउद्दिश्यतेनेतदायोगीसर्वेभ्योजाग्रत्स्वप्नसबीजसमाधिषूपस्थितेभ्यः ल्यब्लोपेपंचमी सार्वात्म्यप्राप्तैवनान्याप्यतेषुनिस्पृहोभवतितदायुक्तोनिर्विकल्पकइत्युच्यते ॥ १८ ॥ एकाग्रतावस्थायांयोगिचित्तस्योपमामाह यथेति नेंगतेनचलतिनद्वत् यतंचनचित्तंचंचलंतच्चित्तंतस्य एकाग्रतांप्राप्तंचित्तंनिवातप्रदीपवन्नचलतीत्यर्थः आत्मनोयोगंसमाधियुंजतोऽनुतिष्ठतः ॥ १९ ॥ यत्रेति एवंचित्तमेकाग्रीभूतंसद्योगसेवयानिरुद्धंयत्रयस्यामवस्थायामुपरमतेविलीनंभवतियत्रवाआत्मनाचित्तेनात्मानंनिर्विकल्पंपश्यन्नात्मनितुष्यतिनबाह्यार्थंतुष्टंभजते ॥ २० ॥ किंच सुखमिति आत्यंतिकमनंतंयत्सुखंतत्केवलंबुद्धिग्राह्यंसौषुप्तसुखवद्यतोऽतींद्रियमिंद्रियागोचरंयत्र सुखेस्थितोयंनवेत्तिवेद्याभावान्नकिंचिदनुभवतिनापितत्त्वतश्चलति बुद्धितादात्म्याध्यासकालेचलतीवेतिभातिपरंतुतत्त्वतोनचलति तथाचश्रुतिर्ध्यायतीवलेलायतीवेतीवशब्दंप्रयुंजानाध्यानादेरनात्त्वि

यदाविनियतंचित्तमात्मन्येवावतिष्ठते ॥ निस्पृहःसर्वकामेभ्योयुक्तइत्युच्यतेतदा ॥ १८ ॥ यथादीपोनिवातस्थोनेंगतेसोपमास्मृता ॥ योगिनोयतचित्तस्ययुंजतोयोगमात्मनः ॥ १९ ॥ यत्रोपरमतेचित्तंनिरुद्धंयोगसेवया ॥ यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्यति ॥ २० ॥ सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियम् ॥ वेत्तियत्रनचैवायंस्थितश्चलतितत्त्वतः ॥ २१ ॥ यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः ॥ यस्मिन् स्थितोनदुःखेनगुरुणापिविचाल्यते ॥ २२ ॥ तंविद्याद्दुःखसंयोगवियोगंयोगसंज्ञितं ॥ सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा ॥ २३ ॥

कत्वंदर्शयति बुद्धौध्यायंत्यांध्यायतीवेतिलेलायंत्यांलेलायतीवेतिश्रुत्यर्थः यद्वातत्सुखंयत्रायंनचैववेत्तिकिमपिनैवानुभवति यत्रेत्यादिभिश्चंवाक्यं ॥ २१ ॥ दुःखेनशस्त्रपातादिलक्षणेन गुरुणामहता ॥ २२ ॥ तमिति यत्रोपरमतेचित्तमित्यादिनाउक्तलक्षणंतंदुःखसंयोगस्याप्यंतःकरणसंबंधस्यवियोगमेवसंतंविरुद्धलक्षणयायोगसंज्ञितंविद्यात् योगफलमुपसंहृत्यपुनर्निश्चयानिर्वेदयोःसाधनत्वविधानपूर्वकंतमेवशतकृत्वोपिपथ्यंवदितव्यमिनिन्यायेनविधत्ते सइत्यादिना सयोगोनिश्चयेनाध्यवसायेनानिर्विण्णंनिर्वेदरहितंचेतोयस्यतेनयोक्तव्योऽभ्यसनीयः यद्वाशांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्येदितिश्रुतिविहितंश्रुत्यंतरदृष्टंश्रद्धाचित्तपदोपेतंशमादिषट्कमत्रक्रमतोविधीयते तत्रनिश्चयेनेतिगुरुवेदवाक्यादौफलावश्यंभावनिश्चयलक्षणाश्रद्धात्रनिश्चयपदेनगृह्यते तथानिर्विण्णचेतसेतिवैराग्येणद्वंद्वसहिष्णुत्वलक्षणातितिक्षाविधीयतेइतिज्ञेयं ॥ २३ ॥

अथशमदमोपरमसमाधानानिकर्मेणश्लोकद्वयेनविधत्ते संकल्पेति संकल्पइदंमेभूयादितिचेतोवृत्तिस्तनउद्भवोयेषांतान्कामान्काम्यमानान्विषयानशेषतोवासनोच्छेदपूर्वकंसंकल्पनिरोधेनत्यक्त्वा एतेनांतरिंद्रियनियहलक्षणःशमउक्तः बाह्येंद्रियनियहलक्षणंदममाह मनसैवेति विषयदोषदर्शिनामनसैवसर्वतःसर्वप्रकारेणश्रोत्रादिकमिंद्रियग्रामंसमंततःसर्वेभ्योविषयेभ्योविनियम्यउपरमेदित्युत्तरेणान्वयः ॥ २४ ॥ शनैःशनैरिति भूमिकाजयक्रमेणदिव्यादिव्यविषयेभ्यउपरमेत्व्याद्यत्तोऽवेत् कथं धृतिगृहीतयाबुद्ध्येति धृतिः धृत्याययाधारयतेमनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्याधृतिःसापार्थसात्विकीत्युक्तलक्षणातयागृहीतयावशीकृतयाबुद्ध्याउपरमेत् तथाएवमुपरतंमनःआत्मनिस्वरूपेसंस्थास्थितिर्यस्यननुदृश्येद्रष्टरिवातत्तथाआत्मैकाकारमेकाग्रमित्यर्थः द्रष्टृदृश्योपरकंचित्तंसर्वार्थंसर्वार्थैकार्थतयोःक्षयोदयौचित्तस्यैकाग्रतापरिणामइतिसूत्रितमैकाग्र्यप्रापयेत् सूत्रार्थस्तुअहमिदंपश्यामीत्यनुभवेहिद्रष्टादृश्यंदर्शनंचभासते तत्रदर्शनभानमप्रत्याख्येयमनोद्रष्टरिदृश्येचोपरकंचित्तंसर्वार्थमिति ननुदर्शनोपरक्तापिसर्वार्थतायांगणिता तदभावेचित्तस्यनाशापत्तेः द्रष्टृदृश्योपरागाभावेतुएकार्थंतुच्यते यथात्वमे तत्रहिदृश्यंनास्तीतिपामराणामपिप्रसिद्धं द्रष्टापिनास्ति तदाइंद्रियाणामभावात् आत्मेंद्रियमनोयुक्तंभोक्तेतिश्रुत्यैवभोक्तृत्वस्येंद्रियसन्निधियोगशिष्टत्वात् किंतुद्रष्टृदृश्यवासनावासितंचित्रपटसदृशमेकंमनएवास्ति तच्चस्वयंज्योतिषापुरुषेणभास्यमानंजाग्रद्वत्स्वमेपिद्रष्टृदृश्योपरागंप्र

संकल्पप्रभवान्कामांस्त्यक्त्वासर्वानशेषतः ॥ मनसैवेंद्रियग्रामंविनियम्यसमंततः ॥ २४ ॥ शनैःशनैरुपरमेद्बुद्ध्याधृतिगृहीतया ॥ आत्मसंस्थंमनःकृत्वान किंचिदपिचिंतयेत् ॥ २५ ॥ यतोयतोनिश्चरतिमनश्चंचलमस्थिरम् ॥ ततस्ततोनियम्यैतदात्मन्येववशंनयेत् ॥ २६ ॥ प्रशांतमनसंह्येनंयोगिनंसुखमुत्तमम् ॥ उपैतिशांतरजसंब्रह्मभूतमकल्मषम् ॥ २७ ॥ युंजन्नेवंसदात्मानंयोगीविगतकल्मषः ॥ सुखेनब्रह्मसंस्पर्शमत्यंतंसुखमश्नुते ॥ २८ ॥

काशयति तद्वासनावासितत्वात् एवंसतियदासर्वार्थतायाःक्षयःएकार्थतायाउदयश्चतदाचित्तस्यैकाग्रतारूपःपरिणामोभवतीति तदेवमात्मसंस्थंमनःकृत्वेतिसंप्रज्ञातसमाधिरुक्तः तत्रापिपूर्वाभ्यासवशाच्चित्तस्यद्रष्टृदृश्योपरागोवासनामयोभातीतितन्निवारणेनअसंप्रज्ञातसमाधिमाह नकिंचिदपिचिंतयेदिति ध्यातृध्यानध्येयविभागमपिनस्मरेत्किंतुअखंडैकरससंविदात्मनासुषुप्तवत्तिष्ठेदित्यर्थः ॥ २५ ॥ शनैःशनैरित्येतंश्लोकंव्याचष्टे यतोयतइतित्रिभिः यतोयतोहेतोर्यंयंविषयंगृहीतुंमनोनिश्चरतिबहिर्गच्छतितत्ततस्तत्तत्रदोषदर्शनेननतत्ततोविषयात्एतन्मनोनियम्यप्रत्याहृत्यआत्मनिस्वरूपेएववशंनयेत्पर्ववस्थापयेत् एतेनपूर्वार्धंव्याख्यातं ॥ २६ ॥ एवमात्मवशेमनसिकिंस्यादित्याशंक्याह प्रशांतेति हियस्मात्एनंप्रशांतमनसंप्रकर्षेणउपरतचेतसंयोगिनंएकाग्रताभूमौउत्तमंसुखंसंप्रज्ञातसमाधिफलभूतंउपैति प्राप्नोतिकानांवाब्राह्मानांमानोरथिकानामांतराणांचविषयाणांत्यागात्शांतरजसंप्रक्षीणमोहादिक्लेशंब्रह्मभूतंसद्वस्तुरूपं अकल्मषंधर्माधर्मवर्जितं यथोक्तंयोगभाष्ये यस्त्वेकायेचेतसिसद्भूतमर्थंप्रद्योतयतिकर्मबंधनानिश्लथयतिनिरोधमभिमुखीकरोतिक्षिणोतिचक्लेशान्ससंप्रज्ञातोयोगइत्याख्यायतइति एतेनात्मसंस्थंमनःकृत्वेत्याख्यातं ॥ २७ ॥ अस्यफलमाह युंजन्निति एवमनेनप्रकारेणयोगीआत्मानंमनोयुंजन्सदाधानःविगतकल्मषोनिरस्ताविद्यादिक्लेशःसुखेनअनायासेनब्रह्मसंस्पर्शंनिर्विशेषंब्रह्मणाऐक्यंचिविधोपाधिप्रविलयात्अश्नुतेप्राप्नोति कीदृशंब्रह्मसंस्पर्शं अत्यंतंअंतोद्रष्टृदृश्यभावेनपरिच्छेदस्तमतिक्रांतंनिर्विशेषंसुखंपरमानंदैकरूपं एतेननकिंचिदपिचिंतयेदितिचतुर्थपादोव्याख्यातः ॥ २८ ॥

द्विविधस्यापियोगस्यफलमाह सर्वेति सोपाधिर्निरुपाधिश्चद्वेधाब्रह्मविदुच्यते सोपाधिकःस्यात्सर्वात्मानिरुपारूयोनुपाधिकइतिधार्चिकोक्तरीत्यासंप्रज्ञातेआत्मनःसार्वात्म्यमनुभवन्योगीसर्वेषुभूतेषुउपादानतयास्थितंआत्मानंईक्षतेपश्यति तथाअसंप्रज्ञातेसर्वाणिभूतानिब्रह्मादिस्तंबपर्यंतानिआत्मन्येकतांगतानिरज्जवामिवाध्यस्तसर्पदंडधारादीनितद्वत्पश्यति योगयुक्तात्मायोगेनसमाहितचित्तः अस्यैवब्युत्थानावस्थामाह सर्वत्रेति सर्वेषुब्रह्मादिस्थावरांतेषुविषमेषुभूतेषुसमंनिर्विशेषंब्रह्मात्मैकत्वविषयंदर्शनंयस्यससर्वत्रसमदर्शनः तथाचश्रुतयः यस्तुसर्वाणिभूतानिआत्मन्येवानुपश्यति सर्वभूतेषुचात्मानंततो नविजुगुप्सते सर्वस्यात्माभवति ब्रह्मदाशाब्रह्मदासाब्रह्मैमेकितवाउत इदंसर्वंयदयमात्मेत्यादयएतमर्थंप्रतिपादयंति यत्तुयोयोगयुक्तात्मायोवासर्वत्रसमदर्शनःसआत्मानंमीक्षतइतियोगिसमदर्शिनावात्मेक्षणाधिकारिणावुक्तौ यथाहिचित्तवृत्तिनिरोधःसाक्षिसाक्षात्कारहेतुस्तथाजडविवेकेनसर्वानुस्यूतचैतन्यपृथक्करणमपि नावश्ययोगएवापेक्षितइति तन्न समाहितोभूत्वात्मन्येवात्मानंपश्यति तनस्तुतंप स्थितिनिष्कलंध्यायमानइत्यादिश्रुतिभिःसमाधिध्यानापरपर्यायस्ययोगस्यैवात्मदर्शनहेतुत्वप्रतिपादनात् तत्कारणंसांख्ययोगाभिप्रेतंविद्यामेतांयोगविधिंचकृत्स्नमिलिंगाच्चज्ञानयोगयोःसमुच्चयाभावा त् नचस्मृतेर्योक्तिकविवेकमात्राज्जडाजडयोर्हात्मनोःपृथक्करणंसंभवति सोपाधिकस्यभ्रमस्यउपाधिनिवृत्तिमंतरेणनिवृत्त्यसंभवात् आदर्शाद्यनिवृत्तावपिप्रतिर्विबादिभ्रमनिवृत्त्यापत्तेः अतएवाधिष्ठान

सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि॥ ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः॥ २९॥,
योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति॥तस्याहंनप्रणश्यामिसचमेनप्रणश्यति॥ ३०॥

ज्ञानदार्ढ्येसतितत्रकल्पितस्यचित्तस्यतद्दृश्यस्यचादर्शनमनायासेनैवोपपद्यतइतिनिरस्तं योगंविनाधिष्ठानज्ञानस्यैवासंभवात् यदाहदक्षः स्वसंवेद्यंहितद्ब्रह्मकुमारीस्त्रीमुखंयथा अयोगीनैवजानातिजात्यं धोहियथाघटमिति यत्तूक्तंभगवत्पूज्यपादैः ब्रह्मविदःकुत्रापियोगापेक्षांनब्युत्पादयांबभूवुरिति तदथातोब्रह्मजिज्ञासेत्यत्राथशब्दसूचितमुमुक्षुविशेषणीभूतसाधनचतुष्टयांतर्गतंशमाद्युपेतसमाधिमदृष्ट्वो कमिनिदोषः द्वौकमाविनिवसिष्ठवाक्यतात्पर्यंतुपरस्परनिरपेक्षमार्गद्वयोपगमेनान्यःपंथाइतिश्रुतिबाधापत्त्याप्रतिपत्तिक्रमभेदमात्रपरतयाप्रागेववर्णितमितिदिक् किंचयोगप्रकारेणयोगानपेक्षमार्गोप रप्रतिपादनमसंगतं नचतत्सूचकोत्रकश्चिच्छब्दोवर्त्तते संभवतिवाउक्तन्युक्तेरतोयोवासमदर्शनइतिवापदाध्याहारोप्यसंगतइतिदिक् ॥ २९ ॥ अस्यात्मैकत्वदर्शनस्यापिफलमाह योमामिति सर्वत्रास्मच्छ ब्दःप्रत्यगात्मपरः योयोगीआत्मानंसर्वत्रपश्यतिसर्वंचात्मनिपश्यतितस्ययोगिनःज्ञातआत्मानप्रणश्यतिअदर्शनंनगच्छतिज्ञातआत्मानपुनस्तिरोभवति सकृन्नटस्यमूलाज्ञानस्यबीजाभावेनपुनरुदयासंभ वादित्यर्थः ननुकार्यकारणसंघातादिभिमानिनाशुक्तिरूप्यवद्ब्रह्मण्यध्यस्तेननदभिमानत्यागपूर्वकंज्ञातंस्यादिष्ठानभूतंब्रह्ममातिरोधायि बुद्धेस्तत्त्वपक्षपातित्वात् ब्रह्मदृष्ट्यानुमुक्तजीवस्यनिरन्वयोच्छेदोभव नीत्याशंक्याह सचमेनप्रणश्यतीति सचविद्वान्मेममनप्रणश्यतिननिरोभवतिमदभिन्नत्वात् भवेदेतदेवंयदिजीवोमयिअध्यस्तोवाममविकारोवाभवेत्तदानिरन्वयोच्छेदंप्रामुयात् अहमेवतुसः तत्त्वमस्यहं ब्रह्मास्मिअयमात्माब्रह्मेत्यादिशास्त्रात् तस्माद्युक्तमुक्तंसचमेनप्रणश्यतीति ॥ ३० ॥

॥ ५५ ॥

यस्मात्सर्वात्मैकत्वदर्शीअहमेवातोनान्यमोक्षःप्रतिबध्यतइत्याह सर्वभूतेति सर्वोपादानतयासर्वेषुभूतेषुसत्तारूपेणस्फुरणरूपेणचस्थितंमांपरमात्मानमेकत्वंजीवब्रह्मणोरैक्यमास्थितःसन्नभजतिनिर्विक ल्पेनसमाधिनासेवतेसयोगीव्युत्थानदशायांप्रारब्धकर्मवशात्तूबाधितानुवृत्त्यादेहमारूढःसर्वथासर्वप्रकारेणयाज्ञवल्क्यादिवत्कर्मत्यागेनवावसिष्ठजनकादिवद्विहितकर्मणावादत्तात्रेयादिवन्निषिद्धकर्मणा वावर्त्तमानोपिव्यवहरन्नपिमय्येववर्त्ततेनमत्तश्च्युतोभवति यतोदेवेभ्योपिनास्यभयमितिश्रूयते तस्यहनदेवाश्चनाभूत्याईशतआत्माह्येषांसभवतीतिच नेत्यव्ययमप्यर्थे देवाअपितस्यब्रह्मविदःअभूत्यैअ नैश्वर्यायनईशतेनसमर्थाभवंति यतोयमेषामात्मेतिश्रुत्यर्थः सनपुनःसंसारीपूर्ववद्भवतीत्यर्थः ॥ ३१॥ यद्यपिनिषिद्धकर्मणाप्यात्मविन्नबध्यतेतथापिशीलवानेवयोगीश्रेष्ठइत्याह आत्मौपम्येनेति यथात्व स्यसुखमिष्टंदुःखमनिष्टंतद्वत्परस्यापीतिवृद्ध्यायोन्यस्मैदुःखंनप्रयच्छतिसोऽहिंसकःपरमयोगीमतइत्यर्थः ॥ ३२ ॥ साम्ययोगमशक्यमन्वानउपायांतरबुभुत्सयार्जुनउवाच योयमिति योयंयोगस्त्वयासा म्येनप्रोक्तोऽहिंसाप्राधान्येनसंन्यासपूर्वकनयावर्णितः हेमधुसूदन तस्ययोगस्यसर्वदावृत्तिनिरोधरूपस्यस्थिरांस्थितिंतनपश्यामि मनसश्चंचलत्वादितिशेषः ॥ ३३ ॥ एतदेवोपपादयति चंचलंहीति प्रमाथि

सर्वभूतस्थितंयोमांभजत्येकत्वमास्थितः॥सर्वथावर्त्तमानोपिसयोगीमयिवर्त्तते॥ ३१॥ आत्मौपम्येनसर्वत्रसमंपश्यतियोर्जुन ॥सुखंवायदिवादुःखंसयो गीपरमोमतः॥ ३२॥ ॥ अर्जुनउवाच॥ ॥योयंयोगस्त्वयाप्रोक्तःसाम्येनमधुसूदन॥एतस्याहंनपश्यामिचंचलत्वात्स्थितिंस्थिराम्॥ ३३॥चंचलंहिमनःकृ ष्णप्रमाथिबलवद्दृढम्॥तस्याहंनिग्रहंमन्येवायोरिवसुदुष्करम्॥ ३४॥ ॥श्रीभगवानुवाच॥ ॥असंशयंमहाबाहोमनोदुर्निग्रहंचलम्॥ अभ्यासेनतुकौंते यवैराग्येणचगृह्यते॥ ३५॥असंयतात्मनायोगोदुष्प्राप इतिमेमतिः॥वश्यात्मनातुयततताशक्योवाप्तुमुपायतः॥ ३६॥ ॥अर्जुनउवाच॥ ॥अयतिःश्रद्धयो पेतोयोगाच्चलितमानसः॥अप्राप्ययोगसंसिद्धिंकांगतिंकृष्णगच्छति॥ ३७॥ कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवनश्यति॥अप्रतिष्ठोमहाबाहोविमूढोब्रह्म णःपथि॥ ३८॥एतन्मेसंशयंकृष्णच्छेत्तुमर्हस्यशेषतः॥त्वदन्यःसंशयस्यास्यच्छेत्तानत्युपपद्यते॥ ३९॥

बहुदस्युबंदेकस्यप्रमथनशीलं ॥ ३४ ॥ मनसोदुर्ग्रहत्वमभ्युपेत्यभगवानुवाच यद्यप्येवंतथाप्यभ्यासवैराग्याभ्यांसमुच्चिताभ्यांदुर्निग्रहमपिमनोनिगृह्यते तत्राभ्यासोनामकस्यांचिच्चित्तभूमौसमानेप्रत्ययावृत्तिः वैराग्यंतुदृष्टादृष्टभोगेषुसप्तसाधनेषुदोषदर्शनेनवैतृष्ण्यं तत्रयथाकैदारिकःकेदारेपुकुल्याजलंसंचारयन्नेकस्यद्वारंपिधायापरस्योद्घाटयतितद्वद्वैराग्येणविषयस्रोतःखिलीकियतेअभ्यासेनकल्याण स्रोतउद्घाट्यतइतिद्वयोरप्यावश्यकत्वं तथाचस्मृत्यं अभ्यासवैराग्याभ्यांतन्निरोधइति ॥ ३५ ॥ असंयतात्मनाअजितचित्तेन वश्यात्मनाजितचित्तेन उपायतोऽभ्यासवैराग्यरूपात् ॥ ३६ ॥ मनसोदुर्नि ग्रहत्वायोगसिद्धौविघ्नंपश्यन्नर्जुनउवाच हेकृष्ण योगात्कर्मयोगाच्चलितमानसस्सत्कर्मासंन्यासीत्यर्थः श्रद्धयोपेतोयोगमार्गेप्रविष्टोपि अयतिःआयुषोल्पत्वाद्वावैराग्यदौर्बल्याद्वाअल्पप्रयत्नः अलब्ध णायवागूरितिवदत्राप्यर्थेनञ् सकदाचित्योगसंसिद्धियोगफलंसम्यक्कृदर्शनमप्राप्यमृतश्चेत्कांगतिंगच्छति ॥ ३७ ॥ कच्चिदिति कच्चिन्नोभयविभ्रष्टःकर्ममार्गाद्योगमार्गाच्चविभ्रष्टश्छिन्नाभ्रमिवपूर्वमपरं वामेघसंघमप्राप्यमध्येएवनश्यतितद्वत् अप्रतिष्ठोनिराश्रयः हेमहाबाहो विमूढोब्रह्मणःपथिब्रह्मप्राप्तिमार्गे ॥ ३८ ॥ एतत्एतं स्पष्टमन्यत् ॥ ३९ ॥

अत्रोत्तरंभगवानुवाच पार्थेति हेतार्तेतिवात्सल्यात्संबोधयति तस्येहविनाशानीत्ययोनिप्राप्तिःअमुत्रविनाशोनरकप्राप्तिस्तदुभयमपिनजायते हियतःकल्याणकृच्छुभकृतदुर्गतिनैवप्राप्नोति ॥ ४० ॥ इहा मुत्रचतस्यमहत्त्वमेवास्तीत्याह प्राप्येति उषित्वावासंकृत्वा शाश्वतीःसमाःनित्यान्वत्सरान्योगभ्रष्टोरागीचेदल्पकालाभ्यस्तयोगश्चेत्श्रीमतांगेहेजायते तत्रापिश्रीमानधोगच्छतीत्याशंक्यशुचीनामित्युक्तं शुचयोहिसत्कार्येष्वेवश्रियमुपयुंजानाःपूर्वापेक्षयामहत्तरंस्थानमासादयंतीत्यर्थः ॥ ४१ ॥ सयोगीविरक्तश्चिराभ्यस्तयोगोवाचैत्तस्यगतिमाह अथवेति ॥ ४२ ॥ तत्रद्विविधेपिजन्मनिपौर्वदेहिकंपूर्वदेहभवंबुद्धिसंयोगं यावतीचयोगभूमिःपूर्वजन्मनिजितातत्रचगावान्बुद्धिलाभोजातस्तावंतंबुद्धिसंयोगंपूर्वाभ्यासादल्पेनैवाभ्यासेनलभतेतस्मादपिभूयस्यांबह्व्यांसंसिद्धौ ऊर्ध्वभूमिलाभार्थमित्यर्थः यततेयत्नंकरोति ॥ ४३ ॥ कुतोयततेशिक्षितोपीत्यतआह पूर्वेति अवशोपिप्रह्लादादिवत्पित्रादिभिरन्यथानीयमानोपितेनैवपूर्वाभ्यासेनबलवताह्रियतेयोगप्रवणःक्रियते यतोयोगस्यजिज्ञासुर्ज्ञानमात्रमिच्छन्योभवतिसोपिशब्दब्रह्मकर्मकांडंवेदमप्यतिक्रम्यवर्त्ततेकिपुनःपित्राद्याज्ञां इत्थंपूर्वाभ्यासबलंयन्महांतमपिपित्रादियत्नंदथाकरोतीत्यर्थः ॥ ४४ ॥ एवंयोगभ्रष्टगतिमुक्त्वायोविषयैर्हियमाणो

श्रीभगवानुवाच ॥ ॥पार्थनैवेहनामुत्रविनाशस्तस्यविद्यते॥नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति॥४०॥प्राप्यपुण्यकृतांलोकानुषित्वाशाश्वतीःसमाः॥शुचीनांश्रीमतांगेहेयोगभ्रष्टोभिजायते॥ ४१ ॥ अथवायोगिनामेवकुलेभवतिधीमताम्॥ एतद्धिदुर्लभतरंलोकेजन्मयदीदृशम् ॥ ४२ ॥तत्रतंबुद्धिसंयोगंलभतेपौर्वदेहिकं॥ यततेचततोभूयःसंसिद्धौकुरुनंदन॥ ४३ ॥ पूर्वाभ्यासेननतेनैवह्रियतेह्यवशोपिसः॥ जिज्ञासुरपियोगस्यशब्दब्रह्मातिवर्त्तते ॥ ४४ ॥ प्रयत्नाद्यतमानस्तुयोगीसंशुद्धकिल्बिषः॥ अनेकजन्मसंसिद्धस्ततोयातिपरांगतिम्॥ ४५॥ तपस्विभ्योधिकोयोगीज्ञानिभ्योपिमतोधिकः॥ कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुन ॥४६॥ योगिनामपिसर्वेषांमद्गतेनांतरात्मना॥ श्रद्धावान्भजतेयोमांसमेयुक्ततमोमतः॥४७॥ ॥इतिम०भीष्मपर्वणिश्रीमद्भगवद्गीता० अध्यात्मयोगोनामषष्ठोऽध्यायः ॥ ६ ॥ ॥ पर्वणितुत्रिंशोऽध्यायः ॥ ३० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ॥ ॥

पिप्रयत्नेनयोगमेवाभ्यसितुंप्रवर्त्ततेतस्यगतिमाह प्रयत्नादिति प्रयत्नात्यत्कृष्टात्दृढात्वायुनिरोधादिरूपात्खेचर्यादिमुद्राविशेषाभ्यासाद्योयतमानःसंशुद्धकिल्बिषोनिष्पापोभवति यदाहमनुः प्राणायामैर्दहेदोषानिति हठयोगानांसर्वेषांपापनिवर्त्तयुपयोगित्वंनतत्त्वसाक्षात्कारेसाक्षात्साधनत्वमित्यर्थः अतएवसःअनेकैर्जन्मभिःसंसिद्धः प्राप्तयोगोभूत्वाततःपरांगतिंमोक्षंयाति एतेनचक्षुश्चैवांतरेभ्रुवोरितिपंचमांतेयत्सूत्रितंतद्व्याख्यातं ॥ ४५ ॥ एवंयोगिनंस्तौति तपस्विभ्यइति तपस्विनोऽकृच्छ्रचांद्रायणमासोपवासादिकर्त्तारः ज्ञानिनश्चशास्त्रीयपांडित्यवंतः कर्मिणोऽग्निहोत्राद्यनुष्ठातारः तेभ्यःसर्वेभ्योयोगीयतोधिकोमतस्तस्माद्योगीभवार्जुन ॥ ४६ ॥ समाप्तःकर्मप्रधानस्त्वंपदार्थविवेकः अतःपरमुपासनाप्राधान्येनतत्पदार्थनिरूपयितुकामस्तदुपासनांमहाफलत्वेनस्तौति योगिनामिति दैवमेवापरेयज्ञमित्यादिनाचतुर्थाध्यायप्रोक्ताद्वादशयोगास्तद्वृत्तांयोगिनांसर्वेषांमध्येयोमद्गतेनमयिवासुदेवेसमर्पितेनांतरात्मनाचित्तेनश्रद्धावान्सन्मांभजतेसमेममयुक्ततमोऽतिशयेनयुक्तःश्लाघ्योमतोऽभिप्रेतः तस्मान्मद्भक्तोभवेतिभावः ॥ ४७ ॥ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधर० नीलकंठकृतौभार० भीष्मपर्वणिभगवद्गीता० षष्ठोऽध्यायः त्वंपदार्थविवेकश्चसमाप्तिमगमत् ॥ ६ ॥ प० ॥ ३० ॥ ॥ ७ ॥

पूर्वाध्यायोतियोमांभजतेसमेयुक्ततमोमतइत्युक्तंतत्रकीदृशंपूर्वोक्तनिष्कामकर्मयोगापेक्षयाविलक्षणंतवभजनंकेनवागुणेनपूर्वयोगापेक्षयातस्ययुक्ततमत्वमित्येतामर्जुनस्याशंकांस्वयमेवपरिहरन्भगवानुवाच मयीति कश्चिद्राजाश्रयोधनमानासक्तमनाभवति अयंतुमदाश्रयेणमामेवपरमपुरुषार्थभूतंप्राप्नुमिच्छन्नित्यर्थः ईदृशोयोगंयुंजन्समाधिमनुतिष्ठन् त्वंपदार्थविवेककालेयश्चपिसार्वज्ञ्यमत्सिसर्वभूतस्थमात्मानमित्यादिवचनात्तथापित्वत्तस्मादन्यईश्वरोस्तिनवेतिपातंजलकापिलयोस्तार्किकंमीमांसकयोर्वासेश्वरानीश्वरयोर्मतभेदात्संशयःकारणाज्ञानाच्चासमर्थंतत्सार्वज्ञ्यमितिमत्वाआह असंशयंसमग्रमिति मांतत्पदार्थमीश्वरंयथाज्ञास्यसितत्तंप्रकारंशृणु अत्रवक्ष्यमाणरीत्यासर्वंब्रह्मवासुदेवात्मकमितिभजनवैलक्षण्यंकारणज्ञातृत्वमस्ययोगिनःपूर्वयोग्यपेक्षयाऽधिक्यमितिभावः॥१॥एतदेवाह ज्ञानमिति ज्ञानंशुद्धप्रज्ञानघनंब्रह्म सत्यंज्ञानमनंतंब्रह्मविज्ञानमानंदंब्रह्मेतिश्रुतेः तेनुभ्यमहंवक्ष्यामि अशेषतःसाधनकलापसहितं किंवचनमात्रजेनपरोक्षज्ञानेनशब्दस्यस्वविषयेपरोक्षज्ञानजनकत्वनियमादित्याशंक्याह सविज्ञानंअनुभवसहितं दशमस्त्वमसीत्यादौशब्दादप्यपरोक्षज्ञानोत्पत्तिदर्शनात् कस्मिन्भगवोविज्ञातेसर्वमिदंविज्ञातमित्येकविज्ञानात्सर्वविज्ञानप्रतिज्ञाश्रौतीमेववर्णयति यज्ज्ञात्वेति जग

श्रीभगवानुवाच॥ ॥मय्यासक्तमनाःपार्थयोगंयुंजन्मदाश्रयः॥असंशयंसमग्रंमांयथाज्ञास्यसितच्छृणु॥ १॥ ज्ञानंतेऽहंसविज्ञानमिदंवक्ष्याम्यशेषतः ॥ यज्ज्ञात्वानेहभूयोन्यज्ज्ञातव्यमवशिष्यते॥ २॥मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये॥ यततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतः॥ ३॥ भूमिरापोनलोवायुःखंमनोबुद्धिरेवच॥ अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधा ॥ ४ ॥

त्कारणाधिष्ठानस्यज्ञानरूपस्यब्रह्मणोज्ञानेसंशयोच्छेदात्सर्वात्ममात्रत्वेनज्ञातव्यानवशेषोयुक्तइत्यर्थः ॥२॥ एतदेवज्ञानंदौर्लभ्यप्रदर्शनेनस्तौति मनुष्याणामिति यततांयतमानानां ॥३॥एवमेकविज्ञानात्सर्वविज्ञानंप्रतिज्ञायतद्युपपत्तयेसर्वस्यजडाजडप्रपंचस्यज्ञानात्मकब्रह्मप्रभवत्वमाहत्रिभिः भूमिरिति अत्रभूम्यादिपदैस्तत्तत्कारणान्येवगृह्यंते प्रकृतिरित्यधिकारात् स्थूलभूम्यादेश्चविकृतिमात्रत्वात् तथा चभूमिरितिगंधतन्मात्रं आपइतिरसतन्मात्रं अनलइतिरूपतन्मात्रं वायुरितिस्पर्शतन्मात्रं खमितिशब्दतन्मात्रं मनइतितत्कारणमहंकारः बुद्धिरितिसमष्टिबुद्धिर्महत्तत्त्वं अहंकरोत्यनयेत्यहंकारोमूलप्रकृतिः करणेघओर्दुर्लभत्वेप्यगत्याबाहुलकात्कर्त्तर्घोध्यं इयंमेमत्तोभिन्नाःपृथक्सिद्धाशुक्तिशकलादिवरजतं अष्टधाअष्टप्रकाराप्रकृतिर्जडप्रपंचोपादानभूता यद्वा नात्राव्यक्तमहदहंकारपंचतन्मात्राण्येवाष्टौसांख्याभिमताएवप्रकृतयोगाह्याइतिनियमोस्ति मनसाश्लेवपश्यतिमनसाशृणोतीतिमनसइंद्रियांतरप्रकृतित्वश्रवणेनसंतुनवापिप्रकृतयः तथाचैवंयोज्यं इयंमेमद्भिन्नाप्रकृतिरव्याकृताख्याभूम्यादिभेदेनाष्टधेतिमूलप्रकृतेरत्रभूम्यादिभिःसहपाठाज्जन्यत्वमवगम्यतेनसांख्यानामिवाजन्यत्वं तस्मादव्यक्तमुत्पन्नंत्रिगुणंद्विजसत्तमेति अव्यक्तंपुरुषेब्रह्मनिष्कलेप्रविलीयतइतिचतस्याअपिप्रभवप्रलययोःस्मरणात् ॥ ४ ॥

एवंक्षेत्रात्मिकांप्रकृतिमुक्ताक्षेत्रज्ञात्मिकांतामाह अपरेयमिति इयंप्रागुक्तासाऽपराअश्रेष्ठाजडत्वात् इतस्तुविलक्षणामन्यांपरांचेतनत्वेनमदनन्यत्वाद्दुष्कटांमेमत्संबंधिनींप्रकृतिंजीवभूतांप्राणधारणनि मित्तभूतांक्षेत्रज्ञाख्यांविद्धिजानीहिहेमहाबाहो ययाप्रकृत्यांऽतःप्रविष्टयेदंजगत्स्थावरजंगमशरीरात्मकंधार्यते ॥५॥ एतदिति एतेपरापरेक्षेत्रक्षेत्रज्ञरूपेप्रकृतीयोनिरुत्पत्तिलयस्थानंयेषांभूतानांतान्येतथो नीनिभूतानिचतुर्विधानीत्येतदुपधारयसम्यग्जानीहि किंपातंजलानामिवएतेप्रकृतीईश्वरादन्येइत्याशंक्याह अहमिति कृत्स्नस्यस्वस्वप्रकृतिसहितस्यजगतोजडाजडरूपस्यप्रभवःप्रभवत्यस्मादितिप्रभव उत्पत्तिकारणं तथाप्रलीयतेस्मिन्नितिप्रलयःलयस्थानंच अतस्तेउभेअपिप्रकृतीमत्तोनातिरिच्येते ॥६॥एवमेकविज्ञानात्सर्वविज्ञानंप्रकृतमात्मनोजगदुपादानत्वेनोपपाद्यतएवात्मनोनिर्विकारत्वहानेप्रा प्तेआह मत्तइति कारणान्मृदादेःपरंपृथग्भूतंघटादि व्यवहारेतयोर्भेदानुभवात् परतरंतुगवाश्वादि मृदनुपादानकत्वात् एवंब्रह्मणःपरतरंतदनुपादानकंकिंचिदपिनास्तिहेधनंजय एवंप्रपंचेब्रह्माव्यतिरेकंप्र दर्श्यब्रह्मणिप्रपंचव्यतिरेकंसदृष्टांतमाह मयीति मयिसद्रूपेणस्फुरणरूपेणचसूत्रवत्सर्वंचानुस्यूते यद्दिसर्वंमणिगणवत्परस्परव्याद्दत्तंतत्रोतं तेनव्याद्दत्तेभ्योऽनुवर्त्तंभिन्नमितिन्यायेनप्रपंचातीतोहमतोनम

अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपराम्॥ जीवभूतांमहाबाहोययेदंधार्यतेजगत्॥ ५॥ एतद्योनीनिभूता निसर्वाणीत्युपधारय॥ अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा॥ ६॥ मत्तःपरतरंनान्यत्किंचिदस्तिधनंजय॥ मयिसर्वमिदंप्रोतंसूत्रेमणिगणाइव॥ ७॥ रसोहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोः॥ प्रणवःसर्ववेदेषुशब्दःखेपौरुषंनृषु॥ ८॥ पुण्योगंधःपृथिव्यांचतेजश्चास्मिविभावसौ॥ जीवनंसर्वभूतेषुतपश्चास्मितपस्विषु॥ ९॥ बीजंमांसर्वभूतानांविद्धिपार्थसनातनं॥ बुद्धिर्बुद्धिमतामस्मितेजस्तेजस्विनामहं॥ १०॥

मविकारित्वमित्यर्थः॥७॥नन्वेवंप्रपंचपरमात्मनोर्मणिसूत्रवदुपादानोपादेयभावोपिनस्यात् नह्युपादानंचाननुवर्त्तंचेतिघटते मृद्घटादावदर्शनादित्याशंक्यत्वममायेंद्रजालरज्जूरगतुल्यत्वंप्रपंचस्योपपाद्यो भयमप्यविरुद्धमित्युपदिष्टंचेदयमकस्मादुद्विग्नोभविष्यतीतिमत्वादृष्टांतांतरैरेवानुवर्त्तिव्याद्दर्त्तिचिज्जडयोर्दर्शयति रसइति यथारसोऽप्सुएकमप्यप्परमाणुमपरित्यज्यानुस्यूतोदृश्यतेऽतोरसरूपेमयिआ पःप्रोताः एवंप्रभायांचंद्रादयःप्रोताःप्रणवेसर्ववेदाःप्रोताः तथथाशंकुनासर्वाणिपर्णानिसंतृण्णान्येवमोंकारेणसर्वावाक्संतृण्णेतिवाछ्रात्रेप्रणवानुस्यूतिश्रवणात् संतृण्णानिसंग्रथितानि एवमाकाशेशब्दः सारभूतस्तस्मिन्मयिरवंप्रोतं सर्वपुरुषेषुसारंपौरुषंशौर्यधैर्यादिरूपंतत्रपुरुषाःप्रोताः एवमयेपिद्रष्टव्यं ॥ ८ ॥ पुण्यइति रसादिष्वपिद्रष्टव्यं अपुण्यस्यसर्वस्याविद्यामात्रविलसितत्वात् विभावसौवह्नौ तेजःदहनशक्तिः जीवंत्यनेनेतिजीवनमन्नंविराजं तत्रहिसर्वाणिभूतानिप्रोतानि अन्येतुजीवनमायुरितेव्याचक्षते तपश्चेति तपोधर्मस्तद्रूपेमयितपस्विनःप्रोताः ॥ ९ ॥ बीजंकारणं सर्वभूतानांपिंडब्रह्मां डात्मकानांबीजेमयिपिंडादिकंप्रोतं कनकेकुंडलादिवत् सनातनंनित्यंबीजांतरादनुत्पन्नं बुद्धिरूपेमयिबुद्धिमंतःप्रोताःतेजःप्रागल्भ्यंतद्रूपेमयिप्रगल्भाःप्रोताः ॥ १० ॥

बलरूपेमयिबलवंतःप्रोताः कामरागविवर्जितं कामस्तृष्णा रागोरंजना तौहिआविद्यकौ अतोनिरविद्यस्यबलंतद्वर्जितं एवंधर्माविरुद्धकामरूपेमयिईदृशाःकामवंतःप्रोताः ॥ ११ ॥ सात्विकाधर्मज्ञानवै राग्यैश्वर्यादयः राजसालोभप्रवृत्त्यादयः तामसानिद्रालस्यादयः तान्सर्वान्मत्तएवरसतन्मात्रादिरूपात्सूत्रात्मनोनिर्गताइतिविद्धि नन्वेवंतवसर्वजगदात्मनोविकारित्वापत्त्याकौटस्थ्यहानिरित्याशंक्याह नत्वहंतेषुतेमयीति येष्वबादयःप्रोतास्तेषुसूत्रावयवभूतेषुरसादिष्वनृतजडरूपेष्वबाधितात्मचिन्मात्ररूपोघटशरावोदंचनादाविवमृन्मास्मि अनृतस्यास्यसत्तास्फुरणेएवस्वकीयेप्रयच्छामिनत्वनृतात्माभ वामीत्यर्थः तेतुमय्येवाध्यस्तामदनन्याः यथारज्ज्रामध्यस्तासर्पादयोरज्जवनन्याः तदनन्यत्वमारंभणशब्दादिभ्यइतिन्यायात् अनन्यत्वंव्यतिरेकेणाभावः नखल्वनन्यत्वमित्यभेदंब्रूमः किंतुभेदंनिषेधा मः कुतः आरंभणशब्दात् वाचारंभणंविकारोनामधेयमितिविकारस्यवागालंबनत्वेनस्वममायेंद्रजालकविषयसाम्यश्रुतेः नह्यात्मनोविचित्रप्रपंचात्मत्वेतेमयीत्यंशाविरोधेपिन्यत्वहंतेष्वित्यंशेविरोधपरि हारोयुज्यतेकार्यस्यकारणात्मकत्वावश्यंभावात् तस्माद्विवर्त्तंवादाश्रयेणैवब्रह्मणोजगदुपादानत्वकूटस्थत्वेनिर्बंहतइतिसाधूक्तंनत्वहंतेषुतेमयीति ॥ १२ ॥ कथंतर्हिस्थूलसूक्ष्मप्रपंचबाधेनजनाआत्मानं नावगच्छंतीत्याशंक्याह त्रिभिरिति एभिःपूर्वोक्तैस्त्रिभिस्त्रिविधैर्भावैःप्रकाशप्रवृत्तिनियमात्मकैर्गुणमयैःसत्वरजस्तमोगुणविकारैरिदंचराचरंप्राणिजातंजगच्छब्दवाच्यंमोहितंसदेभ्योगुणेभ्यःपरंमांनजानाति

बलंबलवतांचाहंकामरागविवर्जितम्॥ धर्माविरुद्धोभूतेषुकामोस्मिभरतर्षभ॥ ११॥ येचैवसात्विकाभावाराजसास्तामसाश्चये॥ मत्तएवेतितान्विद्धिनत्वहंतेषुतेमयि॥ १२॥ त्रिभिर्गुणमयैर्भावैरेभिःसर्वमिदंजगत्॥ मोहितंनाभिजानातिमामेभ्यःपरमव्ययम्॥ १३॥ दैवीह्येषागुणमयीममायादुरत्यया॥ मामेवयेप्रपद्यंतेमायामेतांतरंतिते॥ १४॥

यथारज्ज्वांसर्पधमेणव्याकुलःसर्पात्परारज्जुनजानातितद्वत् परत्वेहेतुः अव्ययं एतेभावाःपरिणामित्वात्व्ययवंतःअहंतुतद्विपरीतःसाक्षीइत्यव्ययः ॥ १३ ॥ देवस्यजीवरूपेणलीलयाक्रीडतोममसंबंधिनी यंदैवी हिप्रसिद्धा पिंडब्रह्मांडरूपेणवितंतैषामचिन्मात्रस्यमायामामहंनजानामीतिसाक्षिप्रत्यक्षत्वेनापलापानर्हाःनृतस्यप्रपंचस्यैद्रजालादेरिवप्रकाशिका गुणमयीसत्वरजस्तमोगुणमयी दुरत्ययादुर तिक्रमा येमामेवसर्वभूतस्थंभगवंतंवासुदेवंप्रपद्यंतेविषयीकुर्वंतितएवैतांमायांतरंति अधिष्ठानज्ञानेनैवसमूलस्यभ्रमस्योच्छेदोभवतिनतुज्ञानांतरेणवाद्दत्तिनिरोधेनवेत्यर्थः अयमर्थः जीवेश्वरविभागशून्ये शुद्धचिन्मात्रेकल्पितोमायादर्पणश्चित्प्रतिबिंबरूपंजीवंवशीकृत्यबिंबचैतन्यमनुरुध्यप्रचलति अयस्कांतमनुरुध्येवलोहशलाका इदमेवईश्वराधीनत्वंमायायाः ईश्वरस्यचमायाद्वारासर्वस्रष्टृत्वमपि त थाचश्रुतिः अस्मान्मायीसृजतेविश्वमेतत्तस्मिंश्चान्योमायायासंन्निरुद्धइति तथाचैकैवमायाजीवेश्वरयोरुपाधिर्दर्पणइवबिंबप्रतिबिंबयोर्बिंबप्रतिबिंबभावानाकांतमुभयानुस्यूतंशुद्धचिन्मात्रमन्यतृतीयं मुक्तप्राप्यंजीवेश्वरौचोपाधिपक्षपातदशायामल्पज्ञत्वसर्वज्ञत्वशास्त्यत्वशासितृत्वादिभावंभजेते तावेवतदभावेउपाधिप्रचारदर्शनावुदासीनबोधरूपतयाजीवसाक्षीश्वरसाक्षीतिशब्दाभ्यांव्यवह्रियेते एवं चजीवईश्वराराधनावाप्रत्यक्तत्त्वज्ञानेनमायायांनष्टायांतत्कार्यस्यापिनाशेनसाक्ष्याभावात्साक्षित्वमपिपरित्यज्यबिंबप्रतिबिंबानुस्यूतंशुद्धंतृतीयंचैतन्यंप्राप्नोतीतितदिदमुक्तं दैवीमायेति मममायेतिचै कस्यापवजीवेश्वरसंबंधित्वंजीवस्येश्वरभजनेनमायातरणमितिच ॥ १४ ॥

कुतस्तर्हिसर्वैर्वेत्वांप्रपद्यमायायांनतरंतीत्याशंक्याह नमामिति यतोदुष्कृतिनोऽतश्चित्तशुद्ध्यभावान्मूढाःआत्मानात्मविवेकहीनाः अतएवनराधमामांनप्रपद्यंते कुतोदुष्कृतिनः यतोमाययाऽपहृतंतिरस्कृतं ज्ञानमखंडसंविद्रूपंब्रह्मयेषांतेअपहृतज्ञानाः एतेनमायायाआवरणशक्तिरुक्ता किंच आसुरंअसुराणांविरोचनादीनांभावंचित्ताभिप्रायंमात्मैवेहमहय्यइत्यादिनाश्रुतंदेहेंद्रियसंघातएवसम्यक्कृसंतर्पणीय इत्येवंविधमाश्रिताः एतेनमायायाविक्षेपशक्तिरुक्ता तदेवंमाययास्वरूपानंदमाद्यत्यदेहात्मभमेजनितेसतितदभिमानाद्वेहादिपुष्ट्यर्थंदुष्कृतंकुर्वंतितेनचमूढाःसंतोनराधमामांनप्रपद्यंते सर्वानर्थमूलंमायैवेत्यर्थः ॥ १५ ॥ येतुसत्यपिदेहाद्यध्यासेमन्तोविभ्यनिमत्तीत्यर्थंसुकृतमेवाचरंतिनेपिचतुर्विधानकेवलंसर्वेमदेककामाइत्याशयेनाह चतुर्विधाइति आर्त्तःपीडितःपीडापरिहारार्थी जिज्ञासुःस्वाज्ञाननाशार्थी अर्थार्थीधनार्थी ज्ञानीचेतिचतुर्विधामांभजंते ॥ १६ ॥ किंसर्वेपिसमाएतेसुकृतिनइतिसाधारण्येनविशेषणादतआह तेषामिति तेषांमध्येज्ञानीविशिष्यते यतोनित्ययुक्तः आर्त्तादयोहिकामिनःकाम

नमांदुष्कृतिनोमूढाःप्रपद्यंतेनराधमाः॥ मायायापहृतज्ञानाआसुरंभावमाश्रिताः॥ १५ ॥ चतुर्विधाभजंतेमांजनाःसुकृतिनोर्जुन॥ आर्तो जिज्ञासुरर्थार्थीज्ञानीचभरतर्षभ॥१६॥तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते ॥ प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियः॥ १७॥ उदाराः सर्वएवैतेज्ञानीत्वात्मैवमेमतम्॥ आस्थितःसहियुक्तात्मामामेवानुत्तमांगतिम्॥ १८॥ बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते॥ वासुदेवःसर्व मितिसमहात्मासुदुर्लभः॥ १९॥ कामैस्तैस्तैर्हृतज्ञानाःप्रपद्यंतेन्यदेवताः ॥ तंतंनियममास्थायप्रकृत्यानियताःस्वया ॥ २० ॥

पूर्वोनमद्भजनेयुक्ताभवंति अयंतुनित्ययुक्तएकभक्तिश्चैकभावेनभजनंकरोति तथाहि आर्त्तारोगिणःसूर्यंभजंते जिज्ञासवःसरस्वतीं अर्थार्थिनःकुबेरादीनितितेषांतत्तत्कामार्थित्वेनानेकभक्तित्वंदृश्यते त स्यनित्ययुक्तत्वेएकभक्तित्वेचहेतुः हियतः ज्ञानिनोऽहमत्यर्थंप्रियः आत्मत्वादेव आत्माचप्रियः निरुपाधिप्रेमगोचरत्वात् तदेतत्प्रेयःपुत्राल्प्रेयोवित्ताल्प्रेयोन्यस्मात्सर्वस्मादांतरंयदयमात्मेतिश्रुतेश्च सचज्ञा नीममप्रियोभक्तानांदुर्लभत्वादितिभावः ॥ १७ ॥ उदाराइति सर्वेप्येतेउदाराउत्कृष्टाएव ज्ञानीतुममात्मैवेतिममममतंनिश्चितं हियतःसयुक्तात्मा अहमेवभगवान्वासुदेवइत्यभेदेनमयिसमाहितचित्तोमामे वानुत्तमांश्रेष्ठांगतिमास्थितोनतुमत्तोन्यदारोग्यादिकंकामयानोमद्भक्तिंकरोति किंतर्हिमय्यास्थर्यमेवमांभजतइत्यर्थः ॥ १८ ॥ किंच वासुदेवःसर्वमितिज्ञानवान्योबहूनांजन्मनामंतेचरमजन्मनिमांप्रपद्य तेसम्यग्दर्शनेनापरोक्षीकरोति समहात्माब्रह्मभूतःसुदुर्लभइतियोजना ॥ १९ ॥ अन्येनुतैस्तैःकामैःपुत्रपश्वादिविषयैः हृतज्ञानाः हृतंदूरीकृतंज्ञानंविवेकोयेषांते अन्यदेवताः अहमेतस्याआराधनेनेदंफ लमवामवानीतिभेदबुद्ध्याप्रपद्यंतेइंद्रादीन् तंतंनियमंचनुर्दश्युपवासादिकमास्थाय स्वयाप्रकृत्यावक्ष्यमाणविधयादैव्याआसुर्यावानियताःनिगृहीताः ॥ २० ॥

॥ ५८ ॥

किंच योयोभक्तःसात्विकोराजसस्तामसोवायांयांतनुंतादृशीमेवदेवादिरूपांयक्षरक्षोरूपांभूतप्रेतरूपांवामूर्त्तिश्रद्धयार्चितुमिच्छतितस्यतस्यभक्तस्यतामेवश्रद्धांसात्त्विकीराजसीतामसीवाऽहं सर्वेश्वरोऽचलांविदधामि ॥ २१ ॥ ततश्चसतयाश्रद्धयायुक्तःसन्तस्यामूर्त्तेराधनंससाधनंवशीकरणमीहतेइच्छति ततश्चकामान्विषयान्फलभते मयैवविहितानाज्ञापितान् हितान्ईप्सितान् एतेनसर्वासां देवतानांस्वाज्ञावशवर्त्तित्वंदर्शितं ॥ २२ ॥ अल्पमेधसां अथयत्रान्यत्पश्यत्यन्यच्छृणोतिअन्यन्मनुतेन्यद्विजानातितदल्पमितिश्रुतेः द्वैतमल्पंतत्रैवमेधायेषांते बाह्यार्थाभिलाषिणामित्यर्थः तेषांतत्फल मंतवत् सर्वस्यवाह्यार्थस्यांतवत्त्वादेव तुशब्दोऽभेदेनेश्वरभक्तेभ्योविभेदार्थः यतोदेवयजोदेवान्यजंतेइतिदेवयजस्तेदेवानंतयुक्तानेवयांति एवंयक्षरक्षोभक्तायक्षादीनेवयांति भूतप्रेतभक्ताश्चभूतादीनेवेत्य पिद्रष्टव्यं मद्भक्तास्तुमामेवानंतंयांति अतस्तेऽनंतफलभाजइत्यर्थः ॥ २३ ॥ एवंतर्हिकुतस्त्वामेवसर्वेनप्रतिपद्यंतइत्याशंक्याज्ञानादित्याह अव्यक्तमिति अव्यक्तंसर्वोपाधिशून्यत्वेनास्पष्टमपिवासुदेवश रीरेणव्यक्तिमापन्नं अस्मदादिवच्छरीराभिमानिनंमामबुद्धयोमन्यंते यतोममपरंभावंपरत्वमुत्कृष्टत्वमजानंतः उत्कृष्टत्वमेवविशिनष्टि अव्ययंनव्येतीत्यव्ययमविनाशिनं अनुत्तमंयस्मादन्यदुत्कृष्टंचना

योयोयांयांतनुंभक्तःश्रद्धयार्चितुमिच्छति॥ तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहम्॥ २१ ॥सतयाश्रद्धयायुक्तस्तस्याराधनमीहते॥ लभतेचततःकामान्मयै वविहितान्हितान्॥ २२॥ अंतवत्तुफलंतेषांतद्भवत्यल्पमेधसाम्॥ देवान्देवयजोयांतिमद्भक्तायांतिमामपि॥ २३॥ अव्यक्तंव्यक्तिमापन्नंमन्यंतेमामबुद्धयः॥ परंभावमजानंतोममाव्ययमनुत्तमम्॥ २४॥ नाहंप्रकाशःसर्वस्ययोगमायासमावृतः॥ मूढोयंनाभिजानातिलोकोमामजमव्ययम्॥ २५॥ वेदाहंसमतीतानिवर्तमानानिचार्जुन॥ भविष्याणिचभूतानिमांतुवेदनकश्चन॥ २६॥ इच्छाद्वेषसमुत्थेनद्वंद्वमोहेनभारत॥ सर्वभूतानिसंमोहंसर्गेयांतिपरंतप॥ २७॥

स्तिनिरतिशयमखंडैश्वर्यरूपमित्यर्थः ॥ २४॥ कुतस्त्वद्विषयमज्ञानंलोकस्येत्यतआह नाहमिति हेयोगयोगिन् अर्शआद्यच्प्रत्ययांतोयंयोगशब्दः अहंतत्पदार्थःसर्वस्ययोगिनस्त्वंपदार्थमात्राभिज्ञस्यनप्र काशोस्मि तत्रहेतुः मायासमावृतइति भाप्येतुयोगोयुक्तिर्गुणानांघटनंसैवयोगमायाचित्तसमाधिर्वायोगोभगवतस्तत्कृतामायेति भगवत्संकल्पवशवर्त्तिनीमायेत्यर्थः उत्तरार्धःस्पष्टार्थः ॥ २५ ॥ ननुत्व दभिन्नंलोकंत्वन्मायामोहयतिचेत्त्वांकुतोनमोहयतीत्यतआह वेदाहमिति सत्यं सत्यपिलोकस्यममचाभेदेऽौपाधिकभेदस्यसत्त्वादुपाधिधर्माभिमानित्वाल्लोकोमूढः तदभावाच्चाहंसर्वज्ञइतिविशेषः अक्षरार्थःस्पष्टः ॥ २६॥ केनपुनर्निमित्तेनातीतादीनिभूतानिनजानंतीत्याशंक्याह इच्छेति इच्छारागःद्वेषस्ताभ्यांसमुत्थितोद्वंद्वमोहःशोभनाशोभनसत्यासत्यनित्यानित्यात्मानात्मसुविपर्ययःअशोभनेशो भनबुद्धिःशोभनेवाअशोभनबुद्धिरित्येवंरूपस्तेन हेतुनाभरतभरतान्वय सर्वभूतानिसर्गेसृष्टिविषयेमोहंअविवेकंयांतिहेपरंतप अयंभावः योहिसृष्टेरुपादानंस्वरूपंचतत्त्वतोजानातिसब्रह्मवित्सर्वज्ञत्वादतीता दीन्जानाति सृष्टौचसर्वेषांमोहोस्ति अशोभनेरूपादौशोभनाध्यासात् असत्येप्रपंचेसत्यत्वाध्यासात् सत्येचात्मनोऽसंगत्वेऽसत्यत्वाध्यासात् अनित्येस्वर्गादौनित्यत्वाध्यासात् अनात्मनिदेहादावात्माध्या सात् अतोविपर्ययेणसृष्टिज्ञानंप्रतिबद्धंतेनचसार्वज्ञ्यंनजायतेऽस्मदादीनामिति ॥ २७ ॥

केषांतर्हिसार्वज्ञ्यंभवतीत्याशंक्याहयेषांत्विति द्वाभ्यां येषांपुनर्जनानांपुण्यकर्मणांपापं अंतगतंअंतंनाशंप्राप्तं द्वितीयाश्रितेतिसमासः तेद्वंद्वमोहउत्कलक्षणस्तेननिर्मुक्ताःसंतःप्रथमंदृढव्रताःशमदमादिदार्ढ्य भाजोभूत्वामांभजंते ॥ २८ ॥ ततश्चजरामरणयोःप्रवाहादात्मनोमोक्षायमामाश्रित्यमयिसमाहितचेतसोभूत्वा येयतंतियतंतेज्ञानलाभायवेदांतश्रवणादौ तेतत्सर्ववेदांतप्रसिद्धंकृत्स्नंब्रह्मविदुः विराड्हायुपासकाश्चकृत्स्नब्रह्मविदःसूत्रकारणयोर्निष्कलस्यचाज्ञानात् श्रीगोपालबालोपासकास्तुतत्पदलक्ष्यकृत्स्नब्रह्मविद्येतस्तेध्यात्मादिकंकात्स्न्येनजानंतिसर्वविदोभवंतीत्यर्थः अनेनयज्ज्ञात्वानेहभूयोन्यत् ज्ञातव्यमवशिष्यतइत्येकविज्ञानात्सर्वविज्ञानप्रतिज्ञायापूर्वोक्ततात्स्यात्उपसंहारोदर्शितः अध्यात्मंआत्मनिशरीरेस्थितंप्रत्यगात्मविषयंवस्तुशुद्धंत्वंपदार्थमित्यर्थः कर्मचतत्त्वंपदार्थज्ञानयोःसाधनंश्रवणादिकंसर्वंविदुः ॥ २९ ॥ एवंतत्पदार्थविवेकंसत्योमुक्तिहेतुंसमाप्यतत्प्राप्युपायभूतान्युपासनानिक्रममुक्तिफलानिविस्तरेणवक्तुकामःसंक्षेपेणसूत्रयति साधिभूतेति अधिभूतंचअधिदैवंचताभ्यांसहितंसाधि

येषांत्वंतगतंपापंजनानांपुण्यकर्मणाम्॥ तेद्वंद्वमोहनिर्मुक्ताभजंतेमांदृढव्रताः॥ २८॥ जरामरणमोक्षायमामाश्रित्ययतंतिये॥ तेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्म चाखिलम्॥ २९॥साधिभूताधिदैवंमांसाधियज्ञंचयेविदुः॥ प्रयाणकालेपिचमांतेविदुर्युक्तचेतसः॥ ३०॥ इतिश्रीभीष्मपर्वणिभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेज्ञानयोगोनामसप्तमोऽध्यायः॥ ७॥ पर्वणितुएकत्रिंशोऽध्यायः॥ ३१॥ ॥७॥ ॥ अर्जुनउवाच॥ ॥ किंतद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तम॥ अधिभूतंचकिंप्रोक्तमधिदैवंकिमुच्यते॥ १॥ अधियज्ञःकथंकोत्रदेहेस्मिन्मधुसूदन ॥ प्रयाणकालेचकथंज्ञेयोसिनियतात्मभिः॥ २॥

भूताधिदैवं तथाऽधियज्ञेनसहितंसाधियज्ञंचमांयेविदुःउपासतेतेयुक्तचेतसःयतोनित्यंसमाहितचित्तास्ततोमांप्रयाणकालेपिसर्वजनव्यामोहकेविदुरेव भावनादाढ्यान्मरणकालेपितस्यज्ञानस्यप्रमोषोन भवत्यतोभगवतिनैरंतर्येणदृढाभावनाकर्त्तव्येतिभावः अधिभूतादिपदार्थंतुभगवानेवव्याख्यास्यतीतिनोक्तंवंतोवयं ॥ ३० ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेसप्तमोऽध्यायः॥ ७॥ प० ३१॥ ७॥

॥ ५९ ॥

पूर्वस्मिन्नध्यायेमायोपहितंब्रह्मजगत्कारणमुक्तंतच्चउत्तमानामनुपाधिब्रह्मप्रतिपत्तावुपलक्षणंमध्यमानामुपास्यंचेतिमत्वाप्रतिपत्तव्यंब्रह्मतद्विषयएकःउपासनाविषयाश्चषट् एवंसप्तप्रश्नविषयास्तेब्रह्मत द्विदुरित्यध्यायांतेसार्धश्लोकेनभगवतासूत्रितास्तद्वृत्तिरूपोयमध्यायआरभ्यते तत्रसूत्रितानांब्रह्मादिशब्दानामर्थंबुभुत्सुरर्जुनउवाच किंतत्कृत्स्नंब्रह्मेतिप्रथमःप्रश्नः शेषःस्पष्टार्थःश्लोकः ॥ १ ॥ अधियज्ञःकथंकोत्र कइतिस्वरूपप्रश्नः कथंज्ञेयइतिपदापकर्षेणतत्तदुपासनाप्रकारप्रश्नश्चेतिद्वयंमिलित्वाएकएवप्रश्नः शेषंस्पष्टं ॥ २ ॥

क्रमेणैषांप्रश्नानामुत्तरमाह अक्षरमित्यादिभिस्त्रिभिः तत्रकिंतद्ब्रह्मेत्यस्योत्तरमक्षरंपरमंब्रह्मेति यत्परममक्षरंतद्ब्रह्मेतियोजना अक्षरशब्दस्यवर्णेपुरूढत्वात् ओमित्येतदक्षरमित्यादिश्रुतौओमित्येकाक्षरंब्रह्मेतिस्मृतौचदर्शनेनात्रापिप्रणवस्याक्षरशब्देनग्रहणेप्रसक्तेपरममितिविशेषणं प्रणवस्यपरब्रह्मत्वासंभवात् अतश्चएतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमितिश्रुतिप्रसिद्धमखंडैकरसं वस्तुअक्षरशब्दितंतद्ब्रह्मेतिप्राज्ञः यद्वा अक्षरशब्देनजीवः कूटस्थोक्षरउच्यतेउत्तमःपुरुषस्त्वन्यइतिगीतासुक्षरंप्रधानममृताक्षरंहरः क्षरात्मानावीशतेदेवएकइतिश्रुतौचकूटस्थपदेनामृतपदेनचविशेषितस्या क्षरपदस्यजीववाचित्वदर्शनात् अमृतोक्षरमित्यपेक्षितेउत्वाभावश्छांदसः तथाचाक्षरंजीवाख्यंपरमंब्रह्म परममितिविशेषणेनसोपाधिकस्यपूर्वाध्यायोक्तस्यव्यावृत्तिः नहिजीवस्यसोपाधिकस्यब्रह्मभा वःसंभवति व्यावर्त्तकोपाधौमायादर्पणेजाग्रतियोरभेदायोगात् किंतद्ब्रह्मेतिप्रश्नेपरममितिविशेषणाभावेपितेब्रह्मतद्विदुःकृत्स्नमितिप्रश्नोत्थापकेसूत्रेपरमत्ववाचिनाकृत्स्नपदेनब्रह्मणोविशेषितत्वादुत्तरेपि

श्रीभगवानुवाच ॥ ॥ अक्षरंब्रह्मपरमंस्वभावोध्यात्ममुच्यते॥ भूतभावोद्भवकरोविसर्गःकर्मसंज्ञितः॥ ३ ॥ अधिभूतंक्षरोभावःपुरुषश्चाधिदैवतं ॥ अधियज्ञोहमेवात्रदेहेदेहभृतांवर ॥ ४ ॥

ब्रह्मणएवपरममितिविशेषणंयुज्यतएव प्रश्नेपितच्छब्देनकृत्स्नत्वस्यैवपरहात् ततश्चकिंतत्कृत्स्नंब्रह्मेतिप्रश्नेयदक्षरंजीवाख्यंतदेवापेतोपाधिसंबंधंसत्कृत्स्नंब्रह्मेतितत्त्वमसीतिमहावाक्यार्थःप्रतीचोब्रह्मभावः प्रतिपादितोभवतीतिरूढयं तथास्वोऽनागंतुकोभावःस्वरूपंस्वभावःशुद्धस्त्वंपदार्थःसोध्यात्ममुच्यते भाष्येतुतस्यैवपदस्यब्रह्मणःप्रतिदेहंप्रत्यगात्मभावःस्वोभावःस्वभावोध्यात्ममुच्यते अध्यात्मशब्देनाभिधीयतइतिविसर्गेदेवतोद्देशेनद्रव्यत्यागात्मकोयागःसकर्मसंज्ञितः तमेवविशिनष्टि भूतेति भूतानांभावःसात्विकादिःस्वभावःउद्भवश्चतयोःकरणाद्भूतभावोद्भवकरः तथाहि बुद्धिःकर्मानुसारिणीतिकर्मानुसारि स्वंभावस्यस्मर्यते तथाउद्भवोपिकर्मतएवस्मर्यते अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति ॥ ३ ॥ क्षरोभावोजनिमद्वस्तुकर्मफलभूतंतत्साधनभूतंचतदधिभूतमित्युच्यते अधिदैवतंपुरुषःसर्वासुपूर्षुवसतीतिसर्वकरणानुग्राहकःसकलदेवतात्माहिरण्यगर्भः अधियज्ञोयज्ञाभिमानीविष्णुरंतर्यामीसोहमेवदेहस्मिअत्रास्मिन्देहे देहभृतांवर ॥ ४ ॥

अचषट्प्रश्नोत्तरेषुप्रथमेजीवस्यब्रह्मभावउक्तः तंजाननांप्रयाणमेवनास्ति ननस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयंते ब्रह्मैवसन्ब्रह्माप्येतीतिश्रुतेः द्वितीयेशुद्धस्त्वंपदार्थउक्तस्तज्ज्ञानस्यापिवस्तुतत्त्वविषयत्वान्नतत्रभावनापेक्षास्तीतिनभावनाफलभूतकालेतत्प्रत्ययोपेक्षते तृतीयचतुर्थयोस्तुकर्मतत्साधनस्तूंचजन्यंवस्तूक्तं तत्रापिनभावनापेक्षास्ति अंतकालेप्रबलेनैवकर्मणाचित्तस्यावरोधात्तत्साधनफलभूतस्यैवस्मरणावश्यंभावेननत्रभावनायावैयर्थ्यात् परिशेषादंत्ययोरेवकार्यकारणब्रह्मणोःसोपाधिकनिरुपाधिकयोरन्यतरस्यभावनासुदृढाचेदंतकालेतत्प्रत्ययोवश्यंभावीतिनयोरन्यतरंरूपंपरमात्मानंस्मरन् यःकलेवरंमुक्त्वार्चिरादिमार्गेणप्रयातिसब्रह्मलोकप्राप्तिद्वाराक्रमेणमद्भावंमोक्षंयातीत्याह अंतकालेचेति स्पष्टायोजना नास्यत्रसंशयइति सोपाधिकब्रह्मोपास्तिप्रकृत्यशतंचैकाचत्वदयस्यनाड्यस्तासांमूर्द्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेतिविष्वगन्याउत्क्रमणेभवंतीतिदहरोपासकस्यगतिपूर्वकस्यामृतत्वस्यश्रवणात् यस्तुशुद्धत्वंपदार्थरूपमध्यात्मवस्तुमात्रंवेदअसौब्रह्मात्मैक्यज्ञानाभावान्नतस्यप्राणाउत्क्रामंतीत्येतद्वाक्यविषयोनभवतिकिंतुशतंचैकाचेत्येतस्यैववषियः ननुतस्यानुपासकत्वात्कथमेतदितिचेन्न हिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छतीतिन्यायेनतस्योभयभ्रष्टत्वासंभवात् कठवल्लीषु निष्कलप्रत्यगात्मविदंकेवलयोगिनंप्रकृत्यशतंचैकाचेत्यात्मानाच्च वेदांतविज्ञानसुनिश्चितार्थाःसंन्यासयोगाद्यतयःशुद्धसत्वाः तेब्रह्मलोकेतुपरांतकालेपरामृतात्परिमुच्यंतिसर्वेइतिश्रुतेर्नैनश्चितार्थानांशोधित

अंतकालेचमामेवस्मरन्मुक्त्वाकलेवरम्॥ यःप्रयातिसमद्भावंयातिनास्त्यत्रसंशयः ॥५॥
यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरम्॥ तंतमेवैतिकौंतेयसदातद्भावभावितः॥ ६ ॥
तस्मात्सर्वेषुकालेषुमामनुस्मरयुध्यच॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम्॥ ७॥

त्वंपदार्थानामेवकममुक्तिरवगम्यते नचात्रसुनिश्चितार्थाइत्यनेनब्रह्मात्मैक्यनिश्चयवंतोयहीतुंशक्याः तेषांगत्यभावस्यप्रोक्तत्वात् नाप्युपासकाः असंभवात् उपासनाहिनामअतस्मिंस्तद्बुद्धिः यथाशालग्रामेविष्णुबुद्धिरेवंसूत्रविराडंतर्यामिष्वात्मबुद्धिरितिनतद्वंतःसुनिश्चितार्थाइतिवक्तुंशक्यं तस्मादध्यात्मविदांब्रह्मात्मैक्यानवगमादनुपासकत्वेनांत्यप्रत्ययाभावेप्यर्चिरादिगतिप्राप्तिरस्तीतिसर्वमनवद्यं ॥ ५ ॥ नकेवलंकार्यकारणब्रह्मणोरेवभावनांत्यप्रत्ययवशात्तद्भावप्राप्तिहेतुरपितुकीटस्यजीवतएवभावनाबलाद्भाव्यवस्तुभावप्राप्तिर्दृश्यते नंदिकेश्वरस्यचस्मर्यते सहिमहादेवंभावयंस्तत्सारूप्यंदेहांतरंविनैवप्राप्त इतियोगशास्त्रेपिप्रसिद्धं तत्रकिमुक्तव्यमंतप्रत्ययवशाद्देहांतरेभाव्यभावप्राप्तिरस्तीतिमत्वानमेवार्थमन्यत्रापिदर्शयति यंयमिति तद्भावभावितःभाव्याकारवासनयारंजितइत्यर्थः ॥ ६ ॥ यस्मादेवंतस्मात्सर्वेषुकालेषुमामनुस्मरअंतकालेमत्स्मृत्यामद्भावप्राप्त्यर्थं युध्यचेतिचकारात्कर्मोपास्योःसमुच्चयोवगम्यते ज्ञानकर्मसमुच्चयकर्त्तरीवतदुभयानुष्ठातर्यैकस्मिन्नेवाधिकारिणिकर्तृत्वाकर्तृत्वप्रत्ययरूपविरोधाभावात् मयिअर्पितेमदेकनिष्ठतांनीतेमनोबुद्धीयेनसमय्यर्पितमनोबुद्धित्वंअसंशयंमामेवैष्यसिप्राप्स्यसि अंतकालेस्मरणेनेतिशेषः ॥ ७ ॥

एतदेवश्लोकत्रयेणविवृणोति अभ्यासेति अभ्यासयोगयुक्तेन तत्रस्थिनौयत्नोभ्यासइतिसूत्रितोऽभ्यासः तत्रध्येयेवस्तुनिचित्तस्यस्थिरीकरणार्थोयत्नःसचविजातीयप्रत्ययानंतरितसजातीयप्रत्ययप्रवाहीकरणरूपःसोत्राभ्यासः तत्राभाव्योविषयःसिद्धःविष्णुप्रतिमादिर्वीराडादिर्वा असिद्धस्तुमानसप्रतिमादिः तत्रासिद्धेमनसःप्रतिमाकारतासंपादनेतत्रस्थैर्यसंपादनेचेतिविषयभेदाद्विगुणोयत्नःकर्त्तव्योभवति सिद्धेतुचित्तस्थिरीकरणार्थंएकएवयत्नः तत्रयथास्वतःस्वच्छःस्फटिकोजपाकुसुमोपरागाल्लोहितःस्फटिकइतितत्रलौहित्याध्यासः तत्पाबल्यात्तत्रैवस्फटिकधीप्रमोषेपद्मरागत्वाध्यासः पद्मरागेपिचंद्रिकायामिंद्रनीलत्वाध्यासस्तत्रैवतदानीमेवकिंचिदूरस्थेनिहीनोपलत्वाध्यासइत्युत्तरोत्तराध्यासक्रमेणशुद्धएकएवस्फटिकःपंचविधोभवति एवंस्वतःशुद्धंचैतन्यंमायोपरागात्तदेवेश्वरः मायाप्राबल्येतस्यैवेश्वरत्वांशप्रमोषेतत्रैवसूत्रात्माध्यासःसूत्रेप्यज्ञानदार्ढ्याद्विराडध्यासः ततएवविराडेकदेशेषुशरीरादिषुआत्मत्वभ्रमः तत्रयथाघटांतर्गतःप्रदीपोघटमात्रंभासयतिघटच्छिद्रात्बहिर्गतःकिंचित्स्वप्रभयासंसृष्टंविषयमवभासयति सर्वात्मनाघटाद्बहिर्गतस्तुकृत्स्नंभवनोदरवर्त्तिपदार्थजातंप्रकाशयति तद्वद्देहांतर्गतानाचिर्दैहमात्रंभासयति देहच्छिद्राच्चक्षुरादेर्बहिर्गतासतीतत्सन्निकृष्टंकंचिद्विषयंरूपादिकमवभासयति सर्वात्मनागुरूक्तयुक्त्यादेहकृतपरिच्छेदाभिमानेत्यक्तेत्वपरिच्छिन्नासतीकृत्स्नंविराडात्मानमवभासयति यथोक्तंबाह्यग्रंथेष्वपि मणिद्रुतवहतारासोममूर्यादयोपिक्षितिविषयमिहाल्पंबाह्यमुद्योतयं

अभ्यासयोगयुक्तेनचेतसानान्यगामिना ॥ परमंपुरुषंदिव्यंयातिपार्थानुचिंतयन् ॥ ८ ॥

ति सहजलयसमुत्थंद्योतयेज्योतिरंतस्त्रिभुवनमपिसूक्ष्मस्थूलभेदकमेणेति सहजलयसमुत्थं सहजःस्वाभाविकोदेहकृतपरिच्छेदाभिमानस्तस्यलयमात्रादेवउत्थितं क्रमेणसंकल्पकमेण सदीक्षणमात्राभिनिर्वर्त्तत्वात्सर्वस्यप्राक्संकल्पादसत्त्वात् तथाचश्रुतिः सयदिपितृलोककामोभवतिसंकल्पादेवास्यपितरःसमुत्तिष्ठंतीति दोषनिमित्तरूपादयोविषयाःसंकल्पकृतादित्यक्षपादसूत्राच्च दोषारागादयः तदेवंप्रकाशमानेविराजिअहमेवेदंसर्वोस्मीतिमन्यतेसोस्यपरमोलोकइतिशास्त्रप्रामाण्याद्उपासकेनगृहीतोहंग्रहोयत्रापिवस्तुतत्त्वापेक्षयाभांतिरूपस्तथापित्वाभाविकादेहाहंग्रहात्सत्यरूपः यथास्फटिकेहीनोपलत्वग्रहापेक्षयाद्रनीलत्वग्रहस्तद्वत् यथाचस्फटिकेप्रणिधीयमानंचक्षुरुत्तरोत्तरपाटवविरुद्धाविंद्रनीलत्वंबाधित्वापद्मरागत्वंतद्बाधेनलोहितस्फटिकत्वंतद्बाधेनशुद्धत्वंचावगच्छति एवंगुरूक्तयुक्त्याप्रत्यगात्मनिप्रणिधीयमानंमनोस्यवाह्यंबाह्यरूपमपोह्यआंतरेआंतरेअवतिष्ठते चरमंविशुद्धंरूपंप्राप्यतुत्त्वयमेवविलीयते यथोक्तं येनत्यजसितत्त्यजेति येनमनसात्यजसिविराडादिभावंतदपिमनस्यजेत्यर्थः तदेवं व्यवहारापेक्षयासिद्धेषुविराट्सूत्रांतर्यामिपुमनसःस्थिरीकरणार्थोयत्नोभ्यासस्तत्फलभूतोयोगःसमाधिर्ध्येयवस्तुन्येवचेतसःस्थैर्यंतेनगुणेनयुक्तंयच्चेतस्तेन नान्यगामिनाअनन्यगामिना नैकधेनिवत्समाः तेनचेतसापरमंसर्वोत्कृष्टंपुरुषंनिरस्ताशेषदोषं यत्सर्वेषांपुरस्तात्सर्वान्याप्मनऔपत्तत्मात्पुरुषइतिनिर्वचनात् दिव्यंद्योतमानमनुचिंतयन्महमेवभगवान्सर्वात्मावासुदेवइतिसततमाचार्योपदेशमनुध्यायन् तमेवनदीसमुद्रन्यायेनयातिहेपार्थ तथाचश्रुतिः यथानद्यःस्यंदमानाःसमुद्रेस्तंगच्छंतिनामरूपेविहाय तथाविद्वान्पुण्यपापेविधूयपरात्परंपुरुषमुपैतिदिव्यमिति परात्सूत्रात्परंअंतर्यामिणं ॥ ८ ॥

तदेवमुपासनायाःस्वरूपमुक्त्वाउपास्यस्यस्वरूपमाह कविमिति कविंकांतदर्शिनंसर्वज्ञं पुराणंचिरंतनंअनुशासितारंजगतोंतर्यामिणं अणोःसूक्ष्मादप्याकाशादेरणीयांसंसूक्ष्मतरंयोनुस्मरेत्अनुचिंतयेत् सर्व स्यकर्मफलस्यधातारंविभागेनप्रदातारं अचिंत्यरूपंनास्यरूपंचिंत्यमानमपिकेनचिच्चिंतयितुंशक्यं आदित्यवर्णंआदित्यस्येवनित्यप्रकाशरूपोवर्णोदीप्यमानतायस्यतंआदित्यवर्णंसर्वजगदवभासकमित्य र्थः तमसोदेहेंद्रियादावनात्मन्यात्माभिमानरूपाऽविद्यातःपरस्तात्पराचीनंसतिदेहाभिमानेनप्रकाशतेयोगयुक्त्यात्मकेतुतस्मिन्नूत्वयमेवप्रकाशतइत्यर्थः॥९॥ उपासनायाःफलमाह प्रयाणेति प्रयाणकाले मनसाऽचलेनदृढ्यंतरवर्जितेन भक्त्याभगवतिवासुदेवेआराध्यत्वबुद्ध्यायुक्तोयोगबलेनयोगोमनःप्राणेंद्रियक्रियानिरोधोद्भवयपुंडरीकेतेपांवशीकरणमित्यर्थः तस्यैवबलेनचयुक्तोभ्रूमिकाजयक्रमेणप्राणे वमूलाधारादिब्रह्मरंध्रांतस्थानेष्वारोहावरोहक्रमेणसंचारितपवनोंतकाले भुवोर्मध्येआज्ञाचक्रेप्राणंआवेश्यसुषुम्नयानाड्यामूलाधारादुत्थापनपूर्वकंसम्यक्निवेश्यस्थापयित्वा स्थापनप्रयोजनंतुअन्यवि

॥६१॥

कविंपुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः॥ सर्वस्यधातारमचिंत्यरूपमादित्यवर्णंतमसःपरस्तात्॥ ९॥
प्रयाणकालेमनसाचलेनभक्त्यायुक्तोयोगबलेनचैव॥ भ्रुवोर्मध्येप्राणमावेश्यसम्यक्सतंपरंपुरुषमुपैतिदिव्यम्॥ १०॥

स्मरणपूर्वकंदिव्यपुरुषचिंतनं तच्चभ्रूमध्यादुपर्युन्नीयमानेवायौमनोमूर्ध्नामापद्यतइति तस्यामवस्थायांनभवतीत्यंत्यप्रत्ययस्तत्रैवसंपाद्यस्ततोचिरादिमार्गपर्वणाअमानवस्यपुरुषस्यस्थानविशेषप्रापकस्य प्राप्यस्थानस्यचतस्मिन्नेवस्मरणंकर्त्तव्यं तद्वासनावासितंमनोभ्रूमध्याद्योगिनाऊर्ध्वयानाड्याउत्क्षिप्तेप्राणेमुक्तेषुवद्ब्रह्मांडखर्परंभित्त्वाप्रचलितेसतिलब्धदृत्तिकंभूत्वापूर्वसंस्कारप्राबल्याद्योगमाहात्म्याच्चदि व्योपाध्युपेतमचिरादिपर्वदेवताभिरभिपूज्यमानमुत्तरोत्तरंस्थानंप्रत्यतिवाह्यमानममानवेनचपुरुषेणसंगच्छमानंतेनचयथाभिलषितंस्थानंप्राप्तिमात्मानंपश्यति तदिदमुक्तंभुवोर्मध्येसम्यक्प्राणमावेश्ये ति सएवंकृत्वायोगीकविंपुराणमित्युक्तलक्षणंपरंपुरुषंहिरण्यगर्भाख्यंसर्वस्यभूतजातस्यजनयितारंनारायणादिशब्दप्रतिपाद्यमुपैतिसमीपेप्राप्नोति तच्लोकंप्राप्नोतीत्यर्थः नहिपौराणिकानामिवैदिकानां मतेब्रह्मविष्णुरुद्रलोकानामुपर्युपरिकल्पनास्ति किंतार्हिसर्वेहिरण्यगर्भलोकाख्येसत्यलोकएवांतर्भवंति पराहिसोपासनकर्मोर्जितंहिरण्यगर्भप्राप्यंतेतिबृहदारण्यकेतद्भाष्यादौचस्पष्टं ॥ १० ॥

॥६१॥

भुवोर्मध्येप्राणमावेश्येत्युक्तंतत्किंकृत्वाकर्त्तव्यंतत्कृत्वाचकिंकर्त्तव्यमित्येतद्वयंवदिष्यंस्तत्रप्रतीकत्वेनचिंत्यंप्रणवंतावद्वाच्यवाचकयोरभेदविवक्षयास्तौति यदक्षरंप्रणवाख्यंवाचकंवेदविदोवेदादौवदंति य द्वायदक्षरंब्रह्मतद्वाच्यं एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमित्येवंलक्षणंवावेदविदउपनिषद्विदोवदंति यच्चयतयोविशंतिब्रह्मप्रतीकत्वेनशरणीकुर्वंति पक्षेसम्यग्दर्शनैसतिसरित्सागरन्यायेनयत्रविशंतियतयःयदक्षरमिच्छंतोब्रह्मचर्यंचरंतीतिपक्षद्वयेपिसमानं तत्तेपदंवर्णत्रयात्मकंपदनीयंवास्थानंविष्णोःपरमंपदंसंग्रहेणप्रवक्ष्ये अयंचवाच्यवाचकयोरभेदःश्रुतिच्छायययागम्यते अन्यत्र धर्मादन्यत्राधर्मादितिसर्वधर्मातीतंब्रह्मप्रकृत्य सर्वेवेदायत्पदमामनंतिपांसिसर्वाणिचयद्वदंति यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणब्रवीम्योमित्येतदित्योंकारेणोपसंहारात्तत्फलंचप्रतीकभावात् ओंका रंप्रतीकत्वेनप्रकल्प्यतद्वाराशुद्धंशबलंवाब्रह्मप्रतिपत्तव्यं तथाचश्रुत्यंतरे एतद्वैसत्यकामपरंचापरंचब्रह्मयदोंकारइत्युपक्रम्यतत्सादेवंविद्वानेतेनैवायतनेनैकतरमन्वेतीतिदृष्टं आयतनंशालग्रामवत्प्रतीकंते न ॥ ११ ॥ भुवोर्मध्येकथंप्राणमावेशयेदित्यतआह सर्वेति सर्वाणिशब्दादिविषयग्रहणद्वाराणींद्रियाणिसंयम्यनियम्य तथाचदमनोपिनिरुध्य तेषांकंचुकभूतंप्राणंमूर्द्धन्यनाड्यासुषुम्नाख्ययामूर्ध्निभुवोर्म

यदक्षरंवेदविदोवदंतिविशंतियद्यतयोवीतरागाः॥ यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणप्रवक्ष्ये॥ ११॥ सर्वद्वाराणिसंयम्यमनोहृदि
निरुध्यच॥ मूर्ध्न्याधायात्मनःप्राणमास्थितोयोगधारणाम्॥ १२॥ ओमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन्॥ यःप्रयातित्यजन्देहंसयाति
परमांगतिम्॥ १३॥ अनन्यचेताःसततंयोमांस्मरतिनित्यशः॥ तस्याहंसुलभःपार्थनित्ययुक्तस्ययोगिनः॥ १४॥

ध्येआधाय कथंयोगधारणांयोगशास्त्रोक्तांधारणांमनसोदेशविशेषनिबंधिनीमास्थितःअनुतिष्ठन्सन् ॥ १२ ॥ मूर्ध्निप्राणमाधायकिंकुर्यादतआह ओंकाररूपंएकाक्षरंएकंचतदक्षरंचवर्णोब्रह्मचतद्व्याहर न्उच्चरन्मांचब्रह्मभूतंअनुस्मरन्योहिदेवदत्तंस्मरत्यानन्नाम्याहरंतितस्मैदेवदत्तोभिमुखोभवत्येवंब्रह्मणोनामोच्चारणेनसन्निहितंरव्यापकंब्रह्मसाधकस्यसन्निधीयते सन्निहितेचब्रह्मणियोदेहंत्यजन्भ्रियमाणःप्रयातिऊर्ध्वनाड्याउत्क्रामतिसपरमांगतिंसन्निरुष्टब्रह्मरूपांयाति ब्रह्मैवप्रकृत्यश्रूयतेएषास्यपरमागतिरेषास्यपरमासंपदेषोस्यपरमआनंदइति तामेवगतिंशुद्धंब्रह्मैवप्राप्नोतिब्रह्मलोकप्राप्तिद्वारा ॥ १३॥ इदंयमनियतीवदुर्लभेतिमामंस्थाइत्याह अनन्येति नास्तिअन्यत्रचेतोयस्यासौअनन्यचेताइत्यनेनस्मरणेआदरउच्यते सततमितिनैरंतर्यं योमांस्मरतिनित्यशइतिदीर्घकालत्वंयावज्जीवंस्मरतीत्यर्थःतस्या हंसुलभःपार्थनित्ययुक्तस्यनित्येयोगिनामावश्यकेयुक्ताहारविहारादीयमनियमादीचयुक्तस्यावहितस्ययोगिनःयोगमनुतिष्ठतः ॥ १४ ॥

त्वल्लाभेपिकिंस्यादतआह मामिति मामुपेत्यपुनर्द्वितीयवारंजन्मनामुवंति यज्जन्मदुःखानामालयभूतंमूढदृष्ट्याकिंचित्सुखालयत्वेपिअशाश्वतंनश्वरंतुच्छमित्यर्थः केनामुवंति महात्मानोयोगेनजितचित्ताः अतएवपरमांसंसिद्धिंमोक्षंगताःअगताअपिप्रत्यासन्नत्वाद्गताएव तथाब्रह्मलोकगतान्प्रकृत्यस्मर्यंते ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यातिकृतात्मानःप्रविशंतिपरंपदमिति प्रतिसंचरेब्राह्मेप्रलये परस्य चतुर्मुखस्यअंतेनाशे ॥ १५ ॥ त्वदलाभेपिकिंस्यादतआह आब्रह्मेति आब्रह्मभुवनात्ब्रह्मलोकमभिव्याप्य ब्रह्मलोकेनसहैवेत्यर्थः लोकाःपुनरावर्त्तिनःपुनरावृत्तिस्वभावाःहेअर्जुन शेषंस्पष्टं अत्रेयं व्यवस्था येकममुक्तिफलाग्निर्दहरादिविद्याग्निर्ब्रह्मलोकंगतास्तेतत्रैवज्ञानंप्राप्यब्रह्मणासहमुच्यंते येतुर्दहराग्निविद्याग्निर्ब्रह्मलोकंगतास्तेनुपासितपरमेश्वराःपुनरावर्त्तंतइति ॥ १६ ॥ आवृत्तिभाजांकाल परिच्छेदमाह सहस्रेति युगशब्दोत्रचतुर्युगपर्यायः चतुर्युगसहस्रंतुब्रह्मणोदिनमुच्यतइतिपुराणांतरदर्शनात् सहस्रंचतुर्युगानिपर्यंतोवसानंयस्य चतुर्युगसहस्रंब्रह्मणोदिनंरात्रिरपितावतीत्याह रात्रिमिति अत्रा पिचतुर्युगसहस्राणांअंतेभवतितांचतुर्युगसहस्रांतां तेप्रसिद्धाअहोरात्रविदोजनाविदुः ॥१७॥ किंब्रह्मणोक्किजायतेकिंबारात्रावित्यतआह अव्यक्तादिति अत्रदैनंदिनसृष्टिप्रलययोःप्रकृतत्वाद्व्यक्तशब्देन नाव्याकृतंवियदादिकारणमिहग्राह्यं तदाआकाशादीनांसत्त्वात् किंतर्हिप्रजापतेःस्वापावस्थैवेहाव्यक्तशब्दार्थः अयंभावः प्रजापतेःस्वापकालेतत्कल्पितःस्थावरजंगमप्रपंचःसर्वोपिनदीयेऽहानेऽव्याकृता

मामुपेत्यपुनर्जन्मदुःखालयमशाश्वतम्॥ नाप्नुवंतिमहात्मानःसंसिद्धिंपरमांगताः ॥ १५ ॥ आब्रह्मभुवनाल्लोकाःपुनरावर्त्तिनोर्जुन॥ मामु पेत्यतुकौंतेयपुनर्जन्मनविद्यते॥ १६॥ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणोविदुः॥ रात्रिंयुगसहस्रांतांतेऽहोरात्रविदोजनाः ॥ १७॥ अव्यक्ताद्व्यक्त यःसर्वाःप्रभवंत्यहरागमे ॥ राज्यागमेप्रलीयंतेतत्रैवाव्यक्तसंज्ञके ॥ १८ ॥ भूतग्रामःसएवायंभूत्वाभूत्वाप्रलीयते ॥ राज्यागमेऽवशः पार्थप्रभवत्यहरागमे॥ १९॥ परस्तस्मात्तुभावोन्योव्यक्तोव्यक्तात्सनातनः ॥ यःससर्वेषुभूतेषुनश्यत्सुनविनश्यति ॥ २० ॥

ख्येलीयतेराज्यागमे तथादिवसागमेपुनस्ततएवयथापूर्वमाविर्भवति एवंदृष्टिसृष्टिन्यायेनास्मत्कल्पितोप्ययंवियदादिप्रपंचोऽस्मत्सुषुप्तौलीयतेअस्मत्प्रबोधेयथापूर्वंप्रादुर्भवतीति ॥ १८ ॥ कृतहानाकृता भ्यागमदोषापनुत्तयेबंधमोक्षशास्त्रप्रवृत्तिसाफल्यायचअविद्यादिवशादवशोयंभूतग्रामःपुनःपुनर्भूत्वापुनःपुनःप्रलीयतइत्याहवैराग्योत्पादनार्थं भूतग्रामइति अहरागमेभूत्वाभूत्वाराज्यागमेप्रलीयतइति योजना सएवभूत्वाप्रलीयतेनान्योऽभिनवोभवतीत्यर्थः कुतः यतोऽवशःअविद्याकामकर्माधीनस्तस्मात्सर्वानर्थबीजभूताया अविद्यायाविद्ययाउच्छेदेजन्ममरणप्रवाहविच्छेदायावश्यंतितव्यमित्यर्थः ॥ १९॥एवंब्रह्मभुवनांतानामावृत्तिंव्याख्याययत्प्रामानामावृत्तिर्नास्तितदक्षरंपरमंब्रह्मेत्युपक्रांतंवस्तुलक्षयतिपरस्तस्मादितित्रिभिः परइति तस्मादव्यक्तात्भूतग्रामबीजभूतादविद्यालक्षणादनृतात् अन्यो ऽत्यंतविलक्षणोभावःसत्ता तुशब्दात्परामिमतंसत्तासामान्यंवारयति तस्यसामान्यादिभ्योव्याहृत्तत्वात् अस्यचसर्वानुगतत्वात् सनातनोनित्यैकरूपः उपाधिमानृहिउपाधिविकिययानित्यंविकियतइ वक्ष्याति अयंत्वनुपाधित्वान्नित्यैकरूपएवयः सभावःसर्वेषुभूतेषुवियदादिषुनश्यत्सुनविनश्यतिकेवलसत्तारूपत्वात् एतेनतस्यकालत्रयाबाध्यत्वंनित्यत्वंचोक्तं ॥ २० ॥

अव्यक्तोनव्यज्यतइतिदृश्यत्वंनिरस्तं अक्षरोश्नुतेव्याप्नोतीतित्रिविधपरिच्छेदशून्यत्वमुक्तं तेनभावंपरमांगतिं ब्रह्मलोकांतागतिरपरमा कार्यत्वात् इयंतुपरमा कार्यकारणातीतत्वात् आहुः एषास्यपरमाग तिरित्यादयःश्रुतयः यंप्राप्यननिवर्त्तंतेपुनःसंसारेनपतंति तदितिविधेयापेक्षंस्त्रीत्वं सएवममविष्णोःपरमंउपाध्यस्पृष्टंधामप्रकाशःतद्विष्णोःपरमंपदमितिश्रुतिप्रसिद्धंनिष्कलंब्रह्म ॥ २१ ॥ एवंज्ञेयंप्रत्य गग्निनंब्रह्मोक्त्वाजगत्कारणमुपासनीयमितोन्यदित्याह पुरुषइति तुशब्दःपूर्ववैलक्षण्यद्योतनार्थः हेपार्थयोयंभक्त्याआराधनेनउपासनेनेतियावत् कीदृश्या अनन्ययानास्मन्योयस्यांसातयाउपास्योपा सकश्चेदमंतरेणअहंग्रहरूपयेत्यर्थः तयाभक्त्यायोलभ्यःसपरःपूर्वोक्ताद्व्याहृत्तानुगताद्क्षरादन्यःकारणात्मेतियावत् लभ्यत्वादेवास्यान्यत्वमपि नह्यात्माचलभ्यश्चेतियुज्यते अस्यकारणत्वमेवाह यस्ये ति यस्यपुरुषस्यांतःस्थानिवीजेद्रुमइवसर्वाणिवियदादीनिस्थावरजंगमानिचयेनचइदंसर्वंततंव्याप्तमुपादानत्वात्सभक्त्यालभ्यतइतियोजना ॥ २२ ॥ पूर्वोक्तानामोंकारद्वारासगुणब्रह्मविदांक्रममुक्तिभा

अव्यक्तोक्षरइत्युक्तस्तमाहुःपरमांगतिम्॥ यंप्राप्यननिवर्त्तंतेतद्धामपरमंमम ॥ २१॥ पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया॥ यस्यां तस्थानिभूतानियेनसर्वमिदंततम्॥ २२॥ यत्रकालेत्वनावृत्तिमावृत्तिंचैवयोगिनः॥ प्रयातायांतितंकालंवक्ष्यामिभरतर्षभ ॥ २३ ॥ अग्निर्ज्योतिरहःशुक्लःषण्मासाउत्तरायणम्॥ तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजनाः ॥ २४ ॥ धूमोरात्रिस्तथाकृष्णःषण्मासादक्षिणा यनं॥ तत्रचांद्रमसंज्योतिर्योगीप्राप्यनिवर्त्तते ॥ २५॥शुक्लकृष्णेगतीह्येतेजगतःशाश्वतेमते॥ एकयायात्यनावृत्तिमन्ययावर्त्ततेपुनः ॥ २६॥ नैतेसृतीपार्थजानन्योगीमुत्यतिकश्चन॥ तस्मात्सर्वेषुकालेषुयोगयुक्तोभवार्जुन॥ २७॥

जांब्रह्मप्रतिपत्तयेउत्तरोमार्गोवक्तव्यइत्यतआह यत्रेति आवृत्तिमार्गोपन्यासोऽनावृत्तिमार्गस्तुत्यर्थः योगिनइति योगिनःकर्मिणश्चोच्यंते तेषांयथायोगंमार्गद्वयविभागः शेषंस्पष्टं ॥ २३ ॥ तत्रोपासकानां देवयानंपंथानमाह अग्निरिति अग्निर्ज्योतिरित्यर्चिरभिमानिनीदेवतालक्ष्यते एवंअहरित्यहरभिमानिनी एवंशुक्लपक्षस्यषण्मासंसंमितोत्तरायणस्यचाभिमानिन्यौदेवतेएव एतच्चान्यासामप्युपलक्षणं तत्र प्रयाताउत्कांताब्रह्मकार्यंब्रह्मतद्द्वारापरंचगच्छंति ब्रह्मविदोब्रह्मोपासकाजनाः ॥ २४ ॥ एतेनचधूमोरात्रिरित्येषोपिधूमादिमार्गःकर्मिणामपक्वयोगिनांचउचितआवृत्तिफलश्चव्याख्यातः ॥ २५ ॥ उक्तौ मार्गावुपसंहरति शुक्लेति शुक्लाज्ञानहेतुत्वादर्चिरादिगतिः तद्भावात्कृष्णाधूमादिगतिः एकयाशुक्लया अन्ययाकृष्णया ॥ २६ ॥ एतेसृतीमार्गौआवृत्त्यनावृत्तिफलेजानन्योगीनमुह्यतियोगभ्रष्टोऽयतिर ल्पप्रयत्नश्चयोगीनभवति कश्चनकोपि यस्मादेवंतस्मात्सर्वेष्वित्यादिस्पष्टं ॥ २७ ॥

पुनःश्रद्धानिश्चद्धयेयोगंस्तौति वेदेष्विति वेदेषुसम्यगधीतेषुयज्ञेषुतपःसुचसम्यगनुष्ठितेषुदानेषुचसम्यग्दत्तेषुयत्पुण्यंतत्फलंचेतिपुण्यफलंसर्वेषुसमुच्चितेषुयत्प्रदिष्टंशास्त्रेषुतत्सर्वंयोगीअत्येतिअतिक्रामतिकार्यब्रह्मलोकंप्राप्नोतीत्यर्थः किंकृत्वा इदंपूर्वोक्तमुपासनंविदित्वाज्ञात्वानुष्ठायच ततश्चकिमित्यतआह यत्स्थानंनिर्विशेषंपंब्रह्मउपैतिप्राप्नोतिचक्रमेणेत्यर्थः आद्यंनतुकेनचिन्निर्भितं तदनेनाध्यायेनध्येयस्त्वदार्थोव्याख्यातः अथिमेध्यायेज्ञेयंब्रह्मव्याख्यास्यति ॥ २८ ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेगीतार्थ०अष्टमोऽध्यायः ॥ ८ ॥ पर्व०॥३२॥ ॥७॥ ॥७॥ ॥७॥

पूर्वाध्यायेकिंतद्ब्रह्मेत्यादिसप्तप्रश्न्यामक्षरंब्रह्मपरमित्यादिनासंक्षिप्यव्याख्यातायांतज्ज्ञानस्यपृथक्प्रयोजनाकांक्षायांकर्मविदआधिभौतिकंधूमादिमार्गप्राप्यंस्थानमितिनिरूपणेनप्राप्यप्रापकादिविभागोदर्शितः तेनकर्माधिभूतेव्याख्याते तथासूत्रांतर्यामिणोरुपासकस्यार्चिरादिमार्गेणक्रममुक्तिस्थानप्राप्तिरित्युक्तंतेनाधिदैवाधियज्ञौव्याख्यातौ ओमित्येकाक्षरमित्यादिनाअंतकालेकथंज्ञेयोसीत्यस्योत्तरंव्याख्यातं तदेवंध्येयब्रह्मविद्यासांगानिरूपिता परिशिष्टमाद्यंज्ञेयब्रह्मविषयंप्रश्नद्वयंकिंतद्ब्रह्मकिमध्यात्ममितितद्विवरणायनवमोध्यायआरभ्यते नकेवलमर्चिरादिगतिप्राप्याकालांतरएवमुक्तिरस्तिकिंत्विहैवसद्योमुक्तिरस्तीतिविशेषंवक्तुंश्रीभगवानुवाच इदंतुतेइति इदंवक्ष्यमाणं तृपूर्वस्माद्ध्येयाद्विलक्षणंज्ञेयंतेतुभ्यंगुह्यतममतिशयेनगोप्यंप्रवक्ष्यामि अनसूयवेअसूयागुणेपुदोषाविष्करणंतद्रहितायज्ञानंज्ञ

वेदेषुयज्ञेषुतपःसुचैवदानेषुयत्पुण्यफलंप्रदिष्टम्॥ अत्येतितत्सर्वमिदंविदित्वायोगीपरंस्थानमुपैतिचाद्यम्॥२८॥ ॥इतिश्रीम० भीष्मपर्वणिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेअष्टमोऽध्यायः॥८॥पर्वणितृद्वात्रिंशोऽध्यायः॥३२॥ ॥७॥ ॥श्रीभगवानुवाच॥ ॥इदंतु तेगुह्यतमंप्रवक्ष्याम्यनसूयवे॥ ज्ञानंविज्ञानसहितंयज्ज्ञात्वामोक्ष्यसेऽशुभात्॥१॥राजविद्याराजगुह्यंपवित्रमिदमुत्तमम्॥ प्रत्यक्षावगमंधर्म्यंसुसुखंकर्तुमव्ययम्॥२॥अश्रद्दधानाःपुरुषाधर्मस्यास्यपरंतप॥ अप्राप्यमांनिवर्त्तंतेमृत्युसंसारवर्त्मनि॥३॥

मिमात्रत्वरूपंब्रह्म विज्ञानेनानुभवेनसहितंननुकेवलंपारोक्ष्येणयत्ज्ञानंज्ञात्वासाक्षात्कृत्यअशुभात्संसारान्मोक्ष्यसे अत्रयत्समभादौ ज्ञानंतेऽहंसविज्ञानमिदंवक्ष्याम्यशेषतइतिप्रतिज्ञातं यस्यचविज्ञानाय शास्त्रायचंद्रन्यायेनोपलक्षणीभूतंजगत्कारणंब्रह्मतत्रैवनिरूपितं यद्विज्ञानेऽधिकारसंपत्त्यर्थंतस्यैवसगुणस्योपासनमुक्तंदिहसर्वशेषीभूतंब्रह्मवक्तव्यमितितथैवप्रतिजानीतेवचनमात्रेणैवात्रापरोक्षंज्ञानंजायतइतितच्चतत्रैवव्युत्पादितंननविस्मर्त्तव्यं ॥ १ ॥ एतदेवस्तौति राजविद्येति विद्यानांराजाइतिराजविद्याअध्यात्मविद्या गुह्यानांराजाइतिराजगुह्यं राजदंतादिषुपरमित्युपसर्जनस्यंपरनिपातः पवित्रंपावनं उत्तमंपूर्वापरदुरितनाशाश्लेषहेतुत्वात्प्रायश्चित्तायापेक्षयाश्रेष्ठं प्रत्यक्षावगमंप्रत्यक्षंनित्यापरोक्षंयत्यत्यगात्मवस्तुतदेवयाथात्म्येनावगम्यतेऽनेनेतिप्रत्यक्षावगमं प्रत्यक्षेणसुखादिवदगम्योयस्येतिवा अस्मिन्पक्षेविज्ञानसहितमितिविशेषणस्यश्लोकांतरस्थत्वान्नतेनपौनरुक्त्यदोषः तर्ह्यपूर्वत्वाभावान्निष्फलंस्यादतआह धर्म्यंधर्मादनपेतं तथाहि क्षणमपिप्रत्यगात्माकारदृत्तौसत्यांश्रूयते क्षणमेकंकृतुशतस्यचतुःसप्तत्यायत्फलंतदवाप्नोतीति तर्हिदुःसाध्यंस्यान्नेत्याह सुसुखंकर्तुमिति कर्तुंसंपादयितुंआविष्कर्तुंसुसुखंअनायाससाध्यं अज्ञानापनयमात्रसिद्धत्वात् तर्हिआशुविनाशिफलंचेत् अव्ययं वस्तुमात्रविषयत्वादनंतफलंनतुकर्मफलवन्नश्यति ॥ २ ॥ तर्हिकृतएतज्ज्ञानंसर्वेनसंपादयंतीत्याह अश्रद्दधानाइति स्पष्टार्थःश्लोकः ॥ ३ ॥

॥ ६३ ॥

एवंस्तुत्याज्ञामुखीकृत्ययद्वक्तव्यंतदाह मयेति मयाइदंसर्वंजगत्ततंव्याप्तंउपादानत्वात् कनकेनेवकुंडलादीनि ननुप्रागेवैतदुक्तंअहंसर्वस्यजगतःप्रभवःप्रलयस्तथेति तथाचराजविद्येत्यादिस्तुतिरस्थानेएवकृतास्यात् वक्तव्यविशेषाभावादितिचेत् अत्रब्रूमः यथा यतोवाइमानिभूतानिजायंते येनजातानिजीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेतीतिज्ञेयस्यब्रह्मणोलक्षणंजगज्जन्मादिहेतुत्वमुक्त्वा तस्यानुगममन्नादिशब्दशब्दिितेषुविराडादिषुदर्शयति अन्नाद्भवंतखल्विमानिभूतानिजायंते प्राणाद्भवेत्यादिना तस्यनिर्णयवाक्यंतु आनंदाद्भवंतखल्विमानिभूतानिजायंतेइति सैषाभार्गवीवारुणीविद्येति तत्रैवविद्यायाःपर्यवसानाभिधानात् एवमिहापिसप्तमे भूमिरापोनलोवायुरित्यादिनासर्वभूतात्मकस्यविराजोजगज्जन्मादिहेतुत्वंप्रदर्श्यपश्चादहंसर्वस्यजगतःप्रभवःप्रलयस्तथेत्यनेनमायाशबलेपितत्वं दर्श्यैदानींशुद्धेप्रत्यगात्मन्येवतद्दर्शयतिस्थूलारुंधतीन्यायेनप्रतिपत्तिसौकर्यार्थमितिगम्यते राजविद्येत्यादिनास्तुतत्वात् यथाकश्चिद्दुर्लक्ष्यांसूक्ष्मामरुंधतींदिदर्शयिषुस्तत्समीपस्थांस्थूलांतारामरुंधतीतिचा

मयाततमिदंसर्वंजगदव्यक्तमूर्त्तिना॥ मत्स्थानिसर्वभूतानिनचाहंतेष्ववस्थितः॥४॥

हयतिप्रतिपद्यतेचानेनैवक्रमेणप्रतिपत्तिः एवमिहापिकार्यकारणप्रतिपत्तिद्वाराअकार्यकारणस्यशुद्धस्यप्रतिपत्तिर्युक्ता अतएवभगवान्भाष्यकारोमयाततमिदंसर्वमित्यत्रमयामयःपरोभावस्तेननतंव्याप्तमितिव्याचख्यौ नत्वहंसर्वस्यजगतःप्रभवइत्यत्रममयःपरोभावःससर्वस्यजगतःप्रभवइति सचभगवतःकारणात्मनःपरोभावःपरमानंदएवतेनैवचेदंततं आनंदाद्भवेत्युदाहृतश्रुतेस्तस्यैवजगदुपादानत्वेनतदीयसत्तास्फूर्त्तिभ्यांजगतोव्याप्तत्वात् अतएवाव्यक्तमूर्त्तिनेतिविशेषणं मायाशबलंहिकारणंबुद्धिप्राप्यत्वात्करणगोचरःशुद्धंहिब्रुद्धेःपरत्वात्करणागोचरइति किंभूताकारेणानंदःपरिणमतइत्यतआह मत्स्थानीति मयिप्रत्यगानंदैरज्जवांसर्पवंदंडधारादयइवसर्वंभूतानिस्थितान्यतोमत्स्थानीत्युपचारादुच्यंते अधिष्ठानाध्यस्तयोर्वास्तवसंबंधायोगात् एतदेवाह नचेति नचाहंपरमानंदस्तेषुभूतेष्ववस्थितोस्विघटादाविवमृत् अपरिणामित्वादेव॥ ४ ॥

एवमभ्युपगतमानंदस्यजगद्विवर्त्ताधिष्ठानत्वंतदप्यपवदति नचमत्स्थानीति अयंभावः अस्यद्वैतेंद्रजालस्ययदुपादानकारणंअज्ञानंतदुपाश्रित्यब्रह्मकारणमुच्यतइतिवार्त्तिकोक्तेरज्ञानमेवजगत्कारणंतच्च तुच्छं अहंचासंगः ततश्चतुच्छतरेणतत्कार्येणभूतसंघेननममासंगस्याधाराधेयभावसंबंधोऽनिर्वचनीयोप्यस्ति आदर्तहिरज्वादिकमनिर्वचनीयेनसर्पादिनासंबध्यते अहंतुसर्वदानाद्यंतःसाक्षिरूपत्वात्तत्संबंधशून्यइतिनचमत्स्थानिभूतानीत्युक्तमिति ननुसाक्षिणस्तवब्रह्मणोयुवासुखीचेतिप्रतीच्येबभूतसंबंधानुभवात्कथंनचमत्स्थानीत्युक्तिरित्याशंक्याह पश्यमेयोगमैश्वरमिति मेममभूतैःसहयोगंयुक्तिघटनांपश्य ऐश्वरंईश्वरेणमायाविनानिर्मितं गगनेगंधर्वनगरमिव अतएवममकारणशरीरस्यात्माप्रत्यगानंदोभूतभृदपिभूतस्थोन चकारोप्यर्थेभिन्नक्रमश्च खमिवगंधर्वनगरभृदपितत्स्थंन तस्यतदाकारेणपरिणामासंभवात् एवंरूपोपिपरानंदरूपोममात्मासभूतभावनःभूतानांदद्धिकरः एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंति कोह्येवान्यात्कःप्राण्यात् यदेषआकाशआनंदोनस्यादित्यादिश्रुतिभ्यः आकाशेअव्याकृताख्येत्वाधिष्ठानभूतआनंदोऽनुस्यूतोनस्यात्तर्हिप्राणापानक्रियांकश्चिदपिनकुर्यात् कारणगतंजाड्यंकार्येपिस्यात् आकाशेआनंदानुबंधेतुकारणस्यचेतनत्वात्कार्यमपिचेतनावत्स्यादितिश्रु

नचमत्स्थानिभूतानिपश्यमेयोगमैश्वरम्॥ भूतभृन्नचभूतस्थोममात्माभूतभावनः ॥५॥ यथाकाशस्थितोनित्यंवायुःसर्वत्रगोमहान्॥ तथासर्वाणिभूतानिमत्स्थानीत्युपधारय॥६॥

त्यर्थः बृहदारण्यकेपि यदूर्ध्वंगार्गिदिवोयदवाक्पृथिव्यायदंतराद्यावापृथिवीइमे यद्भूतंचभवच्चभविष्यच्चेत्याचक्षतआकाशएवतदोतंचप्रोतंचेतिमायाविनिसर्वस्योतप्रोतत्वमुक्त्वाकस्मिन्नुखल्वाकाश ओतश्चप्रोतश्चेत्यस्योत्तरमेतस्मिन्नुखल्वक्षरेगार्गिआकाशओतश्चप्रोतश्चेत्यस्थूलादिलक्षणस्याक्षरस्याकाशाधारत्वमुक्तं तस्मायुक्तमुक्तमाकाशशरीरेणभगवताकारणोपाधिनिष्कृष्टचिन्मात्राभिप्रायेणममात्माभूतभावनइति ॥ ५ ॥ श्लोकद्वयोक्तेर्थेदृष्टांतमाह यथेति यथालोकेआकाशेस्थितोनित्यंसदावायुःसर्वत्रगःपरिमाणतश्चमहान् तथासर्वाणिभूतानिसर्वगतेमयिअसंश्लेषेणैवस्थितानीत्येवमुपधारयेतिप्राज्ञः किंतद्ब्रह्मेतिप्रश्नस्योत्तरमुक्तंअक्षरंपरमंब्रह्मेति अक्षरसंज्ञंशुद्धत्वंपदार्थएवनिरुपाधिकंब्रह्मश्लोकद्वयेनव्याख्यातं इदानींतस्याक्षराख्येनजीवेनाभेदंसदृष्टांतमाह यथेति वायुःसूत्रात्मा वायुर्वैगोतमतत्सूत्रमितिश्रुतेः सर्वत्रगइतिसमष्टिर्लिंगत्वात्तस्यसर्वगतत्वं महानितिबाह्यवायुव्यादृत्त्यर्थं सयथाआकाशस्थितःअव्याकृताकाशेत्वकारणेस्थितः नित्यमितिकालत्रयेपिस्याकाशसंबंधउक्तः सर्वाणिभूतानिउपाधिनिष्कृष्टत्वंपदार्थरूपीचेतनवर्गः बहुत्वंलोकाभिप्रायेण यथाकार्यंसर्वमुत्पत्तेःप्राक्नाशादूर्ध्वंमध्येचत्वकारणएवाभेदेनतिष्ठति एवंसर्वोपिजीववर्गउपाध्युत्पत्तेःप्राक्तन्नाशादूर्ध्वंमध्येवाघटाकाशोमहाकाशादिवपरस्माद्ब्रह्मणःकालत्रयेपिनातिरिच्यतइत्यर्थः एतेनजीवब्रह्माभेदकथनेनत्वभावोध्यात्मंमुच्यतइतियत्पागुक्तंब्रह्मैवजीवइतितद्विवृतं ॥ ६ ॥

॥६४॥

नन्वेवमुपाधिरहितस्यैवब्रह्मणिलयश्चेदुपाधेःकागतिरित्याशंक्याह सर्वेति सर्वाणिभूतानिस्थावरजंगमशरीराणिमामिकांममायाविनःप्रकृतिंत्रिगुणात्मिकामपरांसूक्ष्मभूम्याद्यात्मिकांयांतिप्रविशंतिकदायांतिकल्पक्षये पुनश्चतान्येवभूतानिप्रकृतौसुप्तावविवेकात्मनास्थितानिएकतांगतानिकल्पादौविसृजामिविविधरूपेणसृजाम्यहंकारणात्मामायावी ॥ ७ ॥ एतदेवाहप्रकृतिमिति एवमविद्यालक्षणांस्वांप्रकृतिमवष्टभ्यआश्रित्यतांविनाकेवलस्यस्रष्टृत्वासंभवात् इमंभूतग्रामंपुनःपुनर्विविधंसृजामि किंभूतं प्रकृतेर्वशात्स्वभाववशात् अवशंरागद्वेषाद्यधीनं ॥८॥ ननुविषमांसृष्टिंकुर्वतस्तववैषम्यनैर्घृण्येस्यातामतआह नचेति तानिविषमसृष्टिरूपाणिकर्माणिमांननिबध्नंति तत्रहेतुः उदासीनवदासीनमिति यथापर्जन्योबीजविशेषेषुरागंकेषुचिद्द्वेषंचाकृत्वाउदासीनःसन्वर्षतिएवमीश्वरोपिपुण्यवत्सुरागंपापिषुद्वेषंचाकुर्वन्जगत्सृजति तत्तदसाधारणकर्मबीजवशात्तेतेविभिन्नंफलंप्रामुवंतीतिनेश्वरवैषम्यादीत्यर्थः ॥ ९ ॥ ननुविसृजामिउदासीनवदासीनमितिपरस्परविरुद्धमुच्यतइत्याशंक्याह मयेति मयाकूटस्थेन

सर्वभूतानिकौंतेयप्रकृतिंयांतिमामिकाम्॥ कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहम्॥७॥प्रकृतिंस्वामवष्टभ्यविसृजामिपुनःपुनः॥ भूतग्राममिमंकृत्स्नमवशंप्रकृतेर्वशात्॥८॥नचमांतानिकर्माणिनिबध्नंतिधनंजय॥ उदासीनवदासीनमसक्तंतेषुकर्मसु॥९॥मयाध्यक्षेणप्रकृतिःसूयतेसचराचरम्॥ हेतुनानेनकौंतेयजगद्विपरिवर्त्तते॥१०॥अवजानंतिमांमूढामानुषींतनुमाश्रितम्॥ परंभावमजानंतोममभूतमहेश्वरम्॥११॥ मोघाशामोघकर्माणोमोघज्ञानाविचेतसः॥राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताः॥१२॥महात्मानस्तुमांपार्थदैवींप्रकृतिमाश्रिताः॥भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययम्॥१३॥

अध्यक्षेण अयस्कांतकल्पेनप्रवर्त्तकेनप्रकृतिश्चराचरंजगत्सूयतेउत्पादयति अनेनअध्यक्षत्वेनैवहेतुनाहेकौंतेयजगद्विपरिवर्त्ततेजन्मान्यवस्थासुभ्रमति अयस्कांतवदहमुदासीनश्चसृष्टिप्रवर्त्तकश्चभवामीतिभावः तथाचमंत्रवर्णः एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मा कर्माध्यक्षःसर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्चेतिएकस्यैवदेवस्यसर्वाध्यक्षत्वंसाक्षित्वंचप्रतिपादयति ॥१०॥ एवंभूतंमांसंतंमूढाःअवजानंतियतोमानुषींतनुंआश्रितंमनुष्यदेहेनव्यवहरंतं ममपरंप्रकृष्टंभावंतत्त्वंअजानंतःभूतानांमहेश्वरंमामवजानंतीतिसंबंधः ॥ ११ ॥ मदवज्ञानाच्चतेमोघाशाःदृथैवआशाआशिषोयेषांतेमोघाशाः तथामोघकर्माणःनिष्फलोद्योगाः मोघज्ञानाःनिष्फलज्ञानाः यतोविचेतसःनिर्विवेकाः यतोराक्षसींआसुरींचरजस्तमःप्रधानांमोहिनींमोहकरींप्रकृतिंश्रिताः छिंधिभिंधिपिबखादपरस्वमपहरेत्येवंशीलाःक्रूरकर्माणोभवंतीत्यर्थः ॥ १२ ॥ तथा येमहात्मानःअक्षुद्रचित्ताः तुपूर्वेभ्योऽत्यंतविलक्षणाःमांभजंति यतोदैवींप्रकृतिंसत्वप्रधानांआश्रिताः अनन्यमनसःएकाग्रचेतसः किंगतानुगतिकतयादंभेनवाभजंतिनकिंतर्हिमांभूतादिंसर्वभूतकारणंअव्ययंज्ञात्वामत्वाभजंति ॥ १३ ॥

भजनस्वरूपमाह सततमिति यतंतः इंद्रियोपसंहारशमदमादिषुप्रयतमानाःदृढान्यहिंसादीनिव्रतानियेषांतेदृढव्रताःनमस्यंतश्चमांलब्धयेशश्वंप्रतिमादिरूपंवाभक्त्यानित्ययुक्ताःनित्यमवहिताःसंतउपासते॥१४ ज्ञानयज्ञेननिर्विकल्पसमाधिनापातंजलाः एकत्वेनअहमेवभगवान्वासुदेवइत्यभेदेनौपनिषदाः पृथक्त्वेनअयमीश्वरोममस्वामीतिबुद्धयाप्राकृताः अन्येपुनर्बहुधाबहुप्रकारंविश्वतोमुखंसर्वैर्द्वारैर्यौकिंचिद्दृष्टंतद्भगवत्स्वरूपमेवयच्छ्रुतंतन्मामैव यद्दत्तंभुक्तंवातत्तदर्पितमेवेत्येवंविश्वतोमुखंयथास्यात्तथामांउपासते ॥ १५ ॥ इदमेवोपासनंविदणोति अहमिति क्रतुःसंकल्पोदेवताध्यानरूपः यज्ञःश्रौतःस्मार्त्तश्चदेवतोद्देशेनद्रव्यत्यागः स्वधापितृणामन्नं औषधंमनुष्याणामन्नं मंत्रोयेनहीयतेसः आज्यंहविः अग्निः हुतंप्रक्षेपक्रिया इदंसर्वंयस्मादहमेवातस्तेषांविश्वतोमुखमुपासनंयुक्ततरमित्यर्थः ॥ १६ ॥ धातेकर्म फलानांविकर्ता वेद्यंवेदितव्यंब्रह्म पवित्रंपावनंतपआदिकं ॥१७॥ गतिर्भुक्तप्राप्यंस्थानं भर्तेकर्मफलदानेनपोषकः प्रभुःअंतर्यामी साक्षीकृताकृतावेक्षकः निवसंत्यस्मिन्निति निवासआश्रयोयजमानादिः

सततंकीर्त्तयंतोमांयतंतश्चदृढव्रताः॥ नमस्यंतश्चमांभक्त्यानित्ययुक्ताउपासते ॥ १४ ॥ ज्ञानयज्ञेनचाप्यन्येयजंतोमामुपासते ॥ एकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखम्॥ १५॥ अहंक्रतुरहंयज्ञःस्वधाहमहमौषधम्॥मंत्रोहमहमेवाज्यमहमग्निरहंहुतम्॥१६॥पिताहमस्यजगतोमाताधातापितामहः॥वेद्यंपवित्रमोंकारऋक्सामयजुरेवच॥ १७॥गतिर्भर्त्ताप्रभुःसाक्षीनिवासःशरणंसुहृत् ॥ प्रभवःप्रलयःस्थाननिधानंबीजमव्ययम्॥ १८॥ तपाम्यहमहंवर्षंनिगृह्णाम्युत्सृजामिच ॥ अमृतंचैवमृत्युश्चसदसच्चाहमर्जुन ॥ १९ ॥ त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयंते ॥ तेपुण्यमासाद्यसुरेंद्रलोकमश्नंतिदिव्यान्दिवि देवभोगान् ॥ २० ॥ तेतंभुक्त्वास्वर्गलोकंविशालंक्षीणेपुण्येमर्त्यलोकंविशंति॥ एवंत्रयीधर्ममनुप्रपन्नागतागतंकामकामालभंते ॥ २१ ॥

शरणंरक्षकः सुहृदुपकारमनपेक्ष्यउपकर्त्ता प्रभवउत्पत्तिस्थानं प्रलयोलयस्थानं स्थानंस्थितिस्थानं निधानंकर्मफलसमर्पणस्थानंकालांतरेफलप्रसवार्थं बीजंप्ररोहकारणंप्ररोहधर्मिणां अव्ययंयावत्संसारंभावित्वात् ॥ १८ ॥ अहंतपामि आदित्योभूत्वाअहंवर्षंदृष्टिःतांनिगृह्णामि अष्टसुमासेषुकैश्चिद्दृष्टिमिः उत्सृजामिचचतुर्षुमासेषुकैश्चिदिति अमृतंजीवनं मृत्युर्मरणं अमृतंदेवान्वंवा सत्साधु असत् असाधु एतत्सर्वमहमेव अतस्तेषांविश्वतोमुखंममभजनंकुर्वतांसर्वरूपेणाहमनुग्रहंकरोमीतिभावः ॥ १९ ॥ येपुनरुक्तेषुप्रकारेष्वन्यतमेनापिमांनभजंतेतेकेवलकर्मठाःकांगर्तिंप्रामुवंतीतिश्रुणु त्रैविद्याइतितिस्रःऋग्यजुःसामरूपाःविद्यायेषांतेत्रिविद्याः तएवत्रैविद्याः सोमपाःसोमपायिनोयाज्ञिकाः यज्ञैर्मामिष्ट्वास्वर्गतिंफलंप्रार्थयंते दिव्यान्अप्राकृतान्संकल्पमात्रोपनतान्दुःखासंभिन्नान् ॥ २० ॥ त्रयीवेदत्रयीतस्यामुक्तंधर्मंत्रयीधर्मंकाम्ययज्ञं कामकामाःविषयकामुकाःगतागतंयातायातंसातत्येनलभंते तथाचश्रुतिः प्लवाह्येतेअदृढायज्ञारूपाअष्टादशोक्तमवरंयेषुकर्म एतच्छ्रेयोयेभिनंदंतिमूढाजरामृत्युंतेपुनरेवापियंतीति अष्टादशषोडशर्त्विजःयजमानःपत्नीचेतिद्वौ ॥ २१ ॥ ॥६५॥

एवंकर्मिणामादित्तिफलंचोक्त्वाभक्तानामपिमद्भजनेनैवसर्वसिद्धिरित्याह अनन्याइति नास्तिअन्यउपास्योयेषांअहमेवभगवान्वासुदेवइतिअभेदेनचिंतयंतइत्यर्थः येजनाःपर्युपासतेपरितःसाकल्येनकात्स्न्येनद्वैतदृष्ट्येत्यर्थः उपासते तेषांनित्याभियुक्तानांसततानिशंयोगिनांयोगःअप्राप्तस्यान्वादेर्योगभूमिकायावाप्रापणं क्षेमःतस्यैवप्राप्तस्यसंरक्षणंतद्वयंअहमेववहामिनिर्वहामि तैरन्यार्थंवायोगभूमिपूर्ध्वोर्ध्वभूमिलाभार्थंवाचिंतानकर्त्तव्येत्यर्थः अनन्यचेतसांतेषांमदभिन्नत्वात्सर्वैसेत्यतीत्यर्थः तथाचोक्तं ज्ञानीत्वात्मैवमेमतमिति ॥ २२॥ अविधिपूर्वकंविधिरभेदबुद्धिस्तद्व्याहित्यादविधिपूर्वकत्वंतदीयभजनस्य ॥ २३ ॥ हियतःसर्वयज्ञानामहमेवसर्वदेवतारूपेणभोक्ताप्रभुःफलदाताच एवंसतितेमांप्रत्यगभिन्नंतत्त्वेनयायातथ्येननजानंतिअतश्च्यवंतिज्ञाननिष्ठामलब्ध्वासंसारगर्तेपतंति ॥ २४ ॥ सर्वेभक्तायथाभजनंग्रामुवंतित्वाराध्यसांनिध्यमित्याह यांतीति भूतार्थमिज्यायेषांतेभूतेज्याः ॥ २५ ॥ मद्भक्तिरतिस्तुकरादेवतांतरभक्तिस्तुबहुवित्तव्ययायाससाध्येत्याशयेनाह पत्रमिति भक्तिरेवकेवलंममायकायथाभजनंग्रामुवंतित्वाराध्यसांनिध्यमित्याह यांतीति भूतार्थमिज्यायेषांतेभूतेज्याः ॥ २५ ॥ मद्भक्तिरतिस्तुकरादेवतांतरभक्तिस्तुबहुवित्तव्ययायाससाध्येत्याशयेनाह पत्रमिति भक्तिरेवकेवलंममाय

अनन्याश्चिंतयंतोमांयेजनाःपर्युपासते ॥ तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहम् ॥ २२ ॥ येप्यन्यदेवताभक्तायजंतेश्रद्धयान्विताः ॥ तेपिमामेवकौंतेययजंत्यविधिपूर्वकम् ॥ २३ ॥ अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच ॥ नतुमामभिजानंतित्त्वेनातश्च्यवंतिते ॥ २४ ॥ यांतिदेवव्रतादेवान्पितॄन्यांतिपितृव्रताः ॥ भूतानियांतिभूतेज्यायांतिमद्याजिनोपिमाम् ॥ २५ ॥ पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति ॥ तदहंभक्त्युपहृतमश्नामि प्रयतात्मनः॥ २६ ॥ यत्करोषियदश्नासियज्जुहोषिददासियत् ॥ यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणम् ॥ २७ ॥ शुभाशुभफलैरेवंमोक्ष्यसेकर्मबंधनैः॥ संन्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसि॥ २८॥ समोहंसर्वभूतेषुनमेद्वेष्योस्तिनप्रियः॥ येभजंतितुमांभक्त्यामयितेतेषुचाप्यहम्॥ २९॥ अपिचेत्सुदुराचारोभजतेमामनन्यभाक्॥ साधुरेवसमंतव्यःसम्यग्व्यवसितोहिसः॥ ३० ॥

पेक्षितानान्यदितिभावः भक्त्युपहृतंभक्त्यासमर्पितं॥ २६ ॥ अतःसर्वमदर्पणंकुर्वित्याह यदिति यत्करोषिगमनादिकंतद्भगवतएवप्रदक्षिणादिकंकरोमीतिमत्वीत्यर्थमेवतदर्पणंकुर्वितिं एवंवचनादिष्वपिनामकीर्तनादिदृष्ट्याऊह्यं ॥ २७ ॥ एवंकुर्वतःफलमाह शुभाशुभेति शुभाशुभफलैःइष्टानिष्टफलैःकर्मरूपैर्बंधनैः एवंकुर्वन्त्वंमोक्ष्यसेभगवदर्पणबुद्धायत्किंचित्कर्मकुर्वतःकर्मलेपोनास्तीत्यर्थः अयमेवोक्तलक्षणःकर्मफलसंन्यासरूपोमार्गस्तद्युक्तात्मासमाहितचित्तःसन्विमुक्तःकर्मबंधनैर्विमुक्तःसन्मांसर्वैर्धांप्रत्यगात्मानंउपैष्यसि ॥ २८ ॥ यतोभक्तानेवानुगृह्णातिनेतरानित्यतोरागद्वेषवान्भगवानित्यत आह समोहमिति यथाग्निःरागादिशून्योपिसमीपस्थानामेवशीतंनार्शयतिनदूरस्थानांतद्वत्सर्वत्रसमोप्यहंशरणागतानामेवबंधनाशयामिनान्येषामित्यर्थः अतोममनरागद्वेषावितिभावः मयितेतेषुचाप्यहंभक्ताअनन्यशरणतयाममध्येववर्त्तंतेअहमपितेष्वेववर्त्ते अभक्तचित्तानांरागाद्याकांतत्वेननत्वममविशेषतोभिव्यक्तिर्नास्तीतिभावः ॥ २९॥ भक्तेर्माहात्म्यमाह अपिचेदिति अत्यंतपापिष्ठोपिमांयद्यनन्यचेताःसन्भजतेतथापिससाधुरेवमंतव्यः हियतःससम्यग्व्यवसितःसम्यग्दृत्तः ॥ ३० ॥

सम्यग्व्यवसितत्वादेवक्षिप्रंशीघ्रंधर्मात्माभवति शांतिंचशश्वत्निगच्छतिप्राप्नोति हेकौंतेयत्वमेवमदाज्ञयाप्रतिजानीहिप्रतिज्ञांकुरुमेमर्गभगवनोहरेर्भक्तोननश्यतीति ॥ ३१ ॥ किंच हेपार्थंहिप्रसिद्धंभाव्यपाश्रित्यआश्रित्यत्येत्यंतंपापयोनयःस्त्र्यादयस्तेपिपरांगतिंयांति ॥ ३२ ॥ ब्राह्मणादयःपुनःपुण्याःमदाश्रयेणपरांगतिंयांतीत्यत्रकिंचित्रं अतस्त्वंइमंमर्त्यलोकंअनित्यंनश्वरंअसुखंसुखलेशहीनंप्राप्यमांपरमात्मानंभजस्व लोकांतरेभजनंनभविष्यतीत्यर्थः तथाचश्रुतिः इहचेदवेदीदथसत्यमस्तिनचेदवेदीन्महतीविनष्टिरिति ॥ ३३ ॥ भजनप्रकारंदर्शयति मन्मनाइति मय्येवमनोयस्यतपुत्रादौसमन्मनाः ममैवभक्तोनराजादेर्धनाद्यर्थंसमद्भक्तः मद्याजीमदर्थमेवयजनेनस्वर्गाद्यर्थंसमद्याजीतादृशोभव मामेवनमस्कुरुशरणंव्रजनत्वन्यान् एवमनेनप्रकारेणयुक्त्वायोगंकृत्वामामेवात्मानंसर्वांतरंएष्यसिप्राप्स्यसि अभेदेनघटाकाशइवमहाकाशं यतोमत्परायणःअहमेवसर्वोपाधिशून्यश्चिदात्मापरंसर्वोत्कृष्टंअयनंप्राप्यंयस्यसमत्परायणः तथाचश्रूयते यथानद्यःस्यंदमानाःसमुद्रेस्तंगच्छंतिनामरूपेविहाय तथाविद्वान्ना

क्षिप्रंभवतिधर्मात्माशश्वच्छांतिंनिगच्छति ॥ कौंतेयप्रतिजानीहिन्मेभक्तःप्रणश्यति ॥ ३१ ॥ मांहिपार्थव्यपाश्रित्ययेपिस्युःपापयोनयः ॥ स्त्रियोवैश्यास्तथा शूद्रास्तेपियांतिपरांगतिम् ॥ ३२ ॥ किंपुनर्ब्राह्मणाःपुण्याभक्ताराजर्षयस्तथा ॥ अनित्यमसुखंलोकमिमंप्राप्यभजस्वमाम् ॥ ३३ ॥ मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु ॥ मामेवैष्यसियुक्त्वैवमात्मानंमत्परायणः ॥ ३४ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिश्रीमद्भगवद्गीतासू० राजविद्याराजगुह्ययोगोनामनवमोऽध्यायः ॥ ९ ॥ पर्वणितुत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ भूयएवमहाबाहोशृणुमेपरमंवचः ॥ यत्तेहंप्रीयमाणायवक्ष्यामिहितकाम्यया ॥ १ ॥ नमेविदुःसुरगणाःप्रभवंनमहर्षयः ॥ अहमादिर्हिदेवानांमहर्षीणांचसर्वशः ॥ २ ॥

मरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यमिति ॥ ३४ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेगी० नवमोऽध्यायः ॥ ९ ॥ प० ३३ ॥ ॥ ७ ॥ ॥ समभेत्वंपदवाच्योर्थोनिरूपितःतदुपासनाच्चक्रममुक्तिरित्यष्टमेप्रोक्तंनवमेतत्पदलक्ष्यार्थउक्तस्तत्प्राप्तयेचविश्वतोमुखंसर्वत्रभगवद्भावभावनात्मकंभगवद्भजनमुक्तं तद्रागद्वेषकलुषितमनसामशक्यमितिमन्वानोभगवांस्तत्सिद्धयेस्वविभूतीःकेषुचिदेवपदार्थेषुभगवद्बुद्धिविधानार्थस्तावद्दर्शयतिदशमे तत्फलभूतंविश्वतोमुखस्योपासनंतेनचविश्वरूपदर्शनमेकादशे द्वादशेपुनस्तत्पदलक्ष्यस्याव्यक्तस्योपासनंतदुपासकलक्षणानिचोक्त्वाउपासनाकांडंतत्पदार्थशोधनार्थंसमापयिष्यतितत्रवात्सल्यात्स्वयमेवश्रीभगवानुवाच भूयएवेति हेमहाबाहोभूयःप्रागुक्तमपिपुनर्मेपरमंनिरतिशयवस्तुनःप्रकाशकंवचःशृणु प्रीयमाणायअमृतपानादिवन्मद्वचनात्प्रीतिमनुभवतेवक्ष्यामि हितकाम्ययातवहितेच्छया ॥ १ ॥ दुर्ज्ञेयत्वाच्चमत्स्वरूपस्याहंत्वांब्रवीमीत्याह नमेइति प्रभवंप्रकृष्टंभवंऐश्वर्यंवियदादिसृष्टिसामर्थ्यंनविदुः तत्रहेतुः अहमिति अयंभावः देहोत्पत्त्यनंतरंहिदेवादीनां बुद्ध्यादिलाभोनचार्वाचीनैर्बुद्ध्यादिभिःस्त्रोत्पत्तिप्राक्कालीनोर्थःपरिच्छेत्तुंशक्यतइति पदार्थःस्पष्टः ॥ २ ॥

॥ ६६ ॥

कस्तार्हित्वांवेत्तीत्यताह यइति यःअसंमूढःसमांवेत्तिसएववसर्वपापैःप्रमुच्यतइतिसंबंधः जडाजडयोर्बुद्ध्यात्मनोरेकीभावेनान्योन्याध्यासलक्षणेनमूढःसंमूढस्तद्विपरीतोऽसंमूढस्तत्त्वज्ञानेनबाधिताध्यासः सएवात्मवित्त्वादितरस्यजनिमनुभवन्मांप्रत्यगात्मानंलोकमहेश्वरमनादिआदिःकारणंतच्छून्यमतएवाजमजातंवेत्तिससर्वैःकृतैःक्रियमाणैर्वापापैःप्रमुच्यते मर्त्येषुमध्ये ॥ ३ ॥ ममहेश्वरत्वादेवमत्तोबुद्ध्यादयोभवंतीत्याह बुद्धिरिति बुद्धिःअंतःकरणस्यसूक्ष्मार्थावबोधनेसामर्थ्यं ज्ञानंआत्मानात्मादिपदार्थावबोधः असंमोहःप्रत्युत्पन्नेषुबोद्धव्येष्वव्याकुलतयाविवेकपूर्विकाप्रतिपत्तिः क्षमाआक्रुष्टस्यताडितस्यवाअविकृतचित्तता सत्यंप्रमाणेनावगतस्यार्थस्ययथार्थत्वेनभाषणं दमोबाह्येंद्रियनियमः शमोमनोनिग्रहः सुखमाह्लादः दुःखंतापः भवउत्पत्तिः भावःसत्ता अभावस्तद्विपर्ययः भयंत्रासः अभयमेवचतद्विपरीतं ॥ ४ ॥ अहिंसाप्राणिनामपीडा समतामित्रामित्रादौसमचित्तता तुष्टिःसंतोषोलब्धेपर्याप्तबुद्धिः तपइंद्रियसंयमपूर्वकंशरीरपीडनं दानंयथाशक्तिसंविभागः यशोधर्मनिमित्ताकीर्त्तिः अयशोऽधर्मनिमित्ताअकीर्त्तिः एतेबुद्ध्यादयोविंशतिभावाभक्तएवप्राणिनांभवंति पृथग्विधाःप्रत्येकंनानाप्रकाराः ततउत्तमगुणलाभायाहमेवत्वयाशरणीकरणीयइतिभावः ॥ ५ ॥ एतदेवशिष्टाचारप्रदर्शने

योमामजमनादिंचवेत्तिलोकमहेश्वरम् ॥ असंमूढःसमर्त्येषुसर्वपापैःप्रमुच्यते ॥ ३ ॥ बुद्धिर्ज्ञानमसंमोहःक्षमासत्यंदमःशमः ॥ सुखंदुःखंभवोभावोभयंचाभयमेवच ॥ ४ ॥ अहिंसासमतातुष्टिस्तपोदानंयशोऽयशः ॥ भवंतिभावाभूतानांमत्तएवपृथग्विधाः ॥ ५ ॥ महर्षयःसप्तपूर्वेचत्वारोमनवस्तथा ॥ मद्भावामानसाजातायेषांलोकइमाःप्रजाः ॥ ६ ॥ एतांविभूतिंयोगंचममयोवेत्तितत्त्वतः ॥ सोऽविकंपेनयोगेनयुज्यतेनात्रसंशयः ॥ ७ ॥ अहंसर्वस्यप्रभवोमत्तःसर्वं प्रवर्त्तते ॥ इतिमत्वाभजंतेमांबुधाभावसमन्विताः ॥ ८ ॥

नद्वयति महर्षयइति सप्तभृग्वाद्याश्चत्वारःसनकादयश्चपूर्वेप्रसिद्धामहर्षयइतिसंबंधः तथामनवश्चतुर्दशप्रसिद्धाः तेसर्वेमानसाहिरण्यगर्भरूपस्यममसएवोद्भूताअयोनिजाजाताउत्पन्नाः इमाःप्रजाश्चतुर्विधाअयंलोकश्चतदाधारभूतःतदुभयंयेषांयत्संबंधिसंततिर्येषांसंततिरित्यर्थः यद्वा येषामितिषष्ठीपंचम्यर्थे येभ्यइमाःप्रजाअयंलोकश्चजाताइत्यर्थः तेपिमद्भावामय्येवभावोमनोयेषांते प्रसिद्धमहिमानोप्येतेयतोमामेवोपासतेऽतस्त्वमपिमामुपास्वेतिभावः ॥ ६ ॥ उपास्तावधिकारिणमाह एतांमिति एतांवक्ष्यमाणांविभूतिंयोगंचविश्वतोमुखेभगवतिमनःसमाधानेयस्तत्त्वतोवेत्तिसम्यगनुष्ठातुंज्ञातुंचसमर्थोभवतिसोऽविकंपेनाचलेननिर्विकल्पकेनषष्ठाध्यायोक्तेनयोगेनमद्विषयेणसमाधिनायुज्यतेतदभ्रकृतकृत्योभवति नात्रसंशयइतिप्रत्यतिशयार्थंमुच्यते भगवद्वचसिसंशयासंभवात् ॥ ७ ॥ उपासनास्वरूपमाहद्वाभ्यां अहमिति बुधामांप्रत्यगात्मानमितिमत्वाभजंते इतिकथं अहमेवसर्वस्यजगतःप्रभवउत्पत्तिः मत्तोमदनुपहृंभाप्यैवसर्वंबुद्ध्यादिकंस्वस्वकार्यायप्रवर्त्तते अहमेवजगतःकर्त्तातर्यामी चेत्यहंयहेणात्मानमुपासीतेतिभावः भावसमन्विताःभावनायुक्ताः एतच्चोत्तरार्थं ॥ ८ ॥

एकमक्षरंओंकाराख्यं जपयज्ञोऽहिंसाशून्यत्वात् स्थावराणांस्थितिमतां ॥ २५ ॥ २६ ॥ अमृतोद्भवंअमृतमथनावसरेउद्भवोयस्यतं॥ २७ ॥ प्रजनोऽपत्यजनयिताकंदर्पःकामःनतुदृश्यामैथुनरूपः ॥ २८ ॥ नागानांसर्पाणांतरुभेदानां यादसांजलचराणां संयमतांनियमनकर्तृणां ॥ २९ ॥ कलयतांगणनंकुर्वतां ॥ ३० ॥ पवतांपावयितॄणांवेगवतांवा रामोदाशरथिः रामादीनांपरमेश्वराणामपिविभूतिमध्येगण नंध्यानार्थं झषाणांमत्स्यादीनां मकरोजातिभेदः स्रोतसांनदीनां ॥ ३१ ॥ सर्गाणांभौतिकानांभूतानामादिरंतइतिप्रागेवोक्तत्वात् विद्यानांचतुर्दशसंख्यानांमध्येअध्यात्मविद्याबंधच्छेदहेतुत्वात् प्रवदतां प्रवक्तृद्वारेणवदनभेदाएववादजल्पवितंडाइहगृह्यंते तेषांमध्येवादस्तत्त्वनिर्णयार्थत्वादहं ॥ ३२॥ अक्षराणांमध्येअकारः अकारोवैसर्ववाग्गितिश्रुतेः सामासिकस्यसमासस्यसमुदायस्यमध्येऽहंद्वंद्वोस्मि उ

महर्षीणांभृगुरहंगिरामस्म्येकमक्षरम्॥ यज्ञानांजपयज्ञोस्मिस्थावराणांहिमालयः ॥ २५॥ अश्वत्थःसर्ववृक्षाणांदिवर्षीणांचनारदः॥ गंधर्वाणांचित्ररथःसिद्धानांकपिलोमुनिः॥ २६॥ उच्चैःश्रवसमश्वानांविद्धिमाममृतोद्भवम्॥ ऐरावतंगजेंद्राणांनराणांचनराधिपम्॥ २७॥ आयुधानामहंवज्रंधेनूनामस्मिकामधुक्॥ प्रजनश्चास्मिकंदर्पःसर्पाणामस्मिवासुकिः॥ २८॥ अनंतश्चास्मिनागानांवरुणोयादसामहम्॥ पितॄणामर्यमाचास्मियमःसंयमतामहम्॥ २९॥ प्रह्लादश्चास्मिदैत्यानांकालःकलयतामहम्॥ मृगाणांचमृगेंद्रोहंवैनतेयश्चपक्षिणाम्॥३०॥ पवनःपवतामस्मिरामःशस्त्रभृतामहम्॥ झषाणांमकरश्चास्मिस्रोतसामस्मिजाह्नवी॥३१॥ सर्गाणामादिरंतश्चमध्यंचैवाहमर्जुन॥ अध्यात्मविद्याविद्यानांवादःप्रवदतामहम्॥३२॥ अक्षराणामकारोस्मिद्वंद्वःसामासिकस्यच॥ अहमेवाक्षयःकालोधाताहंविश्वतोमुखः ॥ ३३ ॥ मृत्युःसर्वहरश्चाहमुद्भवश्चभविष्यताम्॥ कीर्त्तिःश्रीर्वाक्चनारीणांस्मृतिर्मेधाधृतिःक्षमा॥ ३४॥

भयपदार्थप्रधानत्वादितिप्राञ्चः समंएकत्रासनंसमासोविद्युषांवागुरुशिष्याणांवामंत्रार्थकथनार्थंवाएकत्रावस्थानंतत्रविदितमर्थजातंसामासिकं चातुरर्थिकष्ठक् ठस्येकइतीकादेशः यस्येतिचेत्यलोपः तस्यमध्येद्वंद्वोरहस्योर्थोहं द्वंद्वरहस्येतिसूत्रेद्वंद्वशब्दस्यरहस्यवाचित्वंशाब्दिकप्रसिद्धं अक्षयःक्षयहीनः कालःक्षणादिःपरोवाईश्वरः कालस्यापिकालोस्मि धाताकर्मफलप्रदः विश्वतोमुखः सर्वप्राणितृप्यातृप्यामीत्यर्थः ॥ ३३ ॥ सर्वहरःप्रलयकालिकोमृत्युरस्मि भविष्यतांभाविकल्याणानामुद्भवऐश्वर्योत्कर्षोहं कीर्त्यादिसप्तकमप्यहं यासांसंश्रयमात्रेणमनुष्येषुकृतार्थताबुद्धिर्भवति ॥ ३४ ॥

बृहत्सामतथासाम्नांगायत्रीछंदसामहम् ॥ मासानांमार्गशीर्षोहंऋतूनांकुसुमाकरः॥३५॥ द्यूतंछलयतामस्मितेजस्तेजस्विनामहम्॥ जयोस्मिव्यवसायोस्मिसत्त्वंसत्ववतामहम्॥ ३६॥ वृष्णीनांवासुदेवोस्मिपांडवानांधनंजयः॥ मुनीनामप्यहंव्यासःकवीनामुशनाकविः॥ ३७॥ दंडोदमयतामस्मिनीतिरस्मिजिगीषताम्॥ मौनंचैवास्मिगुह्यानांज्ञानंज्ञानवतामहम्॥ ३८ ॥ यच्चापिसर्वभूतानांबीजंतदहमर्जुन ॥ नतदस्तिविनायत्स्यान्मयाभूतंचराचरम्॥ ३९॥ नांतोस्ति ममदिव्यानांविभूतीनांपरंतप ॥ एषतूद्देशतःप्रोक्तोविभूतेर्विस्तरोमया ॥ ४० ॥ यद्यद्विभूतिमत्सत्त्वंश्रीमदूर्जितमेववा ॥ तत्तदेवावगच्छत्त्वंममतेजोंशसंभवम् ॥४१॥ अथवाबहुनैतेनकिंज्ञातेनतवार्जुन ॥ विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत् ॥ ४२॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीतासू० विभूतियोगोनामदशमोऽध्यायः॥१०॥ ॥पर्वणितुचतुस्त्रिंशोऽध्यायः॥३४॥ ॥ ७ ॥ ॥ अर्जुनउवाच ॥ मदनुग्रहायपरमंगुह्यमध्यात्मसंज्ञितम्॥ यत्त्वयोक्तंवचस्तेनमोहोयंविगतोमम ॥ १ ॥

तदुक्तंत्वंतुएतावदेवविद्धि एकांशेनएकदेशेनाहमिदंविष्टभ्यव्याप्यस्थितोस्मि पादोस्यविश्वाभूतानीतिश्रुतेः तस्मात्परिच्छिन्नंदर्शनंत्यक्त्वासर्वत्रब्रह्मबुद्धिमेवकुर्वित्याशयः ॥ ४२ ॥ इतिश्रीमत्पर्वणिनैलकंठीयेभारतभावदीपेदशमोऽध्यायः॥ १० ॥ ५०३४ ॥ ॥ ७ ॥ ॥ पूर्वस्मिन्नध्याययोगोविभूतिश्चव्याख्येयत्वेनप्रतिज्ञातौएतांविभूतिंयोगंचममयोवेत्तीति आत्मनोयोगंविभूतिंचजनार्दन भूयःकथयेतीतरेणचश्रोतव्यत्वेनप्रार्थितौ तत्राहमात्मागुडाकेशसर्वभूताशयस्थितइतिसंक्षेपेणयोगोऽभगवतःसर्वभूताधारत्वलक्षणउक्तःप्राग्विभूतिकथनात् तदेतेचविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदितिकूलेनधान्यमिवमयेदंजगद्विष्टब्धमित्युक्त्वासएवंस्मारितस्तदेवभगवतःसर्वभूताधारत्वंसाक्षात्कर्तुकामोर्जुनउवाच मदनुग्रहायेति मयिअनुग्रहोनुकंपातदर्थंमदनुग्रहाय परमंसत्यःशोकमोहनिवर्त्तकत्वेनोत्कृष्टंगुह्यंगोप्यं अध्यात्मसंज्ञितमात्मानात्मविवेकार्थंशास्त्रमध्यात्मंतत्संज्ञितं यत्त्वयावचःअशोच्यानन्वशोचइत्यादिनाषष्ठाध्यायपर्यंतंत्वंपदार्थशुद्धिप्रधानंनायंहंतिनहन्यतइत्यात्मनोऽकर्तृत्वाभोक्तृत्वप्रतिपादकंतेनममोहःअविवेकोयंविशेषेणगतोनष्टः अत्रप्रथमेपादेऽक्षराधिक्यमार्षं॥ १ ॥

भवेति तथासप्तमाध्यायमारभ्यदशमपर्यंतंत्वयाभूतानांभवाप्ययावप्युक्तौअहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्त्ततइति तावपिमयाविस्तरशस्त्वत्तःश्रुतौहेकमलपत्राक्ष अव्ययंमाहात्म्यमपिनचमांतानिकर्माणिलिंपंतीतिविषमसृष्टिकर्तुरपिवैषम्यनैर्घृण्यदोषोनास्तिजगत्कर्त्तुरपिविकारगंधोनास्तीत्येवमादिरूपतत्पदार्थशुद्धिप्रधानंश्रुतमित्यनुषंगः ॥ २॥ एवमिति यच्चत्वंविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदितिआत्मानंजगदाधारमात्मतदपिइत्थमेवनममाज्ञासंभावनास्ति हेपरमेश्वरतेतवरूपंऐश्वरमीश्वरस्येदंविश्वात्मकंमायाद्वयमित्यर्थः हेपुरुषोत्तमक्षराक्षरातीत विश्वरूपंमायामयंवास्तवंतुरूपंमायातीतमित्यैश्वरमितिपुरुषोत्तमेतिचपदाभ्यांलभ्यते तथाचवक्ष्यति मायाश्लेषामयासृष्टायन्मांपश्यसिनारद सर्वभूतगुणैर्युक्तंनैवंमांज्ञातुमर्हसीति उक्तंच शुद्धंरूपमभिप्रेत्यअव्यक्तोयमचिंत्योयमिति ॥ ३ ॥मन्यसइति हेयोगेश्वरयोगानांयोगिनामीश्वर तद्रूपंयदिमयाद्रष्टुंशक्यमितिमन्यसेयदिमन्यितद्दर्शनाधिकारंपश्यसितन्तर्हिमेभक्तस्यव्ययंमायामयमात्मानंदर्शय मायामयत्वादेवास्याव्ययत्वं मायायांहिसर्वंस

भवाप्ययौहिभूतानांश्रुतौविस्तरशोमया ॥ त्वत्तःकमलपत्राक्षमाहात्म्यमपिचाव्ययम् ॥ २ ॥ एवमेतद्यथात्थत्वमात्मानंपरमेश्वर ॥ द्रष्टुमिच्छामितेरूपमैश्वरंपुरुषोत्तम ॥ ३ ॥ मन्यसेयदितच्छक्यंमयाद्रष्टुमितिप्रभो ॥ योगेश्वरततोमेत्वंदर्शयात्मानमव्ययम् ॥ ४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ पश्यमेपार्थरूपाणिशतशोथसहस्रशः ॥ नानाविधानिदिव्यानिनानावर्णाकृतीनिच ॥ ५ ॥ पश्यादित्यान्वसून्रुद्रानश्विनौमरुतस्तथा ॥ बहून्यदृष्टपूर्वाणिपश्याश्चर्याणिभारत ॥ ६ ॥ इहैकस्थं जगत्कृत्स्नंपश्याद्यसचराचरम् ॥ ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥ नतुमांशक्यसेद्रष्टुमनेनैवस्वचक्षुषा ॥ दिव्यंददामितेचक्षुःपश्यमेयोगमैश्वरम् ॥ ८ ॥

र्वात्मकंसर्वदास्तीतिप्रसिद्धं यथोक्तंवसिष्ठेन वर्त्तमानमतीतंचभविष्यत्स्थूलमण्वपि तथादूरमदूरंचनिमेषःकल्पइत्यपि चिदात्मनिस्थितान्येवपश्यमायाविजृंभितमिति नहिमरुमरीचिसरसीक्रमशःशुष्यति अतोमायामयत्वादेवास्यैश्वरस्यरूपस्याप्यव्ययत्वं ॥ ४ ॥ एवंप्रार्थितःसन्भगवानुवाच पश्येति शतशइत्यादिनाअनंतानीत्युक्तं नानावर्णानिनानाकृतीनिच ॥ ५ ॥ दिव्यानितावदाह पश्यादित्यानिति अदृष्टपूर्वाण्याश्चर्याण्यद्भुतानिचतुर्मुखपंचमुखषण्मुखादीनि ॥ ६ ॥ हेगुडाकेशजितनिद्र इहममदेहेएकस्थमेकस्मिन्नेवावयवेनस्थापमात्रेस्थितंकृत्स्नंवर्त्तमानंजगत्पश्य यच्चान्यत्अतीतमनागतंविप्रकृष्टंव्यवहितंस्थूलंसूक्ष्मंवातत्सर्वमिहपश्य ॥ ७ ॥ यत्तूक्तंमन्यसेयदितच्छक्यंमयाद्रष्टुमितितत्राह नत्विति शक्यसेशक्तोषि पदविकरणव्यत्ययआर्षः अनेनप्राकृतेन दिव्यमप्राकृतं ऐश्वरमीश्वरसंबंधिनंयोगं विश्वाश्रयत्वलक्षणंसामर्थ्यं ॥ ८ ॥ ॥६९॥

एवमुक्त्वाभगवानर्जुनायदिव्यंरूपंदर्शितवान्सचदृष्ट्वाविस्मयाविष्टोभगवंतंविज्ञापितवानितीमंदत्तांतमेवमुक्त्वेत्यादिषड्भिःश्लोकैर्धृतराष्ट्रंप्रतिसंजयउवाच एवमुक्त्वेत्यादि ततःदिव्यचक्षुःप्रदानानंतरं राजन्हेधृतराष्ट्रमहांश्वासौयोगेश्वरश्चेतिविग्रहः महतोयोगस्यवाईश्वरः परमंदिव्यंरूपं ऐश्वरंमायाविसंबंधिनुमायातीतं दर्शयामास ॥ ९ ॥ तदेवरूपंविशिनष्टिद्वाभ्यां अनेकेत्यादिना अनेकान्यनंतानिवक्राणिनयनानिचयस्मिन्तदनेकवक्त्रनयनं अनेकान्यद्भुतानिदर्शनानियस्मिंस्तदनेकाद्भुतदर्शनं अनेकानिदिव्यान्याभरणानियस्मिन् दिव्यान्यनेकानिचउद्यतानिआयुधानिचकादीनियस्मिन् ॥ १० ॥ विश्वतोमुखमिति पूर्वोक्तस्यएकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखमित्यस्यार्थपरामर्शः अनंतंसर्वतःपरिच्छेदरहितं ॥ ११ ॥ दिविअंतरिक्षे भाःदीप्तिः भासःदीप्तेः अभूतोपमेयं निरुपमतामेवतस्यदीप्तेर्दर्शयति उभौयदिव्योस्थिपृथक्प्रवाहात्वित्यादिवत् ॥ १२ ॥ इहैकस्थंजगत्कृत्स्नंपश्येतियत्याकूभगवताउक्तंतदप्यपश्यदित्याह तत्रेति अनेकधाप्रविभक्तमित्येतत्वर्षासुस्थितितिंतिणीवीजेसूक्ष्मरूपेणतरुर्दृश्य

संजयउवाच ॥ ॥एवमुक्त्वाततोराजन्महायोगेश्वरोहरिः ॥ दर्शयामासपार्थायपरमंरूपमैश्वरम् ॥ ९ ॥ अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ॥ अनेकदिव्याभरणंदिव्यानेकोद्यतायुधम् ॥ १० ॥ दिव्यमाल्यांबरधरंदिव्यगंधानुलेपनम् ॥ सर्वाश्चर्यमयंदेवमनंतंविश्वतोमुखम् ॥ ११ ॥ दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता ॥ यदिभाःसदृशीसास्याद्भासस्तस्यमहात्मनः ॥ १२ ॥ तत्रैकस्थंजगत्कृत्स्नंप्रविभक्तमनेकधा ॥ अपश्यद्देवदेवस्यशरीरे पांडवस्तदा ॥ १३ ॥ ततःसविस्मयाविष्टोहृष्टरोमाधनंजयः ॥ प्रणम्यशिरसादेवंकृतांजलिरभाषत ॥ १४ ॥ ॥ अर्जुनउवाच ॥ ॥पश्यामिदेवांस्तव देवदेहेसर्वांस्तथाभूतविशेषसंघान् ॥ ब्रह्माणमीशंकमलासनस्थमृषींश्चसर्वानुरगांश्चदिव्यान् ॥ १५ ॥

तेनद्वन्माभूदितिदर्शयितुंसावकाशं अनेकधाविन्नागयुक्तंविविक्तंअपश्यत् एकस्थंएकावयवस्थं अयमर्थः यदाभगवतश्चतुर्भुजंरूपंचिंत्यतेतत्रचचेतसिलब्धपदेसतिक्रमशस्तदीयावयवांस्त्यक्त्वामुखेस्मिते वापदनखेवाचित्तंध्रियते तत्रापिलब्धपदेतस्मिंस्तदपित्यक्त्वाविश्वरूपमारोहति दिव्यंचक्षुरपिएवंसूक्ष्मतामापादितंमनएव मनोस्यदैवंचक्षुःसएतेनदैवेनचक्षुषामनसैतान्कामान्पश्यन्रमतइतिश्रुतेः कामान् विषयान् एतान्हार्दाकाशाख्यसगुणब्रह्मगतानितिश्रुतिपदयोरर्थः यथोक्तंश्रीभागवते तत्रलब्धपदंचित्तमाकृष्यैकत्रधारयेत् नान्यानिचिंतयेद्भूयःसुस्मितंभावयेन्मुखं तत्रलब्धपदंचित्तमाकृष्यव्योम्निधारयेत् तच्चत्यक्त्वामदारोहोनकिंचिदपिचिंतयेदिति तत्रमूर्त्तौ एकत्रअंगे व्योम्निकारणे मदारोहोनिर्विकल्पेब्रह्मण्यारूढः तदिदमुक्तं देवदेवस्यशरीरेकृत्स्नंजगदेकस्थंपांडवोपश्यदिति ॥ १३ ॥ हृष्टरोमारोमांचितगात्रः ॥ १४ ॥ देवानादित्यादीन् भूतविशेषाश्चतुर्विधाजरायुजादयस्तेषांसंघान्समूहान् ब्रह्माणंचतुर्मुखं ईशंईशितारं कमलासनस्थमित्यनेनदूरदर्शनमुक्तं उरगान्पातालस्थानानंतादीन् दिव्यान् कैलासादौस्थितान्वासुकिप्रमुखान् एतेनव्यवहितदर्शनमुक्तं ॥ १५ ॥

अनेकेअनंताःबाहवःउदराणिवक्त्राणिनेत्राणिचयस्मिंस्तदनेकबाहूदरवक्त्रनेत्रं सर्वतश्चतुर्दिक्षुउपर्यधश्चअनंतमपरिच्छिन्नंरूपमस्यतं अनंतत्वमेवाह नांतमिति दीर्घरज्वाद्यवतवाद्यंतौदैशिकौनस्तइत्यर्थः ॥ १६॥ किरीटगदाचक्रधारिणं दीप्तिमत्त्वादेवदुर्निरीक्ष्यंद्रष्टुमशक्यं समंतात्सर्वतोयेदीप्ताअनलाअर्काश्चतद्वत्द्युतिर्यस्यतंसमंताद्दीप्तानलार्कद्युतिमित्येकंपदं अतएवाप्रमेयंद्रष्टुमशक्यपरिच्छेदं ॥ १७ ॥ एवंतवयोगैश्वर्यदर्शनात्त्वामेवमवैमीतिवदन्नप्रमेयत्वमेवविवृणोति त्वमिति परममक्षरमस्थूलादिलक्षणं अक्षरब्रह्मपरममित्यत्रप्रागुक्तंनिष्कलंब्रह्मतदेवत्वमसि एतेनसगुणरूपस्यनिर्गुणज्ञापकत्वमुक्तं शाखाप्रस्थेवचंद्रज्ञापकत्वं अतएववेदितव्यंवेदांतप्रमाणेनज्ञातुंयोग्यंननूपासनीयं सगुणंब्रह्मापित्वमेवेत्याह त्वमस्येति निधानंलयस्थानं एतेनकारणत्वमुक्तं अव्ययःअमृतः देवत्वात् शाश्वतस्यवैदिकस्य धर्मस्यगोप्तेत्यनेनकार्यब्रह्मभूतहिरण्यगर्भरूपत्वमुक्तं सनातनश्चिरंतनोनादिपुरुषोजीवात्मासोपित्वमेवममतः एवंविश्वरूपदर्शनेजीवब्रह्म ऐक्यंशाखयाचंद्रइवाधिगम्यतइत्युक्तं॥१८॥एतदेवाह अना

अनेकबाहूदरवक्त्रनेत्रंपश्यामित्वांसर्वतोनंतरूपम्॥ नांतंनमध्यंनपुनस्तवादिंपश्यामिविश्वेश्वरविश्वरूपम्॥ १६॥ किरीटिनंगदिनंचक्रिणंचतेजोराशिंसर्वतो दीप्तिमंतम्॥पश्यामित्वांदुर्निरीक्ष्यंसमंताद्दीप्तानलार्कद्युतिमप्रमेयम्॥१७॥त्वमक्षरंपरमंवेदितव्यंत्वमस्यविश्वस्यपरंनिधानम्॥त्वमव्ययःशाश्वतधर्मगोप्तास नातनस्त्वंपुरुषोमतोमे॥ १८॥अनादिमध्यांतमनंतवीर्यमनंतबाहुंशशिसूर्यनेत्रम्॥पश्यामित्वांदीप्तहुताशवक्त्रंस्वतेजसाविश्वमिदंतपंतम्॥१९॥द्यावापृथिव्योरिदमंतरंहिव्याप्तंत्वयैकेनदिशश्चसर्वाः॥ दृष्ट्वाद्भुतंरूपमुग्रंतवेदंलोकत्रयंप्रव्यथितंमहात्मन्॥ २०॥ अमीहित्वाऽसुरसंघाविशंतिकेचिद्भीताःप्रांजलयो गृणंति॥ स्वस्तीत्युक्त्वामहर्षिसिद्धसंघाःस्तुवंतित्वांस्तुतिभिःपुष्कलाभिः॥ २१॥ रुद्रादित्यावसवोयेचसाध्याविश्वेऽश्विनौमरुतश्चोष्मपाश्च॥ गंधर्वयक्षा सुरसिद्धसंघावीक्षंतेत्वांविस्मिताश्चैवसर्वे॥ २२॥

दीति देशतःकालतश्चादिमध्यांतहीनत्वादनादिमध्यांतं दीप्तोद्भुताशोवक्त्रंयस्येतिभास्वरदंतत्वंव्यज्यते स्वतेजसाचैतन्यज्योतिषाइदंविश्वंविश्वरूपंतपंतंप्रकाशयंतं अनादित्वादिसर्वविशेषणविशिष्टंविश्वं नपिकर्मीभूनंतापयंतंत्वांपरज्योतीरूपंपश्यामिजानामि चित्रपटस्थानीयंविश्वरूपंसकलकारकालकधीवासनोपेतंयेनज्योतिषाप्रकाशतेनदेवत्वमसीतिजानामीतिभावः॥ १९॥ एवंस्वयंकृतविश्वरूपद र्शनेनकृतकृत्योभूत्वातदुपसंहारमिच्छन्स्तौति द्यावापृथिव्योरिति हेमहात्मन्हिप्रत्यक्षंत्वयाएकेनइदंद्यावापृथिव्योरंतरंमध्यंसर्वाःदिशश्चव्याप्ताः अतस्तवेदंअद्भुतंउग्रंरूपंदृष्ट्वालोकत्रयंमकर्षेणव्यथितं अतःपरमिदमुपसंहरेत्यभिप्रायः॥ २०॥ व्यथामेवाह अमीति हियतःअमीत्वांअसुरसंघाःअसुरांशादुर्योधनादयःत्वांपतंगाःपावकमिवअदृष्टप्रेरिताःविशंतिमरणायेत्यर्थः केचिद्भीताःप्रांजलयोब द्धांजलयोगृणंतिस्तुवंति॥ २१॥ किंच येत्वदनुगृहीताःरुद्रादयस्तेपिविस्मिताःसंतःसर्वेत्वांवीक्षंतइत्याह रुद्रादित्याइति साध्याःविश्वेचदेवगणविशेषौरुद्रादित्यवज्ञेयौ ऊष्मपाःपितरः गंधर्वाणांयक्षा णामसुराणांसिद्धानांजातिभेदानांसंघाःसमूहाः शेषंस्पष्टं॥ २२॥ ॥ ७० ॥

पुनर्लोकानामात्मनश्चव्यथामाह रूपमिति महत्आदिमध्यांतहीनं हेमहाबाहो तेतवकरालंमहारूपंदृष्ट्वालोकाव्यथितास्तथाहंचव्यथितइतियोजना॥ २२॥ करालत्वप्रपंचेनस्वव्यथामेवाह नभ इति नभःस्पृशंव्योमव्यापिनं दीप्तमग्निवज्जाज्वल्यमानं व्यात्तानंविस्तारितमुखं दीप्तविशालनेत्रंरक्तनेत्रमित्यर्थः हिप्रत्यक्षंत्वांवृष्ट्वाप्रव्यथितांतरात्माप्रकर्षेणव्यथितचित्तोधृतिंधैर्यंनविंदामिनलभे शमंचशांतिंत्वास्थ्यंचनलभेहेविष्णोव्यापक भयानकंत्वदाकांतंदेशंत्यक्त्वान्यत्रगंतुमशक्यंतवव्यापकत्वादितिभावः॥ २४॥ कालानलःप्रलयाग्निस्तत्तुल्यानि प्रसीदप्रसन्नःसुखदोभवेत्यर्थः॥ २५॥ अमीत्वांविशंतीत्यग्निमश्लोकादपरुष्यते॥ २६॥ तेभीष्मादयः उत्तमांगैःशिरोभिः अयंभावः धृतराष्ट्रस्यपुत्राःपापिष्ठाःभवंतमेवत्रैलोक्यशरीरंविशंति पापानुरूपंतस्यपायुस्थानस्थितान्नरकानेवग च्छंतीतित्वत्तोविशंतीत्येवोक्तं भीष्मादयस्तुभक्तायनोग्निर्ब्राह्मणावेदाश्वप्रसूतास्तद्भगवतोमुखंप्रविशंतीतिवैषम्यगतिसूचनार्थंत्वांधृतराष्ट्रस्यपुत्राविशंतिभीष्मादयस्तेवक्त्राणिविशंतीतिविभागदर्शनंयुक्तमि

रूपंमहत्तेबहुवक्त्रनेत्रंमहाबाहोबहुबाहूरुपादम्॥बहूदरंबहुदंष्ट्राकरालंदृष्ट्वालोकाःप्रव्यथितास्तथाहम्॥२३॥नभःस्पृशंदीप्तमनेकवर्णंव्यात्ताननंदीप्तविशालने त्रम्॥ दृष्ट्वाहित्वाप्रव्यथितांतरात्माधृतिंनविंदामिशमंचविष्णो॥२४॥ दंष्ट्राकरालानिचतेमुखानिदृष्ट्वैवकालानलसन्निभानि॥दिशोनजानेनलभेचशर्मप्रसी ददेवेशजगन्निवास॥ २५॥ अमीचत्वांधृतराष्ट्रस्यपुत्राःसर्वेसहैववनिपालसंघैः॥ भीष्मोद्रोणःसूतपुत्रस्तथासौसहास्मदीयैरपियोधमुख्यैः॥ २६॥वक्का णितेत्वरमाणाविशंतिदंष्ट्राकरालानिभयानकानि॥ केचिद्विलग्नादशनांतरेषुसंदृश्यंतेचूर्णितैरुत्तमांगैः॥ २७॥ यथानदीनांबहवोंबुवेगाःसमुद्रमेवाभिमुखाद्रवंति॥तथातवामीनरलोकवीराविशंतिवक्त्राण्यभिविज्वलंति॥ २८॥यथाप्रदीप्तंज्वलनंपतंगाविशंतिनाशायसमृद्धवेगाः॥ तथैवनाशायविशंतिलोकास्त वापिवक्त्राणिसमृद्धवेगाः॥ २९॥ लेलिह्यसेग्रसमानःसमंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः॥तेजोभिरापूर्यजगत्समग्रंभासस्तवोग्राःप्रतपंतिविष्णो॥ ३०॥ आख्याहिमेकोभवानुग्ररूपोनमोस्तुतेदेववरप्रसीद॥ विज्ञातुमिच्छामिभवंतमाद्यंनहिप्रजानामितवप्रवृत्तिं॥ ३१॥

ति॥ २७॥ इदमेवसदृष्टांतमाह यथेति तववक्त्राणिविशंतीतिसंबंधः अभिविज्वलंतिसर्वतःजाज्वल्यमानानि॥ २८॥ बुद्धिपूर्वकमेवतेत्वद्वक्त्राणिप्रविशंतीतिसदृष्टांतमाह यथाप्रदीप्तमिति॥ २९॥ ये चपतंतस्तांस्त्वंकरुष्णावानपिनवारयसिप्रत्युतग्रसिनुमिच्छस्येवेत्याह लेलिह्यसेभूयोभूयोतिशयेनवास्वादयसि कीदृशस्त्वं समंताज्ज्वलद्भिर्वदनैर्लोकान्समग्रान्ग्रसमानः एवंनिर्घृणस्यापितवतेजोनहीयते प्रत्युतवर्द्धतएवेत्याह तेजोभिरिति हेविष्णोव्यापनशील समपंजगत्तेजोभिरापूर्यतवउग्राःस्वदृष्टुमशक्याभासोदीप्तयःप्रतपंतीतियोजना पदार्थःस्पष्टः॥ ३०॥ एवंदीप्याकुलीभूतोर्जुनोभगवानयमिति विस्मृत्याह आख्याहीति एवमुग्ररूपःक्रूरकर्माभवान्कोसीत्याख्याहि अमुकोस्मीतिकथय प्रसीदशांतोभव त्वामहंविज्ञातुमिच्छामि यतस्तवप्रवृत्तिंचेष्टांनजानामि॥ ३१॥

एवमर्जुनेनप्रार्थितोभगवानुवाच कालइति इहास्मिन्संग्रामेलोकान्समाहर्तुंप्रवृत्तःप्रवृद्धोमहान्लोकक्षयकृत्कालोनामपरमेश्वरोस्मि यस्मादेवंतस्मात्कृतेपित्वांविनापिसर्वेनभविष्यंतिमरिष्यंति केते सर्वेयेप्रत्यनीकेषुशत्रुसैन्येषुयोधाःशूराभीष्मादयोऽवस्थितास्ते ॥३२॥ तस्मादिति यस्मात्त्वांविनाप्येतेमरिष्यंतितस्मात्त्वमुत्तिष्ठयुद्धाय शेषंस्पष्टं ॥३३॥ माव्यथिष्ठाःएतेमहांतःकथंहंतुंशक्ष्याइत्याकुलीभावंमागाइत्यर्थः जेतासिजेष्यसि सपत्नान्शत्रून् ॥ ३४ ॥ भगवतैवमुक्तेसतिपश्चार्किंवृत्तमित्यपेक्षायांसंजयउवाच अत्रकृतांजलित्वादिनाचिह्नेनभगवद्वाक्योर्हुंघनंकिरीटीनकरिष्यतीतिसूच्यते सगद्गदंभयहर्षाद्यावेशेनगद्गदेनकंठाकंपनेनसहवर्त्ततइतिसगद्गदंयथाभवतितथाआहउक्तवान् भीतभीतोत्यंतंभीतःसन्नाहेतिसंबंधः अत्रआहेतिपदच्छेदपुनरर्जुनउवाचेतिपुनरुक्तंस्यात् अतःप्रणम्यअर्जुनउवाचेत्येवसंबंधोनतुप्रणम्यआहेति कार्ताहिआहेतिक्रियायागतिः नेयंक्रियार्किंतुआहेतिप्रसिध्यर्थमव्ययमित्यदोषः ॥ ३५ ॥ एकादशभिःश्लोकैरर्जुनउवाच स्थानेइति हेहृषीकेशसर्वेंद्रियप्रवर्त्तकअं

श्रीभगवानुवाच ॥ ॥ कालोस्मिलोकक्षयकृत्प्रवृद्धोलोकान्समाहर्तुमिहप्रवृत्तः ॥ ऋतेपित्वानभविष्यंतिसर्वेयेऽवस्थिताःप्रत्यनीकेषुयोधाः ॥ ३२ ॥तस्मात्त्वमुत्तिष्ठयशोलभस्वजित्वाशत्रून्भुंक्ष्वराज्यंसमृद्धम् ॥ मयैवैतेनिहताःपूर्वमेवनिमित्तमात्रंभवसव्यसाचिन् ॥ ३३॥द्रोणंचभीष्मंचजयद्रथंचकर्णंतथान्यानपियोधवीरान् ॥ मयाहतांस्त्वंजहिमाव्यथिष्ठायुद्ध्यस्वजेतासिरणेसपत्नान् ॥ ३४ ॥ ॥ संजयउवाच ॥ ॥ एतच्छ्रुत्वावचनंकेशवस्यकृतांजलिर्वेपमानःकिरीटी ॥ नमस्कृत्वाभूयएवाहकृष्णंसगद्गदंभीतभीतःप्रणम्य ॥ ३५ ॥ ॥ अर्जुनउवाच ॥ ॥ स्थानेहृषीकेशतवप्रकीर्त्याजगत्प्रहृष्यत्यनुरज्यतेच ॥ रक्षांसिभीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसंघाः ॥ ३६ ॥ कस्माच्चतेननमेरन्महात्मन्गरीयसेब्रह्मणोप्यादिकर्त्रे ॥ अनंतदेवेशजगन्निवासत्वमक्षरंसदसत्तत्परंयत् ॥ ३७ ॥

तर्यामिन् तवप्रकीर्त्यानामसंकीर्तनेनजगत्प्रहृष्यतियत्तत्स्थानेयुक्तं स्थानेइत्यव्ययंयुक्तमित्यर्थे यत्तवप्रकीर्त्याजगदनुरज्यतेतदपिस्थानेयुक्तं यच्चत्वांसर्वेसिद्धसंघाःकपिलादीनांसमुदायानमस्यंतितदपिस्थाने अयंश्लोकोरक्षोघ्नमंत्रत्वेनमंत्रशास्त्रेप्रसिद्धः सचनारायणाष्टाक्षरसुदर्शनास्त्रमंत्राभ्यांसंपुटितोज्ञेयंइतिरहस्यं ॥ ३६ ॥ कुतोमांसिद्धसंघानमस्यंतियतस्तेप्यहमिवब्रह्मांडशतानिस्रष्टुमर्हंतीत्यतआह कस्मादिति हेमहात्मन्कस्माद्धेतोस्तेत्वांननमेरन्पितुनमेरन्नेव तत्रहेतुः गरीयसे तेपिगुरवस्त्वमपिगुरुस्तथापित्वमतिशयितोगुरुरसीत्यर्थः कुतोममैवातिशयस्तेषांममचसमानेपिसत्यसंकल्पत्वादौसत्यश्चाह ब्रह्मणोहिरण्यगर्भस्यापिआदिकर्त्रेपितामहाय पंचमहाभूतसृष्टिद्वाराब्रह्माणंसृजतेइत्यर्थः जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्चेतिन्यायेननित्यसिद्धेश्वरस्यतवाज्ञयातेसर्वेप्यैश्वर्यभाजोभवंतिननुत्वत्तोमहान् अतएवहेअनंत हेदेवानांईश जगन्निवासजगतामालयभूत त्वमक्षरंशुद्धंब्रह्म कीदृशमक्षरं यत्सदसत्तत्परं सच्चासच्च सदसतीताभ्यांपरंचसदसत्तत्परं कार्यंकारणंतदुभयातीतंचेतित्रिविधमित्यर्थः ॥ ३७ ॥

पुनरपिस्तौति त्वमिति आदिदेवोजगतःस्रष्टृत्वात् पुरुषःसर्वशरीरशायी पुराणःशरीरनाशादिनाप्यविनश्यन् विश्वस्यास्यत्वंपरंनिधानंनिधीयतेस्मिन्नितिलयस्थानं सांख्यानांजडांप्रकृतिंवारयति वेत्ताज्ञाता वेद्यंदृश्यंचत्वमेव परंवेत्तृवेद्याभ्यामन्यत्धामचैतन्यं त्वयाविश्वंततंव्याप्तंस्वसत्तास्फूर्त्तिभ्याहेअनंतरूपत्रिविधपरिच्छेदशून्यस्वरूप ॥ ३८ ॥ सर्वदेवतात्मत्वेनस्तौति वायुरिति प्रजापतिर्दक्षाद्दिश्वर्तुमुखोवा प्रपितामहश्चर्तुर्मुखपिता ॥ ३९ ॥ हेअनंतवीर्ययतःसर्वंसमाप्नोषिएकीभावेनासमंताद्व्याप्नोषितोहेतोःसर्वइतितवनाम पुरस्तात्कर्मणामादौ पृष्ठतस्तेषांसमाप्तौ सर्वतोमध्येपितेनमोस्तु ॥ ४० ॥ एवं स्तुत्वास्वापराधान्क्षमापयते सखेतीति अयंममसखाइतिमत्वाप्रसभंस्वोत्कर्षाविष्करणपूर्वकंयत्मयाउक्तंहेकृष्णहेयादवहेसखेइति इतिशब्देनसंधिरार्षः कुतउक्तं तवेदमेवंविधंमहिमानंमाहात्म्यंअजा

त्वमादिदेवःपुरुषःपुराणस्त्वमस्यविश्वस्यपरंनिधानम् ॥ वेत्तासिवेद्यंचपरंचधामत्वयाततंविश्वमनंतरूप ॥ ३८ ॥ वायुर्यमोग्निर्वरुणःशशांकःप्रजापतिस्त्वंप्रपितामहश्च ॥ नमोनमस्तेस्तुसहस्रकृत्वःपुनश्चभूयोपिनमोनमस्ते ॥ ३९ ॥ नमःपुरस्ताद्थपृष्ठतस्तेनमोस्तुतेसर्वतएवसर्व ॥ अनंतवीर्यामितविक्रमस्त्वंसर्वं समाप्नोषितोसिसर्वः ॥ ४० ॥ सखेतिमत्वाप्रसभंयदुक्तंहेकृष्णहेयादवहेसखेति ॥ अजानतामहिमानंतवेदंमयाप्रमादात्प्रणयेनवापि ॥ ४१ ॥ यच्चावहासार्थमसत्कृतोसिविहारशय्यासनभोजनेषु ॥ एकोथवाप्यच्युततत्समक्षंतत्क्षामयेत्वामहमप्रमेयम् ॥ ४२ ॥ पितासिलोकस्यचराचरस्यत्वमस्यपूज्यश्चगुरुर्गरीयान् ॥ नत्वत्समोस्त्यभ्यधिकःकुतोन्योलोकत्रयेप्यप्रतिमप्रभावः ॥ ४३ ॥ तस्मात्प्रणम्यप्रणिधायकायंप्रसादयेत्वामहमीशमीड्यम् ॥ पितेवपुत्रस्यसखेवसख्युः प्रियःप्रियायार्हसिदेवसोढुम् ॥ ४४ ॥ अदृष्टपूर्वंहृषितोस्मिदृष्ट्वाभयेनचप्रव्यथितंमनोमे ॥ तदेवमेदर्शयदेवरूपंप्रसीददेवेशजगन्निवास ॥ ४५ ॥

नानाकदाचित्यमादाच्चित्तविक्षेपात्कदाचित्प्रणयेनलेहेनच ॥ ४१ ॥ तथायच्चअवहासार्थंविहारादिष्वसत्कृतोसिपरिभूतोसि एकोवासखीनांनियोगकालेवातत्समक्षंसखिजनसमक्षंवाऽसत्कृतोसितत्क्षामयेक्षमापये यतस्त्वमप्रमेयोचिंत्यस्वभावःकरुणापरः यतःशत्रुभ्योपिशिशुपालादिभ्यउत्तमांगतिंदत्तवानसीत्यर्थः ॥ ४२ ॥ अप्रमेयत्वमेवाह पितासीति यतस्त्वमस्माकंपितासिअतोस्माभिःशिशुभिःकृता अपराधास्त्वयाक्षंतव्याएवेतिभावः ॥ ४३ ॥ एतदेवाह तस्मादिति यस्मात्त्वंपितागुरुश्चतस्मात्कार्यंशरीरंप्रणिधायभूमौकृत्वादंडवत्प्रणम्यत्वांप्रसादये ईड्यंस्तुत्यं स्पष्टमन्यत् ॥ ४४ ॥ एवंस्तुत्वास्वेष्टंप्रार्थयते अदृष्टपूर्वमिति हेदेवकदाचिदपिपूर्वंनदृष्टंतादृशमदृष्टपूर्वंतवरूपंदृष्ट्वात्पितउत्कुछालि तथाविकरालरूपदर्शनजेनभयेनचमेममनःप्रव्यथितं अतस्तदेवधारणाविषयभूतंरूपंमेमह्यंदर्शय ॥ ४५ ॥

तदेवरूपमाह किरीटिनमिति एतेनार्जुनस्यचक्रगदाकिरीटोपेतंचतुर्भुजंभगवतोरूपंधारणाविषयइतिदर्शितं हेसहस्रबाहोहेविश्वमूर्तेसहस्रबाह्वादिकमुपसंहृत्यतेनैवरूपेणभवमकटोभव ॥ ४६ ॥ एव मर्जुनेनप्रार्थितस्तंस्तुवन्भगवानुवाचमयेतित्रिभिः हेअर्जुनप्रसन्नेनमयातवतुभ्यमिदंपरंरूपंदर्शितं आत्मयोगात्स्वसामर्थ्यात्करुणयाननुतवदर्शनेधिकारोस्ति तथाचप्रागुक्तं कर्मण्येवाधिकारस्तइति तेजोमयंविद्वंपंदिव्यंविश्वंविश्वात्मकंआद्यमनादिअनंतंचयत्रूपंत्वदन्येनकदाचिदपिनपूर्वंदृष्टंदृष्टपूर्वं ॥ ४७ ॥ योगैकगम्यमेतत्कर्मिणांदुरापमित्याह नवेदेति वेदानांयज्ञानांचाध्ययनैरधिगमैर्नचदानै र्नचक्रियाभिःस्रुत्युक्ताभिरापूर्तादिभिर्वापीकूपारामादिभिस्तपोभिःकृच्छ्रचांद्रायणादिभिः उग्रैर्मासोपवासादिभिः नृलोकेएवंरूपोहंद्रष्टुंनशक्यः रोरुत्वाभावआर्षः त्वदन्येनकुरुप्रवीर ॥ ४८ ॥ इदमतिदुर्लभद

किरीटिनंगदिनंचक्रहस्तमिच्छामित्वांद्रष्टुमहंतथैव ॥ तेनैवरूपेणचतुर्भुजेनसहस्रबाहोभवविश्वमूर्ते ॥ ४६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मयाप्रसन्नेनतवार्जु नेदंरूपंपरंदर्शितमात्मयोगात् ॥ तेजोमयंविश्वमनंतमाद्यंयन्मेत्वदन्येननदृष्टपूर्वम् ॥ ४७ ॥ नवेदयज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपोभिरुग्रैः ॥ एवंरूपःशक्य अहंनृलोकेद्रष्टुंत्वदन्येनकुरुप्रवीर ॥ ४८ ॥ मातेव्यथामाचविमूढभावोदृष्ट्वारूपंघोरमीदृङ्ममेदम् ॥ व्यपेतभीःप्रीतमनाःपुनस्त्वंतदेवमेरूपमिदंप्रपश्य ॥ ४९ ॥ संजयउवाच ॥ ॥ इत्यर्जुनंवासुदेवस्तथोक्त्वास्वकंरूपंदर्शयामासभूयः ॥ आश्वासयामासचभीतमेनंभूत्वापुनःसौम्यवपुर्महात्मा ॥ ५० ॥ ॥ अर्जुनउवाच ॥ दृष्ट्वेदंमानुषंरूपंतवसौम्यंजनार्दन ॥ इदानीमस्मिसंवृत्तःसचेताःप्रकृतिंगतः ॥ ५१ ॥ ॥ श्रीभगवानुवाच ॥ ॥ सुदुर्दर्शमिदंरूपंदृष्टवानसियन्मम ॥ देवाअप्य स्यरूपस्यनित्यंदर्शनकांक्षिणः ॥ ५२ ॥

र्शनंरूपंदृष्ट्वापिचेद्यथसेतर्हिउपसंहरामीदमित्याशयेनाह मातेइति ममेदंईदृक्घोरंरूपंदृष्ट्वातेतवव्यथामाभूदितिशेषः विमूढभावोमोहश्चतेमाभूत् व्यपेतभीर्निर्भयःप्रीतमनाश्चपुनस्त्वंभूत्वातदेवयत्त्वयाद्र ष्टुंप्रार्थितंमेममेदंरूपंप्रपश्य ॥ ४९ ॥ संजयउवाच इतीति वासुदेवोर्जुनंप्रतिइतिपूर्वोक्तरीत्याउक्त्वायथापूर्वमासीत्तथात्मकंमानुषंरूपंभूयःपुनर्दर्शयामास यदर्जुनेनप्रार्थितंचतुर्भुजंधारणाविषयंरूपंतद पित्तिरोदधेइत्यर्थः तथामहात्माव्यापकोपिसन्सौम्यवपुरनुग्रहदेहोभूत्वाभीतमेनमाश्वासयामासच ॥ ५० ॥ ततोनिर्भयःसन्नर्जुनउवाच दृष्ट्वेति सचेताअव्याकुलः प्रकृतिंगतःस्वास्थ्यंप्राप्तः संवृत्तोजातो स्मि ॥ ५१ ॥ अस्यविश्वरूपदर्शनस्यदौर्लभ्यंदर्शयन्श्रीभगवानुवाच सुदुर्दर्शमिति दर्शनकांक्षिणः दर्शनंकांक्षंतेएवनतुलभंते ॥ ५२ ॥

॥७२॥

नाहमिति नवेदयज्ञाध्ययनैरित्यनेनोक्तएवार्थःपुनरुच्यतेविश्वरूपदर्शनस्यातिदौर्लभ्यसूचनाय स्पष्टार्थश्चश्लोकः ॥ ५३ ॥ कथंतर्हिद्रष्टुंशक्यस्त्वमतआह भक्त्येति भक्त्याआराधनेन अनन्ययाअव्य भिचरितयाअखंडयेत्यर्थः अहमेवंविधोज्ञातुंशक्यस्त्वंपदार्थशोधकशास्त्रतः द्रष्टुंशक्योध्यानतः तत्त्वेनयाथात्म्येनप्रवेष्टुंशक्यश्चतत्त्वमसित्वाक्यार्थज्ञानतः हेपरंअज्ञानमशत्रुंतापयतीतिपरंतप ॥ ५४ ॥ शास्त्रसर्वस्वंसंगृह्णाति मत्कर्मकृदिति मदर्थमेवंकर्माणिकरोतीतिमत्कर्मकृत् अहमेवपरमोनिष्कलःप्राप्योयस्येतिसमत्परमः एतेनकृत्स्नःकर्मयोगोध्यानयोगश्चत्वंपदार्थशोधकउक्तः ममभक्तआराधन कृदित्युपासनाकांडार्थसंग्रहः संगवर्जितइत्यनेनएकनोभगवद्ध्याननिष्ठइत्युक्तं निर्वैरइतिविश्वंभगवदात्मनापश्येदित्युक्तं अन्यथाभेदबुद्धिमनोनिर्वैरत्वासंभवात् एवंभूतोयःसमांतत्पदलक्ष्यार्थभूतमखंडा नंदैकघनमेतिप्राप्नोतिप्रत्यगभेदेन हेपांडवविशुद्धवंशज त्वमेवैतज्ज्ञातुंशक्तोषीतिभावः ॥ ५५ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेगी० एकादशोऽध्यायः ॥ ११ ॥ प० ३५ ॥ ७ ॥ सप्तम

नाहंवेदैर्नतपसानदानेननचेज्यया ॥ शक्यएवंविधोद्रष्टुंदृष्टवानसिमांयथा ॥ ५३ ॥ भक्त्यात्वनन्ययाशक्यअहमेवंविधोर्जुन ॥ ज्ञातुंद्रष्टुंचतत्त्वेनप्रवेष्टुंचपरंत प ॥ ५४ ॥ मत्कर्मकृन्मत्परमोमद्भक्तःसंगवर्जितः ॥ निर्वैरःसर्वभूतेषुयःसमामेतिपांडव ॥ ५५ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिश्रीमद्भगवद्गीतासू० विश्व रूपदर्शनंनामैकादशोऽध्यायः ॥ ११ ॥ पर्वणितुपंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ ७ ॥ ॥ अर्जुनउवाच ॥ एवंसततयुक्तायेभक्तास्त्वांपर्युपासते ॥ येचा प्यक्षरमव्यक्तंतेषांकेयोगवित्तमाः ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ मय्यावेश्यमनोयेमांनित्ययुक्ताउपासते ॥ श्रद्धयापरयोपेतास्तेमेयुक्ततमामताः ॥ २ ॥

मारभ्यैतावतायंथेनतत्पदवाच्यार्थोनिरूपितः इदानींतत्पदार्थशोधनमुपासनाकांडंचसमापयिष्यन्निहार्थतःप्राधान्येनतत्पदलक्ष्यमर्थंनद्विदांलक्षणानिचप्रदर्श्यते शब्दतस्तुलौकिकबुद्ध्यनुसारेणतत्पदवा च्यस्यैवोपासनादिकंप्रपंच्यतेतत्रपूर्वाध्यायातेमत्कर्मकृन्मत्परमइत्यादिनास्वभजनमुक्तं तत्रमच्छब्दार्थःकिंसगुणमुतनिर्गुणंब्रह्म उभयत्राप्यस्मच्छब्दस्यपूर्वंप्रयोगदर्शनात्संदिहानःपृच्छति एवमिति एव मित्यव्यवहिनंमत्कर्मकृदित्यादिनोक्तंप्रकारंपरामृशति अनेनप्रकारेणयेसततयुक्तानित्यंसमाहितचित्ताभक्ताःसगुणवेदिनस्त्वांपर्युपासतेयेचाप्यक्षरमस्थूलादिलक्षणमव्यक्तंबुद्ध्याचगोचरमुपासतेतेषांमध्ये योगवित्तमाःकेकृतरेइत्यर्थः ॥ १ ॥ निर्गुणस्यदुरापत्वोक्त्यैवश्रेष्ठत्वंसूचयन्सगुणप्राशस्त्यंचशब्दनोदर्शयन्श्रीभगवानुवाच मयीति मयिसगुणेब्रह्मणिमनआवेश्यप्रवेश्यये नित्ययुक्ताःसदोद्युक्तामांपरमेश्व रमुपासतेचिंतयंतिश्रद्धयाआस्तिक्यबुद्ध्यापरयासात्विक्याअवश्यंपरमात्मायमाराधितोऽस्मांस्तारयिष्यतीत्येवंनिश्चयरूपयाश्रद्धयाउपेतास्तेमेममज्ञानीत्वात्मैवमेमतमितिज्ञानिनमात्मत्वेनैवपश्यतोमूर्वे ष्वपिकारुण्यात्सक्षपातवतःसर्वज्ञत्वयुक्ततमामताः ॥ २ ॥ ॥

एवमुपासकान्स्तुत्वाअव्यक्तविदांज्ञानिनांदौर्लभ्यंश्लोकत्रयेणाह येत्विति तुशब्दःसगुणाद्वैलक्षण्यार्थःअक्षरंएनद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमित्यादिश्रुत्यासर्वधर्मशून्यंनिरूपितंअतएवानिर्देश्यंनिर्देष्टुमशक्यंवाचा अव्यक्तंच वाचामगोचरत्वाद्बुद्धेरप्यविषयइत्यर्थः तथाचश्रुतिर्यतोवाचोनिवर्त्तंते अप्राप्यमनसासहेतिब्रह्मणोवाङ्मनसातीतत्वंदर्शयति पर्युपासतेसर्वप्रकारेणोपासते उपासनमिहानात्मनामदर्शनमेव यथोक्तं अनात्मादर्शनेनैवपरात्मानमुपास्महइति ननुतर्ह्येवंविधस्यशून्यकल्पस्यसत्त्वेकिंमानमतआह सर्वत्रगमिति सत्तारूपेणस्फुरणरूपेणचसर्वत्रगतं यत्सत्तयासर्वंसत्तावद्भवतिकथंतस्यासत्त्वंवाच्यमितिभावः नन्वेवंतार्किकाभिमतंसत्तासामान्यमुक्तंस्यात् तद्घिघटःसन्पटःसन्तिसर्वत्रानुगतंदृश्यतइत्याशंक्याह अचिंत्यमिति सत्तासामान्यंहिप्रत्यक्षंतदपिब्रह्मसत्तानुवेधेनैवात्मानंलभतेनस्वतःसिद्धंसामान्यंसत्जातिःसतीघटत्वंसदितिप्रत्ययात् सामान्यस्यसदितिप्रत्ययागोचरत्वेतुत्स्यासत्त्वापत्त्यापदार्थत्वमेवनस्यात् तस्मात्सर्वाधिष्ठानभूतंब्रह्मरूपादिहीनत्वाच्चिंतयितुमशक्यंदूरेतस्यसर्वगतत्वेनप्रत्यक्षगोचरत्वमित्यर्थः ननुसत्सदितिप्रत्ययस्यान्यथाप्युपपत्तौसत्तासामान्यवादिनंप्रतितेनाधिष्ठानभूतंब्रह्मनसाधयितुंशक्यमतआह कूटस्थमिति वस्तुतोसदपिसदिवावभासमानंकूटंयथाकूटकार्षापणंकूटतुलेतिनद्वत्कूटःअहंकारःप्रतीच्यभेदेनभासमानत्वेसतिकादाचित्कत्वायोयदभेदेनकदाचिद्भातिसतत्रमिथ्याकल्पितोयथारज्जूरगस्तथाचायमहंकारोमिथ्यात्वात्कूटसं

येत्वक्षरमनिर्देश्यमव्यक्तंपर्युपासते॥ सर्वत्रगमचिंत्यंचकूटस्थमचलंध्रुवं॥ ३॥

ज्ञस्तत्रतिष्ठतितद्भासकत्वेनेतिकूटस्थंचैतन्यं अहमनुभवेऽहंकारोदृश्यतयाभातितद्भासकंचचैतन्यंततोन्यत् यथाघटभासकोकोंघटादन्यस्तद्वत् एतेननित्यापरोक्षत्वंब्रह्मणःसाधितं नन्वहमनुभवएवात्मविषयोऽतोहमर्थएवात्मानततोन्यआत्मास्तीत्याशंक्याह अचलमिति अहमर्थोहिसुखदुःखीपरिणाम्याविर्भावतिरोभावशीलश्चातश्चंचलः आत्मातुनतथा तस्यतथात्वेऽनिर्मोक्षापत्तेः वह्न्यौष्ण्यवदुःखादिर्धर्मिणआत्यंतिकदुःखनाशस्यमोक्षस्यधर्मिनाशमंतरेणासंभवात् घटेयावद्रूपनाशादर्शनात् आत्मनस्तिरोभावेचजगदांध्यंप्रसज्येत सुषुप्तावपितत्यसुखाज्ञानसाक्षित्वेनाविर्भूतस्वरूपएवात्मास्ति अन्यथासुप्तोत्थितस्यसुखमहमस्वापसमितिपरामर्शायोगात् ननुसुषुप्तौसत्प्यात्मानप्रकाशतेतत्प्रकाशकस्यमनःसंयोगस्याभावात्कर्त्राव्याप्रियमाणंहिकरणंक्रियांसाधयति नचसुषुप्तौकरणव्यापारोस्ति तस्मान्यस्तवास्यस्तक्षेवात्मासुषुप्तौज्ञानादिगुणहीनोऽप्रकाशमानोस्त्येवेत्याशंक्याह ध्रुवमिति नन्वात्माकिंसत्तामात्रेणायस्कांतवत्कारणानिप्रवर्त्तयतिउतव्यापाराविष्टःसन् नाद्यः इष्टापत्तेः त्वन्मतेचात्मनःकर्त्तृत्वासिद्धेः नांत्यः अनित्यत्वापत्तेः व्यापारोहिस्पंदः सचपरिच्छिन्नस्यैवयुज्यतेनविभोः विभुत्वहानेचाणुत्वानभ्युपगमात् मध्यमपरिमाणत्वेघटादिवदनित्यतापत्तिः तस्माद्ध्रुवमप्रच्युतस्वभावमक्षरमित्यर्थः ॥ ३ ॥

॥७३॥

एवंविधमक्षरंकथमुपासनीयमित्यतआह संनियम्येति सर्वत्रकालेसर्वदा एतेनध्यानस्यनैरंतर्यमुक्तं इंद्रियग्रामंसमनस्कानींद्रियाणिसंनियम्यएकीभावेनात्मनिवशेकृत्वा स्वकारणेप्रविलाप्येत्यर्थः समाचांचल्यहीनाबुद्धिर्येषांतेसमबुद्धयोयेऽनंतितेपिमामेवनिर्विकल्पंपरंब्रह्मपरांकाष्ठांप्राप्नुवंति श्रुतिश्च यदापंचावतिष्ठंतेज्ञानानिमनसासह बुद्धिश्चनविचेष्टतितामाहुःपरमांगतिमिति सर्वभूतहितेरताइत्यनेन सर्वभूताभयदानेनसंन्यासोपिध्यानांगमितिविधीयते ॥ ४॥ अस्यागतेर्दुष्प्रापत्वमाह क्लेशइति यद्यपिसगुणविद्यामधिकःक्लेशोस्त्येवतथापितेसालंबनाध्यायंतिसोपानारोहकमेणपरांकाष्ठांप्रविशंति येषांतुनिरालंबंध्यानमाकाशयुद्धसमंतेषांनिर्विषयेचेतःस्थिरीकरणेधिकतरःक्लेशोस्ति तत्रकमिकध्यानप्रयोगः शुद्धेचिन्मात्रेविश्वरूपंमायया ध्यस्तं तत्रचकेवलमानविवाहिकंकृत्स्नंजडमाधिभौतिकमध्यस्तं यथोक्तंवसिष्ठेन आतिवाहिकएवायंत्वादृशैश्चित्तदेहकः आधिभौतिकयाबुद्ध्यागृहीतश्चिरभावनादिति अतिक्रम्यपाषाणादींवहतिइष्टदेशंनयत्यभिमानिनमित्यतिवाहिसर्वत्राप्रतिहतगतिकंभूतसूक्ष्मतेन निर्दत्तआतिवाहिकोयंकृत्स्नःप्रपंचोयतश्चित्तदेहकःचित्तमेवदेहस्वरूपमस्येतिस्वमतुल्यएवसनृचिरभावनात्वज्जपंजरवत्काठिन्येनोपेतआधिभौतिकयास्थूलभूतप्रज्ञयाबुद्ध्यागृहीतइतिश्लोकार्थः एवंचयथातीव्राभिनिवेशेननिरीक्ष्यमाणोरज्जूरगःस्वयंशाम्यतितदधिष्ठानभूतारज्जुश्चाविर्भवति तथावस्तुतश्चिद्रूपायामपिमाधवादिमूर्त्तौजाड्यमध्यस्तंतामेवाभिनिवेशेनचिरकालंचर्मचक्षुषैवपश्यतस्तस्या

संनियम्येंद्रियग्रामंसर्वत्रसमबुद्धयः॥ तेप्राप्नुवंतिमामेवसर्वभूतहितेरताः॥ ४॥क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसाम्॥ अव्यक्ताहिगतिर्दुःखंदेहवद्भिरवाप्यते॥ ५॥ येतुसर्वाणिकर्माणिमयिसंन्यस्यमत्पराः॥ अनन्येनैवयोगेनमांध्यायंतउपासते॥ ६॥

मूर्त्तेर्जाड्यंतिरोधीयतेचैतन्यमाविर्भवति अतएवबाणादयःस्वाराध्यैःसार्द्धंस्वामिभृत्यन्यायेनव्यवहरंतीतिसर्वत्रोपाख्यायते एवमचेतनायामूर्त्तेरपित्वंविश्वरूपमेवेतिमूर्त्तिमेवात्यादरेणपश्यंस्तस्यास्तत्त्वं विश्वरूपमवगच्छतियदपश्यदर्जुनोवासुदेवदेहे एतदेवतर्कजंप्रत्यक्षंप्रकृत्योक्तंभगवतायोगभाष्यकारेणबादरायणेन तत्परंप्रत्यक्षंतच्छ्रुतानुमानयोर्बीजमिति स्थूलालंबनःसमाधिर्वितर्कः विश्वरूपस्याप्यस्मितामात्रेध्यासात्ततस्यावलोकनेऽस्मितामात्रमवशिष्यते अस्मितायाअपिशुद्धायांचितावध्यस्तत्वात्तस्याप्यपिसमाहितेमनसिसहैवमनसास्मितातिरोधीयतेशुद्धाचितिरेवावशिष्यतेइति एवंव्यक्तासक्ताःसोपानारोहकमेणपरांकाष्ठांप्रतिपद्यंते येतुअव्यक्तासक्ताःपक्षिवदकस्मादूर्ध्वंपदमारुरुक्षंतितेलयेनविक्षेपेणचभृशंबाध्यंतेलयमेवचकदाचित्समाधित्वेनाभ्युपगच्छंतीतितेषांपराभवसंभावनाप्यस्तीत्यतउक्तं क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसामिति हियस्मादव्यक्तानिरालंबनागतिःपदप्राप्तिर्देहवद्भिर्देहाभिमानिभिर्दुःखंयथास्यात्तथाअवाप्यते नतुसासुखप्राप्येतिभावः ॥ ५॥ नन्वव्यक्तासक्तचेतसांक्लेशाधिक्येपिक्लेशांतेसद्यःकैवल्यसिद्धिरस्तीतिकिंविलंबसाध्येनव्यक्तभावनेनेत्याशंक्याह येत्विति द्वाभ्यां सर्वाणिनित्यनैमित्तिकस्वाभाविकादीनिसंन्यस्यसमर्प्यमत्पराअहमेवपरःसर्वकर्मणिःप्राप्यो येषांतेमत्परामद्ध्यानपरावा अनन्येनभेदशून्येनअहमेवभगवान्वासुदेवइतिपरमेश्वरोऽहंयहलक्षणेनयोगेनचेतःसमाधानेनमांध्यायंतउपासतेतत्रैवध्यानेस्थैर्यंलभंते ॥ ६ ॥

तेषांध्यायिनांनचिरात्शीघ्रमेवाहंसमुद्धर्त्तासमुद्धरणकर्त्ता यतस्तेमयिसगुणेविश्वरूपेआवेशितंचेतसोभवंति अतोव्यक्तासक्ताअपिशीघ्रमेवपरंपदमारोढुमर्हाइतिनाव्यक्तेःत्यंताभिनिवेष्टव्यमितिभावः ॥ ७ ॥ यस्मात्त्वंतत्मान्मय्येवविश्वरूपेईश्वरेमनःसंकल्पविकल्पात्मकमाधत्स्वस्थापयमय्येवाध्यवसायंकुर्वतीबुद्धिंनिवेशयतत्फलंच निवसिष्यसिनिवत्स्यसिनिश्चयेनमदात्मनामयिवासंकरिष्यसि अतः शरीरपातादूर्ध्वंनसंशयःकर्तव्यः ॥ ८ ॥ विश्वरूपधारणायामशक्तंप्रतिप्राह अथेति मयिविश्वेश्वरेविश्वरूपेअथयदिचित्तंसमाधातुंनिवेशितुमचलंधारयितुंनशक्नोषितनस्तर्ह्यभ्यासयोगेनचित्तस्यैकस्मिन्नाभ्यंतरेवाग्रेवाप्रतिमादावालंबनेसर्वतःसमाहृत्यपुनःपुनःस्थापनमभ्यासस्तत्पूर्वकोयोगःसमाधानलक्षणस्तेनाभ्यासयोगेनमांविश्वरूपमाप्तुमिच्छप्रार्थयत्वहेधनंजय ॥ ९ ॥ अभ्यासेपीति अभ्या

तेषामहंसमुद्धर्त्तामृत्युसंसारसागरात्॥ भवामिनचिरात्पार्थमय्यावेशितचेतसाम्॥ ७॥मय्येवमनआधत्स्वमयिबुद्धिंनिवेशय॥ निवसिष्यसिमय्येवअतऊर्ध्वंनसंशयः॥ ८॥ अथचित्तंसमाधातुंनशक्नोषिमयिस्थिरम्॥ अभ्यासयोगेनततोमामिच्छाप्तुंधनंजय॥ ९॥ अभ्यासेप्यसमर्थोसिमत्कर्मपरमोभव॥ मदर्थमपिकर्माणिकुर्वन्सिद्धिमवाप्स्यसि॥ १०॥ अथैतदप्यशक्तोसिकर्त्तुंमद्योगमाश्रितः॥ सर्वकर्मफलत्यागंततःकुरुयतात्मवान्॥ ११ ॥ श्रेयोहिज्ञानमभ्यासाज्ज्ञानाद्ध्यानंविशिष्यते॥ ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरम्॥ १२॥

सेपूर्वश्लोकोक्ते मत्कर्म श्रवणंकीर्त्तनंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनमितिनवविधभजनात्मकंभगवत्प्रीत्यर्थंकर्ममत्कर्मशब्दितं तदेवपरममावश्यंकंयस्यतादृशोभव कर्माणि श्रवणादीनि सिद्धिंसत्वशुद्धिं ॥ १० ॥ मद्योगंश्रवणादीनिष्ठां तर्हिपूर्वोक्तंश्रौतस्मार्त्तसर्वकर्मफलत्यागंकुर्वित्यर्थः यतात्मवान्यतश्चनियमादिमांश्चआत्मवान्जितचित्तश्चेतियतात्मवान् ॥ ११ ॥ इममेवत्यागंसर्वपुरुषार्थमूलत्वात्स्तौति श्रेयोहीति अभ्यासान्हिध्यासनात्ज्ञानंश्रवणमननजंपरोक्षंश्रेयः ज्ञानादपिध्यानंविष्णोःश्रवणकीर्त्तनादिविशिष्यतेततोपिकर्मफलत्यागःश्रेयान् यस्मादनंतरमव्यवधानेनशांतिर्मोक्षोस्तिचित्तशुद्ध्याद्युत्पादनद्वारेण अचवाह्यंसाधनंसुकरत्वात्पूर्वपूर्वापेक्षयाप्रशस्तमित्युच्यतेत्रैवप्रदर्त्स्यतिशयाय यद्वा श्रवणाद्यभ्यासात्तज्जंज्ञानंतत्त्वनिश्चयात्मकंश्रेयः ततोपिज्ञातस्यार्थस्यसाक्षात्काराथंध्यानंश्रेयः ततोपिकर्मफलत्यागः योगीहिसर्वकर्मत्यागीप्रजहातियदाकामानितिप्रोक्तः अयमपिकर्मफलत्यागेनकांमान्जहात्येवेतितेनसमइतिस्तूयते ॥ १२॥

॥ ७४ ॥

परमप्रकृतस्याक्षरस्योपासकंस्तौति तद्गुणकथनेहिसाधकानांतेषुगुणेष्वादरोभविष्यतीतिबुद्ध्याह अद्वेष्टेति अद्वेष्टाचेद्उदासीनःस्यान्नेत्याह मैत्रःमित्रमेवमैत्रोनतूदासीनःकदाचिदपि नन्वन्यस्मिन्शत्रौसति कथंमैत्रत्वंस्यात्तत्राह करुणइति दुःखदातारमपिकरुणयानबाधितुमीष्टेअपितुत्रातुमेवेच्छति एतेनसर्वभूताभयप्रदःसंन्यासीउक्तः अतएवतस्यनिर्ममइतिविशेषणंयुज्यते मुख्यमक्षरविदोलक्षणं निरहंकारइति अहंकारोहिसर्वानर्थनिदानंसएवनिर्गतोयस्मात्सनिरहंकारः अतएवसमेदुःखसुखेयस्य तच्चकोमोहःकःशोकएकत्वमनुपश्यतइतिश्रुतेः क्षमीक्षमावान्परिभवप्राप्तावपित्वस्थचित्तः अन्योपिमुमुक्षुरेतान्धर्माननुतिष्ठेदित्यर्थः ॥ १३ ॥ संतुष्टोयदृच्छालाभेनैवसंजातालंप्रत्ययः सततंसर्वदा योगीश्रवणादौसमाहितचित्तः यतात्मासंयतशरीरेंद्रियादिसंघातः दृढःस्थिरआत्मतत्त्वविषयेनिश्चययोयस्यसदृढनिश्चयोऽसंभावनाशून्योदृढश्रद्धावान् मयिनिर्गुणेब्रह्मण्यपितेनिहितेप्रविलापितेवामनःसंकल्पादिरूपंबुद्धिरध्यवसायस्तेउभेयेनसमर्प्यार्पितमनोबुद्धिः एतादृशोयोमेममभक्तःसमेममप्रियःआत्मत्वादेवसपर

अद्वेष्टासर्वभूतानांमैत्रःकरुणएवच॥ निर्ममोनिरहंकारःसमदुःखसुखःक्षमी ॥ १३ ॥ संतुष्टःसततंयोगीयतात्मादृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्योमेभक्तः समेप्रियः॥ १४॥ यस्मान्नोद्विजतेलोकोलोकान्नोद्विजतेचयः॥ हर्षामर्षभयोद्वेगैर्मुक्तोयःसचमेप्रियः॥ १५ ॥ अनपेक्षःशुचिर्दक्षउदासीनोगतव्यथः॥ सर्वारंभपरित्यागीयोमद्भक्तःसमेप्रियः॥ १६॥ योनहृष्यतिनद्वेष्टिनशोचतिनकांक्षति॥ शुभाशुभपरित्यागीभक्तिमान्यःसमेप्रियः॥ १७॥

मप्रेमास्पदं ज्ञानीत्वात्मैवमेमतमित्युक्तं एतेनपूर्वश्लोकोक्तायानिरहंकारतायाःसाधनान्युक्तानि ॥१४॥ सचनिरहंकारोद्विविधः समाधिस्थोव्युत्थितश्च तयोर्लक्षणंक्रमेणाहद्वाभ्यां यस्मादिति यस्मात्समाधिस्थत्वेनकाष्ठसमाह्लोकोनोद्विजतेनत्रस्यति लोकादपियोनिर्ममस्कत्वान्नोद्विजते अतएवहर्षइष्टलाभेसतिमनसंउत्फुल्लता अमर्षःअसहिष्णुता भयमात्मोच्छेदशंका उद्वेगस्तत्कृतैर्वव्याकुलता एतैर्मनस्कत्वादेवत्रयमेवमुक्तस्यक्तः नत्वेतान्त्रयंत्यक्तुंयततेसाधकवत् ईदृशोयोमद्भक्तःसचमेप्रियः॥१५॥ अस्यैवव्युत्थानावस्थामाह अनपेक्षइति सुखप्राप्तौदुःखहानेवातत्साधनेवालिप्साशून्योऽनपेक्षः शुचिःबाह्याभ्यंतरशौचवान्पुण्यापुण्याभ्यामलिप्तोवा दक्षःभगवद्भजनादावनलसः उदासीनोमानापमानादौसमदृत्तिः अतएवगताव्यथाचेतःपीडायस्यसगतव्यथः सर्वारंभपरित्यागीसंन्यासित्वादेव योमद्भक्तः समेप्रियः ॥ १६ ॥ एतमेवश्लोकंव्याचष्टेत्रिभिःश्लोकैः योनेति इष्टलाभेसतिनहृष्यति अनिष्टप्राप्तौनद्वेष्टि इष्टवियोगेसतिनशोचति इष्टसंयोगमनिष्टपरिहारंवानकांक्षति अनपेक्षत्वात् शुभंकल्याणंपुण्यंचअशुभमंगलंपापंचतेउभेपरित्यक्तुंशीलमस्यसशुभाशुभपरित्यागी एतेनशुचित्वंव्याख्यातं भक्तिमान्भक्तौसततोयुक्तइतिदक्षइत्यर्थः ॥ १७ ॥

उदासीनत्वंव्याचष्टे समइति गतव्यथत्वमुपपादयति संगविवर्जितइतिसंगीहिव्यथतेननुतद्वर्जितइत्यर्थः ॥ १८ ॥ सर्वारंभपरित्यागीत्येतद्व्याचष्टे तुल्येति शिष्टेषुविगीतोनस्यामितिवालोकेषुप्रख्यातःस्या मितिवाइदंमेभूयादितिवाकामयमानःकिंचिदारभतेनत्वयं तुल्यनिंदास्तुतित्वात्संतुष्टत्वाच्च मौनीसंन्यासी अतएवानिकेतोगृहशून्यःकुटीमपिवासार्थंनारभते यतःस्थिरमतिःस्थितप्रज्ञोभक्तिमान्योगीमेम मप्रियोनरःपुरुषः ॥ १९ ॥ मुक्तलक्षणान्येवमुमुक्षोःसाधनत्वेनविधत्ते येत्विति येमुमुक्षवः तुपूर्वोक्तमुक्तापेक्षयाविलक्षणाः इदमद्वेष्टासर्वभूतानामित्यादिनायंयेनप्रतिपादितंधर्मंजातंतदेवामृतस्यमोक्षस्य

समःशत्रौचमित्रेचतथामानापमानयोः॥ शीतोष्णसुखदुःखेषुसमःसंगविवर्जितः ॥ १८ ॥ तुल्यनिंदास्तुतिर्मौनीसंतुष्टेयेनकेनचित्॥ अनिकेतःस्थिरमतिर्भ क्तिमान्मेप्रियोनरः ॥ १९ ॥ येतुधर्मामृतमिदंयथोक्तंपर्युपासते॥ श्रद्दधानामत्परमाभक्तास्तेतीवमेप्रियाः ॥ २० ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गी ता० द्वादशोऽध्यायः ॥ १२ ॥ पर्वणितुषट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

साधनत्वादमृतंधर्मामृतं यथोक्तमुक्तानतिक्रमेणपर्युपासतेसाकल्येनानुतिष्ठंति श्रद्दधानाःश्रद्धायुक्तामत्परमाः अहमेवभगवान्वासुदेवोऽक्षराख्यःसर्वविशेषरहितः परमानंदरूपःपरमःपार्थैतिकःप्राप्योयेषां तेमत्परमाः भक्ताशांतिदांत्यादिमंतोमद्भजनशीलास्तेऽतीवमेममप्रियाः ज्ञानीतुभगवतआत्मैव परिशेषादतीवप्रियत्वंभक्तेष्वेवपर्यवसन्नं योमुक्तानांस्वाभाविकोधर्मःसमुमुक्षुणायत्नतोनुष्ठेयइत्यर्थः यथो क्तंवार्त्तिके उत्पन्नात्मप्रबोधस्यब्रह्मद्वेष्टृत्वादयोगुणाः अयत्नतोभवंत्येवनतुसाधनरूपिणइति समाप्तउपासनाप्रधानस्तत्पदार्थविवेकः अतःपरंवाक्यार्थविचारोजीवब्रह्माभेदप्रतिपादकोभविष्यति ॥ २० ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेगी० द्वादशोऽध्यायः ॥ १२ ॥ समाप्तश्चायमुपासनाकांडः ॥ प० ३६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७५ ॥

ननुअव्यक्तोयमचिंत्योयमविकार्योयमुच्यते नित्यःसर्वगतःस्थाणुरचलोयंसनातनइतिद्वितीयेत्वंपदार्थस्वरूपमुक्तं तथाद्वादशेयेत्वक्षरमनिर्देश्यमव्यक्तंपर्युपासते सर्वत्रगमचिंत्यंचकूटस्थमचलंध्रुवमिति त्वदार्थस्वरूपमुक्तं नचतयोर्भेदःसंभवति लक्षणैक्यात् लक्षणहितयोरव्यक्तत्वमचिंत्यत्वमचलत्वंसर्वगतत्वंचेत्यादिसमानं नचद्वयोःसर्वगतत्वंसंभवति अन्योन्यव्याहत्तत्वेनासर्वगतत्वापत्तेः नचलक्षणभे दाज्जावेपितच्चदात्मगतविशेषाःसंतियेमुक्तात्मनांजीवेशयोश्चान्योन्यंभेदमावहंतित्वात्मानंचस्वाश्रयात्त्वयमेवव्यावर्त्तयंतीतिवाच्यं विशेषाणांसत्त्वेप्रमाणाभावात् ननुमासंतुविशेषाः बंधमोक्षादिव्यव स्थान्यथानुपपत्त्यातुनिर्विशेषेष्वपिपुरुषेषुभेदःसिध्यति ययोक्तंसांख्यदृष्ट्यैः जन्ममरणकरणानांप्रतिनियमाद्युगपत्प्रवृत्तेश्च पुरुषबहुत्वंसिद्धंत्रैगुण्यविपर्ययाच्चैवेतिजन्मादिव्यवस्थातोयुगपत्प्रवृत्त्यदर्श नात्सात्विकराजसादिभेदाच्चनपुरुषैक्यमित्यर्थइतिचेन्न व्यापकानेकात्मवादेभोगसांकर्यप्रसंगात् नसेकत्रांतःकरणेसुखादिरूपेणपरिणतेतत्प्रतिसंवेदीएकएवचेतनइतिनियंतुंशक्यं सर्वेषांसान्निध्याविशे

अत्रक्षिप्तः ॥ ॥ अर्जुनउवाच ॥ ॥ प्रकृतिंपुरुषंचैवक्षेत्रंक्षेत्रज्ञमेवच ॥ एतद्वेदितुमिच्छामिज्ञानंज्ञेयंचकेशव ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ इदंशरीरंकौंतेयक्षेत्रमित्यभिधीयते ॥ एतद्योवेत्तिंतंप्राहुःक्षेत्रज्ञइतितद्विदः ॥ १ ॥

षेणप्रतिसंवेदनापत्तेरवर्जनीयत्वात् श्रोत्रस्यैकस्यापिकर्णशष्कुलीरूपोपाधिभेदादिवांतःकरणरूपोपाधिभेदादेकस्याप्यात्मनःशब्दपहव्यवस्थावज्जन्मादिव्यवस्थापिसेत्स्यतीतिनपुरुषबहुत्वंवक्तव्यं तत श्चजीवेशयोर्लक्षणैक्यादभेदेसिद्धेकिमुत्तरग्रंथेनतत्प्रतिपादनार्थेनेतिचेत्सत्यं यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदितिश्रुतेर्विद्यावस्थायांभेदाभावेप्यविद्यावस्थायामंतःप्रविष्टःशास्ताजनानां एषस्रेवसा धुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतइत्यिव्यवहारदशायांशास्त्यशासितृभावेनकर्तृकारयितृभावेनचप्रसक्तस्यजीवेश्वरयोर्भेदस्यनिरासार्थत्वादुत्तरग्रंथस्यारंभउपपद्यते तत्रानुपदोक्तेनतत्पदार्थेन सहास्याभेदंवक्तुंयोग्यतायैभास्यभासकभावेनक्षेत्रक्षेत्रज्ञत्वंकुंभाद्भास्वतइवविवेकंदर्शयति इदमिति इदमनात्मत्वेनभास्यंघटाद्यहंकारांतंशरीरंविशारणधर्मि हेकौंतेय क्षेत्रक्षिणोत्यात्मानमविद्ययात्रा यतेचविद्ययेतिक्षेत्रंकर्मबीजप्ररोहस्थानंक्षेत्रशब्देनोच्यते एतद्योवेत्तिभासयतितंचिदात्मानंक्षेत्रज्ञइत्यन्वर्थसंज्ञेप्राहुः केप्राहुः तद्विदःक्षेत्रक्षेत्रज्ञविदः एतेनगच्छामिपश्यामिभुंजेइतिअनुभवार्हेर्द्वियाहं कारःप्रतीतिनोभासककोटिनिविष्टाइवभांति तथापितेषांतत्त्वनोभास्यत्वलक्षणोनात्मभावःसिद्धः ॥ १ ॥

एवंक्षेत्रंज्ञव्याख्यायसचयोयत्प्रभावश्चेत्युक्तंक्षेत्रज्ञत्वरूपंतस्यमायिकंप्रभावंव्याचष्टे ज्ञेयमिति एतैर्ज्ञानसाधनैर्यत्तज्ज्ञेयंतत्प्रवक्ष्यामि यज्ज्ञेयंज्ञात्वाअमृतंमोक्षमश्नुतेप्राप्नोति तस्यस्वरूपंतावदाह अनादिमदिति आदिमदव्यक्तं तस्मादव्यक्तमुत्पन्नमितिनदुत्पत्तिस्मरणात् तदन्यदनादिमत् अनादीत्येतावत्युक्तेप्रवाहनित्यत्वमव्यक्तादीनामप्यस्तीतितेषामप्यनादितायांप्राप्तायांतत्प्रतिषेधार्थमनादिमदित्युक्तं यद्वा आदिमच्चतनःपरंचआदिमत्परेकार्यकारणेताभ्यामन्यदनादिमत्परमिति अतएवपरंनिर्विशेषंचनत्वपरंसविशेषंब्रह्मत्रिविधपरिच्छेदशून्यं नसत्प्रधानपरमाण्वादिवत्सदिनिनोच्यते नाप्यसत्शून्यवदसदपि नोच्यते तथाचश्रुतिर्नासदासीन्नोसदासीत्तदानींनासीद्रजोनोव्योमापरोयदिति असच्छब्दितस्यशून्यस्यसच्छब्दितस्यप्रधानस्यरजःशब्दितानांपरमाणूनांपरव्योमशब्दितस्यास्मदग्निमतस्याव्यक्तस्या पिस्रष्टेःप्राक्निषेधंदर्शयति ॥ १२ ॥ एवंसचयइत्येतत्क्षेत्रज्ञत्वरूपमपास्तसमस्तविशेषमुपपाद्यतत्प्रभावंवैश्वरूप्यलक्षणमुपपादयति सर्वतइति सर्वतःसर्वासुदिक्षुअंतर्बहिश्चपा णयःपादाश्चास्यसंतीतिसर्वतःपाणिपादं एवंसर्वतःअक्षीणिशिरांसिमुखानिचयस्यतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमत्श्रवणवत् लोकेसर्वमावृत्यव्याप्यतिष्ठति यथास्वमदृक्तैजसोवासनामयेनैवपाणि

ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वामृतमश्नुते ॥ अनादिमत्परंब्रह्मनसत्तन्नासदुच्यते ॥ १२ ॥
सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखम् ॥ सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति ॥ १३ ॥

पादादिनास्वामंप्रपंचमनुभवति तस्यचजाग्रत्कालेउपाधिभूतंपिंडगतमेवपाणिपादादिकंतदेवस्थूलप्रपंचानुभवसंस्काराधानद्वारावासनामयस्यप्रपंचस्यकारणं वासनामयश्चस्थूलप्रपंचस्यकारणमिति बीजांकुरन्यायेनानयोरन्योन्यस्मिन्नन्योन्यसद्भावोन्योन्यकारणत्वंचास्तीति एवंसकलप्राणिधीवासनोपरक्ताज्ञानोपाधिकंचैतन्यंसकलप्राणिधीवासनामयंसमष्टिसूक्ष्मप्रपंचमवभासयति अस्यचोपा धिभूतंब्रह्मांडगतसकलप्राणिपाणिपादादिकमेव एवंचपूर्ववत्स्थूलसूक्ष्मयोरपिसमष्टिप्रपंचयोरन्योन्यंबीजांकुरन्यायेनकार्यकारणभावमन्योन्यस्यान्योन्यस्मिन्सद्भावंचाभिप्रेत्योक्तंभगवताभाष्यका रेणसकलप्राणिकरणोपाधिद्वारेणज्ञेयब्रह्मणोस्तित्वंप्रतिपाद्यतइतिकार्यद्वाराकारणास्तित्वसिद्धौचकारणाभावोप्यपोद्यते अनादिमत्परंब्रह्मनसत्तन्नासदुच्यतइति ननुप्रक्षालनाद्धिपंकस्यदूरादस्पर्शनंवर मितिन्यायेनव्यर्थस्तर्हिकारणोपन्यासइतिचेन्न तंविनाशुद्धाधिगमायोगात् शाखाचंद्रन्यायेनहिसगुणंनिर्गुणस्यवस्तुनोज्ञापकं यथोक्तंभाष्ये उपाधिरुतमिथ्यारूपमप्यस्तित्वाधिगमायज्ञेयधर्मवत्प रिकल्प्योच्यते सर्वतःपाणिपादमित्यादि तथाहिसंप्रदायविदांवचनमध्यारोपापवादाभ्यांनिअपंचंप्रपंच्यतइति ॥ १३ ॥

॥७७॥

ननुयूपाहवनीयादिवदलौकिकमपिब्रह्मकार्यकारणप्रपंचविशिष्टंचित्रमेवसर्वतःपाणिपादंतदित्यादिनाशास्त्रेणकार्यशेषतयासमर्थ्यते नचवाच्यंउपासनापरंशास्त्रंनब्रह्मणोवैचित्र्यंप्रतिपादयितुमीष्टेइति दे वताधिकरणन्यायेनदेवताविग्रहादिवत्तद्वैचित्र्यस्याप्यवांतरतात्पर्यविषयतयासिद्धेः नचदेवताविग्रहादेर्व्यावहारिकमेवसत्वंनपारमार्थिकंब्रह्मज्ञानेनतस्यबाधादितिवाच्यं सत्ताद्वैविध्यस्याप्रसिद्धेः तस्मा त्सर्वतःपाणिपादत्वादिकंब्रह्मणोवास्तवमेवेतिनापवादमर्हतीत्याशंक्याह सर्वेंद्रियेति सर्वाण्यांतराणिबाह्यानिचेंद्रियाणिमनोबुद्ध्यहंकारचित्तारव्यानिश्रोत्रादीनिचेतियाहकमात्रंसंगृह्यते गुणाश्चविषया स्तेनयाह्यमात्रंगृह्यते समस्तयाह्ययाहकवदाभासतेननुयाह्ययाहकस्वरूपंविचित्रं यथाजलसूर्योऽधस्थइवकंपतइवाभासतेननुवस्तुतोऽधस्थःकंपतेवातद्वदात्मनोयाह्ययाहकाकारत्वंमिथ्येत्यर्थः कुतएतत् य तः सर्वेंद्रियविवर्जितं इंद्रियेतिगुणानामप्युपलक्षणं नहिब्रह्मणिकिंचित्प्राह्यंरूपादिपाहकंवामनआदिवर्तते अशब्दमस्पर्शमरूपमव्ययं अप्राणोह्यमनाःशुभः यत्तदद्दश्यमग्राह्यमचक्षुःश्रोत्रंतदपाणिपाद मित्यादिशास्त्रात्तस्मान्नप्रपंचविशिष्टंविचित्रंब्रह्म कथंतर्हिसर्वंब्रह्मेतिशास्त्रमित्याशंक्याह असक्तंसर्वभृच्चैवेति अत्रसर्वभृदितिसर्वाधारत्वोक्त्यासर्वस्मात्पृथग्भूतमित्युक्तं सर्वस्यब्रह्मणासहाधाराधेयभावो पिकिंघटरूपयोरिवसमवायसंबंधेनकुंडबदरयोरिवसंयोगसंबंधेनवेत्याशंक्यसंबंधविनैवसर्वभृत्त्वंब्रह्मणइत्याह असक्तमिति ननुव्याहतमेतत् असक्तमितिसर्वभृदितिचेति नैषदोषः नह्यूषरभूमिर्मरीचिकोद

सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितम् ॥ असक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृच ॥ १४ ॥

केनसंसक्ताअथचतदाधारभूतापिभवतितद्वदेतद्ब्रविष्यति नन्वेवंप्रपंचस्यमिथ्यात्वमापतनीति तथाचकर्मोपास्तिविधयउपरुध्येरन् न ब्रह्मात्मैकत्वज्ञानेनयावद्वैतंनबाध्यतेतावत्क्रियाकारकादिसर्वव्यवहार स्यसत्यत्वोपगमात्प्राणावैसत्यंतेषामेषसत्यमितिश्रुत्यापिप्राणोपलक्षितस्यकृतस्नस्यप्रपंचस्यव्यावहारिकंसत्यत्वमुक्त्वातानोप्यधिकंपरमार्थसत्यंब्रह्मदर्शितं सत्यत्वंचाबाध्यत्वंतर्किचित्कालंप्राणानामस्ति ब्रह्मणस्तुसार्वदिकमितियथाभूपतीनांभूपतिरित्युक्तेऽप्यैश्वर्याल्पत्वभूयस्त्वकृतोभेदःस्पष्टएवमिहापिद्रष्टव्यं तस्माद्ब्रह्मणःसविशेषत्वंनिष्कलात्मबोधात्प्रागेवनतूर्ध्वमित्यवश्यंतत्त्वज्ञानेनबाधितुंशक्यमित्यनुपा धिकंब्रह्मनकेनचित्कार्यशेषतांनेतुंशक्यं तदधिगमेकियाकारकादिद्वैतोपमर्दादुपास्योपासकोपासनाभेदस्यबाधितत्वात् तस्माद्युक्तमुक्तमुपाधिकृतंरूपंमिथ्येति किंच निर्गुणंगुणभोक्तृच याह्ययाहकसंबंध शून्यमपिग्राहकेषुबुद्ध्यादिषुग्राह्यसंबंधात्सुखाद्याकारेणपरिणतेषुसत्सुकेवलंतत्प्रकाशकत्वमात्रेणगुणभोक्तृत्वमप्यस्यचिदाभासरूपस्योपपद्यते यथाप्रतिबिंबरूपेरवावुपाधिगतंचलनादिकं तथाचश्रुतिः ध्यायतीवलेलायतीवेतिबुद्धौध्यायंत्यांतत्रप्रविष्टश्चिदाभासोध्यायतीवविषयान् बुद्धौलेलायंत्यांविषयप्रदेशंगच्छंत्यांसोपिलेलायतीवेतनतुस्वतोध्यायतिलेलायतिवेतिप्रतिपादयति एतेनअपाणिपादोज वनोग्रहीतापश्यत्यचक्षुःशृण्वत्यकर्णइत्यपिब्रह्मणउपाधिगुणानुगुण्यभजनशक्तिमत्त्वेनैवव्याख्येयं अयमपादोपिपादेजववतिजववान्भवतीति अंधोमणिमविंदत्यादिकंवचनजातंचाचानुसंधेयं त स्माद्युक्तमुक्तंनिर्गुणंगुणभोक्तृचेति भाष्येतुनिर्गुणंसत्वादिगुणरहितमपितेषांगुणानांसुखदुःखमोहात्मकत्वेनपरिणतानांभोक्तृचउपलब्धृचेतिव्याख्यातं ॥ १४ ॥

नन्वसत्कमसंबद्धंचेत्कथमुपलभ्येस्यादित्याशंक्याह बहिरिति भूतानांप्राणिनामेकादशेंद्रियाणिस्थूलभूतानिचकेवलविकारत्वेनव्यवहितत्वात्बहिरित्युच्यते महदहंकारपंचतन्मात्राव्यक्तानिप्रकृतिरूपत्वे नसंनिहितत्वादंतरित्युच्यंते चराचरमिति उभयनिकृष्टश्वराचरोपाध्युपलक्षितावधिभूताःपुरुषाश्चरमचरंचेत्यनेनोच्यंते तत्रचराचरंज्ञेयमितिसामानाधिकरण्यात्पुरुषाणांज्ञेयब्रह्मभावउक्तः बहिरंत श्चज्ञेयमितिषोढशमुविकारेष्वष्टासुप्रकृतिषुचज्ञेयस्यसंबंधउक्तः सचसंबंधोयादृशोयक्षस्तादृशोबलिरितिन्यायेनाध्यस्तप्रकृतिविकृतिनिरूपितत्वेनाध्यस्तएव एवंचपुरुषस्योपलब्धिमात्रशरीरस्यगुणैः सहाध्यासिकसंबंधसत्त्वात्गुणोपलब्धृत्वंयुज्यते यथाप्रकाशमात्रस्वरूपस्यरवेःप्रकाश्यसंबंधापेक्षंप्रकाशयितृत्वंतद्वदित्यर्थः ननुनित्यापरोक्षःपुरुषप्रकृतिविकारसंबद्धश्चतर्हिकुतोनसर्वैर्गृह्यतइत्याशंक्याह सूक्ष्मत्वात्दुर्लक्ष्यत्वात्तज्ज्ञेयं अविज्ञेयंदुर्विज्ञेयं यथाजपाकुसुमोपहितस्यस्फटिकस्यशौक्ल्यंसन्निहितमपिरूपांतरविक्षेपेणतिरोहितंसन्नगृह्यते एवंनित्यापरोक्षमप्यसंगंब्रह्मोपाध्युपधानाद्विक्तंतयानय हीतुंशक्यंकिंत्वौपाधिकधर्मोपेतमेवगृह्यतेमूढैः विद्वद्भिस्तूपाधिप्रविलापनेननुपहत्यमित्याशयः एतदेवाह दूरस्थंचांतिकेचनदिति यथामूढोजलसूर्यबिंबसूर्यादूरस्थंमन्यते विद्वांस्तुउपाधिप्रतिहतनयनरश्मी नामुपर्युल्लुत्यगतानांबिंबयाहित्वंस्पष्टं बिंबस्याधस्त्वयहणंतुपूर्वप्रदत्ताधोमुखवृत्तिसंस्कारापेक्षमितिजानन्बिंबदेशेएवप्रतिबिंबंपश्यति बिंबेएवजलस्थत्वमध्यस्यतेननुजलेप्रतिबिंबवृत्ति उपाधौधर्म्य ध्यासकल्पनातोविषयस्योपाधिसंसर्गमात्राध्यासकल्पनेलाघवात् एवंबिंबभूतंब्रह्मप्रतिबिंबभूताज्जीवान्मूढानांविप्रकृष्टंविदुषांत्वत्यंतसंनिकृष्टमिति ॥ १५ ॥ एतदेवोपपादयत्यर्धेन अविभक्तंचेति एकए

बहिरंतश्चभूतानामचरंचरमेवच ॥ सूक्ष्मत्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत् ॥ १५ ॥ अविभक्तंचभूतेषुविभक्तमिवचस्थितम् ॥ भूतभर्तृचत
ज्ञेयंग्रसिष्णुप्रभविष्णुच ॥ १६ ॥ ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यते ॥ ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यधिष्ठितम् ॥ १७ ॥

वतुभूतात्माभूतेभूतेष्वयस्थितः एकधाबहुधाचैवदृश्यतेजलचंद्रवदितिश्रुतेर्भूतेषुकार्यकारणसंघातापन्नेषुजलपात्रेषुचंद्रस्येवब्रह्मणःप्रतिबिंबाजीवास्तेचोक्तरीत्याबिंबादनन्याइतिदृष्टेपणभूतेष्वविभक्तंच विभागमप्राप्तमपिज्ञेयवस्तुमूढदृष्ट्याविभक्तमिवदूरदेशस्थमिवचाद्विभिन्नमिवचस्थितं एवंतर्हिचंद्रादुदपात्राणामिवभूतानांपृथक्सत्त्वापत्तिरित्याशंक्याह भूतभर्तृचेति अधिष्ठानत्वेनसर्वाणिभूतानिधार यतीतिननतस्तेषांपृथक्सत्तास्तिरज्जुतइवतदध्यस्तानांसर्पदंडधारादीनामित्यर्थः एतदेवाह यसिष्णुप्रभविष्णुच यथारज्जुस्तत्त्वज्ञानदशायांसर्पादीनृपसतिअज्ञानदशायांचतानेवप्रसूतेतद्वत्ज्ञातंब्रह्मसर्वंभूता निग्रसिष्णुयसनशीलमज्ञातंच सर्वभूतानांप्रभविष्णुउत्पादनशीलं ॥ १६ ॥ एवंज्ञेयस्यतटस्थलक्षणमुक्त्वास्वरूपलक्षणमाह ज्योतिषामिति ज्योतिषांबाह्यानामादित्यादीनांतराणांचबुध्यादीनामितराव भासकानामपितज्ज्ञेयंब्रह्म ज्योतिरवभासकं चैतन्यज्योतिषोजडज्योतिरवभासकत्वोपपत्तेः तथाचश्रुतयः येनसूर्यस्तपतितेजसेद्धः तस्यभासासर्वमिदंविभातीत्याद्याः वक्ष्यतिच यदादित्यगतंतेजइत्या दितमसोऽज्ञानात्भूतप्रासप्रसवहेतोःपरंदूरस्थंतदुच्यते ननुयथाचांद्रस्यज्योतिषोवभासकंतत्सजातीयंसौरंज्योतिरितिज्योतिःशास्त्रेप्रसिद्धं एवंसौरादिज्योतिषामप्यवभासकंकिंचित्तत्सजातीयंज्योतिरस्ती किंकंस्यादित्याशंक्याह ज्ञानमिति केवलज्ञप्तिमात्रशरीरंयज्ज्योतिर्नतुभौतिकंतदेवज्ञेयंवस्तु आहतत्वात्ज्ञानेनप्राप्तुमिष्टतमं कुतस्तर्हितज्ज्ञानमतआह ज्ञानगम्यमिति यतस्तज्ज्ञानेनाप्तानित्वादिनाज्ञान साधनेनगम्यंप्राप्यं किंतर्हियामांतरवद्देशव्यवहितंवाबाल्ययौवनाद्यवस्थांतरवत्कालव्यवहितंवातत्याप्यमस्तीत्यतआह हृदिसर्वस्यधिष्ठितमिति स्वात्मभूतमेवतदंतर्दृष्टीनांसम्यक्प्रकाशतइत्यर्थः ॥ १७ ॥

॥७८॥

उक्तमर्थजातमुपसंहरति इतीति क्षेत्रंमहाभूतादिधृत्यंतं ज्ञानंज्ञानसाधनममानित्वादितत्त्वज्ञानार्थदर्शनांतं ज्ञेयमनादिमत्परमित्यादिधिष्ठितमित्यंतं श्रुतिभ्यःस्मृतिभ्यश्चसमासतःसंक्षेपतउक्तं मद्भक्तएतद्त्रयं विज्ञायमद्भावायब्रह्मभावायोपपद्यतेयुक्तोभवति भक्त्यैवप्राप्यंब्रह्मत्वात्प्यब्रह्मैवभवति तथाचश्रुतिः यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइति ब्रह्मवेदब्रह्मैवभवतीति च ॥ १८ ॥ एवंक्षेत्रंशरीराख्यमव्यक्तमुक्तंतत्प्रकाराश्चमहदाद्यास्त्रयोविंशतिस्तद्विकाराइच्छादयोज्ञानाज्ञानशब्दिताअमानित्वमानित्वादयः पुरुषश्चउक्तः इदानींक्षेत्रक्षेत्रज्ञयोर्मध्येयस्मीयज्जायतेतच्छ्रे त्रज्ञस्यप्रभावश्चेतिद्वयंवक्तव्यंतत्रार्थविद्गणोतित्रिभिः प्रकृतिमिति सप्तमाध्यायेऽष्टधायाप्रकृतिरपराउक्तासात्रप्रकृतिः यातुजीवभूतापराप्रकृतिरुक्तासात्रपुरुषशब्देनोच्यते एतौहिसंसृतौसंसारंजनयतः वियोगश्चतयोर्मोक्षः तत्रतावुभावप्यनादीविद्धि तयोरादिमत्त्वेसंसारस्याकस्मिकत्वापातात्कृतहानाकृताभ्यागमप्रसंगश्चेत्यन्यत्रविस्तरः विकारानृइच्छादीन् गुणान्वुद्धींद्रियादींश्च प्रकृतिसंभवान्वि द्धि ॥ १९ ॥ उभयोरपिसंसारंप्रतिकारणत्वेद्वारमाह कार्येति कार्यशरीरंतदारंभकाणिभूतानिविषयाश्च कारणंत्रयोदशेंद्रियाणितदाश्रिताश्चसुखदुःखमोहात्मकागुणाश्च करणेतिपाठेपिसएवार्थः एतयोः

इतिक्षेत्रंतथाज्ञानंज्ञेयंचोक्तंसमासतः ॥ मद्भक्तएतद्विज्ञायमद्भावायोपपद्यते ॥ १८ ॥ प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपि ॥
विकारांश्चगुणांश्चैवविद्धिप्रकृतिसंभवान् ॥ १९ ॥ कार्यकारणकर्तृत्वेहेतुःप्रकृतिरुच्यते ॥ पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरुच्यते ॥ २० ॥

कार्यकारणयोःकर्तृत्वेनिमित्तेसतिकर्तृत्वेनेत्यर्थः हेतुःसंसारस्यकारणंप्रकृतिर्भवति तथापुरुषःसुखदुःखानांभोक्तृत्वेनसंसारस्यहेतुरिति यद्हिकार्यकारणसुखदुःखस्वरूपहेतुफलात्मनाप्रकृतिर्नपरिणमे ततदापुरुषःकिमुपलभेत अनुपलब्ध्वावाकथंसंसारीस्यात् अनुपलब्धृकावाप्रकृतिःकुत्रोपयुज्येत तस्मादुपलभ्योपलब्धृसंयोगःसंसारकारणमितियथाभाष्यंव्याख्यातं यद्वा पुरुषस्यकार्यत्वेकारणत्वेक र्तृत्वेचप्रकृतिरेवपुरुषतादात्म्यंप्राप्ताहेतुर्भवति वह्निनादात्म्यंप्राप्तंलोहंवह्नेश्चतुष्कोणत्वादाविवहेतुर्भवति तथाप्रकृतेःसुखदुःखभोक्तृत्वेस्वच्छायाप्रदानेनपुरुषःकारणं वह्निरिवलोहस्यस्वच्छायाप्रदानेनद ग्धृत्वे तथाहि कार्यत्वादयःप्राकृतदेहेंद्रियबुद्धिधर्माःसंतश्चिदात्मन्यारोप्यंतेगौरोहंमनुष्यपुत्रोहंकाणोहंस्थंजोहंकरोम्यहमकार्षमहमिति तथाचिच्छायापन्नाबुद्धिश्चेतयाम्यहंसुखदुःखादीनुपलभेइतिम न्यते सोयंप्रकृतिपुरुषयोरन्योन्यधर्माध्यासःसंसारस्यकारणमित्युपपादितंभवति सांख्याभिमतंपुरुषस्यभोक्तृत्वमपिनिरस्तंभवति अन्यथाप्रकृतिःकर्त्रीपुरुषोभोक्तेतिकर्तृत्वभोक्तृत्वयोर्वैयधिकरण्यमा पद्येत नचभोक्तुःपुरुषस्यनिर्विकारत्वमपिवक्तुंशक्यमित्यन्यत्रविस्तरः द्वंद्वांतेश्रूयमाणंपदंप्रत्येकमभिसंबध्यतइतित्वंप्रत्ययस्यपूर्वाभ्यामपिसंबंधेकार्यत्वंकारणत्वंकर्तृत्वंचेतिविपहः द्वंद्वैकवद्भावश्चप्रातिप दिकार्थलिंगपरिमाणवचनमात्रेप्रथमेत्यादिवत् ॥ २० ॥

ननुयथाबौद्धंकर्तृत्वंपुंस्यारोप्यतेएवंपौंस्नंभोक्तृत्वंबुद्धावस्त्वित्येतंभ्रमंवारयति पुरुषइति हिप्रसिद्धं प्रकृतिस्थःदेहेंद्रियमनःसंघातमध्यारूढस्तत्तादात्म्यंगतइत्यर्थः प्रकृतिजान्सुखदुःखमोहात्मकान्गुणा न्भुंक्तेउपलभतेयदातुसुप्तिसमाधिमूर्छादौप्रकृतिस्थत्वंनास्तितदानसुखादीनुपलभतेतेनोपाधिगतान्येवसुखादीनितदभावेनप्रतीयंतइतिसिद्धं श्रुतिरप्यात्मेंद्रियमनोयुक्तंभोक्तेत्याद्दुर्मनीषिणइतींद्रियम नोयोगादेवात्मनिभोक्तृत्वंदर्शयंतीशुद्धस्यकेवलस्यभोक्तृत्वंनास्तीतिदर्शयति कुतस्तर्ह्यभोक्तृरुप्यस्यप्राकृतोबंधइतिताह कारणमिति अस्यपुरुषस्यसदसद्योनिजन्मानोदेवाः असद्यो निजन्मजातस्तिर्यंचःस्थावराश्च सदसद्योनिजन्मानोमनुष्याः एतेषुत्रिष्वपिजन्मसुप्राप्येषुअस्यपुंसोगुणसंगःसुखादिष्वभिष्वंगःकारणंहेतुः तथाहि सात्विकादेवाभवंतिराजसामनुष्यास्तामसाश्चपशवस्ते षांतत्तद्योनिप्राप्तौतद्गुणप्राधान्यमेवकारणं वक्ष्यतिच ऊर्ध्वंगच्छंतिसत्वस्थाइत्यादि यद्वाप्रकृतिस्थोविद्वानविद्वान्वागुणान्भुंक्ते पश्वादिभिश्चाविशेषादितिन्यायात् तत्किंविद्वानिवाविद्वानपिकुतोनमुच्य तेअविद्वानिवविद्वान्वाकुतोनबध्यतेइत्याशंक्याह कारणमिति गुणेषुदेहेंद्रियविषयेषुसंगःअहमिदंममेदमित्यभिनिवेशःसएवजन्मकारणं विदुषांतुतदभावान्नजन्म समानेपिदेहसंबंधेयदायक्षोदेहाभिमानं धत्तेतदासएवदेहपीड्यापीड्यतेनतुदेहपतिर्जीवः यदात्वयंदेहाभिमानंधत्तेतदानेतरइतिप्रसिद्धं संगस्यबंधकत्वंनतुसांनिध्यमात्रंबंधकं अतोविद्वदविदुषोःसमानेपिदेहसंबंधेसंगतदभावकृतोमहान्विशेषइ

पुरुषःप्रकृतिस्थोहिभुंक्तेप्रकृतिजान्गुणान्॥ कारणंगुणसंगोस्यसदसद्योनिजन्मसु॥ २१॥
उपद्रष्टानुमंताचभर्त्ताभोक्तामहेश्वरः॥ परमात्मेतिचाप्युक्तोदेहेस्मिन्पुरुषःपरः॥ २२॥

तिभावः॥ २१॥ सचयोयत्प्रभावश्चेतिक्षेत्रज्ञतत्प्रभावौव्याख्येयत्वेनप्रतिज्ञातौतत्रक्षेत्रज्ञःप्रागेववर्णितस्तस्येदानींप्रभावमाह उपद्रष्टेति तत्रपूर्वंगुणसंगोजन्मकारणमित्युक्तं तत्रसंगश्चतुर्विधः पुरुषापला पेनगुणमात्रप्राधान्येनवातमंतर्भाव्यगुणप्राधान्येनवागुणानांसमप्राधान्येनवाअप्राधान्येनवेति तत्राद्येदेहेंद्रियमनआदिरूपंगुणसंघातमेवआत्मत्वेनपश्यन्भोक्ताभवति यथाचार्वाकादिः द्वितीयेगुणानां प्राधान्यादात्मनिवास्तवकर्तृत्वाद्यभिमानेनकर्मफलानांभर्त्तासंचेताभवति यथातार्किकादिः तृतीयेगुणानांसमप्राधान्येनगुणगतमपिभोक्तृत्वमसंगेप्यात्मनिवस्तुतोभोक्तृतातांकावदनुमन्यते यथासांख्यः चतु र्थेसर्वथापिगुणधर्माणामात्मनिसंक्रममपश्यन्नुदासीनबोधरूपत्वेनगुणप्रचारदर्शीउपद्रष्टाभवति यथास्माकंसाक्षी एतेषुचतुर्ष्वपिगुणसंगिषूपद्रष्टोत्तमः अनुमंताभध्यमः भर्त्ताअधमः भोक्ताअधमाध मः सएवगुणान्वशीकृत्ययदाक्रीडतितदामहेश्वरइत्युच्यते यःसर्गस्थित्यंतकर्त्ताप्रभुर्जगदंतर्यामीसएवगुणानपहायस्थितःपरमात्मेतिचाप्युक्तोभवति यद्यप्युपद्रष्टापिगुणानपहायतत्साक्षित्वेनस्थितोभवति तथापितस्यैवसंघातोपहितस्यसंघातांतरप्रचारदर्शित्वाभावादयंसकलसंघातप्रचारदर्शीतिसर्वोत्कृष्टत्वात्परमोयमात्मा तमेनंवक्ष्यति उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः योलोकत्रयमाविश्यबिभर्त्य व्ययईश्वरइति एतावपिगुणसंगिनौ एवमेकएवदेहेस्मिन्विद्यमानःपरोगुणातीतःस्वात्मनिगुणान्प्रविलाप्यस्थितोखंडैकरसआत्मागुणसंगेनषड्विधोभवति अयमेवास्यप्रभावः तत्रअनुमंतृभर्तृभोक्तृभिस्त्रिभी रूपैरयंबध्यतेउपद्रष्टमहेश्वरपरमात्मरूपैस्तुनित्यमुक्तएकएवेतिज्ञेयं अत्रभाष्यार्थोप्यनुसंधेयोविस्तरभयात्तुनप्रदर्शितः॥ २२॥

॥ ७९ ॥

एवंयथोक्तलक्षणात्मज्ञानेफलमाह एवमिति गुणैःस्वविकारैःसर्वथाविहितेननिषिद्धेनवाकर्मणावर्तमानोपिनसभूयोभिजायतेपुनर्जन्मनलभतेमुक्तोभवतीत्यर्थः॥ २३॥ एवंविधात्मदर्शनेऽधिकारिभेदे नोपायविकल्पानाह ध्यानेनेति अत्रयेआत्मानंविविदिषंतितेनिष्कामकर्मणापरमेश्वरमाराधयंतितेकर्मयोगिनः ततएवोत्पन्नविविदिषावेदांतश्रवणेप्रवर्तंते ततःप्रमाणगतासंभावनानिवृत्तौसत्यांतस्यैवार्थ स्यमननेप्रवर्त्तंतेप्रमेयगतासंभावनानिवृत्त्यर्थंतेसांख्याः ततःप्रमाणप्रमेयगतासंभावनायानिवृत्त्यनंतरमनात्मनिदेहादावात्मबुद्धिरूपायाविपरीतभावनायानिवृत्त्यर्थंनिदिध्यासनंविजातीयप्रत्ययतिरस्का रपूर्वकसजातीयप्रत्ययप्रवाहीकरणलक्षणंकर्तुंप्रवर्तंतेततस्तत्परिपाकेआत्मनिबुद्धिर्दृढाभवतीआत्मानंपरमेश्वरंपश्यंतिध्यायिनः तत्रयेकर्मसांख्ययोर्निष्णातास्तेध्यानेनात्मनिदेहेआत्मानंपरमेश्वरंआत्मनाबु द्ध्यापश्यंति अन्येत्वकृतकर्माणःसांख्येनयोगेनविचारात्मकेनयोगेनध्यानद्वारापश्यंति अन्येपुनःकर्मयोगेनैवपूर्वोक्तलक्षणेनसांख्याध्यानद्वारापश्यंतीतिसाधनत्रयस्यसमुच्चयोनुविकल्पः॥ २४॥ पक्षां तरमाह अन्येत्विति अन्येऊहापोहकौशलहीनाः तुशब्देनपूर्वोक्तेभ्योविलक्षणाः एवंपूर्वोक्तप्रकारमजानंतोन्येभ्यआचार्येभ्यःश्रुत्वाआत्मनोनिर्विशेषब्रह्मचैतन्यरूपत्वंतदुपासनामार्गंचाधिगत्यउपासते

यएवंवेत्तिपुरुषंप्रकृतिंचगुणैःसह॥ सर्वथावर्तमानोपिनसभूयोभिजायते॥ २३॥ ध्यानेनात्मनिपश्यंतिकेचिदात्मानमात्मना॥ अन्येसां ख्येनयोगेनकर्मयोगेनचापरे॥ २४॥ अन्येत्वेवमजानंतःश्रुत्वान्येभ्यउपासते॥ तेपिचातितरंत्येवमृत्युंश्रुतिपरायणाः॥ २५॥ यावत्संजा यतेकिंचित्सत्वंस्थावरजंगमम्॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धिभरतर्षभ॥ २६॥

यथोक्तप्रकारेणध्यायंतितेपिचमृत्युंससारंतरंत्येव अपिशब्दात्पूर्वश्लोकोक्तास्तरंतीत्यत्रकिमाश्चर्यमितिगम्यते एवशब्दात्तेषांमुख्यक्रमाभावेपितरणेसंशयोनास्ति यतस्तेश्रुतिपरायणाःश्रुतिःश्रवणंतदेवप रंअयनंमोक्षसाधनंयेषांतितथा ध्यानेप्रवृत्त्यतिशयान्तेषांचित्तशुद्ध्यर्थंकर्मापेक्षा वेदोक्ततत्त्वेदृढनिश्चयाच्चासंभावनानिवृत्त्यर्थंश्रवणमननापेक्षेतिभावः अयंचब्रह्मसाक्षात्कारःसंवादिध्रुवरूपइतिकेचित् प्रमारूपइत्यन्ये तथाहि यथाकश्चिन्मणिप्रभांमणिबुद्ध्यापश्यन्भ्रांतएवतथापितद्वद्दृढणकालेमणिंलभतेऽतःसंवादिध्रुवः एवंत्वंपदार्थंतत्पदार्थंमणिप्रभाभूतंतत्पदार्थबुद्ध्याभावयन्व्यवहारतोभ्रांतएवत थापितत्साक्षात्कारकालेतदनन्यस्यतत्पदार्थस्यसाक्षात्कारोपिसंवादिध्रुवन्यायेनजायतेइति तथाचवसिष्ठः असत्येसत्यतासाधोशाश्वतीपरिदृश्यते शून्येनध्यानयोगेनशाश्वतंप्राप्यतेपदमिति व्यवहारतो निर्विशेषस्वरूपत्वेनासत्येआत्मनितत्रनिर्विशेषत्वभावनंशून्योनिर्विषयोयंध्यानयोगोयोषित्यग्निध्यानवत्तथापितेनशाश्वतीसत्यताप्राप्यतेदृश्यतइतिवसिष्ठवाक्यार्थः कल्पद्रुमाचार्यास्तु वेदांतवाक्य जध्यानभावनाजाःपरोक्षधीर्मूलप्रमाणदाढर्ध्येनभ्रमत्वंप्रतिपद्यतेइतिप्राहुः॥ २५॥ पूर्वंकार्यकारणकर्तृत्वेइत्यत्रचिदचितोःपुंप्रकृत्योरन्योन्यधर्माध्यासउक्तस्तस्यैवगुणसंगरूपस्यकारणंगुणसंगोस्येतिना नाजन्महेतुत्वंचोक्तंतद्विशदयति यावदिति सत्त्वंजीवरूपं गुणसंगोत्ररूपाद्यासकिर्नैकंतुक्षेत्रक्षेत्रज्ञयोःसंयोगोन्योन्यस्मिन्नन्योन्यात्मकताध्यासलक्षणोबोध्यः शेषंस्पष्टं॥ २६॥

तन्नाशोपायमाह समामिति सममपरिणामिनंकूटस्थंनित्यं सर्वेषुभूतेषुदेहाद्याकारेणपरिणतेषुतिष्ठंतं एतेनदेहएवतदधिगमंस्यानमित्युक्तं परमेश्वरमंतर्यामिणंसर्गस्थित्यंतकर्तारं अतएवांतर्मुखदृष्ट्याविनश्यत्सुतेषुभूतेषुरज्जूरगादिवत्कल्पितत्वाददर्शनंगच्छसुविभुत्वादात्मत्वान्नित्यदृपूपत्वाच्चाविनश्यंतंसर्वात्मप्यवस्थात्यदर्शनमगच्छंतंयःपश्यतिसएवपश्यति अन्येंऽधाइत्यर्थः ॥ २७ ॥ दर्शनैफलमाह समामिति स्वदेहेइवसर्वत्रदेहमात्रेसमवस्थितंसम्यगवस्थितमीश्वरंसमंसमतयापश्यन्हियतःससर्वाभेददर्शीआत्मनादेहादिनाआत्मानंईश्वरंनहिनस्तिनानायोनिसंकटेपुपातनेननपीडयतिकिंतुनतःपरांगतिं मोक्षंयाति यद्वाऐकात्म्यदर्शीत्वात्त्वात्मानमिवान्यमपिनहिनस्ति सर्वत्रदयालुर्भवतीतिभावः ततश्चपरांगतिंयाति ॥ २८ ॥ ननुविषमत्वभावानिभूतानिकःसमबुद्ध्यापश्यत्यग्निमिवशीतबुद्ध्येत्याशंक्याह प्रकृत्यैवेति सर्वशःसर्वप्रकारेणकर्माणिवाङ्मनःकायैरारब्धानिप्रकृत्यैवक्रियमाणानीतिथःपश्यतितथाआत्मानंचाकर्तारंयःपश्यतिपूर्वोक्तरीत्यासएवसर्वत्रसमंपश्यतीतिपूर्वेणान्वयः ॥ २९ ॥ ननुकथंप्रकृतेरेवकर्तृत्वंनत्वात्मनइत्याशंक्याह यदेति भूतानांवियदादीनांजरायुजादीनांचपृथग्भावंनानाभावेनावस्थानंपरिदृश्यमानमिदंयदाएकस्थंएकस्मिन्नात्मनिस्थितंरज्वांसर्पादिवत्कुनकेवाकुंडलादिवत्विलीनंशास्त्राचार्योपदेशमनुपश्यति ततएवैकस्मात्विस्तारंचभूतपृथग्भावस्यच्युत्थानावस्थामनुस्मादिवत्पश्यतितदाब्रह्मसंपद्यतेब्रह्मैवभवति अयंभावः कर्तृत्वंहिक्रियावत्त्वंक्रियाचपरिस्पंदः

समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरं॥ विनश्यत्स्वविनश्यंतंयःपश्यतिसपश्यति॥ २७॥ समंपश्यन्हिसर्वत्रसमवस्थितमीश्वरम्॥ नहिनस्त्यात्मनात्मानंततोयातिपरांगतिं॥ २८॥ प्रकृत्यैवचकर्माणिक्रियमाणानिसर्वशः॥ यःपश्यतितथात्मानमकर्त्तारंसपश्यति॥ २९॥ यदाभूतपृथग्भावमेकस्थमनुपश्यति॥ ततएवचविस्तारंब्रह्मसंपद्यतेतदा॥ ३०॥ अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः॥ शरीरस्थोपिकौंतेयनकरोतिनलिप्यते॥ ३१॥

सचपरिच्छिन्नस्यपृथग्भूतस्यप्राकृतस्यबुद्ध्यादेरेवसंभवतिननुव्यापकस्यसर्वभूतपृथग्भावयसिष्णोरात्मनइति ॥ ३० ॥ नन्वात्मनोविभुत्वेनरूपेणकर्तृत्वंमास्त्वीकारिदेहाद्यवच्छिन्नेननतूरूपेणतद्वक्तव्यमन्यथानुभवविरोधादित्याशंक्याह अनादित्वादिति अयंसर्वेषांप्राणिनांनित्यापरोक्षः परमोदेहादिभ्योऽपरमेभ्यआत्मभ्योन्यःकोशपंचकातीतआत्मापरमात्मा अव्ययःनव्येतिपरिच्छिद्यतेदेशतःकालतोवस्तुतश्चेत्यव्ययः अव्ययत्वेहेतुः अनादित्वादिति यद्धिआदिमदाकाशादितद्घोतिनत्वंयव्येतिअनादित्वात् नन्वनादिभावस्यानंत्यनियमेनात्मनःकालतःपरिच्छेदोमास्तु तथादेशतःपरिच्छिन्नस्यनाशावश्यंभावादनादित्वायोगाच्चदेशतोपिपरिच्छेदोब्रह्मणोमास्तु ननुपरमाणुवद्ब्रह्मविभ्यतीतिचेन्न दशदिगवच्छेद्यप्रदेशभेदवतोद्रव्यस्यनिरवयवत्वरूपाणुत्वासिद्धेः नहिपरमाणोःपूर्वदिगवच्छिन्नोभागःपश्चिमयाव्यवच्छेत्तुंशक्यते अनुभवविरोधात् देशतःपरिच्छेदाभावादेवसजातीयविजातीयवस्तुसद्भावकृतःपरिच्छेदोपिमास्तुतथापिविचित्रशक्तियुक्तस्याग्निनवप्रपंचरचनापटीयसःपरस्यसर्वेश्वरत्वसर्वज्ञत्वादिगुणयुक्तस्यत्वगतभेदोवस्थंभावी स्वशक्तिमायावच्छिन्नेनरूपेणजगत्कर्तृत्वंदेहावच्छेदेनाग्निहोत्रादिकर्तृत्वंचावश्यंवक्तव्यमित्याशंक्याह निर्गुणत्वादिति योहिगुणवानाकाशादिःससंयोगंविभागंवोपाधिंप्राप्यस्वगुणंशब्दमाविष्करोतिननुत्वस्मिन्नसंतंस्पर्शंकेनचिदपिउपाधिनादर्शयितुमीष्टे एवंआत्मासर्वगुणहीनःसत्यप्यवच्छेदलाभेकर्तृत्वादिकंगुणमाविष्कर्तुंनसमर्थइति फलितमाह शरीरस्थोपीति स्पष्टार्थमेतत् ॥ ३१ ॥ ॥८०॥

निर्गुणत्वान्नकरोतीतिसिद्धं असंगत्वान्नोपलिप्यतइत्याह यथेति यथाआकाशोधूमादिनानलिप्यतेसौक्ष्म्यादसंगत्वभावत्वात् एवमात्मापुण्यपापादिनानोपलिप्यतइत्यर्थः ॥ ३२ ॥ नकरोतिनलिप्यतइतिद्वयमपिदृष्टांतांतरेणप्रतिपादयति यथेति यथासूर्यःस्वसत्तामात्रेणविश्वंप्रकाशयतिननुव्यापाराविष्टतयाकुर्विंदइवपटं यथाचैषप्रकाश्यधर्मैर्दुर्गंधादिभिर्नलिप्यतेएवमयंक्षेत्रीक्षेत्रज्ञःसूर्यवदेकएवसन्नेकधाभूतंक्षेत्रंमहाभूतानीत्यादिनाचतुर्विंशतितत्त्वात्मकमिच्छाद्वेषादिविकारयुक्तमुक्तंतत्स्वसत्तामात्रेणप्रकाशयतिहेभारतननुव्यापाराविष्टतयातत्संपादयति तद्धर्मैर्वापुण्यपापादिभिर्नलिप्यते सूर्यदृष्टांतेनैकत्वमकर्तृत्वप्रयुक्तमलेपत्वंचदर्शितं तथाचश्रुतयः यथाह्ययंज्योतिरात्माविवस्वानपोभिन्नाबहुरूपोनुगच्छन् उपाधिनाक्रियतेभेदरूपोदेवःक्षेत्रेष्वेवमजोयमात्मा सूर्योयथासर्वलोकस्यचक्षुर्नलिप्यतेचाक्षुषैर्बाह्यदोषैः एकस्तथासर्वभूतांतरात्मानलिप्यतेलोकदुःखेनबाह्यइति ॥ ३३ ॥ अध्यायार्थंरुक्त्वमुपसंहरति क्षेत्रेति क्षेत्रक्षेत्रज्ञयोःपूर्वोक्तयोरेवमुक्तरीत्याअंतरंभेदंजडत्वाजडत्वकर्तृत्वाकर्तृत्वविकारित्वाविकारित्वकृतंवैलक्षण्यंज्ञानचक्षुःशास्त्राचार्योपदेशात्मप्रत्ययजनितेनज्ञानचक्षुषायेविदुस्तेपरंमोक्षंयांतिप्रामुवंति किंसांख्यानामिवास्माकमपिगुणपुरुषांतरज्ञानादेवकैवल्यमुच्यतेइत्याशंक्याह भूतप्रकृतिमोक्षमिति भूतानांवियदादीनांप्रकृतिरुपादानंत्रिगुणात्मिकाअविद्यातस्याविद्ययामोक्षंनिरन्वयोच्छेदंचयेविदुस्तएवपरंयांतिनतुक्षेत्रक्षेत्रज्ञयोरंतरमात्रविदइत्यर्थः यद्येकासत्याविद्याच

यथासर्वगतंसौक्ष्म्यादाकाशंनोपलिप्यते॥ सर्वत्रावस्थितोदेहेतथात्मानोपलिप्यते॥ ३२॥ यथाप्रकाशयत्येकःकृत्स्नंलोकमिमंरविः॥ क्षेत्रंक्षेत्रीतथाकृत्स्नंप्रकाशयतिभारत॥ ३३॥ क्षेत्रक्षेत्रज्ञयोरेवमंतरंज्ञानचक्षुषा॥ भूतप्रकृतिमोक्षंचयेविदुर्यांतितेपरं॥ ३४॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिश्रीमद्भगवद्गीतासू० क्षेत्रक्षेत्रज्ञविभागयोगोनामत्रयोदशोऽध्यायः॥ १३॥पर्वणितुसमत्रिंशोऽध्यायः॥३७॥ ॥९॥ ॥९॥ ॥श्रीभगवानुवाच॥

परंभूयःप्रवक्ष्यामिज्ञानानांज्ञानमुत्तमं॥ यज्ज्ञात्वामुनयःसर्वेपरांसिद्धिमितोगताः॥ १॥

प्रकृतिस्तर्हिविभूनामलिप्तदृशांबद्धनांपुरुषाणांमुक्तानामपितद्दर्शनमपरिहार्यं तथाचतेषामपिबंधप्रसक्तिः यदितुमिथ्यातर्हियस्यैवात्मसाक्षात्कारोजातस्तद्दृष्ट्यासर्वथैवरज्जूरगवद्बाधिताकालत्रयेपिनास्ति इतरेषांत्वनादिरनंतास्त्रेवेतिवक्तुंशक्यं तस्मान्नप्रकृतिपुरुषांतरज्ञानमात्रात्कैवल्यंकिंतुप्रकृतिबाधेनपुरुषज्ञानात्सर्पबाधेनरज्जुदर्शनात्भयनिवृत्तिवद्बंधनिवृत्तिरितिसिद्धं ॥ ३४ ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेत्रयोदशोऽध्यायः ॥ १३ ॥ प० ३७ ॥ ॥९॥ पूर्वाध्यायांतेभूतप्रकृतिमोक्षंचयेविदुस्तेपरंयांतीत्युक्तंतत्रकावाभूतप्रकृतिःकिमाश्रयेणतस्याभूतजनकत्वंकथंवाबंधकत्वंकथंचततोमोक्षः किंचमुक्तानांलक्षणमित्येतदर्थजातंविवरीतुंचतुर्दशोध्यायआरभ्यते तत्ररुच्युत्पादनार्थंपरंज्ञानंस्तुवन्श्रीभगवानुवाच परमिति परंसर्वोत्कृष्टंब्रह्मविषयत्वात्ज्ञानंभूयःपुनःअसकृदुक्तमपिप्रवक्ष्यामिकिंतत्स्वरूपं आह ज्ञानानाममानित्यादीनांयज्ञादीनांज्ञानसाधनानांमध्येयदुत्तमंमोक्षफलत्वादंतरंगंतदेवतत् अहंघटंजानामीत्यत्राहमर्थस्यघटाकारवत्तेर्घटस्यचज्ञानमस्तीतिविषयभेदात् ज्ञानत्रयमस्ति तत्राद्यद्वयंनांतरीयकंयच्चउत्तमंचरमंघटप्रकाशफलरूपंज्ञानंतदेवपरंब्रह्मेत्यर्थः यथोक्तंवार्तिककारैः परागर्थप्रमेयेषुप्रामाफलत्वेनसंमता संवित्तैवेहज्ञेयोर्थोवेदांतोक्तिप्रमाणतइति यज्ज्ञानंज्ञात्वावेदांतवाक्यजन्ययाधीवृत्त्याअपरोक्षीकृत्यपरांसिद्धिंमोक्षमितःसंसारात्संसारंविहायगताःप्राप्ताः ॥ १ ॥

इदंज्ञानंविषयविषयिरूपविकल्पविनिर्मुक्तमुपाश्रित्यममसाधर्म्यंसर्वात्मत्वंसर्वनियंतृत्वंसर्वज्ञत्वादिधर्मसाम्यंसाधर्म्यमागताः तथाचश्रुतयोयएववेदाहंब्रह्मास्मीतिसइदंसर्वंभव तिसर्वस्यवशीसर्वस्येशानःसर्वस्याधिपतिःसनसाधुनाकर्मणाभूयानोएवासाधुनाकनीयानितिज्ञानफलमीश्वरसाधर्म्यप्राप्तिमाहुः किंच भृगुंहिमभृगवेज्ञानबलादेवसर्गेपिनजायंतेप्रलयकालेचतंत्तद्भूत भावंगच्छंतोनप्रलयाद्याद्यादिभिर्व्यथंतेव्यथांप्राप्नुवंति इदंश्लोकद्वयंभाष्येवक्ष्यमाणज्ञानस्तुत्यर्थत्वेनैवव्याख्यातं तज्ज्ञानमुपाश्रित्यज्ञानसाधनमनुष्ठायेतिपदार्थः शेषंस्पष्टं॥२॥अथेदानींकावाभूतप्रकृतिः किमाश्रयेणतस्याभूतजनकत्वंतदाह ममेति ममशुद्धचिन्मात्रस्ययोनिःप्रवेशस्थानं महद्ब्रह्ममहत्तत्त्वस्यप्रथमकार्यस्यब्रह्मवृंहकंकारणमव्याकृताख्याप्रकृतापरपर्यायंत्रिगुणात्मकमायाख्यंतस्मिन्गर्भंस्वप्रति बिंबरूपंदधामिअर्पयामि अहंचिदात्मातोमत्प्रतिबिंबगर्भिताया मायायाततःसर्वेषांभूतानांभवनधर्मणांमहदादीनांहिरण्यगर्भादीनांचसंभवउत्पत्तिर्भवतिहेभारत एतेनचित्प्रतिबिंबसापेक्षत्वोपपादनेनप्रकृ तेः सांख्याभिमतंस्वातंत्र्यंनिरस्तं॥३॥किंच सर्वेषुभूतेषुयोनिषुउपादानभूतेषुपृथिव्यामोषधयइवयामूर्त्तयःशरीराणिसुरनरतिर्यक्स्थावरात्मकानिचतुर्विधानिसंभवंतिनासांमूर्तीनांब्रह्ममहत्पूर्वोक्तंमहतोब्र ह्मब्रह्ममहत् राजदंतादित्वादुपसर्जनस्यपरनिपातः मायैवयोनिरित्यर्थः अहंतुतासांबीजप्रदःपितातास्वपित्रप्रतिबिंबस्थापयिता यथापुरुषोभार्यायामनुशयिसंपृक्तेरेतोनिषिंचतिततोभार्यातःपिंडोत्पत्तिः

इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः॥ सर्गेपिनोपजायंतेप्रलयेनव्यथंतिच॥ २॥ ममयोनिर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहम्॥ संभवःसर्वभूतानांततोभवति भारत॥ ३॥ सर्वयोनिषुकौंतेयमूर्त्तयःसंभवंतियाः॥ तासांब्रह्ममहद्योनिरहंबीजप्रदःपिता॥ ४॥ सत्वंरजस्तमइतिगुणाःप्रकृतिसंभवाः॥ निबध्नंतिमहा बाहोदेहेदेहिनमव्ययं॥ ५॥ तत्रसत्वंनिर्मलत्वात्प्रकाशकमनामयम्॥ सुखसंगेनबध्नातिज्ञानसंगेनचानघ॥ ६॥ रजोरागात्मकंविद्धितृष्णासंगसमुद्भवं॥ त न्निबध्नातिकौंतेयकर्मसंगेनदेहिनम्॥ ७॥ तमस्त्वज्ञानजंविद्धिमोहनंसर्वदेहिनाम्॥ प्रमादालस्यनिद्राभिस्तन्निबध्नातिभारत॥ ८॥

रेनोंशतस्तत्रचैतन्योत्पत्तिरितिचैतन्यविशिष्टस्यपिंडस्यपिताःहंमातात्वमायेत्यर्थः॥४॥एवमीश्वराश्रयेणप्रकृतिर्भूतानिजनीत्युक्तं इदानींसाकथंभूतानिबध्नातीतिदुच्यते सत्वमिति प्रकृतिःसत्वरजस्तम सांसाम्यावस्था ततःसकाशात्परस्परांगांगीभावेनवैषम्येणोद्दिच्यमानाःप्रकृतिसंभवाइत्युच्यंतेननुप्रकृतिनोवैशेषिकाणामिवद्रव्यात्गुणाअन्येएतेहेमहाबाहो देहेअव्ययमविकारिणमपिदेहिनंस्थूणायां वत्समिवरशनाभूतागुणानिबध्नंति ॥ ५ ॥तत्रकःकेनसंगेनबध्नातीत्युच्यते तत्रेति तत्रतेषुगुणेषुसत्वंनिर्मलत्वाद्दुःखमोहाख्यमलराहित्यात्प्रकाशकमालोकवत्सर्वार्थावद्योतकं यतोऽनामयंरजस्तमोभ्यामन भिभूतंतत्सुखसंगेनज्ञानसंगेनचनरमविद्ययातिरोहितस्वरूपज्ञानानंदमहंसुख्यहंज्ञानीत्यभिमानेनांतःकरणवृत्तिधर्मयोःसुखज्ञानयोरात्मन्यारोपेणबध्नाति हेअनघअव्यसनिन् ॥ ६ ॥रजोगुणोरागोरंजना तदात्मकंविद्धि तृष्णाप्राप्यमाणेष्वप्यर्थेष्वतृप्तिः संगःप्राप्तेविषयेमनसःप्रीतिलक्षणःसंश्लेषस्तयोःसमुद्भवंनिदानभूतंतद्रजोहेकौंतेय कर्मसंगेनदृष्टादृष्टार्थेषुकर्मसुसंगस्तत्परतातेननिबध्नातिदेहिनंदेहाभिमा निनं ॥७॥ तमोगुणः तुपूर्वाभ्यांविलक्षणः अज्ञानंमायायाआवरणशक्तिस्तउद्भूतमज्ञानजंविद्धि अतःसर्वेषांदेहिनांमोहनंभांतिहेतुः प्रमादोऽनवहितत्वंसचसत्वकार्यप्रकाशविरोधी आलस्यंजडतातच्चर जःकार्यप्रवृत्तिविरोधि उभयकार्यनिरोधिनीतमोगुणालंबनावृत्तिर्निद्रा ताभिस्तत्तमोनितरांबध्नाति हेभारत देहिनमित्यनुवर्तते ॥ ८ ॥

सत्त्वमुल्कटंसंतसुखदुःखकारणमभिभूयसंजयतिसंश्लेषंजनयति एवमुत्तरत्रापि ज्ञानंप्रकाशमादृत्यप्रमादेअवश्यकर्तव्यस्याकरणे॥ ९ ॥ सत्त्वादयःकदात्वत्वकार्येप्रभवंतीत्याशंक्येतरेतरयोरभिभवेस तीत्याह रजइति रजस्तमसीअभिभूयसत्त्वंभवतिवर्धते एवंरजोपिसत्त्वतमसीअभिभूयभवति तथातमोपिसत्त्वरजसीअभिभूयभवतीत्यर्थः ॥ १० ॥ तत्तद्गुणोद्भवंलिंगान्याहत्रिभिः सर्वेति अस्मिन्देहे यदासर्वेषुद्वारेषुबाह्याभ्यंतरविषयोपलब्धिसाधनेषुबाह्याभ्यंतरकरणेषु प्रकाशःस्वत्वविषयावरणविरोधीपरिणामविशेषोजायतेतेनचज्ञानंशब्दादिविषयस्याथाभ्यनेनप्रकाशोयदाजायतेतदासत्त्वंविद्ध द्धमितिविद्याज्ञानीयात् उतअपि सुखादिलिंगेनापिजानीयादित्यर्थः ॥ ११ ॥ लोभःप्राप्ताधिकेगर्धः प्रवृत्तिरग्निहोत्रादौ आरंभोगृहादेः कर्मणामशमःस्पृहामसतांवाकार्याणामनुपरमः स्पृहादृष्टेपरध नादावुपादित्सा रजसिविद्धेसतिएतानिलिंगानिजायंतेहेभरतर्षभ ॥ १२ ॥ सत्यपिबोधकेगुर्वादावप्रकाशःसत्त्वकार्यप्रकाशानुदयः अप्रवृत्तिःसत्यपिप्रवृत्तिनिमित्तेरजःकार्यप्रवृत्त्यनुदयः प्रमादःकार्या

सत्त्वंसुखेसंजयतिरजःकर्मणिभारत॥ ज्ञानमावृत्यतुतमःप्रमादेसंजयत्युत॥ ९॥ रजस्तमश्चाभिभूयसत्त्वंभवतिभारत॥ रजःसत्त्वंतमश्चैवतमःसत्त्वंरजस्तथा ॥ १०॥ सर्वद्वारेषुदेहेस्मिन्प्रकाशउपजायते॥ ज्ञानंयदातदाविद्याद्विवृद्धंसत्त्वमित्युत॥ ११॥ लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा॥ रजस्येतानिजायंतेविवृद्धे भरतर्षभ॥ १२॥ अप्रकाशोऽप्रवृत्तिश्चप्रमादोमोहएवच॥ तमस्येतानिजायंतेविवृद्धेकुरुनंदन॥ १३॥ यदासत्त्वेप्रवृद्धेतुप्रलयंयातिदेहभृत्॥ तदोत्तमविदांलो कानमलान्प्रतिपद्यते॥ १४॥ रजसिप्रलयंगत्वाकर्मसंगिषुजायते॥ तथाप्रलीनस्तमसिमूढयोनिषुजायते॥ १५॥ कर्मणःसुकृतस्याहुःसात्विकंनिर्मलंफलम्॥ रजसस्तुफलंदुःखमज्ञानंतमसःफलम्॥ १६॥ सत्त्वात्संजायतेज्ञानंरजसोलोभएवच॥ प्रमादमोहौतमसोभवतोज्ञानमेवच॥ १७॥ ऊर्ध्वंगच्छंतिसत्त्वस्थाम ध्येतिष्ठंतिराजसाः॥ जघन्यगुणवृत्तिस्थाअधोगच्छंतितामसाः॥ १८॥ नान्यंगुणेभ्यःकर्तारंयदाद्रष्टानुपश्यति॥ गुणेभ्यश्चपरंवेत्तिमद्भावंसोधिगच्छति॥ १९॥

कार्यविवेकराहित्यं मोहोनिद्रालस्यादिरूपः॥ १३ ॥ प्रलयंमरणं उत्तमविदांहिरण्यगर्भोपासकानांदेवानांबालोकान् अमलान्निर्दुःखान् ॥ १४ ॥ कर्मसंगिषुश्रौतस्मार्तकर्मानुष्ठातृषुमनुष्येषु मूढयो निषुतिर्यक्स्थावरचांडालादिषु ॥ १५ ॥ सुकृतस्यसात्विकस्यकर्मणःफलंनिर्मलंदुःखाज्ञानमलशून्यंसात्विकंज्ञानवैराग्यादिकं रजसोराजसस्यकर्मणःफलंदुःखं तमसस्तामसस्यकर्मणःफलमज्ञानं सा त्विकादिकर्मलक्षणंचनियतंसंगरहितमित्यादिनाऽष्टादशेवक्ष्यति ॥ १६ ॥ एतादृशफलवैचित्र्येपूर्वोक्तमेवहेतुमाह सत्त्वादिति ॥ १७ ॥ यतःसत्त्वादिभ्योज्ञानादीनिजायंतेऽतःसत्त्वादिवृद्धिकालेप्रलयंग च्छंतःकमेणोत्तममध्यमाधमासुयोनिषुजायंतइत्याह ऊर्ध्वमिति ऊर्ध्वंदेवभावे मध्येमानुषभावे अधोनरकतिर्यक्स्थावरभावे जघन्यंनिंद्यंद्रुणवृत्तंनिद्रालस्यप्रमादादितस्थास्तामसाः॥ १८॥कथंप्रकृ तिःपुरुषंबध्नातीत्यस्योत्तरमुक्तं कथंवातनोस्यमुक्तिरित्यस्योत्तरमाह नान्यमिति गुणेभ्यःकार्यकारणविषयाकारपरिणतेभ्योन्यंदृशिमात्रमात्मानंद्रष्टाजीवःकर्तारंनानुपश्यतिविवेकमनुनपश्यति किंतुगुणा एवकर्तारइत्येवपश्यतिनत्वहंकर्तेति तथागुणेभ्यःपरंगुणव्यापारसाक्षिभूतंमांयदावेत्तितदासवेदितामद्भावंब्रह्मभावंगच्छति अन्यदःतुगुणभावंगतोभवति ॥ १९ ॥

कथंत्वद्भावंगच्छतीतित्राह गुणानिति एतान्गुणान्महदादित्रयोविंशतिविकारात्मनापरिणतान् देहसमुद्भवान्स्थूलदेहस्यसमुद्भवोयेभ्यस्तानतीत्यजीवन्नेवातिक्रम्यनिर्विकल्पकसमाध्यभ्यासेनबाधित्वा ऽमृतंमोक्षमश्नुतेप्राप्नोति एतेनानंदावाप्तिर्गुणात्ययप्रयोजनमुक्तं यतोमुक्तोजन्ममृत्युजरादुःखैर्विमुक्तःसन्निनितुअनर्थनिवृत्तिरुक्ता ॥ २० ॥ प्रकृतितोमुक्तिप्रकारेउक्तेऽथमुक्तलक्षणानिपृच्छन्नर्जुनउवा च कैरिति कैर्लिंगैश्चिह्नैस्त्रीन्गुणानेतान्व्याख्यातानतीतोभवतिपुमानहेप्रभो सचकिमाचारःकोस्याचारःकथंकेनचप्रकारेणैतांस्त्रीन्गुणानतिक्रम्यवर्तते ॥२१॥ तत्राद्यस्योत्तरमाह प्रकाशमिति प्रकाशप्रवृत्तिमोहाःसत्वरजस्तमसांकार्याणिव्युत्थानावस्थायांतानिसम्यक्प्रवृत्तानि सामान्येनपुंसकं तान्संप्रवृत्तान्नद्वेष्टि नापिसमाध्यवस्थायांतानिनिवृत्तानिसंतिकांक्षति सोयंनित्यसमाधिस्थोब्रह्मविद्वरिष्ठः यं प्रकृत्यश्रीभागवतेस्मर्यते देहंचनश्वरमवस्थितमुत्थितंवासिद्धोनपश्यतीति अत्रवासिष्ठेसप्तयोगभूमयउक्ताः ज्ञानभूमिःशुभेच्छाख्याप्रथमासमुदाहृता विचारणाद्वितीयातुतृतीयातनुमानसा सत्त्वापत्तिश्च तुर्थीस्यात्ततोऽसंसक्तिनामिका पदार्थाभावनीषष्ठीसप्तमीतुर्यगास्मृतेति तत्रयथोक्तासाधनसंपत्मुमुक्षांताप्रथमा श्रवणमननाख्यविचारात्मिकाद्वितीया निदिध्यासनरूपातृतीया एताःसाधनभूमयः स त्त्वापत्तिर्ब्रह्मसाक्षात्काररूपाचतुर्थीफलभूता यस्यांयोगीकृतार्थोपिजीवन्मुक्तिसुखंपुष्कलंनानुभवति परास्तिस्रोजीवन्मुक्तेरवांतरभेदाः तत्रापिपंचम्यांभूमौस्वयंस्थितःस्वयमेवव्युत्तिष्ठति षष्ठ्यांपरप्रय

गुणानेतानतीत्यत्रीन्देहीदेहसमुद्भवान्॥ जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥ ॥अर्जुनउवाच॥ ॥कैर्लिंगैस्त्री न्गुणानेतानतीतोभवतिप्रभो॥ किमाचारःकथंचैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥ ॥श्रीभगवानुवाच॥ ॥ प्रकाशंचप्रवृ त्तिंचमोहमेवचपांडव ॥ नद्वेष्टिसंप्रवृत्तानिनिवृत्तानिकांक्षति॥ २२॥ उदासीनवदासीनोगुणैर्योनविचाल्यते॥ गुणावर्तत इत्येवयोवतिष्ठतिनेंगते॥ २३॥ समदुःखसुखःस्वस्थःसमलोष्टाश्मकांचनः॥ तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्मसंस्तुतिः॥ २४॥

ब्नेनसमभ्यांतुनस्वतःपरतोवाव्युत्तिष्ठति सोयंनित्यसमाधिस्थःप्रकाशमित्यनेनश्लोकेनोक्तः ॥ २२ ॥ अथषष्ठ्यांपदार्थाभावन्यांगतोब्रह्मविद्वरीयानुच्यते उदासीनवदिति योयंसमाधावुदासीनइवास्तेव्यु त्थानेकिमपिप्रयोजनमपश्यन् इदंममकर्तव्यमस्तीतिवासनाशून्यत्वात् यआस्तेएवनतुपरप्रयत्नमंतरेणकदाचिदपिगुणैर्विचाल्यते परेणव्युत्थापितोपिगुणान्पश्यन्गुणावर्तनइत्येवज्ञात्वायोवतिष्ठतिस्तब्ध एववर्तनेननुगुणकृतैरिष्टानिष्टस्पर्शैरिंगतेचलति अयमर्थः यथाकश्चिद्भुजानोरसनामौढ्यात्स्वयंशाकादिरसंनविंदति परेणज्ञापितोपिकंचिद्रसविशेषमुपलभ्यापितत्रोदासीनएवास्ते झटित्येवविशेषदर्श नस्यतिरोधानात्तनतत्कृतंसुखंदुःखंवापश्यतितद्वदयंज्ञेयः ॥ २३ ॥ अथपंचम्यांभूमावसंसक्तिनामिकायांस्थितोब्रह्मविद्वरउच्यते समेति समाधौसमेदुःखसुखेयस्यसमदुःखसुखः स्वस्थः स्वेनैवस्वेच्छयै वतिष्ठतीतिस्वस्थः यद्यातुनसमाधाविच्छादास्वयमेवव्युत्तिष्ठतीतिभावः सोपिव्युत्थानावस्थायांसमलोष्टाश्मकांचनोविरक्तइत्यर्थः तुल्यप्रियाप्रियःतुल्यनिंदात्मसंस्तुतिश्च प्रियाप्रिययोर्निंदास्तुत्योश्च प्राप्तौतुल्योहर्षविषादशून्यः अत्रहेतुर्धीरइति यथाकश्चिच्छूरस्तीव्रप्रहारवेदनार्त्तोपिनव्यामुह्यतिधैर्याद्वेदनांचानुभवन्नपिधैर्यान्नचलति पूर्वस्यतुजातायामपिवेदनायांहर्षा द्युदयएवनास्ति तत्पूर्वस्यतुवेदनैवनास्तीतिभेदः एतेनश्लोकत्रयेणसर्वेषांजीवन्मुक्तानांसमाधौलिंगानितत्संवेद्यान्याचाराश्चपरसंवेद्यानिलिंगान्युक्तानि ॥ २४॥ ॥८२॥

अथचतुर्थ्यांतुसौषुप्तत्वापत्तिसंज्ञायांस्थितस्ययोगिनःसमाधिसुखाभावेनस्वसंवेद्यलिंगाभावात्तत्त्वनिश्चयेनद्वैतस्यबाधालिंगमाचारश्चपरसंवेद्यएवतदाह मानेति यथाहिपरीक्षकःकूटकार्षापणस्यलाभे विनाशेवाहर्षविषादशून्योनचतल्लाभार्थंयत्नमारभते मूढस्तुताभ्यांबाध्यतेतल्लाभार्थंयत्नंचारभते एवंविद्वान्द्वैतंमरुमरीचिकाह्रदसमानंपश्यन्नतत्रमानापमानयोर्वामित्रारिपक्षयोर्वातुल्यएवनत्वन्यतरला भायपरिहारायवायत्नमारभते अतोगुणातीतइत्युच्यते सर्वत्रपदार्थःस्पष्टः ॥ २५ ॥ अथकथंत्रीन्गुणानतिवर्ततइत्यस्योत्तरंविवक्षन्नुपासनभूमासुसिद्धभूमिषुतृतीयांतनुमानसामाह मांचेति यश्चसाध कोमांप्रत्यगात्मानं चकारस्वर्थेपूर्वभूमिस्थापेक्षयास्यवैलक्षण्यंद्योतयति अव्यभिचारेणहृत्यंतरानंतरितेनभक्तियोगेनमयिभगवतिनैलधारावदविच्छिन्नवृत्तिप्रवाहिमनःप्रणिधानरूपेणयोगेनसंवतेध्या यतिसएवंसूक्ष्मीकृतचित्तएतान्गुणान्समतीत्यध्यानपरिपाकांतेसत्त्वमपिबाधित्वाब्रह्मभूयायब्रह्मभावायकल्पतेयोग्योभवति भुवोभावइतिभवतेर्भावेक्यप् ॥ २६ ॥ विषयप्रदर्शनद्वाराविचारणाख्यांद्वि तीयांभूमिमाह ब्रह्मणोहीति ब्रह्मणोवेदस्यप्रतिष्ठातात्पर्येणपर्यवसानस्थानमहमेव अमृतस्यकर्मब्रह्मोभयदर्शनद्वाराऽमृतसाधनस्य अव्ययस्यअनादित्वादनंतत्वाच्चापौरुषेयत्वेनाप्रामाण्यशंकाकलंकशू न्यस्यस्वतःप्रमाणभूतस्येत्यर्थः एवंनोपकमोपसंहारादिपर्यालोचनयावेदाविरुद्धतकोंपकरणयारुत्पन्नस्यवेदस्यतात्पर्यमद्वर्शनकामेननिर्णेतव्यमितिविचारणाख्याद्वितीयाभूमिरुक्ता हेतुफलोपदर्शनमु खेनशुभेच्छाख्यांप्रथमांभूमिमाह शाश्वतस्येति काम्यधर्मवत्फलदानेननाशाभावात्भगवत्प्रीतोनित्योधर्मःशाश्वतः विविदिषादिपारंपर्येणमोक्षाख्यंशाश्वतफलहेतुत्वात् शाश्वतस्यचधर्मस्यप्रतिष्ठाप

मानापमानयोस्तुल्यस्तुल्योमित्रारिपक्षयोः॥ सर्वारंभपरित्यागीगुणातीतःसउच्यते ॥ २५ ॥ मांचयोऽव्यभिचारेणभक्तियोगेनसेवते ॥ सगुणान्समतीत्यै तान्ब्रह्मभूयायकल्पते॥ २६॥ ब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यच॥ शाश्वतस्यचधर्मस्यसुखस्यैकांतिकस्यच॥ २७॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणि श्रीमद्भगवद्गीतासू०गुणत्रयविभागयोगोनामचतुर्दशोऽध्यायः॥ १४॥ पर्वणितुअष्टत्रिंशोऽध्यायः॥ ३८॥ ॥७॥ ॥७॥ ॥७॥ श्रीभगवानुवाच॥ ॥ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययम्॥ छंदांसियस्यपर्णानियस्तंवेदसवेदवित्॥ १ ॥

रमंप्राप्यफलमहमेव तथाऐकांतिकंविषयसंगजन्यसुखव्यभिचारित्वरूपभूतंमोक्षसुखंतस्यापिप्रतिष्ठापराकाष्ठाअहमेव एवंनिष्कामधर्मेणविशुद्धचित्तस्यैकांतिकसुखेच्छाभवतिसेयंशुभेच्छाख्याप्रथ माभूमिः अत्रपरांपरांभूमिमारोढुमशक्तस्यपूर्वापूर्वाभूमिरुपदिश्यते यथाध्यानेनात्मनिपश्यंतीत्यत्रनिदिध्यासनाशक्तस्यसांख्यनामाविचारस्तत्राप्यशक्तस्यकर्मयोगउपदिश्यतेतद्वत् ॥२७॥ ॥ इतिभी ष्मपर्वणिनैलकंठीयेभारतभावदीपेचतुर्दशोऽध्यायः ॥ १४ ॥ प० ॥ ३८ ॥ पूर्वाध्यायांतेसुखस्यैकांतिकस्यप्रतिष्ठापराकाष्ठाहमित्युक्तंतत्रकिंलक्षणंतत्सुखंकेनवाआवर्तकेनवासाधनेनास्यावरणभंगःके नवाधिकारिणातत्प्राप्यमित्याद्विवर्णयितुंपंचदशोध्यायआरभ्यते ऊर्ध्वमूलमिति आनंदाद्योवस्त्वित्यमानिभूतानिजायंतइतिश्रुतिप्रसिद्धंमानुषानंदमारभ्योत्तरोत्तरशतगुणविशिष्टानंदसोपानपंक्तेरुपरि स्थितंपरमानंदाद्वयंवस्तुऊर्ध्वंतदेवमूलंमूलकारणमस्यसंसाराश्वत्थस्यतमूर्ध्वमूलं अधःशाखंऊर्ध्वादधोधःसोपानस्थानीयाःशाखाइवशाखाःअव्यक्तमहदहंकारपंचतन्मात्रापोडशविकारहिरण्यगर्भवि राट्प्रजापतिसुरगंधर्वासुरनरतिर्यक्स्थावररूपायस्यसोधःशाखत्तं नश्वोपिस्थातुंयोग्यमनृतत्वादश्वत्थंसंसारवृक्षं तथाप्यव्ययंमूढानामनायनंतंप्राहुर्वेदाःऊर्ध्वमूलोऽवाक्शाखएषोश्वत्थःसनातनइत्याद यः छंदांसिवेदास्तदुपलक्षितायज्ञादयस्तएवपर्णानिपर्णसंघातवत्शोभाहेतवोयस्यतरोस्तमश्वत्थंयोवेदमिथ्यात्वेनसएववेदवित्विदितवेद्यइत्यर्थः अत्राश्वत्थरूपकेणसंसारोवर्ण्यते ॥ १ ॥

अधश्वमानुषेभ्यस्तिर्यक्स्थावरादयोऽवीच्यंताः ऊर्ध्वंचमानुषेभ्यएवोपरिचगंधर्वयक्षादिहिरण्यगर्भपर्यंतंप्रस्ताःप्रसरंप्राप्तास्तस्यशाखाः गुणैःसत्त्वादिभिःप्रकर्षेणरुद्धाःगुणप्ररूढाः विषयाएवरंजकतया कोमलपल्लवरूपाणिप्रवालानियासांताः संसारवृक्षस्योपरिमूलंब्रह्मउक्तं अधश्वइहमनुष्यलोकेचतस्यमूलानिवासनारूपाण्यवांतरमूलान्यनुसंततानिप्रवाहनित्यानि यतःकर्मानुबंधीनिकर्मैवधर्माधर्मा ख्यमनुबंधःपश्वाद्भावियेषांतानिकर्मानुबंधीनि वासनाभ्यःकर्माणिकर्मभ्योवासनाइत्यनवरतसंतानोयंवृक्षइत्यर्थः ॥ २ ॥ ननुश्वोपिस्थातुमनर्हश्वाव्ययश्वेत्युक्तेप्रतिक्षणविनाशिविज्ञानसंतानरूपोवाव्री ह्यादिवत्यवाहनित्योवायंसंसारस्तर्हिदुरुच्छेद्योवासनानांकर्मणांचबीजांकुरवदन्योन्यजन्महेतुत्वस्यावर्जनीयत्वादित्याशंक्यसत्त्वासत्त्वाभ्यामनिर्वचनीयोयमित्येतंपक्षमाश्रित्यपरिहरति नरूपमिति रज्जू गस्येवास्यरूपंसम्यग्दृशावीक्ष्यमाणंसन्नोपलभ्यते इहजीवत्येवदेहे यथापूर्वमज्ञानदशायांतथानोपलभ्यतेज्ञानदशायां तेनास्यमृषात्वमनुभवैकवेद्यमित्युक्तं एतेनानुपलभ्यरूपत्ववचनेनस्वप्रकाशानांवि ज्ञानानांरूपवतांवीजादीनांचसादृश्यस्याव्याहृत्तिः नहिंशशविषाणवत्तुच्छएवायंस्यादित्यतआह नांतोनचादिरिति उपादानस्यमूलाज्ञानस्याद्यंतशून्यत्वादयमप्याद्यंतशून्यइत्यर्थः नर्ह्यात्मवदपरिहार्यः स्यादित्याशंक्याह नचसंप्रतिष्ठाअस्यप्रतिष्ठारूप्यंलयस्थानंदृक्षस्यभूमिरिवनास्ति नचायंब्रह्मणोविकारोयेनतत्रैवलीयेत नचेष्टापत्तिः ब्रह्मणःकौटस्थ्यभंगापत्तेः किंतर्हितुच्छमज्ञानमस्योपादानंतस्मिंश्च

अधश्वोर्ध्वंप्रस्तास्तस्यशाखागुणप्रवृद्धाविषयप्रवालाः ॥ अधश्वमूलान्यनुसंततानिकर्मानुबंधीनिमनुष्यलोके ॥ २ ॥
नरूपमस्येहतथोपलभ्यतेनांतोनचादिर्नचसंप्रतिष्ठा ॥ अश्वत्थमेनंसुविरूढमूलमसंगशस्त्रेणदृढेनछित्त्वा ॥ ३ ॥ ततःपदं
तत्परिमार्गितव्ययस्मिन्गतानिवर्त्तंतिभूयः ॥ तमेवचाद्यंपुरुषंप्रपद्येयतःप्रवृत्तिःप्रसृतापुराणी ॥ ४ ॥

ज्ञानेनविनष्टेसमूलस्यास्योच्छेदोभवत्यज्ञानस्यचतुच्छत्वंतुच्छेनाश्वविहितंयदासीदित्यादिश्रुत्या तत्कार्यस्यरज्जूरगादेःप्रलयेतदनुपलंभस्यानुभवेनचसिद्धं तस्मादस्यप्रतिष्ठानोपलभ्यतइतियुक्तमेवोक्तं त मेनमश्वत्थंवासनानांदाढ्यांतुसुविरूढमूलंदृढतरमूलमप्यसंगशस्त्रेणसंगोदेहादिदात्म्यबुद्धिस्तद्वर्जनमसंगःसएवशस्त्रंतेनदृढेनपरिपक्वेनच्छित्त्वा ततःपदंतत्परिमार्गितव्यमित्युत्तरेणान्वयः यथास्थूलसू क्ष्मयोःसंसारयोरसंगःसुषुप्तौस्वयमेवजायते तेनतन्मूलवासनाभिरप्यात्मनोऽसंगोनुभीयतेतथापिवासनामूलस्याज्ञानस्यज्ञानेनानुच्छेदान्नासंगधीर्दृढाभवतितस्मान्निर्विकल्पसमाध्यभ्यासेनकारणशरीर स्याप्यसंगःसाध्यः तेनचासंगशस्त्रेणास्यच्छेदोमूलोच्छेदोलवणोदकवद्रज्जूरगवद्वाप्रविलापनरूपःकर्तव्यः नतुसांख्यानामिवस्वरूपेणसतःपरिवर्जनमात्रं ॥ ३ ॥ तमिममश्वत्थंछित्त्वाकिंकर्तव्यमतआह त तइति नकेवलंनिर्विकल्पसमाधिनातदसंगमात्रेणकृतार्थतार्किंतर्हितोऽसंगानंतरंतत्श्रुतिप्रसिद्धंपदंपदनीयंब्रह्मपरिमार्गितव्यंश्रुतियुक्तिबलेनाहमेवब्रह्मास्मीतिज्ञातव्यं यस्मिन्पदेनिर्विकल्पेगताःप्राप्ताःसं तोननिवर्तंतिनपुनर्निवर्तंते तमेवप्रत्यगानंदमाद्यंपुरुषंपुरिशरीरेशयानमहमपिप्रपद्येशरणागतोस्मीतिज्ञापयेत् भगवतएववाइदंवचनंलोकशिक्षार्थंवर्तएवचकर्मणीतिवत् कोसौपुरुषः यतःपुराणीआद्या प्रवृत्तिः सोकामयतबहुस्यांप्रजायेयेतीत्येवंरूपाप्रस्ताअस्मात्सपिप्रवृत्ता यतोवयमपिइदानींकामयामहेधनादिनावयंभूयांसःस्यामप्रजयाप्रजायेमहीतिचेति येनेयंप्रवृत्तिर्दर्शितातत्प्रणामेनैवसानिवर्तिं ष्यतइत्यर्थः ॥ ४ ॥

॥८३॥

एवमैकांतिकस्यसुखस्याच्छादकंसंसाराश्वत्थंतच्छेदकमसंगशस्त्रंचोक्त्वातस्यसुखस्यप्राप्तावधिकारिणंतस्यस्वरूपंचाहद्वाभ्यां निर्मानेति मानोदर्पः मोहोविपर्ययस्तद्रहिताःनिर्मानमोहाः जितःसंगःकर्तृह मित्यभिमानोदोषोरागादिश्चयैस्तेजितसंगदोषाः अध्यात्मंआत्मनिनित्याःनिष्ठावंतःआत्मध्यानपराइतियावत् विनिवृत्तकामाःत्यक्तसर्वपरिग्रहाः द्वंद्वैः सुखदुःखेत्युपलक्षणंशीतोष्णादीनामपि तैर्विमुक्ता स्तितिक्षावंतइत्यर्थः अमूढाःविद्ययाःविद्यानाशंकृतवंतः तत्पदंअव्ययंअपुनरावृत्तिगच्छंति ॥ ५ ॥ ननुयदितदूर्ध्वंपदंगच्छंतितर्हितःपातोप्यवश्यंभावीपतनांताःसमुच्छ्रयाइतिन्यायात् ततश्चयस्मिन्गता ननिवर्तंतीत्यनुपपन्नमित्याशंक्यतस्यपदस्यस्वरूपमाह नतदिति तत्पदंसूर्योनभासयति रूपादिहीनत्वेनचक्षुरयोग्यत्वात् एतेनसर्वेषांबाह्येंद्रियाणांनिवृत्तिः यद्धिरूपवच्चक्षुर्योग्यंतत्सूर्येणचक्षुरनुग्राहकेण भास्यंइदंतुनतथेत्यर्थः नशशांकश्चंद्रोपिभासयति यन्मनोग्राह्यंवस्तुतच्चंद्रेणमनोनुग्राहकेणभास्यंइदंतुनतथा यन्मनसानमनुतइतिश्रुत्यास्यमनोग्राह्यत्वनिषेधात् नापिपावकोभासयति यद्धिवाचाग्राह्यं

निर्मानमोहाजितसंगदोषाअध्यात्मनित्याविनिवृत्तकामाः ॥ द्वंद्वैर्विमुक्ताःसुखदुःखसंज्ञैर्गच्छंत्यमूढाः
पदमव्ययंतत् ॥ ५ ॥ नतद्भासयतेसूर्योनशशांकोनपावकः ॥ यद्गत्वाननिवर्त्तंतेतद्धामपरमंमम ॥ ६ ॥

त्तदनुग्राहकेणपावकेनभास्यंइदंतुनतथा यद्वाचानभ्युदितमितिश्रुत्यास्यवाग्गोचरत्वनिषेधात् नचक्षुषागृह्यतेनापिवाचेत्यादिश्रुत्यंतरंच यतश्चक्षुर्मनोवाचामगम्यंतेनस्थूलसूक्ष्मकारणप्रपंचातीतंप्रत्यगद्वयं नांतःप्रज्ञंनबहिःप्रज्ञंअस्थूलमनणुइत्यादिश्रुतिभिःसर्वविशेषरहितंयत्प्रतिपादितंतत्परमपदंधामशब्दवृत्तिरूपज्ञानादपरमादन्यज्ज्योतिश्चिन्मात्रं ममेतिसंबंधोराहोःशिरइतिवदुपचारात् मदभिन्नंज्योतिःस्वयं प्रकाशमित्यर्थः अतएवयद्गत्वाप्राप्यज्ञात्वेत्यर्थः ननिवर्तंतेनिवृत्तिकारणस्यमूलाज्ञानस्याभावात् एवंव्याख्यानेहियदाग्रहणंवैषएतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेभयंप्रतिष्ठांविंदते अथसोऽभयंगतोभवती तिश्रुत्यर्थानुगमोदृश्यते अदृश्येइतिदृगयोग्यत्वेनसूर्यभास्यत्वंपर्युदस्यते अनात्म्येआत्मनोमनसोयोग्यंआत्म्यंतदन्यत्रअनात्म्येइतिमनसोप्ययोग्यत्वेनचंद्रमोभास्यत्वंनिरस्यते अनिलयनेनिलीयतेस्मि न्सर्वंस्थूलंसूक्ष्ममितिनिलयनंकारणंतद्विन्ने अतएवानिरुक्तेनिर्वचनायोग्येवाचामगोचरइत्यर्थः तेनपावकाप्रकाश्येइतिसिद्धं येतुसूर्याद्यप्रकाश्यमग्निरादिमार्गगम्यंसत्यलोकादप्युपरितनमप्राकृतंवैष्णवं पदंनित्येदेशांतरेऽस्तितदृत्वापुनर्ननिवर्तंतइत्याचक्षते तेषांनरूपमस्येहतथोपलभ्यतइतिदृश्यस्यतुच्छत्वादेवनादृशस्यापितुच्छत्वमप्रहार्यं दृश्यत्वाविशेषात् तस्मात्पथोक्तएवश्लोकार्थः ॥ ६ ॥

ननुयदिसूर्याद्यभासस्यज्योतीरूपत्वंक्षेत्रज्ञत्वंचापिमांविद्धीतिस्वयैवक्षेत्रज्ञत्वंब्रूषेतर्हिक्षेत्रज्ञस्यसततंतवघटादिप्रकाशेकिमितिसूर्याद्यपेक्षादृश्यते नहिस्वयंज्योतीरूपःस्वविषयावभासनेज्योनिरंतरमपेक्षतेदी पादिष्वदर्शनादित्याशंक्याहत्रिभिः ममैवेति यस्मादीश्वरोजगत्सर्वंटाशरीरंअवाप्नोति सएषइहप्रविष्टआनखाग्रेभ्यः तस्मात्तज्ज्ञानदेवानुप्राविशदित्यादिश्रुतिभ्यः ईश्वरएवशरीरधारी तथायस्माद्धेतोः अ पिशब्दोऽवधारणार्थे चःसमुच्चयार्थे कस्मिन्नहमुत्क्रांतउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीतिसप्राणमस्रजतेतिश्रुतेःप्राणधारणेनोपाधिनाईश्वरएवचउत्क्रामतितनोहेतुद्वयाज्जीवलोकेसंसारे योजीवभूतःप्राणीससनातनःसर्वदैकरूपोहमेवेतिवक्तव्येयथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवैतस्मादात्मनःसर्वएतआत्मानोव्युच्चरंतीतिबृहदविस्फुलिंगन्यायेनसममैवांशइत्यंशांशिभावोक्तिः यद्यपिव ह्नौभेदःपरिमाणंचस्वगतंनदृश्यतेतथापितूपाधिगतमेवतदुभयंतत्राप्युपचर्यतेअयमग्निरस्मादग्नेर्भिन्नःअयमस्यस्फुलिंगःअयमस्मादल्पइति एवमस्थूलमनण्वह्रस्वमदीर्घमितिश्रुतेश्चतुर्विधपरिमाणशून्येब्र ह्मणिममैवांशइत्यंशांशिभावेनभेदोऽल्पत्वमहत्त्वेचोपचारादौपाधिकेभ्येये तथाचश्रुतिः बुद्धेर्गुणेनात्मगुणेनचैवद्वारापमात्रोह्यवरोपिदृष्टइति समःऋषिणासमोमशकेनसमोनागेनसमएषिभिर्जिलोकैरिति च तथाचविस्फुलिंगोवह्निरेवननुवह्न्यंशः एवंजीवोपिब्रह्मैवननुब्रह्मांशः ब्रह्मदाशाब्रह्मदासाब्रह्मेमेकितवाउतेतिदाशादिष्वपिपिंड्येषुगोत्स्येवकात्स्न्यैनएकैकस्मिन्ब्रह्मभावपरिसमाप्तिदर्शनात् निरंशेशां

ममैवांशोजीवलोकेजीवभूतःसनातनः ॥ मनःषष्ठानींद्रियाणिप्रकृतिस्थानिकर्षति ॥ ७ ॥ शरीरंयद्वाप्नोतियच्चाप्युत्क्रामतीश्वरः॥ गृहीत्वैतानिसंयातिवा युर्गंधानिवाशयात्॥८॥ श्रोत्रंचक्षुःस्पर्शनंचरसनंघ्राणमेवच॥ अधिष्ठायमनश्चायंविषयानुपसेवते॥ ९॥उत्क्रामंतंस्थितंवापिभुंजानंवागुणान्वितम्॥ वि मूढानानुपश्यंतिपश्यंतिज्ञानचक्षुषः॥ १०॥ यततोयोगिनश्चैनंपश्यंत्यात्मन्यवस्थितम्॥ यततोप्यकृतात्मानोनैनंपश्यंत्यचेतसः॥ ११॥

शिकल्पनायाअयोग्यत्वाच्च सएवंजीवभूतईश्वरोममैवांशइवांशोरूपभेदोमनःषष्ठंयेषुतानिमनसासहषष्ठिंद्रियाणि प्रकृतिस्थानिइंद्रियाणांप्रकृतिःस्वभावोविषयप्रावण्यंतत्रस्थितानि कर्षतिसुप्तिप्रल यसमाधिकालेषुसंकोचयति ॥ ७॥ तथैतान्येवआशयात्स्थलयस्थानात्गृहीत्वासंयातिविषयदेशंप्रतिगच्छतिप्रबोधसर्गव्युत्थानकालेषु तत्रदृष्टांतः वायुर्गंधानिवाशयात् गंधाश्रयात्पुष्पात् ॥८॥ का नितानिमनःषष्ठानि तानिगृहीत्वागत्वाचायंकिंकरोतीत्यतआह श्रोत्रमिति अधिष्ठायव्यापारबंधनिरुत्वाविषयान्शब्दादीनुपसेवतेप्रकाशयति यथादीपःस्वस्यदृत्तिलाभायतैलवर्त्त्यायपेक्षमाणोपिस्वविष यावभासनेस्वयमेवप्रभुः एवंजीवोपिघटाकारत्वलाभायमनःषष्ठानींद्रियाणिसूर्यादीश्चापेक्षतेनतथापिघटावभासंस्वयमेवकरोतिनेतराणिइंद्रियसूर्यादीनिस्वभास्यत्वात्तैलवर्त्यादिवदित्याशयः॥९॥ तमेवं भूतंमनःषष्ठानींद्रियाणिप्राणंचाधिष्ठायतेषामुक्तमणेनोक्तामंतंतेषांस्थित्यास्थितंतेषांभोगेनभुंजानंतेषांसत्वरजस्तमोगुणयुक्तत्वेनगुणान्वितंघटसूर्यमिवघटाकाशमिवबाघटगमनादिनागमनादिमंतंस्वतस्तू क्रमणादिशून्यमपिविमूढास्तात्त्विकरूपंनानुपश्यंति ज्ञानचक्षुषस्तुपश्यंतिउपाधेरेवोक्तक्रमणादिकंननूपहितस्यात्मनइतिजानंत्येवेत्यर्थः ॥ १०॥ यततोयत्नशीलायोगिनश्चएनंआत्मनिबुद्धावंवस्थितंविगु मुक्तांत्यादिहीनमसंगंपश्यंति यततोपिअकृतात्मानः येयज्ञादिभिरशोधितचित्ताःएनंनपश्यंति यतःअचेतसःअनिर्जितचित्ताः पाषाणतुल्याइत्यर्थः ॥ ११ ॥

कथंतर्हिसूर्यादीनामपिभासकत्वंलोकेदृश्यतेनदर्पिमदावेशादेवेत्याह यदादित्येति अत्राप्यादित्यादिपदैःकरणाधिष्ठात्र्योदेवतास्तदधिष्ठेयानिकरणानिचतंत्रेणैवगृह्यंते यदादित्यादिषुबाह्यकरणाधिष्ठातृषु तत्तदधिष्ठेयेषुबाह्यकरणेषुचगतंविद्यमानंतेजोविषयप्रकाशनसामर्थ्यंसर्वंजगद्भासयतेतत्तेजोमामकंमदीयंविद्धि येनसूर्यस्तपतितेजसेद्धः येनचक्षूंषिपश्यंतीत्यादिश्रुतिभ्यः एवंमनश्चंद्रमसोर्यदांतरप्रपंच प्रकाशनसामर्थ्यंतदपिमामकमेव तथायद्वागग्र्योरव्याकृतादिविषयप्रकाशनसामर्थ्यंतदपिमामकमेवेत्यर्थः अक्षरयोजनास्पष्टा ॥१२॥ नकेवलमादित्यादिगतप्रकाशनसामर्थ्यंमामकमपितुपृथिव्यादि गतंभूतधारणव्यापनसामर्थ्यमपिमदीयमेवेत्याह गामिति गांपृथिवीमाविश्यतांपृथिवींदृढांकृत्वाभूतान्यहमेवधारयामिओजसाबलेन अन्यथापृथिवीसिकतामुष्टिवद्विशीर्येत तथाचमंत्रवर्णः येनद्यौरु ग्रापृथिवीचदृढेति सदाधारपृथिवीमितिच तथाहमेवसोमोरसात्मकोजलात्मकः रसोजलंरसोहर्षइत्यनेकार्थमंजरी जलमयोभूत्वासर्वाओषधीःपुष्णामिचरसवतीःपुष्टाश्चकरोमि सोमोहिस्वात्मरसानुप वेशेनसर्वाओषधीःपुष्णातीतिप्रसिद्धं ॥ १३ ॥ अहंवैश्वानरसंज्ञउदरस्थोऽग्निर्भूत्वाप्राणिनांसर्वंदेहमाश्रितःसन्प्राणापानाभ्यांवायुभ्यांसमायुक्तःसमुद्दीपितश्चतुर्विधमन्नमदनीयंभक्ष्यंदंतव्यापारापेक्ष मपूपादि भोज्यंदनपेक्षंपायसादि लेह्यंगुडशर्करादि चोष्यंनिश्चोष्यत्यज्यमानमिक्षुदंडादि एतेनसर्वत्रसर्वाशक्तिर्यादृश्यतेसामदीयैवेतिज्ञापनायतदेवंभोक्तावैश्वानरोग्निर्भोज्यमन्नंसोमस्तदेवमुभयमग्नीषो

यदादित्यगतंतेजोजगद्भासयतेऽखिलम्॥ यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकम्॥ १२॥गामाविश्यचभूतानिधारयाम्यहमोजसा॥ पुष्णामिचौ षधीःसर्वाःसोमोभूत्वारसात्मकः॥ १३॥ अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः॥ प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधम्॥ १४॥ सर्वस्यचा हंहृदिसंनिविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंच॥ वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वेदविदेवचाहम्॥ १५॥ द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच॥ क्षरः सर्वाणिभूतानिकूटस्थोक्षरउच्यते॥ १६॥उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः॥ योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः॥ १७॥

मौसर्वमितिपश्यतोन्नदोषलेपोनभवतीत्यपिद्रष्टव्यं ॥ १४ ॥ किंच सर्वस्यप्राणिजातस्याहंहृदिसन्निविष्टआत्मेत्यर्थः अतोमत्तआत्मनस्तेषांस्मृतिर्ज्ञानंचपुण्यवतां पापिनांतुतयोरपोहनंविस्मरणमज्ञानं चभवति तथाचसर्वैर्वेदैःकर्मोपासनाज्ञानकांडात्मकैरहमेवपरमात्मावेद्योवेदांतकृत्वेदांतोक्तविद्यासंप्रदायकृत्वेदवित्वेदार्थविच्चाहमेव एतेनवेदांतविद्वेदविच्चत्वंविभूतिरित्युक्तंभवति ॥ १५॥ सर्वशास्त्र हृदयंसंगृह्याति द्वाविति लोकेप्रसिद्धौहिमौद्वावेवपुरुषौ क्षरोविनाशीसचसर्वाणिभूतानिप्राणंति कर्मक्षयेसुप्तिप्रलयकैवल्यादावुपाधिनाशमनुविनाशंलोजीवोब्रह्मप्रतिबिंबभूतोजलार्कोपमः प्रज्ञान घनएवैतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतीतिश्रुतेः कूटस्थोनिर्विकारोमायोपाधिरक्षरः तदुपाधेरकर्मजत्वेननाशासंभवात् उपाधिदोषेणावशीकृतत्वाच्चासौनक्षरतिस्वरूपान्नच्यवतइत्यक्षरः ॥ १६ ॥ एताभ्यांकार्यकारणोपाधिभ्यामन्योनिरुपाधिरुत्तमःपुरुषः योसौपरमात्मेत्युदाहृतःशास्त्रे योसौमायया ईश्वरोभूत्वालोकत्रयमुत्तममध्यमाधमशरीररूपमाविश्यप्रविश्यधारयतिशरीरत्रयं अथापिअव्ययःसर्वज्ञत्वेनईश्वरधर्मेणअल्पज्ञत्वेनजीवधर्मेणकानप्येतिवर्धतेक्षीयतेवेत्यर्थः ॥ १७ ॥

यस्मादिति क्षरमुपाधिमक्षरंचोपाधिमतीतोतिक्रम्यस्थितोहमतोऽक्षरादपिचेतिचशब्दात्क्षरादपिउत्तमःउत्कृष्टतमः जडात्क्षररूपादुपाधेरुत्कृष्टस्तदुपहितोजीवश्चेतनत्वात् ततोप्युत्कृष्टतरोमायोपाधिः स्वतंत्रत्वात् ततोप्युत्कृष्टतमोनुपाधिरनागंतुकरूपत्वात् अक्षरार्थःस्पष्टः ॥ १८ ॥ एतद्विज्ञानफलमपिप्रकिरेवेत्याह योमामिति असंमूढःमत्पुरुषोत्तमत्वेसंशयविपर्यासादिहीनःसएवसर्ववित् यतोमांपुरुषोत्तमंजानाति तत्फलंचमांसर्वभावेनसर्वात्मनासर्वैःप्रकारैर्भजति ॥ १९ ॥ अस्मिन्नध्यायेभगवत्तत्त्वज्ञानस्यमोक्षफलत्वमुक्त्वाऽथेदानींतत्स्तौति इतीति इतिएतद्गुह्यतममित्यंतरहस्यंशास्त्रं यद्यपिइयमष्टादशाध्यायीकृत्वाशास्त्रंतथाप्यस्मिन्नध्यायेकृत्स्नस्यशास्त्रार्थस्यप्रदर्शनादयमपिशास्त्रं अत्रहिकार्यकारणविभागःसंसारदशस्यानित्यत्वंभगवतोविभूतयोयस्तंवेदसवेदवित्वंवेदैश्चसर्वैरहमेववेद्यइत्यादिनासर्वःशास्त्रार्थोदर्शितोस्ति इदंमयोक्तं हेअनघनिर्व्यसन एंतद्रहस्यंबुद्धाबुद्धिमान्ज्ञानीस्यात्आत्मविद्भवेत् तावताकृतकृत्यः सर्वैहिकृत्यंपरमात्मावगतिपर्यंतंत्रैवकृत्स्नपुरुषार्थसमाप्तेः चात्यामप्रापणीयश्चस्यात्भवतिनातःपरंकर्त्तव्यमवशिष्यतेइत्यर्थः ॥ २० ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेपंचदशोऽध्यायः ॥ १५ ॥ ५० ॥ ३९ ॥ ॥ ७ ॥ ॥ ५ ॥ नवमाध्यायेराक्षसी

यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः ॥ अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः ॥ १८ ॥ योमामेवमसंमूढोजानातिपुरुषोत्तमम् ॥ ससर्वविद्भजतिमांसर्वभावेनभारत ॥ १९ ॥ इतिगुह्यतमंशास्त्रमिदमुक्तंमयानघ ॥ एतद्बुद्धाबुद्धिमान्स्यात्कृतकृत्यश्चभारत ॥ २० ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिश्रीमद्भगवद्गीतासू० पुरुषोत्तमयोगोनामपंचदशोऽध्यायः ॥ १५ ॥ पर्व० ऊनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अभयंसत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ॥ दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्जवम् ॥ १ ॥ अहिंसासत्यमक्रोधस्त्यागःशांतिरपैशुनम् ॥ दयाभूतेष्वलोलुत्वंमार्दवंह्रीरचापलम् ॥ २ ॥

आसुरींदैवीचेतित्रःसंपदउक्तास्तासुराक्षसीमासुर्यामिवांतर्भाव्यद्वेएवसंपदावत्रव्युत्पाद्येते द्वयाहभाजांपत्यादेवाश्चासुराश्चेतिश्रुतौअभयसत्त्वशुद्ध्यादिधीदत्तयोदेवाःदंभदर्पादिधीदत्तयोऽसुराइतिद्वैराश्यस्यैवदर्शनात्पूर्वाध्यायेइदमुक्तंमयानघेत्यर्जुनंसंबोधयताऽनघत्वंदैवसंपत्तिमत्त्वंतद्विपर्ययस्त्वासुरीसंपदितिदर्शयितुंश्रीभगवानुवाच अभयमिति अभयंस्वोच्छेदबुद्ध्याभावः सत्त्वसंशुद्धिश्चित्तनैर्मल्यं ज्ञानंश्रवणादिजन्ययोगोज्ञातेर्यैश्चित्तप्रणिधानंतयोर्व्यवस्थितिर्निष्ठा एषामुख्यादैवीसंपत् दानंयथाशक्तिसंविभागोन्यादीनां दमोबाह्येंद्रियनियमः यज्ञःश्रौतस्मार्तादिः स्वाध्यायोवेदाध्ययनं तपोवक्ष्यमाणलक्षणंशारीरादित्रिविधं आर्जवंऋजुत्वंसर्वदा ॥ १ ॥ किंच अहिंसाप्राणिपीडावर्जनं सत्यमप्रियानृतवर्जनंयथाभूतार्थभाषणं अक्रोधःपरैराकुष्टस्याभिहतस्यवाप्राप्तस्यक्रोधस्योपशमनं त्यागःसर्वकर्मसंन्यासः पूर्वंदानस्योक्तत्वात् शांतिरंतःकरणस्योपरमः पैशुनंपरदोषप्रकाशनंअपैशुनंतद्वर्जनं दयादुःखितेषुभूतेषुरुपा अलोलुत्वमिंद्रियाणांविषयसंनिधावप्यविक्रिया मार्दवंमृदुता ह्रीर्लज्जा अचापलंअसतिप्रयोजनेवाक्पाणिपादादीनामव्यापारयितृत्वं ॥ २ ॥

किंच तेजःप्रागल्भ्यंनतूपता क्षमाआकुष्टस्यताडितस्यवांतर्विकियानुत्पत्तिः उत्पन्नायाविक्रियायाःप्रशमनमक्रोधइत्युक्तं धृतिर्देहेंद्रियेष्ववसादंप्राप्तेपुनस्यप्रतिषेधकौंतःकरणवृत्तिविशेषोयेनोत्तंभिता निदेहादीनिनावसीदंति शौचंद्विविधंमृज्जलाभ्यांबाह्यमांतरंमनोबुद्ध्योर्नैर्मल्यंमायारागादिकालुष्याभावः अद्रोहःपरजिघांसायाअभावः नातिमानिताअत्यंतंमानराहित्यं एतानिअभयादीनिदैवींसत्त्वप्रधानांसंपदमभिलक्ष्यजातस्यस्वभावतोभवंतिहेभारत ॥ ३ ॥ अथेदानींरजस्तमोमयीआसुरीसंपदुच्यते दंभइति दंभोधर्मध्वजित्वं दर्पःधनाभिजननिमित्तउत्सेकः अभिमानआत्मनिपूज्यताबुद्धिः क्रोधःप्रसिद्धः पारुष्यंनिष्ठुरभाषणं अज्ञानमविवेकजनितोमिथ्याप्रत्ययः एतेआसुरींसंपदमभिलक्ष्यजातस्यभवंतिहेपार्थ ॥ ४ ॥ अनयोःसंपदोःकार्यमाह दैवीति दैवीपूर्वोक्ता अर्जुनस्यशंकाकिमहमासुर्यांसंपदिजातोस्मीतितामपनुदति माशुचइति ॥ ५ ॥ द्वौद्विसंख्यौभूतसर्गौभूतानांस्वभावौ मेमद्वचनाच्छृणु ॥ ६ ॥ प्रवृत्तिंविधिवाक्यंनिवृत्तिंनिषेधवाक्यंनविदुः धर्माधर्मयोरिष्टानिष्टहेतुत्वज्ञानरहिता

तेजःक्षमाधृतिःशौचमद्रोहोनातिमानिता ॥ भवंतिसंपदंदैवीमभिजातस्यभारत ॥ ३ ॥ दंभोदर्पोऽभिमानश्चक्रोधःपारुष्यमेवच ॥ अज्ञानंचाभिजातस्यपार्थसंपदमासुरीं ॥ ४ ॥ दैवीसंपद्विमोक्षायनिबंधायासुरीमता ॥ माशुचःसंपदंदैवीमभिजातोसिपांडव ॥ ५ ॥ द्वौभूतसर्गौलोकेस्मिन्दैवआसुरएवच ॥ दैवोविस्तरशःप्रोक्तआसुरंपार्थमेशृणु ॥ ६ ॥ प्रवृत्तिंचनिवृत्तिंचजनानविदुरासुराः ॥ नशौचंनापिचाचारोनसत्यंतेषुविद्यते ॥ ७ ॥ असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं ॥ अपरस्परसंभूतंकिमन्यत्कामहैतुकम् ॥ ८ ॥ एतांदृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयः ॥ प्रभवंत्युग्रकर्माणःक्षयायजगतोऽहिताः ॥ ९ ॥ काममाश्रित्यदुष्पूरंदंभमानमदान्विताः ॥ मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्त्तंतेऽशुचिव्रताः ॥ १० ॥ चिंतामपरिमेयांचप्रलयांतामुपाश्रिताः ॥ कामोपभोगपरमाएतावदितिनिश्चिताः ॥ ११ ॥ आशापाशशतैर्बद्धाःकामक्रोधपरायणाः ॥ ईहंतेकामभोगार्थमन्यायेनार्थसंचयान् ॥ १२ ॥

इत्यर्थः ॥ ७ ॥ असत्यंसत्यवर्जितंजगत्प्राणिजातं तथाऽप्रतिष्ठंधर्माधर्माख्याप्रतिष्ठाआश्रयस्तच्छून्यं अनीश्वरमनियंतृकं आहुः अपरस्परसंभूतं अपरस्पराःक्रियासातत्येतिसुट् बीजांकुरवत्परस्परकारणीभूतानांधर्माधर्मतद्वासनानांयत्सातत्यंतस्मात्संभूतंकिमन्यद्लोकेस्तिनकिंचिदपिधर्माद्यपेक्षयाउत्पद्यतेकितुसर्वंकामहैतुकंस्त्रीपुंसयोर्मिथुनीभावःकामस्तदुत्थमेव स्वभावादेवजंतुर्जायतेनत्वदृष्टादित्यर्थः ॥ ८ ॥ एतामनुपदोक्तांलौकायतिकानामभिप्रेतांदृष्टिमवष्टभ्यतामाश्रित्यनष्टात्मानःकामादिवशेननष्टधैर्याः यतोल्पेक्षुद्रेदृष्टसुखेएवबुद्धिर्येषांतेऽल्पबुद्धयः अहिताःहिंस्राः ॥ ९ ॥ असद्ग्राहान्वश्याकर्षणनिध्यंजनकायसिद्ध्यादिसाधनेषुअसत्सुअसमीचीनेषुग्राहानिबंधाअत्यंताभिनिवेशास्तान्गृहीत्वाअशुचीनिमद्यमांसादिसापेक्षाणिव्रतानियमविशेषायेषांतेतथाभूताः संतःकुमार्गप्रवर्तनेनप्रवर्तंतेजगतःक्षयायेतिसंबंधः ॥ १० ॥ चिंतायोगक्षेमविषयां प्रलयांतांमरणावधिं एतावत्देहएवात्माकामभोगएवपुरुषार्थइतोन्यन्नास्तीतिनिश्चिताःनिश्चयवंतः तथाचबार्हस्पत्यंसूत्रं चैतन्यविशिष्टःकायःपुरुषः कामएवैकःपुरुषार्थइतिच ॥ ११ ॥ अन्यायेनपरवंचनादिना अर्थसंचयान्धनराशीन् ईहंतेलिप्संते ॥ १२ ॥

आशापाशशतैर्विद्धणोति इदमद्येति॥१३॥क्रोधपरायणत्वंकामपरायणत्वंचपूर्वोत्तराभ्यामर्धाभ्यामाह असाविति ईश्वरःसमर्थःसर्वेषांनिग्रहे सिद्धःलब्धाखिलभोगसाधनः बलवान्विषयोपभोगेसम र्थः अतएवसुखी ॥१४॥आढ्योधनी अभिजनवान्कुलीनः अज्ञानेनअविवेकेनमोहिताःविविधंभ्रमंप्रापिताः॥१५॥ अनेकंनास्तिएकंचिंतनीयंयस्यतत् अनेकंबहुषुविषयेषुपूर्वोक्तिषुलग्नंचित्तंयेषांतेअने कचित्तास्तेचतेविभ्रांताश्चकिमिदमादौसाधनीयमिदमादौसाधनीयमिति विशेषेणभ्रांत्याकुलाअनेकचित्तविभ्रांताः मोहःअसत्त्वपिसद्बुद्धिस्तदेवजालंतेनसम्यगावृताः प्रसक्ताःप्रकर्षेणलग्नाः अशुचौवि ण्मूत्रादिमये॥१६॥आत्मनैवात्मानंमहांतंमन्यंतेतेआत्मसंभाविताः स्तब्धाःअप्रणताः धननिमित्तोमानोगर्वोमदउन्मत्ततताभ्यामन्विताःधनमानमदान्विताः नामयज्ञैर्नाममात्रैर्यज्ञैः दंभेनधर्मध्वजितया

इदमद्यमयालब्धमिमंप्राप्स्येमनोरथम्॥ इदमस्तीदमपिमेभविष्यतिपुनर्धनम्॥ १३॥ असौमयाहतःशत्रुर्हनिष्येचापरानपि॥ ईश्वरोहमहंभोगीसिद्धोहंबल वान्सुखी॥ १४॥ आढ्योभिजनवानस्मिकोन्योस्तिसदृशोमया॥ यक्ष्येदास्यामिमोदिष्यइत्यज्ञानविमोहिताः॥ १५॥ अनेकचित्तविभ्रांतामोहजालसमावृ ताः॥ प्रसक्ताःकामभोगेषुपतंतिनरकेऽशुचौ ॥ १६॥ आत्मसंभाविताःस्तब्धाधनमानमदान्विताः॥ यजंतेनामयज्ञैस्तेदंभेनाविधिपूर्वकम्॥ १७॥ अहंकारंब लंदर्पंकामंक्रोधंचसंश्रिताः ॥ मामात्मपरदेहेषुप्रद्विषंतोभ्यसूयकाः ॥ १८ ॥ तानहंद्विषतःक्रूरान्संसारेषुनराधमान्॥ क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु ॥ १९॥ आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि॥ मामप्राप्यैवकौंतेयततोयांत्यधमांगतिम् ॥ २०॥ त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः॥ कामःक्रोधस्त थालोभस्तस्मादेतत्त्रयंत्यजेत्॥ २१॥ एतैर्विमुक्तःकौंतेयतमोद्वारैस्त्रिभिर्नरः॥ आचरत्यात्मनःश्रेयस्ततोयातिपरांगतिम्॥ २२॥

अविधिपूर्वकंयथोक्तधनज्ञानस्वयमृत्विक्पत्न्यादिशुद्धिरहितंयजंते ॥१७॥ अहंकारोहमेवसर्वश्रेष्ठइतिबुद्धिः बलंशारीरंधनाभिजननिमित्तंच दर्पंपरावज्ञां कामंक्रोधंचसंश्रिताः मांसर्वदेहेषुप्रविष्टं आ त्मदेहेस्वदेहशोषणेन कर्षयंतःशरीरस्थंभूतग्राममचेतसः मांचैवांतःशरीरस्थंतान्विद्ध्यासुरनिश्चयानितिवक्ष्यमाणदिशापरदेहेचहिंसादिनाप्रद्विषंतः अभ्यसूयकाःसर्वत्रगुणेषुवेदोक्तेषुशमादिषुअशक्तत्वा दिलक्षणंदोषमारोपयंतः ॥ १८ ॥ तेषांफलमाह तानिति सर्वभूतसमोप्यहंतान्वेदोक्तशासनातिगान्भूतद्रोहकर्तॄन् अहमंतरात्मानतुतटस्थोयेनममवैषम्यंस्यात् पूर्वसंस्कारात्तेतथैवपापंकुर्वंतितदनुरूपं फलंचप्राप्नुवंतीत्यर्थः ॥ १९ ॥ आसुरयोनिप्राप्तेरपिफलमाह आसुरीमिति अधमांनारकीं तिर्यक्स्थावरादिरूपांवा ॥२०॥ संक्षेपमासुर्याःसंपत्तेराह त्रिविधमिति ॥ २१॥ कामादित्रयत्यागेकिंस्यादत ॥८६॥
आह एतैरिति तमोद्वारैःतमसोनरकस्यदुःखमोहात्मकस्यद्वारभूतैर्विमुक्तःसन् आत्मनःश्रेयःकल्याणंभगवदाराधनादिकंआचरति ततःपरांगतिंमोक्षंयातितस्मात्कामादित्रयंत्यजेदिति ॥ २२ ॥

नकेवलंकाष्ठतपस्विवत्कामादित्यागमात्रेणोच्छास्त्रवर्तीसिध्यतीत्याह यइति शास्त्रविधिंशास्त्रेणइष्टसाधनतयाऽनिष्टसाधनतयाचज्ञापितंब्राह्मणोयजेतनसुरांपिबेदित्यादिनाविहितंनिषिद्धंचउत्सृज्यविहि तमकरणेननिषिद्धमाचरणेनचउत्सृज्ययोवर्ततेकामकारतइच्छयासःसिद्धिंचित्तशुद्धिंसुखंवैराग्यादिजनितांतृप्तिंपरांगतिंमोक्षंचनावाप्नोति ॥ २३ ॥ यस्माच्छास्त्रातिगःशुद्ध्यादिकंत्रयंनाप्नोतितस्मात्तेतव शुद्ध्यादिकामस्यशास्त्रमेवप्रमाणंकिंकार्यंकिंनकार्यमित्यस्यांव्यवस्थायां एवंज्ञात्वाशास्त्रंइदंकर्तव्यमिदंनकर्तव्यमितिशासनंवेदाज्ञारूपं विधानंचतदुल्लंघनेप्रतिसमाधानं अग्निहोत्राद्यकरणेऽयंदोषस्तत्परि हारार्थमिदंकृच्छ्रादिकंप्रायश्चित्तं ब्रह्महत्यादिकरणेऽयंदोषस्तत्परिहारार्थमिदमश्वमेधादिअन्यद्वाप्रायश्चित्तं शास्त्रंचविधानंचताभ्यामुक्तंकर्मइहमनुष्यलोकेकर्तुमर्हसि लोकांतरेकर्मस्वनधिकारंदर्शयि तुमिहेत्युक्तं तदेवंशास्त्रानुवर्तिनएवचित्तशुद्ध्यादिकंनान्यस्येतिसिद्धम्॥२४॥ ॥इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेषोडशोऽध्यायः ॥ १६॥ ५०॥ ४०॥ ॥ ५ ॥ ॥ तस्माच्छास्त्रंप्रमाणंतइ

यःशास्त्रविधिमुत्सृज्यवर्ततेकामकारतः॥नससिद्धिमवाप्नोतिनसुखंनपरांगतिम् ॥ २३॥ तस्माच्छास्त्रंप्रमाणंतेकार्याकार्यव्यवस्थितौ ॥ ज्ञात्वा शास्त्रविधानोक्तंकर्मकर्तुमिहार्हसि॥ २४॥ ॥इतिश्रीमहाभारतेभीष्म०श्रीमद्भ०देवासुरसंपद्विभागयोगोनामषोडशोऽध्यायः॥ १६॥ ॥पर्व णितुचत्वारिंशोऽध्यायः॥ ४०॥ ॥ ५॥ ॥अर्जुनउवाच॥ ॥येशास्त्रविधिमुत्सृज्ययजंतेश्रद्धयान्विताः॥ तेषांनिष्ठातुकाकृष्णसत्त्वमा होरजस्तमः॥ १॥ ॥श्रीभगवानुवाच॥ ॥त्रिविधाभवतिश्रद्धादेहिनांसास्वभावजा॥ सात्त्विकीराजसीचैवतामसीचेतितांशृणु॥ २॥

तिप्रश्नबीजमुपलभ्यार्जुनउवाच यइति येपुरुषाःशास्त्रविधिं शास्त्रपदेनात्रश्रुतिसदाचारकुलाचारागृह्यंते सर्वेषांतेषांधर्मेप्रमाणत्वात् तत्रयोधिगतोविधिर्विधेयंतदुत्सृज्यसर्वात्मनापरित्यज्ययजंतेपूजयं तितातकूपादीन् मत्पित्राकृतोयंकूपोगंगाशतादप्यधिकोत्रैवस्नानपानावगाहनपरिचर्याप्रदक्षिणप्रक्रमणरूपादेतत्सेवनादहमिष्टंफलमवश्यंप्राप्स्यामीतितत्रदृढतरयाश्रद्धयान्विताःसंतस्तेषांनिष्ठाइयंकाकी दृशी किंसत्त्वंसात्त्विकीवापित्र्येकूपेश्रद्धाधिक्यदर्शनात् किंरजःराजसीवातेषांनिष्ठाशास्त्रातिक्रमेणकामकाररूपत्वात् आहोइतिप्रश्ने किंतमःतामसीवासानिष्ठारंगेरजतधीरिवाशास्त्रीयायाअल्पे महत्त्वबुद्धेर्विपर्यासरूपायादर्शनात् यदपितुभाष्येवृद्धव्यवहारदर्शनादेवश्रद्धधानतयादेवादीन्यजंतइत्युक्तं तत्राप्यविगीतएववृद्धव्यवहारोग्राह्यः अविगीतेस्मिंस्तामसत्वादिशंकायाअयोगात्॥ १॥ एवं सामान्यतःपृष्टेसामान्यमेवोत्तरंश्रीभगवानुवाच त्रिविधेति स्वभावःप्राग्भवीयौधर्माधर्मौततोजातास्वभावजा यदिप्राग्भवेसात्त्विकोदेवतापूजादिधर्मोऽनेनानुष्ठितस्तर्हितस्यशुद्धसात्त्विक्येवश्रद्धाभव ति यदिराजसोयक्षादिपूजारूपस्तर्हिराजस्येव यदितामसोभूतप्रेतादिपूजारूपस्तर्हितामसीश्रद्धाभवति एवंत्रिविधाश्रद्धादेहिनांदेहाभिमानवतांभवतितांमयाव्याख्यास्यमानांशृणु॥२॥

ननुश्रद्धान्वितोभूत्वात्मन्येवात्मानंपश्येदितिश्रद्धाया आत्मदर्शनेसाधनेष्वंतरंगत्वमुच्यतेकथंतस्याराजसत्वंतामसत्वंचोच्यतइत्यतआह सत्त्वेतिप्राक्कर्मसंस्कारोपेतंयादृशंबुद्धिसत्त्वंसात्त्विकंराजसंवातदनु रूपैवसात्त्विक्यादिरूपादेवतादिपूजासुफलावश्यंभावनिश्चयात्मिकाश्रद्धापिभवति तथायंपुरुषोपिश्रद्धामयःश्रद्धाप्रधानोयोयच्छ्रद्धोयोययाश्रद्धयोपेतःसएवसइतिसात्त्विक्याश्रद्धयाउपेतःसात्त्विकैए वराजस्याराजसस्तामस्यातामसइति एवंसतियदितातकूपभक्तःपूर्वपुण्यवशात्तातंदेववन्मन्यतेतर्हितंसात्त्विकंपुंडलीकमिवदेवाअनुगृह्णंतिनित्यकर्मत्यागनिमित्तमपिदोषमस्यापनुदंति यदित्वयंप्रेतःपितामत्कुटुंबंमाबाधि सिद्धंपूर्ववासनावशात्यक्षादिरूपंमन्यतेतदातंराजसंराजसायक्षाएवानुगृह्णंति नास्यकामकारवतोनित्यकर्मत्यागजंदोषमपनेतुमर्हंति नहिदेवतापराधीयक्षैस्त्रातुंशक्यते यदित्वयंप्रेतःपितामत्कुटुंबंमाबाधि ष्टेतिसबैधर्मैत्यक्त्वाएनमस्यप्रियंकूपंपूजयामीतिमन्यतेतदातंपितरंप्रेतत्वबुद्धियोगाद्विपर्यस्तंतामसंप्रेताएवानुगृह्णंतिक्षुद्रभोगैर्देवाश्चनरकेपातयंति ॥३॥ कुतएतदेवंकल्प्यतेयस्मात्सात्त्विकादयोदेवादीनेव यजंतेइत्याह यजंतइति यजंतेपूजयंति ॥४॥ सात्त्विकानांदौर्लभ्यमभिप्रेत्याह अशास्त्रेति शास्त्रंवेदादितद्विरोधिनाकौलिकाद्यागमेनविहितंघोरंरक्तमांसहोमेनब्राह्मणलोहितादिनावादेवासंतर्पणाद्यात्मकं

सत्त्वानुरूपासत्त्वस्यश्रद्धाभवतिभारत॥ श्रद्धामयोयंपुरुषोयोयच्छ्रद्धःसएवसः॥ ३॥ यजंतेसात्त्विकादेवान्यक्षरक्षांसिराजसाः॥ प्रेतान्भूतगणांश्चान्येयजंते तामसाजनाः॥ ४॥ अशास्त्रविहितंघोरंतप्यंतेयेतपोजनाः॥ दंभाहंकारसंयुक्ताःकामरागबलान्विताः॥ ५॥ कर्शयंतःशरीरस्थंभूतग्राममचेतसः॥ मांचैवांतः शरीरस्थंतान्विद्ध्यासुरनिश्चयान्॥ ६॥ आहारस्त्वपिसर्वस्यत्रिविधोभवतिप्रियः॥ यज्ञस्तपस्तथादानंतेषांभेदमिमंशृणु॥ ७॥ आयुःसत्त्वबलारोग्यसुखप्रीतिवि वर्धनाः॥ रस्याःस्निग्धाःस्थिराहृद्याआहाराःसात्त्विकप्रियाः॥ ८॥ कट्वम्ललवणात्युष्णातीक्ष्णरूक्षविदाहिनः॥ आहाराराजसस्येष्टादुःखशोकामयप्रदाः॥ ९॥

येजनास्तपस्तप्यंतेतानासुरनिश्चयान्विद्धीतिद्वयोःसंबंधः दंभोधर्मध्वजित्वं अहंकारःस्वस्मिन्पूज्यताबुद्धिस्ताभ्यांसंयुक्ताः कामरागोविषयाभिलाषः बलंसाहसेनापिविषयसाधनेउत्साहस्ताभ्यामन्वि ताः॥५॥कर्शयंतःकृशंकुर्वंतः भूतग्रामंकरणसमूहं अचेतसोमूढाः मांचांतःशरीरस्थंभोक्तृरूपेणशरीरांतःस्थंमांपरमेश्वरंवाभोग्यस्यशरीरस्यकृशीकरणेनमदाज्ञालंघनेनवाकृशीकुर्वंतःतान्विद्ध्यासुरनिश्चया न् ॥६ ॥ अत्रसात्त्विकानांश्रद्धाराध्याहारयज्ञतपोदानानांपरिग्रहार्थंराजसतामसानांवर्जनार्थंचतेषांप्रत्येकंत्रैविध्यंविधीयते तत्रापिश्रद्धात्रैविध्यमाराध्यत्रैविध्यंचप्रागेवोक्तं आहारादीनांत्रैविध्यंप्रति ज्ञापूर्वकमाह आहारस्त्विति आह्रियतइत्याहारोन्नं अतःपरंप्रायेणपदार्थःस्पष्टः तथापिकश्चित्कश्चिच्चिंकिंचिच्चिद्व्याख्यायते ॥ ७॥ आयुर्जीवनं सत्त्वमुत्साहः बलंशक्तिः आरोग्यंरोगराहित्यं सुखंचित्त प्रसादः प्रीतिःअभिरुचिः एतेषांविवर्धनाःवृद्धिकराःतेआयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याःरसोपेताः स्निग्धाःस्नेहवंतः स्थिराःदेहेरसांशेनचिरकालस्थायिनः हृद्याःदृष्टमात्रापेवहृदयप्रियाः आ हाराःघृतक्षीरसितादयःसात्त्विकप्रियाः ॥ ८ ॥ कट्वादि अतिशब्दःसर्वत्रसंबध्यते अतिकटुर्निंबादि अत्यम्लातिलवणात्युष्णाःप्रसिद्धाः अतितीक्ष्णोमरीचादिः अतिरूक्षःस्नेहशून्यःकंगुकोद्रवादिः अति विदाहीगाजिकादिः दुःखंतात्कालिकीपीडा शोकःपश्चाद्भाविदौर्मनस्यं आमयोधातुवैषम्यापादनेनरोगस्तत्प्रदाः ॥ ९ ॥

यातयामंप्रहरात्प्राक्कृतंशीतलतांगतमित्यर्थः यातयामंअर्धपक्वंनिर्वीर्यंस्यगतरसेनैवोक्तत्वात्इतिभाष्यं गतरसंरसविमुक्तं पूतिदुर्गंधि पर्युषितंपक्वंसद्यःव्यंतरितं उच्छिष्टंभुक्तावशिष्टं अमेध्यंयज्ञानर्हं भोज नमन्नंतामसप्रियं ॥ १० ॥ यज्ञत्रैविध्यमाह अफलेति विधिदृष्टःआवश्यकतयाविहितः यष्टव्यमेवनतुयज्ञादृष्टमदृष्टंवाफलंप्राप्तव्यमितिमनःसमाधायसमाहितंकृत्वायोयज्ञइज्यतेससात्त्विकः ॥ ११ ॥ राजसंयज्ञमाह अभिसंधायेति ॥ १२ ॥ विधिहीनंशास्त्रोक्तविधिहीनं असृष्टंनदत्तमन्त्रंयस्मिन्तंअसृष्टान्नं ॥ १३ ॥ देवाःविष्वाद्याः द्विजाब्राह्मणाः गुरवोमातृपित्राचार्यादयः प्राज्ञाब्रह्मनिष्ठाः तेषांपू जनं आर्जवमकौटिल्यं ॥ १४ ॥ प्रियंचतत्हितंचप्रियहितंश्रवणकालेपरिणामेचसुखदमित्यर्थः ॥ १५ ॥ मनःप्रसादःरागद्वेषादिराहित्यं सौम्यत्वंपरहितैषित्वं मौनंवाक्संयमः आत्मविनिग्रहोमनोनि रोधः भावशुद्धिःपरैर्व्यवहारकालेमायाराहित्यं इतिएवंप्रकारंअन्यद्दयादिकं एतन्मानसंतपउच्यते ॥ १६ ॥ त्रिविधंकायिकवाचिकमानसभेदेन युक्तैःअवहितैः ॥ १७ ॥ सत्कारःलोकेसाधुरयमिति

यातयामंगतरसंपूतिपर्युषितंचयत्॥ उच्छिष्टमपिचामेध्यंभोजनंतामसप्रियम्॥ १०॥ अफलाकांक्षिभिर्यज्ञोविधिदृष्टोयइज्यते॥ यष्टव्यमेवेतिमनःसमा धायससात्त्विकः॥ ११॥ अभिसंधायतुफलंदंभार्थमपिचैवयत्॥ इज्यतेभरतश्रेष्ठतंयज्ञंविद्धिराजसम्॥ १२॥ विधिहीनमसृष्टान्नंमंत्रहीनमदक्षिणम्॥ श्रद्धा विरहितंयज्ञंतामसंपरिचक्षते॥ १३॥ देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवम्॥ ब्रह्मचर्यमहिंसाचशारीरंतपउच्यते॥ १४॥ अनुद्वेगकरंवाक्यंसत्यंप्रियहितंचय त्॥ स्वाध्यायाभ्यसनंचैववाङ्मयंतपउच्यते॥ १५॥ मनःप्रसादःसौम्यत्वंमौनमात्मविनिग्रहः॥ भावसंशुद्धिरित्येतत्तपोमानसमुच्यते॥ १६॥ श्रद्धयापरया तप्तंतपस्तत्त्रिविधंनरैः॥ अफलाकांक्षिभिर्युक्तैःसात्त्विकंपरिचक्षते॥ १७॥ सत्कारमानपूजार्थंतपोदंभेनचैवयत्॥ क्रियतेतदिहप्रोक्तंराजसंचलमध्रुवम् ॥ १८॥ मूढग्राहेणात्मनोयत्पीडयाक्रियतेतपः॥ परस्योत्सादनार्थंवातत्तामसमुदाहृतम्॥ १९॥ दातव्यमितियद्दानंदीयतेनुपकारिणे॥ देशेकालेचपात्रेचत द्दानंसात्त्विकंस्मृतम्॥ २०॥

वाक्पूजा मानःअभ्युत्थानाभिवादनादिकायिकीपूजा पूजालाभादि एतदर्थंदंभेनचयत्तपःक्रियतेतद्राजसं चलंविनाशि अध्रुवंअनिश्चितफलं ॥१८॥ मूढग्राहेणअविवेककृतेनदुराग्रहेण आत्मनःशरीर स्योत्सादनार्थंविनाशार्थं ॥ १९॥ दातव्यमेवेतिबुद्ध्यायद्दानंप्रदेयंद्रव्यंदीयतेननुफलमुद्दिश्यदीयते कस्मै अनुपकारिणेप्रत्युपकारासमर्थाय देशेकुरुक्षेत्रादौ कालेसंक्रांत्यादौ यद्दीयतेतत्सात्त्विकमितिसंबं धः यच्चपात्रेदानंसमर्पणंतदपिसात्त्विकमितियोजना अत्रआद्योदानशब्दःकर्मणिव्युत्पन्नःप्रदेयद्रव्यवाचीकर्मभूतःतत्संयोगात्संप्रदानेचतुर्थ्यपेक्षा द्वितीयस्तुभावव्युत्पन्नस्त्यागमात्रवाचीतेनतत्रपात्रभूतेपुं सिनचतुर्थ्यपेक्षा कर्मणायमभिप्रैतिससंप्रदानमितिहिपारिभाषिक्याःसंप्रदानसंज्ञायाअत्रकर्मविभक्त्यभावेनाप्रवृत्तेः तेनपात्रेइतिचतुर्थ्यर्थेसप्तमीतिवापात्रशब्दस्यचतुर्थीर्थामितिवाकल्पनंव्यर्थमेव दानश ब्दस्यादृष्ट्याचदेशकालानुपकारित्वविशिष्टेदानमित्येकाकोटिः पात्रेदानमित्यपरा उभयसमुच्चयेतुमहाञ्गुणइतिभावः ॥ २० ॥

परिक्लिष्टंकथमेतावद्द्रव्यव्ययःकर्तव्यइत्याकुलतायुक्तंयथास्यात्तथादीयतेइतिक्रियाविशेषणं ॥ २१ ॥ असत्कृतंप्रियभाषणपादप्रक्षालनादिपूजासत्कारस्तद्रहितं अवज्ञातंपात्रपरिभवयुक्तं दानंप्रेदयं हिरण्यादि ॥ २२ ॥ अदृष्टार्थानांयज्ञदानतपःप्रभृतीनांवैकल्यशंकायांसाद्गुण्यसिद्ध्यर्थंप्रायश्चित्तमुपदिश्यते ओंतत्सदिति ओमितितदितिसदितिचत्रिविधब्रह्मनिर्देशोयंब्रह्मणोनिर्देशोनाम्नांपाठः यथासहस्रनाम्नांपाठेसहस्रंनामानिएवमस्मिन्पिनामपाठेत्रीण्येवनामानीत्यर्थः ओमितिब्रह्मेतितैत्तिरीयकेतदितिबाएतस्यमहतोभूतस्यनामभवतीत्यैतरेयकेसदेवसोम्येदमग्रआसीदितिछांदोग्येचएतेषांशब्दानांब्रह्मनामत्वप्रसिद्धेः तेननामत्रयेणब्राह्मणादयोविहिताःपुरासर्गादौब्राह्मणाःएतन्नामत्रयोच्चारणसामर्थ्येनैवविधात्राविधादयोविहिताःप्रकाशिताइत्यर्थः ॥ २३ ॥ यस्मादेतन्नामत्रयपूर्वकंएतेषांविधानंसर्गादौदृष्टंतस्माद्त्रिश्चेतेषुनामसुओमित्येकमेवनामउदाहृत्यब्रह्मवादिनांवैदिकानांविधानोक्ताःवेदोक्ताःयज्ञादयःक्रियाःसततंप्रवर्तंते तथाचश्रुतिः ओमितिब्रह्मापसौतिओमितिशास्त्राणिशंसंति ओमित्यध्वर्युःप्रतिगरंप्रतिगृणाति ओमितिसामानिगायंतीतियज्ञेसर्वेषामृत्विजांक्रियाओंकारपूर्विकाइत्येतद्दर्शयति ॥ २४ ॥ ओमितिनाम्नःकाम्याकाम्यकर्मसाधारण्येनयज्ञादौविनियोगमुक्त्वातदितिनाम्नोनिष्कामेषु

यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः॥ दीयतेचपरिक्लिष्टंतद्दानंराजसंस्मृतम् ॥ २१ ॥ अदेशकालेयद्दानमपात्रेभ्यश्चदीयते॥ असत्कृतमवज्ञातंतत्तामसमुदाहृतम्॥ २२॥ ओंतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतः॥ ब्राह्मणास्तेनवेदाश्चयज्ञाश्चविहिताःपुरा॥ २३ ॥ तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाः॥ प्रवर्त्तंते विधानोक्ताःसततंब्रह्मवादिनाम्॥ २४॥ तदित्यनभिसंधायफलंयज्ञतपःक्रियाः॥ दानक्रियाश्चविविधाःक्रियंतेमोक्षकांक्षिभिः॥ २५॥ सद्भावेसाधुभावेचसदित्येतत्प्रयुज्यते॥ प्रशस्तेकर्मणितथासच्छब्दःपार्थयुज्यते॥ २६॥ यज्ञेतपसिदानेचस्थितिःसदितिचोच्यते॥ कर्मचैवतदर्थीयंसदित्येवाभिधीयते॥ २७॥

मुमुक्षुकर्मसुविनियोगंदर्शयति तदिति मोक्षकांक्षिभिःफलंअनभिसंधायविविधाःयज्ञतपःक्रियाःदानक्रियाश्चक्रियंतेइतियोजना ननुफलंचेन्नाभिसंधीयतेनतर्हिकिमभिसंधायक्रियंतइत्याकांक्षायामाह तदितिक्रियंतेइति सर्वाःक्रियास्तदितिब्रह्मेतिक्रियंते यथाब्रह्मवादिनःब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिनेत्युक्तदिशासर्वाःससाधनफलाःक्रियाःब्रह्मैवेदंसर्वमितिबुद्ध्या क्रियंते तथामुमुक्षुभिरपीत्यर्थः यद्देवहिमुक्तानांत्वाभाविकंशीलंतदेवमुमुक्षूणांशास्त्रेणविधीयतइतिप्रसिद्धेः फलमनभिसंधायेतिसान्निध्यात्तदितीत्यत्रापिसामर्थ्यादभिसंधायेतिलभ्यते तेनफलमनभिसंधायतदित्यभिसंधायक्रियाःप्रवर्तंतइत्यन्वयोपिमुलभएव तदितिब्रह्माभिधानमुच्चार्यतेतिभाष्येपिउदाहृत्येतिपूर्वश्लोकोक्तक्रियानुवृत्त्यायोजनमस्मदुक्ताभिप्रायेणैवव्याख्येयं उच्चारणस्यापिब्रह्मानुसंधानार्थत्वादितिदिक् ॥ २५ ॥ ओंतच्छब्दयोर्विनियोगमुक्त्वासच्छब्दस्यविनियोगमाहद्वाभ्यां सद्भावेइति सद्भावेअस्तित्वेसाधुभावेसमीचीनत्वेसच्छब्दःसदित्येतत्कर्मणिप्रशस्तेकर्मणिसत्त्वंवेदोक्तत्वादस्त्येवेतिसच्छब्दःप्रयुज्यतेआत्तिकैः ॥ २६ ॥ किंच यज्ञादौस्थितिर्निष्ठासदितिसमीचीनेनिउच्यते तदर्थःसच्छब्दार्थोब्रह्मतदीयंतदर्थंकृतंतदर्थीयंपरमेश्वरप्राप्त्यर्थंकृतंकर्मसदित्येवसमीचीनमित्येवाभिधीयतेलोके तदेवंअसात्त्विकंविगुणंवायज्ञादिकंश्रद्धापूर्वकंब्रह्मणोभिधानत्रयोच्चारणेनसात्त्विकंसद्गुणंचसंपादितंभवति ॥ २७ ॥

सर्वत्रश्रद्धैवसाद्गुण्यहेतुरितिव्यतिरेकमुखेनाह अश्रद्धयेति हुतंहोमः दत्तंदानं तपस्तप्तमनुष्ठितं कृतमश्रद्धयाविहितंभगवन्नामस्मरणमपियच्चान्यत्तत्सर्वमसदित्यभिधीयते पार्थअतएवतत्प्रेत्यमृत्वापरलोकेनोपयुज्यते इहास्मिन्लोकेवानैवोपयुज्यते तस्मात्श्रद्धैवसात्विकीमातेवमुखकामैःशरणीकरणीयेतिभावः ॥ २८ ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेसप्तदशोऽध्यायः ॥ १७ ॥ ५० ॥ ४१ ॥ ॥ ७ ॥ ॥ अस्यामष्टादशाध्याय्यांप्रथमेउपोद्घातितानांद्विर्हीयेसूत्रितानांशेषैर्ब्युत्पादितानामर्थानांकात्स्न्येनोपसंहारार्थोयमितिमोध्यायआरभ्यते तत्रपूर्वाध्यायांतेऽश्रद्धयाकृतंसर्वंव्यर्थमित्युक्तं तत्रफलावश्यंभावनिश्चयःश्रद्धासाचफलवतांकर्मणामेवांगंनतुकर्मविरहरूपस्यसंन्यासस्यभावरूपफलवर्जितस्य अभावाद्भावोत्पत्तेरयोगात् तस्मात्श्रद्धासापेक्षकर्मापेक्षयाश्रद्धानपेक्षःसंन्यासःश्रेयान् नचास्यैवंरूपस्यश्रद्धात्रैविध्यप्रयुक्तंसात्विकादिभेदेनत्रैविध्यंसंभवति येनफलेतारतम्यंस्यात् तत्फलस्यदृष्टविक्षेपनिवृत्तिरूपस्यसर्वत्रतुल्यत्वात् सचसंन्यासोयदिकर्मत्यागएवतर्हिसिद्धंनःसमीहितं यदितुनौभिन्नौतर्हितयोर्वैलक्षण्यंविचार्यमित्याशयेनार्जुनउवाच संन्यासस्येति हेमहाबाहो हेहृषीकेशहेकेशिनिषूदनेतिबहुकृत्वःसंबोधयन्जिज्ञासितेर्थेऽत्यादरंदर्शयति संन्यासस्यतत्त्वंयाथात्म्यंत्यागात्पृथग्भूतंवेदितुमिच्छामि त्यागस्ययाथात्म्यंसंन्यासात्पृथग्भूतंवेदितुमिच्छामीतिचकारेणानुवर्त्यते ॥ १ ॥ अत्रोत्तरंश्रीभगवानुवाच काम्यानामिति काम्यानांरागतःप्राप्तानांपुत्रका

अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतंचयत्॥ असदित्युच्यतेपार्थनचतत्प्रेत्यनोइह ॥ २८॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभगवद्गीतासू०श्रद्धात्रयविभागयोगोनामसप्तदशोऽध्यायः॥ १७॥ ॥पर्वणिएकचत्वारिंशोऽध्यायः॥ ४१ ॥ ॥ ७ ॥ ॥अर्जुनउवाच॥ ॥ संन्यासस्यमहाबाहोतत्त्वमिच्छामिवेदितुम्॥त्यागस्यचहृषीकेशपृथक्केशिनिषूदन ॥ १ ॥ ॥श्रीभगवानुवाच ॥ ॥काम्यानांकर्मणांन्यासंसंन्यासंकवयोविदुः॥ सर्वकर्मफलत्यागंप्राहुस्त्यागंविचक्षणाः॥ २॥

मेध्यादीनां ननुफलस्यकामनाविषयत्वात्सर्वस्यकर्मणःफलवत्त्वनियमात्सर्वंकर्मकाम्यमेवेतिनित्यादीनामपिमुमुक्षोस्त्यागःस्यादितिसिद्धंनःसमीहितमित्याशंक्याह सर्वेति सर्वेषांनित्यनैमित्तिककाम्यानांकर्मणांफलत्यागमेवत्यागंविचक्षणाःप्राहुर्नत्वरूपतस्त्यागंप्राहुः अतोनत्वदिष्टःसंन्यासःसिध्यतीत्यर्थः अयमाशयः यद्यपिसंन्यासत्यागशब्दौनिवृत्तिमेवब्रूतः तथापिसावैराग्याद्वांकायक्लेशभयाद्वामौढ्याद्वाभवतीतितत्कारणानांसात्विकादिभेदेनभिन्नत्वात्तस्याअपिसात्विकराजसतामसभेदेनत्रैविध्यंत्रिविधश्रद्धाप्रधानत्वंचदुर्वारं नचाविरक्तोश्रद्दधानश्चत्यक्तकर्मापिदृष्टविक्षेपहीनोदृश्यते यथोक्तंवार्त्तिकाचार्यैः प्रमादिनोबहिश्चित्ताःपिशुनाःकलहोत्सुकाः संन्यासिनोपिदृश्यंतेदैवसंदूषिताशयाइति तस्मादविरक्तकृतसंन्यासापेक्षयानिष्कामकर्माचरणमेवश्रेयइत्याशयेनभगवताकाम्यकर्मत्यागःसंन्यासत्वेननित्यादिकर्मणांफलानभिसंधानंचत्यागत्वेनस्तूयतइति तस्मादश्रद्धयाकृतःसंन्यासोप्यसन्नेवेतिसंन्यासाद्वृत्तेणः स्थानमितिस्मृतंस्वफलदातुंनसमर्थइतियुक्तमुक्तंभगवताःश्रद्धयाकृतंसर्वंव्यर्थमिति यत्तुनित्यानामेवविविदिषायोगात्काम्यानांत्वरूपतोपित्यागःपूर्वार्द्धस्यार्थः सर्वेषांकर्मणांफलतस्त्यागइत्युत्तरार्द्धार्थइतिव्याख्यानंपक्षद्वयप्रदर्शनपरंतदग्रिमेणश्लोकेनपौनरुक्त्यमावहतीत्युपेक्षितं॥२॥

इदमेवपक्षद्वयमाह त्याज्यमिति एकेमुख्यामनीषिणोमनोनियहसमर्थाःपरमात्मन्युत्पन्नविविदिषाणांपुरुषाणांदोषवत्रागादयोयथात्याज्यास्तद्वत्कर्मत्याज्यमितिप्राहुः अपरेतुविविदिषार्थिनायज्ञादि कंनत्याज्यमितिवाप्राहुरित्यनुवर्त्तते तथाचद्विविधाःश्रुतयउपलभ्यते नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाइत्याद्याः अविद्वद्विषयमेवैतत्पक्षद्वयं विदु षांतुकर्मसुप्रवृत्तिकारणस्याज्ञानस्यनष्टत्वात्स्वतःसिद्धएवत्यागइतिनतान्प्रतिकर्मविधिर्वातत्त्यागविधिर्वाप्रवर्त्तते यथोक्तं नकर्माणित्यजेद्योगीकर्मभिस्त्यज्यतेह्यसाविति ॥ ३ ॥ निश्चयमिति तत्रकर्मणां त्यागत्यागविषयेविप्रतिपत्तौसंत्यांप्रथमोपात्तेत्यागेविषयेमेमद्वचनान्निश्चयंशृणु हियस्मात्हेपुरुषव्याघ्रत्यागस्त्रिविधःसात्विकराजसतामसभेदेनत्रिप्रकारःपरिकीर्त्तितःशास्त्रे दृढवैराग्यपूर्वकःकर्मसंन्या सःसात्विकः आयासभयात्तत्त्यागोराजसः मौढ्यात्तत्त्यागस्तामसइति तस्माद्रहनत्वात्त्यागोनिश्चयेनविचारणीयइत्यर्थः ॥ ४ ॥ सूचीकटाहन्यायेनत्यागस्वरूपकथनात्पाक्परमतमत्यागपक्षमुपन्यस्य ति यज्ञेति यज्ञादिकंकर्मनत्याज्यंकिंतुकार्यमेवविदिग्रहीतेनेवपुंसाअवश्यमनुष्ठेयमेवतत् अकरणेप्रत्यवायश्रवणात् चकारोहेत्वर्थः यस्मात्यज्ञोदानंतपश्चैवमनीषिणांनिष्कामानांदंभादिरहितानांपावना निचित्तशोधकानि तथाचश्रुतिः त्रयोधर्मस्कंधायज्ञोध्ययनंदानमितिप्रथमस्तपएवद्वितीयोब्रह्मचर्यांचार्यकुलवासीतृतीयःसर्वएतेपुण्यलोकाभवंतीतियज्ञादीनांगृहस्थधर्माणांतपसोवनस्थधर्मस्याचा

त्याज्यंदोषवदित्येकेकर्मप्राहुर्मनीषिणः ॥ यज्ञदानतपःकर्मनत्याज्यमितिचापरे ॥ ३ ॥ निश्चयंशृणुमेतत्रत्यागेभरतसत्तम ॥ त्यागोहिपुरुषव्याघ्रत्रिविधःसं प्रकीर्तितः ॥ ४ ॥ यज्ञदानतपःकर्मनत्याज्यंकार्यमेवतत् ॥ यज्ञोदानंतपश्चैवपावनानिमनीषिणाम् ॥ ५ ॥ एतान्यपितुकर्माणिसंगंत्यक्त्वाफलानिच ॥ कर्तव्या नीतिमेपार्थनिश्चितंमतमुत्तमम् ॥ ६ ॥ नियतस्यतुसंन्यासःकर्मणोनोपपद्यते ॥ मोहात्तस्यपरित्यागस्तामसःपरिकीर्तितः ॥ ७ ॥ दुःखमित्येवयत्कर्मकायक्लेशभयात्त्यजेत् ॥ सकृत्वाराजसंत्यागंनैवत्यागफलंलभेत् ॥ ८ ॥

र्यकुलवासस्यब्रह्मचारिधर्मस्यचपावनत्वंदर्शयति अत्रापियज्ञदानशब्देनगृहस्थधर्माज्ञेयास्तपइतिवानप्रस्थधर्माःपरिशेषात्कर्मैतिब्रह्मचारिधर्माश्चज्ञेयाः ॥ ५ ॥ एवमत्यागपक्षमुक्त्वाऔत्सुक्यात्पथमं त्यागमतंत्यागात्यागसमुच्चयपक्षंदर्शयति एतानीति तुशब्दःपूर्वोपन्यस्तात्पक्षाद्विलक्षण्यंदर्शयति अपिशब्दएवशब्दार्थः एतान्येवकर्माणियज्ञदानतपांसिसंगंत्यक्त्वाअहमेतेषांकर्तामयावश्यमेतानिकर्त्त व्यानीत्यभिमानंवयोवर्णाद्यध्यासनिमित्तंत्यक्त्वाएतैःकृतैरहंस्वर्गंवाचित्तशुद्धिंवाज्ञानंवाप्राप्स्यामीतिफलानिचत्यक्त्वाचकारादेषामकरणेममप्रत्यवायोभविष्यतीत्येतमप्यभिसंधित्यक्त्वाब्रह्मनिष्ठेने वासंगस्वभावेनपुरुषेणकर्त्तव्यानि इतिएवंप्रकारंमेममतमुत्तमंपूर्वमतात्श्रेष्ठं तत्रहिकर्तृत्वाभिमानरूपेणसंगेनप्रत्यवायोत्पादनयाच्चकर्मानुष्ठानंविहितं अत्रतुतदभावादसंगत्वार्थंशनकर्मणांत्यागःस्वरूपे णात्यागइतिभेदः ॥६॥ प्राक्प्रतिज्ञातंत्यागत्रैविध्यमाह नियतस्येति तुशब्दःपूर्वोक्तपक्षद्वयवैलक्षण्यार्थः यस्मादधिकृतस्यमुमुक्षोर्नियतस्यावश्यानुष्ठेयस्यकर्मणःसंन्यासःस्वरूपेणत्यागोनोपपद्यतेनयु ज्यतेअज्ञस्यशुद्ध्यपेक्षत्वात् एवंसतियोमोहादज्ञानात्तस्यनियतस्यकर्मणःपरित्यागःसतामसःपरिकीर्त्तितः आवश्यकंचत्यज्यतेचेतिविप्रतिषेधात् ॥ ७ ॥ एवंतामसंत्यागमुक्त्वाराजसंत्यागमाह दुःखमि ति योदुःखरूपमेवेदंकर्मेतिमत्वाकायक्लेशभयात्यत्यजेत्सपुमान्तस्मादेवहेतोःराजसंरजोगुणनिर्दृत्तंत्यागंकृत्वात्यागफलंचित्तशुद्धिद्वारामोक्षंनैवलभेत्तूलभेत ॥ ८ ॥

॥८९॥

एवंद्वाभ्यांश्लोकाभ्यांतामसराजसौमुख्यावेवत्यागावुक्तौ तामसराजसयोरमुख्यत्यागयोरसंभवस्यभगवतैवमोहात्तस्यपरित्यागइतिकायक्लेशभयात्त्यजेदितिचसूचनात् नह्येवंसंभवति मूढश्चकरोतिचेति विप्रतिषेधात्यदिकरोतिनैवमूढोयदिमूढस्तर्हिनैवकरोति एवंयदिकायक्लेशाद्भेतिनैवकरोति यदिकरोतिनैवकायक्लेशाद्भेतितस्मात्करोतिचकायक्लेशाद्भेतिचेतिविप्रतिषिद्धं अतस्तामसराजसयोर मुख्यत्यागयोरसंभवात्तौनैवोक्तौ सात्विकस्त्वमुख्यत्यागःसंभवति यथास्फटिकेजपाकुसुमाश्रितेलौहित्यंविवेकिनांप्रतीतितएवास्तिनवस्तुएवमात्मनिर्ईश्वराधीनेविवेकिनांकर्तृत्वंप्रतीतितएवास्तिनवस्तु तइतिवक्तुंशक्यंएवंचकर्तृत्वाभिनिवेशशून्यःपुमान्प्रतीतितःकरोत्येवनवस्तुतइतिसंभवत्यमुख्योपिसात्विकस्त्यागइतिनमेवमुख्यत्यागेधिकारहेतुंप्रथममाह कार्यमिति कार्यंकर्त्तव्यमित्येवयत्कर्मनियतं नित्यंक्रियतेहेअर्जुन संगंफलंचत्यक्त्वैवेत्यवधारणंप्रागुक्तस्यात्यागपक्षस्यव्यावृत्त्यर्थंसएवंभूतस्त्यागःसात्विकोमतोवेदेदृष्टः तथाचश्रुतिः ईशावास्यमिदंसर्वंयत्किंचजगत्यांजगत् तेनत्यक्तेनभुंजीथामा

कार्यमित्येवयत्कर्मनियतंक्रियतेऽर्जुन ॥ संगंत्यक्त्वाफलंचैवसत्यागःसात्त्विकोमतः ॥ ९ ॥

गृधःकस्यस्विद्धनमिति ईशाईशेनपरमेश्वरेणसर्वकार्यकरणकर्त्रात्मप्रवर्त्तकेनइदंजगत्स्थावरजंगमंजगत्यांब्रह्मांडेस्थितंवास्यमाच्छादितंव्याप्तं येनहेतुनासर्वंतदधीनतेनकारणेनत्यक्तेनत्यागेनकर्तृत्वभोक्तृ त्वाभिमानवर्जनेननभुंजीथाःविषयान्माभुंक्ष्व मागृधःगर्द्धंमाकार्षीः कस्यस्विद्धनंनकस्यापितत्रस्वामित्वमस्तीतिदृष्टैवतत्रगर्द्धइत्यर्थः एवंकर्माण्यपियज्ञादीनिकर्तृत्वाभिमानंत्यक्त्वाकुर्वतस्तवकर्मलेपोनभ विष्यति एतद्व्यतिरेकेणतवोपायांतरंचनास्तीत्यग्निमंत्रेणप्रदर्श्यते कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाः एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरेइति इदमेवमुख्यंस्वमतंभगवताप्रदर्शितमेतान्यपितुक र्माणीतिश्लोके ननुनित्यानांफलमेवनास्तिकित्यकृव्यमितिचेत् इतएवभगवद्वचनात्तेषामपिफलमस्तीतिजानीहि निष्फलस्यवेदेनानुष्ठापनासंभवात् तथाचापस्तंबःतद्यथाग्नेफलार्थैर्निमित्तेळायागंधइ त्यनूत्पद्यतेएवंधर्मैश्चर्यमाणमर्थांअनूत्पद्यंतइतिआनुषंगिकंफलंनित्यानांदर्शयति अकरणेप्रत्यवायस्मृत्यापितेषांप्रत्यवायपरिहारःफलमितिप्रदर्श्यते धर्मेणपापमपनुदतीत्यादिनाचनित्येष्वपिकर्मसुफलं दृश्यतेतदेववक्तव्यमितिनकोपिदोषः ॥ ९ ॥

एवंमुख्यंसात्विकंत्यागमुक्त्वाऽमुख्यंतमाह नद्वेष्टीति सत्त्वेनसम्यगाविष्टोव्यामस्त्यागीमुख्यःसात्विकस्त्यागीसंन्यासीत्यर्थः अकुशलंमसुखप्रदंकर्मत्रिषवणस्नानचतुर्गुणशौचनिक्षाटनादिप्रयासरूपंनद्वेष्टि कुशलेमिष्टान्ननिक्षादौनानुसज्जतेनसंगंकाकवत्प्रीतिकरोति यद्वाकर्मकुशलेसेवादिकर्मकुशलेशिष्याद्यौनसज्जतेतत्राकुशलंवातंनद्वेष्टि एतेनरागद्वेषशून्यत्वमस्यदर्शितं तदपिकुतइत्यपेक्षायामाह मेधावीति ऊहापोहकुशलतयानित्यानित्यवस्तुविवेचनादौप्रज्ञावान् अतएवच्छिन्नसंशयःकिंकर्माण्येवमुक्तिसाधनानिउतसंन्यासएवेतिविचिकित्सारहितः एवंचत्यागीत्यनेनयज्ञोदानंतपःकर्मनत्याज्यमित्युक्ताद त्यागाद्यावृत्तिः मेधावीत्यनेनमोहात्तस्यपरित्यागइत्युक्तात्तामसत्यागाद्यावृत्तिः पूर्वार्द्धेनरागद्वेषाभावंप्रतिपादनेनकायक्लेशभयात्त्यजेदित्युक्ताद्राजसत्यागाद्यावृत्तिः छिन्नसंशयइत्यनेनकार्यमित्येवय त्कर्मेत्युक्तादमुख्यसात्विकत्यागाद्यावृत्तिः नन्वसौकर्मणांतुच्छत्वंसंन्यासस्यमहाभाग्यत्वंचतत्त्वतोवेद वेदचेत्क्षणमपिकर्मसुनतिष्ठेत् नहिदाहोपशमार्थीनिकटस्थंजाह्नवीमहाह्रदंजाननूष्मोष्मप्रतप्तपा थसिपत्वलेक्षणमपिरमेत संशयच्छेदेपिहेतुः सत्त्वसमाविष्टइति यतःसत्त्वेनैवकर्त्रासम्यगाविष्टोयंनत्वयंसत्त्वमाश्रितइतिमहान्विशेषः एवंचपूर्वश्लोकोक्तस्यसात्विकत्यागरूपस्यकर्मयोगस्यफलभूतोयंमु ख्यःसंन्यासोविविदिषूणामनुष्ठेयोयदहरेवविरजेत्तदहरेवप्रव्रजेत् एतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंतीतिश्रुतिप्रसिद्धः भाष्येतु ननुकर्मपरित्यागस्त्रिविधःसंन्यासइतिचप्रकृतस्तत्रतामसोराजसश्चोक्त

नद्वेष्ट्यकुशलंकर्मकुशलेनानुषज्जते॥त्यागीसत्त्वसमाविष्टोमेधावीछिन्नसंशयः॥ १०॥
नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः॥यस्तुकर्मफलत्यागीसत्यागीत्यभिधीयते॥ ११॥

स्यागःकथमिहसंगफलत्यागस्तृतीयत्वेनोच्यते यथात्रयोब्राह्मणाआगतास्त्रयष्डंगविदौद्वौक्षत्रियस्तृतीयइतिवद् नैषदोषः त्यागसामान्येनस्तुत्यर्थत्वात् अस्तिकर्मसंन्यासस्यफलाभिसंधित्यागस्यचत्या गत्वंसामान्यं तत्रराजसतामसत्वेनकर्मत्यागोनिदयाकर्मफलाभिसंधित्यागःसात्विकत्वेनस्तूयतेसत्यागःसात्विकोमतइतिग्रंथेनत्यागवैविध्यंसमाधायैवंसंगफलत्यागपूर्वकंनित्यकर्मानुष्ठानेनविशुद्धांतःकरण स्यात्मज्ञानाभिमुखस्यतन्निष्ठाक्रमकथनार्थोयंश्लोकइत्युक्तं तथैवश्लोकंव्याख्यायपूर्वोक्तस्यकर्मयोगस्यप्रयोजनमनेनश्लोकेनोक्तमित्युपसंहृतं अन्येतुफलाभिसंधिविशिष्टस्यकर्मणस्त्यागस्त्रिविधः विशेषणाभावाद्विशेष्याभावादुभयाभावाच्च आद्योवैवविधित्तिनोद्वितीयस्तुतामसराजसभेदेनद्विविधोप्यनैवनिदितः तृतीयस्तुकर्मानधिकारिणाविविदिषुणाविदुषाचकर्तुंयोग्योद्विविधः तत्रांत्यःस्थि तप्रज्ञलक्षणादौप्राग्व्याख्यातः आद्यस्तुनैष्कर्म्यसिद्धिपरमामित्यत्रवक्ष्यते तत्रभाष्येतिस्रस्त्यागविधाःप्रतिज्ञायद्वेधयावत्यदर्थतृतीयापिकेनचित्सामान्येनप्रतिपादिता अत्रतुएकस्यांद्वयोरंतर्भावंकृत्वाद्वे एवविधेउपपाद्यतृतीयाप्रदेशांतरेप्रक्षिप्तेनिप्रकृतेप्रतिज्ञायाअनिर्वाहइतिविशेषः ॥ १० ॥ अमुख्यमेवसात्विकंत्यागमनूद्यतत्प्रयोजनमाहद्वाभ्यां नहीति देहभृतादेहाभिमानिनाहियस्मादशेषतःकर्माणि त्यक्तुंनशक्यंअशक्यं प्राणयात्रालोपप्रसंगात् तस्मादधिकृतःसन्यःकर्मफलत्यागशीलः तुशब्दएवार्थे सएवत्यागीत्युच्यते यस्त्वशेषतःकर्माणित्यक्तुंशक्नोतिपरमार्थदर्शीसमुख्यस्त्यागीत्यर्थः ॥ ११ ॥

एवंभूतस्यत्यागस्यफलमाह अनिष्टमिति अनिष्टंनरकतिर्यगादिरूपं इष्टंदेवतादिरूपं मिश्रंमानुषभावइतिकर्मणःकर्मजातीयस्यफलंत्रिविधंप्रेत्यमरणानंतरमत्यागिनांपूर्वोक्तमुख्यसंन्यासहीनानांभवति मुख्यसंन्यासिनांतुनकचित्तद्भवति तेषांकर्तृत्वाभिमानाभावात् अन्येतुगौणसंन्यासिनामेवायंकर्मफलेपइत्याहुः तथाचव्याख्यातंकार्यमित्येवयत्कर्मेत्यत्र अन्यथासंन्यासिनांगौणसंन्यासिनांचविशे षोनस्यात् नचैवंमुख्यसंन्यासिनांगौणसंन्यासिनांचाविशेषापत्तिरितिवाच्यं उभयेषामुत्तरकर्माश्लेषसाम्यपिपूर्वकर्मदाहादाहकृतस्यविशेषस्यसत्वात् गौणसंन्यासिनांजन्मांतरादिकमपिपूर्वकर्मजिरे वभविष्यतिआषस्तंबोक्ताश्वनिदर्शनेनयोगभ्रष्टगतिवन्नांतरीयकंवानतुतस्यप्रधानफलंस्वर्गादिभवितुमर्हत्यनुद्दिष्टत्वादिति ॥ १२ ॥ नन्वात्मनःकर्मालेपनिमित्तंयदकर्तृत्वानुसंधानंतत्किंयोषिदग्निदृष्ट्यादि षदाद्यर्थंभुतवास्तवमेवसदविद्याध्यस्तकर्तृत्वेनाद्दतमितिशास्त्रदृष्ट्याकर्तृत्वतिरोधानेनाकर्तृत्वमेवभाव्यतेइत्याशंक्याग्नित्वेनदृष्टायांयोषितिदग्धृत्वादर्शनेनेवकल्पितेनाकर्तृत्वेनवांस्तवस्यकर्मालेपस्यासंभ वादाधानिरस्यद्वितीयमुपपादयिष्यन्नपीठिकामारचयति पंचेति हेमहाबाहोसर्वकर्मणांसिद्धयेइमानिवक्ष्यमाणानिपंचकारणानिनिर्वर्तकानिमेमद्वचनान्निबोधबुध्यस्व स्ववचनेविश्वासोत्पादनार्थंकारणा नांसमूलत्वमाह सांख्येकृतांतेप्रोक्तानीति सम्यग्विविच्यख्यायंतेप्रकटीक्रियंतेतत्त्वान्यात्मानात्मपदार्थरूपाण्यस्मिंस्तत्सांख्यंवेदांतशास्त्रं तदेवविशिनष्टि कृतांतेकृतस्यकर्मणोंतःपरिसमाप्तिर्यस्मिन् स

अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलम्॥भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचित्॥ १२॥पंचैतानिमहाबाहोकारणा
निनिबोधमे॥सांख्येकृतांतेप्रोक्तानिसिद्धयेसर्वकर्मणाम्॥ १३॥अधिष्ठानंतथाकर्त्ताकरणंचपृथग्विधम्॥विविधाश्चपृ
थक्चेष्टादैवंचैवात्रपंचमम्॥ १४॥शरीरवाङ्मनोभिर्यत्कर्मप्रारभतेनरः॥न्याय्यंवाविपरीतंवापंचैतेतस्यहेतवः॥ १५॥

र्वकर्माखिलंपार्थज्ञानेपरिसमाप्यतइत्यात्मज्ञानेसतिसर्वकर्मणांसमाप्तिर्दर्शनात् तस्मिन्सांख्येकृतांतेप्रोक्तानि॥ १३॥ तान्येवपंचगणयति अधिष्ठानमिति अधिष्ठानमिच्छाद्वेषसुखदुःखज्ञानादीनामभि व्यक्तेराश्रयोदेहःतस्यानात्मत्वंचार्वाकव्यतिरिक्तसमस्तवादिसिद्धं तथाकर्तावुद्धिविशिष्टश्चिदाभासःप्रमातानामहंत्वत्ययविषयोहंकारस्तथेत्यनेनतद्वदेवानात्मत्वेनज्ञेयइत्युक्तं देहस्यैवप्रतीयमानस्यापि उत्पत्तिविनाशयोर्दर्शनात् एतच्चविशेषणनाशाद्विशिष्टनाशंविशेषणोत्पत्त्याचविशिष्टोत्पत्तिमभिप्रेत्यश्रूयते विज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतीति यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरं त्येवमेतस्मादात्मनःसर्वएतआत्मानोव्युच्चरंतीतिच त्रिशिष्टस्यचानतिरेकादर्शनादनात्मत्वंसिद्धं करणंचशब्दाद्युपलब्धिसाधनंपृथग्विधंद्वादशविधंपंचकर्मेंद्रियाणिपंचज्ञानेंद्रियाणिमनोबुद्धिश्च तथाविं विधाश्चपृथक्चेष्टावायवीयाःप्राणनादिरूपाः दैवंपुण्यपापरूपंतत्तत्कारणानुग्राहकसूर्यादिदेवतारूपं पंचमंपंचानांपूरणं ॥ १४ ॥ शरीरेति न्याय्यंधर्म्यंशास्त्रीयं विपरीतमन्याय्यमधर्म्यंशास्त्रीयं ननु शरीरादिभिस्त्रिभिरारभ्यतेपंचैतेतस्यहेतवइतिचविप्रतिषिद्धमुच्यते नैषदोषः अत्रापिशरीरपदेनाधिष्ठानस्यनरपदेनकर्तुर्वाङ्मनइतिकरणस्यारभतइतिचेष्टानांन्याय्यमितिधर्माधर्मरूपस्यदैवस्यचसंपहृत् सर्वेषुकर्मसुपंचानांसमानेप्युपयोगेविधिप्रतिषेधलक्षणंत्रिविधमेवकर्मशास्त्रेप्रसिद्धमिति इदंशारीरंकर्मेदंमानसमिदंवाचिकमितिव्यपदेशोदेहाद्दीनांप्राधान्यापेक्षइतिनकश्चिद्विरोधः॥ १५ ॥

एतत्प्रतिपादनफलंकर्तृत्वस्यारोपितत्वसिद्धिरकर्तृत्वस्यस्वाभाविकत्वसिद्धिश्चेतिद्वाभ्यांश्लोकाभ्यांदर्शयति तत्रेति तत्रतस्मिन्कर्मणिएवमुक्तरीत्यापंचभिर्निर्वर्त्स्यति केवलंतुकर्तारमप्यात्मानंचेतनं साक्षीचेताकेवलोनिर्गुणश्चेतिश्रुतेः अधिष्ठानादिपंचकप्रचारदर्शनमुदासीनमपियःकर्तारंकर्तृत्वाश्रयंपश्यतिसदुर्मतिःपापाभिभूतमतिर्नपश्यत्यंधएवसः अदर्शनेहेतुः अकृतबुद्धित्वादिति शास्त्राचार्योपदेशमदमादिसंस्कृताबुद्धिर्यस्यसकृतबुद्धिस्तद्विपरीतोऽकृतबुद्धिस्तस्यभावस्तत्त्वंतस्मात् यथात्वमुखस्योदपात्रसंसर्गेकत्वंपश्यताजलचांचल्यमपितत्रारोप्यतएवमात्मनोबुद्धिसंसृष्टत्वंपश्यताबुद्धिधर्मःकर्तृत्वादिरप्यात्मन्यारोप्यतइतिभावः ॥ १६ ॥ द्वितीयंप्रयोजनमाह यस्येति यस्यप्रमातुर्भावःप्रत्ययमात्रस्वरूपआत्मा नाहंकृतःअहमिवकृतोहंकारतादात्म्यंप्रापितोऽहंकृतस्तथान यस्यबुद्धिर्नलिप्यतेआत्मभावेनरंजितानभवति यस्यबुद्धेर्व्यतिरिक्तमात्मानंपश्यतोबुद्धिधर्माःकर्तृत्वादयोनात्मनिप्रतीयंतेइतिकर्त्रात्मवादिताकिंकनिरासः यस्यचआत्मधर्माश्चैतन्यादयोबुद्धौनसंसृज्यंतइतिबुद्धिमेवचेतनांवदतोबौद्धस्यनिरासः चिदचितोरन्योन्यस्मिन्नन्योन्यधर्माध्यासोबाध्यतइतिदुःखादिसंसर्गनिषेधेनभोक्तृत्वाभावोदर्शितः हत्वापिसइमाँल्लोकान्नहंतिननिबध्यतेइतितुस्तुतिमात्रं कर्तृत्वस्यैवबाधेनहंतृत्वायोगात् दग्धपटवत्कर्तृत्वानुवृत्तावपिहननक्रियायांप्रवर्तकस्यरागद्वेषादेरभावाच्च एतेनात्मनस्तात्त्विकमकर्तृत्वंभावयतोकर्तृकर्मातात्त्विककर्तृत्वाभिमाननिमित्तंस्वफलंप्रस्तोतुंनार्हतीतिदर्शितं नहिरज्जुसर्पे

तत्रैवंसतिकर्त्तारमात्मानंकेवलंतुयः॥ पश्यत्यकृतबुद्धित्वान्नसपश्यतिदुर्मतिः॥ १६॥ यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्यते॥ हत्वापिसइमाँल्लोकान्नहंतिननिबध्यते॥ १७॥ ज्ञानंज्ञेयंपरिज्ञातात्रिविधाकर्मचोदना॥

रज्जुबुद्धिंकृत्वाप्रहरतःसर्पक्षोभजंदंशनादिफलंभवति सर्पेतुतथाकुर्वतस्तद्भवत्येवतद्वदिदमपिज्ञेयं ॥ १७ ॥ समाप्तःसात्त्विकत्यागोपपादनोपयोगीआत्मनोऽकर्तृत्वोपपादनप्रकारः अत्राहसांख्यः यदुक्तं पंचैतेनस्यहेतवइतियच्चोक्तंनहंतीतिनन्मृष्यामहे नह्यपरिणामीचेतनःपरिस्पंदात्मकस्यकायिकादिभेदेनत्रिविधस्यकर्मणःकर्तृभवतीतिवक्तुंयुज्यते यत्तुननिबध्यतइतिभोक्तृत्वमुक्तमपिप्रत्याख्यातंतन्नमृष्यामहे नहिकुलालादयःस्वप्रयुक्ताएवघटादीन्निर्वर्तयंतिकिंतुभोक्तृपुरुषप्रयुक्ताः अन्यथाभोक्तृणामभावेव्यर्थैवतत्प्रवृत्तिरित्यापतति एवंप्रधानमात्रभूताःकर्त्रादयःपुरुषस्यभोगापवर्गसाधनप्रयुक्ताःसर्वाणिकर्माणिनिर्वर्तयंतितस्मात्पुरुषस्यभोक्तृत्वाभावत्वादकर्तृत्वानुसंधानपूर्वकमपिकृतंकर्मभोक्ताऽवश्यमेवभोक्तव्यमितिसात्त्विकत्यागेपिकर्मलेपवचनमसंगतमिति अत्रप्रतिविधत्ते ज्ञानंज्ञेयमिति ज्ञानंज्ञायतेप्रकाश्यतेवस्तुतत्त्वमनेनेतिप्रत्यक्षादिप्रमाणजन्योघटादिप्रकाशःसचवर्तमानोतीतोवा ज्ञेयंबोधविषयोघटादिः परिज्ञातोविषयीसाभासधीरूपोयोभोक्तेत्युच्यते एवंरूपप्रकारत्रयवतीत्रिविधाकर्मणांचोदना त्रयंसमुच्चितंसत्कर्मणिप्रवर्तकमित्यर्थः सत्यपिज्ञेयेज्ञातरिवाज्ञानेप्रवृत्त्यनुपपत्तेः ज्ञानेज्ञातरिचसतिदेशकालव्यवहितेज्ञेयेप्रवृत्त्यनुपपत्तेः सत्यपिसंस्कारात्मकेज्ञानेज्ञेयेचसन्निहितेतथापिसुषुप्तौ प्रमात्रभावात्प्रवृत्त्यदर्शनादेतत्त्रयंत्रिदंडविटंभवदन्योन्यापेक्षंसंहानोपादानोपेक्षाबुद्धिरूपंकार्यजनयित्वाहानाद्यनुकूलेव्यापारेप्रवर्तयतीतिकर्तृपदाभिधेयमित्यर्थः चोदनेतिकर्तरिनंद्यादिल्युप्रत्ययांतत्वेनचोदनाशब्दःकर्तृवाची लिंगंत्वविवक्षितं लिंगमशिष्यंलोकाश्रयत्वाल्लिंगस्येतिवा ॥

॥ ९१ ॥

तथाकरणमिंद्रियं कर्मतेनयत्क्रियमाणंविषयग्रहणं कर्तापूर्वोक्तएवपरिज्ञाता एतत्त्रयंसमुदितंसत्कर्मसंग्रहःकर्मणईप्सिततमस्यभोग्यस्यसंग्रहःसंगृह्यतेऽस्मिन्नितिसंश्लेषस्थानंभोक्तेत्यर्थः सत्यपिभोक्तरिकरणेचक्रियांविनाभोगासंभवात्क्रियायाश्चाश्रयंविनास्वरूपालाभादाश्रयस्यकरणंविनाभोक्तृवांगकर्तृवानुपपत्तेश्चैतत्त्रयंमिलितंसत्भोक्तेत्युच्यतइत्यर्थः तथाचश्रुतिः आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणइति इंद्रियंप्रसिद्धं मनइत्यनेनबुद्धिरेवगृह्यते युक्तमिंद्रियद्वारामतेर्भोग्येनसहसंबंधक्रिया इंद्रियंचमनश्चयुक्तंचेतिविपहेइंद्रियमनोयुक्तमितिद्वंद्वैकवद्भावः एतत्त्रयंभोक्तात्मेत्याहुर्मनीषिणइतिश्रुत्यर्थः एवंहिश्रुतिस्मृत्योर्व्याख्यानेतयोर्मूलमूलिकाबोयुज्यतेनान्यथा तथाचकर्तृवत्भोक्तुरप्यनात्मगणपतितत्वाद्भोक्तृत्वंभोगकर्तृत्वमितिनिर्वचनायःकर्तासएवभोक्तेतिप्रतिपादनादहमकर्ताऽभोक्तेतिचानुसंधानपूर्वंकंकर्माणिकुर्वतःकर्तृत्वभोक्तृत्वंकुतःकर्मलेपोनास्तीतिसिद्धं भाष्यस्यचायमेवार्थः येतुकरणंक्रियायाःसाधकतमंदशविधंबाह्यंमनोबुद्धिरूपमांतरंकर्मकर्तुरीप्सिततमंक्रियया व्याप्यमानमुत्पाद्यमाप्यंविकार्यंसंस्कार्यंचेतिचतुर्विधं कर्ताकारकांतरप्रयोजकश्चिदचिद्ग्रंथिः एतत्त्रयंकर्मसंग्रहः कर्माश्रयःकर्तेत्यर्थः तथाज्ञानंविषयप्रकाशनशक्तिः ज्ञेयंविषयः परिज्ञाताज्ञानाश्रयोभोक्ता एतत्त्रयंकर्मणिप्रवर्तकमितिव्याचक्षते तेषामप्यात्मानकर्तानापिसांख्यानामिवभोक्तृत्वेनप्रकृतेःप्रवर्तकइत्येवाशयः तथापिक्रिययाव्याप्यमानस्यवक्ष्यमाणसात्विकादिभेदानर्हस्यघटादिरूपस्य

करणंकर्मकर्त्तेतित्रिविधःकर्मसंग्रहः ॥ १८॥ ज्ञानंकर्मचकर्त्ताचत्रिधैवगुणभेदतः ॥ प्रोच्यतेगुणसंख्यानेयथा वच्छृणुतान्यपि॥ १९॥ सर्वभूतेषुयेनैकंभावमव्ययमीक्षते॥ अविभक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्विकम्॥ २०॥

कर्मणःकर्तृकोटौप्रवेशायोगः तस्यक्रियाश्रयत्वमात्रविवक्षायांप्रकृतेतत्कथनानुपयोगश्चस्पष्टः तथाऽस्माकंतुघटादिव्यापकक्रियायाःकर्मशब्दवाच्यत्वंमुख्यं कर्तृकोटिप्रवेशश्चक्रियाकारितौधर्म्यधर्मिणोरभेदापेक्षयायुज्यते तथाज्ञानंप्रकाशनक्रियेतिमतेक्रियारूपेस्मिन्प्रवर्तकज्ञानांतरस्यापेक्षेतित्रत्रान्यस्यान्यस्यापेक्षेत्यनवस्थादुर्निवारा ॥ १८ ॥ पूर्वश्लोकोक्तेज्ञानादिषट्कपरिज्ञाताकर्ताचैकएवेतिपरिशिष्टाःपंचतेषांसर्वेषांप्राकृतत्वेनत्रिगुणात्मत्वेप्राप्तेज्ञेयकरणयोर्जडयोर्घटकुठारकल्पयोःपरिसंख्यार्थंत्रयाणामेवप्रत्येकंत्रिविधत्वंविवरीतुंप्रतिजानीते ज्ञानमिति ज्ञानंकर्मकर्ताचेतित्रयमेवगुणभेदतस्त्रिधानतुज्ञेयकरणे गुणसंख्यानेकापिलेशास्त्रे यद्यपितत्रैकस्यांप्रमदायांभर्तुःसुखंजायते तंप्रतितस्याःसत्त्वोद्भूतत्वात् तामविंदतश्चैत्रस्यदुःखंजायतेतंप्रतितस्याराजउद्भूतत्वात् तस्माभेवंसपत्न्याद्वेषस्तांप्रतितस्यास्तमउद्भूतत्वात् प्रमदयैवंसर्वेभावाव्याख्यातइतिकापिलानांज्ञेयकरणयोरपित्रैविध्यंप्रसिद्धं तथापिप्रमदादयएकस्यैवपुंसोनिमित्तभेदेनप्रीतिदुःखद्वेषविषयाअपिभवंतीतिपूर्वोक्तव्यवस्थायानिर्मूलत्वात् प्रीत्यादीनांकर्तृसमवायित्वाप्रतीयमानानामालंबनभूताया:प्रमदाया:प्रीत्याद्यात्मकत्वंकल्पयितुंनशक्यतइतिनभगवतातयोस्त्रिविधत्वंव्याख्यायते अक्षरार्थःस्पष्टः ॥ १९ ॥ एवंज्ञानादित्रयस्यत्रैविध्यंवक्तुंप्रतिज्ञायज्ञानत्रैविध्यंतावदाह सर्वभूतेष्विति यथाकटककुंडलादिषुव्यावर्तमानेषुतत्त्वविदेकंकांचनमेवेदमितिपश्यति एवंयेनज्ञानेनसर्वभूतेषुविभक्तेषुनानानामरूपभेदशून्येष्वव्ययमपरिणामिनमेकंभावंचिन्मात्ररूपमीक्षतेसर्वंब्रह्मैवेदमितिपश्यतितज्ज्ञानंसात्विकंविद्धि ऐकात्म्यज्ञानमेवसात्विकमित्यर्थः ॥ २० ॥

एतत्यतिपादनफलंकर्तृत्वस्यारोपितत्वसिद्धिरकर्तृत्वस्यस्वाभाविकत्वसिद्धिश्चेतिद्वाभ्यांश्लोकाभ्यांदर्शयति तत्रेति तत्रतस्मिन्कर्मणिएवमुक्तरीत्यापंचभिर्निर्वर्त्यैसति केवलंत्वकर्तारमप्यात्मानंचेतनं साक्षीचेताकेवलोनिर्गुणश्चेतिश्रुतेः अधिष्ठानादिपंचकप्रचारदर्शिनमुदासीनमपियःकर्तारंकर्तृत्वाश्रयंपश्यतिसदुर्मतिःपापाभिभूतमतिर्नपश्यत्यंधएवसः अदर्शनेहेतुः अकृतबुद्धित्वादिति शास्त्राचार्योपदेशादृमदमादिसंस्कृतावुद्धिर्यस्यसकृतबुद्धिस्तद्विपरीतोऽकृतबुद्धिस्तस्यभावस्तत्त्वंतस्मात् यथात्वमुखस्योदपात्रसंसर्गिकत्वंपश्यतोजलचांचल्यमपितद्वारोप्यतएवमात्मनोबुद्धिसंसृष्टत्वंपश्यतोबुद्धिधर्मःकर्तृत्वादिरप्यात्मन्यारोप्यतइतिभावः ॥ १६ ॥ द्वितीयंप्रयोजनमाह यस्येति यस्यप्रमातुर्भावःप्रत्ययमात्रस्वरूपआत्मा नाहंकृतःअहमिवकृतोहंकारतादात्म्यंप्रापितोऽहंकृतस्तथान यस्यबुद्धिर्नलिप्यतेआत्मभावेनरंजितानभवति यस्यबुद्धेर्व्यतिरिक्तमात्मानंपश्यतोबुद्धिधर्माःकर्तृत्वादयोनात्मनिप्रतीयंतेइतिकर्त्रात्मवादितार्किकनिरासः यस्यचआत्मधर्माश्चैतन्याद्योबुद्धौनसंसृज्यंतइतिबुद्धिमेवचेतनांवदतोबौद्धस्यनिरासः चिदचितोरन्योन्यस्मिन्नन्योन्यधर्माध्यासोवाच्यतइतिदुःखादिसंसर्गनिषेधेनभोक्तृत्वाभावोदर्शितः हत्वापिसइमाँल्लोकान्नहंतिननिबध्यतेइतितुस्तुतिमात्रं कर्तृत्वस्यैवबाधेनहंतृत्वायोगात् दग्धपटवत्कर्तृत्वानुदयात्तावपिहननक्रियायांप्रवर्तकस्यरागद्वेषादेरभावाच्च एतेनात्मनस्तात्त्विकमकर्तृत्वंज्ञानवयनाकृतंकर्मातात्त्विककर्तृत्वाभिमाननिमित्तंस्वफलंप्रस्तोतुंनार्हतीतिदर्शितं नहिरज्जुसर्पे

तत्रैवंसतिकर्त्तारमात्मानंकेवलंतुयः॥ पश्यत्यकृतबुद्धित्वान्नसपश्यतिदुर्मतिः॥ १६॥ यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्यते॥ हत्वापिसइमाँल्लोकान्नहंतिननिबध्यते॥ १७॥ ज्ञानंज्ञेयंपरिज्ञातात्रिविधःकर्मचोदना॥

रज्जुबुद्धिकृत्वाप्रहृतःसर्पक्षोभजंदंशनादिफलंभवति सर्पेतुतथाकुर्वतस्तद्भवत्येवतद्वदियमपिज्ञेयं ॥ १७ ॥ समाप्तःसात्त्विकत्यागोपपादनोपयोगीआत्मनोऽकर्तृत्वोपपादनप्रकारः अत्राहसांख्यः यदुक्तं पंचैतेनस्यहेतवइतियच्चोक्तंनहंतीतितन्मृष्यामहे नह्यपरिणामीचेतनःपरिस्पंदात्मकस्यकायिकादिभेदेनत्रिविधस्यकर्मणःकर्ताभवतीतिवक्तुंयुज्यते यत्तुननिबध्यतइतिभोक्तृत्वमुक्तमपिप्रत्याख्यातंतन्मृष्यामहे नहिकुलालादयःस्वप्रयुक्ताएवघटादीन्निर्वर्तयंतिकिंतुभोक्तृपुरुषप्रयुक्ताः अन्यथाभोक्तृणामभावेव्यर्थैर्वतत्प्रवृत्तिरित्यापतति एवंप्रधानमात्राभूताःकर्त्रादयःपुरुषस्यभोगापवर्गसाधनप्रयुक्ताःसर्वाणिकर्माणिनिर्वर्तयंतितस्मात्पुरुषस्यभोक्तृत्वाभावत्वादकर्तृत्वानुसंधानपूर्वकमपिकृतंकर्मभोक्ताऽवश्यमेवभोक्तव्यमितिसात्त्विकत्यागेपिकर्मलिप्यवचनमसंगतमिति अत्रप्रतिविधत्ते ज्ञानंज्ञेयमिति ज्ञानं ज्ञायतेप्रकाश्यतेवस्तुतत्त्वमनेनेतिप्रत्यक्षादिप्रमाणजन्योघटादिप्रकाशःसचवर्तमानोतीतोवा ज्ञेयंबोधविषयोघटादिः परिज्ञातोविषयीसाभासधीरूपोयोभोक्तेत्युच्यते एवंरूपप्रकारत्रयवतीत्रिविधाकर्मणांचोदना त्रयंसमुच्चिनंसत्कर्मणिप्रवर्तकमित्यर्थः सत्यपिज्ञेयेज्ञातरिवाज्ञानेप्रवृत्त्यनुपपत्तेः ज्ञानेज्ञातरिचसतिदेशकालव्यवहितेज्ञेयेप्रवृत्त्यनुपपत्तेः सत्यपिसंस्कारात्मकेज्ञानेज्ञेयेचसन्निहितेतथापिसुषुप्तौ प्रमात्रज्ञावात्प्रवृत्त्यदर्शनादेतत्त्रयंत्रिदंडविष्टंभवदन्योन्यापेक्षसंहतानोपादानोपेक्षाबुद्धिरूपंकार्यंजनयित्वाहानाद्यनुकूलेव्यापारेप्रवर्तयतीतिकर्तृपदाभिधेयमित्यर्थः चोदनेतिकर्तरिनेत्र्यादिल्युप्रत्ययांत त्वेनचोदनाशब्दःकर्तृवाची लिंगंत्वविवक्षितं लिंगमशिष्यंलोकाश्रयत्वाल्लिंगस्येतिवा ॥

॥ ९१ ॥

तथाकरणमिंद्रियं कर्मतेनयत्क्रियमाणंविषयग्रहणं कर्तापूर्वोक्तएवपरिज्ञाता एतत्त्रयंसमुदितंसत्कर्मसंग्रहःकर्मणईप्सिततमस्यभोग्यस्यसंग्रहःसंगृह्यतेऽस्मिन्नितिसंश्लेषस्थानंभोक्तेत्यर्थः सत्यपिभोक्तरिकरणेचक्रियांविनाभोगासंभवात्क्रियायाश्चाश्रयंविनास्वरूपालाभादाश्रयस्यकरणंविनाभोक्तृत्वांगकर्तृत्वानुपपत्तेश्चैतत्त्रयंमिलितंसत्भोक्तेत्युच्यतइत्यर्थः तथाचश्रुतिः आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणइति इंद्रियंप्रसिद्धं मनइत्यनेनबुद्धिरेवगृह्यते युक्तमिंद्रियद्वारामतेर्भोग्येनसहसंबंधक्रिया इंद्रियंचमनश्चयुक्तंचेतिविषहेइंद्रियमनोयुक्तमितिद्वैकवद्भावः एतत्त्रयंभोक्ताआत्मेत्याहुर्मनीषिणइतिश्रुत्यर्थः एवंहिश्रुतिस्मृत्योर्व्याख्यानेतयोर्मूलमूलिभावोयुज्यतेनान्यथा तथाचकर्तृवत्भोक्तुरप्यनात्मगणपतितत्वाद्भोक्तृत्वंभोगकर्तृत्वमितिनिर्वचनाद्यःकर्तासएवभोक्तेतिप्रतिपादनादहमकर्ताऽभोक्तेतिचानुसंधानपूर्वकंकर्माणिकुर्वतःकर्तृत्वभोक्तृत्वकृतःकर्मलेपोनास्तीतिसिद्धं भाष्यस्यचायमेवार्थः येतुकरणंक्रियायाःसाधकतमंदशविधंबाह्यंमनोबुद्धिरूपमांतरंकर्मकर्तुरीप्सिततमंक्रियया व्याप्यमानमुत्पाद्यमाप्यंविकार्यंसंस्कार्यंचेतिचतुर्विधं कर्ताकारकांतरप्रयोजकश्चिद्चिद्रूपिः एतत्त्रयंकर्मसंग्रहः कर्माश्रयःकर्तेत्यर्थः तथाज्ञानंविषयप्रकाशनशक्तिः ज्ञेयंविषयः परिज्ञाताज्ञानाश्रयोभोक्ता एतत्त्रयंकर्मणिप्रवर्तकमितिव्याचक्षते तेषामप्यात्मानकर्तानापिसांख्यानामिवभोक्तृत्वेनप्रकृतेःप्रवर्तकइत्येवाशयः तथापिक्रियायाव्याप्यमानस्यवक्ष्यमाणसात्विकादिभेदानर्हस्यघटादिरूपस्य

करणंकर्मकर्त्तेतित्रिविधःकर्मसंग्रहः ॥ १८॥ ज्ञानंकर्मचकर्त्ताचत्रिधैवगुणभेदतः ॥ प्रोच्यतेगुणसंख्यानेयथा वच्छृणुतान्यपि॥ १९॥ सर्वभूतेषुयेनैकंभावमव्ययमीक्षते॥ अविभक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्विकम्॥ २०॥

कर्मणःकर्तृकोटौप्रवेशायोगः तस्यक्रियाश्रयत्वमात्रविवक्षायांप्रकृतेतत्कथनानुपयोगश्चस्पष्टः तथाऽस्माकंतुघटादिव्यापकक्रियायाःकर्मशब्दवाच्यत्वंमुख्यं कर्तृकोटिप्रवेशश्चक्रियाक्रियावतोर्धर्मधर्मिणोरभेदापेक्षयायुज्यते तथाज्ञानंप्रकाशनक्रियेतिमतेक्रियारूपेस्मिन्प्रवर्तकज्ञानांतरस्यापेक्षितत्वात्तत्रान्यस्यान्यस्यापेक्षेत्यनवस्थादुर्निवारा ॥ १८ ॥ पूर्वश्लोकोक्तेज्ञानादिषट्केपरिज्ञाताकर्तावैकएवेतिपरिशिष्टःपंचतेषांसर्वेषांप्राकृतत्वेनत्रिगुणात्मत्वेप्राप्तेज्ञेयकरणयोर्जडयोर्घटकुठारकल्पयोःपरिसंख्यार्थंत्रयाणामेवप्रत्येकंत्रिविधत्वंविवरीतुंप्रतिजानीते ज्ञानमिति ज्ञानंकर्मकर्तावेतित्रयमेवगुणभेदतस्त्रिधानतुज्ञेयकरणे गुणसंख्यानेकापिलेशास्त्रे यद्यपितत्रैकस्यांप्रमदायांभर्तुःसुखंजायते तंप्रतितस्याःसत्त्वोद्भूतत्वात् तामविंदतश्चैवस्यदुःखंजायतेतंप्रतितस्यारजउद्भूतत्वात् तस्यामेवसपत्न्यांद्वेषस्तांप्रतितस्यास्तमउद्भूतत्वात् प्रमदयैवसर्वेभावाव्याख्याताइतिकापिलानांज्ञेयकरणयोरपित्रैविध्यंप्रसिद्धं तथापिप्रमदायएकस्यैवपुंसोनिमित्तभेदेनप्रीतिदुःखद्वेषविषयाअपिभवंतीतिपूर्वोक्तव्यवस्थायानिर्मूलत्वात् प्रीत्यादीनांकर्तृसमवायितयाप्रतीयमानानामालंबनभूतायाःप्रमदायाःप्रीत्याद्यात्मकत्वंकल्पयितुंनशक्यतइतिनभगवतायोत्रिविधत्वंव्याख्यायते अक्षरार्थःस्पष्टः ॥ १९ ॥ एवंज्ञानादित्रयस्यत्रैविध्यंवक्तुंप्रतिज्ञायज्ञानत्रैविध्यंतावदाह सर्वभूतेष्विति यथाकटककुंडलादिषुव्यावर्तमानेषुतत्त्वविदेकंकांचनमेवेदमितिपश्यति एवंयेनज्ञानेननसर्वभूतेषुविभक्तेषुनानानामरूपभेदभिन्नेष्वव्ययमपरिणामिनमेकंभावंचिन्मात्ररूपमीक्षतेसर्वत्रब्रह्मैवेदमितिपश्यतितज्ज्ञानंसात्विकंविद्धि ऐकात्म्यज्ञानमेवसात्विकमित्यर्थः ॥ २० ॥

भेदज्ञानेराजसत्वमाह पृथक्त्वेनेति ...त्पृथक्त्वेनभिन्नत्वेनज्ञानंद्राजसमितिसंबंधः पृथक्त्वेनेत्येतद्विदणोति सर्वेषुभूतेषुपांचभौतिकत्वेनाविशिष्टेषुनानाभावान्सुरनरतिर्यक्स्थावरत्वभेदेननानात्वान्नि व
ह्नवचनमत्यंतभेदप्रदर्शनार्थं पृथग्वि...धान्एकजातीयेष्वपिनरादिषुप्रत्येकंविभिन्नप्रकारान् यज्ज्ञानंवेत्तिविषयीकरोतीति येनज्ञानेनवेत्तीतिनिवक्तव्येएवांसिपचंतीतिवत्यज्ज्ञानंवेत्तीतिकरणेकर्तृत्वोपचा
रोबोध्यः तेनात्मनांपरस्परभेदस्तेषामी...श्वराद्भेदस्तेभ्यईश्वरादन्योन्यश्चजडवर्गस्यभेदइत्यनौपाधिकभेदपंचकज्ञानंकुताकिंकाणांराजसमेवेत्यभिप्रायः ॥ २१ ॥ यत्तुज्ञानमेकस्मिन्कार्येदेहेप्रतिमादौवा
कृत्स्नवत्परिपूर्णवदेतावानेवात्माईश्वर...वेतिसत्कमभिनिवेशयुक्तं अहैतुकंनिरुपपत्तिकं अतत्त्वार्थवत्परमार्थाविलंबनशून्यं अल्पंतुच्छविषयत्वादल्पफलत्वाच्च यदेवंभूतंज्ञानंतत्तामसमुदाहृतं ॥ २२ ॥
अथकर्मत्रैविध्यमाह नियतमित्यादि...ना नियतंनित्यं संगरहितमभिमानवर्जितं रागइष्टेप्रीतिर्द्वेषोऽनिष्टेऽप्रीतिस्ताभ्यांकृतमिष्टानिष्टप्राप्तिपरिहारार्थंकृतंरागद्वेषतःकृतंतदन्यदरागद्वेषतःकृतंनिष्काममित्य
र्थः फलंगुचलीयतेचेतिफलंक्रियय...प्राप्यमनात्मवस्तुतदन्यदफलमनागंतुकंपरिपूर्णमविनाशिआत्मतत्त्वंतत्प्रेप्सुनाकृतंविविदिषंतियज्ञेनेतिश्रुत्याआत्मलाभार्थंयज्ञादेर्विनियोगात् तत्कर्मसात्विकमुच्यते

पृथक्त्वेनतुयज्ज्ञानंनानाभ...वान्पृथग्विधान्॥ वेत्तिसर्वेषुभूतेषुतज्ज्ञानंविद्धिराजसम्॥ २१॥ यत्तुकृत्स्नवदेकस्मिन्कार्येसक्तमहैतुकम्॥ अतत्त्वार्थवदल्पंच
तत्तामसमुदाहृतम्॥ २२॥ ...नियतंसंगरहितमरागद्वेषतःकृतम्॥ अफलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्यते॥२३॥ यत्तुकामेप्सुनाकर्मसाहंकारेणवापुनः॥ क्रिय
तेबहुलायासंतद्राजसमुदाहृतम्॥ २४॥ अनुबंधंक्षयंहिंसामनपेक्ष्यचपौरुषम्॥ मोहादारभ्यतेकर्मयत्तत्तामसमुच्यते॥ २५॥ मुक्तसंगोनहंवादीधृत्युत्साह
समन्वितः॥ सिद्ध्यसिद्ध्योर्नि...र्विकारःकर्तासात्विकउच्यते॥२६॥ रागीकर्मफलप्रेप्सुर्लुब्धोहिंसात्मकोऽशुचिः॥ हर्षशोकान्वितःकर्ताराजसःपरिकीर्तितः॥२७॥
अयुक्तःप्राकृतःस्तब्धःशठो...नैष्कृतिकोऽलसः॥ विषादीदीर्घसूत्रीचकर्तातामसउच्यते॥२८॥

॥ २३ ॥ यत्तुकामेप्सुनाफलार्थिर...सादहंकारेण यद्यपिसात्विकोप्यनात्मवित्साहंकारस्तथाप्यहमेवकर्मकुशलोमहान्श्रोत्रियइत्यभिमानोहंकारस्तद्वतासाहंकारेण वाशब्दश्चार्थे क्रियतेबहुलायासम
॥ २४ ॥ अनुबध्यतेनेनेत्यनुबंधःफलं क्षयंशत्रोरर्थानांचनाशं हिंसांपरपीडां पौरुषंस्वसामर्थ्यं अनपेक्ष्यानालोच्यकेवलंमोहादविवेकतोयद्यारभ्यतेकर्मतत्तामसमुदाहृतं
तिश्रमकरंतत्कर्मराजसमुदाहृतं ॥ २ ...ना मुक्तसंगस्यकाभिनिवेशः अनहंवादीपूर्वोक्ताहंकारोक्तिरहितः धृतिर्धैर्यं उत्साहःसाधयिष्याम्येवेतिबुद्धिनिश्चयः ताभ्यांसमन्वितः सिद्ध्यसिद्ध्योः कर्मणआर
॥ २५ ॥ कर्त्रैविध्यमाह मुक्तेत्यादि...न्यःकर्तासात्विकउच्यते ॥ २६ ॥ रागीविषयलोलुपः अतएवकर्मणःफलप्रेप्सतीतिकर्मफलप्रेप्सुः लुब्धःपरद्रव्यादौसंजाततृष्णस्तीर्थादौवाद्रव्यापरित्यागी हिंसा
व्यत्येतिशेषः निर्विकारोहर्षविषादय...तःशौचवर्जितइष्टानिष्टप्राप्तौहर्षशोकान्वितश्चयःकर्तासराजसःपरिकीर्तितः ॥ २७ ॥ अयुक्तोऽनवहितः प्राकृतोत्यंतमसंस्कृतबुद्धिर्बालसमः स्तब्धोदंडवन्नमति
त्मकःपरपीडाकरस्वभावःअशुचिर्वांसि...वंचकःपरावमानीवा अलसःअप्रवृत्तिशीलःकर्तव्येष्वपि विषादीसर्वदाअवसन्नस्वभावः दीर्घसूत्रीचिरकारी एकाहसाध्यंकार्यंमासेनापिनकरोतीत्यर्थः यएवं
कस्मैचित् शठःशक्तिगूहनकारी नैकृतिक...भूतःसकर्तातामसउच्यते ॥ २८ ॥

॥९२॥

बुद्धिधृतीत्रैविध्येनव्याख्यातुमाह बुद्धेरिति तत्रबुद्धिविशिष्टश्चिदाभासःकर्ताज्ञानंचप्रागुक्तं अत्रतुकेवलाबुद्धिर्वृत्तिमतीतदीयवृत्त्यंतरोपलक्षणार्थंतद्वृत्तिविशेषोधृतिश्चत्रैविध्येनकथ्यतइत्यर्थः ॥ २९ ॥
प्रवृत्तिनिवृत्तीशास्त्रविहितप्रतिषिद्धविषयेयजेतस्वर्गकामोनसुरांपिबेदित्यादिरूपे कार्यैकृतिसाध्यस्वर्गादि अकार्यैनित्यसिद्धं तेननित्यानित्यवस्तुनीउक्ते भयाभयेकार्याकार्यनिमित्ते बंधंमोक्षंचयावेत्ति
ययावेत्तीतिपूर्ववत्करणेकर्तृत्वोपचारः बुद्धिःसापार्थसात्त्विकी ॥ ३० ॥ अयथावत्संदेहास्पदत्वेन स्पष्टमन्यत् ॥ ३१ ॥ अधर्ममिति विपरीतग्राहिणीबुद्धिस्तामसीत्यर्थः ॥ ३२ ॥ ययाधृत्याअव्यभि
चारिण्यासमाध्यनुगतयामनःप्राणेंद्रियाणांक्रियाश्चेष्टाःसंकल्पश्वासप्रश्वासौशब्दादिग्रहणंचयोगेनचित्तवृत्तिनिरोधेनऐकाग्र्येणवासंयत्तास्तास्तथैवनिरोधास्थायामैकाग्र्यावस्थायांवाधारयतेचिरमव
स्थापयतिसाधृतिःपार्थसात्त्विकी ॥ ३३ ॥ ययाधृत्याधर्मादीनृधारयतेऽनुरोध्यतयानिश्चिनोति प्रसंगेनधर्मादेःसंबंधेनफलाकांक्षीचभवतिपुरुषोधृतिःसापार्थराजसी ॥ ३४ ॥ स्वप्नंनिद्रां भयंत्रासं शो

बुद्धेर्भेदंधृतेश्चैवगुणतस्त्रिविधंशृणु ॥ प्रोच्यमानमशेषेणपृथक्त्वेनधनंजय॥२९॥ प्रवृत्तिंचनिवृत्तिंचकार्याकार्येभयाभये॥ बंधंमोक्षंचयावेत्तिबुद्धिःसापार्थ
सात्त्विकी ॥ ३० ॥ ययाधर्ममधर्मंचकार्यंचाकार्यमेवच ॥ अयथावत्प्रजानातिबुद्धिःसापार्थराजसी ॥ ३१ ॥ अधर्मंधर्ममितियामन्यतेतमसावृता ॥ सर्वा
र्थान्विपरीतांश्चबुद्धिःसापार्थतामसी ॥ ३२ ॥ धृत्याययाधारयतेमनःप्राणेंद्रियक्रियाः॥ योगेनाव्यभिचारिण्याधृतिःसापार्थसात्विकी ॥ ३३॥ यत्तुधर्म
कामार्थान्धृत्याधारयतेर्जुन ॥ प्रसंगेनफलाकांक्षीधृतिःसापार्थराजसी ॥ ३४ ॥ ययास्वप्नंभयंशोकंविषादंमदमेवच ॥ नविमुंचतिदुर्मेधाधृतिःसापार्थतामसी॥ ३५॥ सुखंत्विदानींत्रिविधंशृणुमेभरतर्षभ ॥ अभ्यासाद्रमतेयत्रदुःखांतंचनिगच्छति॥ ३६॥ यत्तदग्रेविषमिवपरिणामेऽमृतोपमम्॥ तत्सुखंसात्त्विकं
प्रोक्तमात्मबुद्धिप्रसादजम्॥ ३७॥ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमम्॥ परिणामेविषमिवतत्सुखंराजसंस्मृतम्॥ ३८॥ यदग्रेचानुबंधेचसुखंमोहनमा
त्मनः॥ निद्रालस्यप्रमादोत्थंतत्तामसमुदाहृतम्॥ ३९॥

कंप्रसिद्धं विषादंविषण्णतां मदमशास्त्रीयविषयसेवयाचित्तस्यविवशत्वं एतान्नविमुंचतिधारयत्येवययाधृत्यासाधृतिःपार्थतामसी ॥ ३५॥ गुणभेदेनक्रियाणांकारकाणांचत्रैविध्यंमुक्तंतत्फलस्यसुखस्य
त्रैविध्यमाह सुखंत्वित्यादिना अभ्यासात्पौनःपुन्येनसेवनात् यत्रसात्त्विकेराजसेतामसेवासुखेरमतेरतिंप्राप्नोति ययारात्यादुःखस्यपुत्रशोकादेरप्यंतमवसानंनिगच्छतिनिश्चयेनप्राप्नोति तत्सुखंत्रिविधंशृणु
यदात्वयमप्यर्थःसात्त्विकसुखस्यैवलक्षणार्थस्तदायत्रसमाधिसुखेअभ्यासाद्रमतेनतुविषयसुखइवरागातदुःखांतंमोक्षंचनिगच्छतीत्यर्थः ॥ ३६ ॥ यत्तत्प्रसिद्धंसर्वप्राणिप्रेमास्पदं अग्रेसमारंभकालेमनः
प्राणेंद्रियस्पंदनिरोधेनयज्ञेसंज्ञाप्यमानस्यपशोरिवजायमानं विषमिवातितीव्रवेदनाकरं परिणामेसात्त्विक्याधृत्यानिरुद्धासुमनआदिक्रियासुअमृतोपममत्याह्लादकरं आत्मनःस्वस्यैवबुद्धेःप्रसादेनैर्म
ल्यंरजस्तमोमलराहित्यंतस्मादाविर्भूतंनतुविषयसंगजंनिद्रालस्यादिजंबातत्सुखंसात्त्विकंप्रोक्तम् ॥ ३७॥ राजसंसुखमाह विषयेति अग्रेभोगकाले परिणामेविषमिवविषयैगकाले इहामुत्रचदुःखप्रदत्वा
त् ॥ ३८ ॥ अग्रेआरंभे अनुबंधेपरिणामे मोहनंमोहकरं आत्मनोबुद्धेः यतोनिद्रादिजम् ॥ ३९ ॥

प्रकरणार्थमुपसंहरत्यनुक्तमपिसंगृह्णन् नतदस्तीति सत्त्वंप्राणिजातं इदमुपलक्षणंजडस्यापि सर्वस्यत्रिगुणविकारत्वात् प्रकृतिर्जेर्जन्मांतरीयधर्माधर्मसंस्कारैर्मायाप्रभवैर्वा शेषंस्पष्टम् ॥ ४० ॥ एवंपंचद शेससाराश्वत्थमसंगशस्त्रेणच्छित्त्वापरंपदंमार्गितव्यमित्युक्तंतत्रात्मनोऽसंगत्वोपपादनायक्रियाकारकफललक्षणस्यकृत्स्नस्यसंसारस्यत्रिगुणात्मकत्वमुक्तं नह्यात्मानात्मनोर्गुणातीतगुणात्मकयोःसंगःसंभव तिनह्याकाशांतर्वर्तिपृथिव्यादिगुणेनगंधादिनाकाशःसंस्रज्यतेतनद्वदित्युक्तं समाप्तःशास्त्रार्थः अथेदानींसर्वगीताशास्त्रार्थमुपसंहर्तुमसंगशस्त्राभ्युपायंचप्रदर्शयितुंप्रकरणांतरमारभते ब्राह्मणेत्यादिना शूद्राणा मसमासकरणंवेदानधिकारात् प्रविभक्तान्यसंकीर्णानि तत्रहेतुमाह स्वभावप्रभवैर्गुणैः स्वभावईश्वरस्यप्रकृतिस्त्रिगुणात्मिकासैवप्रभवोहेतुर्येषांगुणानांतेस्वभावप्रभववासैः यद्वाब्राह्मणस्वभावस्यसत्त्वगुण एवप्रभवःशांतत्वात् क्षत्रियस्वभावस्यसत्त्वोपसर्जनंरजःईश्वरस्वभावत्वात् वैश्यस्वभावस्यतमउपसर्जनंरजःकृष्यादिस्वभावत्वात् शूद्रस्वभावस्यरजउपसर्जनंतमःशुश्रूषास्वभावत्वात् अथवास्वभावःप्रा ग्जन्मीयःसंस्कारस्तत्प्रभवैर्नतुजातिमात्रप्रभवैःपक्षिणामाकाशगमनवत् अतएवजात्यंतरव्याद्यत्तानांधर्माणांशमादिषुपाठोनदृश्यते नहिशूद्राद्याद्यत्तंत्रैवर्णिकानामध्ययनादिकंवादनंतरद्वयाद्याद्यत्तंब्राह्मणा नामध्यापनादिकंवेहपठ्यतेकिंतुसर्वैसर्वजातीयानांसाधारणाधर्माःशमादयोदृश्यंते यथाहिद्रोणादिषुब्राह्मणेष्वपिशौर्यादिकंभरतादिषुक्षत्रियेष्वपिशमादिकंदृष्टं एवमितरत्र तस्माद्यस्मिन्कर्मस्मिन्प्रवृत्तौश

नतदस्तिपृथिव्यांवादिविदेवेषुवापुनः॥ सत्त्वंप्रकृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैः॥ ४० ॥ ब्राह्मणक्षत्रियविशांशूद्राणांचपरंतप॥ कर्माणिप्रविभक्तानिस्वभावप्रभवैर्गुणैः ॥ ४१ ॥ शमोदमस्तपःशौचंक्षांतिरार्जवमेवच ॥ ज्ञानंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभा वजम्॥ ४२॥ शौर्यंतेजोधृतिर्दाक्ष्यंयुद्धेचाप्यपलायनम्॥ दानमीश्वरभावश्चक्षात्रंकर्मस्वभावजम्॥ ४३॥

मादयोदृश्यंतेसशूद्रोप्यैर्तैर्लक्षणैर्ब्राह्मणएवज्ञातव्यः यत्रचब्राह्मणेपिशूद्रधर्मादृश्यंतेतंशूद्रएव तथाचारण्यकेसर्पभूतंनहुषंप्रतियुधिष्ठिरवाक्यं सत्यंदानंक्षमाशीलमानृशंस्यंतपोघृणा दृश्यंतेयत्रनागेंद्रसब्रा ह्मणइतिस्मृतः तथा यत्रैतल्लक्ष्यतेसर्पतंशूद्रमितिनिर्दिशेदिति जानिधर्मास्तुमनुनादर्शिताः अध्यापनंचाध्ययनंयजनंयाजनंतथा दानंप्रतिग्रहंचैवब्राह्मणानामकल्पयत् प्रजानांरक्षणंदानमिज्याध्ययनमेवच विषयेष्वप्रसक्तिंचक्षत्रियस्यसमादिशत् पशूनांरक्षणंदानमिज्याध्ययनमेवच वणिक्पथंकुसीदंचवैश्यस्यकृषिमेवच एकमेवतुशूद्रस्यप्रभुःकर्मसमादिशत् एतेषामे ववर्णानांशुश्रूषामनसूययेति तस्मात्शमादयोयत्रब्राह्मणेब्राह्मणेवादृश्यंतेसएवब्राह्मणइत्यत्रविवक्षितं स्वेस्वेकर्मण्यभिरतःसंसिद्धिंलभते परामित्यत्रतुमनूक्तान्यध्यापनादीन्येवस्वकर्माणियाज्ञाज्ञिनतुश मदमादीनि नहिज्ञानविज्ञानवतोऽन्यासंसिद्धिर्लब्धव्यास्ति तस्माच्छमदमादयोब्रह्मिष्ठस्यैवब्राह्मणस्यलक्षणमितिदिक् ॥ ४१॥ ब्राह्मणकर्माण्याह शमइति अंतःकरणनिग्रहःशमः बाह्येंद्रियनिग्रहोदमः तपःपूर्वोक्तंशारीरादिभेदेनत्रिविधं शौचंबाह्यंमृज्जलाभ्यामाभ्यंतरंभावशुद्धिः क्षांतिःक्षमा आर्जवमकौटिल्यं ज्ञानंशास्त्रीयंकर्मब्रह्मविषयं विज्ञानंतदनुष्ठानानुभवात्मकं आस्तिक्यंश्रद्धा एतत्सवकंब्रह्म कर्मब्राह्मणत्वजात्यभिव्यंजककंकर्म स्वभावजंप्राचीनधर्मसंस्कारजं ॥ ४२ ॥ शौर्यंपराक्रमः तेजःप्रागल्भ्यं धृतिर्धैर्यं दाक्ष्ययुद्धेकौशलमुत्साहोवा दानमौदार्यं ईश्वरभावःउन्मार्गवर्तिनांनियमनशक्तिः एतत्क्षात्रंकर्मस्वभावजम् ॥ ४३ ॥

॥ ९३ ॥

वैश्यशूद्रयोःकर्माण्याह कृषीति स्पष्टार्थःश्लोकः ॥ ४४ ॥ कर्मप्रविभागफलमाह स्वेस्वेइति स्वेस्वेमन्वादिभिरुक्तेऽध्यापनादावसाधारणेशमदमादौसाधारणेचकर्मण्यभिरतोनिष्ठावान्संसिद्धिंज्ञानयो ग्यतांलभतेनरः एतदेवविवरीतुंप्रतिजानीते स्वेति सिद्धिंवक्ष्यमाणांमुख्यसंन्यासलक्षणनैष्कर्म्यसिद्धिं यथायेनप्रकारेण ॥ ४५ ॥ तमेवप्रकारमाह यतइति प्रवृत्तिःकायवाङ्मनोनिर्वर्त्यचेष्टा यतोहेतोर्नं तर्यामिणः येनवागभ्युद्यतइत्यादिश्रुतेः येनइदंसर्वंदृश्यतंतंव्यापनमुपादानत्वात् स्वकर्मणातमभ्यर्च्यसंतर्प्यसिद्धिंमोक्षंविंदतिलभतेमानवः मनुष्याधिकारिकत्वाच्छास्त्रस्यपरमेश्वरेनित्यकर्मणामर्पणमेवमो क्षद्वारमित्यर्थः ॥ ४६ ॥ स्वकर्मणेतिविशेषणस्यफलमाह श्रेयानिति स्वधर्मोविगुणःकिंचिदंगहीनोपिश्रेयान्प्रशस्यतरः किमपेक्ष्यश्रेयान् परधर्मात्स्वनुष्ठितात्सम्यग्विहितादपि उक्तंच स्वधर्मेनिधनंश्रेयः परधर्मोभयावहइति स्वभावनियतंपूर्वोक्तत्रिविधस्वभावाज्जातंकर्मकुर्वन्किल्बिषंदोषंनाप्नोति विषकृमेर्विषमिवनदोषकरं तस्मात्तवभैक्ष्यंहिंसाशून्यमपिनयुक्तंकिंतुहिंसामुक्तोपिस्वधर्मएवप्रशस्यतरः धर्मत्वेनविहितेःस्मिन्नग्नीषोमीयपश्वालंभेइवक्रतेसतिनकिल्बिषप्रसंगोस्तीत्यर्थः ॥ ४७ ॥ किंचसहजंस्वाभाविकंक्षात्रंकर्मसदोषंहिंसामिश्रमपिनत्यजेत् हियस्मात्सर्वारंभाःसर्वाणिकर्माणिदोषेणहिंसादि

कृषिगोरक्ष्यवाणिज्यंवैश्यकर्मस्वभावजम्॥ परिचर्यात्मकंकर्मशूद्रस्यापिस्वभावजम्॥ ४४॥ स्वेस्वेकर्मण्यभिरतःसंसिद्धिंलभतेनरः॥ स्वकर्मनिरतःसिद्धिंयथाविं दतितच्छृणु॥ ४५॥ यतःप्रवृत्तिर्भूतानांयेनसर्वमिदंततम्॥ स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवः॥ ४६॥ श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात्॥ स्वभा वनियतंकर्मकुर्वन्नाप्नोतिकिल्बिषम्॥ ४७॥ सहजंकर्मकौंतेयसदोषमपिनत्यजेत्॥ सर्वारंभाहिदोषेणधूमेनाग्निरिवावृताः॥ ४८॥ असक्तबुद्धिःसर्वत्रजितात्मा विगतस्पृहः॥ नैष्कर्म्यसिद्धिंपरमांसंन्यासेनाधिगच्छति॥ ४९॥ सिद्धिंप्राप्तोयथाब्रह्मतथाप्नोतिनिबोधमे ॥ समासेनैवकौंतेयनिष्ठाज्ञानस्ययापरा॥ ५० ॥

नाआवृताएव यस्माच्चपरधर्मोभयावहस्तस्मात्स्वकर्मनत्यजेदित्यर्थः ॥ ४८॥ स्वकर्मणामीश्वरेसमर्पणंकर्तव्यमित्युक्त्वानंतरश्लोकद्वयेनत्स्वकर्मणाभावश्यकत्वमुक्त्वातेषांपरमेश्वरेर्पणेनकिंफलंस्यादित्य तआह असक्तेति संन्यासेन कार्यमित्येवयत्कर्मनियतंक्रियतेर्जुन संगंत्यक्त्वाफलंचैवसत्यागःसात्विकोमतइतिमूर्वोक्तेनामुष्यसात्विकत्यागेन असक्तबुद्धिःपुत्रदारादिषुसक्तिपदेष्वासक्तिवर्जितबुद्धिर्य स्यसोऽसक्तबुद्धिर्विरक्तइत्यर्थः अतएवजितात्माशांतचित्तः विगतस्पृहःविशेषेणगतास्पृहातृष्णायस्यनादृशोभूत्वानैष्कर्म्यसिद्धिकात्रूर्वेनस्वरूपतःकर्मत्यागलक्षणांपारिव्राज्यसिद्धिंपरमांपूर्वोक्तामुख्य त्यागापेक्षयातिश्रेष्ठांनंद्वेष्ट्यकुशलंकर्मेतिश्लोकेव्याख्यातांअधिगच्छतिप्राप्नोति ॥ ४९ ॥ स्वकर्मनिरतःसिद्धिंयथाविंदतीत्येतन्निज्ञातमुपपादितं इदानींनैष्कर्म्यसिद्धिंप्राप्नोपिपरिव्राड्वशीकारसंज्ञकवै राग्यवान्पुरुषोब्रह्मप्राप्नोतिनथावक्तुंप्रतिजानीते सिद्धिमिति सिद्धिंनैष्कर्म्यसिद्धिंनिबोधबुध्यस्व मेमद्वचनात्समासेनसंक्षेपेणैवहेकौंतेय यायत्प्राप्यंब्रह्म विधेयापेक्षंस्वीत्वं ज्ञानस्यपरानिष्ठायदपेक्षयाऽन्य ज्ज्ञेयमांतरतरंनास्तीत्यर्थः ॥ ५० ॥

तमेवब्रह्मप्राप्तिप्रकारमाहत्रिभिः बुद्धेति बुद्ध्यावेदांतश्रवणमननपरिपाकोत्थयाऽहंब्रह्मास्मीतिपरोक्षनिश्चयरूपयाविशुद्धयासर्वभूतेषुमैत्र्यादिभावनयासम्यग्विशोधितया धृत्याधैर्येणयोगक्षेमादिनिमित्तवैयर्थ्यराहित्येन आत्मानंदेहेंद्रियसंघातंनियम्य दृढासनोभूत्वेत्यर्थः चकारात्प्राणंचनियम्य शब्दादीन्विषयांस्त्यक्त्वा ततइंद्रियाणिप्रत्याहृत्येत्यर्थः प्रत्याहृतकरणोप्यंतर्मनसैवविषयान्स्मरतितत्परित्यागमाह रागद्वेषौव्युदस्यचेति संकल्पंत्यक्त्वेत्यर्थः सहिविषयंपरिकल्प्यतत्ररागंजनयतीतिप्रसिद्धं यथाचाक्षपादाचार्यसूत्रं दोषनिमित्तंरूपादयोविषयाः संकल्पकृताइति दोषोरागादिः चकारादयमहमस्मीत्येतमपिभावंव्युदस्येतिज्ञेयं ततोब्रह्मभूयायब्रह्मभावायतंप्राप्तुंकल्पतेयोग्योभवतीतितृतीयेनसंबंधः ॥ ५१ ॥ केनसाधनजातेनैवंभूतोभवतीत्यतआह विविक्तेति यत्तच्छब्दाध्याहारेणयोज्यं नित्यमितिसर्वत्रसंबंधनीयं योनित्यंविविक्तसेवीएकांतशीली लघ्वाशीमिताशनशीलश्च तथानित्यंवैराग्यंरागाभावंसमुपाश्रितश्च तथानित्यंध्यानयोगःषष्ठाध्यायोक्तस्तत्परश्चयोनित्यंभवतिसयतवाक्कायमानसोभवति यतकायआसनदार्ढ्येन यतवाग्विषयेभ्यइंद्रियाणांप्रत्याहरणेन यतमानसःसर्वसंकल्पत्यागेन अत्रचतुर्भिःसाधनैर्यतवाक्कायमानसत्वंसाध्यं नित्यंविविक्तसेवादिशीलःसन्यतवाक्कायमानसोभूत्वाब्रह्मभूयायकल्पतइत्युत्तरेणान्वयः ॥ ५२ ॥ एवंयतवाक्कायमानसस्ययोगिनोयोगजाःसिद्धयउपतिष्ठंति ताश्चश्रुतौदर्शिताः पृथिव्यप्तेजोनिलखेसमुत्थितेपंचात्मकेयोगगुणेप्रवृत्ते नतत्रयोगो

बुद्ध्याविशुद्धयायुक्तोधृत्यात्मानंनियम्यच ॥ शब्दादीन्विषयांस्त्यक्त्वारागद्वेषौव्युदस्यच ॥ ५१ ॥ विविक्तसेवीलघ्वाशीयतवाक्कायमानसः ॥
ध्यानयोगपरोनित्यंवैराग्यंसमुपाश्रितः ॥ ५२ ॥ अहंकारंबलंदर्पंकामंक्रोधंपरिग्रहम् ॥ विमुच्यनिर्ममःशांतोब्रह्मभूयायकल्पते ॥ ५३ ॥

नजरानमृत्युःप्राप्तस्ययोगाग्निमयंशरीरमिति तथा यंयंलोकंमनसासंविभातिविशुद्धसत्वःकामयतेयांश्चकामान् तंतंलोकंजयतेतांश्चकामान्तत्स्मादात्मज्ञंश्चर्चयेद्भूतिकामइतिच संविभातिसंकल्पयति लोकंलोचनीयमतीतानागतमर्थजातं कामान्काम्यमानान्विषयान् जयतेउपलभतेइतिश्रुतिपदानामर्थः तथा नाविरतोदुश्चरितान्नाशांतोनासमाहितः नाशांतमानसोवापिप्रज्ञानेनैनमाप्नुयादिति प्रज्ञानेनशास्त्राचार्योपदेशजेनज्ञानेनदुश्चरितादिसेवनाद्विरक्तःशांतोजितचित्तःसमाहितोनिरूद्धचित्तवृत्तिरप्यशांतमानसोयोगैश्वर्यासक्तचित्तःएनमात्मानंनप्राप्नुयादितिश्रुत्यर्थः तदिदमाह अहंकारमिति यदा तुयोगीयतमानसोस्मितामात्रप्रत्ययोभवतितदासैवास्मितावस्थितिर्विषयाभिमुखाहंकारइत्युच्यतेविषयविमुखात्वस्मितेतितततस्तमहंकारंनिगृह्णीयात् तदनिग्रहेयोगीबलंसत्यसंकल्पत्वादिसामर्थ्यमात्मनः पश्यन्दर्पंकरोतिनमत्तुल्योन्योस्तीतिमन्यते ततश्चदृप्तोधर्ममतिक्रामतीत्यापत्तंबवचनाद्विध्यान्कामानिच्छति तत्रकेनचिन्निमित्तेनकामप्रतिबंधेसतिक्रोधवान्भवतितत्परोत्सादनायभूयांसंशिष्यादिपरिग्रहंसंपादयतिततोनश्यतीति तस्मात्सर्वानर्थमूलभूतमहंकारमेवविमुच्यततइतरान्सर्वान्विमुंचति अहंकारविमोकेपिनिर्ममत्वंतत्प्रदर्शितेषुविषयेषुममताशून्यत्वेसत्यहंकारःशिथिलीभूतोविषयवैमुख्यं प्राप्यस्वकारणेऽस्मितायांविलीयते ततःशांतोऽस्मितायाअपिप्रलयान्निरिंधनाग्निवदुपरतोयोगीब्रह्मभूयायकल्पते ॥ ५३ ॥

॥ ९४ ॥

अस्यैवंशांतस्यकेवलस्ययोगिनोव्युत्थानावस्थामाह ब्रह्मभूतइति योहिसुप्तौलयेवानिपतितोयोगीव्युत्थानेजडेहस्तमोयस्तचित्तइवतंद्रालुरुत्तिष्ठति ब्रह्मभूतस्तुप्रसन्नात्माप्रसन्नचेताःलघुशरीरःअस्तेनेवसमाधिसुखेनतृप्तस्तदेकप्रवणोनशोचतिनष्टं नाप्यप्राप्तंकांक्षतिदारादिकं सर्वेषुभूतेषुचतुर्विधेषुसमःब्रह्मैवेदंसर्वमितिबुद्ध्यावैषम्यवर्जितःसन्परांमद्भक्तिंद्वैतदृष्टिविवर्जितांभावनांलभते पातंजलयोगीतुनव्युत्थानेपरांदृष्टिंलभतेभेददर्शीत्वात् अयंचभक्तःश्रीभागवतेदर्शितः सर्वभूतेषुयेनैकंभगवद्भावमीक्षते भूतानिभगवत्यात्मन्येषभागवतोत्तमइति सोयंचतुर्थोभक्तोज्ञानीत्वात्मैवमेमतमितिभगवतापिदर्शितः ॥ ५४ ॥ अस्याअद्वैतात्मतत्त्वज्ञानलक्षणायाभक्तेःफलमाह भक्त्येति मांउक्तविधयाभक्त्याज्ञानीअभितःसाकल्येनजानाति साकल्यमेवाह यावानिति किमहमणुपरिमाणोवादेहसंमितोवाताकिंकाणामिवाकाशवत्सकलमूर्तद्रव्यसंयोगित्वलक्षणविभुत्वाश्रयोवासप्रपंचाद्वैतवादिनामिवस्वगतभेदवान्वाऽखंडैकरसोवेतिपरिमाणतस्तत्त्वतोमांतत्पदार्थंजानाति तथाग्र्यश्चास्मीति देहेंद्रियप्राणमनसाम्यतमःकियत्कालस्थायीवाक्षणिकविज्ञानरूपोवाशून्यंवाकर्ताभोक्तावाजडोवाजडाजडरूपोवाचिद्रूपोभोक्तावाकर्तृत्वभोक्तृत्ववर्जितआनंदघनोवेतितत्त्वतःसर्वसंशयरहितेनमामजरममरमभयमशोकंजानाति तथाचश्रुतिः भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरेइतिआत्मदर्शनेसतिसर्वसंशयोच्छेददर्शयति एवंक्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारतेत्युक्तेः

ब्रह्मभूतःप्रसन्नात्मानशोचतिनकांक्षति ॥ समःसर्वेषुभूतेषुमद्भक्तिंलभतेपराम् ॥ ५४ ॥
भक्त्यामामभिजानातियावान्यश्चास्मितत्त्वतः ॥ ततोमांतत्त्वतोज्ञात्वाविशतेतदनंतरम् ॥ ५५ ॥

सर्वक्षेत्रेष्वेकंमांविभुंसच्चिदानंदघनंतत्त्वतोज्ञात्वासर्वोपाधिविनिर्मुक्तंयाथात्म्येनज्ञात्वासाक्षात्कृत्यततोव्यामोब्रह्मभावंगतोभवतीत्यर्थः ब्रह्मवेदब्रह्मैवभवतीतिश्रुतेः यद्वा ततइतिकारणब्रह्मभावापत्तिःसार्वात्म्यरूपाप्रथममुक्तायएवंवेदाहंब्रह्मास्मीतिसइदंसर्वंभवति सएतमेवपुरुषंब्रह्मततममपश्यदित्यादिश्रुतिभ्योमुक्तानांसार्वात्म्यावगमात् ततमंततनमं एकस्तकारश्छांदस्यांप्रक्रियायांलुप्तोद्रंष्टव्यइतिश्रुतिभाष्यं अनंतरंकारणभावापत्तेरनुपदमेवतत्ब्रह्मतच्छब्दाभिधेयं तदितिवाएतस्यमहतोभूतस्यनामभवतीतिश्रुतेः शुद्धंब्रह्मविशतेदर्पणापायेप्रतिबिंबोबिंबमिवप्रविशति कार्योपाधीनांजीवानांकारणोपाधीश्वरप्राप्तिर्द्वारैवनिष्फलब्रह्मप्राप्तिरित्यावेदितंप्रागेव यद्वा मांज्ञात्वातद्विशतइत्येतावतैवज्ञानप्रवेशयोःपौर्वापर्येसिद्धेतदनंतरमितिपदेनच्छब्देनबुद्धिस्थंदेहंपरामृश्यतत्पातानंतरमितिव्याख्येयं यतोजातेपितत्त्वज्ञानेयावद्देहपातंप्रारब्धकर्मणांप्रतिबंधाद्विदेहकैवल्यंनप्राप्यते अन्यथाज्ञानसमकालमेवदेहपातापत्तिःस्यात् विमुक्तश्चविमुच्यते भूयश्चातेविश्वमायानिवृत्तिरितिमुक्तस्यमुक्तिंनिवृत्तायाश्चमायायाःपुनर्निवृत्तिंवदज्जीवन्मुक्तिशास्त्रंबाधितंस्यात् यथातार्किकाणांनष्टेपिसमवायिकारणेपटादिकंक्षणमात्रमवतिष्ठतेएवमस्माकंमप्यनादिकालायादेहायुपादानभूतायाअविद्यायाविनाशेपिकिंचित्कालंदेहादिप्रतिभानंयुज्यते ईदृशमेवजीवन्मुक्तमपेक्ष्यभगवताउक्तं उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्त्वदर्शिनइति स्थितप्रज्ञलक्षणस्तृतिरपितल्लक्षणाभिधित्सयैवप्रवर्ततेइतिदिक् ॥ ५५ ॥

ननुतथैथीकतूलमग्नौप्राप्तंप्रदूयेतैवंहास्यसर्वेपाप्मानःप्रदूयंतइतिपूर्वकर्मणांज्ञानेनप्रायश्चित्तेनेवसत्यपिनाशश्रवणेज्ञानोत्तरकालीनानांकर्मणांनाशाभावाज्ज्ञानोत्तरमपिदेहधारणेत्वाज्ञाविकोनांकर्मणांवर्जनस्यासंभवादवश्यंज्ञानिनोपिबंधःस्यादित्याशंक्याह सर्वकर्माणीति मद्व्यपाश्रयोहमेवप्रज्ञानघनःप्रत्यगात्माव्ययपाश्रयआश्रयोयस्यसमद्व्यपाश्रयोज्ञानी सर्वकर्माणिविहितानिनिषिद्धानिवासदाः सरुतत्कुर्वाणोपिमत्प्रसादात्मदनुग्रहाच्छाश्वतंनित्यंअव्ययंपरमसर्वोत्कृष्टंपदंपदनीयंमोक्षमवाप्नोति नतुज्ञानोत्तरमपिक्रियमाणैःकर्मभिर्बध्यते तस्यपुत्रादायमुपर्यंतिसुहृदःसाधुकृत्यांद्विषंतःपापकृत्यामिति नहवाएवंविदिकिंचनरजआध्वंसतेतंविदित्वानलिप्यतेकर्मणापापकेनइत्यादिशास्त्रेणतत्त्वज्ञानिनःकर्मालेपश्रवणात् ॥ ५६ ॥ एवंवर्णाश्रमादिधर्मपुरस्कारेणसाधनासफलाचत्रत्मविद्यानिरूपि

सर्वकर्माण्यपिसदाकुर्वाणोमद्व्यपाश्रयः ॥ मत्प्रसादादवाप्नोतिशाश्वतंपदमव्ययम् ॥ ५६ ॥ चेतसासर्वकर्माणिमयिसंन्यस्यमत्परः ॥ बुद्धियोगमुपाश्रित्यम च्चित्तःसततंभव ॥ ५७ ॥ मच्चित्तःसर्वदुर्गाणिमत्प्रसादात्तरिष्यसि ॥ अथचेत्त्वमहंकारान्नश्रोष्यसिविनंक्ष्यसि ॥ ५८ ॥ यदहंकारमाश्रित्यनयोत्स्यइतिमन्यसे ॥ मिथ्यैषव्यवसायस्तेप्रकृतिस्त्वांनियोक्ष्यति ॥ ५९ ॥ स्वभावजेनकौंतेयनिबद्धःस्वेनकर्मणा ॥ कर्तुनेच्छसियन्मोहात्करिष्यस्यवशोपितत् ॥ ६० ॥

ता अस्याःप्राप्तयेपुनःसाधनत्वेनभक्तिमेवविधत्ते चेतसेति चेतसाविवेकबुद्ध्यासर्वाणिकर्माणिनित्यनैमित्तिकानिमयिभगवतिवासुदेवेसंन्यस्ययत्करोषियदश्नासीत्युक्तरीत्यासत्परःअहमेवपरःप्राप्योयस्यनतुमद्भक्त्याअर्थादीनूप्रार्थयानः बुद्धियोगंपूर्वोक्तंसिद्धसिद्धोःसमत्वलक्षणंबंधहेतोरपिकर्मणोमोक्षहेतुत्वसंपादकंअपाश्रित्यआश्रित्यमच्चित्तःमदेकशरणःसततंसर्वदाभव ॥ ५७ ॥ एतस्यभक्तियोगस्यकरणेगुणमकरणेदोषंचाह मच्चित्तइति दुर्गाणिआध्यात्मिकाधिलौकिकादीनिसंकटानि अहंकारात्त्वपांडित्याभिमानात्तनश्रोष्यसिमद्वाक्यंतर्हिविनंक्ष्यसिपुरुषार्थशून्योभविष्यसि ॥ ५८ ॥ स्वतंत्रोहंत्वदुक्तंनकरिष्यामीत्याशंक्याह यदिति यत्यदिअहंकारंगर्वमाश्रित्यनयोत्स्येयुद्धंनकरिष्येइतिमन्यसेएषतेतवव्यवसायोनिश्चयोमिथ्या यतःप्रकृतिःक्षात्रस्वभावःत्वांनियोक्ष्यति प्रकृतिंयांतिभूतानिनिग्रहःकिंकरिष्यतीतिचोक्तं ॥ ५९ ॥ प्रकृतिस्त्वांनियोक्ष्यतीत्येतदेवव्याचष्टे स्वभावजेनेति स्वभावजेनपूर्वोक्तेनशौर्यादिनाअवशोपिपरवशएवतत्करिष्यसि ॥ ६० ॥

कोसौपरोयद्वशेहमस्मीत्यतआह ईश्वरइति ईश्वरईशनशीलोंतर्यामीपृथिव्यादीनामस्माकंचसर्वभूतानांसर्वप्राणिनांहृद्देशेबुद्धिगुहायांसर्वप्राणिप्रवर्तकस्तिष्ठति कीदृशः सर्वभूतानिभ्रामयन् ऊर्ध्वाधोमार्गेषुसंचारयन्काष्ठपुत्तिकाइवसूत्रधारः यंत्रारूढानियंत्रमिवयंत्रंउक्तमणादिसाधनंसर्वप्राणाद्यात्मकंलिंगंतदारूढानिमायायास्वशक्त्याभ्रामयन्तिसंबंधः हेअर्जुनशुद्धविशुद्धांतःकरण सेश्वरोसीतिभावः अत्राहंकारपूर्वकंयःकर्मकरोतियश्चईश्वरपरवशोहंकरोमीतिबुद्धाकरोतितयोरत्यंतवैलक्षण्यप्रदर्शनार्थोमंत्रोभाष्योदाहृतः अहश्चकृष्णमहरर्जुनंचविवर्तेतेरजसीवेद्याभिरितिन्नारद्वाजार्षे अहश्चकृष्णमहरर्जुनंचेत्याग्निमारुतस्यप्रतिपदितिब्राह्मणेनआग्निमारुतेशस्त्रेविनियुक्ताप्रथमेयमृक् यस्मिन्दिवसेसोमःसूयतेयागार्थंतदेवजन्मसाफल्यदिनंमुख्यमहःशब्दवाच्यं अन्यत्तुदिनमदिनमेवनिष्फलत्वात् तथाचस्मृतिः दशभिर्जन्मभिर्वेदाआधानंशतजन्मभिः सहस्रैर्जन्मभिःसोमंब्राह्मण्यंपातुमर्हतीतिसोमयागस्यदौर्लभ्यंदर्शयति तदयमहःशब्दःकालवचनोपिसौम्येकर्मणिवर्तते यथादर्शपौर्णमासशब्दौ तत्रैवंसतिअहःयागःकृष्णंअविदुषाकृतमप्रकाशमिवभवति तथाहरर्जुनंस्वच्छंतदेवविदुषाकृतंप्रकाशरूपमिवभवति तेएतेउभेअपिविद्वद्विद्वत्कृतेअहनीरजसीप्रवृत्तिरूपत्वात्रजोगुणकार्येअपिवेषाभि

ईश्वरःसर्वभूतानांहृद्देशेर्जुनतिष्ठति ॥ भ्रामयन्सर्वभूतानियंत्रारूढानिमायया ॥ ६१ ॥ तमेवशरणंगच्छसर्वभावेनभारत ॥ तत्प्रसादात्परांशांतिंस्थानंप्राप्स्यसिशाश्वतं ॥ ६२ ॥ इतितेज्ञानमाख्यातंगुह्याद्गुह्यतरंमया ॥ विमृश्यैतदशेषेणयथेच्छसितथाकुरु ॥ ६३ ॥ सर्वगुह्यतमंभूयःशृणुमेपरमंवचः ॥ इष्टोसिमेदृढमितिततोवक्ष्यामितेहितं ॥ ६४ ॥

विद्याभिःकर्मांगावबद्धोपासनारूपावापरमेश्वरेसर्वकर्मार्पणरूपावाअहंकरोमीत्यभिमानरूपावाविद्याविज्ञानानिताभिर्विवर्तंतेवैपरीत्येनवर्तंते सोपासनंकर्मश्वेतंपरमात्मतत्त्वप्रकाशकंबंधविच्छेदहेतुः मूढकृतंकर्मकृष्णंस्वरूपावरकंबंधहेतुरित्यर्थः तदेवंभगवान्पार्थंअर्जुनेतिसंबोधयन्एतस्यस्वच्छांतःकरणत्वद्योतनेनशुद्धेधर्मेधिकारंदर्शयति ॥ ६१ ॥ तमेवईश्वरंसर्वभावेनसर्वात्मनाशरणमाश्रयंगच्छश्रयस्व तत्प्रसादात्तदनुग्रहात्परांशांतिंउपरतिंसमाधिमितियावत् तथाचस्मृतं समाधिसिद्धिरीश्वरप्रणिधानादिति स्थानंचपरंविष्णोःपदंमोक्षंशाश्वतंनित्यंप्राप्स्यसि ॥ ६२ ॥ सर्वगीतार्थमुपसंहरति इतीति इतिएवंप्रकारेतेतुभ्यंमयासर्वज्ञेनपरमकारुणिकेनज्ञानंआख्यातं गुह्यान्मंत्रतंत्ररसायनरूपाद्गुह्यतरंअतिशयितंरहस्यं एतद्यथोक्तंशास्त्रार्थजातंविमृश्यसम्यगालोच्ययथेच्छसितथाकुरु ॥ ६३ ॥ एवंयथेष्टकरणमभ्यनुज्ञायाप्यतिवात्सल्यात्पुनःश्लोकद्वयेनैवकृत्स्नंशास्त्रार्थमुपदेक्ष्यंस्तद्ग्रहणेऐकाग्र्यमस्यसंपादयितुमाह सर्वेति सर्वेभ्योगुह्येभ्यःअतिशयितंगुह्यंसर्वगुह्यतमंभूयःपुनरसरूढुक्तमपिमेममवचनंशृणु परमंपरमार्थविषयत्वात् नलोभान्नापिभयात्त्वांवक्ष्यामिकिंतर्हिमेममइष्टोसिपरमात्मोसिइतिहेतोःदृढंअतिशयिनंतेतवहितंयतस्ततोवक्ष्यामि तवइष्टत्वात्विद्यायाश्चहितत्वात्तद्वचनंआप्तेत्वयिअवश्यंवक्तव्यमितिभावः ॥ ६४ ॥

तदेवगुह्यतमंहितमाह मन्मनाइति अहंप्रत्यगात्मानंदैकघनःपरिपूर्णस्तदाकारंमनोयस्यसमन्मनाःभव एतेनब्रह्मात्माभेदोपिसाक्षात्करणीयइत्युत्तरषट्कार्थउक्तः कथमेवंविधाज्ञाननिष्ठालभ्यतेऽतआह मद्भक्तोभव एतेनभगवदुपासनात्मकोमध्यमषट्कार्थउक्तः कथमल्पपुण्यस्यभक्तिरुदेष्यतीत्यतआह मद्याजीभगवदर्थकर्मकरणशीलोभव एतेनकर्मप्रधानआद्यषट्कार्थोविवृतः ननुयस्यभगवद्याजित्वंनसंभवतिदारिद्र्यात्स्याद्यभावाद्भातस्यभगवद्भक्तिर्दौर्लभ्याद्ब्रह्माकाराचेतोवृत्तिर्दुर्लभतरेत्याशंक्याह मांनमस्कुरु प्राकृतभक्त्यैवप्रतिमादौभगवंतंसर्वोपचारसमर्पणेननमस्काराद्दिनासम्यगाराधयेत्यर्थः तथाचाश्वलायनोनमस्कारस्यैवयज्ञत्वमुदाहरति योनमसांस्वध्वरइतियज्ञोवैनमइतिहिब्राह्मणंभवतीतिच एवमुक्तस्यसोपानत्रयारूढस्यफमाह मामिति मामेवतत्पदार्थसर्वजगत्कारणंसर्वेश्वरंसर्वशक्तिमखंडैकरसंत्वंएष्यसिप्राप्स्यसिबिंबइवप्रतिबिंबंघटाकाशइवमहाकाशं अस्मिन्नर्थेशपथंकरोतितेतवपुरःसत्यंअबाधितार्थभूतंप्रतिजानेप्रतिज्ञांकरोमिमामेवैष्यसीति प्रियोसिमे यतस्त्वंमेममप्रियोसिअतःप्रतारणानहैंत्वयिसत्यमेवाहंब्रवीमीत्यर्थः ॥ ६५ ॥ एवंनमनयजनभजननकमेणसांख्यनिष्ठाउक्ता यापूर्वध्यानेनात्मनिपश्यंतीत्यनेनश्लोकेनदर्शिता इदानीअन्येत्वेवमजानंतःश्रुत्वान्येभ्यउपासते तेपिचातितरंत्येवमृत्युंश्रुतिपरायणाइतिकेवलोपास्तिनिष्ठायोगाख्योक्तातामाह सर्वेति सर्वेषांवर्णानामाश्रमाणांदेहेंद्रियबुद्धीनांचधर्मानग्निहोत्रादीन्मुखबाहुःस्वादींश्चत्यक्त्वामामेकंसर्वेश्वरंसर्वशक्तिसोपाधिनिरुपाधिवाऽखंडैकरसमानंदघनंपरमात्मानं शरणंश्रणातिहिनस्यविश्वादीन्क्लेशादीन्शरणमाश्रयःपरायणंगच्छप्रामुहि मदेकशरणोभवेत्यर्थः अत्रअन्नंभुक्त्वैवतृप्यतिननुजलमात्रंपीत्वेतिवत्हेतुंवंक्त्वा

मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु ॥ मामेवैष्यसिसत्यंतेप्रतिजानेप्रियोसिमे ॥ ६५ ॥ सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज ॥ अहं त्वासर्वपापेभ्योमोक्षयिष्यामिमाशुचः ॥ ६६ ॥ इदंतेनातपस्कायनाभक्तायकदाचन ॥ नचाशुश्रूषवेवाच्यंनचमांयोभ्यसूयति ॥ ६७ ॥

प्रत्ययार्थः सर्वधर्मपरित्यागेनमांशरणंव्रजेत्यर्थः यथोक्तं अनात्मदर्शनेनैवपरात्मानमुपास्महइति एतस्यभगवच्छरणीकरणस्यफलमाह अहंत्वेति अहंप्रत्यगात्मासूर्याद्यंतर्यामीनारायणःसकलपाप्मविनिर्मुक्तःसम्यग्ज्ञातःसन्त्वात्वांसर्वपापेभ्यःसंचितक्रियमाणेभ्योगोत्रवधादिजेभ्योमोक्षयिष्यामिमाशुचःशोकंमाकार्षीः तथाहि तत्त्वज्ञानफलंपापास्पर्शःशोकतरणंचसर्वश्रुतिस्मृतिप्रसिद्धं आदित्यांतर्वर्तिनंनारायणंप्रकृत्यलांदोग्येश्रूयते सएषससर्वेभ्यःपाप्मभ्यउदितउदेतिहवैसर्वेभ्यःपाप्मभ्योयएवंवेद तरतिशोकमात्मवित्तत्रकोमोहःकःशोकएकत्वमनुपश्यतइति उदितःऊर्ध्वमितोगतःपापान्युक्तम्यगतोनिष्पापइतिश्रुतिपदार्थः वर्णाश्रमधर्मसंन्यासपूर्वकंषष्ठाध्यायेनोक्तेनयोगेनदेहादीनांधर्मांश्चत्यक्त्वानिर्विकल्पमात्मानंसाक्षात्कुर्वतोनकर्मलेपइत्यर्थः॥ ६६॥एवंश्लोकद्वयेनज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनामितिसांख्ययोगौद्विनीयाध्यायेदर्शितावुपसंहृत्यविद्यासंप्रदायविधिमाह इदमिति अतपस्कायतपआलोचनंतद्रहितायअयत्नशीलायेत्यर्थः अभक्तायश्रद्धाहीनाय अशुश्रूषवेगुरुसेवामकुर्वते मांपरमात्मानंयोभ्यसूयतिमदीयगुणासहिष्णुतयामयिदोषारोपपरोभवतितस्मै नजःप्रत्येकंसंबद्धत्वादेतेषांविशेषणानामन्यतमाभावेपिकदाचनमहत्यपिसंकटेइदंनवाच्यंनोपदेष्टव्यं अत्रविद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टेहमस्मि असूकायानृजवेऽयतायमामाब्रूयाअवीर्यवतीतथास्यां यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइतिश्रवणादसूयारहितायार्जवोपेतायाभ्यासशीलायगुरुपरमेश्वराराधनपरायचएतद्रहस्यंदेयंनान्यस्मैइत्यर्थः ॥ ६७ ॥

एवंसंप्रदायविधिमुक्त्वासंप्रदायकर्तुःफलमाह यइदमिति इदंपरमंगुह्यंयोभक्तिहीनोमानपूजार्थंसन्मद्भक्तेष्वभिधास्यतिसोपितएवपुण्यान्मयिपरमेश्वरेविदेकरसेपरांभक्तिमद्वैतलक्षणामुपासनांकृत्वातत्रादरंप्राप्यतामनुष्ठायचमामेवैष्यतिमुक्तिंप्राप्स्यतीत्यर्थः असंशयःसंशयोत्रनास्ति स्मर्यतेहिअजामिलादीनांभक्तिर्गंधहीनानामपिपुत्रसंकेतितेननारायणेतिनाम्नात्रैहवशादाह्वयतांतावन्मात्रतुष्टेनभगवतासद्गतिर्दत्ताकिमुवक्तव्योयोवाचाएतावच्छास्त्ररहस्यंप्रतिपादयतितस्यभक्तिलाभादिकमेणकृतकृत्यत्वंभविष्यतीति ॥ ६८ ॥ ननुअश्रद्धयाकृतंसर्वव्यर्थमितित्वयैवोक्तंकथमभक्तस्याप्येच्छास्त्राभिधानतोभक्त्यादिलाभःसंभवेदित्याशंक्याह नचेति तस्मादेतच्छास्त्रप्रवर्तकादन्योमनुष्येषुमेममप्रियकृत्तमोनचकश्चिदस्ति इयमेवममहतीवाचिकीभक्तिस्तांकृत्वासोपानारोहकमेणमेममप्रियतरोभविताभविष्यति अनिच्छयापिसंस्पृष्टोदहत्येवहिपावकइति नचभुविएतस्मादन्यत्परमार्थसाधनमस्तीतिभावः अक्षरार्थःस्पष्टः ॥ ६९ ॥ अध्यापकस्यफलमुक्त्वाऽध्येतुःफलमाह अध्येष्यतेचेति ज्ञानयज्ञेननिर्विकल्पसमाधिनाइष्टःपूजितःसृष्टिधर्ममेघनामापुष्कलपुण्यदृष्टिकरस्तद्वेदेत्यशास्त्रस्याध्ययनमपीत्यर्थः इतिमेममसर्वेश्वरस्यमतिः तेनात्रस्तुतिमात्रमेतदितिनमंतव्यंकिंतुभूतार्थवादएवायमितिभावः ॥ ७० ॥ प्रवक्तुरध्येतुश्चफलमुक्त्वाश्रोतुरपिफलमाह श्रद्धावानिति शृणुयादपिअक्षरश्रवणंकुर्यादपिकिमुवक्तव्यमादरेणार्थग्रहणंयःकुर्यात्सउक्तंफलंप्राप्नुयादिति स्पष्टार्थःश्लोकः तथाचोक्तंश्रीभागवते वासुदेवकथाप्रश्नःपुरुषांस्त्रीन्पुनातिहि वक्तारंप्रच्छकंश्रोतॄंस्तत्पादसलिलंयथेति ॥ ७१ ॥ सर्वीतर्यामीसर्वज्ञोपिभगवाँल्लोकशिक्षार्थंशिष्यस्यज्ञानंजातंनवेतिपृच्छति अन्यथापुनःपुनःस्वयमेत्यउपदेशंकृतवताकृष्णेनाहंएवमयायंशतकृत्वोप्युपदेशेनकृतार्थःकर्तव्यइत्याशयेनाह कच्चिदिति कच्चिदितिकामप्रवेदने हेपार्थएतच्चयाएकाग्रेणचेतसाश्रोतव्यंशब्दतोर्थतश्चबोद्धव्यमितिममकामोस्तितत्तत्त्वांवृच्छामिकिमिदंवयाश्रुतमिति श्रुतवतोपितवअज्ञानकृतःसंमोहोविपर्ययःअनात्मन्यात्मधीरूपःस्वधर्मैर्युद्धेचाधर्मधीरूपइतिसतिद्विविधोपिनष्टःकच्चित् मच्छ्रमसाफल्यमिच्छुस्वामहंपृच्छामीत्यर्थः ॥ ७२ ॥ एवंपृष्टःस्वस्यकृतकृत्यतांज्ञापयन्नर्जुनउवाच नष्टोमोहइति मोहःपूर्वोक्तोद्विविधोपिनष्टः स्मृतिरयमहमस्मिपरंब्रह्मेत्यात्मानुसंधानरूपाआत्मतत्त्वविषयालब्धा यस्यालाभेनसर्वहृदयग्रंथीनांग्रंथावान्यश्चास्मितत्त्वतइत्यग्रेदाढ्यतानांचिज्जडैक्यंधर्मप्रभवानांविमोक्षोभवति तथाचश्रूयते स्मृतिलंभेसर्वग्रंथीनांविमोक्षइति त्वत्प्रसादान्मयाच्युतस्मृतिर्लब्धेतिसंबंधः स्थितोस्मि त्वच्छासनेइतिशेषः गतसंदेहोनष्टसंदेहइत्यनेनानात्मन्यात्मधीरूपोमोहोनष्टइतिदर्शितं करिष्येवचनंतवेत्यनेनस्वधर्मैर्युद्धेचाधर्मधीरूपोपिमोहोनष्टइतिदर्शितं ॥ ७३ ॥

समाप्तःशास्त्रार्थः इदानींकथाप्रबंधमेवानुवर्तयन्संजयउवाच इतीति अद्भुतंचेतसोविस्मयकरं रोमहर्षणंरोमांचोद्भेदजनकं शेषंस्पष्टं ॥ ७४ ॥ कथमयंतयादूरस्थयोरपिव्यासदेवार्जुनयोःसंवादःश्रुतइत्यतआह व्यासप्रसादादिति भगवताव्यासेनदिव्यंचक्षुःश्रोत्रादिकंमत्संदत्तंयेनाहंव्यवहितंविप्रकृष्टंवासर्वंकरतलामलकवद्विजानामि अतोव्यासप्रसादादेतच्छास्त्रंपरंगुह्यंगोप्यंअहंश्रुतवान् योगंचपश्यमेयोगमैश्वरमितिप्रतिज्ञापूर्वंकंप्रदर्शितंवैश्वरूप्यं तमपिदृष्टवानितिशेषः स्वयंकथयतइत्युक्तेअस्यमहतोभूतस्यनिःश्वसितमेतद्यद्ऋग्वेदइतिश्रुतेःस्वनिःश्वसितंवेदंशिष्याचार्यपरंपरयाकथयतइत्यायाति तदर्थं साक्षात्कथयतइति स्पष्ट्यादौब्रह्मणांप्रतीवेदानीमर्जुनंप्रतिसाक्षात्कथयतःश्रुतवानहमित्यर्थः तेनभगवद्वपुषहपात्रतयाब्रह्मणासमत्वंस्वस्यद्योत्यते अत्रएतद्योगमित्यभेदेनान्वयेतुगुह्यपदापेक्षयाएतद्योगमितिपुन्नपुंसकलिंगयोरपिसामानाधिकरण्यंशक्यंचयत्किंचिदश्रुतमपिश्रुतुपहंतुमित्यादाविवपूर्वप्रदत्तलिंगसंस्कारप्राबल्यादुत्तरत्रभिन्नलिंगविशेष्यलाभेपिपूर्वसंस्कारोननिवर्ततइतिसामानाधिकरण्यंविलिंगयोरपिवक्तुंशक्यमितिज्ञेयं ॥७५॥ केशवार्जुनसंवादश्रवणजंविश्वरूपाख्ययोगदर्शनजंचाद्भांदकमेणश्लोकद्वयेनाह राजन्निति हेराजन्हेधृतराष्ट्र पुण्यंपुण्यकरंपापहरंचेत्यर्थात् संस्मृत्यसंस्मृत्येति संभ्रमेद्विरुक्तिः शेषंस्पष्टार्थं ॥ ७६ ॥ तच्चेति रूपंविश्वरूपं एतद्दर्शनेहिब्रह्माणमीशमितिदेशतोविप्रकृष्टंवक्ष्याणित्वरमाणाविशंतीतिकालतोव्यवहितंभीष्मादिक्षयंचकरतलामलकवद्दृष्टवान् तच्चजग

संजयउवाच॥ ॥इत्यहंवासुदेवस्यपार्थस्यचमहात्मनः॥ संवादमिममश्रौषमद्भुतंरोमहर्षणम्॥ ७४॥ व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहंपरम्॥ योगंयोगेश्वरात्कृष्णात्साक्षात्कथयतःस्वयम्॥ ७५॥ राजन्संस्मृत्यसंस्मृत्यसंवादमिममद्भुतम्॥ केशवार्जुनयोःपुण्यंहृष्यामिचमुहुर्मुहुः॥ ७६॥ तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेः॥ विस्मयोमेमहान्राजन्हृष्यामिचपुनःपुनः॥ ७७॥ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः॥ तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम॥ ७८॥ ॥इ० भी०भग०सू०ब्र०श्रीकृष्णार्जुनसंवादेसंन्यासयोगोनामअष्टादशोऽध्यायः॥ १८॥ पर्वणितुद्विचत्वारिंशोऽध्यायः॥ ४२॥ ॥समाप्तंभगवद्गीतापर्व॥ ६॥

तोमिथ्यात्वमंतरेणनसंभवतीतिप्रतिपादितंवेदांतकतके अतीतानागतंवस्तुवीक्ष्यतेकरबिल्ववत् योगीसंकल्पमात्रोत्थमितिशास्त्रेषुदिंडिमः १ मायायांसर्वदासर्वैसर्वावस्थमिदंजगत् अस्तीतितदुपाधिश्चित्सार्वात्म्यात्सर्वमीक्षते २ आरंभपरिणामाभ्यांस्वेनरूपेणयत्नसत् अतीतानागतंवस्तुयोगीतद्वीक्षतांकथं ३ संकल्पमात्रभावंवस्त्वतीतादियदीष्यते नष्टस्त्रीदर्शनाभंतत्स्याद्योगिज्ञानमप्रमा ४ योगिसंकल्पमात्रेणतस्योत्पत्तिर्यदीष्यते ईशसंकल्पमात्रेणसर्वोत्पत्तिस्तदेष्यतां ५ आरंभेपरिणामेवादेशकालाद्यतिक्रमः नैवदृष्टःक्वचित्तोयंस्वप्नमायादिषुस्फुटः ६ युगपद्भूम्नेकुंजोनानादेशस्थयोगिभिः जलसूर्यइवास्माभिस्तेनासौकल्पितःस्फुटं ७ योगिभिर्गृह्यमाणत्वाद्दृढःसर्वत्रसर्वदा सन्नेवास्तीतिचेत्कार्यैकथमीदृग्विधंभवेत् ८ व्याहतंहीष्यतेकार्ययुगपद्भिन्नदेशता चेत्कल्पनांविनास्यिष्टादृष्टांतस्तत्रनास्तिवः ९ तस्मान्नाणुभिरारब्धभित्तिवन्नापिगव्यवत् प्रकृतेःपरिणामोवाजगत्किंत्विंद्रजालवत् १० सत्यंबद्धदृशामिंद्रजालंविश्वंपरागृदृशां अधिष्ठानादृतेशुद्धदृशांनास्त्येवतद्भ्रयमिति ११ स्पष्टार्थोमूलश्लोकः ॥ ७७ ॥ यस्मादनंतैश्वर्योभगवांस्तदनुगृहीतोर्जुनश्चयुधिष्ठिरपक्षेस्तिअतस्त्वयाजयाशानकार्येत्याह यत्रेति यत्रपक्षे ध्रुवेतिसर्वत्रसंबध्यते श्रीर्दिव्यसभादिशोभा विजयःप्रसिद्धः भूतिरैश्वर्यसर्वनियंतृत्वं नीतिर्नयश्च एतत्सर्वंतत्रतस्मिन्पक्षेध्रुवमितिममममतिःअतःपांडवैःसहसंधिरेवकर्तव्यइतिभावः ॥ ७८ ॥ ॥ इतिश्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोःश्रीनीलकंठसूरिवर्यस्यकृतौभारतभावदीपेभीष्मपर्वणिगीतार्थप्रकाशेअष्टादशोऽध्यायः ॥ १८ ॥ ॥ प० ॥ ४२ ॥

॥ ९७ ॥

गीतासुगीताकर्तव्याइत्यादयःसार्धाःपंचश्लोकागौडैर्नपठ्यंते ॥ १ ॥ २ ॥ ३॥ ४॥५॥ एवंगीतातेमन्मनाभवेत्यादिनानिष्कामानामात्मनिष्ठानामेवैष्यसीत्यात्मप्राप्तिश्चतत्फलभूतादर्शिता सकामानांत्वर्थाधीनाकामसिद्धिः अर्थश्चसतामपिपांडवानामिवगुरुवधानृताद्याश्रयेणैवसिद्धाति सोपिबलवदनुपहात् अन्येषांतुकौरवाणामिवसाध्यमानोनिरन्वयोच्छेदायभवतीतिदर्शयिष्यन्युद्धप्रधानंग्रंथंसौषुमप

अथभीष्मवधपर्व॥ ॥वैशंपायनउवाच॥ ॥गीतासुगीताकर्तव्याकिमन्यैःशास्त्रसंग्रहैः॥ यास्वयंपद्मनाभस्यमुखपद्माद्विनिःसृता॥ १॥ सर्वशास्त्रमयीगीतासर्वदेवमयोहरिः॥ सर्वतीर्थमयीगंगासर्ववेदमयोमनुः॥ २॥ गीतागंगाचगायत्रीगोविंदेतिहृदिस्थिते॥ चतुर्णकारसंयुक्तेपुनर्जन्मनविद्यते॥ ३॥ षट्शतानिसविंशानिश्लोकानांप्राहकेशवः॥ अर्जुनःसप्तपंचाशत्सप्तषष्टिंतुसंजयः॥ ४॥ धृतराष्ट्रःश्लोकमेकंगीतायामानमुच्यते॥ भारतांतंसर्वस्वगीतायाम थितस्यच॥ सारमुद्धृत्यकृष्णेनअर्जुनस्यमुखेद्रुतम्॥ ५॥ ॥संजयउवाच ॥ततोधनंजयंदृष्ट्वाबाणगांडीवधारिणं॥ पुनरेवमहानादंव्यसृजंतमहारथाः॥ ६॥ पांडवाःसोमकाश्चैवयेचैषामनुयायिनः॥ दध्मुश्चमुदिताःशंखान्वीराःसागरसंभवान्॥ ७॥ ततोभेर्यश्चपेश्यश्चक्रकचागोविषाणिकाः॥ सहसैवाभ्यहन्यंत ततःशब्दोमहानभूत्॥ ८॥ तथादेवाःसगंधर्वाःपितरश्चजनाधिप॥ सिद्धचारणसंघाश्चसमीयुस्तेदिदृक्षया॥ ९॥ ऋषयश्चमहाभागाःपुरस्कृत्यशतक्रतुम्॥ समीयुस्तत्रसहिताद्रष्टुंतद्वैशसंमहत्॥ १०॥ ततोयुधिष्ठिरोदृष्ट्वायुद्धायसमवस्थिते॥ तेसेनेसागरप्रख्येमुहुःप्रचलितेनृप॥ ११॥ विमुच्यकवचंवीरोनिक्षिप्य चवरायुधम्॥ अवरुह्यरथात्क्षिप्रंपद्भ्यामेवकृतांजलिः॥ १२॥ पितामहमभिप्रेक्ष्यधर्मराजोयुधिष्ठिरः॥ वाग्यतःप्रययौयेनप्राङ्मुखोरिपुवाहिनीम्॥ १३॥ तंप्रयांतमभिप्रेक्ष्यकुंतीपुत्रोधनंजयः॥ अवतीर्यरथात्तूर्णंभ्रातृभिःसहितोऽन्वयात्॥ १४॥ वासुदेवश्चभगवान्पृष्ठतोऽनुजगामतम्॥ तथामुख्याश्चराजानस्त्वित्ताजग्मुरुत्सुकाः॥ १५॥ ॥अर्जुनउवाच॥ ॥कितेव्यवसितंराजन्यदस्मानपहायवै॥ पद्भ्यामेवप्रयातोसिप्राङ्मुखोरिपुवाहिनीम्॥ १६॥ ॥भीमसेनउवाच॥ क्वगमिष्यसिराजेंद्रनिक्षिप्तकवचायुद्धः॥ दंशितेष्वरिसैन्येषुभ्रातॄनुत्सृज्यपार्थिव॥ १७॥

र्वांतमारभतेऽर्थस्यावर्थहेतुत्वंविवरीतुं ततोधनंजयंदृष्ट्वेति ततःअर्जुनस्यकरिष्येवचनंतवेत्येवंरूपप्रतिज्ञानंतरंधनंजययुद्धार्थंसन्नद्धंदृष्ट्वेत्यर्थः॥ ६ ॥ ७ ॥ भेर्योबृहत्योढक्काः पेश्यःकाहलाः ककचाजयमंगलाः गोविषाणिकागवादिशृंगाणि सहसायुगपदेवअभ्यहन्यंतअवाद्यंत ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ वरायुधंधनुःश्रेष्ठं अवरुह्यअवतीर्य ॥ १२ ॥ येनविजयाख्येनप्रयोजनेन स्वयंयुधिष्ठिरःसंग्रामेदृढबुद्धिस्तत्सिद्ध्यर्थंअभिप्रेक्ष्यआलोच्यप्रथमंपितामहंप्रतिप्रययौ रिपुवाहिनींप्रविश्येतिशेषः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

नकुलउवाच ॥ एवंगतेत्वयिज्येष्ठेममभ्रातरिभारत ॥ भीर्मेदुनोतिहृदयंब्रूहिगंताभवान्कुरु ॥ १८ ॥ ॥सहदेवउवाच ॥ अस्मिन्रणसमूहेवैवर्त्तमानेमहाभये॥ उत्सृज्यकुरुगंतासिशत्रूनभिमुखोनृप॥ १९॥ ॥संजयउवाच॥ ॥ एवमाभाष्यमाणोपिभ्रातृभिःकुरुनंदनः॥ नोवाचवाग्यतःकिंचिद्गच्छत्येवयुधिष्ठिरः॥ २० ॥ तानुवाचमहाप्राज्ञोवासुदेवोमहामनाः॥ अभिप्रायोस्यविज्ञातोमयेतिप्रहसन्निव ॥ २१ ॥ एषभीष्मंतथाद्रोणंगौतमंशल्यमेवच ॥ अनुमान्यगुरून्सर्वान्योत्स्यतेपार्थिवोरिभिः ॥ २२ ॥ श्रूयतेहिपुराकल्पेगुरूननुमान्ययः ॥ युध्यतेसभवेद्युक्तमपध्यातोमहत्तरैः ॥ २३॥ अनुमान्ययथाशास्त्रंयस्तुयुध्येन्महत्तरैः॥ ध्रुवस्तस्यजयोयुद्धेभवेदितिमतिर्मम॥ २४॥एवंब्रुवतिकृष्णेत्रधार्त्तराष्ट्रचमूंप्रति॥ हाहाकारोमहानासीन्निःशब्दास्त्वपरेऽभवन्॥ २५॥दृष्ट्वायुधिष्ठिरंदूराद्धार्त्तराष्ट्रस्यसैनिकाः॥ मिथःसंकथयांचक्रुरेषोहिकुलपांसनः ॥ २६ ॥ व्यक्तंभीतइवाभ्येतिराजासौभीष्ममंतिकम् ॥ युधिष्ठिरःससोदर्यःशरण्यंप्रयाचकः ॥ २७॥धनंजयेकथंनाथेपांडवेचवृकोदरे॥नकुलेसहदेवेचभीतिरभ्येतिपांडवम्॥२८॥ननूनंक्षत्रियकुलेजातःसंप्रथितेभुवि॥ यथास्यहृदयंभीतमल्पसत्त्वस्यसंयुगे ॥ २९॥ततस्तेसैनिकाःसर्वेप्रशंसंतिस्मकौरवान्॥ हृष्टाःसुमनसोभूत्वाचेलानिदुधुवुश्चह॥ ३० ॥व्यनिंदंश्चतथासर्वेयोधास्तवविशांपते॥ युधिष्ठिरंससोदर्यंसहितंकेशवेनहि॥ ३१ ॥ततस्तत्कौरवंसैन्यंधिक्कृत्वातुयुधिष्ठिरम्॥ निःशब्दमभवत्तूर्णंपुनरेवविशांपते॥३२॥किंनुवक्ष्यतिराजासौकिंभीष्मःप्रतिवक्ष्यति ॥ किंभीमःसमरश्लाघीकिंनुरुष्णार्जुनाविति ॥ ३३ ॥ विवक्षितंकिमस्येतिसंशयःसुमहानभूत् ॥ उभयोःसेनयोराजन्युधिष्ठिरकृतेतदा ॥ ३४॥सोवगात्यचमूंशत्रोःशरशक्तिसमाकुलाम्॥ भीष्ममेवाभ्ययात्तूर्णंभ्रातृभिःपरिवारितः॥ ३५॥तमुवाचततःपादौकराभ्यांपीड्यपांडवः॥ भीष्मंशांतनवंराजायुद्धायसमुपस्थितम्॥३६॥ ॥युधिष्ठिरउवाच॥ ॥आमंत्रयेत्वांदुर्धर्षत्वयायोत्स्यामहेसह॥ अनुजानीहिमांतातआशिषश्चप्रयोजय॥ ३७॥ ॥भीष्मउवाच॥ ॥ यद्येवंनाभिगच्छेथायुधिमांपृथिवीपते॥ शपेयंत्वांमहाराजपराभावायभारत॥ ३८॥ ॥ ९८॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ धिक्कृत्वाधिक्कृत्य असमासआर्षः धिगित्यकरोदितिवा ॥ ३२ ॥ विवक्षितंवक्तुमिष्टं ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ पराभावायपराकृतोनिरस्तोभावःसत्तायत्रसःतस्मैमरणायेत्यर्थः परश्वासावभावश्चेतिविग्रहेपिसएवार्थः ॥ ३८ ॥

॥ ३९ ॥ एवंगतेईदृगाचरणवतित्वयि ॥ ४० ॥ ४१ ॥ क्लीववत्स्योक्तस्यवरस्ययुद्धादन्यदितिस्वैवसंकोचनात्कातरवत् भृतःपोषितः युद्धात्यातिभत्र्यात् ॥ ४२ ॥ ४३ ॥ साम्नासाहाय्यं ॥ ४४ ॥ श्रेयः

प्रीतोहंपुत्रयुध्यस्वजयमाप्नुहिपांडव ॥ यत्तेभिलषितंचान्यत्तदवाप्नुहिसंयुगे ॥ ३९ ॥ ब्रियतांचवरःपार्थकिमस्मत्तोऽभिकांक्षसि॥ एवंगतेमहाराजनतवास्तिपराजयः ॥ ४० ॥ अर्थस्यपुरुषोदासोदासस्त्वर्थोनकस्यचित्॥ इतिसत्यंमहाराजबद्धोस्म्यर्थेनकौरवैः ॥ ४१ ॥ अतस्त्वांक्लीबवद्वाक्यंब्रवीमिकुरुनंदन॥ भृतोऽस्म्यर्थेनकौरव्ययुद्धादन्यत्किमिच्छसि ॥ ४२ ॥ ॥युधिष्ठिरउवाच॥ ॥मंत्रयस्वमहाबाहोहितैषीममनित्यशः॥ युध्यस्वकौरवस्यार्थेममैषसततंवरः ॥ ४३ ॥ ॥भीष्मउवाच॥ ॥राजन्किमत्रसात्यंतेकरोमिकुरुनंदन॥ कामंयोत्स्येपरस्यार्थेब्रूहियत्तेविवक्षितम्॥ ४४॥ ॥युधिष्ठिरउवाच॥ ॥कथंजयेयंसंग्रामेभवंतमपराजितम्॥ एतन्मेमंत्रयहितंयदिश्रेयःप्रपश्यसि॥४५॥ ॥ भीष्मउवाच॥ ॥नैनंपश्यामिकौंतेययोमांयुध्यंतमाहवे ॥ विजयेतपुमान्कश्चित्साक्षादपिशतक्रतुः॥ ४६ ॥ ॥युधिष्ठिरउवाच॥ ॥हंतपृच्छामितस्मात्त्वांपितामहनमोस्तुते॥ वधोपायंब्रवीहित्वमात्मनःसमरेपरैः॥ ४७॥ ॥भीष्मउवाच॥ नस्मतंतातपश्यामिसमरेयोजयेतमाम्॥ नतावन्मृत्युकालोपिपुनरागमनंकुरु॥४८॥ ॥संजयउवाच॥ ॥ततोयुधिष्ठिरोवाक्यंभीष्मस्यकुरुनंदन॥ शिरसाप्रतिजग्राहभूयस्तमभिवाद्यच॥ ४९॥प्रायात्पुनर्महाबाहुराचार्यस्यरथंप्रति॥ पश्यतांसर्वसैन्यानांमध्येनभ्रातृभिःसह॥ ५०॥सद्रोणमभिवाद्याथकृत्वाचाभिप्रदक्षिणम्॥ उवाचराजादुर्धर्षमात्मनिःश्रेयसंवचः॥५१॥आमंत्रयेत्वांभगवन्योत्स्येविगतकल्मषः॥ कथंजयेरिपून्सर्वाननुज्ञातस्त्वयाद्विज॥ ५२॥ ॥द्रोणउवाच॥ ॥यदिमांनाभिगच्छेथायुद्धायकृतनिश्चयः॥ शपेयंत्वांमहाराजपराभावायसर्वशः॥ ५३॥तयुधिष्ठिरतुष्टोस्मिपूजितश्चत्वयानघ॥ अनुजानामियुध्यस्वविजयंसमवाप्नुहि॥ ५४॥ करवाणिचतेकामंब्रूहित्वमभिकांक्षितम्॥ एवंगतेमहाराजयुद्धादन्यत्किमिच्छसि॥ ५५॥ अर्थस्यपुरुषोदासोदासस्त्वर्थोनकस्यचित्॥ इतिसत्यंमहाराजबद्धोस्म्यर्थेनकौरवैः॥ ५६॥ ब्रवीम्येतत्क्लीबवत्त्वांयुद्धादन्यत्किमिच्छसि॥ योत्स्येहंकौरवस्यार्थेतवाशास्योजयोमया ॥ ५७ ॥ ॥युधिष्ठिरउवाच॥ ॥जयमाशास्यमेब्रह्मन्मंत्रयस्वचमद्धितम्॥ युध्यस्वकौरवस्यार्थेवरएषवृतोमया॥ ५८॥

पपश्यसियदिवक्तुंयोग्यमितिमन्यसेतर्हिवदेत्यर्थः ॥ ४५ ॥ ४६ ॥ ४७ ॥ तावत्संप्रति ॥ ४८ ॥ ४९ ॥ ५० ॥ आत्मनिःश्रेयसंस्वहितसाधनं ॥ ५१ ॥ अहंरिपून्कथंजयेतर्हिवंविगतकल्मषःसन्कथयेतिशेषः ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

ध्रुवोवश्यंभावी अभिजानामिअनुजानामि विमोक्ष्यसेशत्रून्जीवितादितिशेषः ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥हंतविषादे ॥ ६३ ॥ ६४ ॥ प्रायगतंमरणायनियतं अचेतनंयोगबलेनत्यक्तदेहं योधानांम

॥ ॥ द्रोणउवाच ॥ ध्रुवस्तेविजयोराजन्यस्यमंत्रीहरिस्तव ॥ अहंत्वामभिजानामिरणेशत्रून्विमोक्ष्यसे ॥ ५९ ॥ यतोधर्मस्ततःकृष्णोयतःकृष्णस्ततोजयः॥
युध्यस्वगच्छकौंतेयपृच्छमांकिंब्रवीमिते॥६०॥ ॥युधिष्ठिरउवाच॥ ॥पृच्छामित्वांद्विजश्रेष्ठशृणुयन्मेऽभिकांक्षितम्॥कथंजयेयंसंग्रामेभवंतमपराजितम्
॥ ६१ ॥ ॥ द्रोणउवाच ॥ ॥ नतेऽस्तिविजयस्तावद्यावद्युद्ध्यान्यहंरणे॥ममाशुनिधनेराजन्यतस्वसहसोदरैः॥ ६२ ॥ ॥युधिष्ठिरउवाच॥ ॥हंततस्मान्महा
बाहोवधोपायंवदात्मनः॥ आचार्यप्रणिपत्यैषपृच्छामित्वांनमोस्तुते॥ ६३॥ ॥ द्रोणउवाच॥ ॥नशक्नुंतातपश्यामियोमांहन्याद्रणेस्थितम्॥ युध्यमानंसुसंर
ब्धंशरवर्षौघवर्षिणम्॥६४॥ ऋतेप्रायगतंराजन्यस्तशस्त्रमचेतनम्॥ हन्यान्मांयुधियोधानांसत्यमेतद्ब्रवीमिते॥६५॥शस्त्रंचाहरणेजत्यांश्रुत्वातुमहदप्रियम्॥
श्रद्धेयवाक्यात्पुरुषादेतत्सत्यंब्रवीमिते ॥ ६६ ॥ ॥ संजयउवाच॥ एतच्छ्रुत्वामहाराजभारद्वाजस्यधीमतः॥ अनुमान्यतमाचार्यंप्रायाच्छारद्वतंप्रति ॥ ६७ ॥
सोऽभिवाद्यकृपंराजाकृत्वाचापिप्रदक्षिणम्॥ उवाचदुर्धर्षतमंवाक्यंवाक्यविदांवरः॥६८॥ अनुमानयेत्वांयोत्स्येहंगुरोविगतकल्मषः॥ जयेयंचरिपून्सर्वान
नुज्ञातस्त्वयानघ॥ ६९ ॥ ॥कृपउवाच ॥ ॥यदिमांनाभिगच्छेयायुद्धायकृतनिश्चयः ॥शपेयंत्वांमहाराजपराभावायसर्वशः ॥ ७० ॥ अर्थस्यपुरुषोदासो
दासस्त्वर्थोनकस्यचित्॥ इतिसत्यंमहाराजबद्धोस्म्यर्थेनकौरवैः॥ ७१ ॥तेषामर्थेमहाराजयोद्धव्यमितिमेमतिः॥ अतस्त्वांक्लीववद्दूयांयुद्धादन्यत्किमिच्छसि
॥ ७२ ॥ ॥ युधिष्ठिरउवाच ॥ ॥हंतपृच्छामितेतस्मादाचार्यशृणुमेवचः॥ इत्युक्त्वाव्यथितोराजानोवाचगतचेतनः॥७३॥ ॥संजयउवाच ॥ ॥तंगौतमःप्र
त्युवाचविज्ञायास्यविवक्षितम्॥अवध्योहंमहीपालयुध्यस्वजयमाप्नुहि॥७४॥प्रीतस्तेऽभिगमेनाहंजयंतवनराधिप॥ आशासिष्येसदोत्थायसत्यमेतद्ब्रवीमिते
॥७५॥एतच्छ्रुत्वामहाराजगौतमस्यविशांपते॥ अनुमान्यकृपंराजाप्रययौयेनमद्रराट्॥७६॥सशल्यमभिवाद्याथकृत्वाचाभिप्रदक्षिणम्॥ उवाचराजादुर्धर्ष
मात्मनिःश्रेयसंवचः॥७७॥अनुमानयेत्वांदुर्धर्षयोत्स्येविगतकल्मषः॥जयेयंनृपरान्राजन्ननुज्ञातस्त्वयारिपून्॥७८॥ ॥शल्यउवाच॥ ॥यदिमांनाधिगच्छे
थायुद्धायकृतनिश्चयः॥शपेयंत्वांमहाराजपराभावायवैरणे॥७९॥तुष्टोस्मिपूजितश्चास्मियत्कांक्षसितदस्तुते॥अनुजानामिचैवत्वांयुध्यस्वजयमाप्नुहि॥८०॥

ध्येकश्चिदितिशेषः॥ ६५॥ जह्यात्यजेयं श्रद्धेयवाक्यात्आदेयवचनात्॥ ६६ ॥ ६७ ॥६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥७३॥ ७४ ॥ ७५॥ ७६ ॥ ७७ ॥ परान्प्रकृष्टान्॥ ७८ ॥ ७९ ॥ ८० ॥

॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥९३ ॥ ९४ ॥ इदंवक्ष्यमाणवचनंयुधिष्ठिरंप्रत्यब्रवीत् ॥ ९५ ॥ भवतःभवत्संबंधी मिषतइतिपाठेपश्यतस्तवेति

ब्रूहिचैवपरंवीरकेनार्थःकिंददामिते ॥ एवंगतेमहाराजयुद्धादन्यत्किमिच्छसि ॥ ८१ ॥ अर्थस्यपुरुषोदासोदासस्त्वर्थोनकस्यचित् ॥ इतिसत्यंमहाराजबद्धो
स्म्यर्थेनकौरवैः॥ ८२ ॥करिष्यामिहितेकामंभागिनेययथेप्सितम्॥ ब्रवीम्यतःक्लीववत्त्वांयुद्धादन्यत्किमिच्छसि॥८३॥ ॥युधिष्ठिरउवाच ॥ ॥मंत्रयस्वम
हाराजनित्यंमद्धितमुत्तमम्॥ कामंयुद्ध्यपरस्यार्थेवरमेतंवृणोम्यहम्॥८४॥ ॥शल्यउवाच॥ ॥किमत्रब्रूहिसात्यंतेकरोमिनृपसत्तम॥कामंयोत्स्येपरस्यार्थेब
द्धोस्म्यर्थेनकौरवैः॥ ८५ ॥ युधिष्ठिरउवाच ॥ सएवमेवरःशल्यउद्योगेयस्त्वयाकृतः ॥ सूतपुत्रस्यसंग्रामेकार्यस्तेजोवधस्त्वया ॥ ८६ ॥ ॥ शल्यउवाच॥
संपत्स्यत्येषतेकामःकुंतीपुत्रयथेप्सितम्॥गच्छयुध्यस्वविश्रब्धःप्रतिजानेवचस्तव॥८७॥ ॥संजयउवाच॥ ॥अनुमान्यायकौंतेयोमातुलंमद्रकेश्वरम्॥निर्ज
गाममहासैन्याद्वाद्यभिःपरिवारितः॥८८॥वासुदेवस्तुराधेयमाहवेभिजगामवै॥ ततएनमुवाचेदंपांडवार्थेगदाग्रजः॥८९॥श्रुतंमेकर्णभीष्मस्यद्वेषाल्किलन
योत्स्यसे॥ अस्मान्वरयराधेययावद्भीष्मोनहन्यते॥ ९०॥ हतेतुभीष्मेराधेययुनरेष्यसिसंयुगम्॥धार्तराष्ट्रस्यसाहाय्यंयदिपश्यसिचेत्समम्॥९१॥ ॥कर्णउवाच
नविप्रियंकरिष्यामिधार्तराष्ट्रस्यकेशव॥ त्यक्तप्राणंहिमांविद्धिदुर्योधनहितैषिणम्॥ ९२ ॥ ॥संजयउवाच॥ ॥तच्छ्रुत्वावचनंकृष्णःसंन्यवर्ततभारत॥युधि
ष्ठिरपुरोगैश्चपांडवैःसहसंगतः॥ ९३ ॥अथसैन्यस्यमध्येतुप्राक्रोशत्पांडवाग्रजः॥ योस्मान्वृणोतितमहंवरयेसात्यकारणात्॥ ९४ ॥अथतान्समभिप्रेक्ष्ययु
युत्सुरिदमब्रवीत्॥ प्रीतात्माधर्मराजानंकुंतीपुत्रंयुधिष्ठिरम्॥ ९५ ॥अहंयोत्स्यामिभवतःसंयुगेधृतराष्ट्रजान्॥ युष्मदर्थंमहाराजयदिमांवृणुषेऽनघ॥ ९६॥
॥युधिष्ठिरउवाच ॥ ॥ एत्वेहिसर्वेयोत्स्यामस्सवज्रातृनपंडितान्॥ युयुत्सोवासुदेवश्चवयंचब्रूमसर्वशः॥ ९७॥ वृणोमित्वांमहाबाहोयुद्ध्यस्वसमंमकारणा
त्॥त्वयिपिंडश्चतंतुश्चधृतराष्ट्रस्यदृश्यते॥ ९८॥भजस्वास्मान्राजपुत्रभजमानान्महाद्युते॥ नभविष्यतिदुर्बुद्धिर्धार्तराष्ट्रोऽत्यमर्षणः॥ ९९॥ ॥संजयउवाच
ततोयुयुत्सुःकौरव्यान्परित्यज्यसुतांस्तव॥ जगामपांडुपुत्राणांसेनांविश्राव्यदुंदुभिम्॥ १००॥ ततोयुधिष्ठिरोराजासंप्रहृष्टःसहानुजः॥ जग्राहकवचंभूयोदी
प्तिमत्कनकोज्ज्वलम्॥ १०१॥ प्रत्यपद्यंततेसर्वेस्वरथान्पुरुषर्षभाः॥ ततोव्यूहंयथापूर्वंप्रत्यव्यूहंततेपुनः॥ १०२॥

शेषः॥ ९६ ॥ ९७॥ तंतुःसंततिः पिंडः पितृपक्षः अन्येसर्वेमरिष्यंतीतिभावः ॥ ९८ ॥ भजस्वेति अभजमानःसर्वोपिधृतराष्ट्रपुत्रोनभविष्यति मरिष्यतीत्यर्थः ॥ ९९ ॥ १०० ॥ १०१ ॥ १०२ ॥

पुष्करान्दीर्घकाहलान् एकपुष्करानितिपाठेमुरजान् ॥ १०३ ॥ १०४॥ गौरवंमान्यत्वं ॥ १०५ ॥ सौहृदंमैत्रीं कृपांस्नेहं दयांपरदुःखप्रहाणेच्छां ॥१०६॥ कीर्तिमतांपांडवानांस्तुतिसंहितावाचइतिसंबंधः ॥ १०७ ॥ आर्याःकुलीनाः वृत्तंचरितं मदप्रमदपीडादेर्वाग्भंगंगद्गदंविदुः ॥ १०८ ॥ १०९ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥७॥ ॥७॥

अवादयन्दुंदुभींश्चशतशश्चैवपुष्करान् ॥ सिंहनादांश्चविविधान्विनेदुःपुरुषर्षभाः ॥ १०३ ॥ रथस्थान्पुरुषव्याघ्रान्पांडवान्प्रेक्ष्यपार्थिवाः ॥ धृष्टद्युम्नादयः सर्वेपुनर्जहृषिरेतदा ॥ १०४ ॥ गौरवंपांडुपुत्राणांमान्यान्मानयतांचतान्॥दृष्ट्वामहीक्षितस्तत्रपूजयांचक्रिरेभृशम् ॥ १०५ ॥ सौहृदंचकृपांचैवप्रापकालंमहात्मनां॥दयांचज्ञातिषुपरांकथयांचक्रिरेनृपाः ॥ १०६ ॥ साधुसाध्वितिसर्वत्रनिश्चेरुःस्तुतिसंहिताः॥ वाचःपुण्याःकीर्त्तिमतांमनोहृदयहर्षणाः ॥ १०७ ॥ म्लेच्छाश्चार्याश्चयेतत्रददृशुःशुश्रुवुस्तथा॥ वृत्तंतत्पांडुपुत्राणांरुरुदुस्तेसगद्गदाः ॥ १०८ ॥ ततोजघ्नुर्महाभेरीःशतशश्चसहस्रशः ॥ शंखांश्चगोक्षीरनिभान्दध्मुर्हृष्टामनस्विनः ॥ १०९ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०भीष्मादिसंमाननेत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥७॥ ॥७॥

॥ धृतराष्ट्रउवाच ॥ ॥ एवंव्यूढेष्वनीकेषुमामकेष्वितरेषुच ॥ केपूर्वप्राहरंस्तत्रकुरवःपांडवानुकिम् ॥ १ ॥ ॥ संजयउवाच ॥ ॥ भ्रातृभिःसहितोराजन्पुत्रो दुःशासनस्तव ॥ भीष्मंप्रमुखतःकृत्वाप्रययौसहसेनया ॥ २ ॥ तथैवपांडवाःसर्वेभीमसेनपुरोगमाः ॥ भीष्मेणयुद्धमिच्छंतःप्रययुर्हृष्टमानसाः ॥ ३ ॥ क्ष्वेडाःकिल किलाशब्दाःकचागोविषाणिकाः ॥ भेरीमृदंगमुरजाहयकुंजरनिःस्वनाः ॥ ४ ॥ उभयोःसेनयोर्त्यासंस्तत्रस्तेऽस्मान्समाद्रवन् ॥ वयंतान्प्रतिनर्दंतस्तदासीत्तुमुलंमहत् ॥ ५ ॥ महांत्यनीकानिमहासमुच्छ्रयेसमागमेपांडवधार्त्तराष्ट्रयोः ॥ चकंपिरेशंखमृदंगनिःस्वनैःप्रकंपितानीववनानिवायुना ॥ ६ ॥ नरेंद्रनागाश्वरथाकुलानामभ्यागतानामशिवेमुहूर्त्ते ॥ बभूवघोषस्तुमुलश्चमूनांवातोद्धुतानामिवसागराणाम् ॥ ७ ॥ तस्मिन्समुत्थितेशब्देतुमुलेलोमहर्षणे ॥ भीमसेनोमहाबाहुःप्राणदद्व्याघ्रपोयथा ॥ ८ ॥ शंखदुंदुभिनिर्घोषंवारणानांचबृंहितम् ॥ सिंहनादंचसैन्यानांभीमसेनरवोऽभ्यभूत् ॥ ९ ॥ हयानांहेषमाणानामनीकेषुसहस्रशः ॥ सर्वानभ्यभवच्छब्दान्भीमस्यनदतःस्वनः ॥ १० ॥ तंश्रुत्वाननदंतस्यसैन्यास्तवविताऽसुः ॥ जीमूतस्येवनदतःशक्राशनिसमस्वनम् ॥ ११ ॥

एवमिति एवंव्यूढेष्वित्यादेर्दृष्ट्वाभीष्मस्यविक्रममित्यंतस्यसर्वातिशायीभीष्मस्यपराक्रमइतितात्पर्यार्थः ॥ १ ॥ २ ॥ ३ ॥ क्ष्वेडाःसिंहनादाः मृदंगाःमर्दलाः मुरजाःक्षुद्रमर्दलाः ॥ ४ ॥ समाद्रवन्अन्योन्यंसंगताअभूवन् ॥ ५ ॥ महान्समुच्छ्रयःसंप्रहारोयत्र ॥ ६ ॥ ७ ॥ गोवृषोबलीवर्दश्रेष्ठः ॥ ८ ॥ अभ्यभूत्अभिभूतवान् ॥ ९ ॥ १० ॥ सैन्याःसेनामुख्याः ॥ ११ ॥

॥ १२ ॥ नादयन्नादंकुर्वन् ॥ १३ ॥ सोदर्याःराजानुजाः ॥ १४ ॥ १५ ॥ १६ ॥ निर्मुक्ताःमुक्तकंचुकाश्वाशीविषाउपमायेषांतान् ॥ १७ ॥ १८ ॥ १९॥ भीमाःभयंकराःज्यानांतलानांचनिःस्वनायेतैः ॥ २० ॥ लाघवंक्षिप्रहस्ततां निमित्तंलक्ष्यं ॥ २१ ॥ २२ ॥ भीमंभयंकरं ॥ २३ ॥ जातसंरंभाश्चिरसंभृतकोपाः कृतागसःकृतापराधाः भीमोपिबाल्येधार्तराष्ट्रान्मर्दयन्कृतापराधोस्तीत्युक्तंपरस्परेति

वाहनानिचसर्वाणिशंखदुन्मूत्रंप्रमुमुचुवुः॥ शब्देनतस्यवीरस्यसिंहस्येवेतरेमृगाः ॥ १२ ॥ दर्शयन्घोरमात्मानंमहाभ्रमिवनादयन् ॥ विभीषयंस्तवसुतान्भीमसेनःसमभ्ययात् ॥ १३ ॥ तमायांतंमहेष्वासंसोदर्याःपर्यवारयन् ॥ छादयंतःशरव्रातैर्मेघाइवदिवाकरम् ॥ १४ ॥ दुर्योधनश्चपुत्रस्तेदुर्मुखोदुःसहःशलः ॥ दुःशासनश्चातिरथस्तथादुर्मर्षणोनृपः ॥ १५ ॥ विविंशतिश्चित्रसेनोविकर्णश्चमहारथः ॥ पुरुमित्रोजयोभोजःसौमदत्तिश्चवीर्यवान् ॥ १६ ॥ महाचापानिधुन्वंतोमेघाइवसविद्युतः ॥ आददानाश्चनाराचान्निर्मुक्ताशीविषोपमान् ॥ १७ ॥ अथतेद्रौपदीपुत्राःसौभद्रश्चमहारथः ॥ नकुलःसहदेवश्चधृष्टद्युम्नश्चपार्षतः ॥ १८ ॥ धार्तराष्ट्रान्प्रतिययुर्दयंतःशितैःशरैः ॥ वज्रैरिवमहावेगैःशिखराणिधराभृताम् ॥ १९ ॥ तस्मिन्प्रथमसंग्रामेभीमज्यातलनिःस्वने ॥ तावकानांपरेषांचनासीत्कश्चित्पराङ्मुखः ॥ २० ॥ लाघवंद्रोणशिष्याणामपश्यंभरतर्षभ ॥ निमित्तवेधिनांचैवशरानुत्सृजतांभृशम् ॥ २१ ॥ नोपशाम्यतिनिर्घोषोधनुषांकूजतांतथा ॥ विनिश्चेरुःशरादीप्ताज्योतींषीवनभस्तलात् ॥ २२ ॥ सर्वेत्वन्येमहीपालाःप्रेक्षकाइवभारत ॥ ददृशुर्दर्शनीयंतंभीमंज्ञातिसमागमम् ॥ २३ ॥ ततस्तेजातसंरंभाःपरस्परकृतागसः ॥ अन्योन्यस्पर्धयाराजन्व्यायच्छंतमहारथाः ॥ २४ ॥ कुरुपांडवसेनेतेहस्त्यश्वरथसंकुले ॥ शुशुभातेरणेऽतीवपटेचित्रार्पितेइव ॥ २५ ॥ ततस्तेपार्थिवाःसर्वेप्रगृहीतशरासनाः ॥ सहसैन्याःसमापेतुःपुत्रस्यतवशासनात् ॥ २६ ॥ युधिष्ठिरेणचादिष्टाःपार्थिवास्तेसहस्रशः ॥ विनदंतःसमापेतुःपुत्रस्यतववाहिनीम् ॥ २७ ॥ उभयोःसेनयोस्तीव्रःसैन्यानांससमागमः ॥ अंतर्धीयतचादित्यःसैन्येनरजसावृतः ॥ २८ ॥ प्रयुद्धानांप्रभग्नानांपुनरावर्तिनामपि ॥ नात्रस्वेषांपरेषांवाविशेषःसमदृश्यत ॥ २९ ॥ तस्मिंस्तुतुमुलेयुद्धेवर्तमानेमहाभये ॥ अतिसर्वाण्यनीकानिपितातेऽभिव्यरोचत ॥ ३० ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणि. भीष्मवध०युद्धारंभेचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

व्यायच्छंतव्यायामंचक्रुः ॥ २४ ॥ पटेइतिसमम्यंतं ॥ २५ ॥ २६ ॥ २७ ॥ अंतर्धीयतअंतर्हितः अदृश्यावआर्षः सैन्येनसेनाभवेन ॥ २८ ॥ २९ ॥ अतिअतिक्रम्य ॥ ३० ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

पूर्वाह्णेइति तस्याह्नःपूर्वाह्णेपूर्वभागे ॥ १ ॥ संजयानांपांचालभेदानां ॥ २ ॥ तलंज्याघातवारणं ॥ ३ ॥ ४ ॥ तोत्रंगजदमनंवेणुकाख्यंवेणुबृन्नसमाकारं ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ रणमूर्धनिरणांगने ॥ ९ ॥ १० ॥ महेष्वासःमहानिष्वासोधनुर्यस्य ॥ ११ ॥ १२ ॥ आनर्च्छतुःपीडितवंतौ तक्षमाणौननुकुर्वाणौ ॥ १३ ॥ पुष्पैःशबलौविचित्रौ किंशुकौपलाशौ ॥ १४ ॥ १५ ॥ १६ ॥ शिताम्यांतीक्ष्णा

॥संजयउवाच॥ ॥पूर्वाह्णेतस्यरौद्रस्ययुद्धमह्नोविशांपते॥प्रावर्ततमहाघोरंराज्ञादेहावकर्तनम्॥१॥कुरूणांसृंजयानांचजिगीषूणांपरस्परम्॥सिंहानामिवसंह्रादोदिवमुर्वीचनादयन्॥ २॥ आसीत्किलकिलाशब्दस्तलशंखरवैःसह॥ जज्ञिरेसिंहनादाश्चशूराणांप्रतिगर्जताम्॥ ३॥तलत्राभिहताश्चैवन्याशब्दाभरतर्षभ॥ पत्तीनांपादशब्दश्चवाजिनांचमहास्वनः॥ ४॥ तोत्रांकुशनिपातश्चआयुधानांचनिःस्वनः॥ घंटाशब्दश्चनागानामन्योन्यमभिधावताम्॥५॥तस्मिन्समुदितेशब्देतुमुलेलोमहर्षणे॥ बभूवरथनिर्घोषःपर्जन्यनिनदोपमः॥ ६॥ तेमनःक्रूरमाधायसमभित्यक्तजीविताः॥ पांडवानभ्यवर्तंतसर्वएवोच्छ्रितध्वजाः॥ ७॥ अथशांतनवोराजन्नभ्यधावद्धनंजयम्॥ प्रगृह्यकार्मुकंघोरंकालदंडोपमंरणे॥८॥अर्जुनोपिधनुर्गृह्यगांडीवंलोकविश्रुतम्॥ अभ्यधावतसंजस्वीगांगेयंरणमूर्धनि॥ ९॥ तावुभौकुरुशार्दूलौपरस्परवधैषिणौ॥ गांगेयस्तुरणेपार्थंविद्धानाकंपयद्बली॥ १०॥ तथैवपांडवोराजन्भीष्मंनाकंपयद्युधि॥ सात्यकिस्तुमहेष्वासःकृतवर्माणमभ्ययात्॥ ११॥तयोःसमभवद्युद्धंतुमुलंलोमहर्षणम्॥सात्यकिःकृतवर्माणंकृतवर्माचसात्यकिम्॥१२॥ आनर्च्छतुःशरैर्घोरैस्तक्षमाणौपरस्परम्॥तौशराचितसर्वांगौशुशुभातेमहाबलौ॥ १३॥ वसंतेपुष्पशबलौपुष्पिताविवकिंशुकौ॥ अभिमन्युर्महेष्वासंबृहद्बलमयोधयत्॥ १४॥ ततःकोसलराजासावभिमन्योर्विशांपते॥ध्वजंचिच्छेदसमरेसारथिंचव्यपातयत्॥ १५॥ सौभद्रस्ततःक्रुद्धःपातितेरथसारथौ॥ बृहद्बलंमहाराजविव्याधनवभिःशरैः॥ १६॥अथापराभ्यांभल्लाभ्यांशिताभ्यामरिमर्दनः॥ध्वजमेकेनचिच्छेदपार्ष्णिमेकेनसारथिम्॥१७॥अन्योन्यंचशरैःक्रुद्धौतदक्षातेपरस्परम्॥मानिनंसमरेहंतंकृतवैरंमहारथम्॥ १८॥ भीमसेनस्तवसुतंदुर्योधनमयोधयत्॥ तावुभौनरशार्दूलौकुरुमुख्यौमहाबलौ॥१९॥अन्योन्यंशरवर्षाभ्यांववृषातेरणाजिरे॥ तौवीक्ष्यतुमहात्मानौकृतिनौचित्रयोधिनौ॥ २०॥ विस्मयःसर्वभूतानांसमपद्यतभारत॥ दुःशासनस्तुनकुलंप्रत्युद्यायमहाबलम्॥२१॥अविध्यन्निशितैर्बाणैर्बहुभिर्मर्मभेदिभिः॥ तस्यमाद्रीसुतःकेतुंसशरंचशरासनम्॥ २२॥ चिच्छेदनिशितैर्बाणैःप्रहसन्निवभारत॥ अथैनंपंचविंशत्याक्षुद्रकाणांसमार्पयत्॥२३॥

॥ १०१ ॥

भ्यांध्वजंचिच्छेदेत्यन्वयः ॥ एकेनपार्ष्णिपृष्ठगोपंएकेनसारथिमितिच ॥ १७ ॥ १८ ॥ १९ ॥ कृतिनौयुद्धकुशलौ ॥ २० ॥ २१ ॥ २२ ॥ क्षुद्रकाणां बाणविशेषाणां ॥ २३ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ परासुकरणंमारणसाधनं ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ रजसंसत्वरं ॥ ३५॥वीरःशंखः जत्रुदेशेअंससंधौ ॥ ३६ ॥ ३७ ॥ धृष्टकेतुःशिशुपालसुतः ॥ ३८ ॥ ३९ ॥ ४० ॥ समीयतुःअन्योन्यस्पर्धयासंमिलितौ ॥ ४१ ॥ ४२ ॥ ४३ ॥ सन्नतपर्वभिःअलक्षितपंथिभिः ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

पुत्रस्तुतवद्युर्धर्षोनकुलस्यमहाहवे॥ तुरंगांश्चिच्छिदेबाणैर्ध्वजंचैवाभ्यपातयत्॥२४॥ दुर्मुखःसहदेवंचप्रत्युद्यायमहाबलम्॥ विव्याधशरवर्षेणयतमानंमहाहवे॥ २५॥ सहदेवस्ततोवीरोदुर्मुखस्यमहारणे॥शरेणभृशतीक्ष्णेनपातयामाससारथिम्॥ २६॥तावन्योन्यंसमासाद्यसमरेयुद्धदुर्मदौ॥ त्रासयेतांशरैर्घोरैःकृतप्रतिकृतैषिणौ॥ २७॥ युधिष्ठिरःस्वयंराजामद्रराजानमभ्ययात्॥तस्यमद्राधिपश्चापंद्विधाचिच्छेदमारिष॥ २८॥तदपास्यधनुश्छिन्नंकुंतीपुत्रोयुधिष्ठिरः॥अन्यत्कार्मुकमादायवेगवद्बलवत्तरम्॥ २९॥ ततोमद्रेश्वरंराजाशरैःसन्नतपर्वभिः॥छादयामाससंक्रुद्धस्तिष्ठतिष्ठेतिचाब्रवीत्॥ ३०॥ धृष्टद्युम्नस्ततोद्रोणमभ्यद्रवतभारत॥ तस्यद्रोणःसुसंक्रुद्धःपरासुकरणंदृढम्॥३१॥ त्रिधाचिच्छेदसमरेपांचाल्यस्यतुकार्मुकम्॥ शरंचैवमहाघोरंकालदंडमिवापरम्॥३२॥प्रेषयामाससमरेसोस्यकायेन्यमज्जत॥ अथान्यद्धनुरादायसायकांश्चचतुर्दश॥३३॥ द्रोणंद्रुपदपुत्रस्तुप्रतिविव्याधसंयुगे॥ तावन्योन्यंसुसंक्रुद्धौचक्रतुःसुभृशंरणम्॥ ३४॥ सौमदत्तिंरणेशंखोरभसंरभसोयुधि॥ प्रत्युद्ययौमहाराजतिष्ठतिष्ठेतिचाब्रवीत्॥३५॥ तस्यवैदक्षिणंवीरोनिर्बिभेदरणेभुजम्॥ सौमदत्तिस्तथाशंखंजत्रुदेशेसमाहनत्॥ ३६॥ तयोस्तद्भवद्युद्धंघोररूपंविशांपते॥ दृमयोःसमरेपूर्वंत्रवासवयोरिव॥ ३७॥ बाह्लीकंतुरणेक्रुद्धंक्रुद्धरूपोविशांपते॥ अभ्यद्रवदमेयात्माधृष्टकेतुर्महारथः॥ ३८॥ बाह्लीकस्तुरणेराजन्धृष्टकेतुममर्षणः॥शरैर्बहुभिरानर्च्छत्सिंहनादमथानदत्॥ ३९॥ चेदिराजस्तुसंक्रुद्धोबाह्लीकंनवभिःशरैः॥ विव्याधसमरेतूर्णमत्तोमत्तमिवद्विपम्॥ ४०॥ तौतत्रसमरेक्रुद्धौनर्दंतौचपुनःपुनः॥ समीयतुःसुसंक्रुद्धावंगारकबुधाविव॥ ४१॥ राक्षसंरौद्रकर्माणंक्रूरकर्माघटोत्कचः॥ अलंबुषंप्रत्युदियाद्बलंशक्रइवाहवे॥ ४२॥ घटोत्कचस्ततःक्रुद्धोराक्षसंतंमहाबलम्॥ नवत्यासायकैस्तीक्ष्णैर्दारयामासभारत॥ ४३॥ अलंबुषस्तुसमरेभैमसेनिंमहाबलम्॥ बहुधादारयामासशरैःसन्नतपर्वभिः॥ ४४॥ व्यभ्राजेतांततस्तौतुसंयुगेशरविक्षतौ॥ यथादेवासुरेयुद्धेबलशकौमहाबलौ॥ ४५॥ शिखंडीसमरेराजन्द्रौणिमभ्युद्ययौबली॥ अश्वत्थामाततःक्रुद्धःशिखंडिनमुपस्थितम्॥ ४६॥ नाराचेनसुतीक्ष्णेनभृशंविद्धात्यकंपयत्॥ शिखंड्यपिततोराजन्द्रोणपुत्रमताडयत्॥ ४७॥

सुपीतेनसुष्ठुपायितेन तीक्ष्णेनसूक्ष्मधारेण यतोनिशितेनशाणोल्लीढेन मृधेसंयामे ॥ ४८ ॥ ४९ ॥ दृष्ट्याइवेत्यसंधिरार्षः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ तुभ्यंतव सुतसोमंमे

सायकेनसुपीतेनतीक्ष्णेननिशितेनच ॥ तौजघ्नतुस्तदान्योन्यंशरैर्बहुविधैर्मृधे ॥ ४८ ॥ भगदत्तंरणेशूरंविराटोवाहिनीपतिः ॥ अभ्ययात्त्वरितोराजंस्ततोयुद्धम
वर्तत ॥ ४९ ॥ विराटोभगदत्तंतुशरवर्षेणभारत ॥ अभ्यवर्षत्सुसंक्रुद्धोमेघोदृष्ट्याइवाचलम् ॥ ५० ॥ भगदत्तस्ततस्तूर्णंविराटंपृथिवीपतिम् ॥ छादयामाससमरेमे
घःसूर्यमिवोदितम् ॥ ५१ ॥ बृहत्क्षत्रंतुकैकेयंकृपःशारद्वतोयवौ ॥ तंकृपःशरवर्षेणच्छादयामासभारत ॥ ५२ ॥ गौतमंकैकयःक्रुद्धःशरदृष्ट्याभ्यपूरयत् ॥ तावन्यो
न्यंहयान्हत्वाधनुश्छित्वाचभारत ॥ ५३ ॥ विरथावसियुद्धायसमीयतुरमर्षणौ ॥ तयोस्तदभवद्युद्धंघोररूपंसुदारुणम् ॥ ५४ ॥ द्रुपदस्ततोराजन्सैंधवंवैजय
द्रथम् ॥ अभ्युद्ययौहृष्टरूपोहृष्टरूपंपरंतपः ॥ ५५ ॥ ततःसैंधवकोराजाद्रुपदंविशिखैस्त्रिभिः ॥ ताडयामाससमरेसचतंप्रत्यविध्यत ॥ ५६ ॥ तयोस्तदभवद्युद्धंघोर
रूपंसुदारुणम् ॥ ईक्षणप्रीतिजननंशुक्रांगारकयोरिव ॥ ५७ ॥ विकर्णस्तुसुतस्तुभ्यंसुतसोमंमहाबलम् ॥ अभ्ययाज्जवनैरश्वैस्ततोयुद्धमवर्तत ॥ ५८ ॥ विकर्णःसु
तसोमंतुविद्धानाकंपयच्छरैः ॥ सुतसोमोविकर्णंचतदद्भुतमिवाभवत् ॥ ५९ ॥ सुशर्माणंनरव्याघ्रश्चेकितानोमहारथः ॥ अभ्यद्रवत्सुसंक्रुद्धःपांडवार्थेपरा
क्रमी ॥ ६० ॥ सुशर्मातुमहाराजचेकितानंमहारथम् ॥ महताशरवर्षेणवारयामाससंयुगे ॥ ६१ ॥ चेकितानोपिसंरब्धःसुशर्माणंमहाहवे ॥ प्राच्छादयंस्तमिषु
भिर्महामेघइवाचलम् ॥ ६२ ॥ शकुनिःप्रतिविंध्यंतुपराक्रांतंपराक्रमी ॥ अभ्यद्रवतराजेंद्रमत्तःसिंहइवद्विपम् ॥ ६३ ॥ यौधिष्ठिरस्तुसंक्रुद्धःसौबलंनिशितैःशरैः ॥
व्यदारयतसंग्रामेमघवानिवदानवम् ॥ ६४ ॥ शकुनिःप्रतिविंध्यंतुप्रतिविध्यंतमाहवे ॥ व्यदारयन्महाप्राज्ञःशरैःसन्नतपर्वभिः ॥ ६५ ॥ सुदक्षिणंतुराजेंद्रकांबो
जानांमहारथम् ॥ श्रुतकर्मापराक्रांतमभ्यद्रवतसंयुगे ॥ ६६ ॥ सुदक्षिणस्तुसमरेसाहदेविंमहारथम् ॥ विद्धानाकंपयतवैमैनाकमिवपर्वतम् ॥ ६७ ॥ श्रुतक
र्मातःक्रुद्धःकांबोजानांमहारथम् ॥ शरैर्बहुभिरानर्च्छद्दारयन्निवसर्वशः ॥ ६८ ॥ इरावानथसंक्रुद्धःश्रुतायुषमरिंदमम् ॥ प्रत्युद्ययौरणेयत्तोयत्तरूपंपरंतपः
॥ ६९ ॥ आर्जुनिस्तस्यसमरेहयान्हत्वामहारथः ॥ ननादबलवान्नादंतत्सैन्यंप्रत्यपूरयत् ॥ ७० ॥ श्रुतायुस्तुततःक्रुद्धःफाल्गुनेःसमरेहयान् ॥ निजघानगदाग्रेण
ततोयुद्धमवर्तत ॥ ७१ ॥ विंदानुविंदावावंत्यौकुंतिभोजंमहारथम् ॥ ससेनंससुतंवीरंसंससज्जतुराहवे ॥ ७२ ॥

मर्सेनिं ॥ ५८ ॥ ५९ ॥ चेकितानोयादवः ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ इरावानर्जुनपुत्रः ॥ ६९ ॥ ७० ॥ गदाग्रेगगदामुखेन ॥ ७१ ॥ संससज्जतुःसंसक्तावभूतां ॥ ७२ ॥

तयोर्द्वंद्वयोः ॥ ७३ ॥ तेएवद्वंद्वेद्वाभ्यामाह अनुविंदइति ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ द्वंद्वंद्वयोर्द्वयोर्युद्धं ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ विपरीतंअतीतक्रमं ॥ ८६ ॥ ८७ ॥

तत्राद्भुतमपश्यामतयोर्घोरंपराक्रमम् ॥ अयुध्येतांस्थिरौभूत्वामहत्यासेनयासह ॥ ७३ ॥ अनुविंदस्तुगदयाकुंतिभोजमताडयत् ॥ कुंतिभोजश्चतंतूर्णंशरव्रातै
रवाकिरत् ॥ ७४ ॥ कुंतिभोजसुतश्चापिविंदंविव्याधसायकैः ॥ सचतंप्रतिविव्याधतदद्भुतमिवाभवत् ॥ ७५ ॥ केकयाभ्रातरःपंचगांधारान्पंचमारिष ॥ ससै
न्यान्लेससैन्यांश्चयोधयामासुराहवे ॥ ७६ ॥ वीरबाहुश्चतेपुत्रोवैरार्टिरथसत्तमम् ॥ उत्तरंयोधयामासविव्याधनिशितैःशरैः ॥ ७७ ॥ उत्तरश्चापितंवीरंविव्याध
निशितैःशरैः ॥ चेदिराट्समरेराजन्नुलूकंसमभिद्रवत् ॥ ७८ ॥ तथैवशरवर्षेणउलूकंसमविद्धत ॥ उलूकश्चापितंबाणैर्निशितैर्लोमवाहिभिः ॥ ७९ ॥ तयोर्युद्धं
समभवद्घोररूपंविशांपते ॥ दारयेतांसुसंक्रुद्धावन्योन्यमपराजितौ ॥ ८० ॥ एवंद्वंद्वसहस्राणिरथवारणवाजिनाम् ॥ पदातीनांचसमरेतवतेषांचसंकुले ॥ ८१ ॥
मुहूर्तमिवतद्युद्धमासीन्मधुरदर्शनम् ॥ ततउन्मत्तवद्राजन्प्राज्ञायतकिंचन ॥ ८२ ॥ गजोगजेनसमरेरथिनंचरथीययौ ॥ अश्वोश्वंसमभिप्रायात्पदातिश्चपदा
तिनम् ॥ ८३ ॥ ततोयुद्धंसुदुर्धर्षव्याकुलंसमपद्यत ॥ शूराणांसमरेतत्रसमासाद्येतरेतरम् ॥ ८४ ॥ तत्रदेवर्षयःसिद्धाश्चारणाश्चसमागताः ॥ प्रैक्षंततद्रणंघोरंदेवासु
रसमंभुवि ॥ ८५ ॥ ततोदंतिसहस्राणिरथानांचापिमारिष ॥ अश्वौघाःपुरुषौघाश्चविपरीतंसमाययुः ॥ ८६ ॥ तत्रतत्रप्रदृश्यंतेरथवारणपत्तयः ॥ सादिनश्चनर
व्याघ्रयुध्यमानामुहुर्मुहुः ॥ ८७ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव०द्वंद्वयुद्धेपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥
॥ संजयउवाच ॥ ॥ राजन्शतसहस्राणितत्रतत्रपदातिनाम् ॥ निर्मर्यादंप्रयुद्धानितत्तेवक्ष्यामिभारत ॥ १ ॥ नपुत्रःपितरंजज्ञेपितावापुत्रमौरसम् ॥ नभ्राताभ्रा
तरंतत्रस्वस्रीयंनचमातुलः ॥ २ ॥ नमातुलंचस्वस्रीयोनसखायंसखातथा ॥ आविष्टाइवयुध्यंतेपांडवाःकुरुभिःसह ॥ ३ ॥ रथानीकंनरव्याघ्राःकेचिदभ्यपतन्
रथैः ॥ अभज्यंतयुगैरेवयुगानिभरतर्षभ ॥ ४ ॥ रथेषाश्चरथेषाभिःकूबरारथकूबरैः ॥ संगतैःसहिताःकेचित्परस्परजिघांसवः ॥ ५ ॥

॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ ७ ॥ ॥ राजन्निति निर्मर्यादंअपेतव्यवहारं प्रयुद्धानियुद्धंकृतवंति ॥ १ ॥ जज्ञेज्ञातवान् तद्यत्काले स्वस्रीयोभ्रा
तृनेयः ॥ २ ॥ आविष्टाइवभूतादिनागृहीताइव ॥ ३ ॥ युगानिअश्वस्कंधापितानिदारूणि ॥ ४ ॥ रथेषारथदंडः कूबरोयुगकीलः संगतैःसंमुखागतैः सहितामिलिताः ॥ ५ ॥

संनिपत्यमिलित्वा प्रभिन्नाश्चोतन्मदाः ॥ ६ ॥ विषाणैर्दंतैः तोरणानिचतुस्तंभमंडपाकारस्यगजपल्याणस्यअंबारीतिभाषयाप्रसिद्धस्यद्वाराणिपताकाश्चतैर्वस्तंभशेखरस्थाः ॥ ७ ॥ ८ ॥ अभिनीताः सुशिक्षिताः अप्रभिन्नाःअनुद्भिन्नमदाः संमुखाभिमुखाःअन्योन्यसंमुखाइत्यर्थः ॥ ९ ॥ १० ॥ प्रणीताःप्रयुक्ताः ऋष्टयोहस्तक्षेप्याःक्षुद्रभल्लाः विंध्याटव्यांकर्काडीतिप्रसिद्धाः तोमराद्यर्धदंडाभल्लाः नाराचामहाशल्याविस्तीर्णफलकाःशराः ॥ ११ ॥ १२ ॥ परश्वधैःकुठारैः ॥ १३ ॥ भिंदिपालैःपरशवैः महाराष्ट्राणांगोफणइतिप्रसिद्धैः परिघैर्दंडैः निस्त्रिंशैःखड्गैः ॥ १४ ॥ द्रवमाणाधावंतः ॥ १५ ॥ १६ ॥

नशेकुश्चलितुंकेचित्सन्निपत्यरथारथैः ॥ प्रभिन्नास्तुमहाकायाःसन्निपत्यगजागजैः ॥ ६ ॥ बहुधादारयन्क्रुद्धाविषाणैरितरेतरम् ॥ सतोरणपताकैश्चवारणावरवारणैः ॥ ७ ॥ अभिसृत्यमहाराजवेगवद्भिर्महागजैः ॥ दंतैरभिहतास्तत्रचुक्रुशुःपरमातुराः ॥ ८ ॥ अभिनीताश्चशिक्षाभिस्तोत्रांकुशसमाहताः ॥ अप्रभिन्नाः प्रभिन्नानांसंमुखाभिमुखाययुः ॥ ९ ॥ प्रभिन्नैरपिसंसक्ताःकेचित्तत्रमहागजाः ॥ क्रौंचवन्निनदंकृत्वाद्रुद्रुवुःसर्वतोदिशम् ॥ १० ॥ सम्यक्प्रणीतानागाश्चप्रभिन्नकरटामुखाः ॥ ऋष्टितोमरनाराचैर्निर्विद्धावरवारणाः ॥ ११ ॥ प्रणेदुर्भिन्नमर्माणोनिपेतुश्चगतासवः ॥ प्राद्रवंतदिशःकेचिन्नदंतोभैरवान्रवान् ॥ १२ ॥ गजानांपादरक्षास्तुव्यूढोरस्काःप्रहारिणः ॥ ऋष्टिभिश्चधनुर्भिश्चविमलैश्चपरश्वधैः ॥ १३ ॥ गदाभिर्मुसलैश्चैवभिंदिपालैःसतोमरैः ॥ आयसैःपरिघैश्चैवनिस्त्रिंशैर्विमलैःशितैः ॥ १४ ॥ प्रगृहीतैःसुसंरब्धाद्रवमाणास्ततस्ततः ॥ व्यदृश्यंतमहाराजपरस्परजिघांसवः ॥ १५ ॥ राजमानाश्चनिस्त्रिंशाःसंसिक्तानरशोणितैः ॥ प्रत्यदृश्यंतशूराणामन्योन्यमभिधावताम् ॥ १६ ॥ अवक्षिप्तावधूतानामसीनांवीरबाहुभिः ॥ संजज्ञेतुमुलःशब्दःपततांपरमर्मसु ॥ १७ ॥ गदामुसलरुग्णानांभिन्नानांचवरासिभिः ॥ दंतिदंतावभिन्नानांभृदितानांचदंतिभिः ॥ १८ ॥ तत्रतत्रनरौघाणांक्रोशतामितरेतरम् ॥ शुश्रुवुर्दारुणावाचःप्रेतानामिवभारत ॥ १९ ॥ हयैरपिहयारोहाश्चामरापीडधारिभिः ॥ हंसैरिवमहावेगैरन्योन्यमभिविद्रुताः ॥ २० ॥ तैर्विमुक्तामहाप्रासाजांबूनदविभूषणाः ॥ आशुगाविमलास्तीक्ष्णाःसंपेतुर्भुजगोपमाः ॥ २१ ॥ अश्वैरश्वजवैःकेचिदाप्लुत्यमहतोरथान् ॥ शिरांस्याददिरेवीरारथिनामश्वसादिनः ॥ २२ ॥ बहूनपिहयारोहान्भल्लैःसन्नतपर्वभिः ॥ रथीजघानसंप्राप्यबाणगोचरमागतान् ॥ २३ ॥ नवमेघप्रतीकाशाश्चाक्षिप्यतुरगान्गजाः ॥ पादैरेवविमृद्नंतिमत्ताःकनकभूषणाः ॥ २४ ॥

अवक्षिप्तावधूतानांअधोमुखंपातितानांपरेषांमर्मसुपततामसीनामितिसंबंधः ॥ १७ ॥ रुग्णास्तीव्राघातार्तः भिन्नोनिकृत्तांगः अवभिन्नःक्षतांगः ॥ १८ ॥ प्रेतानांनारकाणां ॥ १९ ॥ हयैःकरणभूतैः चामरापीडाश्चामरकलापास्तद्धारिभिः अतएवहंसैरिव अभिविद्रुताःसंमुखमुपागताः ॥ २० ॥ प्रासाहस्तक्षेप्याभल्लाःसैनीतिप्रसिद्धाःकुंताइत्यपरे आशुगाःशीघ्रगाः ॥ २१ ॥ अश्व्यजवैरुत्तमवेगैः ॥ २२ ॥ भल्लैर्दीर्घफलकैर्बाणैः ॥ २३ ॥ २४ ॥

॥ २५ ॥ सहसावलेन अतर्कितंवा सतिविद्यमाने ॥ २६ ॥ अभिचक्रमुःअभितोबभ्रमुः ॥ १७ ॥ पुंस्त्वाद्वीर्यवत्त्वात् अमिमदत्वादुद्भिन्नमदत्वात् ॥ २८ ॥ प्रतिमानेषुललाटेषु गात्रेषुअंगेषु वारणानभिगजानामभितः षष्ठ्यर्थेद्वितीया आशुगावाणाः अश्वारोहादिभिः प्रक्षिप्ताइतिशेषः ॥ २९ ॥ शक्त्यःशक्तयश्चकृत्तालोहदंडास्तएवमहोल्काप्रतिमाइत्युत्तरेणसंबंधः ॥ ३० ॥ द्वीपीचित्रव्याघ्रः ॥ ३१ ॥ विकोशैःप्रयोगकाले अग्नीतस्याग्निमुख्येनसर्पणंस्यादग्निप्लुतं तदेवस्यादग्निकुद्धमोष्ठदंशादिसंयुतं वामपक्षाश्रितंयानमेकपार्श्वावदारितं ॥ ३२ ॥ चर्मप्रहारवारणंढालइतिप्रसिद्धंभाषायां आक्षिप्याक्ष

पात्यमानेषुकुंभेषुपार्श्वेष्वपिचवारणाः ॥ प्रासैर्विनिहताःकेचिद्विनेदुःपरमातुराः ॥ २५ ॥ सास्वारोहान्हयान्कांश्चिदुन्मथ्यवरवारणाः ॥ सहसाचिक्षिपुस्तत्रसंकुलेभैरवेसति ॥ २६ ॥ सास्वारोहान्विषाणाग्रैरुत्क्षिप्यतुरगान्गजाः ॥ रथौघानभिसृद्नंतःसध्वजानभिचक्रमुः ॥ २७ ॥ पुंस्त्वादतिमंदत्वाच्चकेचित्तत्रमहागजाः ॥ सास्वारोहान्हयान्जघ्नुःकरैःसचरणैस्तथा ॥ २८ ॥ अश्वारोहैश्चसमरेहस्तिसादिभिरेवच ॥ प्रतिमानेषुगात्रेषुपार्श्वेष्वभिचवारणान् ॥ आशुगाविमलास्तीक्ष्णाःसंपेतुर्भुजगोपमाः ॥ २९ ॥ नराश्चकायान्निर्भिद्यलौहानिकवचानिच ॥ निपेतुर्विमलाःशक्त्योवीरबाहुभिरर्पिताः ॥ ३० ॥ महोल्कप्रतिमाघोरास्तत्रतत्रविशांपते ॥ द्वीपिचर्मावनद्धैश्चव्याघ्रचर्मच्छदैरपि ॥ ३१ ॥ विकोशैर्विमलैःखड्गैरभिजघ्नुःपरान्रणे ॥ अभिप्लुतमभिक्रुद्धमेकपार्श्वावदारितम् ॥ ३२ ॥ विदर्शयंतःसंपेतुःखड्गचर्मपरश्वधैः ॥ केचिदाक्षिप्यकरिणःसाश्वानपिरथान्करैः ॥ ३३ ॥ विकर्षंतोदिशःसर्वाःसंपेतुःसर्वशब्दगाः ॥ शंकुभिर्दारिताःकेचित्संभिन्नाश्वपरश्वधैः ॥ ३४ ॥ हस्तिभिर्मृदिताःकेचित्क्षुण्णाश्चान्येतुरंगमैः ॥ रथनेमिनिकृत्ताश्चनिकृत्ताश्चपरश्वधैः ॥ ३५ ॥ व्याक्रोशंतनराराजंस्तत्रतत्रसबांधवान् ॥ पुत्रानन्येपितॄनन्येभ्रातॄंश्चसहबंधुभिः ॥ ३६ ॥ मातुलान्भागिनेयांश्चपरानपिचसंयुगे ॥ विकीर्णाश्चासुबहवोभग्नसक्थाश्चभारत ॥ ३७ ॥ बाहुभिश्चापरेछिन्नैःपार्श्वेषुचविदारिताः ॥ क्रंदंतःसमदृश्यंतक्षतजाजीवितेप्सवः ॥ ३८ ॥ तृषापरिगताःकेचिदल्पसत्त्वाविशांपते ॥ भूमौनिपतिताःसंख्येरुगयांचक्रिरेजलम् ॥ ३९ ॥ रुधिरौघपरिक्लिन्नाःक्लिश्यमानाश्चभारत ॥ व्यनिंदन्भृशमात्मानंतवपुत्रांश्चसंगतान् ॥ ४० ॥ अपरेक्षत्रियाःशूराःकृतवैराःपरस्परम् ॥ नैवशस्त्रंविमुंचंतिनैवक्रंदंतिमारिष ॥ ४१ ॥ तर्जयंतिचसंहृष्टास्तत्रतत्रपरस्परम् ॥ आदश्यदशनैश्चापिक्रोधात्सरदनच्छदम् ॥ ४२ ॥

ष्प ॥ ३३ ॥ सर्वशब्दगाःसर्वेषामाक्षेप्तॄणांशब्दमनुगच्छंतितेतथा शंकुभिःकीलैःकंटकदंडादिगतैः ॥ ३४ ॥ ३५ ॥ व्याक्रोशंतव्याक्रोशंकृतवंतः बंधुभिःसखिभिः ॥ ३६ ॥ भग्नसक्थाभग्नोरवः ॥ ३७ ॥ ३८ ॥ तृषापिपासया अल्पसत्त्वाधैर्यवर्जिताःभृगयांचक्रिरेयाचंते ॥ ३९ ॥ ४० ॥ ४१ ॥ रदनच्छदमोष्ठं ॥ ४२ ॥

॥ ४३ ॥ निष्कूजानिःशब्दाः रथमन्यस्यगंतुंप्रार्थयानाभ्येमार्गेनिपतिताइतियोज्यं ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ केतुनेतिसार्धः अत्रचंद्रकेतवोर्मेरुसरथभीष्मयोश्चोपमोपमेयभावः भीष्मस्यरुक्मरथत्वात् ॥ ५० ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ७ ॥ ॥ गतेति गतोतीतःपूर्वाह्णस्यभूयिष्ठोभागोयस्मिन्नहनि ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

भ्रुकुटीकुटिलैर्वक्रैःप्रेक्षंतिचपरस्परम् ॥ अपरेक्लिश्यमानास्तुशरार्ताव्रणपीडिताः ॥ ४३ ॥ निष्कूजाःसमपद्यंतदृढसत्वामहाबलाः ॥ अन्येचविरथाःशूरारथमन्यस्यसंयुगे ॥ ४४ ॥ प्रार्थयानानिपतिताःसंक्षुण्णावरवारणैः ॥ अशोभंतमहाराजसपुष्पाइवकिंशुकाः ॥ ४५ ॥ संबभूवुरनीकेषुबहवोभैरवस्वनाः ॥ वर्तमानेमहाभीमेतास्मिन्वीरवरक्षये ॥ ४६ ॥ निजघानपितापुत्रंपुत्रश्चपितरंरणे ॥ स्वस्रीयोमातुलंचापिस्वस्रीयंचापिमातुलः ॥ ४७ ॥ सखासखायंचतथासंबंधीबांधवंतथा ॥ एवंयुयुधिरेतत्रकुरवःपांडवैःसह ॥ ४८ ॥ वर्त्तमानेतथातास्मिन्निर्मर्यादेभयानके ॥ भीष्ममासाद्यपार्थानांवाहिनीसमकंपत ॥ ४९ ॥ केतुनापंचतारेणतालेनभरतर्षभ ॥ राजतेनमहाबाहुरुच्छ्रितेनमहारथे ॥ बभौभीष्मस्तदाराजंश्चंद्रमाइवमेरुणा ॥ ५० ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव०संकुलयुद्धेषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ गतपूर्वाह्णभूयिष्ठेतस्मिन्नहनिदारुणे ॥ वर्त्तमानेतथारौद्रेमहावीरवरक्षये ॥ १ ॥ दुर्मुखःकृतवर्माचकृपःशल्योविविंशतिः ॥ भीष्मंजुगुपुरासाद्यतवपुत्रेणचोदिताः ॥ २ ॥ एतैरतिरथैर्गुप्तःपंचभिर्भरतर्षभः ॥ पांडवानामनीकानिविजगाहेमहारथः ॥ ३ ॥ चेदिकाशिकरूषेषुपंचालेषुचभारत ॥ भीष्मस्यबहुधातालश्चलल्केतुरदृश्यत ॥ ४ ॥ सशिरांसिरणेऽरीणांरथांश्चसयुगध्वजान् ॥ निचकर्तमहावेगैर्भल्लैःसन्नतपर्वभिः ॥ ५ ॥ नृत्यतोरथमार्गेषुभीष्मस्यभरतर्षभ ॥ भृशमार्तस्वरंचक्रुर्नागामर्मणिताडिताः ॥ ६ ॥ अभिमन्युःसुसंक्रुद्धःपिशंगैस्तुरगोत्तमैः ॥ संयुक्तंरथमास्थायप्रायाद्भीष्मरथंप्रति ॥ ७ ॥ जांबूनदविचित्रेणकर्णिकारेणकेतुना ॥ अभ्यवर्ततभीष्मंचतांश्चैवरथसत्तमान् ॥ ८ ॥ सतालकेतोस्तीक्ष्णेनकेतुमाहत्यपत्रिणा ॥ भीष्मेणयुयुधेवीरस्तस्यचानुरथैःसह ॥ ९ ॥ कृतवर्माणमेकेनशल्यंपंचभिराशुगैः ॥ विद्ध्वानवभिरानर्च्छच्छिताग्रैःप्रपितामहम् ॥ १० ॥ पूर्णायतविसृष्टेनसम्यक्प्रणिहितेनच ॥ ध्वजमेकेनविव्याधजांबूनदपरिष्कृतम् ॥ ११ ॥

॥ ५ ॥ नृत्यतोनृत्यमिवकुर्वतः ॥ ६ ॥ पिशंगैःपिंगलैः ॥ ७ ॥ कर्णिकारेणकर्णिकारद्रुमोपमेन ॥ ८ ॥ अनुरथैःपार्ष्णिगोपादिभिः ॥ ९ ॥ १० ॥ पूर्णायतविसृष्टेनआकर्णाकृष्टत्यक्तेन प्रणिहितेनप्रेरितेन ॥ ११ ॥

॥ १२ ॥ कार्तस्वरंसुवर्णं तान्सर्वान् ॥ १३ ॥ १४ ॥ कार्ष्णैःअभिमन्योः सत्ववंतंबलवंतं ॥ १५ ॥ अलातसदृशप्रभंभ्राम्यमाणोल्मुकसदृशमंडलाकारमित्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

दुर्मुखस्यतुभल्लेनसर्वावरणभेदिना ॥ जहारसारथेःकायाच्छिरःसन्नतपर्वणा ॥ १२ ॥ धनुश्चिच्छेदभल्लेनकार्तस्वरविभूषितम् ॥ कृपस्यनिशिताग्रेणतांश्चतीक्ष्णमुखैःशरैः ॥ १३ ॥ जघानपरमक्रुद्धोनृत्यन्निवमहारथः ॥ तस्यलाघवमुद्वीक्ष्यतुतुषुर्देवताअपि ॥ १४ ॥ लब्धलक्षतयाकार्ष्णेःसर्वेभीष्ममुखारथाः ॥ सत्ववंतममन्यंतसाक्षादिवधनंजयम् ॥ १५ ॥ तस्यलाघवमार्गस्थमलातसदृशप्रभम् ॥ दिशःपर्यपतच्चापंगांडीवमिवघोषवत् ॥ १६ ॥ तमासाद्यमहावेगैर्भीष्मोनवभिराशुगैः ॥ विव्याधसमरेतूर्णमार्जुनिंपरवीरहा ॥ १७ ॥ ध्वजंचास्यत्रिभिर्भल्लैश्चिच्छेदपरमौजसः ॥ सारथिंचत्रिभिर्बाणैराजघानयतव्रतः ॥ १८ ॥ तथैवकृतवर्माचकृपःशल्यश्चमारिष ॥ विद्ध्वानाकंपयत्कार्ष्णिमैनाकमिवपर्वतम् ॥ १९ ॥ सतैःपरिवृतःशूरोधार्तराष्ट्रैर्महारथैः ॥ ववर्षशरवर्षाणिकार्ष्णिःपंचरथान्प्रति ॥ २० ॥ ततस्तेषांसहस्राणिसंवार्यशरवृष्टिभिः ॥ ननादबलवान्कार्ष्णिर्भीष्मायविसृजन्शरान् ॥ २१ ॥ तत्रास्यसुमहद्राजन्बाह्वोर्बलमदृश्यत ॥ यतमानस्यसमरेभीष्ममर्दयतःशरैः ॥ २२ ॥ पराक्रांतस्यतस्यैवभीष्मोपिप्राहिणोच्छरान् ॥ सतांश्चिच्छेदसमरेभीष्मचापच्युतान्शरान् ॥ २३ ॥ ततोध्वजममोघेषुर्भीष्मस्यनवभिःशरैः ॥ चिच्छेदसमरेवीरस्ततउच्चुक्रुशुर्जनाः ॥ २४ ॥ सराजतोमहास्कंधस्तालोहेमविभूषितः ॥ सौभद्रविशिखैश्छिन्नःपपातभुविभारत ॥ २५ ॥ तंतुसौभद्रविशिखैःपातितंभरतर्षभ ॥ दृष्ट्वाभीमोननादोच्चैःसौभद्रमभिहर्षयन् ॥ २६ ॥ अथभीष्मोमहास्त्राणिदिव्यानिसुबहूनिच ॥ प्रादुश्चक्रेमहारौद्रेरणेतस्मिन्महाबलः ॥ २७ ॥ ततःशरसहस्रेणसौभद्रंप्रपितामहः ॥ अवाकिरदमेयात्मातदद्भुतमिवाभवत् ॥ २८ ॥ ततोदशमहेष्वासाःपांडवानांमहारथाः ॥ रक्षार्थमभ्यधावंतसौभद्रंत्वरितारथैः ॥ २९ ॥ विराटःसहपुत्रेणधृष्टद्युम्नश्चपार्षतः ॥ भीमश्चकेकयाश्चैवसात्यकिश्चविशांपते ॥ ३० ॥ तेषांजवेनापततांभीष्मःशांतनवोरणे ॥ पांचाल्यंत्रिभिरानर्च्छत्सात्यकिंनवभिःशरैः ॥ ३१ ॥ पूर्णायतविसृष्टेनक्षुरेणनिशितेनच ॥ ध्वजमेकेनचिच्छेदभीमसेनस्यपत्रिणा ॥ ३२ ॥ जांबूनदमयःश्रीमान्केसरीसनरोत्तम ॥ पपातभीमसेनस्यभीष्मेणमथितोरथात् ॥ ३३ ॥ ततोभीमस्त्रिभिर्विद्ध्वाभीष्मंशांतनवंरणे ॥ कृपमेकेनविव्याधकृतवर्माणमष्टभिः ॥ ३४ ॥ प्रगृहीताग्रहस्तेनवैराटिरपिदंतिना ॥ अभ्यद्रवतराजानंमद्राधिपतिमुत्तरः ॥ ३५ ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ पुत्रेणोत्तरेण ॥ ३० ॥ ३१ ॥ ३२ ॥ केसरीसिंहः ॥ ३३ ॥ ३४ ॥ प्रगृहीताग्रहस्तेनकुंडलीकृतशुंडाग्रेण ॥ ३५ ॥

तस्यवारणराजस्यजवेनापततोरथे ॥ शल्योनिवारयामासवेगमप्रतिमंशरैः ॥ ३६ ॥ तस्यक्रुद्धःसनागेंद्रोबृहतःसाधुवाहिनः ॥ पदायुगमधिष्ठायजघानचतु
रोहयान् ॥ ३७ ॥ सहताश्चेरथेतिष्ठन्मद्राधिपतिरायसीम् ॥ उत्तरांतकरींशक्तिंचिक्षेपभुजगोपमाम् ॥ ३८ ॥ तयाभिन्नतनुत्राणःप्रविश्यविपुलंतमः ॥ सपपातग
जस्कंधात्यमुक्तांकुशतोमरः ॥ ३९ ॥ असिमादाय्यशल्योपिअवप्लुत्यरथोत्तमात् ॥ तस्यवारणराजस्यचिच्छेदायमहाकरम् ॥ ४० ॥ भिन्नमर्माशरशतैश्छिन्नह
स्तःसवारणः ॥ भीममार्तस्वरंकृत्वापपातचममारच ॥ ४१ ॥ एतदीदृशकंकृत्वामद्रराजोनराधिप ॥ आरुरोहरथंतूर्णंभास्वरंकृतवर्मणः ॥ ४२ ॥ उत्तरंवैहतंदृष्ट्वा
वैराटिर्भ्रातरंतदा ॥ कृतवर्मणाचसहितंदृष्ट्वाशल्यमवस्थितम् ॥ ४३ ॥ श्वेतःक्रोधात्यजज्वालहविषाहव्यवाडिव ॥ सविस्फार्यमहच्चापंशक्रचापोपमंबली ॥ ४४ ॥
अभ्यधावज्जिघांसन्वैशल्यंमद्राधिपंबली ॥ महतारथवंशेनसमंतात्परिवारितः ॥ ४५ ॥ मुंचन्बाणमयंवर्षंप्रायाच्छल्यरथंप्रति ॥ तमापतंतंसंप्रेक्ष्यमत्तवार
णविक्रमम् ॥ ४६ ॥ तावकानांरथाःसप्तसमंतात्पर्यवारयन् ॥ मद्रराजमभीप्संतोमृत्योर्दंष्ट्रांतरंगतम् ॥ ४७ ॥ बृहद्बलश्चकौसल्योजयत्सेनश्चमागधः ॥ तथारुक्म
रथोराजन्शल्यपुत्रःप्रतापवान् ॥ ४८ ॥ विंदानुविंदावावंतौकांबोजश्चसुदक्षिणः ॥ बृहत्क्षत्रस्यदायादःसैंधवश्चजयद्रथः ॥ ४९ ॥ नानावर्णविचित्राणिध
नूंषिचमहात्मनाम् ॥ विस्फारितानिदृश्यंतेतोयदेष्विवविद्युतः ॥ ५० ॥ तेतुबाणमयंवर्षंश्वेतमूर्ध्न्यपातयन् ॥ निदाघांतेऽनिलोद्धूतामेघाइवनगेजलम् ॥ ५१ ॥
ततःक्रुद्धोमहेष्वासःसप्तभल्लैःसुतेजनैः ॥ धनूंषितेषामाच्छिद्यममर्दपृतनापतिः ॥ ५२ ॥ निकृत्तान्येवतानिस्मसमदृश्यंतभारत ॥ ततस्तेतुनिमेषार्धात्पत्यपद्यन्ध
नूंषिच ॥ ५३ ॥ सप्तचैवपृषत्कांश्चश्वेतस्योपर्यपातयन् ॥ ततःपुनरमेयात्माभल्लैःसप्तभिराशुगैः ॥ निचकर्तमहाबाहुस्तेषांचापानिधन्विनाम् ॥ ५४ ॥ तेनिकृत्तम
हाचापास्त्वरमाणामहारथाः ॥ रथशक्तीःपरामृश्यविनेदुर्भैरवान्रवान् ॥ ५५ ॥

वैराटिःशंखः ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥

१ कृतवर्मणाचसहितमित्यारभ्यैकोनपंचाशत्तमाध्यायस्यसार्धचतुर्विंशतिश्लोकपर्यंतंश्वेतवधोनाम्याख्यानग्रंथःसर्वःप्रक्षिप्तइतिभाति क्वचित्पुरातनपुस्तकेष्वनुपलंभात् संदर्भासंगतेः श्वेतेसेनापतौनीतेत्या
रभ्यसप्तश्लोकानामनन्वितत्वात् उपक्रमेश्वेतस्यसैनापत्येविनियोगादर्शनात् कृतवर्मणाचसहितमित्यारभ्यसार्धनवश्लोकानांश्वेतयुद्धारंभेतद्वधानंतरंशंखयुद्धारंभेचद्विवारंपाठात् प्रथमदिनावहारस्या
ष्टचत्वारिंशाध्यायेउत्तरापक्षस्यसप्तमौचेतिद्विवारंसत्वात् गोग्रहणयुद्धप्रस्तावेतदुत्तरमुपपद्यते [illegible] चायेउत्तरत्रभीष्मकृतरथातिरथसंख्यायांचैतस्यमहतोवीरस्यश्वेतस्यनाम्नोप्यनुल्लेखाच्च ॥

॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ ७ ॥ ॥ ७ ॥ ए
अन्वयुर्भरतश्रेष्ठसप्तश्वेतरथंप्रति ॥ ततस्ताज्वलिताःसप्तमहेंद्राशनिनिःस्वनाः ॥ ५६ ॥ अप्राप्ताःसप्तभिर्भल्लैश्चिच्छेदपरमास्त्रवित् ॥ ततःसमादायशरंसर्वकाय
विदारणम् ॥ ५७ ॥ प्राहिणोद्भरतश्रेष्ठश्वेतोरुक्मरथंप्रति ॥ तस्यदेहेनिपतितोबाणोवज्रातिगोमहान् ॥ ५८ ॥ ततोरुक्मरथोराजन्सायकेनदृढाहतः ॥ निषसाद
रथोपस्थेकश्मलंचाविशन्महत् ॥ ५९ ॥ तंविसंज्ञंविमनसंत्वरमाणस्तुसारथिः ॥ अपोवाहनसंभ्रांतःसर्वलोकस्यपश्यतः ॥ ६० ॥ ततोन्यान्षट्समादायश्वेतोहे
मविभूषितान् ॥ तेषांपण्णांमहाबाहुर्ध्वजशीर्षाण्यपातयत् ॥ ६१ ॥ हयांश्चतेषांनिर्भिद्यसारथींश्चपरंतप ॥ शरैश्चैतान्समाकीर्यप्रायाच्छल्यरथंप्रति ॥ ६२ ॥
ततोहलहलाशब्दस्तवसैन्येपुभारत ॥ दृष्ट्वासेनापतिंतूर्णंयांतंशल्यरथंप्रति ॥ ६३ ॥ ततोभीष्मंपुरस्कृत्यतवपुत्रोमहाबलः ॥ धृतस्तुसर्वसैन्येनप्रायाच्छ्वेतरथंप्र
ति ॥ ६४ ॥ मृत्योरास्यमनुप्राप्तंमद्रराजममोचयत् ॥ ततोयुद्धंसमभवत्तुमुलंलोमहर्षणम् ॥ ६५ ॥ तावकानांपरेषांचव्यतिषक्तरथद्विपं ॥ सौभद्रेभीमसेनेचसा
त्यकौचमहारथे ॥ ६६ ॥ कैकेयेचविराटेचधृष्टद्युम्नेचपार्षते ॥ एतेपुनरसिंहेषुचेदिमत्स्येषुचैवह ॥ ववर्षशरवर्षाणिकुरुवृद्धःपितामहः ॥ ६७ ॥ ॥ इतिश्रीमहा
भारतेभीष्मपर्वणिभीष्मव०श्वेतयुद्धेसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ एवंश्वेतेमहेष्वासेप्रायेशल्यरथंप्रति
कुरवःपांडवेयाश्चकिमकुर्वतसंजय ॥ १ ॥ भीष्मःशांतनवःकिंवातन्ममाचक्ष्वपृच्छतः ॥ ॥ संजयउवाच ॥ ॥ राजन्शतसहस्राणिततःक्षत्रियपुंगवाः ॥ २ ॥
श्वेतंसेनापतिंशूरंपुरस्कृत्यमहारथाः ॥ राज्ञोबलंदर्शयंतस्तवपुत्रस्यभारत ॥ ३ ॥ शिखंडिनंपुरस्कृत्यचात्तुमैच्छन्ममहारथाः ॥ अभ्यवर्तंतभीष्मस्यरथेहेमपरि
ष्कृतम् ॥ ४ ॥ जिघांसंतंयुधांश्रेष्ठंदतासीत्तुमुलंमहत् ॥ तत्तेहंसंप्रवक्ष्यामिमहावैशसमच्युत ॥ ५ ॥ तावकानांपरेषांचययायुद्धमवर्तत ॥ तत्राकरोद्रथोपस्थान्शून्या
न्शांतनवोबहून् ॥ ६ ॥ तत्राद्भुतंमहच्चक्रेशरैरार्छद्रथोत्तमान् ॥ समाहृणोच्छरैरर्कमर्कतुल्यप्रतापवान् ॥ ७ ॥ नुदन्समंतात्समरेरविरुद्यन्यथातमः ॥ तेनाजौप्रेषि
ताराजन्शराःशतसहस्रशः ॥ ८ ॥ क्षत्रियांतकराःसंख्येमहावेगामहाबलाः ॥ शिरांसिपातयामासुर्वीराणांशतशोरणे ॥ ९ ॥ गजान्कंटकसन्नाहान्वजेणेव
शिलोच्चयान् ॥ रथारथेषुसंसक्ताव्यदृश्यंतविशांपते ॥ १० ॥ एकेरथंपर्यवहंस्तुरगाःसतुरंगमम् ॥ युवानंनिहतंवीरंलंबमानंसकार्मुकम् ॥ ११ ॥ उदीर्णाश्चहया
राजन्ववहंतस्तत्रतत्रह ॥ बद्धखड्गनिषंगाश्चविध्वस्तशिरसोहताः ॥ १२ ॥

[illegible] ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

शतशःपतिताभूमौवीरशय्यासुशेरते ॥ परस्परेणधावंतःपतिताःपुनरुत्थिताः ॥ १३ ॥ उत्थायचप्रधावंतोद्वंद्वयुद्धमवाप्नुवन् ॥ पीडिताःपुनरन्योन्यंलुठंतोरणमूर्धनि ॥ १४ ॥ सचापाःसनिषंगाश्चजातरूपपरिष्कृताः ॥ विस्रब्धहतवीराश्चशतशःपरिपीडिताः ॥ १५ ॥ तेनतेनाभ्यधावंतविस्रृजंतश्चभारत ॥ मत्तोगजःपर्यवर्तद्धयांश्चहतसादिनः ॥ १६ ॥ सरथारथिनश्चापिविस्रब्धंतःसमंततः ॥ स्यंदनादपतत्कश्चिन्निहतोन्येनसायकैः ॥ १७ ॥ हतसारथिरप्युच्चैःपपातकाष्ठवद्रथः ॥ युध्यमानस्यसंग्रामेव्यूढेरजसिचोत्थिते ॥ १८ ॥ धनुःकूजितविज्ञानंतत्रासीत्पतियुद्धतः ॥ गात्रस्पर्शेनयोधानांव्यज्ञास्तपरिपंथिनम् ॥ १९ ॥ युद्ध्यमानंशरैराजन्सिंजिनीध्वजिनीरवात् ॥ अन्योन्यंवीरसंशब्दोनाश्रूयतभटैःकृतः ॥ २० ॥ शब्दायमानेसंग्रामेपट्टेकर्णदारिणि ॥ युध्यमानस्यसंग्रामेकुर्वतःपौरुषंस्वकम् ॥ २१ ॥ नाश्रौषंनामगोत्राणिकीर्तनंचपरस्परम् ॥ भीष्मचापच्युतैर्बाणैरार्तानांयुध्यतांमृधे ॥ २२ ॥ परस्परेषांवीराणांमनांसिसमकंपयन् ॥ तस्मिन्नित्याकुलेयुद्धेदारुणेलोमहर्षणे ॥ २३ ॥ पितापुत्रंचसमरेनाभिजानातिकश्चन ॥ चक्रेभग्नेयुगेच्छिन्नेएकधुर्यैहयेहतः ॥ २४ ॥ आक्षिप्तःस्यंदनाद्वीरःसंसारथिरजिह्मगैः ॥ एवंचसमरेसर्वेवीराश्चविरथीकृताः ॥ २५ ॥ तेनतेनस्मदृश्यंतेधावमानाःसमंततः ॥ गजोहतःशिरश्छिन्नंमर्मभिन्नंहयोहतः ॥ २६ ॥ अहतःकोपिनैवासीद्भीष्मेनिघ्नतिशात्रवान् ॥ श्वेतःकुरूणामकरोत्क्षयंतस्मिन्महाहवे ॥ २७ ॥ राजपुत्रान्रथोदारानवधीच्छतसंघशः ॥ चिच्छेदरथिनांबाणैःशिरांसिभरतर्षभ ॥ २८ ॥ सांगदाबाहवश्चैवधनूंषिचसमंततः ॥ रथेषांरथचक्राणितूणीराणियुगानिच ॥ २९ ॥ छत्राणिचमहार्हाणिपताकाश्चविशांपते ॥ हयौघाश्चरथौघाश्चनरौघाश्चैवभारत ॥ ३० ॥ वारणाःशतशश्चैवहताःश्वेतेनभारत ॥ वयंश्वेतभयाद्भीताविहायरथसत्तमम् ॥ ३१ ॥ अपयातास्तथापश्चाद्दिभुंपश्यामधृष्णवः ॥ शरपातमतिक्रम्यकुरवःकुरुनंदन ॥ ३२ ॥ भीष्मंशांतनवंयुद्धेस्थिताःपश्यामसर्वशः ॥ अदीनोदीनसमयेभीष्मोस्माकंमहाहवे ॥ ३३ ॥ एकस्तस्थौनरव्याघ्रोगिरिर्मेरुरिवाचलः ॥ आददानइवप्राणान्सवितारंशिशिरात्यये ॥ ३४ ॥ गभस्तिभिरिवादित्यस्तस्थौशरमरीचिमान् ॥ समुमोचमहेष्वासःशरसंघाननेकशः ॥ ३५ ॥ निघ्नन्नमित्रान्समरेवज्रपाणिरिवासुरान् ॥ तेवध्यमानाभीष्मेणप्रजदुस्तंमहाबलम् ॥ ३६ ॥ स्वयूथादिवतेयूथान्मुक्तंभूमिषुदारुणम् ॥ तमेवमुपलक्ष्यैकोहृष्टःपुष्टःपरंतप ॥ ३७ ॥ दुर्योधनप्रियेयुक्तःपांडवान्परिशोचयन् ॥ जीवितंदुस्त्यजंत्यक्त्वाभयंचसुमहाहवे ॥ ३८ ॥

॥ १०६ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥

पातयामाससैन्यानिपांडवानांविशांपते ॥ प्रहरंतमनीकानिपितादेवव्रतस्तव ॥ ३९ ॥ दृष्ट्वासेनापतिंभीष्मस्त्वरितःश्वेतमभ्ययात् ॥ सभीष्मंशरजालेनमहतासमवाकिरत् ॥ ४० ॥ श्वेतंचापिततथाभीष्मःशरौघैःसमवाकिरत् ॥ तौवृषाविवनर्दंतौमत्ताविवमहाद्विपौ ॥ ४१ ॥ व्याघ्राविवसुसंरब्धावन्योन्यमभिजघ्नतुः ॥ अस्त्रैरस्त्राणिसंवार्यततस्तौपुरुषर्षभौ ॥ ४२ ॥ भीष्मःश्वेतश्चयुयुधेपरस्परवधैषिणौ ॥ एकाह्नानिर्दहद्भीष्मःपांडवानामनीकिनीम् ॥ ४३ ॥ शरैःपरमसंक्रुद्धोयदि श्वेतोनपालयेत् ॥ पितामहंततोदृष्ट्वाश्वेतेनविमुखीकृतम् ॥ ४४ ॥ प्रहर्षपांडवाजग्मुःपुत्रस्तेविमनाभवत् ॥ ततोदुर्योधनःक्रुद्धःपार्थिवैःपरिवारितः ॥ ४५ ॥ससैन्यःपांडवानीकमभ्यद्रवतसंयुगे ॥ दुर्मुखःकृतवर्माचकृपःशल्योविशांपतिः ॥ ४६ ॥ भीष्मंजुगुपुरासाद्यतवपुत्रेणनोदिताः ॥ दृष्ट्वातुपार्थिवैःसर्वैर्दुर्योधनप्रयोगमैः ॥ ४७ ॥ पांडवानामनीकानिवध्यमानानिसंयुगे ॥ श्वेतोगांगेयमुत्सृज्यतवपुत्रस्यवाहिनीम् ॥ ४८ ॥ नाशयामासवेगेनवायुर्दक्षानिवौजसा ॥ द्रावयित्वाचमूंराजन्वैराटिःक्रोधमूर्च्छितः ॥ ४९ ॥ आपतत्सहसाभूयोयत्रभीष्मोव्यवस्थितः ॥ तौतत्रोपगतौराजन्शरदीमौमहाबलौ ॥ ५० ॥ अयुध्येतांमहात्मानौयथाभौदत्रवासवौ ॥ अन्योन्यंतुमहाराजपरस्परवधैषिणौ ॥ ५१ ॥ निगृह्यकार्मुकंश्वेतोभीष्मंविव्याधसप्तभिः ॥ पराक्रमंततस्तस्यपराक्रम्यपराक्रमी ॥ ५२ ॥ तरसावारयामाससमत्तोमत्तमिवद्विपम् ॥ श्वेतःशांतनवंभूयःशरैःसन्नतपर्वभिः ॥ ५३ ॥ विव्याधपंचविंशत्यातदद्भुतमिवाभवत् ॥ तंप्रत्यविध्यद्दशभिर्भीष्मःशांतनवस्तदा ॥ ५४ ॥ सविद्धस्तेनबलवान्नाकंपतयथाऽचलः ॥ वैराटिःसमरेक्रुद्धोभृशमाशय्यकार्मुकम् ॥ ५५ ॥ आजघानततोभीष्मंश्वेतःक्षत्रियनंदनः ॥ संप्रहस्यततःश्वेतःस्रक्किणीपरिसंलिहन् ॥ ५६ ॥ धनुश्चिच्छेदभीष्मस्यनवभिर्दशधाशरैः ॥ संधायविशिखंचैवशरंलोमप्रवाहिनम् ॥ ५७ ॥ उन्ममाथततस्तालंध्वजशीर्षमहात्मनः ॥ केतुंनिपतितंदृष्ट्वाभीष्मस्यतनयास्तव ॥ ५८ ॥ हतंभीष्ममममन्यंतश्वेतस्यवशमागतम् ॥ पांडवाश्चापिसंहृष्टाद्मुःशंखान्मुदायुताः ॥ ५९ ॥ भीष्मस्यपतितंकेतुंदृष्ट्वातालंमहात्मनः ॥ ततोदुर्योधनःक्रोधात्स्वमनीकमनोदयत् ॥ ६० ॥ यत्ताभीष्मंपरीप्सध्वंरक्षमाणाःसमंततः ॥ मानःप्रपश्यमानानांश्वेतोन्मृत्युमवाप्स्यति ॥ ६१ ॥ भीष्मःशांतनवःशूरस्तथासत्यंब्रवीमिवः ॥ राज्ञस्तुवचनंश्रुत्वात्वरमाणामहारथाः ॥ ६२ ॥ बलेनचतुरंगेणगांगेयमन्वपालयन् ॥ बाह्लीकःकृतवर्माचशलःशल्यश्चभारत ॥ ६३ ॥ जलसंधोविकर्णश्चचित्रसेनोविविंशतिः ॥ त्वरमाणास्त्वराकाले परिवार्यसमंततः ॥ ६४ ॥

॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥

शस्त्रवृष्टिंसुतुमुलांश्वेतस्योपर्यपातयन् ॥ तान्कुद्धोनिशितैर्बाणैस्त्वरमाणोमहारथः ॥ ६५ ॥ अवारयदमेयात्मादर्शयन्पाणिलाघवम् ॥ सनिवार्यतुतान्सर्वा-
न्केसरीकुंजरानिव ॥ ६६ ॥ महताशरवर्षेणभीष्मस्यधनुराच्छिनत् ॥ ततोन्यद्धनुरादायभीष्मःशांतनवोयुधि ॥ ६७ ॥ श्वेतंविव्याधराजेंद्रकंकपत्रैःशितैःशरैः ॥
ततःसेनापतिःकुद्धोभीष्मंबहुभिरायसैः ॥ ६८ ॥ विव्याधसमरेराजन्सर्वलोकस्यपश्यतः ॥ ततःप्रव्यथितोराजाभीष्मंदृष्ट्वानिवारितम् ॥ ६९ ॥ प्रवीरंसर्वलोक
स्यश्वेतेनयुधिवैतदा ॥ निष्ठानकश्चसुमहांस्तवसैन्यस्यचाभवत् ॥ ७० ॥ तंवीरंवारितंदृष्ट्वाश्वेतेनशरविक्षतं ॥ हतंश्वेतेनमन्यंतेश्वेतस्यवशमागतम् ॥ ७१ ॥ ततः
क्रोधवशंप्राप्तःपितादेवव्रतस्तव ॥ ध्वजमुन्मथितंदृष्ट्वातांचसेनांनिवारिताम् ॥ ७२ ॥ श्वेतंप्रतिमहाराजव्यसृजत्सायकान्बहून् ॥ तानावार्यरणेश्वेतोभीष्मस्यर
थिनांवरः ॥ ७३ ॥ धनुश्चिच्छेदभल्लेनपुनरेवपितुस्तव ॥ उत्सृज्यकार्मुकंराजन्गांगेयःक्रोधमूर्च्छितः ॥ ७४ ॥ अन्यत्कार्मुकमादायविपुलंबलवत्तरम् ॥ तत्रसंधा
यविपुलान्भल्लान्समशिलाशितान् ॥ ७५ ॥ चतुर्भिश्चजघानाश्वान्श्वेतस्यपृतनापतेः ॥ ध्वजंद्वाभ्यांतुचिच्छेदसमभेनचसारथेः ॥ ७६ ॥ शिरश्चिच्छेदभल्लेनसं
कुद्धोऽलघुविक्रमः ॥ हताश्वसूतात्सरथादवप्लुत्यमहाबलः ॥ ७७ ॥ आमर्षवशमापन्नोव्याकुलःसमपद्यत ॥ विरथंरथिनांश्रेष्ठंश्वेतंदृष्ट्वापितामहः ॥ ७८ ॥ ताड
यामाससनिशितैःशरसंघैःसमंततः ॥ सताड्यमानःसमरेभीष्मचापच्युतैःशरैः ॥ ७९ ॥ स्वरथेधनुरुत्सृज्यशक्तिंजग्राहकांचनीम् ॥ ततःशक्तिरणेश्वेतोजग्राहोग्रांम
हाभयाम् ॥ ८० ॥ कालदंडोपमांघोरांस्फृत्योर्जिह्वामिवश्वसन् ॥ अब्रवीच्चतदाश्वेतोभीष्मंशांतनवंरणे ॥ ८१ ॥ तिष्ठेदानींसुसंरब्धःपश्यमांपुरुषोभव ॥ एवमु
क्त्वामहेष्वासोभीष्मंयुधिपराक्रमी ॥ ८२ ॥ ततःशक्तिममेयात्माचिक्षेपभुजगोपमाम् ॥ पांडवार्थेपराक्रांतस्तवानर्थचिकीर्षुकः ॥ ८३ ॥ हाहाकारोमहानासी
त्पुत्राणांतेविशांपते ॥ दृष्ट्वाशक्तिंमहाघोरांस्फृत्योर्दंडसमप्रभाम् ॥ ८४ ॥ श्वेतस्यकरनिर्मुक्तांनिर्मुक्तोरगसन्निभाम् ॥ अपतत्सहसाराजन्महोल्केवनभस्तलात् ॥ ८५ ॥ ज्वलंतीमंतरिक्षेतांज्वालाभिरिवसंवृताम् ॥ असंभ्रांतस्तदाराजन्पितादेवव्रतस्तव ॥ ८६ ॥ अष्टभिर्नवभिर्भीष्मःशक्तिंचिच्छेदपत्रिभिः ॥ उल्कृष्टहेमवि
कृतांनिकृतांनिशितैःशरैः ॥ ८७ ॥ उच्चुक्रुशुस्ततःसर्वेतावकाभरतर्षभ ॥ शक्तिंविनिहतांदृष्ट्वावैराटिःक्रोधमूर्च्छितः ॥ ८८ ॥ कालोपहतचेतास्तुकर्तव्यंनाभ्यजान
त ॥ क्रोधसंमूर्च्छितोराजन्वैराटिःप्रहसन्निव ॥ ८९ ॥ गदांजग्राहसंहृष्टोभीष्मस्यनिधनंप्रति ॥ क्रोधेनरक्तनयनोदंडपाणिरिवांतकः ॥ ९० ॥

॥ १०७ ॥

॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ १०२ ॥ १०३ ॥ १०४ ॥ १०५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ ११० ॥ ११ ॥ १२ ॥ १३ १४ ॥ १५ ॥ १६ ॥

भीष्मंसमभिदुद्रावजलौघइवपर्वतम् ॥ तस्यवेगमसंवार्यमत्वाभीष्मःप्रतापवान् ॥ ९१ ॥ प्रहारविप्रमोक्षार्थंसहसाधरणींगतः ॥ श्वेतःक्रोधसमाविष्टोभ्रामयि
त्वातुतांगदाम् ॥ ९२ ॥ रथेभीष्मस्यचिक्षेपयथादेवोधनेश्वरः ॥ तयाभीष्मनिपातिन्यासरथोभस्मसात्कृतः ॥ ९३ ॥ सध्वजःसहसूतेनसाश्वःसयुगवंधुरः ॥ विर
थंरथिनांश्रेष्ठंभीष्मंदृष्ट्वारथोत्तमाः ॥ ९४ ॥ अभ्यधावंतसहिताःशल्यप्रभृतयोरथाः ॥ ततोन्यंरथमास्थायधनुर्विस्फार्यदुर्मनाः ॥ ९५ ॥ शनकैरभ्ययाच्छ्वेतंगां
गेयःप्रहसन्निव ॥ एतस्मिन्नंतरेभीष्मःशुश्रावविपुलांगिरम् ॥ ९६ ॥ आकाशादीरितांदिव्यामात्मनोहितसंभवाम् ॥ भीष्मभीष्ममहाबाहोशीघ्रंयत्नंकुरुष्ववै
॥ ९७ ॥ एषत्वस्यजयेकालोनिर्दिष्टोविश्वयोनिना ॥ एतच्छ्रुत्वातुवचनंदेवदूतेनभाषितम् ॥ ९८ ॥ संप्रहृष्टमनाभूत्वावधेतस्यमनोदधे ॥ विरथंरथिनांश्रेष्ठंश्वेतंदृ
ष्ट्वापदातिनम् ॥ ९९ ॥ सहितास्त्वभ्यवर्तंतपरीप्संतोमहारथाः ॥ सात्यकिर्भीमसेनश्चधृष्टद्युम्नश्चपार्षतः ॥ १०० ॥ कैकेयोधृष्टकेतुश्चअभिमन्युश्चवीर्यवान् ॥ ए
तानापततःसर्वान्द्रोणशल्यकृपैःसह ॥ १ ॥ अवारयदमेयात्मावारिवेगानिवाचलः ॥ सनिरुद्धेषुसर्वेषुपांडवेषुमहात्मसु ॥ २ ॥ श्वेतःखड्गमथाकृष्यभीष्मस्यधनु
राच्छिनत् ॥ तदपास्यधनुश्छिन्नंत्वरमाणःपितामहः ॥ ३ ॥ देवदूतवचःश्रुत्वावधेतस्यमनोदधे ॥ ततःप्रचरमाणस्तुपितादेवव्रतस्तव ॥ ४ ॥ अन्यत्कार्मुकमादाय
त्वरमाणोमहारथः ॥ क्षणेननसज्यमकरोच्छ्रकचापसमप्रभम् ॥ ५ ॥ पितातेभरतश्रेष्ठश्वेतंदृष्ट्वामहारथैः ॥ वृतंतंमनुजव्याघ्रैर्भीमसेनपुरोगमैः ॥ ६ ॥ अभ्यवर्त
तगांगेयःश्वेतंसेनापतिंद्रुतम् ॥ आपतंतंततोभीष्मोभीमसेनंप्रतापवान् ॥ ७ ॥ आजघ्नेविशिखैःषष्ट्यासेनान्यंसमहारथः ॥ अभिमन्युंचसमरेपितादेवव्रतस्तव
॥ ८ ॥ आजघ्नेभरतश्रेष्ठस्त्रिभिःसन्नतपर्वभिः ॥ सात्यकिंचशतेनाजौभरतानांपितामहः ॥ ९ ॥ धृष्टद्युम्नंचविंशत्याकैकेयंचापिपंचभिः ॥ तांश्चसर्वान्महेष्वासा
न्पितादेवव्रतस्तव ॥ १० ॥ वारयित्वाशरैर्घोरैःश्वेतमेवाभिदुद्रुवे ॥ ततःशरंमृत्युसमंभारसाधनमुत्तमम् ॥ ११ ॥ विकृष्यबलवान्भीष्मःसमाधत्तदुरासदम् ॥
ब्रह्मास्त्रेणसुसंयुक्तंतंशरंलोमवाहिनम् ॥ १२ ॥ ददृशुर्देवगंधर्वाःपिशाचोरगराक्षसाः ॥ सतस्यकवचंभित्त्वाहृदयंचामितौजसः ॥ १३ ॥ जगामधरणींबाणोम
हाशनिरिवज्वलन् ॥ अस्तंगच्छन्यथादित्यःप्रभामादायसत्वरः ॥ १४ ॥ एवंजीवितमादायश्वेतोदेहाज्जगामह ॥ तंभीष्मेणनरव्याघ्रंतथाविनिहतंयुधि ॥ १५ ॥
प्रपतंतमपश्यामगिरेःशृंगमिवच्युतम् ॥ अशोचन्पांडवास्तत्रक्षत्रियाश्चमहारथाः ॥ १६ ॥

॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ १२१ ॥ इतिश्रीमत्पर्वणिनैलकंठीयेभारतभावदीपेअष्टाचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ ७ ॥ श्वेतइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

प्रहृष्टाश्चसुतास्तुभ्यंकुरवश्चापिसर्वशः॥ ततोदुःशासनोराजन्श्वेतंदृष्ट्वानिपातितम्॥ १७॥ वादित्रनिनदैर्घोरैर्नृत्यतिस्मसमंततः॥ तस्मिन्हतेमहेष्वासेभीष्मेणाहवशोभिना॥ १८॥ प्रावेपंतमहेष्वासाःशिखंडिप्रमुखारथाः॥ ततोधनंजयोराजन्वार्ष्णेयश्चापिसर्वशः॥ १९॥ अवहारंशनैश्चक्रुर्निहतेवाहिनीपतौ॥ ततोवहारःसैन्यानांतवतेषांचभारत॥ २०॥ तावकानांपरेषांचनर्दतांचमुहुर्मुहुः॥ पार्थाविमनसोभूत्वान्यवर्तंतमहारथाः॥ चिंतयंतोवधंघोरंद्वैरथेनपरंतपाः ॥ १२१ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव०श्वेतवधेअष्टाचत्वारिंशोऽध्यायः॥ ४८॥ ॥ ७ ॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच॥ ॥(श्वेतेसेनापतौतातसंग्रामेनिहतेपरैः॥ किमकुर्वन्महेष्वासाःपंचालाःपांडवैःसह ॥ १ ॥ सेनापतिंसमाकर्ण्यश्वेतंयुधिनिपातितम् ॥ तदर्थंयततांचापिपरेषांप्रपलायिनां ॥ २ ॥ मनःप्रीणातिमेवाक्यंजयसंजयशृण्वतः॥ प्रत्युपायंचिंतयंतःसज्जनाःप्रस्रवंतिमे ॥ ३ ॥ सहिवीरोनुरक्तश्चवृद्धःकुरुपतिस्तदा॥ कृतंवैरंसदातेनपितुःपुत्रेणधीमता ॥ ४ ॥ तस्योद्वेगभयाच्चापिसंश्रितःपांडवान्पुरा॥ सर्वबलंपरित्यज्यदुर्गंसंश्रित्यतिष्ठति॥ ५॥ पांडवानांप्रतापेनदुर्गंदेशंनिवेश्यच॥ सपलान्सततंवाधन्नार्यवृत्तिमनुष्ठितः॥ ६॥ आश्चर्यंवैसदातेषांपुरराज्ञांसुदुर्मतिः॥ ततोयुधिष्ठिरेभक्तःकथंसंजयसूदितः ॥ ७ ॥ प्रक्षिप्तःसंमतःक्षुद्रःपुत्रोमेपुरुषाधमः॥ नयुद्धंरोचयेद्भीष्मोनचाचार्यःकथंचन॥ ८॥ नकृपोनचगांधारीनाहंसंजयरोचये ॥ नवासुदेवोवार्ष्णेयोधर्मराजश्चपांडवः॥ ९ ॥ नभीमोनार्जुनश्चैवनयमौ पुरुषर्षभौ॥ वार्यमाणौमयानित्यंगांधार्याविदुरेणच ॥ १० ॥ जामदग्न्येनरामेणव्यासेनचमहात्मना॥ दुर्योधनोयुध्यमानोनित्यमेवहिसंजय ॥ ११ ॥ कर्णस्यमतमास्थायसौबलस्यचपापकृत्॥ दुःशासनस्यचतथापांडवान्नान्वचिंतयत्॥ १२॥ तस्याहंव्यसनंघोरंमन्येप्राप्तंतुसंजय॥ श्वेतस्यत्वविनाशेनभीष्मस्यविजयेनच॥ १३॥ संक्रुद्धःकृष्णसहितःपार्थःकिमकरोद्युधि॥ अर्जुनाद्धिभयंभूयस्तन्मेतातनशाम्यति॥ १४॥ सहिशूरश्चकौंतेयःक्षिप्रकारीधनंजयः॥ मन्ये शरैःशरीराणिशत्रूणांप्रमथिष्यति॥ १५॥ एंद्रिमिंद्रानुजसमंमहेंद्रसदृशंबले॥ अमोघक्रोधसंकल्पंदृष्ट्वावःकिमभून्मनः॥ १६॥ तथैववेदविद्धूरोज्वलनार्कसमद्युतिः॥ इंद्रास्त्रविदमेयात्माप्रपतन्समितिंजयः॥ १७॥ वज्रसंस्पर्शरूपाणामस्त्राणांचप्रयोजकः॥ सखड्गाक्षेपहस्तस्तुघोपंचक्रेमहारथः॥ १८॥ ससंजय महाप्राज्ञोद्रुपदस्यात्मजोबली॥ धृष्टद्युम्नःकिमकरोच्छ्वेतेयुधिनिपातिते॥ १९॥ ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

पुराचैवापराधेनवधेनचचमूपतेः॥ मन्येमनःप्रजज्वालपांडवानांमहात्मनाम्॥२०॥ तेषांक्रोधंचिंतयंस्तुअहःसुचनिशासुच॥ नशांतिमधिगच्छामिदुर्योधन कृतेनहि॥ कथंचाभून्महायुद्धंसर्वमाचक्ष्वसंजय॥ २१॥ ॥ संजयउवाच॥ ॥शृणुराजन्स्थिरोभूत्वातवापनयनोमहान्॥ नचदुर्योधनेदोषमिममाधातुमर्हसि॥ २२॥ गतोदकेसेतुबंधोयादृक्तादृङ्मतिस्तव॥ संदीप्तेभवनेयद्वत्कूपस्यखननंतथा ॥ २३ ॥ गतपूर्वाढ्यभूयिष्ठेतस्मिन्नहनिदारुणे॥ तावकानांपरेषांचपुनर्युद्धमवर्तत॥ २४॥ श्वेतंतुनिहतंदृष्ट्वाविराटस्यचमूपतिम्॥ कृतवर्मणाचसहितंदृष्ट्वाशल्यमवस्थितम्॥ २५॥ शंखःक्रोधात्प्रजज्वालहविषाहव्यवाडिव॥ सविस्फार्यमहच्चापंशक्रचापोपमंबली॥ २६॥ अभ्यधावज्जिघांसन्वैशल्यंमद्राधिपंयुधि॥ महतारथसंघेनसमंतात्परिरक्षितः॥ २७॥ स्रृजन्बाणमयंवर्षंप्रायाच्छल्यरथंप्रति॥ तमापतंतंसंप्रेक्ष्यमत्तवारणविक्रमम्॥ २८॥ तावकानांरथाःसप्तसमंतात्पर्यवारयन्॥ मद्रराजंपरीप्संतोमृत्योर्दंष्ट्रांतरंगतम्॥ २९॥ बृहद्बलश्चकौसल्योजयत्सेनश्चमागधः॥ तथारुक्मरथोराजनपुत्रःशल्यस्यमानितः॥ ३०॥ विंदानुविंदावावंत्यौकांबोजश्चसुदक्षिणः॥ बृहत्क्षत्रस्यदायादःसैंधवश्चजयद्रथः॥ ३१॥ नानाधातुविचित्राणिकार्मुकाणिमहात्मनाम्॥ विस्फारितान्यदृश्यंततोयदेष्विवविद्युतः॥ ३२॥ तेतुबाणमयंवर्षंशंखमूर्ध्निन्यपातयन्॥ निदाघांतेनिलोद्धूतामेघाइवनगेजलम्॥ ३३॥ ततःक्रुद्धोमहेष्वासःसप्तभल्लैःसुतजनैः॥ धनूंषितेषामाच्छिद्यननर्दपृतनापतिः॥ ३४॥ ततोभीष्मोमहाबाहुर्विनद्यजलदोयथा॥ तालमात्रंधनुर्गृह्यशंखमभ्यद्रवद्रणे॥ ३५॥ तमुद्यंतमुदीक्ष्याथमहेष्वासंमहाबलम्॥ संत्रस्तापांडवीसेनावातवेगहतेवनौ॥ ३६॥ ततोर्जुनःसंवरितःशंखस्यासीत्पुरःसरः॥ भीष्माद्रक्ष्योयमद्येतितततोयुद्धमवर्तत ॥ ३७॥ हाहाकारोमहानासीद्योधानांयुधियुध्यताम्॥ तेजस्तेजसिसंपृक्तमित्येवंविस्मयंययुः॥ ३८॥ अथशल्योगदापाणिरवतीर्यमहारथात्॥ शंखस्यचतुरोवाहानहनद्गरतर्षभ॥ ३९॥ सहताश्वाद्रथात्तूर्णंखड्गमादायविद्रुतः॥ वीक्षमाणोश्वरथं प्राप्यपुनःशांतिमविंदत॥ ४०॥ ततोभीष्मरथात्तूर्णमुत्पतंतिपतत्रिणः॥ यैरंतरिक्षंभूमिश्चसर्वतःसमवस्तृता॥ ४१॥ पंचालानथमत्स्यांश्चकेकयांश्चप्रभद्रकान्भीष्मःप्रहरतांश्रेष्ठःपातयामासपत्रिभिः॥ ४२॥ उत्सृज्यसमरेराजन्पांडवंसव्यसाचिनम्॥ अभ्यद्रवत्पांचाल्यंद्रुपदंसेनयाततम्॥ ४३॥ प्रियंसंबंधिनंराजन् शरानवकिरन्बहून्॥ अग्निनेवप्रदग्धानिवनानिशिशिरात्यये॥ ४४॥ शरदग्धान्यदृश्यंतसैन्यानिद्रुपदस्यह॥ अत्यतिष्ठद्रणेभीष्मोविधूमइवपावकः॥ ४५॥

॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ एकावतीकुर्वन्दरक्षणार्थं कुर्वन् ॥ ५१ ॥ ५२ ॥ ५३ ॥ ॥ इतिश्रीमन्महाभारतेभीष्मपर्वणिभीष्मवधपर्वणिएकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥७॥

मध्यंदिनेयथादित्यंतपंतमिवतेजसा ॥ नशेकुःपांडवेयस्ययोधाभीष्मंनिरीक्षितुम् ॥ ४६ ॥ वीक्षांचक्रुःसमंतात्तेपांडवाभयपीडिताः ॥ त्रातारंनाध्यगच्छंतगावःशीतार्दिताइव ॥ ४७ ॥ सातुयौधिष्ठिरीसेनागांगेयशरपीडिता ॥ सिंहेनेवविनिर्भिन्नाशुक्लागौरिवगोपतेः ॥ ४८ ॥ हतेविप्रद्रुतेसैन्येनिरुत्साहेविमर्दिते ॥ हाहाकारोमहानासीत्पांडुसैन्येषुभारत ॥ ४९ ॥ ततोभीष्मःशांतनवोनित्यंमंडलकार्मुकः ॥ मुमोचबाणान्दीप्ताग्रानहीनाशीविषानिव ॥ ५० ॥ शरैरेकायनीकुर्वन्दिशःसर्वायतव्रतः ॥ जघानपांडवरथानादिश्यादिश्यभारत ॥ ५१ ॥ ततःसैन्येषुभग्नेषुमथितेषुचसर्वशः ॥ प्रामेचास्तंदिनकरेनप्राज्ञायतकिंचन ॥ ५२ ॥ भीष्मंचसमुदीर्यंतंदृष्ट्वापार्थामहाहवे ॥ अवहारमकुर्वतसैन्यानांभरतर्षभ ॥ ५३ ॥ ॥इतिश्रीम०भी०भीष्मव०शंखयुद्धेप्रथमदिवसावहारेएकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥७॥ ॥ संजयउवाच ॥ ॥ कृतेऽवहारेसैन्यानांप्रथमेभरतर्षभ ॥ भीष्मेचयुद्धसंरब्धेहृष्टेदुर्योधनेतथा ॥ १ ॥ धर्मराजस्ततस्तूर्णमभिगम्यजनार्दनम् ॥ भ्रातृभिःसहितःसर्वैःसर्वैश्चैवजनेश्वरैः ॥ २ ॥ शुचापरमयायुक्तश्चिंतयानःपराजयम् ॥ वार्ष्णेयमब्रवीद्राजन्दृष्ट्वाभीष्मस्यविक्रमम् ॥ ३ ॥ कृष्णपश्यमहेष्वासंभीष्मंभीमपराक्रमम् ॥ शरैर्दहंतंसैन्यमेग्रीष्मेकक्षमिवानलम् ॥ ४ ॥ कथमेनंमहात्मानंशक्ष्यामःप्रतिवीक्षितुम् ॥ लेलिह्यमानंसैन्यंमेहविष्मंतमिवानलम् ॥ ५ ॥ एतंहिपुरुषव्याघ्रंधनुष्मंतंमहाबलम् ॥ दृष्ट्वाविप्रद्रुतंसैन्यंसमरेमार्गणाहतम् ॥ ६ ॥ शक्योजेतुंयमःक्रुद्धोवज्रपाणिश्चसंयुगे ॥ वरुणःपाशभृद्वापिकुबेरोवागदाधरः ॥ ७ ॥ नतुभीष्मोमहातेजाःशक्योजेतुंमहाबलः ॥ सोहमेवंगतेमग्नोभीष्मागाधजलेऽप्लवे ॥ ८ ॥ आत्मनोबुद्धिदौर्बल्याद्भीष्ममासाद्यकेशव ॥ वनंयास्यामिवार्ष्णेयश्रेयोमेतत्रजीवितुम् ॥ ९ ॥ नत्वेतान्पृथिवीपालान्दातुंभीष्मायसृत्यवे ॥ क्षपयिष्यतिसेनांमेकृष्णभीष्मोमहास्त्रवित् ॥ १० यथाऽनलंप्रज्वलितंपतंगाःसमभिद्रुताः ॥ विनाशायोपगच्छंतितथामेसैनिकोजनः ॥ ११ ॥ क्षयंनीतोस्मिवार्ष्णेयराज्यहेतोःपराक्रमी ॥ भ्रातरश्चैवमेवीराःकर्शिताःशरपीडिताः ॥ १२ ॥ मत्कृतेभ्रातृहार्देनराज्याद्भ्रष्टास्तथासुखात् ॥ जीवितंबहुमन्येहंजीवितंह्यद्यदुर्लभम् ॥ १३ ॥ जीवितस्यचशेषेणतपस्तप्स्यामिदुश्चरम् ॥ नघातयिष्यामिरणेमित्राणीमानिकेशव ॥ १४ ॥ रथान्मेबहुसाहस्रान्दिव्यैरस्त्रैर्महाबलः ॥ घातयत्यनिशंभीष्मःप्रवराणांप्रहारिणाम् ॥ १५ ॥

कृतेवहारेइति ॥ १ ॥ २ ॥ ३ ॥ कक्षंतृणं ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ अप्लवेऽदुपशून्ये ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ आर्जवेनअकुटिलेनदिव्यास्त्रमायाहीनेन ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ अंतर्मनाःविमनाः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ निधननिधनहेतुः ॥ ३० ॥

किंनुकृत्वाहितंमेस्याद्बूहिमाधवमाचिरम् ॥ मध्यस्थमिवपश्यामिसमरेसव्यसाचिनम् ॥ १६ ॥ एकोभीमःपरंशक्त्यायुध्यत्येवमहाभुजः ॥ केवलंबाहुवीर्येणक्षत्रधर्ममनुस्मरन् ॥ १७ ॥ गदयावीरघातिन्यायथोत्साहंमहामनाः ॥ करोत्यसुकरंकर्ममरथाश्वनरदंतिषु ॥ १८ ॥ नालमेषक्षयंकर्तुंपरसैन्यस्यमारिष ॥ आर्जवेनैवयुद्धेनवीरवर्षशतैरपि ॥ १९ ॥ एकोऽस्त्रवित्सखातेऽयंसोप्यस्मान्समुपेक्षते ॥ निर्दह्यमानान्भीष्मेणद्रोणेनचमहात्मना ॥ २० ॥ दिव्यान्यस्त्राणिभीष्मस्यद्रोणस्यचमहात्मनः ॥ धक्ष्यंतिक्षत्रियान्सर्वान्प्रयुक्तानिपुनःपुनः ॥ २१ ॥ कृष्णभीष्मःसुसंरब्धःसहितःसर्वपार्थिवैः ॥ क्षपयिष्यतिनोनूनंयादृशोस्यपराक्रमः ॥ ॥ २२ ॥ सत्वंपश्यमहाभागयोगेश्वरमहारथम् ॥ भीष्मंयःशमयेत्संख्येदावाग्निंजलदोयथा ॥ २३ ॥ तवप्रसादाद्गोविंदपांडवानिहतद्विषः ॥ स्वराज्यमनुसंप्राप्तामोदिष्यंतेसबांधवाः ॥ २४ ॥ एवमुक्त्वाततःपार्थोध्यायन्नास्तेमहामनाः ॥ चिरमंतर्मनाभूत्वाशोकोपहतचेतनः ॥ शोकार्ततमथोज्ञात्वाद्युःखोपहतचेतसम् २५ अब्रवीत्तत्रगोविंदोहर्षयन्सर्वपांडवान् ॥ माशुचोभरतश्रेष्ठनत्वंशोचितुमर्हसि ॥ २६ ॥ यस्यतेभ्रातरःशूराःसर्वलोकेषुधन्विनः ॥ अहंचप्रियरुद्राजन्सात्यकिश्चमहायशाः ॥ २७ ॥ विराटद्रुपदौचेमौधृष्टद्युम्नश्चपार्षतः ॥ तथैवसबलाश्चेमेराजानोराजसत्तम ॥ २८ ॥ त्वत्प्रसादंप्रतीक्षंतेत्वद्बलाश्चविशांपते ॥ एषतेपार्षतोनित्यंहितकामःप्रियेरतः ॥ २९ ॥ सैनापत्यमनुप्राप्तोधृष्टद्युम्नोमहाबलः ॥ शिखंडीचमहाबाहोभीष्मस्यनिधनंकिल ॥ ३० ॥ एतच्छ्रुत्वाततोधर्मोधृष्टद्युम्नंमहारथम् ॥ अब्रवीत्समितौतस्यांवासुदेवस्यशृण्वतः ॥ ३१ ॥ धृष्टद्युम्ननिबोधेदंयत्त्वांवक्ष्यामिमारिष ॥ नातिक्रम्यंभवेत्तच्चवचनंममभाषितम् ॥ ३२ ॥ भवान्सेनापतिर्मत्त्यंवासुदेवेनसंमितः ॥ कार्तिकेयोयथानित्यंदेवानामभवत्पुरा ॥ ३३ ॥ तथात्वमपिपांडूनांसेनानीःपुरुषर्षभ ॥ सत्वंपुरुषशार्दूलविक्रम्यजहिकौरवान् ॥ ३४ ॥ अहंचतेनुयास्यामिभीमःकृष्णश्चमारिष ॥ माद्रीपुत्रौचसहितौद्रौपदेयाश्चदंशिताः ॥ ३५ ॥ येचान्येपृथिवीपालाःप्रधानाःपुरुषर्षभ ॥ ततउद्धर्षयन्सर्वान्धृष्टद्युम्नोभ्यभाषत ॥ ३६ ॥ अहंद्रोणांतकःपार्थविहितःशंभुनापुरा ॥ रणेभीष्मंकृपंद्रोणंतथाशल्यंजयद्रथम् ॥ ३७ ॥ सर्वानद्यरणेदृप्तान्प्रतियोत्स्यामिपार्थिव ॥ अथोत्कृष्टंमहेष्वासैःपांडवैर्युद्धदुर्मदैः ॥ ३८ ॥ समुद्यतेपार्थिवेंद्रेपार्षतेशत्रुसूदने ॥ तमब्रवीत्ततःपार्थःपार्षतंपृतनापतिम् ॥ ३९ ॥

॥ ३१ ॥ भाषितमुक्तं ॥ ३२ ॥ मत्समम ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ आकाशगइवपक्षीव ॥ ४४ ॥ रथचर्यासुरथवर्त्मसु ॥ ४५ ॥ परमोपेतःपराऽस्कन्दाचार्यालंक्ष्मीश्चेतिपरमातदाऽपेतः ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

व्यूहःकौंचारुणोनामसर्वशत्रुनिबर्हणः॥ यंबृहस्पतिरिंद्रायतदादेवासुरेब्रवीत् ॥ ४० ॥तंययावत्प्रतिव्यूहंपरानीकविनाशनम् ॥ अदृष्टपूर्वराजानःपश्यंतुकुरुभिःसह ॥ ४१ ॥ यथोक्तःसनृदेवेनविष्णुर्वज्रभृतायथा ॥ प्रभातेसर्वसैन्यानामग्रेचकेधनंजयम् ॥ ४२ ॥ आदित्यपथगःकेतुस्तस्याद्भुतमनोरमः ॥ शामनात्पुरुहूतस्यनिर्मितोविश्वकर्मणा ॥ ४३ ॥ इंद्रायुधसवर्णाभिःपताकाभिरलंकृतः ॥ आकाशगइवाकाशेगंधर्वनगरोपमः ॥ ४४ ॥ नृत्यमानइवाभातिरथचर्यासुमारिष ॥ तेनरत्नवतापार्थःसचगांडीवधन्वना ॥ ४५ ॥ बभूवपरमोपेतःसुमेरुरिवभानुना ॥ शिरोभूद्रुपदोराजामहत्यासेनयावृतः ॥ ४६ ॥ कुंतिभोजश्चचैद्यश्चचक्षुर्भ्यांतौजनेश्वरौ ॥ दाशार्णकाःप्रभद्राश्चदाशेरकगणैःसह ॥ ४७ ॥ अनूपकाःकिराताश्चग्रीवायांभरतर्षभ ॥ पटच्चरैश्चपौंड्रैश्चराजन्पौरवकैस्तथा ॥ ४८ ॥ निषादैःसहितश्चापिपृष्ठमासीद्युधिष्ठिरः ॥ पक्षौतुभीमसेनश्चधृष्टद्युम्नश्चपार्षतः ॥ ४९ ॥ द्रौपदेयाश्चिमन्युश्चसात्यकिश्चमहारथः ॥ पिशाचादारदाश्चैवपुंड्राःकुंडीविषैःसह ॥ ५० ॥ मारुताधेनुकाश्चैवतंगणाःपरतंगणाः ॥ वाह्लिकास्तित्तिराश्चैवचोलाःपांड्याश्चभारत ॥ ५१ ॥ एतेजनपदाराजन्दक्षिणंपक्षमाश्रिताः ॥ अग्निवेशान्सुदुंडाश्चमालवादानभारयः ॥ ५२ ॥ शबराउद्भसाश्चैववत्साश्चसहनाकुलैः ॥ नकुलःसहदेवश्चवामंपक्षंसमाश्रिताः ॥ ५३ ॥ रथानामयुतंपक्षौशिरस्युनियुतंनया ॥ पृष्ठमर्बुदमेवासीत्सहस्राणिचविंशतिः ॥ ५४ ॥ ग्रीवायांनियुतंचापिसहस्राणिचसप्ततिः ॥ पक्षकोटिप्रपक्षेषुपक्षांतेषुचवारणाः ॥ ५५ ॥ जग्मुःपरिवृताराजंश्चलंतइवपर्वताः ॥ जघनंपालयामासविराटःसहकेकयैः ॥ ५६ ॥ काशिराजश्चशैब्यश्चरथानामयुतैस्त्रिभिः ॥ एवमेनंमहाव्यूहंव्यूह्यभारतपांडवाः ॥ ५७ ॥ सूर्योदयंतइच्छंतःस्थितायुद्धायदंशिताः ॥ तेषामादित्यवर्णानिविमलानिमहांतिच ॥ श्वेतच्छत्राण्यशोभंतवारणेपुरथेषुच ॥ ५८ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव० कौंचव्यूहनिर्माणेपंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ कौंचंदृष्ट्वाततोव्यूहमनीकंतनयस्तव ॥ रक्ष्यमाणंमहाघोरंपार्थेनामिततेजसा ॥ १ ॥ आचार्यमुपसंगम्यकृपंशल्यंचपार्थिव ॥ सौमदत्तिंविकर्णंचसोश्वत्थामानमेवच ॥ २ ॥ दुःशासनादीन्भ्रातॄंश्चसर्वानेवचभारत ॥ अब्रवीत्तावकान्योधान्शूरान्युद्धायसमुपागतान् ॥ ३ ॥

॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ॥ इतिश्रीभीष्मपर्वणिनीलकंठीयेभारतभावदीपेपंचाशत्तमोऽध्यायः ५० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ कौंचमिति ॥ १ ॥ २ ॥ ३ ॥

॥ ४ ॥ ५ ॥ अपर्याप्तमपर्याप्तं ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ अतिभव्यमितिभूः क्विप् ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

प्रोद्दंडवचनंकालेदर्पयंस्तनयस्तव ॥ नानाशस्त्रप्रहरणाःसर्वेयुद्धविशारदाः ॥ ४ ॥ एककशःसमर्थाहियूयंसर्वमहारथाः ॥ पांडुपुत्रान्रणेहंतुंससैन्यानकिमुसंहताः ॥ ५ ॥ अपर्याप्तंतदस्माकंबलंभीष्माभिरक्षितम् ॥ पर्याप्तमिदमेतेषांबलंभीमाभिरक्षितम् ॥ ६ ॥ संस्थानाःशूरसेनाश्चवेत्रिकाःकुकुरास्तथा ॥ आरोचकास्त्रिगर्ताश्चमद्रकायवनास्तथा ॥ ७ ॥ शत्रुंजयेनमहितास्तथादुःशासनेनच ॥ विकर्णेनचवीरेणतथानंदोपनंदकैः ॥ ८ ॥ चित्रसेननसहिताःसहिताःपारिभद्रकैः ॥ भीष्ममेवाभिरक्षंतुमहत्सैन्यपुरस्कृताः ॥ ९ ॥ ततोभीष्मश्चद्रोणश्चतवपुत्राश्चमारिष ॥ अव्यूहंतमहाव्यूहंपांडूनांप्रतिबाधकम् ॥ १० ॥ भीष्मःसैन्येनमहतासमंतात्परिवारितः ॥ ययौप्रकर्षन्महतींवाहिनींसुरराडिव ॥ ११ ॥ तमन्वयान्महेष्वासोभारद्वाजःप्रतापवान् ॥ कुंतलैश्चदशार्णैश्चमागधैश्चविशांपते ॥ १२ ॥ विदर्भैर्मेकलैश्चैवकर्णप्रावरणैरपि ॥ महिताःसर्वसैन्येनभीष्ममाहवशोभिनम् ॥ १३ ॥ गांधाराःसिंधुसौवीराःशिवयोथवसातयः ॥ शकुनिश्चस्वसैन्येनभारद्वाजमपालयन् ॥ १४ ॥ ततोदुर्योधनोराजामहितःसर्वसोदरैः ॥ अभ्यातकैर्विकर्णैश्चतथाचांवष्ठकोसलैः ॥ १५ ॥ दरदैश्चशकैश्चैवतथाक्षुद्रकमालवैः ॥ अभ्यरक्षतसंहृष्टःसौवलेयस्यवाहिनीम् ॥ १६ ॥ भूरिश्रवाःशलःशल्योभगदत्तश्चमारिषः ॥ विंदानुविंदावावंत्यौवामंपार्श्वमपालयन् ॥ १७ ॥ सौमदत्तिःसुशर्माचकांबोजश्चसुदक्षिणः ॥ श्रुतायुश्चाच्युतायुश्चदक्षिणंपक्षमाश्रिताः ॥ १८ ॥ अश्वत्थामाकृपश्चैवकृतवर्माचसात्वतः ॥ महत्यासेनयासार्धंसेनापृष्ठेव्यवस्थिताः ॥ १९ ॥ पृष्ठगोपाश्चतस्यासन्नानादेश्याजनेश्वराः ॥ केतुमान्वसुदानश्चपुत्रःकाश्यस्यचाभिभूः ॥ २० ॥ ततस्तेतावकाःसर्वेहृष्टायुद्धायभारत ॥ दध्मुःशंखान्मुदायुक्ताःसिंहनादांस्तथोन्नदन् ॥ २१ ॥ तेषांश्रुत्वातुहृष्टानांतद्वःकुरुपितामहः ॥ सिंहनादंविनद्योच्चैःशंखंदध्मौप्रतापवान् ॥ २२ ॥ ततःशंखाश्चभेर्यश्चपेश्यश्चविविधाःपरैः ॥ आनकाश्चाभ्यहन्यंतसशब्दस्तुमुलोभवत् ॥ २३ ॥ ततःश्वेतैर्हयैर्युक्तेमहतिस्यंदनेस्थितौ ॥ प्रदध्मतुःशंखवरौहेमरत्नपरिष्कृतौ ॥ २४ ॥ पांचजन्यंहृषीकेशोदेवदत्तंधनंजयः ॥ पौंड्रंदध्मौमहाशंखंभीमकर्मावृकोदरः ॥ २५ ॥ अनंतविजयंराजाकुंतीपुत्रोयुधिष्ठिरः ॥ नकुलःसहदेवश्चसुघोषमणिपुष्पकौ ॥ २६ ॥ काशिराजश्चशैब्यश्चशिखंडीचमहारथः ॥ धृष्टद्युम्नोविराटश्चसात्यकिश्चमहारथः ॥ २७ ॥ पांचाल्याश्चमहेष्वासाद्रौपद्याःपंचचात्मजाः ॥ सर्वेदध्मुर्महाशंखान्सिंहनादांश्चनेदिरे ॥ २८ ॥ सघोषःसुमहांस्तत्रवीरैस्तैःसमुदीरितः ॥ नभश्चपृथिवींचैवतुमुलोव्यनुनादयन् ॥ २९ ॥

॥ ३० ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेएकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ एवमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ व्यतिकीर्णमे

एवमेतेमहाराजप्रहृष्टाःकुरुपांडवाः॥ पुनर्युद्धायसंजग्मुस्तापयानाःपरस्परम्॥ ३० ॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०कौरवव्यूहरचनायांएक
पंचाशत्तमोऽध्यायः॥ ५१ ॥ ॥७॥ ॥ धृतराष्ट्रउवाच ॥ ॥ एवंव्यूढेष्वनीकेषुमामकेष्वितरेषुच ॥ कथंप्रहरतांश्रेष्ठाःसंप्रहारंप्रचक्रिरे ॥ १ ॥ ॥
संजयउवाच ॥ ॥समंव्यूढेष्वनीकेषुसन्नद्धरुचिरध्वजम्॥ अपारमिवसंदृश्यसागरप्रतिमंबलम्॥ २॥तेषांमध्येस्थितोराजन्पुत्रोदुर्योधनस्तव॥ अब्रवीत्ताव
कान्सर्वान्युद्ध्यध्वमितिदंशिताः॥ ३॥तेमनःकूरमाधायसमभित्यक्तजीविताः॥ पांडवानभ्यवर्तंतसर्वएवोच्छ्रितध्वजाः॥ ४॥ततोयुद्धंसमभवत्तुमुलंलोम
हर्षणम्॥ तावकानांपरेषांचव्यतिषक्तरथद्विपम्॥ ५॥मुक्तास्तुरथिभिर्बाणारुक्मपुंखाःसुतेजसः॥ सन्निपेतुरकुंठाग्रानागेषुचहयेषुच॥ ६॥तथाप्रवृत्तेसंग्रामे
धनुरुद्यम्यदंशितः॥ अभिपत्यमहाबाहुर्भीष्मोभीमपराक्रमः॥ ७॥सौभद्रेभीमसेनेचसात्यकौचमहारथे॥ कैकेयेचविराटेचधृष्टद्युम्नेचपार्षते॥ ८॥एतेपुनरवी
रेषुचेदिमत्स्येषुचाभिभूः॥ ववर्षशरवर्षाणिदृढःकुरुपितामहः॥ ९॥ अभिद्यततोव्यूहस्तस्मिन्वीरसमागमे॥ सर्वेषामेवसैन्यानामासीद्भृतिकरोमहान्॥ १०॥
सादिनोध्वजिनश्चैवहतप्रवरवाजिनः॥ विप्रद्रुतरथानीकाःसमपद्यंतपांडवाः॥ ११॥ अर्जुनस्तुनरव्याघ्रोदृष्ट्वाभीष्ममहारथम्॥ वार्ष्णेयमब्रवीत्कृद्धोयाहिय
त्रपितामहः॥ १२॥एषभीष्मःसुसंकृद्धोवार्ष्णेयममवाहिनीम्॥ नाशयिष्यतिसुव्यक्तंदुर्योधनहितेरतः॥ १३॥एषद्रोणःकृपःशल्योविकर्णश्चजनार्दन॥ धार्त
राष्ट्राश्चसहितादुर्योधनपुरोगमाः॥ १४॥पंचालान्निहनिष्यंतिरक्षितादृढधन्वना॥ सोहंभीष्मंवधिष्यामिसैन्यहेतोर्जनार्दन॥ १५॥तमब्रवीद्वासुदेवोयत्तोभव
धनंजय॥ एषत्वांप्रापयिष्यामिपितामहरथंप्रति॥ १६॥एवमुक्त्वाततःशौरीरथंतंलोकविश्रुतम्॥ प्रापयामासभीष्मस्यरथंप्रतिजनेश्वर॥ १७॥चलद्दृपता
केनबलाकावर्णवाजिना॥ समुच्छ्रितमहाभीमनदद्वानरकेतुना॥ १८॥ महतामेघनादेनरथेनामिततेजसा॥ विनिघ्नन्कौरवानीकंशूरसेनांश्चपांडवः॥ १९॥
प्रायाच्छरणदःशीघ्रंसुहृदांहर्षवर्धनः॥ तमापततंवेगेनप्रभिन्नमिववारणम्॥ २०॥ त्रासयंतंरणेशूरान्मर्दयंतंचसायकैः॥ सैंधवप्रमुखैर्गुप्तःप्राच्यसौवीरके
कयैः॥ २१॥ सहसाप्रत्युदीयाथभीष्मःशांतनवोर्जुनम्॥ कोहिगांडीवधन्वानमन्यःकुरुपितामहात्॥ २२॥

लकःसमागमइत्यर्थः॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ दृढधन्वनाभीष्मेण ॥ १५ ॥ यत्तःयत्नवान्॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

द्रोणवैकर्तनाभ्यांवारथीसंयातुमर्हति॥ ततोभीष्मोमहाराजसर्वलोकमहारथः॥ २३॥ अर्जुनंसमसमत्यानाराचानांसमाचिनोत्॥ द्रोणश्चपंचविंशत्याकृपःपं
चाशताशरैः॥ २४॥ दुर्योधनश्चतुःषष्ट्याशल्यश्चनवभिःशरैः॥ सैंधवोनवभिश्चैवशकुनिश्चापिपंचभिः॥ २५॥ विकर्णोदशभिर्भल्लैराजन्विव्याधपांडवम्॥ सतै
र्विद्धोमहेष्वासःसमंतान्निशितैःशरैः॥ २६॥नविव्यथेमहाबाहुर्भिद्यमानइवाचलः॥ सभीष्मंपंचविंशत्याकृपंचनवभिःशरैः॥ २७॥द्रोणंषष्ट्यानरव्याघ्रोविकर्ण
चत्रिभिःशरैः॥ शल्यंचैवत्रिभिर्बाणैराजानंचैवपंचभिः॥ २८॥ प्रत्यविध्यदमेयात्माकिरीटीभरतर्षभ॥ तंसात्यकिर्विराटश्चधृष्टद्युम्नश्चपार्षतः॥ २९॥ द्रौपदे
याश्चिमन्युश्चपरिवव्रुर्धनंजयम्॥ ततोद्रोणंमहेष्वासंगांगेयस्यप्रियेरतम्॥ ३०॥ अभ्यवर्ततपांचाल्यःसंयुक्तःसहसोमकैः॥ भीष्मस्तुरथिनांश्रेष्ठोराजन्विव्याध
पांडवम्॥ ३१॥ अशीत्यानिशितैर्बाणैस्ततोऽकोशंततावकाः॥ तेषांतुनिनदंश्रुत्वासहितानांप्रहृष्यवत्॥ ३२॥ प्रविवेशततोमध्यंनरसिंहःप्रतापवान्॥ तेषांमहा
रथानांसमध्यंप्राप्यधनंजयः॥ ३३॥ चिक्रीडधनुषाराजँल्लंघयन्रथवारणान्॥ ततोदुर्योधनोराजाभीष्ममाहजनेश्वरः॥ ३४॥ पीड्यमानंस्वकंसैन्यंदृष्ट्वापा
र्थेनसंयुगे॥ एषपांडुसुतस्तातकृष्णेनसहितोबली॥ ३५॥ यततांसर्वसैन्यानांमूलंनःपरिकृंतति॥ त्वयिजीवतिगांगेयद्रोणेचरथिनांवरे॥ ३६॥ त्वत्कृतेचैवक
र्णोपिन्यस्तशस्त्रोविशांपते॥ नयुध्यतिरणेपार्थोहितकामःसदामम॥ ३७॥ सतथाकुरुगांगेययथाहन्येतफाल्गुनः॥एवमुक्तस्ततोराजन्पितादेवव्रतस्तव॥ ३८॥
धिक्क्षात्रंधर्ममित्युक्त्वाप्रायात्पार्थरथंप्रति॥ उभौश्वेतहयौराजन्संसक्तौप्रेक्ष्यपार्थिवाः॥ ३९॥ सिंहनादान्मुहुश्चक्रुःशंखान्दध्मुश्चमारिष॥ द्रौणिर्दुर्योधन
श्चैवविकर्णश्चतवात्मजः॥ ४०॥ परिवार्यरणेभीष्मंस्थितायुद्धायमारिष॥ तथैवपांडवाःसर्वेपरिवार्यधनंजयम्॥ ४१॥ स्थितायुद्धायमहतेततोयुद्धमवर्तत॥
गांगेयस्तुरणेपार्थमानर्च्छन्नवभिःशरैः॥ ४२॥ तमर्जुनःप्रत्यविध्यद्दशभिर्मर्मभेदिभिः॥ ततःशरसहस्रेणसुप्रयुक्तेनपांडवः॥ ४३॥ अर्जुनःसमरश्लाघीभी
ष्मस्यावारयद्दिशः॥ शरजालंततस्तुशरजालेनमारिष॥ ४४॥ वारयामासपार्थस्यभीष्मःशांतनवस्तदा॥ उभौपरमसंहृष्टावुभौयुद्धाभिनंदिनौ॥ ४५॥ नि
र्विशेषमयुध्येतांकृतप्रतिकृतैषिणौ॥ भीष्मचापविमुक्तानिशरजालानिसंघशः॥४६॥ शीर्यमाणान्यदृश्यंतभिन्नान्यर्जुनसायकैः॥ तथैवार्जुनमुक्तानिशरजा
लानिसर्वशः॥ ४७॥ गांगेयशरनुन्नानिप्रापतंतमहीतले॥ अर्जुनःपंचविंशत्याभीष्ममार्च्छच्छितैःशरैः॥ ४८॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ अंतरिक्षं तर्कयंतौचिंतयंतौ ॥ ५५ ॥ अंतरमार्गस्थौछिद्रान्वेषणपरौ ॥ ५६ ॥ ५७ ॥ ५८ ॥ चिह्नंध्वजः ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

भीष्मोपिसमरेपार्थंविव्याधनिशितैःशरैः॥ अन्योन्यस्यहयान्विद्ध्वाध्वजौचसुमहाबलौ ॥ ४९ ॥ रथेषांरथचक्रेचचिक्रीडतुरिंदमौ॥ ततःकुद्धोमहाराजभीष्मःप्रहरतांवरः॥ ५० ॥ वासुदेवंत्रिभिर्बाणैराजघानस्तनांतरे॥ भीष्मचापच्युतैस्तैस्तुनिर्विद्धोमधुसूदनः॥ ५१ ॥ विरराजरणेराजन्सपुष्पइवकिंशुकः॥ ततोर्जुनोभृशंकुद्धोनिर्विद्धंप्रेक्ष्यमाधवम्॥ ५२॥ सारथिंकुरुवृद्धस्यनिर्बिभेदशितैःशरैः॥ यतमानौतुतौवीरावन्योन्यस्यवधंप्रति॥५३॥ नशक्तांतांदान्योन्यमभिसंधातुमाहवे॥ तौमंडलानिचित्राणिगतप्रत्यागतानिच॥ ५४॥ अदर्शयेतांबहुधासूतसामर्थ्यलाघवात्॥ अंतरंचप्रहारेषुतर्कयंतौपरस्परम्॥५५॥ राजन्नंतरमार्गस्थौस्थितावास्तांमुहुर्मुहुः॥ उभौसिंहरवोन्मिश्रंशंखशब्दंचचक्रतुः॥ ५६॥ तथैवचापनिर्घोषंचक्रतुस्तौमहारथौ॥ तयोःशंखनिनादेनरथनेमिस्वनेनच ॥ ५७॥ दारितासहसाभूमिश्चकंपेचननादच॥ नोभयोरंतरंकश्चिद्दृदृशेभरतर्षभ ॥ ५८॥ बलिनौयुद्धदुर्धर्षावन्योन्यसदृशावुभौ॥ चिह्नमात्रेणभीष्मंतुप्रजघ्नुस्तत्रकौरवाः॥५९॥तथापांडुसुताःपार्थंचिह्नमात्रेणजज्ञिरे॥ तयोर्नृवरयोर्दृष्ट्वाताद्दृशंतंपराक्रमम्॥६०॥विस्मयंसर्वभूतानिजग्मुर्भारतसंयुगे॥नतयोर्विवरंकश्चिद्रणेपश्यतिभारत॥ ६१॥ धर्मेस्थितस्यहियथानकश्चिद्दृजिनंक्वचित्॥ उभौचशरजालेनतावदृश्यौबभूवतुः॥६२॥ प्रकाशौचपुनस्तूर्णंबभूवतुरुभौरणे॥तत्र देवाःसगंधर्वाश्चारणाश्चर्षिभिःसह॥६३॥अन्योन्यंप्रत्यभाषंततयोर्दृष्ट्वापराक्रमम्॥नशक्यौयुधिसंरब्धौजेतुमेतौकथंचन॥६४॥सदेवासुरगंधर्वैर्लोकैरपिमहारथौ॥ आश्चर्यभूतंलोकेषुयुद्धमेतन्महाद्भुतम्॥ ६५॥ नैतादृशानियुद्धानिभविष्यंतिकथंचन॥ नहिशक्योरणेजेतुंभीष्मःपार्थेनधीमता॥६६॥ सधनुःसरथःसाश्वःप्रवपन्सायकान्रणे॥ तथैवपांडवंयुद्धेदेवैरपिदुरासदम्॥६७॥ नविजेतुंरणेभीष्मउत्सहेतधनुर्धरम्॥आलोकादपियुद्धेहिसममेतद्भविष्यति॥६८॥ इतिस्मवाचोऽश्रूयंतप्रोच्चरंत्यस्ततस्ततः॥ गांगेयार्जुनयोःसंख्येस्तवयुक्ताविशांपते ॥ ६९॥ त्वदीयास्तुतदायोधाःपांडवेयाश्चभारत॥ अन्योन्यंसमरेजघ्नुस्तयोस्तत्रपराक्रमे॥ ७०॥ शितधारैस्तथाखड्गैर्विमलैश्चपरश्वधैः॥ शरैरन्यैश्चबहुभिःशस्त्रैर्नानाविधैरपि॥ ७१॥ उभयोःसेनयोःशूरान्यकृंतंतपरस्परम्॥वर्तमानेतथाघोरेतस्मिन्युद्धेसुदारुणे॥ द्रोणपांचाल्ययोराजन्महानासीत्समागमः॥७२॥ ॥ इ०म०भीष्मप०भीष्मव०भीष्मार्जुनयुद्धेद्विपंचाशत्तमोऽध्यायः॥ ५२॥

आलोकात्आससारस्थितेः॥ ६८॥ ६९॥ ७०॥ ७१॥ ७२॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेद्विपंचाशत्तमोऽध्यायः॥ ५२॥ ॥ ७ ॥

कथमिति ॥१॥२॥ नातरत्नलंघितवान् ॥३॥४॥नीडात्स्थानात् ॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥व्यंसयामाससंसक्तापियथानभवतिनथावंचयतिस्म ॥ २० ॥

धृतराष्ट्रउवाच॥ ॥ कथंद्रोणोमहेष्वासःपांचाल्यश्चापिपार्षतः॥ उभौसमीयतुर्युद्धेतन्ममाचक्ष्वसंजय ॥ १ ॥ दिष्टमेवपरंमन्येपौरुषादितिमेमतिः॥ यत्रशांतनवोभीष्मोनातरद्युधिपांडवम्॥ २॥ भीष्मोहिसमरेक्रुद्धोहन्याल्लोकांश्चराचरान्॥ सकथंपांडवंयुद्धेनातरत्संजयौजसा॥ ३॥ ॥ संजयउवाच॥ ॥ शृणुराजन्स्थिरोभूत्वायुद्धमेतत्सुदारुणम्॥ नशक्याःपांडवाजेतुंदेवैरपिसवासवैः॥४॥द्रोणस्तुनिशितैर्बाणैर्धृष्टद्युम्नमविध्यत॥सारथिंचास्यभल्लेनरथनीडादपातयत्॥५॥तयास्यचतुरोवाहांश्चतुर्भिःसायकोत्तमैः॥ पीडयामाससंक्रुद्धोधृष्टद्युम्नस्यमारिष॥६॥धृष्टद्युम्नस्ततोद्रोणंनवत्यानिशितैःशरैः॥विव्याधप्रहसन्वीरस्तिष्ठतिष्ठेतिचाब्रवीत्॥७॥ ततःपुनरमेयात्माभारद्वाजःप्रतापवान्॥ शरैःप्रच्छादयामासधृष्टद्युम्नममर्षणम्॥ ८॥ आददेचशरंघोरंपार्षतांतचिकीर्षया॥शक्राशनिसमस्पर्शंकालदंडमिवापरं॥९॥हाहाकारोमहानासीत्सर्वसैन्येषुभारत॥ तमिषुंसंधितंदृष्ट्वाभारद्वाजेनसंयुगे॥१०॥ तत्राद्भुतमपश्यामधृष्टद्युम्नस्यपौरुषं॥ यदेकःसमरेवीरस्तस्थौगिरिरिवाचलः॥ ११॥ तंचदीप्तंशरंघोरमायांतंमृत्युमात्मनः॥ चिच्छेदशरवृष्टिंचभारद्वाजेमुमोचह॥ १२॥ ततउच्चुक्रुशुःसर्वेपंचालाःपांडवैःसह॥ धृष्टद्युम्ननेतत्कर्मकृतंदृष्ट्वासुदुष्करम्॥ १३॥ ततःशक्तिंमहावेगांस्वर्णवैदूर्यभूषिताम्॥ द्रोणस्यनिधनाकांक्षीचिक्षेपसपराक्रमी॥१४॥तामापतंतींसहसाशक्तिंकनकभूषिताम्॥ त्रिधाचिच्छेदसमरेभारद्वाजोहसन्निव ॥ १५॥ शक्तिंविनिहतांदृष्ट्वाधृष्टद्युम्नःप्रतापवान्॥ ववर्षशरवर्षाणिद्रोणंप्रतिजनेश्वर॥ १६॥ शरवर्षंततस्तुसंनिवार्यमहायशाः॥ द्रोणोद्रुपदपुत्रस्यमध्येचिच्छेदकार्मुकम्॥ १७॥ सच्छिन्नधन्वासमरेगदांगुर्वीमहायशाः॥ द्रोणायप्रेषयामासगिरिसारमयींबली॥ १८॥ सागदावेगवन्मुक्ताप्रायाद्द्रोणजिघांसया॥ तत्राद्भुतमपश्यामभारद्वाजस्यपौरुषम्॥ १९॥ लाघवाद्भ्रंसयामासगदांहिमविभूषिताम्॥ व्यंसयित्वागदांतांचप्रेषयामासपार्षतम्॥ २०॥ भल्लान्सुनिशितान्पीतान्रुक्मपुंखान्सुदारुणान्॥ तेतस्यकवचंभित्त्वापपुःशोणितमाहवे॥ २१॥ अथान्यद्धनुरादायधृष्टद्युम्नोमहारथः॥द्रोणंयुधिपराक्रम्यशरैर्विव्याधपंचभिः॥२२॥ रुधिराक्तौततस्तौतुशुशुभातेनरर्षभौ॥वसंतसमयेराजन्पुष्पिताविवकिंशुकौ॥२३ अमर्षितस्ततोराजन्पराक्रम्यचमूमुखे॥ द्रोणोद्रुपदपुत्रस्यपुनश्चिच्छेदकार्मुकम्॥ २४॥ अथैनंछिन्नधन्वानंशरैःसन्नतपर्वभिः॥ अभ्यवर्षदमेयात्माहृष्यमेघइवाचलम्॥२५॥ सारथिंचास्यभल्लेनरथनीडादपातयत्॥अथास्यचतुरोवाहांश्चतुर्भिर्निशितैःशरैः॥२६॥ पीतान्पायितजलान् ॥२१॥२२॥२३॥२४॥२५॥२६॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ॥ इ० भी० नी० भा० त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ ७ ॥ ॥ ७ ॥

पातयामाससमरेसिंहनादंननादच ॥ ततोपरेणभल्लेनहस्तावापमथाच्छिनत् ॥ २७ ॥ सच्छिन्नधन्वाविरथोहताश्वोहतसारथिः ॥ गदापाणिरवारोहत्स्यापयन्पौरुषंमहत् ॥ २८ ॥ तामस्यविशिखैस्तूर्णंपातयामासभारत ॥ रथादनवरूढस्यतदद्भुतमिवाभवत् ॥ २९ ॥ ततःसविपुलंचर्मशतचंद्रंचभानुमत् ॥ खड्गंच विपुलंदिव्यंप्रगृह्यसुभुजोबली ॥ ३० ॥ अभिदुद्राववेगेनद्रोणस्यवधकांक्षया ॥ आमिषार्थीयथासिंहोवनेमत्तमिवद्विपम् ॥ ३१ ॥ तत्राद्भुतमपश्यामभारद्वाजस्यपौरुषम् ॥ लाघवंचास्त्रयोगंचबलंबाह्वोश्चभारत ॥ ३२ ॥ यदेनंशरवर्षेणवारयामासपार्षतम् ॥ नशशाकततोगंतुंबलवानपिसंयुगे ॥ ३३ ॥ निवारितस्तुद्रोणेनधृष्टद्युम्नोमहारथः ॥ न्यवारयच्छरौघांस्तांश्चर्मणाकृतहस्तवत् ॥ ३४ ॥ ततोभीमोमहाबाहुःसहसाभ्यपतद्बली ॥ साहाय्यकारीसमरेपार्षतस्यमहात्मनः ॥ ३५ ॥ सद्रोणंनिशितैर्बाणैराजन्विव्याधसप्तभिः ॥ पार्षतंचरथंतूर्णंस्वकमारोहयत्तदा ॥ ३६ ॥ ततोदुर्योधनोराजन्भानुमंतमचोदयत् ॥ सैन्येनमहतायुक्तंभारद्वाजस्यरक्षणे ॥ ३७ ॥ ततःसामहतीसेनाकलिंगानांजनेश्वर ॥ भीममभ्युद्ययौतूर्णंतवपुत्रस्यशासनात् ॥ ३८ ॥ पांचाल्यमथसंत्यज्यद्रोणोपिरथिनांवरः ॥ विराटद्रुपदौचैद्यौवारयामाससंयुगे ॥ ३९ ॥ धृष्टद्युम्नोपिसमरेधर्मराजानमभ्ययात् ॥ ततःप्रववृतेयुद्धंतुमुलंलोमहर्षणम् ॥ ४० ॥ कलिंगानांचसमरेभीमस्यचमहात्मनः ॥ जगतःप्रक्षयकरंघोररूपंभयावहम् ॥ ४१ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव० धृष्टद्युम्नद्रोणयुद्धेत्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ ७ ॥

धृतराष्ट्रउवाच ॥ ॥ तथाप्रतिसमादिष्टःकालिंगोवाहिनीपतिः ॥ कथमद्भुतकर्माणंभीमसेनंमहाबलम् ॥ १ ॥ चरंतंगदयावीरंदंडहस्तमिवांतकम् ॥ योधयामास समरेकालिंगःसहसेनया ॥ २ ॥ संजयउवाच ॥ ॥ पुत्रेणतवराजेंद्रसतथोक्तोमहाबलः ॥ महत्यासेनयागुप्तःप्रायाद्भीमरथंप्रति ॥ ३ ॥ तामापतंतींमहतींकलिंगानांमहाचमूम् ॥ रथाश्वनागकलिलांप्रगृहीतमहायुधाम् ॥ ४ ॥ भीमसेनःकलिंगानामार्छद्भारतवाहिनीम् ॥ केतुमंतंचनैषादिमायांतंसहचेदिभिः ॥ ५ ॥ ततःश्रुतायुःसंक्रुद्धोराज्ञाकेतुमतासह ॥ आससादरणेभीमंव्यूढानीकेषुचेदिषु ॥ ६ ॥ रथैरनेकसाहस्रैःकलिंगानांनराधिप ॥ अयुतेनगजानांचनिषादैःसहकेतुमान् ॥ ७ ॥ भीमसेनंरणेराजन्समंतात्पर्यवारयत् ॥ चेदिमत्स्यकरूषाश्चभीमसेनपदानुगाः ॥ ८ ॥ अभ्यधावंतसमरेनिषादान्सहराजभिः ॥ ततःप्रववृतेयुद्धंघोररूपंभयावहम् ॥ ९ ॥ नप्राजानंतयोधाःस्वान्परस्परजिघांसया ॥ घोरमासीत्ततोयुद्धंभीमस्यसहसापरैः ॥ १० ॥ तथेति ॥ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

॥ ११३ ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ भानुमंतंकलिंगात्मजम् ॥ ३४ ॥ ३५ ॥ ३६ ॥

यथेंद्रस्यमहाराजमहत्यादैत्यसेनया ॥ तस्यसैन्यस्यसंग्रामेयुध्यमानस्यभारत ॥ ११ ॥ बभूवसुमहान्शब्दःसागरस्येवगर्जतः ॥ अन्योन्यंस्मतदायोधाविकर्षंतोविशांपते ॥ १२ ॥ महींचक्रुश्चितांसर्वांशशलोहितसंनिभम् ॥ योधांश्चस्वान्परान्वापिनाभ्यजानन्जिघांसया ॥ १३ ॥ स्वानप्याददतेस्वाश्वशूराःपरमदुर्जयाः ॥ विमर्दःसुमहानासीदल्पानांबहुभिःसह ॥ १४ ॥ कलिंगैःसहचेदीनांनिषादैश्चविशांपते ॥ कृत्वापुरुषकारंतुयथाशक्तिमहाबलाः ॥ १५ ॥ भीमसेनंपरित्यज्यसंन्यवर्ततचेदयः ॥ सर्वैःकलिंगैरासन्नःसन्निवृत्तेषुचेदिषु ॥ १६ ॥ स्वबाहुबलमास्थायसंन्यवर्ततपांडवः ॥ नचचालरथोपस्थाद्भीमसेनोमहाबलः ॥ १७ ॥ शितैरवाकिरद्बाणैःकलिंगानांवरूथिनीम् ॥ कालिंगस्तुमहेष्वासःपुत्रश्चास्यमहारथः ॥ १८ ॥ शक्रदेवइतिख्यातोजघ्नतुःपांडवंशरैः ॥ ततोभीमोमहाबाहुर्विधुन्वन्रुचिरंधनुः ॥ १९ ॥ योधयामासकालिंगंस्वबाहुबलमाश्रितः ॥ शक्रदेवस्तुसमरेविस्रजन्सायकान्बहून् ॥ २० ॥ अश्वान्जघानसमरेभीमसेनस्यसायकैः ॥ तंदृष्ट्वाविरथंतत्रभीमसेनमरिंदमम् ॥ २१ ॥ शक्रदेवोभिदुद्रावशरैरवकिरन्शितैः ॥ भीमस्योपरिराजेंद्रशक्रदेवोमहाबलः ॥ २२ ॥ ववर्ष शरवर्षाणितपांतेजलदोयथा ॥ हताश्वेतुरथेतिष्ठन्भीमसेनोमहाबलः ॥ २३ ॥ शक्रदेवायचिक्षेपसर्वशौक्त्यायसींगदां ॥ सतयानिहतोराजन्कालिंगतनयोरथात् ॥ २४ ॥ विरथःसहसूतेनजगामधरणीतलम् ॥ हतमात्मसुतंदृष्ट्वाकलिंगानांजनाधिपः ॥ २५ ॥ रथैरनेकसाहस्रैर्भीमस्यावारयद्दिशः ॥ ततोभीमोमहावेगांत्यक्त्वागुर्वीमहागदाम् ॥ २६ ॥ निस्त्रिंशमाददेघोरंचिकीर्षुःकर्मदारुणम् ॥ चर्मचाप्रतिमंराजन्नार्षभंपुरुषर्षभ ॥ २७ ॥ नक्षत्रैरर्धचंद्रैश्चशातकुंभमयैश्चितम् ॥ कालिंगस्तुततःक्रुद्धोधनुर्ज्यामवमृज्यच ॥ २८ ॥ प्रगृह्यचशरंघोरमेकंसर्पविषोपमम् ॥ प्राहिणोद्भीमसेनायवधाकांक्षीजनेश्वरः ॥ २९ ॥ तमापतंतंवेगेनप्रेरितंनिशितंशरम् ॥ भीमसेनोद्विधाराजंश्चिच्छेदविपुलासिना ॥ ३० ॥ उदकोशाच्चसंहृष्टस्रासयानोवरूथिनीम् ॥ कालिंगोथततःक्रुद्धोभीमसेनायसंयुगे ॥ ३१ ॥ तोमरान्प्राहिणोच्छीघ्रंचतुर्दशशिलाशितान् ॥ तानप्रामानमहाबाहुःखगतानेवपांडवः ॥ ३२ ॥ चिच्छेदसहसाराजन्नसंभ्रांतोवरासिना ॥ निकृत्यतुरणेभीमस्तोमरान्वैचतुर्दश ॥ ३३ ॥ भानुमंतंततोभीमःप्राद्रवत्पुरुषर्षभः ॥ भानुमांस्तुततोभीमंशरवर्षेणछादयन् ॥ ३४ ॥ ननादबलवन्नादंनादयानोनभस्तलम् ॥ नचतंमृषेभीमःसिंहनादंमहाहवे ॥ ३५ ॥ ततःशब्देनमहताविननादमहास्वनः ॥ तेननादेनवित्रस्ताकालिंगानांवरूथिनी ॥ ३६ ॥

॥ ३७ ॥ ३८ ॥ ३९ ॥ अंतरायुधिनंगजारूढयोधम् ॥ ४० ॥ ४१ ॥ ४२ ॥ आविद्धंभ्रामितम् ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ कालांतकयमोपमः प्रलयकालीननाशकयमतुल्यः ॥ ४७ ॥ ४८ ॥ ४९ ॥
भ्रांतमित्यादि भ्रांतंमंडलाकृति तदेवद्रुतमोपेतमाविद्धं भ्रांतमेवोच्चतिसहितमुद्भ्रांतं आप्लुतंकेवलमुल्लंघनं प्रस्थंतसर्वाहुदिक्षुप्रसरणं प्लुतमेकस्यांदिशि संपातवेगं समुद्दीर्णंसर्वाहुप्रतिसमुद्यमम् ॥ ५० ॥ ५१ ॥

नभीमंसमरेमेनेमानुषंभरतर्षभ ॥ ततोभीमोमहाबाहुर्नर्दित्वाविपुलंस्वनम् ॥ ३७ ॥ सासिर्वेगवदाप्लुत्यदंताभ्यांवारणोत्तमम् ॥ आरुरोहततोमध्यंनागराज
स्यमारिष ॥ ३८ ॥ ततोमुमोचकालिंगःशक्तिंतामकरोद्द्विधा ॥ खड्गेनपृथुनामध्येभानुमंतमथाच्छिनत् ॥ ३९ ॥ सोंतरायुधिनंहत्वाराजपुत्रमरिंदमः ॥ गुरुंभार
सहंस्कंधेनागस्यासिमपातयत् ॥ ४० ॥ छिन्नस्कंधःसविनदन्पपातगजयूथपः ॥ आरुरुहःसिंधुवेगेनसानुमानिवपर्वतः ॥ ४१ ॥ ततस्तस्मादवप्लुत्यगजा
द्वारतभारतः ॥ खड्गपाणिरदीनात्मातस्थौभूमौसुदंशितः ॥ ४२ ॥ सचचारबहून्मार्गानभितःपातयन्गजान् ॥ अग्निचक्रमिवाविद्धंसर्वतःप्रत्यदृश्यत ॥ ४३ ॥
अश्वदेहेषुनागेषुरथानीकेषुचाभिभूः ॥ पदातीनांचसंघेषुविनिघ्नन्शोणितोक्षितः ॥ ४४ ॥ श्येनवद्व्यचरद्भीमोरणेऽरिषुबलोत्कटः ॥ छिंदंस्तेषांशरीराणिशिरां
सिचमहाबलः ॥ ४५ ॥ खड्गेनशितधारेणसंयुगेगजयोधिनाम् ॥ पदातिरेकःसंक्रुद्धःशत्रूणांभयवर्धनः ॥ ४६ ॥ संमोहयामाससतान्कालांतकयमोपमः ॥ मूढा
श्चतेतमेवाजौविनदंतःसमाद्रवन् ॥ ४७ ॥ सासिमुत्तमवेगेनविचरंतंमहारणे ॥ निकृत्यरथिनांचाजौरथेषाश्चयुगानिच ॥ ४८ ॥ जघानरथिनश्चापिबलवान्
रिपुमर्दनः ॥ भीमसेनश्चरन्मार्गान्सुबहून्प्रत्यदृश्यत ॥ ४९ ॥ भ्रांतमाविद्धमुद्भ्रांतमाप्लुतंप्रसृतंप्लुतम् ॥ संपातंसमुदीर्णंचदर्शयामाससपांडवः ॥ ५० ॥ केचिद
ग्रासिनाछिन्नाःपांडवेनमहात्मना ॥ विनेदुर्भिन्नमर्माणोनिपेतुश्चगतासवः ॥ ५१ ॥ छिन्नदंताग्रहस्ताश्चभिन्नकुंभास्तथापरे ॥ वियोधाःस्वान्यनीकानिजघ्नुर्भा
रतवारणाः ॥ ५२ ॥ निपेतुरुर्व्यांचतथाविनदंतोमहारवान् ॥ छिन्नांश्चतोमरान्राजन्महामात्रशिरांसिच ॥ ५३ ॥ परिस्तोमान्विचित्रांश्चकक्ष्याश्चकनको
ज्ज्वलाः ॥ ग्रैवेयाण्यथशक्तीश्चपताकाःकणपांस्तथा ॥ ५४ ॥ तूणीरानथयंत्राणिविचित्राणिधनूंषिच ॥ भिंदिपालानिशुभ्राणितोत्राणिचांकुशैःसह ॥ ५५ ॥ घं
टाश्चविविधाराजन्हेमगर्भान्सरूनपि ॥ पततःपातितांश्चैवपश्यामःसहसादिभिः ॥ ५६ ॥ छिन्नगात्रावरकैर्निहतैश्चापिवारणैः ॥ आसीद्भूमिःसमास्तीर्णापि
तितैर्भूधरैरिव ॥ ५७ ॥

॥ ११४ ॥

॥ ५२ ॥ तोमरान्बाणविशेषान् महामात्रोहस्तिपकः ॥ ५३ ॥
कणपान्मुद्गरान् ॥ ५४ ॥ यंत्राणिसारिप्रभृतीनि तोत्राणिकर्णमूलतोदनानि ॥ ५५ ॥ ५६ ॥ गात्रावरैर्गात्रैःपूर्वकायैः अवरैरधःकायैःद्वौपूर्वपश्चाज्जंघादिदेशौगात्रावरौकमादितिकोशः ॥ ५७ ॥

॥ ५८ ॥ खलीनानिअश्वास्यनिवेश्यानिकडिआळीनिप्रसिद्धानि कक्ष्यागजमध्यबंधनं ॥ ५९ ॥ आस्तरणानिपर्यायच्छादनानि ॥ ६० ॥ अपविद्धानिपतितानि ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥

विमृद्यैवंमहानागान्ममर्दान्यान्महाबलः ॥ अश्वारोहवरांश्चैवपातयामाससंयुगे ॥ ५८ ॥ तद्घोरमभवद्युद्धंतस्यतेषांचभारत ॥ खलीनान्यथयोक्राणिकक्ष्या
श्चकनकोज्ज्वलाः ॥ ५९ ॥ परिस्तोमाश्चप्रासाश्चकृष्टयश्चमहाधनाः ॥ कवचान्यथचर्माणिचित्राण्यास्तरणानिच ॥ ६० ॥ तत्रतत्रापविद्धानिव्यदृश्यंतमहाह
वे ॥ प्रासैर्यंत्रैर्विचित्रैश्चशस्त्रैश्चविमलैस्तथा ॥ ६१ ॥ सचकेवसुधांकीर्णांशबलैःकुसुमैरिव ॥ आप्लुत्यरथिनःकांश्चित्पराम्रृश्यमहाबलः ॥ ६२ ॥ पातयामासख
ड्गेनसध्वजानपिपांडवः ॥ मुद्गरुत्पततोदिक्षुधावतश्चयशस्विनः ॥ ६३ ॥ मार्गांश्चरतश्चित्रंव्यस्मयंतरणेजनाः ॥ सजघानपदाकांश्चिद्बाक्षिप्यान्यानपोथय
त् ॥ ६४ ॥ खड्गेनान्यांश्चचिच्छेदनादेनान्यांश्चभीषयन् ॥ ऊरुवेगेनचाप्यन्यान्पातयामासभूतले ॥ ६५ ॥ अपरेचैनमालोक्यभयात्पंचत्वमागताः ॥ एवंसा
बहुलासेनाकलिंगानांतरस्विनाम् ॥ ६६ ॥ परिवार्यरणेभीष्मंभीमसेनमुपाद्रवत् ॥ ततःकालिंगसैन्यानांप्रमुखेभरतर्षभ ॥ ६७ ॥ श्रुतायुषमभिप्रेक्ष्यभीमसेनः
समभ्ययात् ॥ तमायांतमभिप्रेक्ष्यकालिंगोनवभिःशरैः ॥ ६८ ॥ भीमसेनममेयात्माप्रत्यविध्यत्सनांतरे ॥ कालिंगबाणाभिहतस्तोत्रार्दितइवद्विपः ॥ ६९ ॥
भीमसेनःप्रजज्वालक्रोधेनाग्निरिवैधितः ॥ अथाशोकःसमादायरथंहेमपरिष्कृतम् ॥ ७० ॥ भीमंसंपादयामासरथेनरथसारथिः ॥ तमारुत्यरथंतूर्णंकौंतेयःश
त्रुसूदनः ॥ ७१ ॥ कालिंगमभिदुद्रावतिष्ठतिष्ठेतिचाब्रवीत् ॥ ततःश्रुतायुर्बलवान्भीमायनिशितान्शरान् ॥ ७२ ॥ प्रेषयामाससंक्रुद्धोदर्शयन्पाणिलाघवम् ॥
सकार्मुकवरोत्सृष्टैर्नवभिर्निशितैःशरैः ॥ ७३ ॥ समाहतोमहाराजकालिंगेनमहात्मना ॥ संचुकुशेभृशंभीमोदंडाहतइवोरगः ॥ ७४ ॥ क्रुद्धश्चचापमायम्यबल
वद्बलिनांवरः ॥ कालिंगमवधीत्पार्थोभीमःसमभिरायसैः ॥ ७५ ॥ क्षुराभ्यांचक्षुरक्षौचकालिंगस्यमहाबलौ ॥ सत्यदेवंचसत्यंचप्राहिणोद्यमसादनम् ॥ ७६ ॥ त
तःपुनरमेयात्मानाराचैर्निशितैस्त्रिभिः ॥ केतुमंतंरणेभीमोगमयद्यमसादनम् ॥ ७७ ॥ ततःकलिंगाःसंनद्धाभीमसेनममर्षणम् ॥ अनीकैर्बहुसाहस्रैःक्षत्रियाःस
मवारयन् ॥ ७८ ॥ ततःशक्तिगदाखड्गतोमरर्ष्टिपरश्वधैः ॥ कलिंगाश्चततोराजन्भीमसेनमवाकिरन् ॥ ७९ ॥ संनिवार्यसतांघोरांशरवृष्टिंसमुत्थिताम् ॥ गदा
मादायतरसासंनिपत्यमहाबलः ॥ ८० ॥ भीमःसप्तशतान्वीराननयद्यमसादनम् ॥ पुनश्चैवद्विसाहस्रान्कलिंगानरिमर्दनः ॥ ८१ ॥

॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ अशोकोविशोकः ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥

॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ पारावताश्वस्य [illegible]

प्राहिणोन्मृत्युलोकायतदद्भुतमिवाभवत् ॥ एवंसतान्यनीकानिकलिंगानांपुनःपुनः ॥८२॥ बिभेदसमरेतूर्णंप्रेक्ष्यभीष्मंमहारथम् ॥ हतारोहाश्चमातंगाःपांडवेन
कृतारणे ॥ ८३ ॥ विप्रजग्मुरनीकेषुमेघावातहताइव ॥ मृद्नंतःस्वान्यनीकानिविनदंतःशरातुराः ॥ ८४ ॥ ततोभीमोमहाबाहुःशंखंदध्मौमहाभुजः ॥ संप्रहृष्टोम
हाघोषंशंखंप्राध्मापयद्बली ॥ ८५ ॥ सर्वकालिंगसैन्यानांमनांसिसमकंपयत् ॥ मोहश्चापिकलिंगानामाविवेशपरंतप ॥ ८६ ॥ प्राकंपंतचसैन्यानिवाहनानिच
सर्वशः ॥ भीमेनसमरेराजन्गजेंद्रेणेवसर्वशः ॥ ८७ ॥ मार्गान्बहून्विचरताधावताचततस्ततः ॥ मुहुरुत्पततांचैवसंमोहःसमपद्यत ॥ ८८ ॥ भीमसेनभयत्रस्तं
सैन्यंचसमकंपत ॥ क्षोभ्यमाणमसंबाधंग्राहेणेवमहत्सरः ॥ ८९ ॥ त्रासितेषुचसर्वेषुभीमेनाद्भुतकर्मणा ॥ पुनरावर्तमानेषुविद्रवत्सुचसंघशः ॥ ९० ॥ सर्वका
लिंगयोधेषुपांडूनांध्वजिनीपतिः ॥ अब्रवीत्स्वान्यनीकानियुध्यध्वमितिपार्षतः ॥ ९१ ॥ सेनापतिवचःश्रुत्वाशिखंडिप्रमुखागणाः ॥ भीममेवाभ्यवर्तंतरथा
नीकैःप्रहारिभिः ॥ ९२ ॥ धर्मराजश्चतान्सर्वानुपजग्राहपांडवः ॥ महतामेघवर्णेननागानीकेनपृष्ठतः ॥ ९३ ॥ एवंसंनोद्यसर्वाणिस्वान्यनीकानिपार्षतः ॥ भी
मसेनस्यजग्राहपार्ष्णिसत्पुरुषैर्वृतः ॥ ९४ ॥ नहिपंचालराजस्यलोकेकश्चनविद्यते ॥ भीमसात्यकयोरन्यःप्राणेभ्यःप्रियकृत्तमः ॥ ९५ ॥ सोपश्यच्चकलिंगेषुचरं
तमरिसूदनः ॥ भीमसेनंमहाबाहुंपार्षतःपरवीरहा ॥ ९६ ॥ ननर्दबहुधाराजन्हृष्टश्चासीत्परंतपः ॥ शंखंदध्मौचसमरेसिंहनादंननादच ॥ ९७ ॥ सचपारावता
श्वस्यरथेहेमपरिष्कृते ॥ कोविदारध्वजंदृष्ट्वाभीमसेनःसमाश्वसत् ॥ ९८ ॥ धृष्टद्युम्नस्तुतंदृष्ट्वाकलिंगैःसमभिद्रुतम् ॥ भीमसेनममेयात्मात्राणायाजौसमभ्यया
त् ॥ ९९ ॥ तौदूरात्सात्यकिर्दृष्ट्वाधृष्टद्युम्नवृकोदरौ ॥ कलिंगान्समरेवीरौयोधयेतांमनस्विनौ ॥ १०० ॥ सतत्रगत्वाशैनेयोजवेनजयतांवरः ॥ पार्थपार्षतयोः
पार्ष्णिजग्राहपुरुषर्षभः ॥ १०१ ॥ सकृत्वादारुणंकर्मप्रगृहीतशरासनः ॥ आस्थितोरौद्रमात्मानंकलिंगानन्ववैक्षत ॥ २ ॥ कलिंगप्रभवांचैवमांसशोणितकर्द
माम् ॥ रुधिरस्यंदिनींतत्रभीमःप्रावर्तयन्नदीम् ॥ ३ ॥ अंतरेणकलिंगानांपांडवानांचवाहिनीम् ॥ तांसंततारदुस्तारांभीमसेनोमहाबलः ॥ ४ ॥ भीमसेनंतथादृ
ष्ट्वाप्राक्रोशंस्तावकान्नृप ॥ कालोयंभीमरूपेणकलिंगैःसहयुध्यते ॥ ५ ॥ ततःशांतनवोभीष्मःश्रुत्वातंनिनदंरणे ॥ अभ्ययात्त्वरितोभीमंव्यूढानीकःसमंततः ॥ ६ ॥
तंसात्यकिर्भीमसेनोधृष्टद्युम्नश्चपार्षतः ॥ अभ्यद्रवंतभीष्मस्यरथंहेमपरिष्कृतं ॥ १०७ ॥ इतिविश्वः ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ १०७ ॥

आनर्छुःआच्छादितवंतः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ वातायमानैःइतस्ततोधावद्भिः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ १२४ ॥ ॥ इति

परिवार्यतुतेसर्वेगांगेयंतरसारणे ॥ त्रिभिस्त्रिभिःशरैर्घोरैर्भीष्ममानर्छुरोजसा ॥ ८ ॥ प्रत्यविध्यततान्सर्वान्पितादेवव्रतस्तव ॥ यतमानान्महेष्वासांस्त्रिभिस्त्रि
भिरजिह्मगैः ॥ ९ ॥ ततःशरसहस्रेणसंनिवार्यमहारथान् ॥ हयान्कांचनसन्नाहान्भीमस्यन्यहनच्छरैः ॥ ११० ॥ हताश्वेसरथेतिष्ठन्भीमसेनःप्रतापवान् ॥
शक्तिंचिक्षेपतरसागांगेयस्यरथंप्रति ॥ ११ ॥ अप्राप्तामथतांशक्तिंपितादेवव्रतस्तव ॥ त्रिधाचिच्छेदसमरेसापृथिव्यामशीर्यत ॥ १२ ॥ ततःशैक्यायसींगुर्वीं
प्रगृह्यबलवान्गदाम् ॥ भीमसेनस्ततस्तूर्णंपुप्लुवेमनुजर्षभ ॥ १३ ॥ सात्यकोपिततस्तूर्णंभीमस्यप्रियकाम्यया ॥ गांगेयसारथिंतूर्णंपातयामाससायकैः ॥ १४ ॥
भीष्मस्तुनिहतेतस्मिन्सारथौरथिनांवरः ॥ वातायमानैस्तैरश्वैरपनीतोरणाजिरात् ॥ १५ ॥ भीमसेनस्ततोराजन्नपयातेमहाव्रते ॥ प्रजज्वालयथावह्निर्दहन्क
क्षमिवैधितः ॥ १६ ॥ सहत्वासर्वकालिंगान्सेनामध्येव्यतिष्ठत ॥ नैनमभ्युत्सहन्केचित्तावकाभरतर्षभ ॥ १७ ॥ धृष्टद्युम्नस्तमारोप्यस्वरथेरथिनांवरः ॥ पश्यतां
सर्वसैन्यानामपोवाहयशस्विनम् ॥ १८ ॥ संपूज्यमानःपांचाल्यैर्मत्स्यैश्चभरतर्षभ ॥ धृष्टद्युम्नंपरिष्वज्यसमेयादथसात्यकिम् ॥ १९ ॥ अथाब्रवीद्भीमसेनंसात्य
किःसत्यविक्रमः ॥ प्रहर्षयन्यदुव्याघ्रोधृष्टद्युम्नस्यपश्यतः ॥ १२० ॥ दिष्ट्याकालिंगराजश्चराजपुत्रश्चकेतुमान् ॥ शक्रदेवश्चकालिंगःकलिंगाश्चमृधेहताः ॥ २१ ॥
स्वबाहुबलवीर्येणनागाश्वरथसंकुलः ॥ महापुरुषभूयिष्ठोधीरयोधनिषेवितः ॥ २२ ॥ महाव्यूहःकलिंगानामेकेनमृदितस्त्वया ॥ एवमुक्त्वाशिनेर्नप्तादीर्घबाहु
ररिंदम ॥ २३ ॥ रथाद्रथमभिद्रुत्यपर्यष्वजतपांडवम् ॥ ततःस्वरथमास्थायपुनरेवमहारथः ॥ तावकानवधीत्क्रुद्धोभीमस्यबलमादधत् ॥ १२४ ॥ ॥ इतिश्रीम
हाभारतेभीष्मपर्वणिभीष्मवधप० द्वितीययुद्धदिवसेकलिंगराजवधेचतुष्पंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ संजयउवाच ॥
गतपूर्वाह्णभूयिष्ठेतस्मिन्नहनिभारत ॥ रथनागाश्वपत्तीनांसादिनांचमहाक्षये ॥ १ ॥ द्रोणपुत्रेणशल्येनकृपेणचमहात्मना ॥ समसज्जतपांचाल्यस्त्रिभिरेतैर्म
हारथैः ॥ २ ॥ सलोकविदितानश्वान्निजघानमहाबलः ॥ द्रौणेःपांचालदायादःशितैर्दशभिराशुगैः ॥ ३ ॥ ततःशल्यरथंतूर्णमास्थायहतवाहनः ॥ द्रौणिःपांचाल
दायादमभ्यवर्षदथेषुभिः ॥ ४ ॥ धृष्टद्युम्नंतुसंयुक्तंद्रौणिनावीक्ष्यभारत ॥ सौभद्रोभ्यपतत्तूर्णंविकिरन्निशितान्शरान् ॥ ५ ॥
भीष्मपर्वणिनैलकंठीयेभारतभावदीपेचतुष्पंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ गतेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

सशल्यंपंचविंशत्याकृपंचनवभिःशरैः॥ अश्वत्थामानमष्टाभिर्विव्याधपुरुषर्षभः ॥ ६ ॥ आर्जुनिंतुततस्तूर्णद्रौणिर्विव्याधपत्रिणा ॥ शल्योयदशभिश्चैवकृप श्चनिशितैस्त्रिभिः ॥ ७ ॥ लक्ष्मणस्तवपौत्रस्तुसौभद्रंसमवस्थितम्॥ अभ्यवर्ततसंहृष्टस्ततोयुद्धमवर्तत ॥ ८ ॥ दौर्योधनिःसुसंक्रुद्धःसौभद्रंपरवीरहा ॥ विव्या धसप्तरेराजंस्तदद्भुतमिवाभवत्॥ ९ ॥ अभिमन्युःसुसंक्रुद्धोभ्रातरंभरतर्षभ॥ शरैःपंचाशतैराजन्क्षिप्रहस्तोऽभ्यविध्यत॥ १० ॥ लक्ष्मणोपिपुनस्तस्यधनुश्चि च्छेदपत्रिणा ॥ मुष्टिदेशेमहाराजततस्तेचुक्रुशुर्जनाः॥ ११ ॥ तद्विहायधनुश्छिन्नंसौभद्रःपरवीरहा ॥ अन्यदादत्तवांश्चित्रंकार्मुकंवेगवत्तरम् ॥ १२ ॥ तौतत्रस मरेयुक्तौकृतप्रतिकृतैषिणौ॥ अन्योन्यंविशिखैस्तीक्ष्णैर्जघ्नतुःपुरुषर्षभौ ॥ १३ ॥ ततोदुर्योधनोराजादृष्ट्वापुत्रंमहारथम्॥ पीडितंतवपौत्रेणप्रायात्तत्रप्रजेश्वरः ॥ १४ ॥ सन्निवृत्तेतवसुतेसर्वएवजनाधिपाः॥ आर्जुनिंरथवंशेनसमंतात्पर्यवारयन्॥ १५ ॥ सतैःपरिवृतःशूरैःशूरोयुधिसुदुर्जयैः॥ नस्मप्रव्यथतेराजन्कृष्ण तुल्यपराक्रमः ॥ १६ ॥ सौभद्रमथसंसक्तंदृष्ट्वातत्रधनंजयः॥ अभिदुद्राववेगेनत्रातुकामःस्वमात्मजम्॥ १७ ॥ ततःसरथनागाश्वाभीष्मद्रोणपुरोगमाः॥ अभ्यवर्ततराजानःसहिताःसव्यसाचिनम्॥१८॥ उद्धूतंसहसाभौमंनागाश्वरथपत्तिभिः॥ दिवाकररथंप्राप्यरजस्तीव्रमदृश्यत॥ १९॥ तानिनागसहस्राणिभू मिपालशतानिच॥ तस्यबाणपथंप्राप्यनाभ्यवर्ततसर्वशः॥ २०॥ प्रणेदुःसर्वभूतानिबभूवुस्तिमिरादिशः॥ कुरूणांचानयस्तीव्रःसमदृश्यतदारुणः ॥ २१ ॥ नाप्यंतरिक्षंनदिशोनभूमिर्नचभास्करः॥ प्रजज्ञेभरतश्रेष्ठशस्त्रसंघैःकिरीटिनः ॥ २२ ॥ सादितारथनागाश्वहताश्वारथिनोरणे ॥ विप्रद्रुतरथाःकेचिद्दृश्यंतेर थयूथपाः॥ २३ ॥ विरथारथिनश्चान्येधावमानाःसमंततः॥ तत्रतत्रैवदृश्यंतेसायुधाःसांगदैर्भुजैः॥ २४ ॥ हयारोहाहयांस्त्यक्त्वागजारोहाश्चदंतिनः॥ अर्जुन स्यभयाद्राजन्समंताद्विप्रदुद्रुवुः ॥ २५ ॥ रथेभ्यश्चगजेभ्यश्चहयेभ्यश्चनराधिपाः॥ पतिताःपात्यमानाश्चदृश्यंतेऽर्जुनसायकैः ॥ २६ ॥ सगदानुद्यतान्बाहू न्सखड्गांश्चविशांपते ॥ सप्रासांश्चसतूणीरान्सशरान्सशरासनान् ॥ २७॥ सांकुशान्सपताकांश्चतत्रतत्रार्जुनोन्नृणाम्॥ निचकर्तशरैरुग्रैरौद्रंवपुरधारयत् ॥ २८॥ परिघाणांप्रदीप्तानांमुद्गराणांचमारिष॥ प्रासानांभिंदिपालानांनिस्त्रिंशानांचसंयुगे ॥ २९ ॥ परश्वधानांतीक्ष्णानांतोमराणांचभारत ॥ वर्मणांचाप विद्धानांकांचनानांचभूमिप ॥ ३० ॥ ध्वजानांचर्मणांचैवव्यजनानांचसर्वशः॥ छत्राणांहेमदंडानांतोमराणांचभारत ॥ ३१ ॥

॥ ११६ ॥

॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ यथाकुर्याद्धनंजयः धनंजयोग्निरर्जुनोवा सयथाकुर्यादित्यसाधारण्योक्तिः ॥ ३७ ॥ ३८ ॥ अन्योन्यप्रेक्षयापश्यस्परांगदर्शनेन ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

प्रतोदानांचयोक्त्राणांकशानांचैवमारिष ॥ राशयःस्मात्रदृश्यंतेविनिकीर्णारणक्षितौ॥ ३२॥ नासीत्तत्रपुमान्कश्चित्तवसैन्यस्यभारत ॥ योऽर्जुनंसमरेशूरंप त्युद्यायात्कथंचन॥ ३३॥ योयोहिसमरेपार्थंप्रत्युद्यातिविशांपते ॥ ससंख्येविशिखैस्तीक्ष्णैःपरलोकायनीयते ॥ ३४ ॥ तेषुविद्रवमाणेषुतवयोधेषुसर्वशः॥ अर्जुनोवासुदेवश्चदध्मतुर्वारिजोत्तमौ॥ ३५॥ तत्रभग्नंबलंदृष्ट्वापितादेवव्रतस्तव॥ अब्रवीत्समरेशूरंभारद्वाजंस्मयन्निव॥ ३६॥ एषपांडुसुतोवीरःकृष्णेनस हितोबली॥ तथाकरोतिसैन्यानियथाकुर्याद्धनंजयः॥ ३७॥ नत्वेषसमरेशक्योविजेतुंहिकथंचन॥ यथास्यदृश्यतेरूपंकालांतकयमोपमम्॥ ३८॥ ननिवर्तयि तुंचापिशक्येयंमहतीचमूः॥ अन्योन्यप्रेक्षयापश्यद्रवतीयंवरूथिनी॥ ३९ ॥ एषचास्तंगिरिश्रेष्ठंभानुमान्प्रतिपद्यते ॥ चक्षूंषिसर्वलोकस्यसंहरन्निवसर्वथा॥ ॥ ४० ॥ तत्रावहारंसंप्राप्तमन्येहंपुरुषर्षभ॥ श्रांताभीताश्चनोयोधानयोत्स्यंतिकथंचन॥ ४१॥ एवमुक्त्वाततोभीष्मोद्रोणमाचार्यसत्तमम्॥ अवहारमथोचक्के तावकानांमहारथः॥ ४२॥ ततोवहारःसैन्यानांतवतेषांचभारत॥ अस्तंगच्छतिसूर्येऽभूत्संध्याकालेचवर्तति॥ ४३॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव धप० द्वितीययुद्धदिवसावहारेपंचपंचाशत्तमोऽध्यायः॥ ५५॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच॥ ॥ प्रभातायांचशर्वर्यांभीष्मःशांतनवस्तदा॥ अ नीकान्यनुसंयानेव्यादिदेशाथभारत॥ १॥ गारुडंचमहाव्यूहंचक्रेशांतनवस्तदा॥ पुत्राणांतेजयाकांक्षीभीष्मःकुरुपितामहः॥ २॥ गरुडस्यस्वयंतुंडेपितादेव व्रतस्तव॥ चक्षुषीचभरद्वाजःकृतवर्माचसात्वतः॥ ३॥ अश्वत्थामाकृपश्चैवशीर्षमास्तांयशस्विनौ॥ त्रैगर्त्तैरथकैकेयैर्वाटधानैश्चसंयुगे॥ ४॥ भूरिश्रवाःशलः शल्योभगदत्तश्चमारिष॥ मद्रकाःसिंधुसौवीरास्तथापांचनदाश्चये॥५॥ जयद्रथेनसहितान्ग्रीवायांसंनिवेशिताः॥ पृष्ठेदुर्योधनोराजासोदर्यैःसानुगैर्वृतः॥६॥ विंदानुविंदावावंत्यौकांबोजश्चशकैःसह॥ पुच्छमासन्महाराजशूरसेनाश्चसर्वशः ॥ ७॥ मागधाश्चकलिंगाश्चदासेरकगणैःसह॥ दक्षिणंपक्षमासाद्यस्थिता व्यूहस्यदंशिताः॥ ८॥ कारूषाश्चविकुंजाश्चमुंडाःकुंडीदपास्तथा ॥ बृहद्बलेनसहितावामंपार्श्वमवस्थिताः॥ ९॥ व्यूढंदृष्ट्वातुतत्सैन्यंसव्यसाचीपरंतपः ॥ पृष्ठ्यु ग्रेनसहितःप्रत्यव्यूहतसंयुगे॥ १०॥ अर्धचंद्रेणव्यूहेनव्यूहंतमतिदारुणम्॥ दक्षिणंशृंगमास्थायभीमसेनोव्यरोचत॥ ११॥

वर्ततिवर्तमाने ॥ ४२ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेपंचपंचाशत्तमोऽध्यायः॥ ५५॥ ॥ ७ ॥ प्रभातायामिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ ७ ॥ ॥ तत इति ॥ १ ॥

नानाशस्त्रौघसंपन्नैर्नानादेश्यैर्नृपैर्वृतः॥ तदन्वेव विराटश्च द्रुपदश्च महारथः॥ १२॥ तदनंतरमेवासीन्नीलोनीलायुधैः सह॥ नीलादनंतरश्चैव धृष्टकेतुर्महाबलः॥ ॥ १३॥ चेदिकाशिकरूषैश्च पौरवैरपि संवृतः॥ धृष्टद्युम्नशिखंडीचपंचालाश्चप्रभद्रकाः॥ १४॥ मध्येसैन्यस्यमहतःस्थितायुद्धायभारत॥ तत्रैवधर्मराजोपि जानीकेनसंवृतः॥ १५॥ततस्तुसात्यकीराजन्द्रौपद्याःपंचचात्मजाः॥ अभिमन्युस्ततःशूरइरावांश्चततःपरम्॥ १६॥भैमसेनिरतोराजन्केकयाश्चमहारथाः॥ ततोभूद्द्रुपदांश्रेष्ठोवामंपार्श्वमुपाश्रितः॥ १७॥सर्वस्यजगतोगोप्तागोप्तायस्यजनार्दनः॥ एवमेतंमहाव्यूहंप्रत्यव्यूहंतपांडवाः॥ १८॥ वधार्थंतवपुत्राणांतत्पक्षस्यचसंगताः॥ ततःप्रवव्रतेयुद्धंव्यतिषक्तरथद्विपं॥ १९॥ तावकानांपरेषांचनिघ्नतामितरेतरम्॥ हयौघाश्चरथौघाश्चतत्रतत्रविशांपते॥ २०॥ संपतंतोव्यदृश्यंत निघ्नंतस्तेपरस्परम्॥ धावतांचरथौघानांनिघ्नतांचपृथक्पृथक्॥ २१॥बभूवतुमुलःशब्दोविमिश्रोदुंदुभिस्वनैः॥ दिवस्पृङ्नरवीराणांनिघ्नतामितरेतरम्॥ संप्रहारे सुतुमुलेतवतेषांचभारत॥ २२॥ ॥ इतिश्रीमहाभारतेभी० भीष्मवध०तृतीययुद्धदिवसेपरस्परव्यूहरचनायांषट्पंचाशत्तमोऽध्यायः॥ ५६॥ ॥ ७ ॥

॥ संजयउवाच॥ ॥ ततोव्यूढेष्वनीकेषुतावकेषुपरेषुच॥ धनंजयोरथानीकमवधीत्तवभारत॥ १॥ शरैरतिरथोयुद्धेदारयन्रथयूथपान्॥ तेवध्यमानाःपार्थेन कालेनेवयुगक्षये॥ २॥ धार्तराष्ट्रारणेयत्नात्पांडवान्प्रत्ययोधयन्॥ प्रार्थयानायशोदीप्तंमृत्युंकृत्वानिवर्तनम्॥ ३॥ एकाग्रमनसोभूत्वापांडवानांवरूथिनीम्॥ बभंजुर्बहुशोराजंस्तेचासज्जंतसंयुगे॥ ४॥ द्रवद्भिरथभग्नैश्चपरिवर्तद्भिरेवच॥ पांडवैःकौरवेयैश्चनप्राज्ञायतकिंचन॥ ५॥ उद्तिष्ठद्रजोभौमंछादयानंदिवाकरम्॥ नदिशःप्रदिशोवापितत्रहन्युःकथंनराः॥ ६॥ अनुमानेनसंज्ञाभिर्नामगोत्रैश्चसंयुगे॥ वर्त्ततेचतयायुद्धंतत्रतत्रविशांपते॥ ७॥ नव्यूहोभिद्यतेतत्रकौरवाणांकथंचन॥ रक्षितःसत्यसंधेनभारद्वाजेनसंयुगे॥ ८॥ तथैवपांडवानांचरक्षितःसव्यसाचिना॥ नाभिद्यतमहाव्यूहोभीमेनचसुरक्षितः॥ ९॥ सेनाग्राद्पिनिष्पत्यप्रायुध्यंस्तत्रमानवाः॥ उभयोःसेनयोराजन्व्यतिषक्तरथद्विपाः॥ १०॥ हयारोहैर्हयारोहाःपात्यंतेस्मसहाहवे॥ ऋष्टिभिर्विमलाभिश्चप्रासैरपिचसंयुगे॥ ॥ ११॥ रथीरथिनमासाद्यशरैःकनकभूषणैः॥ पातयामाससमरेतस्मिन्नतिभयंकरे॥ १२॥

॥ २ ॥ मृत्युंकृत्वानिवर्तनं मृत्युरेवनिवर्तनहेतुर्नान्यइत्यर्थः॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ अनुमानेनध्वजादिचिह्नेन संज्ञाभिःसंकेतैश्च ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

॥ ११७ ॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ परिस्तोमैश्चित्रकंबलैः कुथाभिस्तैरेवक्षुद्रैः कंबलैरांकवैः महाधनैर्महामूल्यैः स्रग्दामैःस्रग्वचिनैर्दाम

गजारोहागजारोहान्नाराचशरतोमरैः॥ संसक्तान्पातयामासुस्तवतेषांचसर्वशः॥ १३॥ कश्चिदुत्पत्यसमरेवरवारणमास्थितः॥ केशपक्षेपराम्रष्टश्चजहारस मरेशिरः॥ १४॥ अन्येद्विरदर्दंताग्रनिर्भिन्नहृदयारणे॥ वेमुश्चरुधिरंवीरानिःश्वसंतःसमंततः॥ १५॥ कश्चित्करिविषाणस्थोवीरोरणविशारदः॥ प्रावेपच्छ क्तिनिर्भिन्नोगजशिक्षास्त्रवेदिना॥ १६॥ पत्तिसंघारणेपत्तीन्भिंदिपालपरश्वधैः॥ न्यपातयंतसंहृष्टाःपरस्परकृतागसः॥ १७॥ रथीचसमरेराजन्नासाद्यगजयूथपम्॥ सगजंपातयामासगजीचरथिनांवरम्॥ १८॥ रथिनंचहयारोहःप्रासेनभरतर्षभ॥ पातयामाससमरेरथीचहयसादिनम्॥ १९॥ पदातीरथिनं संख्येरथीचापिपदातिनम्॥ न्यपातयच्छितैःशस्त्रैःसेनयोरुभयोरपि॥ २०॥ गजारोहाहयारोहान्पातयांचक्रिरेतदा॥ हयारोहागजस्थांश्चतदद्भुतमिवाभवत्॥ २१॥ गजारोहवरैश्चापितत्रतत्रपदातयः॥ पातिताःसमदृश्यंततेश्चापिगजयोधिनः॥ २२॥ पत्तिसंघाहयारोहैःसादिसंघाश्चपत्तिभिः॥ पात्यमानाव्यदृश्यं तशतशोथसहस्रशः॥ २३॥ ध्वजैस्तत्रापविद्धैश्चकार्मुकैस्तोमरैस्तथा॥ प्रासैस्तथागदाभिश्चपरिघैःकंपनैस्तथा॥ २४॥ शक्तिभिःकवचैश्चित्रैःकणपैरंकुशैरपि॥ निर्लिशैर्विमलैश्चापिस्वर्णपुंखैःशरैस्तथा॥ २५॥ परिस्तोमैःकुथाभिश्चकंबलैश्चमहाधनैः॥ भूर्भातिभरतश्रेष्ठसग्दामैरिवचित्रिता॥ २६॥ नराश्वकायैःपतितै र्दंतिभिश्चमहाहवे॥ अगम्यरूपापृथिवीमांसशोणितकर्दमा॥ २७॥ प्रशशामरजोभौमंव्युक्षितंरणशोणितैः॥ दिशश्चविमलाःसर्वाःसंबभूवुर्जनेश्वर॥ २८॥ उत्थितान्यगणेयानिकबंधानिसमंततः॥ चिह्नभूतानिजगतोविनाशार्थायभारत॥ २९॥ तस्मिन्युद्धेमहारौद्रेवर्तमानेसुदारुणे॥ प्रत्यदृश्यंतरथिनोधावमानाःसमंततः॥ ३०॥ ततोभीष्मश्चद्रोणश्चसैंधवश्चजयद्रथः॥ पुरुमित्रोजयोभोजःशल्यश्चापिससौबलः॥ ३१॥ एतेसमरदुर्धर्षाःसिंहतुल्यपराक्रमाः॥ पांडवानामनीकानिबभंजुःस्मपुनःपुनः॥ ३२॥ तथैवभीमसेनोपिराक्षसश्चघटोत्कचः॥ सात्यकिश्चेकितानश्चद्रौपदेयाश्चभारत॥ ३३॥ तावकांस्तवपुत्रांश्चसहितान् सर्वराजभिः॥ द्रावयामासुराजौतेत्रिदशादानवानिव॥ ३४॥ तथातेसमरेऽन्योन्यंनिघ्नंतःक्षत्रियर्षभाः॥ रक्तोक्षिताघोररूपाविरेजुर्दानवाइव॥ ३५॥ विनिर्जित्यरिपून्वीराःसेनयोरुभयोरपि॥ व्यदृश्यंतमहामात्राग्रहाइवनभस्तले॥ ३६॥

भिः अनेनस्रजांबाहुल्यंदैर्घ्यंचदर्शितं॥ २६॥ २७॥ २८॥ २९॥ ३०॥ ३१॥ ३२॥ ३३॥ ३४॥ ३५॥ महामात्राःप्रधानाः॥३६॥

॥ ३७ ॥ ३८॥३९ ॥४०॥ इतिश्री०नै०भा०सप्तपंचाशत्तमोऽध्यायः॥५७॥ ॥७॥ ततस्तेइति॥१॥कोष्टकीकृत्यवेष्टयित्वा॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥४८॥

ततोरथसहस्रेणपुत्रोदुर्योधनस्तव॥ अभ्ययात्पांडवंयुद्धेराक्षसंचघटोत्कचम्॥ ३७॥ तथैवपांडवाःसर्वेमहत्यासेनयासह॥ द्रोणभीष्मौरणेयत्तौप्रत्युद्ययुररिंदमौ॥ ३८॥ किरीटीचययौकुद्धःसमंतात्पार्थिवोत्तमान्॥ आर्जुनिःसात्यकिश्चैवययतुःसौबलंबलम्॥ ३९॥ ततःप्रववृतेभूयःसंग्रामोलोमहर्षणः॥ तावकानां परेषांचसमरेविजयैषिणाम्॥ ४०॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवध०तृतीययुद्धदिवसेसंकुलयुद्धेसप्तपंचाशत्तमोऽध्यायः॥ ५७॥ ॥ ७॥

॥ ॥संजयउवाच॥ ॥ततस्तेपार्थिवाःक्रुद्धाःफाल्गुनंवीक्ष्यसंयुगे॥ रथैरनेकसाहस्रैःसमंतात्पर्यवारयन्॥ १॥ अथैनंरथवृंदेनकोष्णकीकृत्यभारत॥ शरैःसुबहुसाहस्रैःसमंताद्व्यवारयन्॥ २॥ शक्तीश्चविमलास्तीक्ष्णागदाश्चपरिघैःसह॥ प्रासान्परश्वधांश्चैवमुद्गरान्मुसलानपि॥ ३॥ चिक्षिपुःसमरेक्रुद्धाःफाल्गुनस्यरथंप्रति॥ शस्त्राणामथतांवृष्टिंशलभानामिवायतिम्॥ ४॥ रुरोधसर्वतःपार्थंशरैःकनकभूषणैः॥ तत्रतल्लाघवंदृष्ट्वाबीभत्सोरतिमानुषम्॥५॥ देवदानवगंधर्वाःपिशाचोरगराक्षसाः॥ साधुसाध्वितिराजेंद्रफाल्गुनंप्रत्यपूजयन्॥ ६॥ सात्यकिश्चाभिमन्युश्चमहत्यासेनयावृतौ॥ गांधारान्समरेशूरान्जग्मतुःसहसौबलान्॥ ७॥ तत्रसौबलकाःक्रुद्धावार्ष्णेयस्यरथोत्तमम्॥ तिलशश्चिच्छिदुःक्रोधाच्छस्त्रैर्नानाविधैर्युधि॥ ८॥ सात्यकिस्तुरथंत्यक्त्वावर्तमानेभयावहे॥ अभिमन्योरथंतूर्णमारुरोहपरंतपः॥ ९॥ तावेकरथसंयुक्तौसौबलेयस्यवाहिनीम्॥ व्यधमेतांशितैस्तूर्णंशरैःसन्नतपर्वभिः॥ १०॥ द्रोणभीष्मौरणेयत्तौधर्मराजस्यवाहिनीम्॥ नाशयेतांशरैस्तीक्ष्णैःकंकपत्रपरिच्छदैः॥ ११॥ ततोधर्मसुतोराजामाद्रीपुत्रौचपांडवौ॥ मिषतांसर्वसैन्यानांद्रोणानीकमुपाद्रवन्॥ १२॥ तत्रासीत्सुमहद्युद्धंतुमुलंलोमहर्षणम्॥ यथादेवासुरंयुद्धंपूर्वमासीत्सुदारुणम्॥ १३॥ कुर्वाणौसुमहत्कर्मभीमसेनघटोत्कचौ॥ दुर्योधनस्ततोभ्येत्यतावुभावप्यवारयत्॥ १४॥ तत्राद्भुतमपश्यामहैडिंबस्यपराक्रमम्॥ अतीत्यपितरंयुद्धेयदयुध्यतभारत॥ १५॥ भीमसेनस्तुसंक्रुद्धोदुर्योधनमंमर्षणम्॥ हृद्यविध्यत्पृषत्केनप्रहसन्निवपांडवः॥१६॥ ततोदुर्योधनोराजाप्रहारवरपीडितः॥ निषसादरथोपस्थेकश्मलंचजगामह॥१७॥ तंविसंज्ञंविदित्वातुत्वरमाणोस्यसारथिः॥ अपोवाहरणाद्राजंस्ततःसैन्यमभज्यत॥ १८॥ ततस्तांकौरवींसेनांद्रवमाणांसमंततः॥ निघ्नन्भीमःशरैस्तीक्ष्णैरनुवव्राजपृष्ठतः॥ १९॥ पार्षतश्चरथश्रेष्ठोधर्मपुत्रश्चपांडवः॥ द्रोणस्यपश्यतःसैन्यंगांगेयस्यचपश्यतः॥२०॥ जघ्नतुर्विशिखैस्तीक्ष्णैःपरानीकविनाशनैः॥ द्रवमाणंततस्तैन्यंतवपुत्रस्यसंयुगे॥२१॥ ॥१९॥२०॥२१॥

॥ ११८ ॥

॥२२॥२३॥२४॥२५॥२६॥२७॥२८॥२९॥३०॥३१॥३२॥३३॥३४॥३५॥३६॥३७॥३८॥चिंतयानःअन्नविष्यमितिशेषः॥३९॥४०॥४१॥४२॥४३॥४४॥४५॥४६॥ ॥ इतिश्री०नै०भा०अष्टपं

नाशक्नुतांवारयितुंभीष्मद्रोणौमहारथौ॥ वार्यमाणंचभीष्मेणद्रोणेनचमहात्मना॥ २२॥ विद्रवत्येवतत्सैन्यंपश्यतोद्रोणभीष्मयोः॥ ततोरथसहस्रेषुविद्रवत्सुततस्ततः॥ २३॥ तावास्थितावेकरथंसौभद्रशिनिपुंगवौ॥ सौबलींसमरेसेनांशातयेतांसमंततः॥ २४॥ शुशुभातेतदातौतुशैनेयकुरुपुंगवौ॥ अमावास्यांगतौयद्वत्सोमसूर्यौनभस्तले॥ २५॥ अर्जुनस्ततुतःक्रुद्धस्तवसैन्यंविशांपते॥ ववर्षशरवर्षेणधाराभिरिवतोयदः॥ २६॥ वध्यमानंततस्तत्रशरैःपार्थस्यसंयुगे॥ दुद्रावकौरवंसैन्यंविषादभयकंपितं॥ २७॥ द्रवतस्तान्समालक्ष्यभीष्मद्रोणौमहारथौ॥ न्यवारयेतांसंरब्धौदुर्योधनहितैषिणौ॥ २८॥ ततोदुर्योधनोराजासमाश्वस्यविशांपते॥ न्यवर्तयततत्सैन्यंद्रवमाणंसमंततः॥ २९॥ यत्रयत्रसुतस्तुभ्यंयंयंपश्यतिभारत॥ तत्रतत्रन्यवर्तंतक्षत्रियाणांमहारथाः॥ ३०॥ तान्निवृत्तान्समीक्ष्यैवततोन्येपीतरेजनाः॥ अन्योन्यस्पर्धयाराजन्लज्जयाचावतस्थिरे॥ ३१॥ पुनरावर्ततांतेषांवेगआसीद्विशांपते॥ पूर्यतःसागरस्येवचंद्रस्योदयनंप्रति॥ ३२॥ संनिवृत्तांस्ततस्तांस्तुदृष्ट्वाराजासुयोधनः॥ अब्रवीत्त्वरितोगत्वाभीष्मंशांतनवंवचः॥ ३३॥ पितामहनिबोधेदंयत्त्वांवक्ष्यामिभारत॥ नानुरूपमहंमन्येत्वयिजीवतिकौरव॥ ३४॥ द्रोणेचास्त्रविदांश्रेष्ठेसपुत्रेसमुहृज्जने॥ रुपेचैवमहेष्वासेद्रवतेयद्वरूथिनी॥ ३५॥ नपांडवान्प्रतिबलांस्तवमन्येकथंचन॥ तयाद्रोणस्यसंग्रामेद्रौणेश्चैवरुपस्यच॥ ३६॥ अनुग्राह्याःपांडुसुतास्तवनूनंपितामह॥ यथेमांक्षमसेवीरवध्यमानांवरूथिनीं॥ ३७॥ सोस्मिंवाच्यस्त्वयाराजन्पूर्वमेवसमागमे॥ नयोत्स्येपांडवान्संख्येनापिपार्षतसात्यकी॥ ३८॥ श्रुत्वातुवचनंतुभ्यमाचार्यस्यरुपस्यच॥ कर्णेनसहितःरुत्यंचिंतयानस्तदैवहि॥ ३९॥ यदिनाहंपरित्याज्योयुवाभ्यामिहसंयुगे॥ विक्रमेणानुरूपेणयुध्येतांपुरुषर्षभौ॥ ४०॥ एतच्छ्रुत्वावचोभीष्मःप्रहसन्वैमुहुर्मुहुः॥ अब्रवीत्तनयंतुभ्यंक्रोधादुद्वृत्यचक्षुषी॥ ४१॥॥ बहुशोसिमयाराजंस्तथ्यमुक्तोहितंवचः॥ अजेयाःपांडवायुद्धेदेवैरपिसवासवैः॥ ४२॥ यत्तुशक्त्यमयाकर्तुंतद्धेनाद्यनृपोत्तम॥ करिष्यामियथाशक्तिप्रेक्षेदानींसबांधवः॥ ४३॥ अद्यपांडुसुतानेकःससैन्यान्सहबंधुभिः॥ सोहंनिवारयिष्यामिसर्वलोकस्यपश्यतः॥ ४४॥ एवमुक्तेतुभीष्मेणपुत्रास्तवजनेश्वर॥ दध्मुःशंखान्मुदायुक्ताभेरीःसंजघ्निरेशम॥४५॥ पांडवाहिततोराजन्श्रुत्वातंनिनदंमहत्॥ दध्मुःशंखांश्चभेरीश्चमुरजांश्चाप्यनादयन्॥ ४६॥ इतिश्रीम०भी०भीष्मवधप०तृतीययुद्धदिवसेभीष्मदुर्योधनसंवादेअष्टपंचाशत्तमोऽध्यायः॥ ५८॥

चाशत्तमोऽध्यायः॥ ५८॥

धृतराष्ट्रउवाच ॥ प्रतिज्ञातेततस्तस्मिन्युद्धेभीष्मेणदारुणे॥ क्रोधितोममपुत्रेणदुःखितेनविशेषतः ॥ १ ॥ भीष्मःकिमकरोत्तत्रपांडवेयेषुभारत ॥ पितामहे
वापंचालास्तन्ममाचक्ष्वसंजय ॥ २ ॥ ॥ संजयउवाच ॥ ॥ गतपूर्वाह्णभूयिष्ठेतस्मिन्नहनिभारत ॥ पश्चिमांदिशमास्थायस्थितेचापिदिवाकरे ॥ ३ ॥ जयं
प्राप्तेषुहृष्टेषुपांडवेषुमहात्मसु ॥ सर्वधर्मविशेषज्ञःपितादेवव्रतस्तव ॥ ४ ॥ अभ्ययाज्जवनैरश्वैःपांडवानामनीकिनीं ॥ महत्यासेनयागुप्तस्तवपुत्रैश्चसर्वशः ॥५॥
प्रावर्ततततोयुद्धंतुमुलंलोमहर्षणं ॥ अस्माकंपांडवैःसार्धमनयात्तवभारत ॥ ६ ॥ धनुषांकूजतांतत्रतलानांचाभिहन्यतां ॥ महान्समभवच्छब्दोगिरीणामिव
दीर्यताम् ॥ ७ ॥ तिष्ठस्थितोस्मिविद्ध्यैनंनिवर्तस्वस्थिरोभव ॥ स्थिरोस्मिप्रहरस्वेतिशब्दोश्रूयतसर्वशः ॥ ८ ॥ कांचनेषुतनुत्रेषुकिरीटेषुध्वजेषुच ॥ शिलानामिव
शैलेषुपतितानामभूद्ध्वनिः ॥ ९ ॥ पतितान्युत्तमांगानिबाहवश्चविभूषिताः ॥ व्यचेष्टंतमहींप्राप्यशतशोथसहस्रशः ॥ १० ॥ हृतोत्तमांगाःकेचित्तुतथैवोद्यतकार्मुकाः ॥ प्रगृहीतायुधाश्चापितस्थुःपुरुषसत्तमाः ॥ ११ ॥ प्रावर्ततमहावेगानदीरुधिरवाहिनी ॥ मातंगांगशिलारौद्रामांसशोणितकर्दमा ॥ १२ ॥ वराश्वनर
नागानांशरीरप्रभवावहा ॥ परलोकार्णवमुखीगृध्रगोमायुमोदिनी ॥ १३ नदृष्टंनश्रुतंवापियुद्धमेतादृशंनृप ॥ यथातवसुतानांचपांडवानांचभारत ॥ १४ ॥
नासीद्रथपथस्तत्रयोधैर्युधिनिपातितैः ॥ गजैश्चपतितैर्नीलैर्गिरिशृंगैरिवावृतः ॥ १५ ॥ विकीर्णैःकवचैश्चित्रैःशिरस्त्राणैश्चमारिष ॥ शुशुभेतद्रणस्थानंशरदीव
नभस्तलं ॥ १६ ॥ विनिर्भिन्नाःशरैःकेचिदंत्रापीडप्रकर्षिणः ॥ अभीताःसमरेशत्रूनभ्यधावंतदर्पिताः ॥ १७ ॥ तातभ्रातःसखेबंधोवयस्यममामातुल ॥ मामांप
रित्यजेत्यन्येचुक्रुशुःपतितारणे ॥ १८ ॥ अथाभ्येहित्वमागच्छकिंभीतोसिक्रयास्यसि ॥ स्थितोहंसमरेमाभैरितिचान्येविचुक्रुशुः ॥ १९ ॥ तत्रभीष्मःशांतनवो
नित्यंमंडलकार्मुकः ॥ मुमोचबाणान्दीप्ताग्रानहीनाशीविषानिव ॥ २० ॥ शरैरेकायनीकुर्वन्दिशःसर्वायतव्रतः ॥ जघानपांडवरथानादित्यश्चभरतर्षभ ॥ २१ ॥
सनृत्यन्वैरथोपस्थेदर्शयन्पाणिलाघवं ॥ अलातचक्रवद्राजंस्तत्रतत्रस्मदृश्यते ॥ २२ ॥ तमेकंसमरेशूरंपांडवाःसृंजयैःसह ॥ अनेकशतसाहस्रंसमपश्यंतलाघवात् ॥ २३ ॥ मायाकृतात्मानमिवभीष्मंतत्रस्मभेनिरे ॥ पूर्वस्यांदिशितंदृष्ट्वाप्रतीच्यांदृश्चुर्जनाः ॥ २४ ॥ उदीच्यांचैवमालोक्यदक्षिणस्यांपुनःप्रभो ॥ एवंस ॥ ११९ ॥
समरेशूरोगांगेयःप्रत्यदृश्यत ॥ २५ ॥ नचैवंपांडवेयानांकश्चिच्छक्तोतिवीक्षितुम् ॥ विशिखानेवपश्यंतिभीष्मचापच्युतान्बहून् ॥ २६ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ पिंडितान्एकस्थान् वर्मितान्कवचिनः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ आक्रंदेयुद्धे ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥
कुर्वाणंसमरेकर्मसूदयानंचवाहिनीम् ॥ व्याक्रोशंतरणेतत्रनरावहुविधावहु ॥ २७ ॥ अमानुषेणरूपेणचरंतंपितरंतव ॥ शलभाइवराजानःपतंतिविधिचोदिताः ॥ २८ ॥ भीष्माग्निमभिसंक्रुद्धंविनाशायसहस्रशः ॥ नहिमोघःशरःकश्चिदासीद्भीष्मस्यसंयुगे ॥ २९ ॥ नरनागाश्वकायेषुवहुत्वाल्लघुयोधिनः ॥ भिनत्त्येकेनबाणेनसुमुखेनपतत्रिणा ॥ ३० ॥ गजकंटकसंनद्धंवजेणेवशिलोच्चयम् ॥ द्वौत्रीनपिगजारोहान्पिंडितान्वर्मितानपि ॥ ३१ ॥ नाराचेनसुमुक्तेननिजघान
पितात्तव ॥ योयोभीष्मंनरव्याघ्रमभ्येतियुधिकश्चन ॥ ३२ ॥ मुहूर्तंदृष्टःसमयापतितोभुविदृश्यते ॥ एवंसाधर्मराजस्यवध्यमानामहाचमूः ॥ ३३ ॥ भीष्मेणातुलवीर्येणव्यशीर्यंतसहस्रधा ॥ प्राकंपतमहासेनाशरवर्षेणतापिता ॥ ३४ ॥ पश्यतोवासुदेवस्यपार्थस्याथशिखंडिनः ॥ यतमानापितेवीराद्रवमाणान्महारथान् ॥ ३५ ॥ नाशक्नुवन्वारयितुंभीष्मबाणप्रपीडितान् ॥ महेंद्रसमवीर्येणवध्यमानामहाचमूः ॥ ३६ ॥ अभज्यतमहाराजनचद्यौसहधावतः ॥ आविद्धनरनागाश्वंपतितध्वजकूबरम् ॥ ३७ ॥ अनीकंपांडुपुत्राणांहाहाभूतमचेतनम् ॥ जघानात्रपितापुत्रंपुत्रश्चपितरंतथा ॥ ३८ ॥ प्रियंसखायंचाकंदेसखादैवबलात्कृतः ॥
विमुच्यकवचान्यन्यपांडुपुत्रस्यसैनिकाः ॥ ३९ ॥ विमुक्तकेशाधावंतःप्रत्यदृश्यंतभारत ॥ तद्गोकुलमिवोद्भ्रांतमुद्भ्रांतरथयूथपम् ॥ ४० ॥ ददृशेपांडुपुत्रस्यसैन्य
मार्तस्वरंतदा ॥ प्रभज्यमानंसैन्यंतुदृष्ट्वायादवनंदनः ॥ ४१ ॥ उवाचपार्थंवीभत्सुंनिगृह्यरथमुत्तमम् ॥ अयंसकालःसंप्राप्तःपार्थयस्तेऽभिकांक्षितः ॥ ४२ ॥ प्रहर
स्वनरव्याघ्रनचेन्मोहाद्विमुह्यसे ॥ यत्त्वयाकथितंवीरपुराराज्ञांसमागमे ॥ ४३ ॥ भीष्मद्रोणमुखान्सर्वान्धार्तराष्ट्रस्यसैनिकान् ॥ सानुबंधान्हनिष्यामियेमां
योत्स्यंतिसंयुगे ॥ ४४ ॥ इतितत्कुरुकौंतेयसत्यंवाक्यमरिंदम ॥ वीभत्सोपश्यसैन्यंस्वंभज्यमानंततस्ततः ॥ ४५ ॥ द्रवतश्चमहीपालान्पश्ययौधिष्ठिरेबले ॥ दृष्ट्वा
हिभीष्मंसमरेव्यात्ताननमिवांतकम् ॥ ४६ ॥ भयार्ताःप्रपलायंतेसिंहात्क्षुद्रमृगाइव ॥ एवमुक्तःप्रत्युवाचवासुदेवंधनंजयः ॥ ४७ ॥ नोदयाश्वान्यतोभीष्मोवि
गाहेतद्बलार्णवम् ॥ पातयिष्यामिदुर्धर्षंरुद्धंकुरुपितामहम् ॥ ४८ ॥ ॥ संजयउवाच ॥ ॥ ततोश्वान्रजतप्रख्यान्नोदयामासमाधवः ॥ यतोभीष्मरथोराजन्दु
ष्प्रेक्ष्योरश्मिवानिव ॥ ४९ ॥ ततस्तत्पुनराद्रुत्तंयुधिष्ठिरबलंमहत् ॥ दृष्ट्वापार्थंमहाबाहुंभीष्मायोद्यतमाहवे ॥ ५० ॥ ततोभीष्मःकुरुश्रेष्ठसिंहवद्विनदन्मुहुः ॥ धनं
जयरथंशीघ्रंशरवर्षैरवाकिरत् ॥ ५१ ॥ क्षणेनसरथस्तस्यसहयःसहसारथिः ॥ शरवर्षेणमहतासंछन्नोनप्रकाशते ॥ ५२ ॥ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

वासुदेवस्त्वसंभ्रांतोधैर्यमास्थायसत्त्ववान् ॥ चोदयामासतानश्वान्विचितान्भीष्मसायकैः ॥५३॥ ततःपार्थोधनुर्गृह्यदिव्यंजलदनिःस्वनम् ॥ पातयामासभी
ष्मस्यधनुश्छित्त्वात्रिभिःशरैः ॥ ५४ ॥ सच्छिन्नधन्वाकौरव्यःपुनरन्यन्महद्धनुः ॥ निमिषांतरमात्रेणसज्जंचकेपितातव ॥ ५५ ॥ विचकर्षततोदोर्भ्यांधनुर्जलद
निःस्वनम् ॥ अथास्यतदपिकुद्धश्चिच्छेदधनुरर्जुनः ॥ ५६ ॥ तस्यतत्पूजयामासलाघवंशांतनोःसुतः ॥ साधुपार्थमहाबाहोसाधुभोपांडुनंदन ॥ ५७ ॥ त्वय्येवै
तद्युक्तरूपंमहत्कर्मधनंजय ॥ प्रीतोस्मिसुभृशंपुत्रकुरुयुद्धंमयासह ॥ ५८ ॥ इतिपार्थप्रशस्याथप्रगृह्यान्यन्महद्धनुः ॥ मुमोचसमरेवीरःशरान्पार्थरथंप्रति ॥
॥ ५९ ॥ अदर्शयद्दासुदेवोहययानेपरंबलम् ॥ मोघान्कुर्वन्शरांस्तस्यमंडलान्याचरल्लघु ॥ ६० ॥ तथाभीष्मस्तुसुदृढंवासुदेवधनंजयौ ॥ विव्याधनिशितैर्बाणैः
सर्वगात्रेषुभारत ॥ ६१ ॥ शुशुभातेनरव्याघ्रौतौभीष्मशरविक्षतौ ॥ गोवृषाविवसंरब्धौविषाणैर्लिखितांकितौ ॥ ६२ ॥ पुनश्चापिसुसंरब्धःशरैःशतसहस्रशः ॥
कृष्णयोर्युधिसंरब्धोभीष्मोथावारयद्दिशः ॥ ६३ ॥ वार्ष्णेयंचशरैस्तीक्ष्णैःकंपयामासरोषितः ॥ मुद्वहन्भयंदयन्भीष्मःप्रहस्यस्वनवत्तदा ॥ ६४ ॥ ततस्तुकृष्णःस
मरेदृष्ट्वाभीष्मपराक्रमम् ॥ संप्रेक्ष्यचमहाबाहुःपार्थस्यसृद्धयुद्धताम् ॥६५॥भीष्मंचशरवर्षाणिसृजंतमनिशंयुधि ॥प्रतपंतमिवादित्यंमध्यमासाद्यसेनयोः॥६६
वरान्वरान्विनिघ्नंतंपांडुपुत्रस्यसैनिकान् ॥ युगांतमिवकुर्वाणंभीष्मंयौधिष्ठिरेबले ॥ ६७ ॥ अशृण्यमाणोभगवान्केशवःपरवीरहा ॥ अचिंतयदमेयात्माना
स्तियौधिष्ठिरंबलम् ॥ ६८ ॥ एकाह्नाहिरणेभीष्मोनाशयेद्देवदानवान् ॥ किंनुपांडुसुतान्युद्धेसबलान्सपदानुगान् ॥ ६९ ॥ द्रवतेचमहासैन्यंपांडवस्यमहात्म
नः ॥ एतेचकौरवास्तूर्णंप्रभग्नान्वीक्ष्यसोमकान् ॥ ७० ॥ प्राद्रवंतिरणेदृष्ट्वाहर्षयंतःपितामहम् ॥ सोहंभीष्मंनिहन्म्यद्यपांडवार्थायदंशितः ॥ ७१ ॥ भारमेतंविने
ष्यामिपांडवानांमहात्मनाम् ॥ अर्जुनोहिशरैस्तीक्ष्णैर्वध्यमानोपिसंयुगे ॥ ७२ ॥ कर्तव्यंनाभिजानातिरणेभीष्मस्यगौरवात् ॥ तथाचिंतयतस्तस्यभूयएवपिता
महः ॥ प्रेषयामाससंकुद्धःशरान्पार्थरथंप्रति ॥ ७३ ॥ तेषांवहुत्वातुभृशंशराणांदिशश्चसर्वाःपिहितावभूवुः ॥ नचांतरिक्षंनदिशोनभूमिर्नभास्करोदृश्यतरश्मि
माली ॥ ७४ ॥ ववुश्चवातास्तुमुलाःसधूमादिशश्चसर्वाःक्षुभिताबभूवुः ॥ द्रोणोविकर्णोथजयद्रथश्चभूरिश्रवाःकृतवर्माकृपश्च ॥ ७५ ॥ श्रुतायुरंबष्ठपतिश्चराजा ॥ १२० ॥
विंदानुविंदौचसुदक्षिणश्च ॥ प्राच्याश्चसौवीरगणाश्चसर्वेवसातयःक्षुद्रकमालवाश्च ॥ ७६ ॥

॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ समुद्दीर्यमाणंवर्धमानप्रयत्नं ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ अश्विनोरश्विपुत्रयोर्नकुलसहदेवयोः ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥
किरीटिनंत्वरमाणाभिसस्रुर्निदेशगाःशांतनवस्यराज्ञः ॥ तंवाजिपादातरथौघजालैरनेकसाहस्रशतैर्ददर्श ॥ ७७ ॥ किरीटिनंसंपरिवार्यमाणंशिनेर्नप्तावारण
यूथपैश्च ॥ ततस्तुदृष्ट्वार्जुनवासुदेवौपदातिनागाश्वरथैःसमंतात् ॥७८॥ अभिद्रुतौशस्त्रभृतांवरिष्ठौशिनिप्रवीरोभिससारतूर्णम् ॥ सतान्यनीकानिमहाधनुष्मा
न्शिनिप्रवीरःसहसाभिपत्य ॥ ७९ ॥ चकारसाहाय्यमथार्जुनस्यविष्णुर्यथावत्रनिषूदनस्य॥विशीर्णनागाश्वरथध्वजौघंभीष्मेणवित्रासितसर्वयोधम् ॥८०॥
युधिष्ठिरानीकमभिद्रवंतंप्रोवाचसंदृश्यशिनिप्रवीरः ॥ क्षत्रियायास्यथनैषधर्मःसतांपुरस्तात्कथितःपुराणैः ॥ ८१ ॥ मास्वांप्रतिज्ञांत्यजतप्रवीराःस्वंवीरधर्मं
परिपालयध्वम् ॥ तान्वासवानंतरजोनिशाम्यनरेंद्रमुख्यान्द्रवतःसमंतात्॥८२॥पार्थस्यदृष्ट्वाभृद्युद्यतांचभीष्मंचसंख्येसमुदीर्यमाणम्॥अशृण्यमाणःसंततो
महात्मायशस्विनंसर्वदशार्हभर्ता ॥ ८३ ॥ उवाचशैनेयमभिप्रशंसन्दृष्ट्वाकुरूनापततःसमग्रान् ॥ येयांतितेयांतुशिनिप्रवीरयेपिस्थिताःसात्वतेपियांतु ॥ ८४ ॥
भीष्मंरथात्पश्यनिपात्यमानंद्रोणंचसंख्येसगणंमयाद्य ॥ नमेरथीसात्वतकौरवाणांकुद्धस्यमुच्येतरणेद्यकश्चित् ॥ ८५ ॥ तस्मादहंगृह्यरथांगमुग्रंप्राणंहरि
ष्यामिमहाव्रतस्य ॥ निहत्यभीष्मंसगणंतथाजौद्रोणंचशैनेयरथप्रवीरौ ॥ ८६ ॥ प्रीतिंकरिष्यामिधनंजयस्यराज्ञश्चभीमस्यतथाश्विनोश्च ॥ निहत्यसर्वान्धृ
तराष्ट्रपुत्रांस्तत्पक्षिणोयेचनरेंद्रमुख्याः ॥८७॥ राज्येनराजानमजातशत्रुंसंपादयिष्याम्यहमद्यहृष्टः ॥ ततःसुनाभंवसुदेवपुत्रःसूर्यप्रभंवज्रसमप्रभावम् ॥८८॥
क्षुरांतमुद्यम्यभुजेनचक्रंरथादवप्लुत्यविसृज्यवाहान् ॥ संकंपयन्गांचरणैर्महात्मावेगेनकृष्णःप्रससारभीष्मम् ॥८९॥ मदांधमाजौसमुदीर्णदर्पंसिंहोजिघांस
न्निववारणेंद्रम् ॥ सोभिद्रवन्भीष्ममनीकमध्येकुद्धोमहेंद्रावरजःप्रमाथी ॥ ९० ॥ व्यालंबिपीतांतपटश्चकाशेघनोयथाखेतडितावनद्धः ॥ सुदर्शनंचास्यररा
जशौरिस्तच्चक्रपद्मंसुभुजोरुनालम् ॥९१॥यथादिपद्मंतरुणार्कवर्णंरराजनारायणनाभिजातम् ॥तत्कृष्णकोपोदयसूर्यवुद्धंक्षुरांततीक्ष्णाग्रसुजातपत्रम् ॥९२॥
तस्यैवदेहोरुसरःप्ररूढंरराजनारायणबाहुनालम् ॥तमात्तचक्रंप्रणदंतमुच्चैःकुद्धंमहेंद्रावरजंसमीक्ष्य ॥ ९३ ॥ सर्वाणिभूतानिभृशंविनेदुःक्षयंकुरूणामिवचिंत
यित्वा ॥ सवासुदेवःप्रगृहीतचक्रःसंवर्तयिष्यन्निवसर्वलोकम् ॥ ९४ ॥ अभ्युत्पतन्लोकगुरुर्वभासेभूतानिधक्ष्यन्निवधूमकेतुः ॥तमाद्रवंतंप्रगृहीतचक्रंदृष्ट्वादेवं
शांतनवस्तदानीम् ॥ ९५ ॥ ॥ ९३ ॥ ९४ ॥ ९५ ॥

॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ प्रजिघायप्रेषयामास ॥ ११० ॥ शरप्रवेकान्बाणश्रेष्ठान् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

असंभ्रमंतद्विचकर्षदोर्भ्यांमहाधनुर्गांडिवतुल्यघोषम् ॥ उवाचभीष्मस्तमनंतपौरुषंगोविंदमाजावविमूढचेताः ॥ ९६ ॥ एत्येहिदेवेशजगन्निवासनमोस्तुते माधवचक्रपाणे ॥ प्रसह्यमांपातयलोकनाथरथोत्तमात्सर्वशरण्यसंस्थे ॥ ९७ ॥ त्वयाहतस्यापिममाद्यकृष्णश्रेयःपरस्मिन्निहचैवलोके ॥ संभावितोस्म्यंधक वृष्णिनाथलोकैस्त्रिभिर्वीरतवाभियानात् ॥ ९८ ॥ रथादवप्लुत्यततस्त्वरावान्पार्थोप्यनुद्रुत्ययदुप्रवीरम् ॥ जग्राहपीनोत्तमलंबबाहुंबाह्वोर्हरिंव्यायतपीनबाहुः ॥ ९९ ॥ निगृह्यमाणश्चतदाददेवोभृशंसरोषःकिलचात्मयोगी ॥ आदायवेगेनजगामविष्णुर्जिष्णुंमहावातइवैकवृक्षम् ॥ १०० ॥ पार्थस्तुविष्टभ्यबलेनपादौ भीष्मांतिकंतूर्णमभिद्रवंतम् ॥ बलान्निजग्राहहरिंकिरीटीपदेथराजन्दशमेकथंचित् ॥ १ ॥ अवस्थितंचप्रणिपत्यकृष्णंप्रीतोर्जुनःकांचनचित्रमाली ॥ उवाचको पंप्रतिसंहरेतिगतिर्भवान्केशवपांडवानाम् ॥ २ ॥ नहास्यतेकर्मयथाप्रतिज्ञंपुत्रैःशपेकेशवसोदरैश्च ॥ अंतंकरिष्यामियथाकुरूणांत्वयाहमिद्रानुजसंप्रयुक्तः ॥ ३ ॥ ततःप्रतिज्ञांसमयंचतस्यजनार्दनःप्रीतमनानिशम्य ॥ स्थितःप्रियेकौरवसत्तमस्यरथंसचक्रःपुनरारुरोह ॥ ४ ॥ सतानभीष्मःपुनरादादानःप्रगृह्यशंखंद्विषतांनिहंता ॥ विनादयामाससततोदिशश्चसपांचजन्यस्यरवेणशौरिः ॥ ५ ॥ व्याविद्धनिष्कांगदकुंडलंतंरजोविकीर्णांचितपद्मनेत्रम् ॥ विशुद्धदंष्ट्रंप्रगृहीतशंखंविचुकुशुः प्रेक्ष्यकुरुप्रवीराः ॥ ६ ॥ हृदंगभेरीपणवप्रणादानेमिस्वनादुंदुभिनिःस्वनाश्च ॥ ससिंहनादाश्चबभूवुरुग्राःसर्वेष्वनीकेषुततःकुरूणाम् ॥ ७ ॥ गांडीवघोषःस्तनयित्नुकल्पोजगामपार्थस्यनभोदिशश्च ॥ जग्मुश्चबाणाविमलाःप्रसन्नाःसर्वादिशःपांडवचापमुक्ताः ॥ ८ ॥ तंकौरवाणामधिपोजवेनभीष्मेणभूरिश्रवसाचसार्धम् ॥ अभ्युद्ययावुद्यतबाणपाणिःकक्षंदिधक्षन्निवधूमकेतुः ॥ ९ ॥ अथार्जुनायप्रजिघायभल्लान्भूरिश्रवाःसप्तसुवर्णपुंखान् ॥ दुर्योधनस्तोमरमुग्रवेगंशल्यो गदांशांतनवश्चशक्तिम् ॥ ११० ॥ ससप्तभिःसप्तशरप्रवेकान्संवार्यभूरिश्रवसाविसृष्टान् ॥ शितेनदुर्योधनबाहुमुक्तंक्षुरेणतत्तोमरमुन्ममाथ ॥ ११ ॥ ततःशुभा मापततींसशक्तिंविद्युत्प्रभांशांतनवेनमुक्ताम् ॥ गदांचमद्राधिपबाहुमुक्तांद्वाभ्यांशराभ्यांनिचकर्तवीरः ॥ १२ ॥ ततोभुजाभ्यांबलवद्विरुग्ण्चित्रंधनुर्गांडिवमप्रमेयम् ॥ माहेंद्रमस्त्रंविधिवत्सुघोरंप्रादुश्चकाराद्भुतमंतरिक्षे ॥ १३ ॥ तेनोत्तमास्त्रेणततोमहात्मासर्वान्यनीकानिमहाधनुष्मान् ॥ शरौघजालैर्विमलाग्निवर्णैर्नि वारयामासकिरीटमाली ॥ १४ ॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

शिलीमुखाःपार्थधनुःप्रमुक्तारथान्ध्वजाग्राणिधनूंषिबाहून् ॥ निकृत्यदेहान्विविशुःपरेषांनरेंद्रनागेंद्रतुरंगमाणाम् ॥ १५ ॥ ततोदिशःसोनुदिशश्चपार्थःशरैः सुधारैःसमरेवितत्य ॥ गांडीवशब्देनमनांसितेषांकिरीटमालीव्यथयांचकार ॥ १६ ॥ तस्मिंस्तथाघोरतमेप्रवृत्तेशंखस्वनाद्गुंदुभिनिःस्वनाश्च ॥ अंतर्हितागांडिवनिःस्वनेनबभूवुरुग्राश्चरथप्रणादाः ॥ १७ ॥ गांडीवशब्दंतमथोविदित्वाविराटराजप्रमुखाःप्रवीराः ॥ पांचालराजोद्रुपदश्चवीरस्तदेशमाजग्मुरदीनसत्त्वाः ॥ १८ ॥ सर्वाणिसैन्यानितुतावकानियतोयतोगांडिवजःप्रणादः ॥ ततस्ततःसन्नतिमेवजग्मुर्नतंप्रतीपोभिससारकश्चित् ॥ १९ ॥ तस्मिन्सुघोरेनृपसंप्रहारेहताःप्रवीराःसरथाश्वसूताः ॥ गजाश्चनाराचनिपातताप्तामहापताकाःशुभरुक्मकक्ष्याः ॥ १२० ॥ परीतसत्वाःसहसानिपेतुःकिरीटिनाभिन्नतनुत्रकायाः ॥ दृढंहताःपत्रिभिरुग्रवेगैःपार्थेनभल्लैर्विमलैःशिताग्रैः ॥ २१ ॥ निकृत्तयंत्रानिहतेंद्रकीलाध्वजामहांतोध्वजिनीमुखेषु ॥ पदातिसंघाश्चरथाश्वसंस्थेह्यश्वना गाश्चधनंजयेन ॥ २२ ॥ बाणाहतास्तूर्णमपेतसत्त्वाविषृभ्यगात्राणिनिपेतुरुर्व्याम् ॥ ऐंद्रेणतेनास्त्रवरेणराजन्महाहवेभिन्नतनुत्रदेहाः ॥ २३ ॥ ततःशरौघैर्निशितैःकिरीटिनाहृदेहशस्त्रक्षतलोहितोदा ॥ नदीसुघोरानरमेदफेनाप्रवर्त्तितातत्रणाजिरेवै ॥ २४ ॥ वेगेनसातीवपृथुप्रवाहापरेतनागाश्वशरीररोधा ॥ नरेंद्रमज्जोच्छ्रितमांसपंकाप्रभूतरक्षोगणभूतसेविता ॥ २५ ॥ शिरःकपालाकुलकेशशाद्वलाशरीरसंघातसहस्रवाहिनी ॥ विशीर्णनानाकवचोर्मिसंकुलानराश्व नागास्थिनिकृत्तशर्करा ॥ २६ ॥ श्वकंकशालाद्यकृध्रकाकैःकव्यादसंघैश्चतरक्षुभिश्च ॥ उपेतकूलांदृशुर्मनुष्याःक्रूरांमहावैतरणीप्रकाशाम् ॥ २७ ॥ प्रवर्त्तिता मर्जुनबाणसंघैर्मेदोवसास्रक्प्रवहांसुभीमाम् ॥ हतप्रवीरांचतथैवदृष्ट्वासेनांकुरूणामथफाल्गुनेन ॥ २८ ॥ तेचेदिपांचालकरूषमत्स्याःपार्थाश्चसर्वेसहिताःप्रणेदुः ॥ जयप्रगल्भाःपुरुषप्रवीराःसंत्रासयंतःकुरुवीरयोधान् ॥ २९ ॥ हतप्रवीराणिबलानिदृष्ट्वाकिरीटिनाशत्रुभयावहेन ॥ वित्रास्यसेनांध्वजिनीपतीनांसिंहो मृगाणामिबयूथसंघान् ॥ १३० ॥ विनेदतुस्तावतिहर्षयुक्तोगांडीवधन्वाचजनार्दनश्च ॥ ततोरविंसंवृतरश्मिजालंदृष्ट्वाभृशंशस्त्रपरिक्षतांगाः ॥ ३१ ॥ तदैंद्रमस्त्रंविततंचघोरमसह्यमुद्वीक्ष्ययुयुर्गांतकल्पम् ॥ अथापयानंकुरवःसभीष्माःसद्रोणदुर्योधनबाल्हिकाश्च ॥ ३२ ॥ चकुर्निशांसंधिगतांसमीक्ष्यविभावसोर्लोहित रागयुक्ताम् ॥ अवाप्यकीर्तिंचयशश्चलोकेविजित्यशत्रूंश्चधनंजयोपि ॥ ३३ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥२८ ॥ १२९ ॥ इतिश्री०नै०भा०एकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ ७ ॥ ॥ व्युष्टामिति व्युष्टांप्रभातां ॥१ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ व्यालोव्यूहविशे

ययौनरेंद्रैःसहसोदरैश्चसमाप्तकर्माशिविरंनिशायाम्॥ ततःप्रजज्ञेतुमुलःकुरूणांनिशामुखेघोरतमःप्रणादः॥३४॥ रणेरथानामयुतंनिहत्यहतागजाःसप्तशता
र्जुनेन ॥ प्राच्याश्चसौवीरगणाश्चसर्वेनिपातिताःक्षुद्रकमालवाश्च ॥ ३५॥ महत्कृतंकर्मधनंजयेनकर्तुंयथानार्हतिकश्चिदन्यः ॥ श्रुतायुरंवष्टपतिश्चराजाततैव
दुर्मर्षणचित्रसेनौ॥ ३६॥ द्रोणःकृपःसैंधवबाह्लिकौचभूरिश्रवाःशल्यशलौचराजन् ॥ अन्येचयोधाःशतशःसमेताःकुद्धेनपार्थेनरणस्यमध्ये ॥ ३७॥ स्ववाहु
वीर्येणजिताःसभीष्माःकिरीटिनालोकमहारथेन ॥ इतिब्रुवंतःशिबिराणिजग्मुःसर्वेगणाभारतयेत्वदीयाः ॥ ३८ ॥ उल्कासहस्रैश्चसुसंप्रदीप्तैर्विभ्राजमानै
श्चतथाप्रदीपैः॥ किरीटिवित्रासितसर्वयोधाचक्रेनिवेशंध्वजिनीकुरूणाम्॥ १३९॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०तृतीयदिवसावहारेएको
नषष्टितमोऽध्यायः॥५९॥ ॥७॥ ॥७॥ ॥संजयउवाच॥ ॥व्युष्टांनिशांभारतभारतानामनीकिनीनांप्रमुखेमहात्मा॥ ययौसपत्नान्प्रतिजात
कोपोदृढःसमग्रेणबलेनभीष्मः॥ १ ॥तंद्रोणदुर्योधनबाह्लिकाश्चतथैवदुर्मर्षणचित्रसेनौ ॥ जयद्रथश्चातिबलोबलौघैर्नृपास्तथान्येप्रययुःसमंतात्॥ २ ॥ स
तैर्महद्भिश्चमहारथैश्चतेजस्विभिर्वीर्यवद्भिश्चराजन्॥ रराजराजासतुराजमुख्यैर्वृतःसदेवैरिववज्रपाणिः॥ ३॥ तस्मिन्ननीकप्रमुखेविषक्तादोधूयमानाश्चम
हापताकाः॥ सुरक्तपीतासितपांडुराभामहागजस्कंधगताविरेजुः॥ ४ ॥ सावाहिनीशांतनवेनगुप्तामहारथैर्वारणवाजिभिश्च॥ बभौसविद्युत्स्तनयित्नुकल्पा
जलागमेद्यौरिवजातमेघा॥ ५॥ ततोरणायाभिमुखीप्रयाताप्रत्यर्जुनंशांतनवाभिगुप्ता॥ सेनामहोग्रासहसाकुरूणांवेगोयथाभीमइवापगायाः॥ ६ ॥तंव्या
लनानाविधगूढसारंगजाश्वपादातरथौघपक्षम्॥ व्यूहंमहामेघसमंमहात्माददर्शदूरात्कपिराजकेतुः ॥ ७ ॥ विनिर्ययौकेतुमतारथेननरर्षभःश्वेतहयेनवीरः॥
वरूथिनासैन्यमुखेमहात्मावधेधृतःसर्वसपत्नयूनाम्॥ ८ ॥ सूपस्करंसोत्तरबंधुरेषंयत्तंयदूनामृषभेणसंख्ये॥ कपिध्वजंप्रेक्ष्यविषेदुराजौसहैवपुत्रैस्तवकौरवे
याः॥ ९ ॥ प्रकर्षतागुप्तमुदायुधेनकिरीटिनालोकमहारथेन॥ तंव्यूहराजंददृशुस्त्वदीयाश्चतुश्चतुर्व्यालसहस्रकर्णम्॥ १० ॥ यथाहिपूर्वेहनिधर्मराज्ञाव्यूहःकृतः
कौरवसत्तमेन॥ तथानभूतोभुविमानुषेषुनदृष्टपूर्वोनचसंश्रुतश्च ॥ ११ ॥

॥ १२२ ॥

षस्तेननानाविधंगूढसारंच ॥ ७ ॥ ८॥ सूपस्करंसुचक्रं सोत्तरबंधुरेषंउत्तरेणाच्छादनेनबंधुरारम्याईषातसहितं ॥ ९ ॥ चतुश्चतुराढत्तंव्यालानांगजानांसहस्रंकर्णेषुविदिग्भागेषुयस्यतं ॥ १० ॥ ११॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ शरावराणिकवचानि ॥१७॥ १८॥१९॥२०॥२१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ॥ इतिश्री०नै०भा०षष्टितमोऽध्यायः॥६०॥

ततोयथादेशमुपेत्यतस्थुःपांचालमुख्याःसहचेदिमुख्यैः॥ ततःसमादेशसमाहतानिभेरीसहस्राणिविनेदुराजौ ॥ १२ ॥ शंखस्वनास्तूर्यरथस्वनाश्चसर्वेष्वनीके
षुससिंहनादाः॥ ततःसवाणानिमहास्वनानिविस्फार्यमाणानिधनूंषिवीरैः॥ १३॥ क्षणेनभेरीपणवप्रणादानंतर्दधुःशंखमहास्वनाश्च॥ तच्छंखशब्दावृतमंतरि
क्षमुद्धूतभौमद्रुतरेणुजालम्॥ १४॥ महावितानावततप्रकाशमालोक्यवीराःसहसाभिपेतुः॥ रथीरथेनाभिहतःससूतःपपातसाश्वःसरथःसकेतुः॥ १५॥ गजो
गजेनाभिहतःपपातपदातिनाचाभिहतःपदातिः॥ आवर्तमानान्यभिवर्तमानैर्घोरीकृतान्यद्भुतदर्शनानि ॥ १६ ॥ प्रासैश्चखड्गैश्चसमाहतानिसदश्वदंदानिसद
श्वदंदैः॥ सुवर्णतारागणभूषितानिसूर्यप्रभाभानिशरावराणि॥ १७ ॥ विदार्यमाणानिपरश्वधैश्चप्रासैश्चखड्गैश्चनिपेतुरुर्व्याम्॥ गजैर्विषाणैर्वरहस्तरुग्णाःके
चित्ससूतारथिनःप्रपेतुः॥ १८ ॥ गजर्षभाश्वापिरथर्षभेणनिपातितावाणहताःपृथिव्याम्॥ गजौघवेगोद्धतसादितानांश्रुत्वाविषेदुःसहसामनुष्याः॥ १९॥आ
र्तस्वनंसादिपदातियूनांविषाणगात्रावरताडितानाम्॥संभ्रांतनागाश्वरथेमुहूर्तंमहाक्षयेसादिपदातियूनाम्॥२०॥महारथैःसंपरिवार्यमाणोददर्शभीष्मःकपि
राजकेतुम्॥ तंपंचतालोच्छ्रितताल केतुःसदश्ववेगाद्भुतवीर्ययानः॥ २१ ॥ महास्त्रबाणाशनिदीप्तिमंतंकिरीटिनंशांतनवोऽभ्यधावत्॥ तयैवशक्रप्रतिमप्रभाव
मिंद्रात्मजंद्रोणमुखाविसस्रुः॥ २२॥ कृपश्चशल्यश्चविविंशतिश्चदुर्योधनःसौमदत्तिश्चराजन्॥ ततोरथानांप्रमुखादुपेत्यसर्वास्त्रवित्कांचनचित्रवर्मा॥२३॥
जवेनशूरोभिससारसर्वांस्तानर्जुनस्यात्मसुतोभिमन्युः॥ तेषांमहास्त्राणिमहारथानामसत्यकर्माविनिहत्यकार्ष्णिः॥ २४॥ बभौमहामंत्रहुतार्चिमालीसदोग
तःसन्नभगवानिवाग्निः॥ ततःसतूर्णंरुधिरोदफेनांकृत्वानदीमाशुरणेरिपूणाम्॥ २५ ॥ जगामसौभद्रमतीत्यभीष्मोमहारथंपार्थमदीनसत्वः॥ ततःप्रहृस्याद्भुत
विक्रमेणगांडीवमुक्तेनशिलाशितेन ॥ २६ ॥ विपाठजालेनमहास्त्रजालंविनाशयामासकिरीटमाली ॥ तमुत्तमंसर्वधनुर्धराणामसक्तकर्माकपिराजकेतुः॥
॥ २७॥ भीष्मंमहात्माभिववर्षतूर्णंशरौघजालैर्विमलैश्चभल्लैः॥ तथैवभीष्माहतमंतरिक्षेमहास्त्रजालंकपिराजकेतोः॥ २८ ॥विशीर्यमाणंददृशुस्त्वदीयादि
वाकरेणेवतमोभिभूतम्॥ एवंविधंकार्मुकभीमनादमदीनवत्सत्पुरुषोत्तमाभ्याम्॥ददर्शलोकःकुरुसृंजयाश्चतद्वैरथंभीष्मधनंजयाभ्याम्॥२९॥ ॥इतिश्रीम
हाभारतेभीष्मपर्वणिभीष्मवधप०भीष्मार्जुनद्वैरथेषष्टितमोऽध्यायः॥६०॥ ॥७॥ ॥७॥ ॥७॥

द्रौणिरिति सांयमनेःशल्यपुत्रः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१॥२२॥२३॥२४॥२५॥२६॥

॥ संजयउवाच ॥ ॥ द्रौणिर्भूरिश्रवाःशल्यश्चित्रसेनश्चमारिषः ॥ पुत्रःसांयमनेश्चैवसौभद्रंपर्यवारयन् ॥ १ ॥ संसक्तमतितेजोभिस्तमेकंदृढशुर्जनाः ॥ पंचभिर्मनुजव्याघ्रैर्गजैःसिंहशिशुंयथा ॥ २ ॥ नातिलक्ष्यतयाकश्चिन्नशौर्येनपराक्रमे ॥ बभूवसदृशःकार्ष्णेर्नास्त्रेनापिचलाघवे ॥ ३ ॥ तथातमात्मजंयुद्धेविक्रमंतमरिंदमम् ॥ दृष्ट्वापार्थःसुसंयत्तंसिंहनादमथानदत् ॥ ४ ॥ पीडयानंतुतत्सैन्यंपौत्रंतवविशांपते ॥ दृष्ट्वात्वदीयाराजेंद्रसमंतात्पर्यवारयन् ॥ ५ ॥ ध्वजिनींधार्तराष्ट्राणांदीनशत्रुरदीनवत् ॥ प्रत्युद्ययौससौभद्रस्तेजसाचबलेनच ॥ ६ ॥ तस्यलाघवमार्गस्थमादित्यसदृशप्रभम् ॥ व्यदृश्यतमहच्चापंसमरेयुध्यतःपरैः ॥ ७ ॥ सद्यौणिमिषुणैकेनविद्धाशल्यंचपंचभिः ॥ ध्वजंसांयमनेश्चैवसोष्टाभिश्चिच्छिदेततः ॥ ८ ॥ रुक्मदंडांमहाशक्तिंप्रेषितांसौमदत्तिना ॥ शितेनोरगसंकाशांपत्रिणापजहारताम् ॥ ९ ॥ शल्यस्यचमहावेगानस्यतःसमरेशरान् ॥ निवार्यार्जुनदायादोजघानचतुरोहयान् ॥ १० ॥ भूरिश्रवाश्चशल्यश्चद्रौणिःसांयमनिःशलः ॥ नाभ्यवर्तंतसंरब्धाःकार्ष्णेर्बाहुबलोदयम् ॥ ११ ॥ ततस्त्रिगर्ताराजेंद्रमद्राश्वसहकेकयैः ॥ पंचविंशतिसाहस्रास्तवपुत्रेणचोदिताः ॥ १२ ॥ धनुर्वेदविदोमुख्याअजेयाःशत्रुभिर्युधि ॥ सहपुत्रंजिघांसंतंपरिवव्रुःकिरीटिनम् ॥ १३ ॥ तौतुतत्रपितापुत्रौपरिक्षिन्नौमहारथौ ॥ ददृशुर्राजन्पांचाल्यःसेनापतिररिंदमः ॥ १४ ॥ संवारणरथौघानांसहस्रैर्बहुभिर्वृतः ॥ वाजिभिःपत्तिभिश्चैवबहुलःशतसहस्रशः ॥ १५ ॥ धनुर्विस्फार्यसंक्रुद्धोनोदयित्वाचवाहिनीम् ॥ ययौतंमद्रकानीकंकेकयांश्चपरंतप ॥ १६ ॥ तेनकीर्तिमतागुप्तमनीकंदृढधन्वना ॥ संरब्धरथनागाश्वंयोत्स्यमानमशोभत ॥ १७ ॥ सोर्जुनप्रमुखेयांतंपांचालकुलवर्धनः ॥ त्रिभिःशारद्वतंबाणैर्जत्रुदेशेसमार्पयत् ॥ १८ ॥ ततःसमद्रकान्हत्वादशैवदशभिःशरैः ॥ पृष्ठरक्षंजघानाशुभल्लेनरुतवर्मणः ॥ १९ ॥ दमनंचापिदायादंपौरवस्यमहात्मनः ॥ जघानविमलाग्रेणनाराचेनपरंतपः ॥ २० ॥ ततःसांयमनेःपुत्रःपांचाल्यंयुद्धदुर्मदम् ॥ अविध्यत्त्रिंशताबाणैर्दशभिश्चास्यसारथिम् ॥ २१ ॥ सोतिविद्धोमहेष्वासःस्रक्किणीपरिसंलिहन् ॥ भल्लेनभृशतीक्ष्णेननिचकर्तास्यकार्मुकम् ॥ २२ ॥ अथैनंपंचविंशत्याक्षिप्रमेवसमार्पयत् ॥ अश्वांश्चास्यावधीद्राजन्बुभौतौपार्ष्णिसारथी ॥ २३ ॥ सहताश्वेरथेतिष्ठन्ददर्शभरतर्षभ ॥ पुत्रःसांयमनेःपुत्रंपांचाल्यस्यमहात्मनः ॥ २४ ॥ सप्रगृह्यमहाघोरंनिस्त्रिंशवरमायसम् ॥ पदातिस्तूर्णमानर्च्छद्रथस्थंपुरुषर्षभः ॥ २५ ॥ तंमहौघमिवायांतंखात्पतंतमिवोरगम् ॥ भ्रांतावरणनिस्त्रिंशंकालोत्सृष्टमिवांतकम् ॥ २६ ॥

॥ १२३ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४॥३५॥३६॥ इतिश्रीमन्नै०भा०एंकषष्टितमोऽध्यायः ॥६१॥ ॥ॐ॥ ॥ दैवमेवेति ॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥

दीप्यमानमिवादित्यंमत्तवारणविक्रमम् ॥ अपश्यन्पांडवास्तत्रधृष्टद्युम्नश्चपार्षतः ॥ २७ ॥ तस्यपांचालदायादःप्रतीपमभिधावतः ॥ शितनिस्त्रिंशहस्तस्यशरावरणधारिणः ॥ २८ ॥ बाणवेगमतीतस्यतथाभ्याशमुपेयुषः ॥ त्वरन्सेनापतिःक्रुद्धोबिभेदगदयाशिरः ॥ २९ ॥ तस्यराजन्सनिस्त्रिंशंसुप्रभंचशरावरम् ॥ हतस्यपततोहस्ताद्वेगेनन्यपतद्भुवि ॥ ३० ॥ तंनिहत्यगदाग्रेणसलेभेपरमांमुदम् ॥ पुत्रःपांचालराजस्यमहात्माभीमविक्रमः ॥ ३१ ॥ तस्मिन्हतेमहेष्वासेराजपुत्रेमहारथे ॥ हाहाकारोमहानासीत्तवसैन्यस्यमारिष ॥ ३२ ॥ ततःसांयमनिःक्रुद्धोदृष्ट्वानिहतमात्मजम् ॥ अभिदुद्राववेगेनपांचाल्यंयुद्धदुर्मदम् ॥ ३३ ॥ तौतत्रसमरेशूरौसमेतौयुद्धदुर्मदौ ॥ ददृशुःसर्वराजानःकुरवःपांडवास्तथा ॥ ३४ ॥ ततःसांयमनिःक्रुद्धःपार्षतंपरवीरहा ॥ आजघानत्रिभिर्बाणैस्तोत्रैरिवमहाद्विपम् ॥ ३५ ॥ तयैवपार्षतंशूरंशल्यःसमितिशोभनः ॥ आजघानोरसिक्रुद्धस्ततोयुद्धमवर्तत ॥ ३६ ॥

इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०चतुर्थयुद्धदिवसेसांयमनिपुत्रवधेएकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ॐ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ दैवमेवपरंमन्येपौरुषादपिसंजय ॥ यत्सैन्यंममपुत्रस्यपांडुसैन्येनबाध्यते ॥ १ ॥ नित्यंहिमामकांस्तातहतानेवहिशंससि ॥ अव्यग्रांश्चप्रहृष्टांश्चनित्यंशंससिपांडवान् ॥ २ ॥ हीनान्पुरुषकारेणमामकानद्यसंजय ॥ पातितान्पात्यमानांश्चहतानेवच्शंससि ॥ ३ ॥ युध्यमानान्यथाशक्तिघटमानान्जयंप्रति ॥ पांडवाहिजयंत्येवजीयंतेचैवमामकाः ॥ ४ ॥ सोहंतीव्राणिदुःखानिदुर्योधनकृतानिच ॥ श्रोष्यामिसततंतातदुःसहानिबहूनिच ॥ ५ ॥ तमुपायंनपश्यामिजीयेरन्येनपांडवान् ॥ मामकाविजयंयुद्धेप्राप्नुयुर्येनसंजय ॥ ६ ॥ ॥ संजयउवाच ॥ क्षयंमनुष्यदेहानांगजवाजिरथक्षयम् ॥ शृणुराजन्स्थिरोभूत्वातवैवापनयोमहान् ॥ ७ ॥ धृष्टद्युम्नस्तुशल्येनपीडितोनवभिःशरैः ॥ पीडयामाससंक्रुद्धोमद्राधिपतिमायसैः ॥ ८ ॥ तत्राद्भुतमपश्यामपार्षतस्यपराक्रमम् ॥ न्यवारयतयत्तूर्णंशल्यंसमितिशोभनम् ॥ ९ ॥ नांतरंदृश्यतेतत्रतयोश्चरथिनोस्तदा ॥ मुहूर्तमिवतद्युद्धंतयोःसममिवाभवत् ॥ १० ॥ ततःशल्योमहाराजधृष्टद्युम्नस्यसंयुगे ॥ धनुश्चिच्छेदभल्लेनपीतेननिशितेनच ॥ ११ ॥ अथैनंशरवर्षेणच्छादयामाससंयुगे ॥ गिरिंजलागमेयद्वज्जलदाजलवृष्टिभिः ॥ १२ ॥ अभिमन्युस्ततःक्रुद्धोधृष्टद्युम्नेचपीडिते ॥ अभिदुद्राववेगेनमद्रराजरथंप्रति ॥ १३ ॥ ततोमद्राधिपरथंकार्ष्णिःप्राप्यातिकोपनः ॥ आर्तायनिममेयात्माविव्याधनिशितैःशरैः ॥ १४ ॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

ततस्तुतावकाराजन्परीप्संतोऽर्जुनिरणे ॥ मद्रराजरथंतूर्णंपरिवार्यावतस्थिरे ॥ १५ ॥ दुर्योधनोविकर्णश्चदुःशासनविविंशती ॥ दुर्मर्षणोदुःसहश्चचित्रसेनो यदुमुखः ॥ १६ ॥ सत्यव्रतश्चभद्रंतेपुरुमित्रश्चभारत ॥ एतेमद्राधिपरथंपालयंतःस्थितारणे ॥ १७ ॥ तान्भीमसेनःसंक्रुद्धोधृष्टद्युम्नश्चपार्षतः ॥ द्रौपदेयाश्चमन्यु श्चमाद्रीपुत्रौचपांडवौ ॥ १८ ॥ धार्तराष्ट्रान्दशरथान्दशैवप्रत्यवारयन् ॥ नानारूपाणिशस्त्राणिविसृजंतोविशांपते ॥ १९ ॥ अभ्यवर्तंतसंहृष्टाःपरस्परवधैषि णः ॥ तेवैसमेयुःसंग्रामेराजन्दुर्मंत्रितेतव ॥ २० ॥ तस्मिन्दशरथेकुद्धेवर्तमानेमहाभये ॥ तावकानांपरेषांवाप्रेक्षकारथिनोऽभवन् ॥ २१ ॥ शस्त्राण्यनेकरूपा णिविसृजंतोमहारथाः ॥ अन्योन्यमभिनर्दंतःसंप्रहारंप्रचक्रिरे ॥ २२ ॥ ततदाजातसंरंभाःसर्वेन्योन्यंजिघांसवः ॥ अन्योन्यमभिमर्दंतःस्पर्धमानाःपरस्परम् ॥ ॥ २३ ॥ अन्योन्यस्पर्धयाराजन्ज्ञातयःसंगतामिथः ॥ महास्त्राणिविमुंचंतःसमापेतुरमर्षिणः ॥ २४ ॥ दुर्योधनस्तुसंक्रुद्धोधृष्टद्युम्नंमहारणे ॥ विव्याधनिशितै र्बाणैश्चतुर्भिःसमरेद्रुतम् ॥ २५ ॥ दुर्मर्षणश्चविंशत्याचित्रसेनश्चपंचभिः ॥ दुर्मुखोनवभिर्बाणैर्दुःसहश्चापिसप्तभिः ॥ २६ ॥ विविंशतिःपंचभिश्चत्रिभिर्दुःशास नस्तथा ॥ तान्प्रत्यविध्यद्राजेंद्रपार्षतःशत्रुतापनः ॥ २७ ॥ एकैकंपंचविंशत्यादर्शयन्पाणिलाघवम् ॥ सत्यव्रतंचसमरेपुरुमित्रंचभारत ॥ २८ ॥ अभिमन्युरवि ध्यत्तुदशभिर्दशभिःशरैः ॥ माद्रीपुत्रौतुसमरेमातुलंमातृनंदनौ ॥ २९ ॥ अविध्येतांशरैस्तीक्ष्णैस्तदद्भुतमिवाभवत् ॥ ततःशल्योमहाराजस्वसीयौरथिनांवरौ ॥ ३० ॥ शरैर्बहुभिरानर्छत्कृतप्रतिकृतैषिणौ ॥ छाद्यमानौततस्तौतुमाद्रीपुत्रौनचेलतुः ॥ ३१ ॥ अथदुर्योधनंदृष्ट्वाभीमसेनोमहाबलः ॥ विधित्सुःकलहस्यांतंग दांजग्राहपांडवः ॥ ३२ ॥ तमुद्यतगदंदृष्ट्वाकैलासमिवशृंगिणम् ॥ भीमसेनंमहाबाहुंपुत्रास्तेप्राद्रवन्भयात् ॥ ३३ ॥ दुर्योधनस्तुसंक्रुद्धोमागधंसमचोदयत् ॥ अनीकंदशसाहस्रंकुंजराणांतरस्विनाम् ॥ ३४ ॥ गजानीकेनसहितस्तेनराजासुयोधनः ॥ मागधंपुरतःकृत्वाभीमसेनंसमभ्ययात् ॥ ३५ ॥ आपतंतंचतंदृष्ट्वागजा नीकंवृकोदरः ॥ गदापाणिरवारोहद्रथात्सिंहइवोन्नदन् ॥ ३६ ॥ अद्रिसारमयींगुर्वीप्रगृह्यमहतींगदाम् ॥ अभ्यधावद्गजानीकंव्यादितास्यइवांतकः ॥ ३७ ॥ सगजान्गदयानिघ्नन्व्यचरत्समरेबली ॥ भीमसेनोमहाबाहुःसवज्रइववासवः ॥ ३८ ॥ तस्यनादेनमहतामनोहृदयकंपिना ॥ व्यत्यचेष्टंतसंहत्यगजाभीम स्यगर्जतः ॥ ३९ ॥ ततस्तुद्रौपदीपुत्राःसौभद्रश्चमहारथः ॥ नकुलःसहदेवश्चधृष्टद्युम्नश्चपार्षतः ॥ ४० ॥

॥१२४॥

४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ॥ इतिश्री०नै०भा०द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥७॥

पृष्ठंभीमस्यरक्षंतःशरवर्षेणवारणान् ॥ अभ्यवर्षंतधावंतोमेघाइवगिरीन्यथा ॥ ४१ ॥ क्षुरैःक्षुरप्रैर्भल्लैश्चपीतैश्चांजलिकैःशितैः ॥ व्यहरन्नुत्तमांगानिपांडवाग जयोधिनाम् ॥ ४२ ॥ शिरोभिःप्रपतद्भिश्चबाहुभिश्चविभूषितैः ॥ अश्मवृष्टिरिवाभातिपाणिभिश्चसहांकुशैः ॥ ४३ ॥ हृतोत्तमांगाःस्कंधेषुगजानांगजयोधिनः ॥ अदृश्यंताचलाग्रेषुद्रुमाभाग्नशिखाइव ॥ ४४ ॥ धृष्टद्युम्नहतानन्यानपश्यामहागजान् ॥ पततःपात्यमानांश्चपार्षतेनमहात्मना ॥ ४५ ॥ मागधोथमहीपालोगज मैरावणोपमम् ॥ प्रेषयामाससमरेसौभद्रस्यरथंप्रति ॥ ४६ ॥ तमापतंतंसंप्रेक्ष्यमागधस्यमहागजम् ॥ जघानैकेषुणावीरःसौभद्रःपरवीरहा ॥ ४७ ॥ तस्यावर्जित नागस्यकार्ष्णिःपरपुरंजयः ॥ राज्ञोरजतपुंखेनभल्लेनापाहरच्छिरः ॥ ४८ ॥ विगात्यतद्गजानीकंभीमसेनोपिपांडवः ॥ व्यचरत्समरेरुद्रन्गजानींद्रोगिरीनिव ॥ ४९ ॥ एकप्रहारनिहताभीमसेनेनदंतिनः ॥ अपश्यामरणेतस्मिन्गिरीन्वज्रहतानिव ॥ ५० ॥ भग्नदंतान्भग्नकटान्भग्नसक्थांश्चवारणान् ॥ भग्नपृष्ठत्रिका नन्यान्निहतान्पर्वतोपमान् ॥ ५१ ॥ नदतःसीदतश्चान्यान्विमुखान्समरेगतान् ॥ विद्रुतान्भयसंविग्नांस्तथाविशकृतोपरान् ॥ ५२ ॥ भीमसेनस्यमार्गेषुप तितान्पर्वतोपमान् ॥ अपश्यंनिहतान्नागान्राजन्निष्ठीवतोपरान् ॥ ५३ ॥ वमंतोरुधिरंचान्येभिन्नकुंभामहागजाः ॥ विह्वलंतोगताभूमिंशैलाइवधरातले ॥ ५४ ॥ मेदोरुधिरदिग्धांगोवसामज्जासमुक्षितः ॥ व्यचरत्समरेभीमोदंडपाणिरिवांतकः ॥ ५५ ॥ गजानांरुधिरक्लिन्नांगदांविभ्रद्दृढकोदरः ॥ घोरःप्रतिभयश्चा सीत्पिनाकीवपिनाकधृक् ॥ ५६ ॥ संमथ्यमानाःकुद्धेनभीमसेनेनदंतिनः ॥ सहसाप्राद्रवन्क्लिष्टाश्चुद्रंतस्तववाहिनीम् ॥ ५७ ॥ तंहिवीरंमहेष्वासंसौभद्रप्रमुखार थाः ॥ पर्यरक्षंतयुध्यंतंवज्रायुधमिवामराः ॥ ५८ ॥ शोणिताक्तांगदांबिभ्रदुक्षितांगजशोणितैः ॥ कृतांतइवरौद्रात्माभीमसेनोव्यदृश्यत ॥ ५९ ॥ व्यायच्छ मानंगदयादिक्षुसर्वासुभारत ॥ अपश्यामरणेभीमंनृत्यंतमिवशंकरम् ॥ ६० ॥ यमदंडोपमांगुर्वींमिंद्राशनिसमस्वनाम् ॥ अपश्याममहाराजरौद्रांविशसनींगदाम् ॥ ६१ ॥ विमिश्रांकेशमज्जाभिःप्रदिग्धांरुधिरेणच ॥ पिनाकमिवरुद्रस्यक्रुद्धस्याभिप्रतःपशून् ॥ ६२ ॥ यथापशूनांसंघातंयष्ट्यापालःप्रकालयेत् ॥ तथाभी मोगजानीकंगदयासमकालयत् ॥ ६३ ॥ गदयावध्यमानास्तेमार्गणैश्चसमंततः ॥ स्वान्यनीकानिचद्रंतःप्राद्रवन्कुंजरास्तव ॥ ६४ ॥ महावातइवाभ्राणिवि धमित्वासवारणान् ॥ अतिष्ठत्तुमुलेभीमःश्मशानइवशूलभृत् ॥ ६५ ॥ ॥ इतिश्रीम०भी०भीष्मव०चतुर्थदिवसेभीमयुद्धेद्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥

हतेतस्मिन्निति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

संजयउवाच ॥ ॥ हतेतस्मिन्गजानीकेपुत्रोदुर्योधनस्तव ॥ भीमसेनंद्रुतेत्येवंसर्वसैन्यान्यचोदयत् ॥ १ ॥ततःसर्वाण्यनीकानितवपुत्रस्यशासनात्॥अभ्यद्रव न्भीमसेनंनदंतंभैरवान्रवान्॥ २॥तंबलौघमपर्यंतंदेवैरपिसुदुःसहम्॥ आपतंतंसुदुष्पारंसमुद्रमिवपर्वणि॥ ३॥रथनागाश्वकलिलंशंखदुंदुभिनादितम्॥अनं तरथपादातंनरेंद्रस्तिमितह्रदम्॥ ४॥तंभीमसेनःसमरेमहोदधिमिवापरम्॥सेनासागरमक्षोभ्यंवेलेवसमवारयत्॥ ५॥तदाश्चर्यमपश्यामपांडवस्यमहात्मनः॥ भीमसेनस्यसमरेराजन्कर्मातिमानुषम्॥ ६॥ उदीर्णान्पार्थिवान्सर्वान्साश्वान्सरथकुंजरान्॥ असंभ्रमंभीमसेनोगदयासमवारयत् ॥ ७ ॥ ससंवार्यबलौघां स्तान्गदयारथिनांवरः ॥ अतिष्ठत्तुमुलेभीमोगिरिर्मेरुरिवाचलः ॥ ८ ॥ तस्मिन्सुतुमुलेघोरेकालेपरमदारुणे॥ भ्रातरश्चैवपुत्राश्चवृष्टद्युम्नश्चपार्षतः॥ ९॥ द्रौ पदेयाश्चिमन्युश्चशिखंडीचापराजितः॥ नप्राजहन्भीमसेनंभयेजातेमहाबलम्॥ १०॥ततःशैक्यायसींगुर्वींप्रगृह्यमहतींगदाम्॥अधावत्तावकान्योधान्दंड पाणिरिवांतकः॥ ११॥ पोथयन्रथवंदानिवाजिवंदानिचाभिभूः॥ कर्षयन्रथवंदानिवाद्रुवेगेनपांडवः ॥ १२॥ विनिघ्नन्व्यचरत्संख्येयुगांतिकालवद्विभुः॥ ऊरुवेगेनसंकर्षन्रथजालानिपांडवः॥ १३॥ बलानिसंममर्दाशुनड्वलानीवकुंजरः॥ रुद्रस्त्रथेभ्योरथिनोगजेभ्योगजयोधिनः॥ १४॥ सादिनश्चाश्वपृष्ठेभ्यो भूमौचापिपदातिनः ॥ गदयाव्यधमत्सर्वान्वातोवृक्षानिवौजसा ॥ १५ ॥ भीमसेनोमहाबाद्रुत्सवपुत्रस्यवैबले ॥ सापिमज्जावसामांसैःप्रदिग्धारुधिरेणच ॥ १६ ॥ अदृश्यतमहारौद्रागदानागाश्वपातनी॥ तत्रतत्रहतैश्चापिमनुष्यगजवाजिभिः॥ १७॥ रणांगनंसमभवन्मृत्योरावाससन्निभम्॥पिनाकमिवरुद्रस्य कुद्धस्याभिप्रतःपशून्॥ १८॥ यमदंडोपमामुग्रामिंद्राशनिसमस्वनाम्॥ददृशुर्भीमसेनस्यरौद्रींविशसनींगदाम्॥ १९॥आविद्यतोगदांतस्यकौंतेयस्यमहात्म नः॥ बभौरूपंमहाघोरंकालस्येवयुगक्षये ॥ २० ॥ तंतथामहतींसेनांद्रावयंतंपुनःपुनः ॥ दृष्ट्वामृत्युमिवायांतंसर्वेविमनसोभवन् ॥ २१ ॥ यतोयतःप्रेक्षतेस्मग दामुद्यम्यपांडवः ॥ तेनतेनस्मदीर्यंतेसर्वसैन्यानिभारत ॥ २२ ॥ प्रदारयंतंसैन्यानिबलेनामितविक्रमम्॥ ग्रसमानमनीकानिव्यादितास्यमिवांतकम्॥ २३॥तं तथाभीमकर्माणंप्रगृहीतमहागदम् ॥ दृष्ट्वाद्रकोदरंभीष्मःसहसैवसमभ्ययात् ॥ २४ ॥ महतारथघोषेणरथेनादित्यवर्चसा॥ छादयन्शरवर्षेणपर्जन्यइववृष्टि मान्॥ २५॥ तमायांतंतथादृष्ट्वाव्यात्ताननमिवांतकम्॥ भीष्मंभीमोमहाबाद्रुःप्रत्युद्ययादमर्षितः॥ २६ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ॥ इतिश्री०नै०भा० त्रिषष्टितमेऽध्यायः ॥ ६३ ॥ ॥ ७ ॥ ॥ ततइति ॥१॥ २ ॥ ३॥४॥५॥६॥७॥८॥९॥ १० ॥ ११॥१२॥१३॥१४॥१५॥

तस्मिन्क्षणेसात्यकिःसत्यसंधःशिनिप्रवीरोभ्यपतत्पितामहम्॥ निघ्नन्नमित्रान्धनुषादृढेनसंकंपयंस्तवपुत्रस्यसैन्यम्॥ २७॥तंयांतमश्वैरजतप्रकाशैःशरान्व पंतंनिशितान्सुपुंखान्॥ नाशक्नुवन्धारयितुंतदानींसर्वेगणाभारतयेत्वदीयाः ॥ २८॥ अविध्यदेनंदशभिःपृषत्कैरलंबुषोराक्षसोऽसौतदानीम्॥ शरैश्चतुर्भिःप्र तिविध्यतंचनप्राशिनेरभ्यपतद्रथेन ॥ २९॥ अन्वागतंदारुणिवरंनिशम्यतंशत्रुमध्येपरिवर्तमानम्॥ प्रद्रावयंतंकुरुपुंगवांश्चपुनःपुनश्चप्रणदंतमाजौ॥ ३०॥यो धास्त्वदीयाःशरवर्षैरवर्षन्मेघायथाभूधरमंबुवेगैः ॥ तथापितंधारयितुंनशेकुर्मध्यंदिनेसूर्यमिवातपंतम्॥ ३१॥ ततत्रकश्चिन्नविषण्णआसीद्तेराजन्सोमद त्तस्यपुत्रात्॥ सवैसमादायधनुर्महात्माभूरिश्रवाभारतसौमदत्तिः॥ ३२॥ दृष्ट्वारथान्स्वान्व्यपनीयमानान्प्रत्युद्ययौसात्यकिंयोद्धुमिच्छन्॥ ३३॥ ॥ इति श्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०सात्यकिभूरिश्रवःसमागमेत्रिषष्टितमोऽध्यायः॥ ६३॥ ॥ ७॥ ॥संजयउवाच॥ ॥त तोभूरिश्रवाराजन्सात्यकिंनवभिःशरैः॥ प्राविध्यद्भृशसंक्रुद्धस्तोत्रैरिवमहाद्विपम्॥ १॥कौरवंसात्यकिश्चैवशरैःसन्नतपर्वभिः॥अवारयदमेयात्मासर्वलोकस्य पश्यतः॥ २॥ ततोदुर्योधनोराजासोदर्यैःपरिवारितः॥ सौमदत्तिरणेयत्तःसमंतात्पर्यवारयत् ॥ ३ ॥ तंचैवपांडवाःसर्वेसात्यकिंरभसंरणे ॥ परिवार्यस्थिताः संख्येसमंतात्सुमहौजसः ॥ ४ ॥ भीमसेनस्तुसंक्रुद्धोगदामुद्यम्यभारत ॥ दुर्योधनमुखान्सर्वान्पुत्रांस्तेपर्यवारयत् ॥ ५॥ रथैरनेकसाहस्रैःक्रोधामर्षसमन्वि तः॥ नंदकस्तवपुत्रस्तुभीमसेनंमहाबलम्॥ ६॥ विव्याधविंशतिःषड्भिःकंकपत्रैःशिलाशितैः॥ दुर्योधनश्चसमरेभीमसेनंमहारथम्॥ ७॥ आजघानोरसिक्रुद्धो मार्गणैर्नवभिःशितैः॥ ततोभीमोमहाबाद्रुःस्वरथंसुमहाबलः॥ ८॥ आरुरोहरथश्रेष्ठंविशोकंचेदमब्रवीत् ॥ एतेमहारथाःशूराधार्तराष्ट्राःसमागताः॥ ९॥ मा मेवभृशसंक्रुद्हार्हंतुमभ्युद्यतायुधि ॥ मनोरथद्रुमोस्माकंचिंतितोबद्रुवार्षिकः॥ १० ॥ सफलःसूतचाद्येहयोहंपश्यामिसोदरान्॥ यत्राशोकसमुत्क्षिप्तारेणवो रथनेमिभिः॥ ११ ॥ प्रयास्यंत्यंतरिक्षंहिशरवर्दैर्दिगंतरे॥ तत्रतिष्ठतिसन्नद्धःस्वयंराजासुयोधनः ॥ १२ ॥ भ्रातरश्चास्यसन्नद्धाःकुलपुत्रामदोत्कटाः॥ एतान द्यहनिष्यामिपश्यतस्तेनसंशयः ॥ १३ ॥ तस्मान्ममाश्वान्संग्रामेयत्तःसंयच्छसारथे॥ एवमुक्त्वाततःपार्थस्तवपुत्रंविशांपते॥ १४॥ विव्याधनिशितैस्तीक्ष्णैः शरैःकनकभूषणैः॥ नंदकंचत्रिभिर्बाणैरभ्यविध्यत्ततांतरे॥ १५॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

तंतुदुर्योधनःषष्ट्याविद्धाभीमंमहाबलम्॥त्रिभिरन्यैःसुनिशितैर्विंशोकंप्रत्यविध्यत॥ १६ ॥ भीमस्यचरणेराजन्धनुश्चिच्छेदभासुरम्॥ मुष्टिदेशेदृढंशांतीक्ष्णैश्चि भिर्भल्लैर्हसन्निव ॥ १७ ॥ समरेप्रेक्ष्ययंतारंविशोकंतुदकोदरः॥ पीडितंविशिखैस्तीक्ष्णैस्तवपुत्रेणधन्विना ॥ १८ ॥ अमृष्यमाणःसंरब्धोधनुर्दिव्यंपराम्रशत्॥ पु त्रस्यतेमहाराजवधार्थंभरतर्षभ ॥ १९ ॥ समादधत्सुसंक्रुद्धःक्षुरप्रंलोमवाहिनम्॥ तेनचिच्छेदनृपतेर्भीमःकार्मुकमुत्तमम्॥ २० ॥ सोपविध्यधनुश्छिन्नंपुत्रस्ते क्रोधमूर्छितः॥ अन्यत्कार्मुकमादत्तसत्वरंवेगवत्तरम् ॥ २१ ॥ संदधेविशिखंघोरंकालमृत्युसमप्रभम्॥तेनाजघानसंक्रुद्धोभीमसेनंस्तनांतरे॥ २२ ॥ सगाढवि द्धोव्यथितःस्यंदनोपस्थआविशत्॥ सनिषण्णोरथोपस्थेमूर्छामभिजगामह ॥ २३ ॥ तंदृष्ट्वाव्यथितंभीममभिमन्युपुरोगमाः ॥ नाम्रष्यंतमहेष्वासाःपांडवा नांमहारथाः ॥ २४ ॥ ततस्तुतुलांदृष्टिंशस्त्राणांतिग्मतेजसाम्॥ पातयामासुरव्यग्राःपुत्रस्यतवमूर्धनि॥ २५॥ प्रतिलभ्यततःसंज्ञांभीमसेनोमहाबलः॥ दुर्यो धनंत्रिभिर्विद्धापुनर्विव्याधपंचभिः ॥ २६ ॥ शल्यंचपंचविंशत्याशरैर्विव्याधपांडवः ॥ रुक्मपुंखैर्महेष्वासःसविद्धोव्यपयाद्रणात् ॥ २७ ॥ प्रत्युद्ययुस्ततोभी मंतवपुत्राश्चतुर्दश ॥ सेनापतिःसुषेणश्चजलसंधःसुलोचनः॥ २८ ॥ उग्रोभीमरथोभीमोवीरबाहुरलोलुपः॥ दुर्मुखोदुष्प्रधर्षश्चविविंत्सुर्विकटःसमः॥ २९॥ विसृजंतोबहून्बाणान्क्रोधसंरक्तलोचनाः ॥ भीमसेनमभिद्रुत्यविव्यधुःसहिताञ्शम्॥ ३० ॥ पुत्रांस्तुतवसंप्रेक्ष्यभीमसेनोमहाबलः॥ स्रक्किणीविलिहन्वीरः पशुमध्येयथांतकः ॥ ३१ ॥ अभिपत्यमहाबाहुर्गरुत्मानिववेगितः ॥ सेनापतेःक्षुरप्रेणशिरश्चिच्छेदपांडवः ॥ ३२ ॥ संप्रहस्यचहृष्टात्मात्रिभिर्वाणैर्महाभु जः॥ जलसंधंविनिर्भिद्यसोनयद्यमसादनम्॥ ३३ ॥ सुषेणंचततोहत्वाप्रेषयामाससृत्यवे॥ उग्रस्यसशिरस्त्राणंशिरश्चंद्रोपमंभुवि ॥ ३४ ॥ पातयामासभल्लेन कुंडलाभ्यांविभूषितम्॥ वीरबाहुंचसमत्यासाश्वकेतुंससारथिम्॥३५॥ निनायसमरेवीरःपरलोकायपांडवः॥ भीमभीमरथौचोभौभीमसेनोहसन्निव ॥३६॥ पुत्रौतेदुर्मदौराजन्ननयद्यमसादनम्॥ततःसुलोचनंभीमःक्षुरप्रेणमहाहवे॥३७॥मिषतांसर्वसैन्यानामनयद्यमसादनम् ॥ पुत्रास्तुतवतंदृष्ट्वाभीमसेनपराक्रमं ॥३८ ॥ शेषायेन्येभवंस्तत्रतेभीमस्यभयार्दिताः ॥ विप्रद्रुतादिशोराजन्वध्यमानामहात्मना ॥ ३९ ॥ ततोऽब्रवीच्छांतनवःसर्वानेवमहारथान्॥ एषभीमोर णेकुद्धोधार्तराष्ट्रान्महारथान्॥ ४० ॥ यथाप्राप्यान्यथाज्येष्ठान्यथाशूरांश्चसंगतान्॥ निपातयत्युग्रधन्वातंप्रगृह्यतमाचिरम्॥ ४१ ॥

॥ १२६ ॥

॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ सुतेजनैर्बाणैरितिशेषः ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥५७॥५८॥५९॥६०॥६१॥६२॥६३॥६४॥६५॥ ६६॥६७॥

एवमुक्त्वाततःसर्वेधार्तराष्ट्रस्यसैनिकाः॥ अभ्यद्रवंतसंक्रुद्धाभीमसेनंमहाबलम्॥ ४२ ॥ भगदत्तःप्रभिन्नेनकुंजरेणविशांपते ॥ अभ्ययात्सहसात्रयंत्रभीमो व्यवस्थितः॥ ४३ ॥ आपतन्नेवचरणेभीमसेनंशिलीमुखैः॥ अदृश्यंसमरेचक्रेजीमूतइवभास्करम्॥ ४४॥ अभिमन्युमुखास्तुनाम्रष्यंतमहारथाः॥ भीमस्या च्छादनंसंख्येस्ववाद्बुबलमाश्रिताः॥ ४५ ॥ तएनंशरवर्षेणसमंतात्पर्यवारयन् ॥ गजंचशरवृष्ट्यातुबिभिदुस्तेसमंततः॥ ४६॥ सशस्रवृष्ट्याभिहतःसमस्तैस्तैर्म हारथैः॥ प्राग्ज्योतिषगजोराजन्नानालिंगैःसुतेजनैः॥ ४७॥ संजातरुधिरोत्पीडःप्रेक्षणीयोभवद्रणे ॥ गभस्तिभिरिवार्कस्यसंस्यूतोजलदोमहान्॥ ४८॥ सं चोदितोमदस्रावीभगदत्तेनवारणः॥ अभ्यधावततान्सर्वान्कालोत्सृष्टइवांतकः ॥ ४९ ॥ द्विगुणंजवमास्थायकंपयंश्चरणैर्महीं ॥ तस्यतत्सुमहद्रूपंदृष्ट्वासर्वे महारथाः॥ ५० ॥ असत्यंमन्यमानाश्चनातिप्रमनसोभवन् ॥ ततस्तुनृपतिःकुद्धोभीमसेनंस्तनांतरे॥ ५१ ॥ आजघानमहाराजशरेणानतपर्वणा॥ सोतिवि द्धोमहेष्वासस्तेनराज्ञामहारथः॥ ५२ ॥ मूर्छयाभिपरीतात्माध्वजयष्टिंसमाश्रयत्॥ तांस्तुभीतान्समालक्ष्यभीमसेनंचमूर्छितम्॥ ५३॥ ननादबलवन्नादंभग दत्तःप्रतापवान्॥ ततोघटोत्कचोराजन्प्रेक्ष्यभीमंतथागतम्॥५४॥ संक्रुद्धोराक्षसोघोरस्तत्रैवांतरधीयत॥ सकृत्वादारुणांमायांभीरूणांभयवर्धिनीम्॥५५॥ अदृश्यतनिमेषार्धाद्घोररूपंसमास्थितः॥ ऐरावणंसमारूढःसवैमायाकृतंस्वयम्॥ ५६॥ तस्यचान्येपिदिङ्नागावभूवुरनुयायिनः॥ अंजनोवामनश्चैवमहापद्म श्चसुप्रभः॥ ५७॥ त्रयएतेमहानागाराक्षसैःसमधिष्ठिताः॥ महाकायाश्चिधाराजन्प्रस्रवंतोमदंबहु॥ तेजोवीर्यबलोपेतामहाबलपराक्रमाः॥ ५८॥ घटोत्क चस्तुस्वंनागंचोदयामासतंतदा ॥ ५९॥ सगजंभगदत्तंतुहंतुकामःपरंतपः॥ तेचान्येचोदितानागाराक्षसैस्तैर्महाबलैः॥ ६० ॥ परिपेतुःसुसंरब्धाश्चतुर्दंष्ट्राश्चतु र्दिशम्॥ भगदत्तस्यतंनागंविषाणैरभ्यपीडयन्॥ ६१॥ सपीड्यमानस्तैर्नागैर्वेदनार्तःशराहतः॥ अनदत्सुमहानादमिंद्राशनिसमस्वनम्॥ ६२॥ तस्यतंनदतोना दंसुघोरंभीमनिःस्वनम्॥ श्रुत्वाभीष्मोब्रवीद्द्रोणंराजानंचसुयोधनम्॥ ६३॥ एषयुध्यतिसंग्रामेहैडिंबेनदुरात्मना॥ भगदत्तोमहेष्वासःकृच्छ्रेचपरिवर्तते॥ ६४॥ राक्षसश्चमहाकायःसचराजातिकोपनः॥ एतौसमेतौसमरेकालमृत्युसमावुभौ॥ ६५ ॥ श्रूयतेचैवहृष्टानांपांडवानांमहास्वनः ॥ हस्तिनश्चैवसुमहान्भीतस्य रुदितध्वनिः॥ ६६॥ तत्रगच्छामभद्रंवोराजानंपरिरक्षितुम् ॥ अरक्ष्यमाणःसमरेक्षिप्रंप्राणान्विमोक्ष्यति ॥ ६७॥

॥६८॥६९॥७०॥७१॥७२॥७३॥७४॥७५॥७६॥७७॥७८॥७९॥८०॥८१॥८२॥८३॥८४॥ घट्टयंतःस्पृशंतः ॥ ८५ ॥ ८६ ॥ ८७ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणि भीष्मवधपर्व०चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ ७ ॥

तेत्वरध्वंमहावीर्याःकिंचिरेणप्रयामहे ॥ महान्हिवर्ततेरौद्रःसंग्रामोलोमहर्षणः ॥ ६८ ॥ भक्तश्चकुलपुत्रश्चशूरश्चपृतनापतिः ॥ युक्तंतस्यपरित्राणंकर्तुमस्माभिरच्युत ॥ ६९ ॥ भीष्मस्यतद्वचःश्रुत्वासर्वएवमहारथाः ॥ द्रोणभीष्मौपुरस्कृत्यभगदत्तपरीप्सया ॥ ७० ॥ उत्तमंजवमास्थायप्रययुर्यत्रसोऽभवत् ॥ तान्प्रयातान्समालोक्ययुधिष्ठिरपुरोगमाः ॥ ७१ ॥ पंचालाःपांडवैःसार्धंघृष्टतोनुययुःपरान् ॥ तान्यनीकान्यथालोक्यराक्षसेंद्रःप्रतापवान् ॥ ७२ ॥ ननादसुमहानादंविस्फोटमशनेरिव ॥ तस्यतंनिनदंश्रुत्वाद्दृष्ट्वानागांश्चयुध्यतः ॥ ७३ ॥ भीष्मःशांतनवोभूयोभारद्वाजमभाषत ॥ नरोचतेमेसंग्रामोहैडिंबेनदुरात्मना ॥ ७४ ॥ बलवीर्यसमाविष्टःससहायश्चसांप्रतम् ॥ नैषशक्योयुधाजेतुमपिवज्रभृतास्वयम् ॥ ७५ ॥ लब्धलक्षःप्रहारीचवयंचश्रांतवाहनाः ॥ पंचालैःपांडवैश्चदिवसंक्षत विक्षताः ॥ ७६ ॥ तन्ममेरोचतेयुद्धंपांडवैर्जितकाशिभिः ॥ घृष्यतामवहारोद्यश्वोयोत्स्यामःपरैःसह ॥ ७७ ॥ पितामहवचःश्रुत्वातथाचक्रुःस्मकौरवाः ॥ उपायेनापयानंतेघटोत्कचभयार्दिताः ॥ ७८ ॥ कौरवेषुनिवृत्तेषुपांडवाजितकाशिनः ॥ सिंहनादान्प्रशंचक्रुःशंखान्दध्मुश्चभारत ॥ ७९ ॥ एवंतदभवद्युद्धंदिवसंभ्रमरंतर्षभ ॥ पांडवानांकुरूणांचपुरस्कृत्यघटोत्कचम् ॥ ८० ॥ कौरवास्तुततोराजन्प्रययुःशिबिरंस्वकम् ॥ व्रीडमानानिशाकालेपांडवैर्यैःपराजिताः ॥ ८१ ॥ शरविक्षतगात्रास्तुपांडुपुत्रामहारथाः ॥ युद्धेसुमनसोभूत्वाजग्मुःस्वशिबिरंप्रति ॥ ८२ ॥ पुरस्कृत्यमहाराजभीमसेनघटोत्कचौ ॥ पूजयंतस्तदान्योन्यंमुदापरमयायुताः ॥ ८३ ॥ नदंतोविविधान्नादांस्तूर्यस्वनविमिश्रितान् ॥ सिंहनादांश्चकुर्वंतोविमिश्रान्शंखनिःस्वनैः ॥ ८४ ॥ विनदंतोमहात्मानःकंपयंतश्चमेदिनीम् ॥ घट्टयंतश्चमर्माणितवपुत्रस्यमारिष ॥ ८५ ॥ प्रयाताःशिबिरायैवनिशाकालेपरंतप ॥ दुर्योधनस्तुनृपतिर्दीनोभ्रातृवधेनच ॥ ८६ ॥ मुहूर्तंचिंतयामासवाष्पशोकसमाकुलः ॥ ततःकृत्वाविधिंसर्वंशिबिरस्ययथाविधि ॥ प्रदध्यौशोकसंतप्तोभ्रातृव्यसनकर्शितः ॥ ८७ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०चतुर्थदिवसावहारेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ भयंमेसुमहज्जातंविस्मयश्चैवसंजय ॥ श्रुत्वापांडुकुमाराणांकर्मदेवैःसुदुष्करम् ॥ १ ॥ पुत्राणांचपराभावंश्रुत्वासंजयसर्वशः ॥ चिंतामेमहतीसूतभविष्यतिकथंत्विति ॥ २ ॥ ध्रुवंविदुरवाक्यानिधक्ष्यंतिहृदयं मम ॥ यथाहिदृश्यतेसर्वंदैवयोगेनसंजय ॥ ३ ॥

॥ १२७ ॥

भयमिति ॥ १ ॥ २ ॥ ३ ॥

॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥ सापह्नवाःअपरिख्यातकिल्बिषाः ॥ २२ ॥ २३ २४ ॥ २५ ॥ मन्यसिमन्यसे ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

यत्रभीष्ममुखान्सर्वान्शस्त्रज्ञान्योधसत्तमान् ॥ पांडवानामनीकेषुयोधयंतिप्रहारिणः ॥ ४ ॥ केनावध्यामहात्मानःपांडुपुत्रामहाबलाः ॥ केनदत्तवरास्तात किंवाज्ञानंविदंतिते ॥ ५ ॥ येनक्षयंनगच्छंतिदिवितारागणाइव ॥ पुनःपुनर्नरुष्यामिहतंसैन्यंतुपांडवैः ॥ ६ ॥ मय्येवदंडःपतितिदैवात्परमदारुणः ॥ यथाऽवध्याःपांडुसुतायायावध्याश्चमेसुताः ॥ ७ ॥ एतन्मेसर्वमाचक्ष्वयथातथ्येनसंजय ॥ नहिपारंप्रपश्यामिदुःखस्यास्यकथंचन ॥ ८ ॥ समुद्रस्येवमहतोभुजाभ्यांप्रतरन्नरः ॥ पुत्राणांव्यसनंमन्येध्रुवंप्राप्तंसुदारुणम् ॥ ९ ॥ घातयिष्यतिमेसर्वान्पुत्रान्भीमोनसंशयः ॥ नहिपश्यामितंवीरंयोमेरक्षेत्सुतान्रणे ॥ १० ॥ ध्रुवंविनाशःसंग्रामःपुत्राणाममसंजय ॥ तस्मान्मेकारणंसूतशक्तिंचैवविशेषतः ॥ ११ ॥ पृच्छतोवैयथातत्त्वंसर्वमाख्यातुमर्हसि ॥ दुर्योधनश्चयच्चकेदृष्ट्वास्वान्विमुखान्रणे ॥ १२ ॥ भीष्मद्रोणौकृपश्चैवसौबलश्चजयद्रथः ॥ द्रौणिर्वापिमहेष्वासोविकर्णोवामहाबलः ॥ १३ ॥ निश्चयोवापिकस्तेषांतदाऽऽसीन्महात्मनाम् ॥ विमुखेषुमहाप्राज्ञममपुत्रेषुसंजय ॥ १४ ॥ ॥ संजयउवाच ॥ ॥ शृणुराजन्नवहितःश्रुत्वाचैवावधारय ॥ नैवमंत्रकृतंकिंचिन्नैवमायांतथाविधाम् ॥ १५ ॥ नवैविभीषिकांकांचिद्राजन्कुर्वंतिपांडवाः ॥ युध्यंतितेयथान्यायंशक्तिमंतश्चसंयुगे ॥ १६ ॥ धर्मेणसर्वकार्याणिजीवितादीनिभारत ॥ आरभंतेसदापार्थाःप्रार्थयानामहद्यशः ॥ १७ ॥ नतेयुद्धान्निवर्तंतेधर्मोपेतामहाबलाः ॥ श्रियापरमयायुक्तायतोधर्मस्ततोजयः ॥ १८ ॥ तेनावध्यारणेपार्थाजययुक्ताश्चपार्थिव ॥ तवपुत्रादुरात्मानःपापेष्वभिरताःसदा ॥ १९ ॥ निष्ठुराहीनकर्माणस्तेनहीयंतिसंयुगे ॥ सुबहूनिनृशंसानिपुत्रैस्तवजनेश्वर ॥ २० ॥ निकृतानीहपांडूनांनीचैरिवयथानरैः ॥ सर्वंचतदनादृत्यपुत्राणांतवकिल्बिषम् ॥ २१ ॥ सापह्नवाःसदैवासन्पांडवाःपांडुपूर्वज ॥ नचैतान्वद्रुमन्यंतेपुत्रास्तवविशांपते ॥ २२ ॥ तस्यपापस्यसततंक्रियमाणस्यकर्मणः ॥ सांप्रतंसुमहद्घोरंफलंप्राप्तंजनेश्वर ॥ २३ ॥ सत्वंभुंक्ष्वमहाराजसपुत्रःससुहृज्जनः ॥ नावबुध्यसियद्राजन्वार्यमाणःसुहृज्जनैः ॥ २४ ॥ विदुरेणाथभीष्मेणद्रोणेनचमहात्मना ॥ तथामयाचाप्यसकृद्वार्यमाणोनबुध्यसे ॥ २५ ॥ वाक्यंहितंचपथ्यंचमर्त्यःपथ्यमिवौषधम् ॥ पुत्राणांमतमाज्ञायजितान्मन्यसिपांडवान् ॥ २६ ॥ शृणुभूयोयथातत्त्वंयन्मांत्वंपरिपृच्छसि ॥ कारणंभरतश्रेष्ठपांडवानांजयंप्रति ॥ २७ ॥ तत्तेहंकथयिष्यामियथाश्रुतमरिंदम ॥ दुर्योधनेनसंपृष्टएतमर्थंपितामहः ॥ २८ ॥ दृष्ट्वाभ्रातॄन्रणेसर्वान्निर्जितांस्तुमहारथान् ॥ शोकसंमूढहृदयोनिशाकालेस्मकौरवः ॥ २९ ॥

पितामहंमहाप्राज्ञंविनयेनोपगम्यह ॥ यदब्रवीत्सुतस्तेसौतन्मेशृणुजनेश्वर ॥ ३० ॥ ॥ दुर्योधनउवाच ॥ ॥ द्रोणश्चत्वंचशल्यश्चकृपोद्रौणिस्तथैवच ॥ कृत वर्माचहार्दिक्यःकांबोजश्चसुदक्षिणः ॥ ३१ ॥ भूरिश्रवाविकर्णश्चभगदत्तश्चवीर्यवान् ॥ महारथाःसमाख्याताःकुलपुत्रास्तनुत्यजः ॥ ३२ ॥ त्रयाणामपिलो कानांपर्याप्तमाइतिमेमतिः ॥ पांडवानांसमस्ताश्चनातिष्ठंतपराक्रमे ॥ ३३ ॥ तत्रमेसंशयोजातस्तन्ममाचक्ष्वपृच्छतः ॥ यंसमाश्रित्यकौंतेयाजयंत्यस्मान्क्षणे क्षणे ॥ ३४ ॥ ॥ भीष्मउवाच ॥ ॥ शृणुराजन्वचोमत्र्यंयथावक्ष्यामिकौरव ॥ बहुशश्चमयोक्तोसिनचमेतत्त्वयाकृतम् ॥ ३५ ॥ क्रियतांपांडवैःसार्धंशमोभरत सत्तम ॥ एतत्क्षेममहंमन्येपृथिव्यास्तववाविभो ॥ ३६ ॥ भुंक्ष्वेमांपृथिवींराजन्भ्रातृभिःसहितःसुखी ॥ दुर्हृदस्तापयन्सर्वान्नंदयंश्चापिबांधवान् ॥ ३७ ॥ न चमेकोशतस्तातश्रुतवानसिवैपुरा ॥ तदिदंसमनुप्राप्तंयत्पांडूनवमन्यसे ॥ ३८ ॥ यश्चहेतुरवध्यत्वेतेषामक्लिष्टकर्मणाम् ॥ तंशृणुष्वमहाबाहोममकीर्तयतःप्र भो ॥ ३९ ॥ नास्तिलोकेषुतद्भूतंभवितानोभविष्यति ॥ योजयेत्पांडवान्सर्वान्पालिताञ्छार्ङ्गधन्वना ॥ ४० ॥ यत्तुमेकथितंतातमुनिभिर्भावितात्मभिः ॥ पुराण गीतंधर्मज्ञतच्छृणुष्वयथातथम् ॥ ४१ ॥ पुराकिलसुराःसर्वेऋषयश्चसमागताः ॥ पितामहमुपासेदुःपर्वतेगंधमादने ॥ ४२ ॥ तेषांमध्येसमासीनःप्रजापतिरप श्यत ॥ विमानंप्रज्वलद्भ्राजास्थितंप्रवरमंबरे ॥ ४३ ॥ध्यानेनावेद्यतद्ब्रह्माकृत्वाचनियतोंजलिम् ॥नमश्चकारहृष्टात्मापुरुषंपरमेश्वरम् ॥ ४४ ॥ऋषयस्त्वथदेवाश्च दृष्ट्वाब्रह्माणमुत्थितम् ॥ स्थिताःप्रांजलयःसर्वेपश्यंतोमहदद्भुतम् ॥ ४५ ॥ यथावच्चतमभ्यर्च्यब्रह्माब्रह्मविदांवरः ॥ जगादजगतःस्रष्टापरंपरमधर्मवित् ॥ ४६ ॥ वि श्वावसुर्विश्वमूर्तिर्विश्वेशोविष्वक्सेनोविश्वकर्मावशीचा ॥ विश्वेश्वरोवासुदेवोसितस्माद्योगात्मानंदैवतंत्वामुपैमि ॥ ४७ ॥ जयविश्वमहादेवजयलोकहिते रत ॥ जययोगीश्वरविभोजययोगपरावर ॥ ४८ ॥ पद्मगर्भविशालाक्षजयलोकेश्वरेश्वर ॥ भूतभव्यभवन्नाथजयसौम्यात्मजात्मज ॥ ४९ ॥ असंख्येयगुणा धारजयसर्वपरायण ॥ नारायणसुदुष्पारजयशार्ङ्गधनुर्धर ॥ ५० ॥ जयसर्वगुणोपेतविश्वमूर्तेनिरामय ॥ विश्वेश्वरमहाबाहोजयलोकार्थतत्पर ॥ ५१ ॥ महो रगवराहाद्यहरिकेशविभोजय ॥ हरिवासदिशामीशविश्ववासामिताव्यय ॥ ५२ ॥ व्यक्ताव्यक्तामितस्थाननियतेंद्रियसक्रिय ॥ असंख्येयात्मभावज्ञजयगं भीरकामद ॥ ५३ ॥ अनंतविदितब्रह्मन्नित्यभूतविभावन ॥ कृतकार्यकृतप्रज्ञधर्मज्ञविजयावह ॥ ५४ ॥ ॥१२८॥

॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ॥ इतिभी०नै०भा०पंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ ७ ॥ ॥ ततइति ॥ १ ॥ २ ॥ ३ ॥

गुत्यात्मन्सर्वयोगात्मन्स्फुटसंभूतसंभव ॥ भूताद्यलोकतत्त्वेशजयभूतविभावन ॥ ५५ ॥ आत्मयोनेमहाभागकल्पसंक्षेपतत्पर ॥ उद्भावनमनोभावजयब्रह्म जयप्रिय ॥ ५६ ॥ निसर्गसर्गनिरतकामेशपरमेश्वर ॥ अमृतोद्भवसद्भावमुक्तात्मन्विजयप्रद ॥ ५७ ॥ प्रजापतिपतेदेवपद्मनाभमहाबल ॥ आत्मभूतमहाभू तसत्त्वात्मन्जयसर्वदा ॥ ५८ ॥ पादौतवधरादेवीदिशोबाहूदिवंशिरः ॥ मूर्तिस्तेहंसुराःकायश्चंद्रादित्यौचचक्षुषी ॥ ५९ ॥ बलंतपश्चसत्यंचकर्मधर्मात्मकंत .व ॥ तेजोग्निःपवनःश्वासआपस्तेस्वेदसंभवाः ॥ ६० ॥ अश्विनौश्रवणौनित्यंदेवीजिह्वासरस्वती ॥ वेदाःसंस्कारनिष्ठाहित्वयीदंजगदाश्रितम् ॥ ६१ ॥ नसंख्यानं परीमाणंननतेजोनपराक्रमम् ॥ नबलंयोगयोगीशजानीमस्तेनसंभवम् ॥ ६२ ॥ त्वद्भक्तिनिरतादेवनियमैस्त्वांसमाश्रिताः ॥ अर्चयामःसदाविष्णोपरमेशंमहे श्वरम् ॥ ६३ ॥ ऋषयोदेवगंधर्वायक्षराक्षसपन्नगाः ॥ पिशाचामानुषाश्चैवसृगपक्षिसरीसृपाः ॥ ६४ ॥ एवमादिमयास्तेपृथिव्यांत्वत्प्रसादजम् ॥ पद्मनाभ विशालाक्षकृष्णदुःखप्रणाशन ॥ ६५ ॥ त्वंगतिःसर्वभूतानांत्वंनेतात्वंजगद्गुरुः ॥ त्वत्प्रसादेनदेवेशसुखिनोविबुधाःसदा ॥ ६६ ॥ पृथिवीनिर्भयादेवंत्वत्प्रसादा त्सदाभवत् ॥ तस्माद्भवविशालाक्षयदुवंशविवर्धनः ॥ ६७ ॥ धर्मसंस्थापनार्थायदैत्यानांचवधायच ॥ जगतोधारणार्थायविज्ञाप्यंकुरुमेविभो ॥ ६८ ॥ उक्तत्व रमकंगुह्यंत्वत्प्रसादादिदंविभो ॥ वासुदेवतदेतत्तेमयोद्गीतंयथातथम् ॥ ६९ ॥ स्रष्टासंकर्षणंदेवंस्वयमात्मानमात्मना ॥ कृष्णत्वमात्मनात्माक्षीःप्रद्युम्नंचात्मसंभ वम् ॥ ७० ॥ प्रद्युम्नादनिरुद्धंत्वंयंविदुर्विष्णुमव्ययम् ॥ अनिरुद्धोऽसृजन्मांवैब्रह्माणंलोकधारिणम् ॥ ७१ ॥ वासुदेवमयःसोहंत्वयैवास्मिविनिर्मितः ॥ विभज्यभा गशोत्मानंव्रजमानुषतांविभो ॥ ७२ ॥ तत्रासुरवधंकृत्वासर्वलोकसुखायवै ॥ धर्मंप्राप्ययशःप्राप्ययोगंप्राप्स्यसितत्त्वतः ॥ ७३ ॥ त्वांहिब्रह्मर्षयोलोकेदेवाश्चा मितविक्रम ॥ तैस्तैर्हिनामभिर्युक्तागायंतिपरमात्मकम् ॥ ७४ ॥ स्थिताश्चसर्वेत्वयिभूतसंघाःकृत्वाश्रयंत्वांवरदंसुबाहो ॥ अनादिमध्यांतमपारयोगंलोकस्यसे तुंप्रवदंतिविप्राः ॥ ७५ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप० विश्वोपाख्यानेपंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ॥ ॥ ॥ भीष्मउवाच ॥ ॥ ततःसभगवान्देवोलोकानामीश्वरेश्वरः ॥ ब्रह्माणंप्रत्युवाचेदंस्निग्धगंभीरयागिरा ॥ १ ॥ विदितंतातयोगान्मेसर्वमेतत्तवेप्सितम् ॥ तथा तद्भवितेत्युक्त्वातत्रैवांतरधीयत ॥ २ ॥ ततोदेवर्षिगंधर्वाविस्मयंपरमंगताः ॥ कौतूहलपराःसर्वेपितामहमथाब्रुवन् ॥ ३ ॥

कोन्वर्थयोभगवताप्रणम्यविनयाद्विभो॥ वाग्भिःस्तुतोवरिष्ठाभिःश्रोतुमिच्छामतंवयम् ॥ ४ ॥ एवमुक्तस्तुभगवान्प्रत्युवाचपितामहः ॥ देवब्रह्मर्षिगंधर्वान्स
र्वान्मधुरयागिरा॥ ५॥ यत्तत्परंभविष्यंचभवितव्यंचयत्परम् ॥ भूतात्माचप्रभुश्चैवब्रह्मयच्चपरंपदम्॥ ६॥ तेनास्मिकृतसंवादःप्रसन्नेनसुरर्षभाः॥ जगतोनु
ग्रहार्थायेयाचितोमेजगत्पतिः॥ ७ ॥ मानुषंलोकमातिष्ठवासुदेवइतिश्रुतः॥ असुराणांवधार्थायसंभवस्वमहीतले॥ ८॥ संग्रामेनिहतायेतेदैत्यदानवराक्षसाः
॥ तइमेनृपुसंभूताघोररूपामहाबलाः॥ ९॥ तेषांवधार्थंभगवान्नरेणसहितोवशी॥ मानुषींयोनिमास्थायचरिष्यतिमहीतले ॥ १० ॥ नरनारायणौयौतौपुरा
णाऋषिसत्तमौ॥ सहितौमानुषेलोकेसंभूतावमितद्युती ॥ ११ ॥ अजेयौसमरेयत्तौसहितैरमरैरपि ॥ मूढास्त्वेतौनजानंतिनरनारायणावृषी ॥ १२ ॥ तस्याहम
ग्रजःपुत्रःसर्वस्यजगतःप्रभुः॥ वासुदेवोर्चनीयोवःसर्वलोकमहेश्वरः॥ १३॥ तथामनुष्योयमितिकदाचित्सुरसत्तमाः॥ नावज्ञेयोमहावीर्यःशंखचक्रगदाधरः
॥ १४॥ एतत्परमकंगुह्यमेतत्परमकंपदम्॥ एतत्परमकंब्रह्मएतत्परमकंयशः॥ १५॥ एतदक्षरमव्यक्तमेतद्वैशाश्वतंमहः॥ यत्तत्पुरुषसंज्ञंवैगीयतेज्ञाय्यतेनच॥
॥ १६॥ एतत्परमकंतेजएतत्परमकंसुखम्॥ एतत्परमकंसत्यंकीर्तितंविश्वकर्मणा॥ १७॥ तस्मात्सेंद्रैःसुरैःसर्वैर्लोकैश्चामितविक्रमः॥ नावज्ञेयोवासुदेवोमानु
षोयमितिप्रभुः॥१८॥ यश्चमानुषमात्रोयमितिब्रूयात्समंदधीः॥ हृषीकेशमवज्ञानात्तमाहुःपुरुषाधमम्॥ १९॥ योगिनंतंमहात्मानंप्रविष्टंमानुषींतनुम्॥ अव
मन्येद्वासुदेवंतमाहुस्तामसंजनाः॥ २०॥ देवंचराचरात्मानंश्रीवत्सांकंसुवर्चसम्॥ पद्मनाभंनजानातितमाहुस्तामसंबुधाः॥ २१॥ किरीटकौस्तुभधरंमित्रा
णामभयंकरम्॥ अवजानन्महात्मानंघोरेतमसिमज्जति॥ २२॥ एवंविदित्वातत्त्वार्थंलोकानामीश्वरेश्वरः॥ वासुदेवोनमस्कार्यःसर्वलोकैःसुरोत्तमाः॥ २३॥
॥ भीष्मउवाच॥ ॥ एवमुक्त्वासभगवान्देवान्सर्षिगणान्पुरा ॥ विसृज्यसर्वभूतात्माजगामभवनंस्वकम् ॥ २४॥ ततोदेवाःसगंधर्वामुनयोप्सरसोपिच॥
कथांतांब्रह्मणागीतांश्रुत्वाप्रीतादिवंययुः॥ २५॥ एतच्छ्रुतंमयातातऋषीणांभावितात्मनाम्॥ वासुदेवंकथयतांसमवायेपुरातनम्॥ २६॥ रामस्यजामदग्न्य
स्यमार्कंडेयस्यधीमतः॥ व्यासनारदयोश्चापिसकाशाद्भरतर्षभ ॥ २७॥ एतमर्थंचविज्ञायश्रुत्वाचप्रभुमव्ययम् ॥ वासुदेवंमहात्मानंलोकानामीश्वरेश्वरम्
॥ २८॥ यस्यचैवात्मजोब्रह्मासर्वस्यगतःपिता॥ कथंनवासुदेवोयमर्च्यश्चेज्यश्चमानवैः॥ २९॥

॥ १२९ ॥

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ कृतलक्षणैःस्वस्वगुणप्रख्यातैः ॥ ३९ ॥ सात्वताःपंचरात्रागमविधिनापूजकास्तदीयंसात्वतं ॥ ४० ॥ कक्ष्याकांची पुरीद्वारका
वारितोसिमयातातमुनिभिर्वेदपारगैः॥ मागच्छसंयुगंतेनवासुदेवेनधन्विना॥ ३० ॥ मापांडवैःसार्द्धमितित्वंमोहान्नबुध्यसे ॥ मन्येत्वांराक्षसंक्रूरंतथाचा
सितमोद्यतः॥ ३१ ॥ यस्माद्विषसिगोविंदंपांडवंतंधनंजयम्॥ नरनारायणौदेवौकोन्योद्विष्याद्विमानवः॥ ३२ ॥ तस्माद्भवीमितेराजन्नेषवैशाश्वतोव्ययः॥ स
र्वलोकमयोनित्यःशास्ताधात्रीधरोध्रुवः॥ ३३॥ योधारयतिलोकांस्त्रींश्चराचरगुरुःप्रभुः॥ योद्दाजयश्चजेताचसर्वप्रकृतिरीश्वरः॥ ३४॥ राजन्सर्वमयोत्येष
तमोरागविवर्जितः॥ यतःकृष्णस्ततोधर्मोयतोधर्मस्ततोजयः॥ ३५ ॥ तस्यमाहात्म्ययोगेनयोगेनात्ममयेनच॥ धृताःपांडुसुताराजन्जयश्चैषांभविष्यति॥
॥ ३६॥ श्रेयोयुक्तांसदाबुद्धिंपांडवानांदधातियः॥ वलंचैवरणेनित्यंभयेभ्यश्चैवरक्षति ॥ ३७ ॥ सएषशाश्वतोदेवःसर्वगुह्यमयःशिवः॥ वासुदेवइतिज्ञेयोय
न्मांपृच्छसिभारत॥ ३८॥ ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चकृतलक्षणैः॥ सेव्यतेभ्यर्च्यतेचैवनित्यमुक्तैःस्वकर्मभिः॥ ३९॥ द्वापरस्ययुगस्यांतेआदौकलियुगस्यच
सात्वतंविधिमास्थायगीतःसंकर्षणेनवै ॥ ४० ॥ सएषसर्वैसुरमर्त्यलोकंसमुद्रकक्ष्यांतरितांपुरींच ॥ युगेयुगेमानुषेचैववासंयुनःपुनःसृजतेवासुदेवः॥ ४१ ॥
इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०विश्वोपाख्यानेषट्षष्टितमोऽध्यायः॥ ६६ ॥ ॥ ७ ॥ ॥ दुर्योधनउवाच ॥ ॥वासुदेवोमहद्भूतंस
र्वलोकेषुकथ्यते॥ तस्यागमंप्रतिष्ठांचज्ञातुमिच्छेपितामह॥ १॥ ॥भीष्मउवाच॥ ॥वासुदेवोमहद्भूतंसर्वदैवतदैवतम्॥नपरंपुंडरीकाक्षादृश्यतेभरतर्षभ
॥ २॥ मार्कंडेयश्चगोविंदेकथयत्यद्भुतंमहत्॥ सर्वभूतानिभूतात्मामहात्मापुरुषोत्तमः॥ ३॥ आपोवायुश्चतेजश्चत्रयमेतदकल्पयत्॥ ससृष्ट्वापृथिवींदेवींसर्व
लोकेश्वरःप्रभुः॥ ४॥ अप्सुवैशयनंचक्रेमहात्मापुरुषोत्तमः॥ सर्वतेजोमयोदेवोयोगात्मासुष्वापतत्रह॥ ५॥ मुखतःसोग्निमसृजत्प्राणाद्वायुमथापिच॥ सरस्व
तींचवेदांश्चमनसःससृजेऽच्युतः॥ ६ ॥ एषलोकान्ससर्जादौदेवांश्चऋषिभिःसह ॥ निधनंचैवमृत्युंचप्रजानांप्रभवाप्ययौ ॥ ७ ॥ एषधर्मश्चधर्मज्ञोवरदःसर्व
कामदः॥ एषकर्ताचकार्यंचपूर्वदेवःस्वयंप्रभुः॥ ८॥ भूतंभव्यंभविष्यच्चपूर्वमेतदकल्पयत्॥ उभेसंध्येदिशःखंचनियमांश्चजनार्दनः॥ ९ ॥ ऋषींश्चैवहिगोविंद
स्रष्टारंजगतश्चापिमहात्माप्रभुरव्ययः॥ १० ॥

॥ ४१ ॥ इ० भी०नै०भा०षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ७ ॥ ७ ॥ वासुदेवइति ॥ १ ॥ २ ॥३॥४॥५॥६॥ निधनंमरणं मृत्युंमरणप्रयोजनं प्रभवउत्पत्तिहेतुः अव्ययःप्रलयहेतुः ॥७॥८॥९॥ १० ॥

॥ ११ ॥ १२ ॥ १३ ॥ कर्णात्स्रवतीतिकर्णस्रोतःकर्णमलं ॥ १४ ॥ ब्रह्मणःसकाशादपचितिसत्कारंयातुंप्राप्तुं यांतमितिपाठेब्रह्मणःअपचितिक्षयंकर्तुमितिशेषः यांतंधावंतं ॥१५॥ १६ ॥ १७ ॥ १८ ॥

अग्रजंसर्वभूतानांसंकर्षणमकल्पयत् ॥ तस्मान्नारायणोजज्ञेदेवदेवःसनातनः ॥ ११ ॥ नाभौपद्मंबभूवास्यसर्वलोकस्यसंभवात् ॥ तस्मात्पितामहोजातस्त स्माज्जातास्त्विमाःप्रजाः ॥ १२ ॥ शेषंचाकल्पयद्देवमनंतंविश्वरूपिणम् ॥ योधारयतिभूतानिधरांचेमांसपर्वताम् ॥ १३ ॥ ध्यानयोगेनविप्राश्चतंविदंतिमहौजस म् ॥ कर्णस्रोतोभवंचापिमधुनामहासुरम् ॥ १४ ॥ तमुग्रमुग्रकर्माणमुग्रांबुद्धिंसमास्थितम् ॥ ब्रह्मणोपचितिंयातुंजघानपुरुषोत्तमः ॥ १५ ॥ तस्यतातवधादेव देवदानवमानवाः ॥ मधुसूदनमित्याहुःकृष्णयश्चजनार्दनम् ॥ १६ ॥ वराहश्चैवसिंहश्चविविक्रमगतिःप्रभुः ॥ एषमातापिताचैवसर्वेषांप्राणिनांहरिः ॥ १७ ॥ परंहि पुंडरीकाक्षान्नभूतंनभविष्यति ॥ मुखतःसोसृजद्विप्रान्बाहुभ्यांक्षत्रियांस्तथा ॥ १८ ॥ वैश्यांश्चाप्युरुतोराजन्शूद्रान्वैपादतस्तथा ॥ तपसानियतोदेवोनिधानंस र्वदेहिनाम् ॥ १९ ॥ ब्रह्मभूतममावास्यांपौर्णमास्यांतथैवच ॥ योगभूतंपरिचरन्केशवंमहदाप्नुयात् ॥ २० ॥ केशवःपरमंतेजःसर्वलोकपितामहः ॥ एवमाहुर्हृ षीकेशंमुनयोवैनराधिप ॥ २१ ॥ एवमेनंविजानीहिआचार्यंपितरंगुरुम् ॥ कृष्णोयस्यप्रसीदेतलोकास्तेनाक्षयाजिताः ॥ २२ ॥ यश्चैवैनंभयस्थानेकेशवंशरणंव्र जेत् ॥ सदानरःपठंश्चेदंस्वस्तिमान्ससुखीभवेत् ॥ २३ ॥ येचकृष्णंप्रपद्यंतेतेनमुह्यंतिमानवाः ॥ भयेमहतिमग्नांश्चपातिनित्यंजनार्दनः ॥ २४ ॥ सतंयुधिष्ठिरो ज्ञात्वायाथातथ्येनभारत ॥ सर्वात्मनामहात्मानंकेशवंजगदीश्वरम् ॥ प्रपन्नःशरणंराजन्योगानांप्रभुमीश्वरम् ॥ २५ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभी ष्मव० विश्वोपाख्यानेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ भीष्मउवाच ॥ ॥ शृणुचेदंमहाराजब्रह्मभूतंस्तवंमम ॥ ब्रह्मर्षिभिश्च देवैश्चयःपुराकथितोभुवि ॥ १ ॥ साध्यानामपिदेवानांदेवदेवेश्वरःप्रभुः ॥ लोकभावनभावज्ञइतित्वांनारदोब्रवीत् ॥ २ ॥ भूतंभव्यंभविष्यंचमार्कंडेयोभ्युवाच ह ॥ यज्ञंत्वांचैवयज्ञानांतपश्चतपसामपि ॥ ३ ॥ देवानामपिदेवंत्वामाहभगवान्भृगुः ॥ पुराणंचैवपरमंविष्णोरूपंतवेतिच ॥ ४ ॥ वासुदेवोवसूनांत्वंशक्रस्या पयितातथा ॥ देवदेवोसिदेवानामितिद्वैपायनोब्रवीत् ॥ ५ ॥ पूर्वंप्रजानिसर्गेचदक्षमाहुःप्रजापतिम् ॥ स्रष्टारंसर्वलोकानामंगिरास्त्वांतथाऽब्रवीत् ॥ ६ ॥ अव्य क्तंतेशरीरोत्थंव्यक्तंतेमनसिस्थितम् ॥ देवास्त्वत्संभवाश्चैवदेवलस्त्वसितोब्रवीत् ॥ ७ ॥

॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ॥ ॥ शृण्विति इदमितिसामान्येनपुंसकं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

॥ १३० ॥

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ ॥ इतिश्री०नै०भा० अष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ ॥ ॥ व्युषितायामिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

शिरसातेदिवंव्याप्तंबाहुभ्यांपृथिवीतथा ॥ जठरंतेत्रयोलोकाःपुरुषोसिसनातनः ॥ ८ ॥ एवंत्वामभिजानंतितपसाभाविताजनाः ॥ आत्मदर्शनतृप्तानामृषीणां चासिसत्तमः ॥ ९ ॥ राजर्षीणामुदाराणामाहवेष्वनिवर्तिनाम् ॥ सर्वधर्मप्रधानानांत्वंगतिर्मधुसूदन ॥ १० ॥ इतिनित्ययोगविद्भिर्भगवान्पुरुषोत्तमः ॥ सनत्कु मारप्रमुखैःस्तूयतेभ्यर्च्यतेहरिः ॥ ११ ॥ एषतेविस्तरस्तातसंक्षेपश्चप्रकीर्त्तितः ॥ केशवस्ययथातत्त्वंसुप्रीतोभजकेशवम् ॥ १२ ॥ ॥ संजयउवाच ॥ ॥ पुण्यंश्रु त्वैतदाख्यानंमहाराजसुतस्तव ॥ केशवंबहुमेनेसपांडवांश्चमहारथान् ॥ १३ ॥ तमब्रवीन्महाराजभीष्मःशांतनवःपुनः ॥ माहात्म्यंतेश्रुतंराजन्केशवस्यमहा त्मनः ॥ १४ ॥ नरस्यचययथातत्त्वंयन्मांत्वंपृच्छसेनृप ॥ यदर्थंनृषुसंभूतौनरनारायणावृषी ॥ १५ ॥ अवध्यौचययावीरौसंयुगेष्वपराजितौ ॥ यथाचपांडवारा जन्नवध्यायुधिकस्यचित् ॥ १६ ॥ प्रीतिमान्हिदृढंकृष्णःपांडवेषुयशस्विषु ॥ तस्माद्ब्रवीमिराजेंद्रशमोभवतुपांडवैः ॥ १७ ॥ पृथिवींभुंक्ष्वसहितोभ्रातृभिर्बलिभिर्वशी ॥ नरनारायणौदेवावजायनशिष्यसि ॥ १८ ॥ एवमुक्त्वातवपितातूष्णीमासीद्विशांपते ॥ व्यसर्जयच्चराजानंशयनंचविवेशह ॥ १९ ॥ राजाचशि विरंप्रायात्प्रणिपत्यमहात्मने ॥ शिश्येचशयनेशुभ्रेरात्रिंतांभरतर्षभ ॥ २० ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिविश्वोपाख्यानेअष्टषष्टितमो ऽध्यायः ॥ ६८ ॥ ॥ विश्वोपाख्यानंसमाप्तम् ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ व्युषितायांतुशर्वर्यामुदितेचदिवाकरे ॥ उभसेनेमहाराजयुद्धायैवसमीयतुः ॥ १ ॥ अभ्यधावंतसंक्रुद्धाःपरस्परजिगीषवः ॥ तेसर्वेसहितायुद्धेसमालोक्यपरस्परम् ॥ २ ॥ पांडवाधार्तराष्ट्राश्चराजन्दुर्मंत्रितेतव ॥ व्यूहौचव्यूह्यसंरब्धाःसंप्रहृष्टाः प्रहारिणः ॥ ३ ॥ अरक्षन्मकरव्यूहंभीष्मोराजन्समंततः ॥ तथैवपांडवाराजन्नरक्षन्व्यूहमात्मनः ॥ ४ ॥ सनिर्ययौमहाराजपितादेवव्रतस्तव ॥ महेंद्ररथवंशे नसंवृतोरथिनांवरः ॥ ५ ॥ इतरेतरमन्वीयुर्यथाभागमवस्थिताः ॥ रथिनःपत्तयश्चैवदंतिनःसादिनस्तथा ॥ ६ ॥ तान्दृष्ट्वाभ्युद्यतान्संख्येपांडवाहियशस्विनः ॥ श्येनेनव्यूहराजेनतेनाजय्येनसंयुगे ॥ ७ ॥ अशोभतमुखेतस्यभीमसेनोमहाबलः ॥ नेत्रेशिखंडीदुर्धर्षोधृष्टद्युम्नश्चपार्षतः ॥ ८ ॥ शीर्षेतस्याभवद्वीरःसात्यकिःसत्यविक्रमः ॥ विधुन्वन्गांडिवंपार्थोग्रीवायामभवत्तदा ॥ ९ ॥ अक्षौहिण्यासमंतत्रवामपक्षोभवत्तदा ॥ महात्माद्रुपदःश्रीमान्सहपुत्रेणसंयुगे ॥ १० ॥ दक्षि णश्चाभवत्पक्षःकैकेयोऽक्षौहिणीपतिः ॥ पृष्ठतोद्रौपदेयाश्चसौभद्रश्चापिवीर्यवान् ॥ ११ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ॥ इतिश्री०नै०भा०ऊनसप्त

पृष्ठेसमभवच्छ्रीमान्स्वयंराजायुधिष्ठिरः॥ भ्रातृभ्यांसहितोवीरोयमाभ्यांचाप्युविक्रमः ॥ १२ ॥ प्रविश्यतुरणेभीमोमकरंमुखतस्तदा ॥ भीष्ममासाद्यसंग्रामे च्छादयामाससायकैः॥ १३ ॥ ततोभीष्मोमहास्त्राणिपातयामासभारत ॥ मोहयन्पांडुपुत्राणांव्यूढंसैन्यंमहाहवे ॥ १४ ॥ संमुद्यतितदासैन्येत्वरमाणोधनंजयः॥ भीष्मंशरसहस्रेणविव्याधरणमूर्धनि ॥ १५ ॥ प्रतिसंवार्यचास्त्राणिभीष्ममुक्तानिसंयुगे ॥ स्वेनानीकेनहृष्टेनयुद्धायसमुपस्थितः ॥ १६ ॥ ततोदुर्योधनो राजाभारद्वाजमभाषत ॥ पूर्वंदृष्ट्वावधंघोरंबलस्यबलिनांवरः ॥ १७ ॥ भ्रातॄणांचवधंयुद्धेस्मरमाणोमहारथः ॥ आचार्यसततंहित्वंहितकामोममानघ ॥ १८ ॥ वयंहित्वांसमाश्रित्यभीष्मंचैवपितामहम्॥ देवानपिरणेजेतुंप्रार्थयामोनसंशयः॥ १९ ॥ किमुपांडुसुतान्युद्धेहीनवीर्यपराक्रमान्॥ सतथाकुरुभद्रंते यथावध्यंतिपांडवाः॥ २० ॥ एवमुक्तस्ततोद्रोणस्तवपुत्रेणमारिष॥ अभिनत्पांडवानीकंप्रेक्षमाणस्यसात्यकेः ॥ २१ ॥ सात्यकिस्तुततोद्रोणंवारयामासभारत ॥ तयोःप्रवृत्तेयुद्धंघोररूपंभयावहम्॥ २२ ॥ शैनेयंतुरणेक्रुद्धोभारद्वाजःप्रतापवान्॥ अविध्यन्निशितैर्बाणैर्जत्रुदेशेहसन्निव ॥ २३ ॥ भीमसेनस्ततःक्रुद्धो भारद्वाजमविध्यत ॥ संरक्षन्सात्यकिंराजन्द्रोणाच्छस्त्रभृतांवरात्॥ २४ ॥ ततोद्रोणश्चभीष्मश्चतथाशल्यश्चमारिष॥ भीमसेनंरणेक्रुद्धाश्छादयांचक्रिरेशरैः ॥ २५ ॥ तत्राभिमन्युःसंक्रुद्धोद्रौपदेयाश्चमारिष ॥ विव्यधुर्निशितैर्बाणैःसर्वांस्तानुद्यतायुधान् ॥ २६ ॥ द्रोणभीष्मौतुसंक्रुद्धावापतंतौमहाबलौ ॥ प्रत्युद्ययौ शिखंडीतुमहेष्वासोमहाहवे ॥ २७ ॥ प्रगृह्यबलवद्वीरोधनुर्जलदनिःस्वनम्॥ अभ्यवर्षच्छरैस्तूर्णंछादयानोदिवाकरम् ॥ २८ ॥ शिखंडिनंसमासाद्यभरतानांपितामहः॥ अवर्जयतसंग्रामंस्त्रीत्वंतस्यानुसंस्मरन् ॥ २९ ॥ ततोद्रोणोमहाराजअभ्यद्रवततरणे ॥ रक्षमाणस्तदाभीष्मंतवपुत्रेणचोदितः ॥ ३० ॥ शिखंडीतुस मासाद्यद्रोणंशस्त्रभृतांवरम्॥ अवर्जयतसंत्रस्तोयुगांताग्निमिवोल्बणम्॥ ३१ ॥ ततोबलेनमहतापुत्रस्तवविशांपते॥ जुगोपभीष्ममासाद्यपार्थयानोमहद्यशः ॥ ३२ ॥ तथैवपांडवाराजन्पुरस्कृत्यधनंजयम्॥ भीष्ममेवाभ्यवर्ततजयेकृत्वादृढांमतिम्॥ ३३ ॥ तद्युद्धमभवद्घोरंदेवानांदानवैरिव ॥ जयमाकांक्षतांसंख्येय शश्चसुमहाद्भुतम्॥ ३४ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिपंचमदिवसयुद्धारंभेऊनसप्ततितमोऽध्यायः॥ ६९ ॥ ॥ ७ ॥ ॥ ७ ॥

संजयउवाच ॥ ॥ अकरोत्तुमुलंयुद्धंभीष्मःशांतनवस्तदा॥ भीमसेनभयादिच्छन्पुत्रांस्तारयितुंतव॥ १ ॥ तितमोऽध्यायः ॥ ६९ ॥ ॥ ७ ॥ ॥ अकरोदिति ॥ १

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

पूर्वाह्णेतन्महारौद्रंराज्ञांयुद्धमवर्तत ॥ कुरूणांपांडवानांचमुख्यशूरविनाशनम्॥ २ ॥ तस्मिन्नाकुलसंग्रामेवर्तमानेमहाभये॥ अभवत्तुमुलःशब्दःसंस्पृशन्गगनंमहत्॥ ३ ॥ नदद्भिश्चमहानागैर्हेषमाणैश्चवाजिभिः॥ भेरीशंखनिनादैश्चतुमुलंसमपद्यत ॥ ४ ॥ युयुत्सवस्तेविक्रांताविजयायमहाबलाः॥ अन्योन्यमभिग र्जंतोगोष्ठेष्विवमहर्षभाः ॥ ५ ॥ शिरसांपात्यमानानांसमरेनिशितैःशरैः ॥ अश्मवृष्टिरिवाकाशेबभूवभरतर्षभ ॥ ६ ॥ कुंडलोष्णीषधारीणिज्ञातरूपोज्ज्वलानिच॥ पतितानिस्मदृश्यंतेशिरांसिभरतर्षभ ॥ ७ ॥ विशिखोन्मथितैर्गात्रैर्बाहुभिश्चसकार्मुकैः ॥ सहस्राभरणैश्चान्यैरभवच्छादितामही ॥ ८ ॥ कवचोपहितैर्गात्रैर्हस्तैश्चसमलंकृतैः॥ मुखैश्चचंद्रसंकाशैरक्तांतनयनैःशुभैः॥ ९ ॥ गजवाजिमनुष्याणांसर्वगात्रैश्चभूपते॥ आसीत्सर्वासमास्तीर्णामुहूर्तेनवसुंधरा॥ १० ॥ रजोमेघैश्चतुमुलैःशस्त्रविद्युत्प्रकाशिभिः ॥ आयुधानांचनिर्घोषःस्तनयित्नुसमोऽभवत् ॥ ११ ॥ ससंप्रहारस्तुमुलःकटुकःशोणितोदकः॥ प्रावर्ततकुरूणांचपांडवानांचभारत ॥ १२ ॥ तस्मिन्महाभयेघोरेतुमुलेलोमहर्षणे ॥ वर्तमुःशरवर्षाणिक्षत्रियायुद्धदुर्मदाः ॥ १३ ॥ आक्रोशन्कुंजरास्तत्रशरवर्षप्रतापिताः ॥ तावकानांपरेषांचसंयुगेभरतर्षभ ॥ १४ ॥ संरब्धानांचवीराणांधीराणाममितौजसाम्॥ धनुर्ज्यातलशब्देननप्राज्ञायतकिंचन ॥ १५ ॥ उत्थितेषुकबंधेषुसर्वतःशोणितोदके॥ समरेपर्यधावंतनृपारिपुवधोद्यताः॥ १६ ॥ शरशक्तिगदाभिस्तेखड्गैश्चामिततेजसः॥ निजघ्नुःसमरेन्योन्यंशूराःपरिघबाहवः॥ १७ ॥ बभ्रमुःकुंजराश्चात्रशरैर्विद्धानिरंकुशाः ॥ अश्वाश्वपर्यधावंतहतारोहादिशोदश ॥ १८ ॥ उत्पत्यनिपतंत्यन्येशरघातप्रपीडिताः ॥ तावकानांपरेषांचयोधाभरतसत्तम ॥ १९ ॥ वाहानामुत्तमांगानांकार्मुकाणांचभारत ॥ गदानांपरिघाणांचहस्तानांचोरुभिःसह ॥ २० ॥ पादानांभूषणानांचकेयूराणांचसंघशः॥ राशयस्तत्रदृश्यंतेभीष्मभीमसमागमे ॥ २१ ॥ अश्वानांकुंजराणांचरथानांचानिवर्तिनाम्॥ संघाताःस्मप्रदृश्यंतेततत्रतत्रविशांपते॥ २२ ॥ गदाभिरसिभिःप्रासैर्बाणैश्चनतपर्वभिः॥ जघ्नुःपरस्परंतत्रक्षत्रियाःकालआगते ॥ २३ ॥ अपरेबाहुभिर्वीरानियुद्धकुशलायुधि॥ बहुधासमसज्जंतआयसैःपरिघैरिव ॥ २४ ॥ मुष्टिभिर्जानुभिश्चैवतलैश्चैवविशांपते ॥ अन्योन्यंजघ्निरेवीरास्तावकाःपांडवैःसह ॥ २५ ॥ पतितैःपात्यमानैश्चविचेष्टद्भिश्चभूतले ॥ घोरमायोधनंजज्ञेतत्रतत्रजनेश्वर ॥ २६ ॥ विरथारथिनश्चात्रनिस्त्रिंशवरधारिणः॥ अन्योन्यमभिधावंतःपरस्परवधैषिणः॥ २७ ॥

॥ २८ ॥ २९ ॥ ॥ इतिश्रीमत्पर्वणिनैलकंठीयेभारतभावदीपेसप्ततितमोऽध्यायः ॥ ७० ॥ ॥ ७ ॥ ॥ दृष्ट्वेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ॥ स्तनयित्नुर्गौर्जितम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

ततोदुर्योधनोराजाकलिंगैर्बहुभिर्वृतः॥ पुरस्कृत्यरणेभीष्मंपांडवानभ्यवर्तत॥ २८॥ तथैवपांडवाःसर्वेपरिवार्यवृकोदरम्॥ भीष्ममभ्यद्रवन्क्रुद्धास्ततोयुद्धम वर्तत॥ २९॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव०संकुलयुद्धेसप्ततितमोऽध्यायः॥ ७०॥ ॥ ७ ॥ ॥संजयउवाच॥ ॥ दृष्ट्वाभीष्मेणसं सक्तान्भ्रातॄनन्यांश्चपार्थिवान्॥ समभ्यधावद्गांगेयमुद्यतास्त्रोधनंजयः॥ १॥ पांचजन्यस्यनिर्घोषंधनुषोगांडिवस्यच॥ ध्वजंचदृष्ट्वापार्थस्यसर्वान्नोभयमा विशत्॥ २॥ सिंहलांगूलमाकाशेज्वलंतमिवपर्वतम्॥ असज्जमानंदृक्षेषुधूमकेतुमिवोत्थितम्॥३॥ बहुवर्णविचित्रंचदिव्यंवानरलक्षणम्॥ अपश्यांममहा राजध्वजंगांडीवधन्वनः॥ ४॥ विद्युतंमेघमध्यस्थांभ्राजमानामिवांबरे॥ ददृशुर्गांडिवंयोधारुक्मपृष्ठंमहाधनु॥५॥ आशुश्रुमश्चांचास्यशक्रस्येवाभिगर्ज तः॥ सुघोरंतलयोःशब्दंनिघ्नतस्तववाहिनीम्॥६॥ चंडवातोयथामेघःसविद्युत्स्तनयित्नुमान्॥ दिशःसंप्लावयन्सर्वाःशरवर्षैःसमंततः॥७॥समभ्यधावद्गांगेयंपां रेवास्त्रोधनंजयः॥ दिशंप्राचींप्रतीचींचनजानीमोस्त्रमोहिताः॥८॥ कांदिग्भूताःश्रांतपत्राहताश्वाहतचेतसः॥ अन्योन्यमभिसंश्लिष्ययोधास्तेभरतर्षभ॥ ९॥ भीष्ममेवाभ्यलीयंतसहसर्वेस्त्रवात्मजैः॥ तेषामार्तायनमभूद्भीष्मःशांतनवोरणे॥ १०॥ समुत्पतंतिवित्रस्तारथेभ्योरथिनस्तथा॥ सादिनश्चाश्वपृष्ठेभ्योभूमौ चापिपदातयः॥ ११॥ श्रुत्वागांडीवनिर्घोषंविस्फूर्जितमिवाशनेः॥ सर्वसैन्यानिभीतानिव्यवालीयंतभारत॥ १२॥ अथकांबोजजैरश्वैर्महद्भिःशीघ्रगामि भिः॥ गोपानांबहुसाहस्रैर्बलिर्गोपायनैर्वृतः॥ १३॥ मद्रसौवीरगांधारैस्त्रिगर्तैश्चविशांपते॥ सर्वकालिंगमुख्यैश्चकलिंगाधिपतिर्वृतः॥ १४॥ नानानरग णौघैश्चदुःशासनपुरःसरः॥ जयद्रथश्चनृपतिःसहितःसर्वराजभिः॥ १५॥ हयारोहवराश्चैवतवपुत्रेणचोदिताः॥ चतुर्दशसहस्राणिसौबलंपर्यवारयन्॥ १६॥ ततस्तेसहिताःसर्वेविभक्तरथवाहनाः॥ अर्जुनंसमरेजघ्नुस्त्रावकाभरतर्षभ॥ १७॥ रथिभिर्वारणैरश्वैःपादातैश्चसमोरितम्॥ घोरमायोधनंचक्रेमहाभ्रसदृशंर जः॥ १८॥ तोमरप्रासनाराचगजाश्वरथयोधिनाम्॥ बलेनमहताभीष्मःसमसज्जत्किरीटिना॥ १९॥ आवंत्यःकाशिराजेनभीमसेनेनसैंधवः॥ अजातशत्रुर्म द्राणामृषभेणयशस्विना॥ २०॥ सहपुत्रःसहामात्यःशल्येनसमसज्जत॥ विकर्णःसहदेवेनचित्रसेनःशिखंडिना॥ २१॥ मत्स्यादुर्योधनंजघ्नुःशकुनिंचविशांप ते॥ द्रुपदश्चेकितानश्चसात्यकिश्चमहारथः॥ २२॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ वीतमादद्विरेप्रतिगजंभद्रंतोनिर्वीर्यमपिगजंजगृहुः मत्तगजबुद्धोतिभावः वीतमसारमजेइतिमेदिनी

द्रोणेनसममज्जंतसपुत्रेणमहात्मना ॥ रुपश्चरुतवर्माचधृष्टद्युम्नमभिद्रुतौ ॥ २३ ॥ एवंप्रवृजिताश्चानिभ्रांतनागरथानिच ॥ सैन्यानिसमसज्जंतप्रयुद्धानि समंततः॥ २४॥ निरभ्रेविद्युतस्तीव्रादिशश्चरजसावृताः॥ प्रादुरासन्महोल्काश्चसनिर्घाताविशांपते ॥ २५ ॥ प्रादुर्भूतोमहावातःपांसुवर्षंपपातच ॥ नभस्यं तर्दधेसूर्यःसैन्येनरजसावृतः॥ २६॥ प्रमोहःसर्वसत्वानामतीवसमपद्यत ॥ रजसाचाभिभूतानामस्त्रजालैश्चतुद्यताम्॥ २७॥ वीरबाहुविसृष्टानांसर्वावरणभे दिनाम् ॥ संघातःशरजालानांतुमुलःसमपद्यत॥ २८॥ प्रकाशंचकुराकाशमुद्यतानिभुजोत्तमैः॥ नक्षत्रविमलाभानिशस्त्राणिभरतर्षभ॥ २९॥ आर्षभाणि विचित्राणिरुक्मजालावृतानिच॥ संपेतुर्दिक्षुसर्वासुचर्माणिभरतर्षभ॥ ३०॥ सूर्यवर्णैश्चनिस्त्रिंशैःपात्यमानानिसर्वशः॥ दिक्षुसर्वास्वदृश्यंतशरीराणिशि रांसिच॥ ३१॥ भग्नंचकाक्षनीडाश्चनिपातितमहाध्वजाः॥ हताश्चाःपृथिवींजग्मुस्त्रतत्रमहारथाः॥ ३२॥परिपेतुर्हयाश्चात्रकेचिच्छस्त्रकृतव्रणाः॥रथान्वि परिकर्षंतोहतेषुरथयोधिषु॥ ३३॥ शराहताभिन्नदेहावद्धयोक्त्राहयोत्तमाः॥ युगानिपर्यकर्षंततत्रतत्रस्मभारत॥ ३४॥ अदृश्यंतससूताश्चसाश्वाःसरथयो धिनः॥ एकेनबलिनाराजन्वारणेनविमर्दिताः॥ ३५॥ गंधहस्तिमदस्रावमाघ्रायबहवोरणे॥ सन्निपातेबलौघानांवीतमादद्विरेगजाः॥ ३६॥ सतोमरैर्महा मात्रैर्निपतद्भिर्गतासुभिः॥ बभूवायोधनंछन्ननाराचाभिहतैर्गजैः॥ ३७॥ सन्निपातेबलौघानांप्रेषितैर्वरवारणैः॥ निपेतुर्युधिसंभग्नाःसयोधाःसध्वजागजाः ॥ ३८॥ नागराजोपमैर्हस्तैर्नागैराक्षिप्यसंयुगे॥ व्यदृश्यंतमहाराजसंभग्नारथकूबराः॥ ३९॥ विशीर्णरथसंघाश्वकेशोष्णाक्षिप्यदंतिभिः॥ द्रुमशाखाइवावि ध्यन्निप्पिष्टारथिनोरणे॥ ४०॥ रथेषुचरथान्युद्धेसंसक्तान्वरवारणाः॥ विकर्षंतोदिशःसर्वाःसंपेतुःसर्वशद्वगाः॥ ४१॥ तेषांतथाकर्षतांतुगजानांरूपमाब भौ॥ सरःसुनलिनीजालंविपक्तमिवकर्षताम्॥ ४२॥ एवंसंछादितंतत्रबभूवायोधनंमहत्॥ सादिभिश्चपदातैश्चसध्वजैश्चमहारथैः॥ ४३॥ ॥ इतिश्रीमहा भारतेभीष्मपर्वणिभीष्मवधप०संकुलयुद्धेएकसप्ततितमोऽध्यायः॥ ७१॥ ॥ ७ ॥ ॥ ७ ॥ ॥संजयउवाच॥ ॥शिखंडीसहमत्स्येनविराटेनवि शांपते॥ भीष्ममाशुमहेष्वासमाससादसुदुर्जयम्॥ १॥ द्रोणंकृपंविकर्णंचमहेष्वासंमहाबलम्॥ राज्ञश्चान्यान्रणेशूरान्बहूनार्च्छद्धनंजयः॥ २॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ॥ इतिभी०नै०भा०एकसप्ततितमोऽध्यायः॥ ७१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ शिखंडीति ॥ १ ॥ २ ॥

सैंधर्वंचमहेष्वासंसामात्यंसहबंधुभिः ॥ प्राच्यांश्चदाक्षिणात्यांश्चभूमिपान्भूमिपर्षभ ॥ ३ ॥ पुत्रंचतेमहेष्वासंदुर्योधनममर्षणम् ॥ दुःसहंचैवसमरेभीमसेनो
ऽभ्यवर्तत ॥ ४ ॥ सहदेवस्तुशकुनिमुलूकंचमहारथम् ॥ पितापुत्रौमहेष्वासावभ्यवर्ततदुर्जयौ ॥ ५ ॥ युधिष्ठिरोमहाराजगजानीकंमहारथः ॥ समवर्ततसंग्रामेपु
त्रेणनिरुतस्तव ॥ ६ ॥ माद्रीपुत्रस्तुनकुलःशूरसंकंदनोयुधि ॥ त्रिगर्तानांबलैःसार्धसमसज्जतपांडवः ॥ ७ ॥ अभ्यवर्ततसंक्रुद्धाःसमरेशाल्वकैकयान् ॥ सात्य
किश्चेकितानश्चसौभद्रश्चमहारथः ॥ ८ ॥ धृष्टकेतुश्चसमरेराक्षसश्चघटोत्कचः ॥ पुत्राणांतेरथानीकंप्रत्युद्याताःसुदुर्जयाः ॥ ९ ॥ सेनापतिरमेयात्माधृष्टद्युम्नोम
हाबलः ॥ द्रोणेनसमरेराजन्समियायोग्रकर्मणा ॥ १० ॥ एवमेतेमहेष्वासास्तावकाःपांडवैःसह ॥ समेत्यसमरेशूराःसंप्रहारंप्रचक्रिरे ॥ ११ ॥ मध्यंदिनगतेसू
र्येनभस्याकुलतांगते ॥ कुरवःपांडवेयाश्चनिजघ्नुरितरेतरम् ॥ १२ ॥ ध्वजिनोर्हेमचित्रांगाविचरंतोरणाजिरे ॥ सपताकारथारेजुर्वैयाघ्रपरिवारणाः ॥ १३ ॥ समे
तानांचसमरेजिगीषूणांपरस्परम् ॥ बभूवतुमुलःशब्दःसिंहानामिवनर्दताम् ॥ १४ ॥ तत्राद्भुतमपश्यामसंप्रहारंसुदारुणम् ॥ यदकुर्वन्रणेशूराःस्वंजयंकुरुभिःस
ह ॥ १५ ॥ नैवखंनदिशोराजन्नसूर्यंशत्रुतापन ॥ विदिशोवापिपश्यामःशरैर्मुक्तैःसमंततः ॥ १६ ॥ शक्तीनांविमलाग्राणांतोमराणांतथास्यताम् ॥ निस्त्रिंशानांच
पीतानांनीलोत्पलनिभाःप्रभाः ॥ १७ ॥ कवचानांविचित्राणांभूषणानांप्रभास्तथा ॥ खंदिशःप्रदिशश्चैवभासयामासुरोजसा ॥ १८ ॥ वपुर्भिश्चनरेंद्राणांचंद्रसूर्य
समप्रभैः ॥ विरराजतदाराजंस्तत्रतत्ररणांगनम् ॥ १९ ॥ रथसंघानरव्याघ्राःसमायांतश्चसंयुगे ॥ विरेजुःसमरेराजन्ग्रहाइवनभस्तले ॥ २० ॥ भीष्मस्तुरथिनां
श्रेष्ठोभीमसेनंमहाबलम् ॥ अवारयत्संक्रुद्धःसर्वसैन्यस्यपश्यतः ॥ २१ ॥ ततोभीष्मविनिर्मुक्तारुक्मपुंखाःशिलाशिताः ॥ अभ्यघ्नन्समरेभीमंतैलधौताःसुतेज
नाः ॥ २२ ॥ तस्यशक्तिंमहावेगांभीमसेनोमहाबलः ॥ कुद्धाशीविषसंकाशांप्रेषयामासभारत ॥ २३ ॥ तामापतंतींसहसारुक्मदंडांदुरासदाम् ॥ चिच्छेदसमरे
भीष्मःशरैःसन्नतपर्वभिः ॥ २४ ॥ ततोपरेणभल्लेनपीतेननिशितेनच ॥ कार्मुकंभीमसेनस्यद्विधाचिच्छेदभारत ॥ २५ ॥ सात्यकिस्तुततस्तूर्णंभीष्ममासाद्यसंयु
गे ॥ आकर्णप्रहितैस्तीक्ष्णैर्निशितैस्त्रिभिस्तेजनैः ॥ २६ ॥ शरैर्बहुभिरानर्छत्पितरंतेजनेश्वर ॥ ततःसंधायवैतीक्ष्णंशरंपरमदारुणम् ॥ २७ ॥ वार्ष्णेयस्यरथाद्वीष्मः
पातयामाससारथिम् ॥ तस्याश्वाःप्रद्रुताराजन्निहतेरथसारथौ ॥ २८ ॥ ॥ १३३ ॥

॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ इतिश्री ० नै ० भा० द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥७॥ विराटइति ॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥ १७॥

तेनतेनैवधावंतिमनोमारुतरंहसः ॥ ततःसर्वस्यसैन्यस्यनिःस्वनस्तुमुलोभवत् ॥ २९ ॥ हाहाकारश्चसंजज्ञेपांडवानांमहात्मनाम् ॥ अभ्यद्रवतगृह्णीतहंयान्यच्छ
तधावत ॥ ३० ॥ इत्यासीत्तुमुलःशब्दोयुयुधानरथंप्रति ॥ एतस्मिन्नेवकालेतुभीष्मःशांतनवस्तदा ॥ ३१ ॥ न्यहनत्पांडवींसेनामासुरीमिवदत्रहा ॥ तेवध्यमा
नाभीष्मेणपंचालाःसोमकैःसह ॥ ३२ ॥ स्थिरांयुद्धेमतिंकृत्वाभीष्ममेवाभिदुद्रुवुः ॥ धृष्टद्युम्नमुखाश्चापिपार्थाःशांतनवंरणे ॥ ३३ ॥ अभ्यधावन्जिगीषंतस्तव
पुत्रस्यवाहिनीं ॥ तथैवकौरवाराजन्भीष्मद्रोणपुरोगमाः ॥ ३४ ॥ अभ्यधावंतवेगेनततोयुद्धमवर्तत ॥ ३५ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप ०
पंचमदिवसयुद्धेद्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ विराटोथत्रिभिर्बाणैर्भीष्मार्च्छन्महारथम् ॥ विव्याधतुरगांश्चास्यत्रि
भिर्बाणैर्महारथः ॥ १ ॥ तंप्रत्यविध्यदशभिर्भीष्मःशांतनवःशरैः ॥ रुक्मपुंखैर्महेष्वासःकृतहस्तोमहाबलः ॥ २ ॥ द्रौणिर्गांडीवधन्वानंभीमधन्वामहारथः ॥ अ
विध्यदिषुभिःषड्भिर्दृढहस्तःस्तनांतरे ॥ ३ ॥ कार्मुकंतस्यचिच्छेदफाल्गुनःपरवीरहा ॥ अविध्यच्चभृशंतीक्ष्णैःपत्रिभिःशत्रुकर्शनः ॥ ४ ॥ सोन्यत्कार्मुकमादायवे
गवान्क्रोधमूर्छितः ॥ अमृष्यमाणःपार्थेनकार्मुकच्छेदमाहवे ॥ ५ ॥ अविध्यत्फाल्गुनंराजन्नवत्यानिशितैःशरैः ॥ वासुदेवंचसप्तत्याविव्याधपरमेषुभिः ॥ ६ ॥
ततःक्रोधाभिताम्राक्षःकृष्णेनसहफाल्गुनः ॥ दीर्घमुष्णंचनिःश्वस्यचिंतयित्वापुनःपुनः ॥ ७ ॥ धनुःप्रपीड्यवामेनकरेणामित्रकर्शनः ॥ गांडीवधन्वासंक्रुद्धःशि
तान्सन्नतपर्वणः ॥ ८ ॥ जीवितांतकरान्घोरान्समादत्तशिलीमुखान् ॥ तैस्तूर्णंसमरेविध्यद्द्रौणिंबलवतांवरः ॥ ९ ॥ तस्यतेकवचंभित्त्वापपुःशोणितमाहवे ॥
नविव्यथेचनिर्भिन्नोद्रौणिर्गांडीवधन्वना ॥ १० ॥ तथैवचशरान्द्रौणिःप्रविमुंचन्नविह्वलः ॥ तस्यौससमरेराजंस्त्वातुमिच्छन्महाव्रतम् ॥ ११ ॥ तस्यतत्सुमहत्क
र्मशशंशुःकुरुसत्तमाः ॥ यत्कृष्णाभ्यांसमेताभ्यामभ्यापततसंयुगे ॥ १२ ॥ सहिनित्यमनीकेषुयुध्यतेऽभयमास्थितः ॥ अस्त्रग्रामंससंहारंद्रोणात्प्राप्यसुदुर्ल
भं ॥ १३ ॥ ममैषआचार्यसुतोद्रोणस्यापिप्रियःसुतः ॥ ब्राह्मणश्चविशेषेणमाननीयोममेतिच ॥ १४ ॥ समास्थायमतिंवीरोवीभत्सुःशत्रुतापनः ॥ कृपांच
क्रेरथश्रेष्ठोभारद्वाजसुतंप्रति ॥ १५ ॥ द्रौर्गित्यक्त्वाततोयुद्धेकौंतेयःश्वेतवाहनः ॥ युयुधेतावकान्निघ्नंस्त्वरमाणःपराक्रमी ॥ १६ ॥ दुर्योधनस्तुदशभिर्गार्ध्रपत्रैः
शिलाशितैः ॥ भीमसेनंमहेष्वासंरुक्मपुंखैःसमार्पयत् ॥ १७ ॥

॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ सात्वतीपुत्रंअभिमन्युं ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

भीमसेनःसुसंक्रुद्धःपरासुकरणंदृढम् ॥ चित्रंकार्मुकमादत्तशरांश्चनिशितान्दश ॥ १८ ॥ आकर्णप्रहितैस्तीक्ष्णैर्वेगवद्भिरजिह्मगैः ॥ अविध्यत्तूर्णमव्यग्रःकुरुराजंमहोरसि ॥ १९ ॥ तस्यकांचनसूत्रस्थःशरैःसंछादितोमणिः ॥ रराजोरसिखेसूर्योग्रहैरिवसमावृतः ॥ २० ॥ पुत्रस्तुतवतेजस्वीभीमसेनेनताडितः ॥ नाम्रष्य तयथानागस्तलशब्दंमदोत्कटः ॥ २१ ॥ ततःशरैर्महाराजरुक्मपुंखैःशिलाशितैः ॥ भीमंविव्याधसंक्रुद्धस्त्रासयानोवरूथिनीम् ॥ २२ ॥ तौयुध्यमानौसमरेभृशमन्योन्यविक्षतौ ॥ पुत्रौतेदेवसंकाशौव्यरोचेतांमहाबलौ ॥ २३ ॥ चित्रसेननरव्याघ्रंसौभद्रःपरवीरहा ॥ अविध्यद्दशभिर्बाणैःपुरुमित्रंचसप्तभिः ॥ २४ ॥ सत्यव्रतंचसप्तत्याविद्धाशक्रसमोयुधि ॥ नृत्यन्निवरणेवीरआर्तिनःसमजीजनत् ॥ २५ ॥ तंप्रत्यविध्यद्दशभिश्चित्रसेनःशिलीमुखैः ॥ सत्यव्रतश्चनवभिःपुरुमित्रश्चसप्तभिः ॥ २६ ॥ सविद्धोविक्षरन्रक्तंशत्रुसंवारणंमहत् ॥ चिच्छेदचित्रसेनस्यचित्रंकार्मुकमार्जुनिः ॥ २७ ॥ भित्त्वाचास्यतनुत्राणंशरेणोरस्यताडयत् ॥ तस्तेतावकावीराराजपुत्रामहारथाः ॥ २८ ॥ समेत्ययुधिसंरब्धाव्यधुर्निशितैःशरैः ॥ तांश्चसर्वान्शरैस्तीक्ष्णैर्जघानपरमास्त्रवित् ॥ २९ ॥ तस्यदृष्ट्वातुतत्कर्म परिवव्रुःसुतास्तव ॥ दहंतंसमरेसैन्यंवनेकक्षंयथोल्बणम् ॥ ३० ॥ अपेतशिशिरेकालेसमिद्धमिवपावकम् ॥ अत्यरोचतसौभद्रस्तवसैन्यानिनाशयन् ॥ ३१ ॥ तत्तस्यचरितंदृष्ट्वापौत्रस्तवविशांपते ॥ लक्ष्मणोऽभ्यपतत्तूर्णंसात्वतीपुत्रमाहवे ॥ ३२ ॥ अभिमन्युस्तुसंक्रुद्धोलक्ष्मणंशुभलक्षणम् ॥ विव्याधनिशितैःषड्भिःसारथिंचत्रिभिःशरैः ॥ ३३ ॥ तथैवलक्ष्मणोराजन्सौभद्रंनिशितैःशरैः ॥ अविध्यतमहाराजतदद्भुतमिवाभवत् ॥ ३४ ॥ तस्याश्वांश्चतुरोहत्वासारथिंचमहाबलः ॥ अभ्यद्रवत्सौभद्रोलक्ष्मणंनिशितैःशरैः ॥ ३५ ॥ हताश्वेतुरथेतिष्ठँल्लक्ष्मणःपरवीरहा ॥ शक्तिंचिक्षेपसंक्रुद्धःसौभद्रस्यरथंप्रति ॥ ३६ ॥ तामापतंतींसहसाघोररूपांदुरासदाम् ॥ अभिमन्युःशरैस्तीक्ष्णैश्चिच्छेदभुजगोपमाम् ॥ ३७ ॥ ततःस्वरथमारोप्यलक्ष्मणंगौतमस्तदा ॥ अपोवाहरथेनाजौसर्वसैन्यस्यपश्यतः ॥ ३८ ॥ ततःसमाकुलेतस्मिन्वर्तमानेमहाभये ॥ अभ्यद्रवन्जिघांसंतःपरस्परवधैषिणः ॥ ३९ ॥ तावकाश्चमहेष्वासाःपांडवाश्चमहारथाः ॥ जुह्वंतःसमरेप्राणान्निजघ्नुरितरेतरं ॥ ४० ॥ मुक्तकेशाविकवचाविरथाश्छिन्नकार्मुकाः ॥ बाहुभिःसमयुध्यंतस्तंजयाःकुरुभिःसह ॥ ४१ ॥ ततोभीष्मोमहाबाहुःपांडवानांमहात्मनाम् ॥ सेनांजघान संक्रुद्धोदिव्यैरस्त्रैर्महाबलः ॥ ४२ ॥

॥ १३४ ॥

॥ ४३ ॥ इतिश्री०नै०भा० त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ ७ ॥ अथेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

हतेश्वरैर्गजैस्तत्रनरैरश्वैश्चपातितैः ॥ रथिभिःसादिभिश्चैवसमास्तीर्यतमेदिनी ॥ ४३ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०द्वंद्वयुद्धेत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ अथराजन्महाबाहुःसात्यकिर्युद्धदुर्मदः ॥ विकृष्यचापंसमरेभारसाहमनुत्तमम् ॥ १ ॥ प्रामुंचत्पुंखसंयुक्तान्शरानाशीविषोपमान् ॥ प्रगाढंलघुचित्रंचदर्शयन्हस्तलाघवम् ॥ २ ॥ तस्यविक्षिपतश्चापंशरानन्यांश्चमुंचतः ॥ आददानस्यभूयश्चसंदधानस्यचापरान् ॥ ३ ॥ क्षिपतश्चपरांस्तस्यरणेशत्रून्विनिघ्नतः ॥ ददृशेरूपमत्यर्थंमेघस्येवप्रवर्षतः ॥ ४ ॥ तमुदीर्यंतमालोक्यराजादुर्योधनस्ततः ॥ रथानामयुतंतस्यप्रेषयामासभारत ॥ ५ ॥ तांस्तुसर्वान्महेष्वासान्सात्यकिःसत्यविक्रमः ॥ जघानपरमेष्वासोदिव्येनास्त्रेणवीर्यवान् ॥ ६ ॥ सकृत्वादारुणंकर्मप्रगृहीतशरासनः ॥ आससादततोवीरोभूरिश्रवसमाहवे ॥ ७ ॥ सहिसंदृश्यसेनांतेयुयुधानेनपातिताम् ॥ अभ्यधावतसंक्रुद्धःकुरूणांकीर्तिवर्धनः ॥ ८ ॥ इंद्रायुधसवर्णंतुविस्फार्यसुमहद्धनुः ॥ सृष्टवान्वज्रसंकाशान्शरानाशीविषोपमान् ॥ ९ ॥ सहस्रशोमहाराजदर्शयन्पाणिलाघवम् ॥ शरांस्तान्मृत्युसंस्पर्शान्सात्यकेश्चपदानुगाः ॥ १० ॥ नविषेदुस्तदाराजन्दुद्रुवुस्तेसमंततः ॥ विहायसात्यकिंराजन्समरेयुद्धदुर्मदम् ॥ ११ ॥ तंदृष्ट्वायुयुधानस्यसुतादशमहाबलाः ॥ महारथाःसमास्यातां श्चित्रवर्मायुधध्वजाः ॥ १२ ॥ समासाद्यमहेष्वासंभूरिश्रवसमाहवे ॥ ऊचुःसर्वेसुसंरब्धायूपकेतुंमहारणे ॥ १३ ॥ भोभोकौरवदायादसहास्माभिर्महाबल ॥ एहियुध्यस्वसंग्रामेसमस्तैःपृथगेववा ॥ १४ ॥ अस्मान्वात्वंपराजित्ययशःप्राप्नुहिसंयुगे ॥ वयंवात्वांपराजित्यप्रीतिंधास्यामहेपितुः ॥ १५ ॥ एवमुक्तस्तदाशूरैस्तानुवाचमहाबलः ॥ वीर्यश्लाघीनरश्रेष्ठस्तान्दृष्ट्वासमवस्थितान् ॥ १६ ॥ साध्विदंकथ्यतेवीरायद्येवंमतिरद्यवः ॥ युध्यध्वंसहितायत्तानिर्हनिष्यामिवोरणे ॥ १७ ॥ एवमुक्तामहेष्वासास्तेवीराःक्षिप्रकारिणः ॥ महताशरवर्षेणअभ्यधावन्नरिंदमम् ॥ १८ ॥ सोपराद्धेमहाराजसंग्रामस्तुमुलोऽभवत् ॥ एकस्यचबहूनांचसमेतानांरणाजिरे ॥ १९ ॥ तमेकंरथिनांश्रेष्ठंशरैस्तेसमवाकिरन् ॥ प्रावृषीवयथामेरुंसिषिचुर्जलदानृप ॥ २० ॥ तैस्तुमुक्तान्शरान्घोरान्यमदंडाशनिप्रभान् ॥ असंप्राप्तानसंभ्रांतश्चिच्छेदाशुमहारथः ॥ २१ ॥ तत्राद्भुतमपश्यामसौमदत्तेःपराक्रमम् ॥ यदेकोबहुभिर्युद्धेसमसज्जदभीतवत् ॥ २२ ॥ विसृज्यशरवृष्टिंतांदशराजन्महारथाः ॥ परिवार्यमहाबाहुंनिहंतुमुपचक्रमुः ॥ २३ ॥ सौमदत्तिस्ततःक्रुद्धस्तेषांचापानिभारत ॥ चिच्छेदसमरेराजन्युध्यमानोमहारथैः ॥ २४ ॥

॥ २५ ॥२६॥२७॥२८॥२९॥३०॥३१॥३२॥३३॥३४ ॥३५॥ ३६ ॥३७॥३८॥३९॥ इतिश्रीभीष्मपर्वणिनैलंकठीयेभारतभावदीपेचतुःसप्ततितमोऽध्यायः ॥ ७४॥ ॥७॥ ॥८॥ तेइति ॥ १॥२॥३॥४॥५॥६॥

अथैषांछिन्नधनुषांशरैःसन्नतपर्वभिः॥ चिच्छेदसमरेराजन्शिरांसिभरतर्षभ ॥ २५ ॥ तेहतान्यपतन्राजन्वज्रभग्नाइवद्रुमाः॥ तान्दृष्ट्वानिहतान्वीरोरणेषु त्रान्महाबलान्॥ २६॥ वार्ष्णेयोविनदन्राजन्भूरिश्रवसमभ्ययात्॥ रथंरथेनसमरेपीडयित्वामहाबलौ ॥ २७॥ तावन्योन्यंहिसमरेनिहत्यरथवाजिनः॥ विरथावभिवल्गंतौसमेयातांमहारथौ ॥ २८ ॥ प्रगृहीतमहाखड्गौतौचर्मवरधारिणौ॥ शुशुभातेनरव्याघ्रौयुद्धायसमवस्थितौ ॥ २९ ॥ ततःसात्यकिमभ्येत्यनिस्त्रिंशवरधारिणम्॥ भीमसेनस्त्वरन्राजन्रथमारोपयत्तदा ॥ ३०॥ तवापितनयोराजन्भूरिश्रवसमाहवे॥ आरोपयद्रथंतूर्णंपश्यतांसर्वधन्विनाम्॥ ३१॥ तस्मिंस्तथावर्तमानेरणेभीष्ममहारथम्॥ अयोधयंतसंरब्धाःपांडवाभरतर्षभ॥ ३२॥ लोहितायतिचादित्येत्वरमाणोधनंजयः॥ पंचविंशतिसाहस्रान्निजघान महारथान्॥ ३३॥ तेहिदुर्योधनादिष्टास्तदापार्थनिबर्हणे॥ संप्राप्यैवगतानाशंशलभाइवपावकम्॥ ३४॥ ततोमत्स्याःकेकयाश्चधनुर्वेदविशारदाः॥ परिवव्रुस्तदापार्थंसहपुत्रंमहारथम्॥ ३५॥ एतस्मिन्नेवकालेतुसूर्यैस्तमुपगच्छति॥ सर्वेषांचैवसैन्यानांप्रमोहःसमजायत॥ ३६॥ अवहारंततश्चक्रेपितादेवव्रतस्तव॥ संध्याकालेमहाराजसैन्यानांश्रांतवाहनः॥ ३७॥ पांडवानांकुरूणांचपरस्परसमागमे॥ तेसेनेभ्रशसंविग्नेययतुःस्वंनिवेशनम्॥ ३८॥ ततःस्वशिबिरंगत्वान्यविशंस्तत्रभारत ॥ पांडवाःसृंजयैःसार्धंकुरवश्चयथाविधि ॥ ३९ ॥. ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०पंचमदिवसावहारेचतुःसप्ततितमोऽध्यायः ॥ ७४॥ ॥७॥ ॥ ॥ संजयउवाच॥ ॥तेविश्रम्यततोराजन्सहिताःकुरुपांडवाः॥ व्यतीतायांतुशर्वर्यांपुनर्युद्धायनिर्ययुः॥ १॥ तत्रशब्दोमहानासीत्तवतेषांचभारत॥ युज्यतांरथमुख्यानांकल्प्यतांचैवदंतिनाम् ॥ २॥ संनह्यतांपदातीनांहयानांचैवभारत॥ शंखदुंदुभिनादश्चतुमुलःसर्वतोभवत्॥ ३॥ ततोयुधिष्ठिरोराजाधृष्टद्युम्नमभाषत॥ व्यूहंव्यूहमहाबाहोमकरंशत्रुनाशनम्॥ ४॥ एवमुक्तस्तुपार्थेनधृष्टद्युम्नोमहारथः॥ व्यादिदेशमहाराजरथिनोरथिनांवरः॥ ५॥ शिरोभूद्द्रुपदस्यपांडवश्वधनंजयः॥ चक्षुषीसहदेवश्चनकुलश्चमहारथः ॥ ६ ॥ तुंडमासीन्महाराजभीमसेनोमहाबलः॥ सौभद्रोद्रौपदेयाश्चराक्षसश्चघटोत्कचः॥ ७॥ सात्यकिर्धर्मराजश्चव्यूहग्रीवांसमास्थिताः॥ पृष्ठमासीन्महाराजविराटोवाहिनीपतिः ॥ ८॥ धृष्टद्युम्नेनसहितोमहत्यासेनयावृतः॥ केकयाभ्रातरःपंचवामपार्श्वंसमाश्रिताः॥ ९॥ धृष्टकेतुर्नरव्याघ्रश्चेकितानश्चवीर्यवान्॥ दक्षिणंपक्षमाश्रित्यस्थितौव्यूहस्यरक्षणे॥ १०॥ ॥ ७॥ ८॥ ९॥ १०॥

॥ ११ ॥ १२॥ १३॥ १४॥ १५॥ १६॥ १७॥ १८॥ १९॥ २०॥ २१॥ २२॥ २३॥ २४॥ २५॥ २६॥ २७॥ २८॥ २९॥ ३०॥ ३१॥ ३२॥ ३३॥ ३४ ॥ ३५॥ ३६ ॥

पादयोस्तुमहाराजस्थितःश्रीमान्महारथः॥ कुंतिभोजःशतानीकोमहत्यासेनयावृतः॥ ११ ॥ शिखंडीतुमहेष्वासःसोमकैःसंवृतोबली॥ इरावांश्चततःपुच्छेमकरस्यव्यवस्थितौ ॥ १२ ॥ एवमेतंमहाव्यूहंव्यूह्यभारतपांडवाः ॥ सूर्योदयेमहाराजपुनर्युद्धायदंशिताः ॥ १३॥ कौरवानभ्ययुस्तूर्णंहृस्यश्वरथपत्तिभिः॥ समुच्छ्रितैर्ध्वजैश्छत्रैःशस्त्रैश्चविमलैःशितैः॥ १४॥ व्यूढंदृष्ट्वातुतत्सैन्यंपितादेवव्रतस्तव॥ कौंचेनमहताराजन्प्रत्यव्यूहतवाहिनीम्॥ १५॥ तस्यतुंडेमहेष्वासोभारद्वाजोव्यरोचत॥ अश्वत्थामाकृपश्चैवचक्षुरासीन्नरेश्वर ॥ १६ ॥ कृतवर्मातुसहितःकांबोजवरवाह्निकैः॥ शिरस्यासीन्नरश्रेष्ठःश्रेष्ठःसर्वधनुष्मताम्॥ १७॥ ग्रीवायांशूरसेनश्चतवपुत्रश्चमारिष॥ दुर्योधनोमहाराजराजभिर्बहुभिर्वृतः॥ १८॥ प्राग्ज्योतिषस्तुसहितोमद्रसौवीरकेकयैः॥ उरस्यभून्नरश्रेष्ठमहत्यासेनयावृतः॥ १९॥ स्वसेनयाचसहितःसुशर्माप्रस्थलाधिपः॥ वामंपक्षंसमाश्रित्यदंशितःसमवस्थितः॥ २०॥ तुषारायवनाश्चैवशकाश्चसहचूचुपैः॥ दक्षिणंपक्षमाश्रित्यस्थिताव्यूहस्यभारत॥ २१॥ श्रुतायुश्चशतायुश्चसौमदत्तिश्चमारिष॥ व्यूहस्यजघनेतस्थूरक्षमाणाःपरस्परम्॥ २२ ॥ ततोयुद्धायसंजग्मुःपांडवाःकौरवैःसह॥ सूर्योदयेमहाराजततोयुद्धमभून्महत्॥ २३॥ प्रतीयूरथिनोनागानागांश्चरथिनोययुः॥ हयारोहान्रयारोहारथिनश्चापिसादिनः॥ २४॥ सादिनश्चहयान्राजन्रथिनश्चमहारणे॥ हस्त्यारोहान्हयारोहारथिनःसादिनस्तथा॥ २५॥ रथिनःपत्तिभिःसार्धंसादिनश्चापिपत्तिभिः॥ अन्योन्यंसमरेराजन्प्रत्यधावन्नमर्षिताः॥ २६॥ भीमसेनार्जुनयमैर्गुप्ताचान्यैर्महारथैः॥ शुशुभेपांडवीसेनानक्षत्रैरिवशर्वरी ॥ २७॥ तथाभीष्मकृपद्रोणशल्यदुर्योधनादिभिः॥ तवापिचबभौसेनाग्रहैर्द्यौरिवसंवृता॥ २८॥ भीमसेनस्तुकौंतेयोद्रोणंदृष्ट्वापराक्रमी ॥ अभ्ययाज्जवनैरश्वैर्भारद्वाजस्यवाहिनीम्॥ २९ ॥ द्रोणस्तुसमरेक्रुद्धोभीमंनवभिरायसैः॥ विव्याधसमरश्लाघीमर्माण्युद्दिश्यवीर्यवान्॥ ३०॥ दृढाहतस्ततोभीमोभारद्वाजस्यसंयुगे॥ सारथिंप्रेषयामाससयमस्यसदनंप्रति ॥ ३१॥ ससंगृह्यस्वयंवाहान्भारद्वाजःप्रतापवान्॥ व्यधमत्पांडवींसेनांतूलराशिमिवानलः ॥ ३२॥ तेवध्यमानाद्रोणेनभीष्मेणचनरोत्तमाः॥ सृंजयाःकेकयैःसार्धंपलायनपराभवन्॥ ३३॥ तथैवतावकंसैन्यंभीमार्जुनपरिक्षतम्॥ मुत्सृतेतत्रतत्रैवसमदेववरांगना ॥ ३४॥ अभिद्रुतांततोव्यूहौतस्मिन्वीरवरक्षये॥ आसीद्घातिकरोघोरस्तवतेषांचभारत॥ ३५॥ तदद्भुतमपश्यामतावकानांपरैःसह॥ एकायनगताःसर्वेयदयुध्यंतभारत॥ ३६॥

॥ ३७ ॥ इतिश्री०नै०भा०पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ७ ॥ ॥ एवमिति ॥ १ ॥ नःअस्मान्अभिकामंआकांक्षमाणं प्रहृष्यन्तं ॥ २ ॥ लघुदृढंशीघ्रकारि आयतप्रायंप्रांशुबहुलं ॥ ३॥४ ॥

प्रतिसंवार्यचास्त्राणितेन्योन्यस्यविशांपते ॥ युयुधुःपांडवाश्चैवकौरवाश्चमहाबलाः ॥ ३७ ॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवध०षष्ठदिवसयुद्धारंभे पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥एवंबहुगुणंसैन्यमेवंबहुविधंपुरा ॥ व्यूढमेवंयथाशास्त्रममोघंचैवसंजय ॥ १ ॥ हृष्टमस्माकमत्यंतमभिकामंचनःसदा ॥ प्रह्वमव्यसनोपेतंपुरस्तादृष्टविक्रमम् ॥ २ ॥ नातिदृढमबालंचनकृशंनचपीवरम् ॥ लघुदृत्तायतप्रायंसारयोधमनामयम् ॥ ३ ॥ आत्तसन्नाहशस्त्रंचबहुशस्त्रपरिग्रहम् ॥ असियुद्धेनियुद्धेचगदायुद्धेचकोविदम् ॥ ४ ॥ प्रासर्ष्टितोमरेष्वाजौपरिघेष्वायसेषुच ॥ भिंदिपालेषुशक्तीषु मुसलेषुचसर्वशः ॥ ५ ॥ कंपनेषुचचापेषुकणपेषुचसर्वशः ॥ क्षेपणीयेषुचित्रेषुमुष्टियुद्धेषुचक्षमम् ॥ ६ ॥ अपरोक्षंचविद्यासुव्यायामेचकृतश्रमम् ॥ शस्त्रग्रहणविद्यासुसर्वासुपरिनिष्ठितम् ॥ ७ ॥ आरोहेपर्यवस्कंदेसरणेसांतरप्लुते ॥ सम्यक्प्रहरणेयानेव्यपयानेचकोविदम् ॥ ८ ॥ नागाश्वरथयानेषुबहुशःसुपरीक्षितम् ॥ परीक्ष्यचयथान्यायंवेतनेनोपपादितम् ॥ ९ ॥ नगोष्ठ्यानोपकारेणनचबंधुनिमित्ततः ॥ नसौहृदबलैर्वापिनाकुलीनपरिग्रहैः ॥ १० ॥ सम्यद्बजनमार्यंचतुष्संबंधिबांधवम् ॥ कृतोपकारभूयिष्ठंयशस्विचमनस्विच ॥ ११ ॥ स्वजनैस्तुनरैर्मुख्यैर्बहुशोदृष्टकर्मभिः ॥ लोकपालोपमैस्तातपालितंलोकविश्रुतम् ॥ १२ ॥ बहुभिःक्षत्रियैर्गुप्तंपृथिव्यांलोकसंमतैः ॥ अस्मानभिगतैःकामात्सबलैःसपदानुगैः ॥ १३ ॥ महोदधिमिवापूर्णमापगाभिःसमंततः ॥ अपक्षैःपक्षिसंकाशैरथैर्नागैश्वसंवृतम् ॥ १४ ॥ नानायोधजलंभीमंवाहनोर्मितरंगिणम् ॥ क्षेपण्यसिगदाशक्तिशरप्राससमाकुलम् ॥ १५ ॥ ध्वजभूषणसंबाधंरत्नपट्टसुसंचितम् ॥ परिधावद्भिरश्वैश्चवायुवेगविकंपितम् ॥ १६ ॥ अपारमिवगर्जंतंसागरप्रतिमंमहत् ॥ द्रोणभीष्माभिसंगुप्तंगुप्तंचकृतवर्मणा ॥ १७ ॥ कृपदुःशासनाभ्यांचजयद्रथमुखैस्तथा ॥ भगदत्तविकर्णाभ्यांद्रौणिसौबलबाह्लिकैः ॥ १८ ॥ गुप्तंप्रवीरैर्लोकैश्चसारवद्भिर्महात्मभिः ॥ यदहन्यतसंग्रामेदैवमत्रपुरातनम् ॥ १९ ॥ नैतादृशंसमुद्योगंदृष्टवंतोहिमानुषाः ॥ ऋषयोवामहाभागाःपुराणाभुविसंजय ॥ २० ॥ ईदृशोपिबलौघस्तुसंयुक्तःशस्त्रसंपदा ॥ बध्यतेयत्रसंग्रामेकिमन्यद्भागधेयतः ॥ २१ ॥ विपरीतमिदंसर्वंप्रतिभातिहिसंजय ॥ यत्रेदृशंबलंघोरंपांडवान्नातरद्रणे ॥ २२ ॥

॥ ५ ॥ ६ ॥ ७ ॥ आरोहेहस्त्यादीनां पर्यवस्कं देहस्त्यादिभ्योऽवतरणे ॥ ८ ॥ ९ ॥ १० ॥ मनस्विसाहंकारं ॥ ११ ॥ १२ ॥ १३ ॥ अपक्षैःपक्षशून्यैः तथापिगत्यापक्षिसदृशैः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ १३६ ॥

॥२३॥२४॥२५॥२६ ॥ ॥इतिश्री०नै०भा०षट्सप्ततितमोऽध्यायः॥७६॥ ॥७॥ ॥ आत्मदोषादिति॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥

पांडवार्थायनियतंदैवास्त्रसमागताः ॥ युध्यंतेमामकंसैन्यंयथावध्यतसंजय ॥ २३ ॥ उक्तोहिविदुरेणाहंहितंपथ्यंचनित्यशः ॥ नचजग्राहतन्मंदःपुत्रोदुर्योधनोमम ॥ २४ ॥ तस्यमन्येमतिःपूर्वंसर्वज्ञस्यमहात्मनः ॥ आसीद्यथागतंतातयेनदृष्टमिदंपुरा ॥ २५ ॥ अथवाभाव्यमेवंहिसंजयैतेनसर्वथा ॥ पुराधात्रायथासृष्टंतत्तथानैतदन्यथा ॥ २६ ॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०धृतराष्ट्रंचिंतायांषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ संजयउवाच ॥ ॥ आत्मदोषात्त्वयाराजन्प्राप्तंव्यसनमीदृशम् ॥ नहिदुर्योधनस्तानिपश्यतेभरतर्षभ ॥ १ ॥ यानित्वंदृष्टवान्राजन्धर्मसंकरकारिते ॥ तवदोषात्पुरावृत्तंद्यूतमेवविशांपते ॥ २ ॥ तवदोषेणयुद्धंचप्रवृत्तंसहपांडवैः ॥ त्वमेवाद्यफलंभुंक्ष्वकृत्वाकिल्बिषमात्मना ॥ ३ ॥ आत्मनैवकृतंकर्मआत्मनैवोपभुज्यते ॥ इहचप्रेत्यवाराजंस्त्वयाप्राप्तंयथातथम् ॥ ४ ॥ तस्माद्राजन्स्थिरोभूत्वाप्राप्येदंव्यसनंमहत् ॥ शृणुयुद्धंयथावृत्तंशंसतोमेनराधिप ॥ ५ ॥ भीमसेनःसुनिशितैर्बाणैर्भित्त्वामहाचमूम् ॥ आससादततोवीरःसर्वान्दुर्योधनानुजान् ॥ ६ ॥ दुःशासनंदुर्विषहंदुःसहंदुर्मदंजयम् ॥ जयत्सेनंविकर्णंचचित्रसेनंसुदर्शनम् ॥ ७ ॥ चारुचित्रंसुवर्माणंदुष्कर्णंकर्णमेवच ॥ एतांश्चान्यांश्चसुबहून्समीपस्थान्महारथान् ॥ ८ ॥ धार्तराष्ट्रान्सुसंक्रुद्धान्दृष्ट्वाभीमोमहारथः ॥ भीष्मेणसमरेगुप्तांप्रविवेशमहाचमूम् ॥ ९ ॥ अथालोक्यप्रविष्टंतमूचुस्तेसर्वएवतु ॥ जीवग्राहंनिगृह्णीमोवयमेनंनराधिपाः ॥ १० ॥ सतैःपरिवृतःपार्थोभ्रातृभिःकृतनिश्चयैः ॥ प्रजासंहरणेसूर्यःक्रूरैरिवमहाग्रहैः ॥ ११ ॥ संप्राप्यमध्यंसैन्यस्यनभीःपांडवमाविशत् ॥ यथादेवासुरेयुद्धेमहेंद्रंप्राप्यदानवान् ॥ १२ ॥ ततःशतसहस्राणिरथिनांसर्वशःप्रभो ॥ उद्यतानिशरैस्तीव्रैस्तमेकंपरिवव्रिरे ॥ १३ ॥ सतेषांप्रवरान्योधान्हस्त्यश्वरथसादिनः ॥ जघानसमरेशूरोधार्तराष्ट्रानचिंतयन् ॥ १४ ॥ तेषांव्यवसितंज्ञात्वाभीमसेनोजिघृक्षताम् ॥ समस्तानांवधेराजन्मतिंचक्रेमहामनाः ॥ १५ ॥ ततोरथंसमुत्सृज्यगदामादायपांडवः ॥ जघानधार्तराष्ट्राणांतंबलौघंमहार्णवम् ॥ १६ ॥ भीमसेनेप्रविष्टंतुधृष्टद्युम्नोपिपार्षतः ॥ द्रोणमुत्सृज्यतरसाप्रययौयत्रसौबलः ॥ १७ ॥ निवार्यमहतींसेनांतावकानांनरर्षभः ॥ आससादरथंशून्यंभीमसेनस्यसंयुगे ॥ १८ ॥ दृष्ट्वाविशोकंसमरेभीमसेनस्यसारथिम् ॥ धृष्टद्युम्नोमहाराजदुर्मनागतचेतनः ॥ १९ ॥ अपृच्छद्बाष्पसंरुद्धोनिःश्वसन्वाचमीरयन् ॥ ममप्राणैःप्रियतमःक्वभीमइतिदुःखितः ॥ २० ॥ विशोकस्तमुवाचेदंधृष्टद्युम्नंकृतांजलिः ॥ संस्थाप्यमांमिहबलीपांडवेयःपराक्रमी ॥ २१ ॥

॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ॥३१॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

प्रविष्टोधार्तराष्ट्राणामेतद्बलमहार्णवम् ॥ मामुक्त्वापुरुषव्याघ्रःप्रीतियुक्तमिदंवचः ॥ २२ ॥ प्रतिपालयमांसूतनियम्याश्वान्मुहूर्तकम् ॥ यावदेतान्निहन्म्यद्यसइमे मद्वधोद्यताः ॥ २३ ॥ ततोदृष्ट्वाप्रधावंतंगदाहस्तंमहाबलम् ॥ सर्वेषामेवसैन्यानांसंहर्षःसमजायत ॥ २४ ॥ तस्मिन्सुतुमुलेयुद्धेवर्तमानेभयानके ॥ भित्त्वाराजन्महाव्यूहंप्रविवेशवृकोदरः ॥ २५ ॥ विशोकस्यवचःश्रुत्वाधृष्टद्युम्नोथपार्षतः ॥ प्रत्युवाचततःसूतंरणमध्येमहाबलः ॥ २६ ॥ नहिमेजीवितेनापिविद्यतेद्यप्रयोजनम् ॥ भीमसेनंरणेहित्वाम्लेहमुत्सृज्यपांडवैः ॥ २७ ॥ यदियामिविनाभीमंकिमांक्षत्रंवदिष्यति ॥ एकायनगतेभीमेमयिचावस्थितेयुधि ॥ २८ ॥ अस्वस्तितस्य कुर्वंतिदेवाःशक्रपुरोगमाः ॥ यःसहायान्परित्यज्यस्वस्तिमानाव्रजेद्गृहम् ॥ २९ ॥ ममभीमःसखाचैवसंबंधीचमहाबलः ॥ भक्तोस्मान्भक्तिमांश्चाहंतमप्यरिनिषूदनम् ॥ ३० ॥ सोहंतत्रगमिष्यामियत्रयातोवृकोदरः ॥ निघ्नंतंमारिपून्पश्यदानवानिववासवम् ॥ ३१ ॥ एवमुक्त्वाततोवीरोययौमध्येनभारत ॥ भीमसेनस्यमार्गेषुगदाप्रमथितैर्गजैः ॥ ३२ ॥ सददर्शतदाभीमंदहंतंरिपुवाहिनीम् ॥ वातोद्धूतानिवबलान्प्रभंजंतंरणेरिपून् ॥ ३३ ॥ तेवध्यमानाःसमरेरथिनःसादिनस्तथा ॥ पादातादंतिनश्चैवचक्रुरार्तस्वरंमहत् ॥ ३४ ॥ हाहाकारश्चसंजज्ञेतवसैन्यस्यमारिष ॥ वध्यतोभीमसेनेनकृतिनाचित्रयोधिना ॥ ३५ ॥ ततःकृतास्त्रास्तेसर्वेपरिवार्यवृकोदरम् ॥ अभीताःसमवर्तंतशस्त्रवृष्ट्यापरंतप ॥ ३६ ॥ अभिद्रुतंशस्त्रभृतांवरिष्ठंसमंततःपांडवंलोकवीरः ॥ सैन्येनघोरेणसुसंहितेनदृष्ट्वाबलीपार्षतोभीमसेनम् ॥ ३७ ॥ अथोपगच्छच्छरविक्षतांगंपदातिनंक्रोधविषंवमंतम् ॥ आश्वासयन्पार्षतोभीमसेनंगदाहस्तंकालमिवांतकाले ॥ ३८ ॥ विशल्यमेनंचचकार तूर्णमारोपयच्चात्मरथेमहात्मा ॥ भृशंपरिष्वज्यचभीमसेनमाश्वासयामाससशत्रुमध्ये ॥ ३९ ॥ भ्रातुर्नथोपेत्यतवापिपुत्रस्तस्मिन्विमर्देमहतिप्रवृत्ते ॥ अयं दुरात्माद्रुपदस्यपुत्रःसमागतोभीमसेनेनसार्धम् ॥ ४० ॥ तंयामसर्वेमहतावलेनमावोरिपुःप्रार्थयतामनीकम् ॥ श्रुत्वातुवाक्यंतमसह्यमाणाज्येष्ठाज्ञयानोदिता धार्तराष्ट्राः ॥ ४१ ॥ वधायनिष्पेतुरुदायुधास्तेयुगक्षयेकेतवोयद्वदुग्राः ॥ प्रगृह्यचास्त्राणिधनूंषिवीराज्यानिमिघोषैःप्रविकंपयंतः ॥ ४२ ॥ शरैरवर्षन्द्रुपदस्य पुत्रंयथांबुदाभूधरंवारिजालैः ॥ निहत्यतांश्चापिशरैःसुतीक्ष्णैर्नविव्यथेसमरेचित्रयोधी ॥ ४३ ॥ समभ्युदीर्णाश्चतवात्मजांस्तथानिशम्यवीरानभितःस्थितान् रणे ॥ जिघांसुरुग्रंद्रुपदात्मजोयुवाप्रमोहनास्त्रंयुयुजेमहारथः ॥ ४४ ॥

॥ १३७ ॥

॥४५॥४६॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥

कुद्धोभृशंतवपुत्रेपुराजन्दैत्येषुयद्वत्समरेमहेंद्रः ॥ ततोव्यमुत्यंतरणेनृवीराःप्रमोहनास्त्राहतबुद्धिसत्त्वाः ॥ ४५ ॥ प्रदुद्रुवुःकुरवश्चैवसर्वेसवाजिनागाःसरथाःसमंतात् ॥ परीतकालानिवनष्टसंज्ञान्मोहोपेतांस्तवपुत्रान्निशम्य ॥ ४६ ॥ एतस्मिन्नेवकालेतुद्रोणःशस्त्रभृतांवरः ॥ द्रुपदंत्रिभिरासाद्यशरैर्विव्याधदारुणैः ॥ ४७ ॥ सोतिविद्धस्ततोराजन्रणेद्रोणेनपार्थिवः ॥ अपायाद्रुपदोराजन्पूर्ववैरमनुस्मरन् ॥ ४८ ॥ जित्वातुद्रुपदंद्रोणःशंखंदध्मौप्रतापवान् ॥ तस्यशंखस्वनं श्रुत्वाविचेस्तुःसर्वसोमकाः ॥ ४९ ॥ अथशुश्रावतेजस्वीद्रोणःशस्त्रभृतांवरः ॥ प्रमोहनास्त्रेणरणेमोहितानात्मजांस्तव ॥ ५० ॥ ततोद्रोणोमहाराजत्वरितोभ्ययययौरणात् ॥ तत्रापश्यन्महेष्वासोभारद्वाजःप्रतापवान् ॥ ५१ ॥ धृष्टद्युम्नंचभीमंचविचरंतौमहारणे ॥ मोहाविष्टांश्चतेपुत्रानपश्यत्समहारथः ॥ ५२ ॥ ततःप्रज्ञास्त्रमादायमोहनास्त्रंव्यनाशयत् ॥ अथप्रत्यागतप्राणास्तवपुत्रामहारथाः ॥ ५३ ॥ पुनर्युद्धायसमरेप्रययुर्भीमपार्षतौ ॥ ततोयुधिष्ठिरःप्राहसमाहूयस्वसैनिकान् ॥ ५४ ॥ गच्छंतुपदवींशक्त्याभीमपार्षतयोर्युधि ॥ सौभद्रप्रमुखावीरारथाद्वादशदंशिताः ॥ ५५ ॥ प्रवृत्तिमधिगच्छंतुनहिशुध्यतिमेमनः ॥ तएवंसमनुज्ञाताःशूराविक्रांतयोधिनः ॥ ५६ ॥ बाढमित्येवमुक्त्वातुसर्वेपुरुषमानिनः ॥ मध्यंदिनगतेसूर्येप्रययुःसर्वएवहि ॥ ५७ ॥ केकयाद्रौपदेयाश्चधृष्टकेतुश्चवीर्यवान् ॥ अभिमन्युंपुरस्कृत्यमहत्यासेनयावृताः ॥ ५८ ॥ तेकृत्वासमरेव्यूहंसूचीमुखमरिंदमाः ॥ विभिद्युर्धार्तराष्ट्राणांतद्रथानीकमाहवे ॥ ५९ ॥ तान्प्रयातान्महेष्वासानभिमन्युपुरोगमान् ॥ भीमसेनभयाविष्टाधृष्टद्युम्नविमोहिता ॥ ६० ॥ नसंवारयितुंशक्तातवसेनाजनाधिप ॥ मदमूर्च्छान्वितात्मावैप्रमदेवाध्वनिस्थिता ॥ ६१ ॥ तेऽभिजातामहेष्वासाःसुवर्णविकृतध्वजाः ॥ परीप्संतोभ्यधावंतधृष्टद्युम्नवृकोदरौ ॥ ६२ ॥ तौचदृष्ट्वामहेष्वासावभिमन्युपुरोगमान् ॥ बभूवतुर्मुदायुक्तौनिघ्नंतौ तववाहिनीं ॥ ६३ ॥ दृष्ट्वातुसहसायांतंपांचाल्योगुरुमात्मनः ॥ नाशंसतवधंवीरःपुत्राणांतवभारत ॥ ६४ ॥ ततोरथंसमारोप्यकैकेयस्यवृकोदरम् ॥ अभ्यधावत्सुसंक्रुद्धोद्रोणमिष्वस्त्रपारगम् ॥ ६५ ॥ तस्याभिपततस्तूर्णंभारद्वाजःप्रतापवान् ॥ कुद्धश्चिच्छेदवाणेनधनुःशत्रुनिबर्हणः ॥ ६६ ॥ अन्यांश्चशतशोबाणान् प्रेषयामासपार्षते ॥ दुर्योधनहितार्थायभर्तृपिंडमनुस्मरन् ॥ ६७ ॥ अथान्यद्धनुरादायपार्षतःपरवीरहा ॥ द्रोणंविव्याधविंशत्यारुक्मपुंखैःशिलाशितैः ॥ ६८ ॥ तस्यद्रोणःपुनश्चापंचिच्छेदामित्रकर्शनः ॥ हयांश्चचतुरस्तूर्णंचतुर्भिःसायकोत्तमैः ॥ ६९ ॥

॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ इतिश्रीमहा० नै० भा० सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ७ ॥ ततइति ॥ १ ॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥

वैवस्वतक्षयंघोरंप्रेषयामासभारत ॥ सारथिंचास्यभल्लेनप्रेषयामाससृत्यवे ॥ ७० ॥ हताश्वात्सरथात्तूर्णमवप्लुत्यमहारथः ॥ आरुरोहमहाबाहुरभिमन्योर्महारथम् ॥ ७१ ॥ ततःसरथनागाश्वासमकंपतवाहिनी ॥ पश्यतोभीमसेनस्यपार्थस्यचपश्यतः ॥ ७२ ॥ तत्यभग्नंबलंदृष्ट्वाद्रोणेनामिततेजसा ॥ नाशकुवन्वारयितुंसमस्तास्तेमहारथाः ॥ ७३ ॥ वंध्यमानंतुतत्सैन्यंद्रोणेननिशितैःशरैः ॥ व्यभ्रमत्तत्रतत्रैवक्षोभ्यमाणइवार्णवः ॥ ७४ ॥ तथादृष्ट्वाचतत्सैन्यंजहृषेतावकंबलम् ॥ दृष्ट्वाचार्यंसुसंक्रुद्धंपतंतंरिपुवाहिनीम् ॥ चुक्रुशुःसर्वतोयोधाःसाधुसाध्वितिभारत ॥ ७५ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०संकुलयुद्धे द्रोणपराक्रमेसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ ८ ॥ ॥ संजयउवाच ॥ ॥ ततोदुर्योधनोराजामोहात्प्रत्यागतस्मृदा ॥ शरवर्षैःपुनर्भीमंप्रत्यवारयदच्युतम् ॥ १ ॥ एकीभूतास्ततश्चैवतवपुत्रामहारथाः ॥ समेत्यसमरेभीमंयोधयामासुरुद्यताः ॥ २ ॥ भीमसेनोपिसमरेसंप्राप्यस्वरथंपुनः ॥ समारुत्यमहाबाहुर्ययौयेनतवात्मजः ॥ ३ ॥ प्रगृह्यचमहावेगंपरासुकरणंदृढम् ॥ सज्यंशरासनंसंख्येशरैर्विव्याधतेसुतम् ॥ ४ ॥ ततोदुर्योधनोराजाभीमसेनंमहाबलम् ॥ नाराचेनसुतीक्ष्णेनभृशंमर्मण्यताडयत् ॥ ५ ॥ सोतिविद्धोमहेष्वासस्तवपुत्रेणधन्विना ॥ क्रोधसंरक्तनयनोवेगेनाक्षिप्यकार्मुकम् ॥ ६ ॥ दुर्योधनंत्रिभिर्बाणैर्बाह्वोरुरसिचार्पयत् ॥ सतत्रशुशुभेराजाशिखरैर्गिरिराडिव ॥ ७ ॥ तौदृष्ट्वासमरेक्रुद्धौविनिघ्नंतौपरस्परम् ॥ दुर्योधनानुजाःसर्वेशूराःसंत्यक्तजीविताः ॥ ८ ॥ संस्मृत्यमंत्रितंपूर्वंनिग्रहेभीमकर्मणः ॥ निश्चयंपरमंकृत्वानिग्रहीतुंप्रचक्रमुः ॥ ९ ॥ तानापततएवाजौभीमसेनोमहाबलः ॥ प्रत्युद्ययौमहाराजगजःप्रतिगजानिव ॥ १० ॥ भृशंक्रुद्धश्चतेजस्वीनाराचेनसमार्पयत् ॥ चित्रसेनंमहाराजतवपुत्रंमहायशाः ॥ ११ ॥ तथेतरांस्तवसुतांस्ताडयामासभारत ॥ शरैर्बहुविधैःसंख्येरुक्मपुंखैःसुतेजनैः ॥ १२ ॥ ततःसंस्थाप्यसमरेतान्यनीकानिसर्वशः ॥ अभिमन्युप्रभृतयस्तेद्वादशमहारथाः ॥ १३ ॥ प्रेषिताधर्मराजेनभीमसेनपदानुगाः ॥ प्रतिजग्मुर्महाराजतवपुत्रान्महाबलान् ॥ १४ ॥ दृष्ट्वारथस्थांस्तान्शूरान्सूर्याग्निसमतेजसः ॥ सर्वानेवमहेष्वासान्भ्राजमानान्श्रियावृतान् ॥ १५ ॥ महाहवेदीप्यमानान्सुवर्णमुकुटोज्ज्वलान् ॥ तत्यजुःसमरेभीमंतवपुत्रामहाबलाः ॥ १६ ॥ तान्नाशक्ष्यतकौंतेयोजीवमानागताइति ॥ अन्वीयचपुनःसर्वांस्तवपुत्रानपीडयत् ॥ १७ ॥ अथाभिमन्युंसमरेभीमसेननसंगतम् ॥ पार्थतेनचसंप्रेक्ष्यतवसैन्येमहारथाः ॥ १८ ॥

॥ १३८ ॥

॥ १९ ॥२०॥२१॥२२॥२३॥२४॥२५॥ २६॥२७॥२८॥२९॥३०॥ ३१ ॥ ३२॥३३॥३४॥३५॥३६ ॥ इतिश्री० नै०भा० अष्टसप्ततितमोऽध्यायः ॥७८॥ ॥८॥ ॥ततइति॥१॥२॥३॥४॥५॥६॥७॥

दुर्योधनप्रभृतयःप्रगृहीतशरासनाः ॥ भृशमश्वैःप्रजवितैःप्रययुर्यत्रतेरथाः ॥ १९ ॥ अपराह्णेमहाराजप्रावर्ततमहारणः ॥ तावकानांचबलिनांपरेषांचैवभारत ॥ २० ॥ अभिमन्युर्विकर्णस्यहयानुद्धृत्यमाहवे ॥ अथैनंपंचविंशत्याक्षुद्रकाणांसमार्पयत् ॥ २१ ॥ हताश्वंरथमुत्सृज्यविकर्णस्तुमहारथः ॥ आरुरोहरथंराजंश्चित्रसेनस्यभारत ॥ २२ ॥ स्थितावेकरथेतौतुभ्रातरौकुलवर्धनौ ॥ आर्जुनिःशरजालेनच्छादयामासभारत ॥ २३ ॥ चित्रसेनोविकर्णश्चकार्ष्णिंपंचभिरायसैः ॥ विव्यधातेनचाकर्णपत्कार्ष्णिर्मेरुरिवस्थितः ॥ २४ ॥ दुःशासनस्तुसमरेकेकयान्पंचमारिष ॥ योधयामासराजेंद्रतदद्भुतमिवाभवत् ॥ २५ ॥ द्रौपदेयारणेक्रुद्धादुर्योधनमवारयन् ॥ शरैराशीविषाकारैःपुत्रंतवविशांपते ॥ २६ ॥ पुत्रोपितवदुर्धर्षोद्रौपद्यास्तनयान्रणे ॥ सायकैर्निशितैराजन्नाजघानपृथक्पृथक् ॥ २७ ॥ तैश्चापिविद्धःशुशुभेरुधिरेणसमुक्षितः ॥ गिरिःप्रस्रवणैर्यद्वद्गैरिकादिविमिश्रितैः ॥ २८ ॥ भीष्मोपिसमरेराजन्पांडवानामनीकिनीं ॥ कालयामासबलवान्पालःपशुगणानिव ॥ २९ ॥ ततोगांडीवनिर्घोषःप्रादुरासीद्दिशांपते ॥ दक्षिणेनवरूथिन्याःपार्थस्यारीन्विनिघ्नतः ॥ ३० ॥ उत्तस्थुःसमरेतत्रकबंधानिसमंततः ॥ कुरूणांचैवसैन्येषुपांडवानांचभारत ॥ ३१ ॥ शोणितोदंशरावर्तंगजद्वीपंहयोर्मिणम् ॥ रथनौभिर्नरव्याघ्राःप्रतेरुःसैन्यसागरम् ॥ ३२ ॥ छिन्नहस्ताविकवचाविदेहाश्वनरोत्तमाः ॥ दृश्यंतेपतितास्तत्रशतशोथसहस्रशः ॥ ३३ ॥ निहतैर्मत्तमातंगैःशोणितौघपरिप्लुतैः ॥ भूर्भातिभरतश्रेष्ठपर्वतैरार्चितायथा ॥ ३४ ॥ तत्राद्भुतमपश्यामतवतेपांचभारत ॥ नतत्रासीत्पुमान्कश्चिद्योयुद्ध्यंनाभिकांक्षति ॥ ३५ ॥ एवंयुयुधिरेवीराःप्रार्थयानामहद्यशः ॥ तावकाःपांडवैःसार्धमाकांक्षंतोजयंयुधि ॥ ३६ ॥ ॥ इतिश्रीम०भी०भीष्मवधप०संकुलयुद्धेअष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ ९ ॥ ॥ संजयउवाच ॥ ॥ ततोदुर्योधनोराजालोहितायतिभास्करे ॥ संग्रामरभसोभीमंहंतुकामोभ्यधावत ॥ १ ॥ तमायांतमभिप्रेक्ष्यनृवीरंदृढवैरिणम् ॥ भीमसेनःसुसंक्रुद्धइदंवचनमब्रवीत् ॥ २ ॥ अयंसकालःसंप्राप्तोवर्षपूगाभिवांछितः ॥ अद्यत्वांनिहनिष्यामियदिनोत्सृजसेरणम् ॥ ३ ॥ अद्यकुंत्याःपरिक्लेशंवनवासंचरुत्सृशः ॥ द्रौपद्याश्चपरिक्लेशंप्रणेष्यामिहतेत्वयि ॥ ४ ॥ यत्पुरामत्सरीभूत्वापांडवानवमन्यसे ॥ तस्यापस्यगांधारेपश्यव्यसनमागतम् ॥ ५ ॥ कर्णस्यमतमास्थायसौबलस्यचयत्पुरा ॥ अर्चित्यपांडवान्कामाद्यथेष्टंकृतवानसि ॥ ६ ॥ याचमानंचयन्मोहाद्दाशार्हमवमन्यसे ॥ उलूकस्यसमादेशंयद्दासिचहृष्टवत् ॥ ७ ॥

तेनत्वांनिहनिष्यामिसानुबंधंसबांधवम्॥ समीकरिष्येतत्पापंयत्पुराकृतवानसि॥ ८॥ एवमुक्त्वाधनुर्घोरंविकृष्योद्भाम्यचासकृत्॥ समाधत्तशरान्घोरान्महाशनिसमप्रभान्॥ ९॥ षड्विंशतिमसंकुद्धोमुमोचाशुसुयोधने॥ ज्वलिताग्निशिखाकारान्वज्रकल्पानजिह्मगान्॥ १०॥ ततोस्यकार्मुकंद्वाभ्यांसूतंद्वाभ्यांचविव्यधे॥ चतुर्भिरश्वान्जवनाननयद्यमसादनम्॥ ११॥ द्वाभ्यांचसुविकृष्टाभ्यांशराभ्यामरिमर्दनः॥ छत्रंचिच्छेदसमरेराज्ञस्तस्यनरोत्तम॥ १२॥ षड्भिश्चतस्यचिच्छेद ज्वलंतंध्वजमुत्तमम्॥ छित्त्वातंचननादोच्चैस्तवपुत्रस्यपश्यतः॥ १३॥ रथाच्चसध्वजःश्रीमान्नानारत्नविभूषितात्॥ पपातसहसाभूमौविद्युज्ज्वलधरादिव॥ १४॥ ज्वलंतंसूर्यसंकाशंनागमणिमयंशुभम्॥ ध्वजंकुरुपतेश्छित्त्वानंदद्दशुःसर्वपार्थिवाः॥ १५॥ अथैनंदशभिर्बाणैस्तोत्रैरिवमहाद्विपम्॥ आजघानंरणेवीरंस्तयन्निवमहारथः॥ १६॥ ततःसराजासिंधूनांरथश्रेष्ठोमहारथः॥ दुर्योधनस्यजग्राहपार्ष्णिंसत्पुरुषैर्वृतः॥ १७॥ कृपश्चरथिनांश्रेष्ठःकौरव्यममितौजसम्॥ आरोपयद्रथंराजन्दुर्योधनममर्षणम्॥ १८॥ सगाढविद्धोव्यथितोभीमसेनेनसंयुगे॥ निषसादरथोपस्थेराजन्दुर्योधनस्तदा॥ १९॥ परिवार्यततोभीमंजेतुकामोजयद्रथः॥ रथैरनेकसाहस्रैर्भीमस्यावारयद्दिशः॥ २०॥ धृष्टकेतुस्ततोराजन्नभिमन्युश्चवीर्यवान्॥ केकयाद्रौपदेयाश्चतवपुत्रानयोधयन्॥ २१॥ चित्रसेनःसुचित्रश्चचित्रांगश्चित्रदर्शनः॥ चारुचित्रःसुचारुश्चतथानंदोपनंदकौ॥ २२॥ अष्टावेतेमहेष्वासाःसुकुमारायशस्विनः॥ अभिमन्युरथंराजन्समंतात्पर्यवारयन्॥ २३॥ आजघानततस्तूर्णमभिमन्युर्महामनाः॥ एकैकंपंचभिर्बाणैःशितैःसन्नतपर्वभिः॥ २४॥ वज्रमृत्युप्रतीकाशैर्विचित्रायुधनिःस्वनैः॥ अमृष्यमाणास्तेसर्वेसौभद्रंरथसत्तमम्॥ २५॥ वसुमार्गगणैस्तीक्ष्णैर्गिरिंमेरुमिवांबुदाः॥ सपीड्यमानःसमरेकृतास्त्रोयुद्धदुर्मदः॥ २६॥ अभिमन्युर्महाराजतावकान्समकंपयत्॥ यथादेवासुरेयुद्धेवज्रपाणिर्महासुरान्॥ २७॥ विकर्णस्यततोभल्लान्प्रेषयामासभारत॥ चतुर्दशरथश्रेष्ठोघोरानाशीविषोपमान्॥ २८॥ सतैर्विकर्णस्यरथात्पातयामासवीर्यवान्॥ ध्वजंसूतंहयांश्चैवनृत्यमानइवाहवे॥ २९॥ पुनश्चान्यान्शरान्पीतानकुंठाग्रान्शिलाशितान्॥ प्रेषयामाससंकुद्धोविकर्णायमहाबलः॥ ३०॥ तेविकर्णसमासाद्यकंकबर्हिणवाससः॥ भित्त्वादेहंगताभूमिंज्वलंतइवपन्नगाः॥ ३१॥ तेशराहेमपुंखाग्राव्यदृश्यंतमहीतले॥ विकर्णरुधिरक्लिन्नावमंतइवशोणितम्॥ ३२॥ विकर्णंवीक्ष्यनिर्भिन्नंतस्यैवान्येसहोदराः॥ अभ्यद्रवंतसमरेसौभद्रप्रमुखान्रथान्॥ ३३॥ ॥ १३९ ॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥

अभियात्वातथैवान्यान्रथांस्तान्सूर्यवर्चसः॥ अविध्यन्समरेन्योन्यंसंरंभाद्युद्धदुर्मदाः॥ ३४॥ दुर्मुखःश्रुतकर्माणंविद्धासप्तभिराशुगैः॥ ध्वजमेकेनचिच्छेदसारथिंचास्यसप्तभिः॥ ३५॥ अश्वान्जांबूनदैर्जालैःप्रच्छन्नान्वातरंहसः॥ जघानषड्भिरासाद्यसारथिंचाभ्यपातयत्॥ ३६॥ सहताश्चेरथेतिष्ठन्श्रुतकर्मामहारथः॥ शक्तिंचिक्षेपसंकुद्धोमहोल्कांज्वलितामिव॥ ३७॥ सादुर्मुखस्यविमलंवर्मभित्त्वायशस्विनः॥ विदार्यप्राविशद्भूमिंदीप्यमानास्वतेजसा॥ ३८॥ तंदृष्ट्वाविरथंतत्रसुतसोमोमहारथः॥ पश्यतांसर्वसैन्यानांरथमारोपयत्स्वकम्॥ ३९॥ श्रुतकीर्तिस्तथावीरोजयत्सेनंसुतंतव॥ अभ्ययात्समरेराजन्हंतुकामोयशस्विनम्॥ ४०॥ तस्यविक्षिपतश्चापंश्रुतकीर्तेर्महास्वनम्॥ चिच्छेदसमरेतूर्णंजयत्सेनःसुतस्तव॥ ४१॥ क्षुरप्रेणसुतीक्ष्णेनप्रहसन्निवभारत॥ तंदृष्ट्वाच्छिन्नधन्वानंशतानीकःसहोदरम्॥ ४२॥ अभ्यपद्यततेजस्वीसिंहवन्निनदन्मुहुः॥ शतानीकंसुसमरेदृढंविस्फार्यकार्मुकम्॥ ४३॥ विव्याधदशभिस्तूर्णंजयत्सेनंशिलीमुखैः॥ ननादसुमहानादंप्रभिन्नइववारणः॥ ४४॥ अथान्येनसुतीक्ष्णेनसर्वावरणभेदिना॥ शतानीकोजयत्सेनंविव्याधहृदयेभृशम्॥ ४५॥ तथातस्मिन्वर्तमानेदुष्कर्णोभ्रातुरंतिके॥ चिच्छेदसमरेचापंनाकुलेःक्रोधमूर्च्छितः॥ ४६॥ अथान्यद्धनुरादायभारसाहमनुत्तमम्॥ समादत्तशरान्घोरान्शतानीकोमहाबलः॥ ४७॥ तिष्ठतिष्ठेतिचामंत्र्यदुष्कर्णंभ्रातुरग्रतः॥ मुमोचास्मैशितान्बाणान्ज्वलितान्पन्नगानिव॥ ४८॥ ततोस्यधनुरेकेनद्वाभ्यांसूतंचमारिष॥ चिच्छेदसमरेतूर्णंतंचविव्याधसप्तभिः॥ ४९॥ अश्वान्मनोजवांस्तस्यकर्बुरान्वातरंहसः॥ जघाननिशितैस्तूर्णंसर्वान्द्वादशभिःशरैः॥ ५०॥ अथापरेणभल्लेनसुयुक्तेनाशुपातिना॥ दुष्कर्णंसुदृढंक्रुद्धोविव्याधहृदयेभृशम्॥ ५१॥ सपपाततोभूमौव्रज्राहतइवद्रुमः॥ दुष्कर्ण्यथितंदृष्ट्वापंचराजन्महारथाः॥ ५२॥ जिघांसंतःशतानीकंसर्वतःपर्यवारयन्॥ छाद्यमानंशरव्रातैःशतानीकंयशस्विनम्॥ ५३॥ अभ्यधावंतसंक्रुद्धाःकेकयाःपंचसोदराः॥ तानभ्यापततःप्रेक्ष्यतवपुत्रामहारथाः॥ ५४॥ प्रत्युद्ययुर्महाराजगजानिवमहागजाः॥ दुर्मुखोदुर्जयश्चैवतथादुर्मर्षणोयुवा॥ ५५॥ शत्रुंजयःशत्रुसहःसर्वेकुद्धायशस्विनः॥ प्रत्युद्याताम्महाराजकेकयान्भ्रातरःसमम्॥ ५६॥ रथैर्नगरसंकाशैर्हयैर्युक्तैर्मनोजवैः॥ नानावर्णविचित्राभिःपताकाभिरलंकृतैः॥ ५७॥ वरचापधरावीराविचित्रकवचध्वजाः॥ विविशुस्तेपरंसैन्यंसिंहाइववनाद्वनम्॥ ५८॥ तेषांसुतुमुलंयुद्धंव्यतिषक्तरथद्विपम्॥ अवर्ततमहारौद्रंनिघ्नतामितरेतरम्॥ ५९॥

॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ॥ इतिश्री ० नै भा ० ऊनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ ७ ॥ ॥ अथेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ॥ ५ ॥ ६ ॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥

अन्योन्यागस्कृतांराजन्यमराष्ट्रविवर्धनम्॥ मुहूर्तास्तमितेसूर्येचक्रुर्युद्धंसुदारुणम्॥ ६०॥ रथिनःसादिनश्चाथव्यकीर्यंतसहस्रशः॥ ततःशांतनवःक्रुद्धःशरैः सन्नतपर्वभिः॥ ६१॥ नाशयामाससेनांतांभीष्मस्तेषांमहात्मनाम्॥ पंचालानांचसैन्यानिशरैर्निन्येयमक्षयम्॥ ६२॥ एवंभित्त्वामहेष्वासःपांडवानामनीकिनीं॥ रुत्वाऽवहारंसैन्यानांययौस्वशिबिरंनृप॥ ६३॥ धर्मराजोपिसंप्रेक्ष्यधृष्टद्युम्नपुरोदरौ॥ मूर्ध्निचैतावुपाघ्रायप्रहृष्टःशिबिरंययौ॥ ६४॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवध० षष्ठदिवसावहारेऊनाशीतितमोऽध्यायः॥ ७९॥ ॥ ७ ॥ ॥ संजयउवाच॥ ॥ अथशूरामहाराजपरस्परकृतागसः॥ जग्मुःस्वशिबिराण्येवरुधिरेणसमुक्षिताः॥ १॥ विश्रम्यचययान्यायंपूजयित्वापरस्परम्॥ सन्नद्धाःसमदृश्यंतभूयोयुद्धचिकीर्षया॥ २॥ ततस्तवसुतोराजंश्चित्रयाभिपरिप्लुतः॥ विस्रवच्छोणिताक्तांगःपप्रच्छेदंपितामहम्॥ ३॥ सैन्यानिरौद्राणिभयानकानिव्यूढानिसम्यग्बहुलध्वजानि॥ विदार्यहत्वाचनिपीड्यशूरास्तेपांडवानांत्वरितामहारथाः॥ ४॥ संमोह्यसर्वान्युधिकीर्तिमंतोव्यूहंचतंमकरंवज्रकल्पम्॥ प्रविश्यभीमेनरणेहतोस्मिघोरैःशरैर्मृत्युदंडप्रकाशैः॥ ५॥ कुद्धंतमुद्वीक्ष्यभयेनराजन्संमूर्छितोनलभेशांतिमद्य॥ इच्छेप्रसादात्तवसत्यसंधप्राप्तुंजयंपांडवेयांश्चहंतुम्॥ ६॥ तेनैवमुक्तःप्रहसन्महात्मादुर्योधनंमन्युगतंविदित्वा॥ तंप्रत्युवाचाविमनामनस्वीगंगासुतःशस्त्रभृतांवरिष्ठः॥ ७॥ परेणयत्नेनविगाह्यसेनांसर्वात्मनाहंतवराजपुत्र॥ इच्छामिदातुंविजयंसुखंचनचात्मानंछादयेहंत्वदर्थे॥ ८॥ एतेतुरौद्रावहवोमहारथायशस्विनःशूरतमाःकृतास्त्राः॥ येपांडवानांसमरेसहायाजितक्रमारोषविषंवमंति॥ ९॥ तेनैवशक्याःसहसाविजेतुंवीर्योद्धताःकृतवैरास्त्वयाच॥ अहंसेनांप्रतित्योत्स्यामिराजन्सर्वात्मनाजीवितंत्यज्यवीर॥ १०॥ रणेतवार्थायमहानुभावनजीवितंरक्ष्यतमंममाद्य॥ सर्वांस्तवार्थायसदेवदैत्यान्घोरान्दहेयंकिमुशत्रुसेनाम्॥ ११॥ तान्पांडवान्योधयिष्यामिराजन्प्रियंचतेसर्वमहंकरिष्ये॥ श्रुत्वैवचैतद्दचनंतदानींदुर्योधनःप्रीतमनाबभूव॥ १२॥ सर्वाणिसैन्यानितताःप्रहृष्टोनिर्गच्छतेत्याहनृपांश्चसर्वान्॥ तदाज्ञयातानिविनिर्ययुर्द्रुतंगजाश्वपादातरथायुतानि॥ १३॥ प्रहर्षयुक्तानितुतानिराजन्महांतिनानाविधशस्त्रवंति॥ स्थितानिनागाश्वपदातिमंतिविरेजुराजौतवराजन्बलानि॥ १४॥ शस्त्रास्त्रविद्भिर्नरवीरयोधैरधिष्ठिताःसैन्यगणास्त्वदीयाः॥ रथौघपादातगजाश्वसंघैःप्रयाद्भिराजौविधिवत्प्रणुन्नैः॥ १५॥

॥ १६॥१७॥१८॥१९॥ ॥ इतिश्री०नै०भा०अशीतितमोऽध्यायः॥८०॥ ॥ ७ ॥ ॥ अथेति ॥ १ ॥ २ ॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३ ॥ १४ ॥ १५ ॥१६॥१७॥ १८ ॥ १९ ॥

समुद्धतंवैतरुणार्कवर्णंरजोवभौच्छादयत्सूर्यरश्मीन्॥ रेजुःपताकारथदंतिसंस्थावातेरिताभ्राम्यमाणाःसमंतात्॥ १६॥ नानारंगाःसमरेतत्रराजन्मेघैर्युताविद्युतःखेयथैव॥ दंदैःस्थिताश्चापिसुसंप्रयुक्ताश्चकाशिरेदंतिगणाःसमंतात्॥ १७॥ धनूंषिविस्फारयतांनृपाणांबभूवशब्दस्तुमुलोऽतिघोरः॥ विमथ्यतोदेवमहासुरौघैर्यथार्णवस्यादियुगेतदानीम्॥ १८॥ तदुग्रनागंबहुरूपवर्णंतवात्मजानांसमुदीर्णमेवम्॥ बभूवसैन्यंरिपुसैन्यहंतृयुगांतमेघौघनिभंतदानीं॥ १९॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवध० भीष्मदुर्योधनसंवादेअशीतितमोऽध्यायः॥८०॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच॥ अथात्मजंतवपुनर्गांगेयोध्यानमास्थितम्॥ अब्रवीद्भरतश्रेष्ठःसंप्रहर्षकरंवचः॥ १॥ अहंद्रोणश्चशल्यश्चकृतवर्माचसात्वतः॥ अश्वत्थामाविकर्णश्चभगदत्तोयसौबलः॥ २॥ विंदानुविंदावावंत्यौबाह्लीकःसहबाह्लिकैः॥ त्रिगर्तराजोबलवान्मागधश्चसुदुर्जयः॥ ३॥ बृहद्बलश्चकौसल्यश्चित्रसेनोविविंशतिः॥ रथाश्चबद्धसाहस्राःशोभनाश्चमहाध्वजाः॥ ४॥ देशजाश्चहयाराजन्स्मारूढाहयसादिभिः॥ गजेंद्राश्चमदोद्दत्ताःप्रभिन्नकरटामुखाः॥ ५॥ पादाताश्चतथाशूरानानाप्रहरणध्वजाः॥ नानादेशसमुत्पन्नास्त्वदर्थेयोद्धुमुद्यताः॥ ६॥ एतेचान्येचबहवस्त्वदर्थेत्यक्तजीविताः॥ देवानपिरणेजेतुंसमर्थाइतिमेमतिः॥ ७॥ अवध्यंहिमयाराजंस्तववाच्यंहितंसदा॥ अशक्याःपांडवाजेतुंदेवैरपिसवासवैः॥ ८॥ वासुदेवसहायाश्चमहेंद्रसमविक्रमाः॥ सर्वथाहंतुराजेंद्रकरिष्येवचनंतव॥ ९॥ पांडवांश्चरणेजेष्येमांवाजेष्यंतिपांडवाः॥ एवमुक्त्वाददावस्मैविशल्यकरणींशुभाम्॥ १०॥ ओषधींवीर्यसंपन्नांविशल्यश्चाभवत्तदा॥ ततःप्रभातेविमलेस्वेनसैन्येनवीर्यवान्॥ ११॥ अव्यूहत्स्वयंव्यूहंभीष्मोव्यूहविशारदः॥ मंडलंमनुजश्रेष्ठोनानाशस्त्रसमाकुलम्॥ १२॥ संपूर्णयोधमुख्यैश्चतथादंतिपदातिभिः॥ रथैरनेकसाहस्रैःसमंतात्परिवारितम्॥ १३॥ अश्वर्वदैर्महद्भिश्चऋष्टितोमरधारिभिः॥ नागेनागेरथाःसमसमचाश्वारथेरथे॥ १४॥ अन्वश्वंदशधानुष्काधानुष्केदशचर्मिणः॥ एवंव्यूढंमहाराजतवसैन्यंमहारथैः॥ १५॥ स्थितंरणायमहतेभीष्मेणयुधिपालितम्॥ दशाश्वानांसहस्राणिदंतिनांचतथैवच॥ १६॥ रथानामयुतंचापिपुत्राश्चतवदर्शिताः॥ चित्रसेनादयःशूराअभ्यरक्षन्पितामहम्॥ १७॥ रक्ष्यमाणाःसतैःशूरैर्गोप्यमानाश्चतेनते॥ सन्नद्धाःसमदृश्यंतराजानश्चमहाबलाः॥ १८॥ दुर्योधनस्तुसमरेदंशितोरथमास्थितः॥ व्यराजतश्रियाजुष्टोयथाशक्रस्त्रिविष्टपे॥ १९॥

॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

ततःशब्दोमहानासीत्पुत्राणांतवभारत ॥ रथघोषश्चविपुलोवादित्राणांचनिःस्वनः ॥ २० ॥ भीष्मेणधार्तराष्ट्राणांव्यूढःप्रत्यङ्मुखोयुधि ॥ मंडलःसमहाव्यूहो दुर्भेद्योऽमित्रघातनः ॥ २१ ॥ सर्वतःशुशुभेराजन्रणेऽरीणांदुरासदः ॥ मंडलंतुसमालोक्यव्यूहंपरमदुर्जयम् ॥ २२ ॥ स्वयंयुधिष्ठिरोराजावज्रंव्यूहमथाकरोत् ॥ तथाव्यूढेष्वनीकेषुयथास्थानमवस्थिताः ॥ २३ ॥ रथिनःसादिनःसर्वेसिंहनादमथानदन् ॥ बिभित्सवस्ततोव्यूहंनिर्ययुर्युद्धकांक्षिणः ॥ २४ ॥ इतरेतरतःशूराःसहसैन्याःप्रहारिणः ॥ भारद्वाजोययौमत्स्यंद्रौणिश्चापिशिखंडिनम् ॥ २५ ॥ स्वयंदुर्योधनोराजापार्षतंसमुपाद्रवत् ॥ नकुलःसहदेवश्चमद्रराजानमीयतुः ॥ २६ ॥ विंदानुविंदावावंत्यावभिद्रुतौ ॥ सर्वेनृपास्तुसमरेधनंजयमयोधयन् ॥ २७ ॥ भीमसेनोरणेयांतंहार्दिक्यंसमवारयत् ॥ चित्रसेनंविकर्णंच तथादुर्मर्षणंविभुः ॥ २८ ॥ आर्जुनिःसमरेराजंस्तवपुत्रानयोधयत् ॥ प्राग्ज्योतिषोमहेष्वासोहैडिंबंराक्षसोत्तमम् ॥ २९ ॥ अभिदुद्राववेगेनमत्तोमत्तमिवद्विपम् ॥ अलंबुषस्तदाराजन्सात्यकिंयुद्धदुर्मदम् ॥ ३० ॥ ससैन्यंसमरेक्रुद्धोराक्षसःसमुपाद्रवत् ॥ भूरिश्रवारणेयत्तोधृष्टकेतुमयोधयत् ॥ ३१ ॥ श्रुतायुषंचराजानंधर्मपुत्रोयुधिष्ठिरः ॥ चेकितानश्चसमरेकृपमेवान्वयोधयत् ॥ ३२ ॥ शेषाःप्रतिययुर्यत्ताभीष्ममेवमहारथम् ॥ ततोराजसमूहास्तेपरिवव्रुर्धनंजयम् ॥ ३३ ॥ शक्तितोमरनाराचगदापरिघपाणयः ॥ अर्जुनोथभृशंक्रुद्धोवार्ष्णेयमिदमब्रवीत् ॥ ३४ ॥ पश्यमाधवसैन्यानिधार्तराष्ट्रस्यसंयुगे ॥ व्यूढानिव्यूहविदुषागांगेयेनमहात्मना ॥ ३५ ॥ युद्धाभिकामान्शूरांश्चपश्यमाधवदंशितान् ॥ त्रिगर्त्तराजंसहितंभ्रातृभिःपश्यकेशव ॥ ३६ ॥ अद्यैतान्नाशयिष्यामिपश्यतस्तेजनार्दन ॥ यइमेमांयदुश्रेष्ठयोद्धुकामारणाजिरे ॥ ३७ ॥ एतदुक्त्वातुकौंतेयोधनुर्ज्यामवमृज्यच ॥ ववर्षशरवर्षाणिनराधिपगणान्प्रति ॥ ३८ ॥ तेपितंपरमेष्वासाःशरवर्षैरपूरयन् ॥ तडागंवारिधाराभिर्यथाप्रावृषितोयदाः ॥ ३९ ॥ हाहाकारोमहानासीत्तवसैन्येविशांपते ॥ छाद्यमानौरणेकृष्णौशरैर्दृष्ट्वामहारणे ॥ ४० ॥ देवादेवर्षयश्चैवगंधर्वाश्चसहोरगैः ॥ विस्मयंपरमंजग्मुर्दृष्ट्वाकृष्णौतथागतौ ॥ ४१ ॥ ततःक्रुद्धोऽर्जुनोराजन्नैंद्रमस्त्रमुदैरयत् ॥ तत्राद्भुतमपश्यामविजयस्यपराक्रमं ॥ ४२ ॥ शस्त्रवृष्टिंपरैर्मुक्तांशरौघैर्यदवारयत् ॥ नचतत्राप्यनिर्भिन्नःकश्चिदासीद्दिशांपते ॥ ४३ ॥ तेषांराजसहस्राणांहयानांदंतिनांतथा ॥ द्वाभ्यांत्रिभिःशरैश्चान्यान्पार्थोविव्याधमारिष ॥ ४४ ॥ तेहन्यमानाःपार्थेनभीष्मंशांतनवंययुः ॥ अगाधेमज्जमानानांभीष्मःपोतोभवत्तदा ॥ ४५ ॥

॥ १४१ ॥

॥ ४६ ॥ ॥ इतिश्री०नै०भा०एकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥७॥ ॥ तथेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

आपतद्भिस्तुतैस्तत्रप्रभग्नंतावकंबलम् ॥ संचुक्षुभेमहाराजवातैरिवमहार्णवः ॥ ४६ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवध० समग्रयुद्धदिवसेएकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥७॥ ॥७॥ ॥ संजयउवाच ॥ ॥ तथाप्रवृत्तेसंग्रामेनिवृत्तेचसुशर्मणि ॥ भग्नेषुचापिवीरेषुपांडवेनमहात्मना ॥ १ ॥ क्षुभ्यमाणेबलेतूर्णंसागरप्रतिमेतव ॥ प्रत्युद्यातेचगांगेयेत्वरितंविजयंप्रति ॥ २ ॥ दृष्ट्वाद्रुर्योधनोराजारणेपार्थस्यविक्रमम् ॥ त्वरमाणःसमभ्येत्यसर्वांस्तानब्रवीन्नृपान् ॥ ३ ॥ तेपांतुप्रमुखेशूरंसुशर्माणंमहाबलम् ॥ मध्येसर्वस्यसैन्यस्यभृशंसंहर्षयन्निव ॥ ४ ॥ एषभीष्मःशांतनवोयोद्धुकामोधनंजयम् ॥ सर्वात्मनाकुरुश्रेष्ठस्यक्त्वाजीवितमात्मनः ॥ ५ ॥ तंप्रयांतंरणेवीरंसर्वसैन्येनभारतम् ॥ संयत्ताःसमरेसर्वेपालयध्वंपितामहम् ॥ ६ ॥ बाढमित्येवमुक्त्वातुतान्यनीकानिसर्वशः ॥ नरेंद्राणांमहाराजसमाजग्मुःपितामहम् ॥ ७ ॥ ततःप्रयातःसहसाभीष्मःशांतनवोर्जुनम् ॥ रणेभारतमायांतमाससादमहाबलः ॥ ८ ॥ महाश्वेताश्वयुक्तेनभीमवानरकेतुना ॥ महतामेघनादेनरथेनातिविराजता ॥ ९ ॥ समरेसर्वसैन्यानामुपयांतंधनंजयम् ॥ अभवत्तुमुलोनादोभयाद्दृष्ट्वाकिरीटिनम् ॥ १० ॥ अभीषूंहस्तंकृष्णंचदृष्ट्वादित्यमिवापरम् ॥ मध्यंदिनगतंसंख्येनशोकुःप्रतिवीक्षितुम् ॥ ११ ॥ तथाशांतनवंभीष्मंश्वेताश्वंश्वेतकार्मुकम् ॥ नशेकुःपांडवाद्रष्टुंश्वेतंग्रहमिवोदितम् ॥ १२ ॥ ससर्वतःपरिवृतस्त्रिगर्त्तैःसुमहात्मभिः ॥ भ्रातृभिःसहपुत्रैश्चयतान्यैश्चमहारथैः ॥ १३ ॥ भारद्वाजस्तुसमरेमत्स्यंविव्याधपत्रिणा ॥ ध्वजंचास्यशरेणाजौधनुश्चैकेनचिच्छिदे ॥ १४ ॥ तदपास्यधनुश्छिन्नंविराटोवाहिनीपतिः ॥ अन्यदादत्तवेगेनधनुर्भारसहंदृढम् ॥ १५ ॥ शरांश्चाशीविषाकारान्ज्वलितान्पन्नगानिव ॥ द्रोणंत्रिभिश्चविव्याधचतुर्भिश्चास्यवाजिनः ॥ १६ ॥ ध्वजमेकेनविव्याधसारथिंचास्यपंचभिः ॥ धनुरेकेषुणाविध्यत्तत्राकुर्ध्यद्द्विजर्षभः ॥ १७ ॥ तस्यद्रोणोवधीदश्वान्शरैःसन्नतपर्वभिः ॥ अष्टाभिर्भरतश्रेष्ठसूतमेकेनपत्रिणा ॥ १८ ॥ सहताश्वादवप्लुत्यस्यंदनाद्धतसारथिः ॥ आरुरोहरथंतूर्णंपुत्रस्यरथिनांवरः ॥ १९ ॥ ततस्तुतौपितापुत्रौभारद्वाजरथेस्थितौ ॥ महताशरवर्षेणवारयामासतुर्बलात् ॥ २० ॥ भारद्वाजस्ततःक्रुद्धःशरमाशीविषोपमम् ॥ चिक्षेपसमरेतूर्णंशंखंप्रतिजनेश्वरः ॥ २१ ॥ सतस्यहृदयंभित्त्वापीत्वाशोणितमाहवे ॥ जगामधरणींबाणोलोहितार्द्रवरच्छदः ॥ २२ ॥ सपपातरणेतूर्णंभारद्वाजशराहतः ॥ धनुस्त्यक्त्वाशरांश्चैवपितुरेवसमीपतः ॥ २३ ॥ हतंतमात्मजंदृष्ट्वाविराटःप्राद्रवद्भयात् ॥ उत्सृज्यसमरेद्रोणंव्यात्ताननमिवांतकम् ॥ २४ ॥

॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

भारद्वाजस्ततस्तूर्णंपांडवानांमहाचमूम् ॥ दारयामाससमरेशतशोथसहस्रशः ॥ २५ ॥ शिखंडीतुमहाराजद्रौणिमासाद्यसंयुगे ॥ आजघानभ्रुवोर्मध्येनाराचेन त्रिभिराशुगैः ॥ २६ ॥ सवभौरथशार्दूलोललाटेसंस्थितैस्त्रिभिः ॥ शिखरैःकांचनमयैर्मेरुस्त्रिभिरिवोच्छ्रितैः ॥ २७ ॥ अश्वत्थामाततःक्रुद्धोनिमेषार्धाच्छिखंडिनः ॥ ध्वजंसूतमथोराजंस्तुरगानायुधानिच ॥ २८ ॥ शरैर्बहुभिराच्छिद्यपातयामाससंयुगे ॥ सहताश्वादवप्लुत्यरथाद्रथिनांवरः ॥ २९ ॥ खड्गमादायसुशितंविमलंचशरावरम् ॥ श्येनवद्व्यचरत्क्रुद्धःशिखंडीशत्रुतापनः ॥ ३० ॥ सखड्गस्यमहाराजचरतस्तस्यसंयुगे ॥ नांतरंददृशेद्रौणिस्तदद्भुतमिवाभवत् ॥ ३१ ॥ ततःशरसहस्राणिबहूनिभरतर्षभ ॥ प्रेषयामाससमरेद्रौणिःपरमकोपनः ॥ ३२ ॥ तामापततींसमरेशरवृष्टिंसुदारुणाम् ॥ असिनातीक्ष्णधारेणचिच्छेदबलिनांवरः ॥ ३३ ॥ ततोस्यविमलंद्रौणिःशतचंद्रंमनोरमम् ॥ चर्माच्छिनदसिंचास्यखंडयामाससंयुगे ॥ ३४ ॥ शितैस्तुबहुशोराजन्तंचविव्याधपत्रिभिः ॥ शिखंडीततुतःखड्गंखंडितंतेनसायकैः ॥ ३५ ॥ आविध्यव्यसृजत्तूर्णंज्वलंतमिवपन्नगम् ॥ तमापततंसहसाकालानलसमप्रभम् ॥ ३६ ॥ चिच्छेदसमरेद्रौणिर्दर्शयन्पाणिलाघवम् ॥ शिखंडिनंचविव्याधशरैर्बहुभिरायसैः ॥ ३७ ॥ शिखंडीतुभृशंराजंस्ताड्यमानःशितैःशरैः ॥ आरुरोहरथंतूर्णंमाधवस्यमहात्मनः ॥ ३८ ॥ सात्यकिश्चापिसंक्रुद्धोराक्षसंक्रूरमाहवे ॥ अलंबुषंशरैस्तीक्ष्णैर्विव्याधबलिनांवरः ॥ ३९ ॥ राक्षसेंद्रस्ततस्तस्यधनुश्चिच्छेदभारत ॥ अर्धचंद्रेणसमरेतंचविव्याधसायकैः ॥ ४० ॥ मायांचराक्षसींकृत्वाशरवर्षैरवाकिरत् ॥ तत्राद्भुतमपश्यामशैनेयस्यपराक्रमम् ॥ ४१ ॥ असंभ्रमस्तुसमरेवध्यमानःशितैःशरैः ॥ ऐंद्रमस्त्रंचवार्ष्णेयोयोजयामास भारत ॥ ४२ ॥ विजयाद्यदनुप्राप्तंमाधवेनयशस्विना ॥ तदस्त्रंभस्मसात्कृत्वामायांतांराक्षसींतदा ॥ ४३ ॥ अलंबुषंशरैरन्यैरभ्याकिरतसर्वतः ॥ पर्वतंवारिधाराभिःप्रावृषीवबलाहकः ॥ ४४ ॥ तत्तथापीडितंतेनमाधवेनयशस्विना ॥ प्रदुद्रावभयाद्रक्षस्यक्त्वासात्यकिमाहवे ॥ ४५ ॥ तमजेयंराक्षसेंद्रंसंख्येमघवताअपि ॥ शैनेयःप्राणदज्ञित्वायोधानांतवपश्यताम् ॥ ४६ ॥ न्यहनत्तावकांश्चापिसात्यकिःसत्यविक्रमः ॥ निशितैर्बहुभिर्बाणैस्तेद्रवंतभयार्दिताः ॥ ४७ ॥ एतस्मिन्नेवकालेतुद्रुपदस्यात्मजोबली ॥ धृष्टद्युम्नोमहाराजपुत्रंतवजनेश्वरम् ॥ ४८ ॥ छादयामाससमरेशरैःसन्नतपर्वभिः ॥ सछाद्यमानोविशिखैर्धृष्टद्युम्नेनभारत ॥ ४९ ॥ विव्यधेनचराजेंद्रतवपुत्रोजनेश्वर ॥ धृष्टद्युम्नंचसमरेतूर्णंविव्याधपत्रिभिः ॥ ५० ॥

॥ १४२ ॥

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ॥ इतिश्री० नै० भा० द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ ७ ॥ ॥ वहूनीति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

षष्ट्याचत्रिंशताचैवतदद्भुतमिवाभवत् ॥ तस्यसेनापतिःक्रुद्धोधनुश्चिच्छेदमारिष ॥ ५१ ॥ हयांश्चचतुरःशीघ्रंनिजघानमहाबलः ॥ शरैश्चैनंसुनिशितैःक्षिप्रंविव्याधसप्तभिः ॥ ५२ ॥ सहताश्वान्महावाहुरवप्लुत्यरथाद्बली ॥ पदातिरसिमुद्यम्यप्राद्रवत्पार्षतंप्रति ॥ ५३ ॥ शकुनिस्तंसमभ्येत्यराजगृद्धीमहाबलः ॥ राजानं सर्वलोकस्यरथमारोपयत्स्वकम् ॥ ५४ ॥ ततोनृपंपराजित्यपार्षतःपरवीरहा ॥ न्यहनत्तावकंसैन्यंवज्रपाणिरिवासुरान् ॥ ५५ ॥ कृतवर्मारणेभीमंशरैरार्छन्महारथः ॥ प्रच्छादयामासचतंमहामेघोरविंयथा ॥ ५६ ॥ ततःप्रहस्यसमरेभीमसेनःपरंतपः ॥ प्रेषयामाससंक्रुद्धःसायकान्कृतवर्मणे ॥ ५७ ॥ तैरर्द्यमानोतिरथःसात्वतःसत्यकोविदः ॥ नाकंपतमहाराजभीमंचार्छच्छितैःशरैः ॥ ५८ ॥ तस्याश्वांश्चतुरोहत्वाभीमसेनोमहारथः ॥ सारथिंपातयामाससध्वजंसुपरिष्कृतम् ॥ ५९ ॥ शरैर्बहुविधैश्चैनमाचिनोत्परवीरहा ॥ शकलीकृतसर्वांगोहताश्वःप्रत्यदृश्यत ॥ ६० ॥ हताश्वश्चततस्तूर्णंवृषकस्यरथंययौ ॥ स्यालस्यतेमहाराजतवपुत्रस्यपश्यतः ॥ ६१ ॥ भीमसेनोपिसंक्रुद्धस्तवसैन्यमुपाद्रवत् ॥ निजघानचसंक्रुद्धोदंडपाणिरिवांतकः ॥ ६२ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०द्वैरथे द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ वहूनिहिविचित्राणिद्वैरथानिस्मसंजय ॥ पांडूनांमामकैःसार्धमश्रौषंतवजल्पतः ॥ १ ॥ नचैवमामकंकिंचिन्नृष्टंशंससिसंजय ॥ नित्यंपांडुसुतान्हृष्टानभग्नान्संप्रशंससि ॥ २ ॥ जीयमानान्विमनसोमामकान्विगतौजसः ॥ वदसेसंयुगेसूतदिष्टमेतन्नसंशयः ॥ ३ ॥ ॥ संजयउवाच ॥ ॥ यथाशक्तियथोत्साहंयुद्धेचेष्टंतितावकाः ॥ दर्शयानाःपरंशक्त्यापौरुषंपुरुषर्षभ ॥ ४ ॥ गंगायाःसुरनद्यावैस्वादुभूत्वाय थोदकम् ॥ महोदधेर्गुणाभ्यासाल्लवणत्वंनिगच्छति ॥ ५ ॥ तथातत्पौरुषंराजंस्तावकानांपरंतप ॥ प्राप्यपांडुसुतान्वीरान्व्यर्थंभवतिसंयुगे ॥ ६ ॥ घटमानान्यथाशक्तिकुर्वाणान्कर्मदुष्करम् ॥ नदोषेणकुरुश्रेष्ठकौरवान्गंतुमर्हसि ॥ ७ ॥ तवापराधात्सुमहान्सपुत्रस्यविशांपते ॥ पृथिव्याःप्रक्षयोघोरोयमराष्ट्रविवर्धनः ॥ ८ ॥ आत्मदोषात्समुत्पन्नंशोचितुंनार्हसेनृप ॥ नहिरक्षंतिराजानःसर्वथात्रापिजीवितम् ॥ ९ ॥ युद्धेसुकृतिनांलोकानिच्छंतोवसुधाधिपाः ॥ चमूंविगाह्यायुद्ध्यंतेनित्यंस्वर्गपरायणाः ॥ १० ॥ पूर्वाह्णेतुमहाराजप्रावर्ततजनक्षयः ॥ तंत्वमेकमनाभूत्वाशृणुदेवासुरोपमम् ॥ ११ ॥ आवंत्यौतुमहेष्वासौमहासेनौमहाबलौ ॥ इरावंतमभिप्रेक्ष्यसमेयातांरणोत्कटौ ॥ १२ ॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ नागराजःकौरव्यस्तस्यसुताउलूपीतस्याःसुतइरावान् ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ निष्ठानकःसव्यथःशब्दः ॥ ३१ ॥

तेषांप्रवव्रतेयुद्धंसुमहल्लोमहर्षणम्॥ इरावांस्तुसुसंक्रुद्धोभ्रातरौदेवरूपिणौ ॥ १३ ॥ विव्याधनिशितैस्तूर्णशरैःसन्नतपर्वभिः ॥ तावेनंप्रत्यविध्येतांसमरेचित्रयोधिनौ॥ १४॥ युध्यतांहितथाराजन्विशेषानव्यदृश्यत ॥ यततांशत्रुनाशायकृतप्रतिकृतैषिणाम्॥ १५॥ इरावांस्तुततोराजन्ननुविंदस्यसायकैः॥ चतुर्भिश्च तुरोवाहाननयद्यमसादनम्॥ १६॥ भल्लाभ्यांचतुतीक्ष्णाभ्यांधनुःकेतुंचमारिष॥ चिच्छेदसमरेराजंस्तदद्भुतमिवाभवत्॥ १७॥ त्यक्त्वानुविंदोथरथंविंदस्यरथमास्थितः॥ धनुर्गृहीत्वापरमंभारसाधनमुत्तमम्॥ १८॥ तावेकस्यौरणेवीरावावंत्यौरथिनांवरौ ॥ शरान्मुमुचतुस्तूर्णमिरावतिमहात्मनि॥ १९॥ ताभ्यांमुक्तामहावेगाःशराःकांचनभूषणाः॥ दिवाकरपथंप्राप्यच्छादयामासुरंबरम्॥ २०॥ इरावांस्तुरणेक्रुद्धोभ्रातरौतौमहारथौ॥ ववर्षशरवर्षेणसारथिंचाप्यपातयत्॥ २१॥ तस्मिंस्तुपतितेभूमौगतसत्त्वेतुसारथौ॥ रथःप्रदुद्रावदिशःसमुद्धांतहयस्ततः॥ २२॥ तौसजित्वामहाराजनागराजसुतासुतः॥ पौरुषंख्यापयंस्तूर्णव्यधमत्तववाहिनीम्॥ २३॥ सावध्यमानासमरेधार्तराष्ट्रीमहाचमूः॥ वेगान्ववहुविधांश्चक्रेविषंपीत्वेवमानवः॥ २४॥ हैडिंबोराक्षसेंद्रस्तुभगदत्तंसमाद्रवत्॥ रथेनादित्यवर्णेनसध्वजेनमहाबलः॥ २५॥ ततःप्राग्ज्योतिषोराजानागराजंसमास्थितः॥ यथावज्रधरःपूर्वंसंग्रामेतारकामये॥ २६॥ तत्रदेवाःसगंधर्वाऋषयश्च समागताः॥ विशेषंनस्मविविदुर्हैडिंबभगदत्तयोः॥ २७॥ यथासुरपतिःशक्रस्त्रासयामासदानवान्॥ तथैवसमरेराजाद्रावयामासपांडवान्॥ २८॥ तेनविद्राव्यमाणास्तेपांडवाःसर्वतोदिशम्॥ त्रातारंनाभ्यगच्छंतःस्वेष्वनीकेषुभारत ॥ २९ ॥ भैमसेनिंरथस्थंतुतत्रापश्यामभारत ॥ शेषाविमनसोभूत्वाप्राद्रवंतमहारथाः॥ ३० ॥ निवृत्तेषुतुपांडूनांपुनःसैन्येषुभारत ॥ आसीन्निष्ठानकोघोरस्तवसैन्यस्यसंयुगे॥ ३१ ॥ घटोत्कचस्ततोराजन्भगदत्तंमहारणे॥ शरैःप्रच्छादयामासमेरुंगिरिमिवांबुदः ॥ ३२ ॥ निहत्यतान्शरान्राजाराक्षसस्यधनुश्च्युतान् ॥ भैमसेनिंरणेतूर्णसर्वमर्मस्वताडयत् ॥ ३३ ॥ सताड्यमानोबहुभिःशरैःसन्नतपर्वभिः॥ नविव्यथेराक्षसेंद्रोभिद्यमानइवाचलः॥ ३४॥ तस्यप्राग्ज्योतिषःक्रुद्धस्तोमरांश्चचतुर्दश ॥ प्रेषयामाससमरेतांश्चिच्छेदसराक्षसः ॥ ३५॥ सतांश्छित्त्वामहाबाहुस्तोमरान्निशितैःशरैः॥ भगदत्तंचविव्याधसप्तत्याकंकपत्त्रिभिः ॥ ३६ ॥ ततःप्राग्ज्योतिषोराजाप्रहसन्निवभारत ॥ तस्याश्वांश्चतुरःसंख्येपातयामाससायकैः॥ ३७॥ सहताश्वेरथेतिष्ठन्राक्षसेंद्रःप्रतापवान्॥ शक्तिंचिक्षेपवेगेनप्राग्ज्योतिषगजंप्रति॥ ३८॥ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

॥ १४३ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ॥ इतिश्री० नै० भा० व्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ ७ ॥ ॥ ततइति ॥ १ ॥

तामापतंतींसहसाहेमदंडांसुवेगिनीम्॥ त्रिधाचिच्छेदनृपतिःसाध्यकीर्यतमेदिनीम्॥ ३९॥ शक्तिंविनिहतांदृष्ट्वाहैडिंबःप्राद्रवद्भयात्॥ ययेंद्रस्यरणात्पूर्वंनमुचिर्दैत्यसत्तमः॥ ४०॥ तंविजित्यरणेशूरंविक्रांतंख्यातपौरुषम्॥ अजेयंसमरेवीरंयमेनवरुणेनच॥ ४१॥ पांडवींसमरेसेनांसंममर्दसकुंजरः॥ यथावनगजोराजन्मद्रंश्वरतिपद्मिनीम्॥ ४२॥ मद्रेश्वरस्तुसमरेयमाभ्यांसमसज्जत॥ स्वस्रीयौछादयांचक्रेशरौघैःपांडुनंदनौ॥ ४३॥ सहदेवस्तुसमरेमातुलंदृश्यसंगतम्॥ अवारयच्छरौघेणमेघोयद्वद्दिवाकरम्॥ ४४॥ छाद्यमानःशरौघेणहृष्टरूपतरोभवत्॥ तयोश्चाप्यभवत्प्रीतिरतुलामाढकारणात्॥ ४५॥ ततःप्रहस्यसमरेनकुलस्यमहारथः॥ अश्वांश्चचतुरोराजंश्चतुर्भिःसायकोत्तमैः॥ ४६॥ प्रेषयामाससमरेयमस्यसदनंप्रति ॥ हताश्चात्तुरथात्तूर्णमवप्लुत्यमहारथः ॥ ४७॥ आरुरोह ततोयानंभ्रातुरेवयशस्विनः ॥ एकस्थौतुरणेशूरौदृढेविक्षिप्यकार्मुके ॥ ४८॥ मद्रराजरथंतूर्णछादयामासतुःक्षणात् ॥ सच्छाद्यमानोबहुभिःशरैःसन्नतपर्वभिः॥ ४९॥ स्वस्रीयाभ्यांनरव्याघ्रोनाकंपतयथाचलः॥ प्रहसन्निवतांचापिशस्त्रवर्षिंजघानह ॥ ५० ॥ सहदेवस्ततःक्रुद्धःशरमुद्धृत्यवीर्यवान् ॥ मद्रराजमभिप्रेक्ष्यप्रेषयामासभारत॥ ५१॥ सशरःप्रेषितस्तेनगरुडानिलवेगवान्॥ मद्रराजंविनिर्भिद्यनिपपातमहीतले॥ ५२॥ सगाढविद्धोव्यथितोरथोपस्थेमहारथः॥ निषसादमहाराजकश्मलंचजगामह॥ ५३॥ तंविसंज्ञंनिपतितंसूतःसंप्रेक्ष्यसंयुगे॥ अपोवाहरथेनाजौयमाभ्यामभिपीडितम्॥ ५४॥ दृष्ट्वामद्रेश्वररथंधार्तराष्ट्राःपराङ्मुखम्॥ सर्वेविमनसोभूत्वानेदमस्तीत्यचिंतयन्॥ ५५॥ निर्जित्यमातुलंसंख्येमाद्रीपुत्रौमहारथौ॥ दध्मतुर्मुदितौशंखौसिंहनादंचनेदतुः॥ ५६॥ अभिदुद्रुवतुर्हृष्टौतवसैन्यंविशांपते ॥ यथादैत्यचमूंराजन्निंद्रोपेंद्रावि वामरौ ॥ ५७ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप० द्वंद्वयुद्धेऽष्यशीतितमोऽध्यायः॥ ८३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ततोयुधिष्ठिरोराजामध्यंप्राप्तेदिवाकरे॥ श्रुतायुषमभिप्रेक्ष्यप्रेषयामासवाजिनः॥ १॥ अभ्यधावत्ततोराजाश्रुतायुषमरिंदमम्॥ विनिघ्नन्सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः॥ २॥ ससंवार्यरणेराजाप्रेषितान्धर्मसूनुना॥ शरान्सप्तमहेष्वासःकौंतेयस्यमार्पयत्॥ ३॥ तेतस्यकवचंभित्त्वापपुःशोणितमाहवे॥ असूनिवविचिन्वंतोदेहतस्यमहात्मनः॥ ४॥ पांडवस्तुभृशंक्रुद्धोविद्धस्तेनमहात्मना॥ रणेवीरा हकर्णेनराजानंहृद्यविध्यत॥ ५॥ अथापरेणभल्लेनकेतुंतस्यमहात्मनः॥ रथश्रेष्ठोरथात्तूर्णंभूमौपार्थोन्यपातयत्॥ ६॥ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

केतुंनिपतितंदृष्ट्वाश्रुतायुःसतुपार्थिवः ॥ पांडवंविशिखैस्तीक्ष्णैराजन्विव्याधसप्तभिः ॥ ७ ॥ ततःक्रोधात्प्रजज्वालधर्मपुत्रोयुधिष्ठिरः ॥ यथायुगांतेभूतानिदिधक्षुरिवपावकः ॥ ८ ॥ क्रुद्धंतुपांडवंदृष्ट्वादेवगंधर्वराक्षसाः ॥ प्रविव्यथुर्महाराजव्याकुलंचाप्यभूज्जगत् ॥ ९ ॥ सर्वेषांचैवभूतानामिदमासीन्मनोगतम् ॥ त्रींल्लोकानद्यसंक्रुद्धोनृपोऽयंधक्ष्यतीतिवै ॥ १० ॥ ऋषयश्चैवदेवाश्चचक्रुःस्वस्त्ययनंमहत् ॥ लोकानांनृपशांत्यर्थंक्रोधितेपांडवेतदा ॥ ११ ॥ सचक्रोधसमाविष्टःस्रुक्किणीपरिसंलिहन् ॥ दधारात्मवपुर्घोरंयुगांतादित्यसन्निभम् ॥ १२ ॥ ततःसैन्यानिसर्वाणितावकानिविशांपते ॥ निराशान्यभवंस्तत्रजीवितंप्रतिभारत ॥ १३ ॥ सतुधैर्येणतंकोपंसन्निवार्यमहायशाः ॥ श्रुतायुषःप्रचिच्छेदमुष्टिदेशेमहाधनुः ॥ १४ ॥ अथैनंछिन्नधन्वानंनाराचेनस्तनांतरे ॥ निर्बिभेदरणेराजासर्वसैन्यस्यपश्यतः ॥ १५ ॥ सत्वरंचरणेराजन्तस्यवाहान्महात्मनः ॥ निजघानशरैःक्षिप्रंसूतंचसुमहाबलः ॥ १६ ॥ हताश्वंतुरथंत्यक्त्वाद्दृष्ट्वाराज्ञोऽस्यपौरुषम् ॥ विप्रदुद्रुववेगेनश्रुतायुःसमरेतदा ॥ १७ ॥ तस्मिन्जितेमहेष्वासेधर्मपुत्रेणसंयुगे ॥ दुर्योधनबलंराजन्सर्वमासीत्पराङ्मुखम् ॥ १८ ॥ एतत्कृत्वामहाराजधर्मपुत्रो युधिष्ठिरः ॥ व्यात्ताननोयथाकालस्तवसैन्यंजघानह ॥ १९ ॥ चेकितानस्तुवार्ष्णेयोगौतमंरथिनांवरम् ॥ प्रेक्षतांसर्वसैन्यानांछादयामाससायकैः ॥ २० ॥ संनिवार्यशरांस्तांस्तुकृपःशारद्वतोयुधि ॥ चेकितानंरणेयत्तंराजन्विव्याधपत्रिभिः ॥ २१ ॥ अथापरेणभल्लेनधनुश्चिच्छेदमारिष ॥ सारथिंचास्यसमरेक्षिप्रहस्तोन्यपातयत् ॥ २२ ॥ अश्वांश्चास्यावधीद्राजन्गौतौपार्ष्णिसारथी ॥ सोवप्लुत्यरथात्तूर्णंगदांजग्राहसात्वतः ॥ २३ ॥ सतयावीरघातिन्यागदयागदिनांवरः ॥ गौतमस्यहयान्हत्वासारथिंचन्यपातयत् ॥ २४ ॥ भूमिष्ठोगौतमस्तस्यशरांश्चिक्षेपषोडश ॥ शरास्तेसात्वतंभित्त्वाप्राविशन्धरणीतलम् ॥ २५ ॥ चेकितानस्ततःक्रुद्धःपुनश्चिक्षेपतांगदाम् ॥ गौतमस्यवधाकांक्षीवज्रमस्येवपुरंदरः ॥ २६ ॥ तामापतंतींविमलामग्निमग्नींमहागदाम् ॥ शरैरनेकसाहस्रैर्वारयामासगौतमः ॥ २७ ॥ चेकितानस्ततःखड्गंक्रोधादुद्धृत्यभारत ॥ लाघवंपरमास्थायगौतमंसमुपाद्रवत् ॥ २८ ॥ गौतमोपिधनुस्त्यक्त्वाप्रगृह्यासिंसुसंयतः ॥ वेगेनमहताराजंश्चेकितानमुपाद्रवत् ॥ २९ ॥ तावुभौबलसंपन्नौनिस्त्रिंशवरधारिणौ ॥ निस्त्रिंशाभ्यांसुतीक्ष्णाभ्यामन्योन्यंसंततक्षतुः ॥ ३० ॥ निस्त्रिंशवेगाभिहतौततस्तौपुरुषर्षभौ ॥ धरणींसमनुप्राप्तौसर्वभूतनिषेविताम् ॥ ३१ ॥ मूर्छयाभिपरीतांगौव्यायामेनतुमोहितौ ॥ ततोऽभ्यधावद्वेगेनकरकर्षःसुहृत्तया ॥ ३२ ॥

॥ १४४ ॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ॥ इतिश्री० नै० भा० चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ ७ ॥, ॥ सइति ॥ १ ॥

चेकितानंतथाभूतंदृष्ट्वासमरदुर्मदः ॥ रथमारोपयच्चैनंसर्वसैन्यस्यपश्यतः ॥ ३३ ॥ तथैवशकुनिःशूरःस्यालस्तवविशांपते ॥ आरोपयद्रथंतूर्णंगौतमंरथिनांवरम् ॥ ३४ ॥ सौमदत्तिंतथाकृद्धोधृष्टकेतुर्महाबलः ॥ नवत्यासायकैःक्षिप्रंराजन्विव्याधवक्षसि ॥ ३५ ॥ सौमदत्तिरुरस्थैस्तैर्भृशंबाणैरशोभत ॥ मध्यंदिनेमहाराजरश्मिभिस्तपनोयथा ॥ ३६ ॥ भूरिश्रवास्तुसमरेधृष्टकेतुंमहारथम् ॥ हतसूतहयंचक्रेविरथंसायकोत्तमैः ॥ ३७ ॥ विरथंतंसमालोक्यद्रवाश्वंहतसारथिम् ॥ महताशरवर्षेणच्छादयामाससंयुगे ॥ ३८ ॥ सतुतंरथमुत्सृज्यधृष्टकेतुर्महामनाः ॥ आरुरोहततोयानंशतानीकस्यमारिष ॥ ३९ ॥ चित्रसेनोविकर्णश्चराजन् दुर्मर्षणस्तथा ॥ रथिनोहेमसन्नाहाःसौभद्रमभिदुद्रुवुः ॥ ४० ॥ अभिमन्योस्ततस्तैस्तुघोरंयुद्धमवर्तत ॥ शरीरस्ययथाराजन्वातपित्तकफैस्त्रिभिः ॥ ४१ ॥ विरथांस्तवपुत्रांस्तुकृत्वाराजन्महाहवे ॥ नजघाननरव्याघ्रःस्मरन्भीमवचस्तदा ॥ ४२ ॥ ततोराज्ञांबहुशतैर्गजाश्वरथयायिभिः ॥ संवृतंसमरेभीष्मंदेवैरपिदुरासदम् ॥ ४३ ॥ प्रयांतंशीघ्रमुद्वीक्ष्यपरित्रातुंसुतांस्तव ॥ अभिमन्युंसमुद्दिश्यबालमेकंमहारथम् ॥ ४४ ॥ वासुदेवमुवाचेदंकौंतेयःश्वेतवाहनः ॥ चोदयाश्वान्हृषीकेशयत्रैतेबहुलारथाः ॥ ४५ ॥ एतेहिबहवःशूराःकृतास्त्रायुद्धदुर्मदाः ॥ यथाहन्युर्ननःसेनांतथामाधवचोदय ॥ ४६ ॥ एवमुक्तःसवार्ष्णेयःकौंतेयेनामितौजसा ॥ रथंश्वेतहयैर्युक्तंप्रेषयामाससंयुगे ॥ ४७ ॥ निष्टानकोमहानासीत्तवसैन्यस्यमारिष ॥ यदर्जुनोरणेकुद्धःसंयातस्तावकान्प्रति ॥ ४८ ॥ समासाद्यतुकौंतेयोराज्ञस्तान्भीष्मरक्षिणः ॥ सुशर्माणमथोराजन्निदंवचनमब्रवीत् ॥ ४९ ॥ जानामित्वांयुधांश्रेष्ठमत्यंतंपूर्ववैरिणम् ॥ अनयस्याद्यसंप्राप्तंफलंपश्यसुदारुणम् ॥ ५० ॥ अद्यतेदर्शयिष्यामिपूर्वप्रेतान्पितामहान् ॥ एवंसंजल्पतस्तस्यवीभत्सोःशत्रुघातिनः ॥ ५१ ॥ श्रुत्वापिपरुषंवाक्यंसुशर्मारथयूथपः ॥ नचैनमब्रवीत्किंचिच्छुभंवायदिवाशुभम् ॥ ५२ ॥ अभिगम्यार्जुनंवीरंराजभिर्बहुभिर्वृतः ॥ पुरस्तात्पृष्ठतश्चैवपार्श्वतश्चैवसर्वतः ॥ ५३ ॥ परिवार्यार्जुनंसंख्येतवपुत्रैर्महारथः ॥ शरैः संछादयामासमेघैरिवदिवाकरम् ॥ ५४ ॥ ततःप्रवृत्तःसुमहान्संग्रामःशोणितोदकः ॥ तावकानांचसर्वेषांपांडवानांचभारत ॥ ५५ ॥ ॥ इतिश्रीमहाभारते भीष्मपर्वणिभीष्मवधप० समरयुद्धदिवसेसुशर्मार्जुनसमागमेचतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ सताड्यमानस्तुशरैर्धनंजयःपदाहतोनागइवश्वसन्बली ॥ बाणेनबाणेनमहारथानांचिच्छेदचापानिरणेप्रसह्य ॥ १ ॥

॥ १४४ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

संछिद्यचापानिचतानिराज्ञांतिष्ठांरणेवीर्यवतांक्षणेन ॥ विव्याधवाणैर्युगपन्महात्मानिःशेषतांतेष्वथमन्यमानः ॥ २ ॥ निपेतुराजौरुधिरप्रदिग्धास्तेताडिताः शक्रसुतेनराजन् ॥ विभिन्नगात्राःपतितोत्तमांगागतासवश्छिन्नतनुत्रकायाः ॥ ३ ॥ महींगताःपार्थबलाभिभूताविचित्ररूपायुगपद्विनेशुः ॥ दृष्ट्वाहतांस्तान् युधिराजपुत्रांस्त्रिगर्तराजःप्रययौरथेन ॥ ४ ॥ तेषांरथानामथपृष्ठगोपाद्वात्रिंशदन्येभ्यपतंतपार्थम् ॥ तथैवतेतंपरिवार्यपार्थंविरुध्यचापानिमहारवाणि ॥ ५ ॥ अवीवृषन्बाणमहौघवृष्ट्यायथागिरिंतोयधराजलौघैः ॥ संपीड्यमानस्तुशरौघवृष्ट्याधनंजयस्तान्युधिजातरोषः ॥ ६ ॥ षष्ट्याशरैःसंयतितैलधौतैर्जघान तानप्यथपृष्ठगोपान् ॥ रथांश्चतांस्तानवजित्यसंख्येधनंजयःप्रीतमनायशस्वी ॥ ७ ॥ अथात्वरद्भीष्मवधायजिष्णुर्बलानिराजन्समरेनिहत्य ॥ त्रिगर्तराजोनि हतान्समीक्ष्यमहात्मनातानथबंधुवर्गान् ॥ ८ ॥ रणेपुरस्कृत्यनराधिपांस्तान्जगामपार्थंत्वरितोवधाय ॥ अभिद्रुतंचास्रभृतांवरिष्ठंधनंजयंवीक्ष्यशिखंडिमुख्याः ॥ ९ ॥ अभ्युद्ययुस्तेशितशस्त्रहस्तारिरक्षिषंतोरथमर्जुनस्य ॥ पार्थोपितानापततःसमीक्ष्यत्रिगर्तराज्ञासहितान्वबीरान् ॥ १० ॥ विध्वंसयित्वासमरेधनुष्मन्गांडीवमुक्तैर्निशितैःपृषत्कैः ॥ भीष्मंययासुर्युधिसंददर्शदुर्योधनंसैंधवादींश्चराज्ञः ॥ ११ ॥ संवारयिष्णूनभिवारयित्वामुहूर्तमायोध्यबलेनवीरः ॥ उत्सृज्यराजानमनंतवीर्योजयद्रथादींश्चनृपान्महौजाः ॥ १२ ॥ ययौततोभीमबलोमनस्वीगांगेयमाजौशरचापपाणिः ॥ युधिष्ठिरश्चप्रबलोमहात्मासमाययौ त्वरितोजातकोपः ॥ १३ ॥ मद्राधिपंसमभित्यज्यसंख्येस्वभागमासंतमनंतकीर्त्तिः ॥ सार्धंसमाद्रीसुतभीमसेनैर्भीष्मंययौशांतनवंरणाय ॥ १४ ॥ तैःसंप्रयुक्तैःसमहारथाग्र्यैर्गंगासुतःसमरेचित्रयोधी ॥ नविव्यथेशांतनवोमहात्मासमागतैःपांडुसुतैःसमस्तैः ॥ १५ ॥ अथैत्यराजायुधिसत्यसंधोजयद्रथोत्युग्रबलोमनस्वी ॥ चिच्छेदचापानिमहारथानांप्रसह्यतेषांधनुषावरेण ॥ १६ ॥ युधिष्ठिरंभीमसेनंयमौचपार्थंरुष्णंयुधिसंजातकोपः ॥ दुर्योधनःक्रोधविषोमहात्माजघानबाणैरनलप्रकाशैः ॥ १७ ॥ कृपेणशल्येनशलेनचैवतथाविभोचित्रसेनेनचाजौ ॥ विद्धाःशरैस्तेतिविदद्धकोपैर्देवायथादैत्यगणैःसमेतैः ॥ १८ ॥ छिन्ना युधंशांतनवेनराजाशिखंडिनंप्रेक्ष्यचजातकोपः ॥ अजातशत्रुःसमरेमहात्माशिखंडिनंकुद्धउवाचवाक्यम् ॥ १९ ॥ उक्त्वातथात्वंपितुरग्रतोमामहंहनिष्यामि महाव्रतंतम् ॥ भीष्मंशरौघैर्विमलार्कवर्णैःसत्यंवदामीतिकृतांप्रतिज्ञा ॥ २० ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ अज्ञायमानेपश्चात्स्थिते ॥ २५ ॥ प्रत्यादेशंभर्त्सनं ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

त्वयाचनैनांसफलांकरोषिदेववृतंयन्निहंसियुद्धे ॥ मिथ्याप्रतिज्ञोभवमात्रवीररक्षस्वधर्मंस्वकुलंयशश्च ॥ २१ ॥ प्रेक्षस्वभीष्मंयुधिभीमवेगंसर्वास्तपंतंमम सैन्यसंघान् ॥ शरौघजालैरतितिग्मवेगैःकालंयथाकालकृतंक्षणेन ॥ २२ ॥ निकृत्तचापःसमरेनपेक्षःपराजितःशांतनवेनचाजौ ॥ विहायवंधूनथसोदरांश्चक्रयास्यसेनानुरूपंतवेदम् ॥ २३ ॥ दृष्ट्वाहिभीष्मंतमनंतवीर्यंभग्नंचसैन्यंद्रवमाणमेवम् ॥ भीतोसिनूनंद्रुपदस्यपुत्रतथाहितेमुखवर्णोप्रहृष्टः ॥ २४ ॥ अज्ञायमानेचधनंजयेपिमहाहवेसंप्रसक्तेनृवीरे ॥ कथंहिभीष्मात्प्रथितःपृथिव्यांभयंत्वमद्यप्रकरोषिवीर ॥ २५ ॥ सधर्मराजस्यवचोनिशम्यरूक्षाक्षरंविप्रलापानुवद्धम् ॥ प्रत्यादेशंमन्यमानोमहात्माप्रतत्वरेभीष्मवधायराजन् ॥ २६ ॥ तमापतंतंमहताजवेनशिखंडिनंभीष्ममभिद्रवंतम् ॥ निवारयामासहिशल्यएनमस्रेणघोरेण सुदुर्जयेन ॥ २७ ॥ सचापिदृष्ट्वासमुदीर्यमाणमस्त्रंयुगांताग्निसमप्रकाशम् ॥ नसंमुमोहद्रुपदस्यपुत्रोराजन्महेंद्रप्रतिमप्रभावः ॥ २८ ॥ तस्यौचतत्रैवमहाधनुष्मान्शरैस्तदस्त्रंप्रतिबाधमानः ॥ अथाददेवारुणमन्यदस्त्रंशिखंड्यथोग्रंप्रतिघातमस्य ॥ २९ ॥ तदस्त्रमस्त्रेणविदार्यमाणंखस्थाःसुरादद्दशुःपार्थिवाश्च ॥ भीष्मस्तु राजन्समरेमहात्माधनुश्चचित्रंध्वजमेवचापि ॥ ३० ॥ छित्त्वानदत्पांडुसुतस्यवीरोयुधिष्ठिरस्याजमीढस्यराज्ञः ॥ ततःसमुत्सृज्यधनुःसबाणंयुधिष्ठिरंवीक्ष्यभयाभिभूतम् ॥ ३१ ॥ गदांप्रगृह्याभिपपातसंख्येजयद्रथंभीमसेनःपदातिः ॥ तमापतंतंसहसाजवेनजयद्रथःसगदंभीमसेनम् ॥ ३२ ॥ विव्याधघोरैर्यमदंडकल्पैः शितैःशरैःपंचशतैःसमंतात् ॥ अर्चितयित्वासशरांस्तरस्वीवृकोदरःक्रोधपरीतचेताः ॥ ३३ ॥ जघानवाहान्समरेसमंतात्पारावतान्सिंधुराजस्यसंख्ये ॥ ततोभिवीक्ष्याप्रतिमप्रभावस्तवात्मजस्त्वरमाणोरथेन ॥ ३४ ॥ अभ्याययौभीमसेनंनिहंतुंसमुद्यतास्त्रोसुरराजकल्पः ॥ भीमोप्यथैनंसहसाविनेद्यप्रत्युद्ययौ गदयातर्जयानः ॥ ३५ ॥ समुद्यतांतांयमदंडकल्पांदृष्ट्वागदांतेकुरवःसमंतात् ॥ विहायसर्वेतवपुत्रमुग्रंपातंगदायाःपरिहर्तुकामाः ॥ ३६ ॥ अपक्रांतास्तुमुलेसंप्रमर्देसुदारुणेभारतमोहनीये ॥ अमूढचेतास्त्वथचित्रसेनोमहागदामापततींनिरीक्ष्य ॥ ३७ ॥ रथंस्वमुत्सृज्यपदातिराजौप्रगृह्यखड्गंविपुलंचचर्म ॥ अवप्लुतःसिंहइवाचलाग्राज्जगामाग्र्यंभूमिपभूमिदेशम् ॥ ३८ ॥ गदापिसाप्राप्यरथंसुचित्रंसाश्वंससूतंविनिहत्यसंख्ये ॥ जगामभूमिंज्वलितामहोल्काप्रघ्नंश्वराद्रा मिवसंपतंती ॥ ३९ ॥

॥ ४० ॥ इतिश्री० नै० भा० पंचाशीतितमोऽध्यायः ॥ ८५ ॥ ॥७॥ ॥ विरथमिति ॥ १ ॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११ ॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥२३ ॥

आश्चर्यभूतंसुमहत्त्वदीयादृष्ट्वैवतद्भारतसंप्रहृष्टाः ॥ सर्वेविनेदुःसहिताःसमंतात्पूपूजिरेतवपुत्रस्यशौर्यम्॥ ४० ॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवध प०सप्तमयुद्दिवसेपंचाशीतितमोऽध्यायः॥८५॥ ॥७॥ ॥संजयउवाच॥ ॥विरथंतंसमासाद्यचित्रसेनंयशस्विनम्॥ रथमारोपयामासविकर्णस्तनयस्तव ॥ १॥ तस्मिंस्तथावर्तमानेतुमुले संकुलेभृशम् ॥ भीष्मःशांतनवस्तूर्णंयुधिष्ठिरमुपाद्रवत् ॥ २॥ ततःसरथनागाश्वाःसमकंपंतसृंजयाः॥ मृत्योरास्यमनुप्राप्तंमेनिरेचयुधिष्ठिरम्॥३॥युधिष्ठिरोपिकौरव्योयमाभ्यांसहितःप्रभुः॥ महेष्वासंनरव्याघ्रंभीष्मंशांतनवंययौ॥४॥ ततःशरसहस्राणिप्रमुंचन्पांडवो युधि॥ भीष्मंसंछादयामाससयथामेघोदिवाकरम्॥५॥ तेनसम्यक्प्रणीतानिशरजालानिमारिष॥ प्रतिजग्राहगांगेयःशतशोथसहस्रशः॥६॥ तथैवशरजालानिभीष्मेणास्तानिमारिष॥ आकाशेसमदृश्यंतखगमानांव्रजाइव॥७॥ निमेषार्धेनकौंतेयंभीष्मःशांतनवोयुधि ॥ अदृश्यंसमरेचक्रेशरजालेनभागशः॥ ॥८॥ततोयुधिष्ठिरोराजाकौरव्यस्यमहात्मनः ॥ नाराचंप्रेषयामासकुद्धआशीविषोपमम्॥ ९॥ असंप्राप्ततस्तंतुक्षुरप्रेणमहारथः॥ चिच्छेदसमरेराजन्भीष्मस्यधनुश्च्युतम्॥ १०॥ तंतुच्छित्वारणेभीष्मोनाराचंकालसंमितम्॥ निजघ्नेकौरवेंद्रस्यहयान्कांचनभूषणान् ॥ ११॥ हताश्वंतुरथंत्यक्त्वाधर्मपुत्रोयुधिष्ठिरः॥ आरुरोहरथंतूर्णंनकुलस्यमहात्मनः॥१२॥ यमावपिहिसंक्रुद्धःसमासाद्यरणेतदा॥ शरैःसंछादयामासभीष्मःपरपुरंजयः॥ १३॥ तौतुदृष्ट्वामहाराजभीष्मबाणप्रपीडितौ॥ जगामपरमांचिंतांभीष्मस्यवधकांक्षया॥ १४॥ ततोयुधिष्ठिरोवश्यान्राज्ञस्तान्समचोदयत् ॥ भीष्मंशांतनवंसर्वेनिहतेतिसुहृद्गणान्॥ ॥१५॥ ततस्तेपार्थिवाःसर्वेश्रुत्वापार्थस्यभाषितम्॥ महतारथवंशेनपरिवव्रुःपितामहम्॥ १६॥ ससमंतात्परिवृतःपितादेवव्रतस्तव ॥ चिक्रीडधनुषाराजन् पातयानोमहारथान्॥ १७॥ तंचरंतंरणेपार्थादृष्ट्वशुःकौरवंयुधि ॥ मृगमध्यंप्रविश्येवयथासिंहशिशुंवने ॥ १८ ॥ तर्जयानंरणेवीरांस्त्रासयानंचसायकैः॥ दृष्ट्वात्रेसुर्महाराजसिंहंमृगगणाइव॥ १९॥ रणेभारतसिंहस्यदृष्ट्वशुःक्षत्रियागतिं॥ अग्नेर्वायुसहायस्ययथाकक्षंदिधक्षतः ॥ २०॥ शिरांसिरथिनांभीष्मःपातयामाससंयुगे॥ तालेभ्यःपरिपक्वानिफलानिकुशलोनरः॥ २१॥ पतद्भिश्चमहाराजशिरोभिर्धरणीतले ॥ बभूवतुमुलःशब्दःपततामश्मनामिव ॥ २२॥ तस्मिन्सुतुमुलेयुद्धेवर्तमानेभयानके॥ सर्वेषामेवसैन्यानामासीद्व्यतिकरोमहान्॥ २३ ॥

॥ १४६ ॥

॥ २४ ॥ २५॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

भिन्नेपुतेपुव्यूहेषुक्षत्रियाइतरेतरम्॥ एकमेकंसमाहूययुद्धायैवावतस्थिरे॥२४॥ शिखंडीतुसमासाद्यभरतानांपितामहम्॥ अभिदुद्राववेगेनतिष्ठतिष्ठेतिचाब्रवीत्॥ २५॥ अनादृत्यततोभीष्मस्तंशिखंडिनमाहवे॥ प्रययौसृंजयान्कुद्धःस्त्रीत्वंचित्यशिखंडिनः॥२६॥स्तंजयास्तुततोदृष्ट्वाहृष्टभीष्मंमहारणे॥सिंहनादांश्च विविधांश्चक्रुःशंखविमिश्रितान्॥२७॥ततःप्रवव्रतेयुद्धंव्यतिषक्तरथद्विपम्॥ पश्चिमांदिशमासाद्यस्थितेसवितरिप्रभौ॥ २८॥ धृष्टद्युम्नोयपांचाल्यःसात्यकिश्च महारथः॥ पीड्यंतौभृशंसैन्यंशक्तितोमरवृष्टिभिः॥ २९ ॥ शस्त्रैश्चवद्रुभीराजन्जघ्नतुस्तावकान्रणे॥ तेहन्यमानाःसमरेतावकाभरतर्षभ॥ ३० ॥आर्यायुद्धे मतिंकृत्वानत्यजंतिस्मसंयुगम्॥यथोत्साहंतुसमरेनिजघ्नुस्तावकारणे॥३१॥ तत्राक्रंदोमहानासीत्तावकानांमहात्मनाम्॥ वध्यतांसमरेराजन्पार्षतेनमहात्मना॥ ३२॥ तंश्रुत्वानिनदंघोरंतावकानांमहारथौ॥ विंदानुविंदावावंत्यौपार्षतंप्रत्युपस्थितौ॥ ३३॥ तौतस्यतुरगान्हत्वात्वरमाणौमहारथौ॥ छादयामासतुरुभौशरवर्षेणपार्षतम्॥ ३४॥ अवप्लुत्याथपांचाल्योरथात्तूर्णंमहाबलः॥ आरुरोहरथंतूर्णंसात्यकेस्तुमहात्मनः॥ ३५ ॥ ततोयुधिष्ठिरोराजामहत्यासेनयावृतः॥ आवंत्यौसमरेक्रुद्धावभ्ययात्सपरंतपौ॥ ३६ ॥ तथैवतवपुत्रोपिसर्वोद्योगेनमारिष ॥ विंदानुविंदौसमरेपरिवार्यावतस्थिवान्॥ ३७॥ अर्जुनश्चापिसंकुद्धःक्षत्रियान्क्षत्रियर्षभः॥ अयोधयतसंग्रामेवज्रपाणिरिवासुरान्॥ ३८॥ द्रोणस्तुसमरेक्रुद्धःपुत्रस्यप्रियकृत्तव॥ व्यधमत्सर्वपंचालांस्तूलराशिमिवानलः॥ ३९॥ दुर्योधनपुरोगास्तुपुत्रास्तवविशांपते॥ परिवार्यरणेभीष्मंयुयुधुःपांडवैःसह ॥ ४० ॥ ततोदुर्योधनोराजालोहितायतिभास्करे॥ अब्रवीत्तावकान्सर्वांस्त्वरध्वमितिभारत॥ ४१॥ युध्यतांतुतथातेषांकुर्वतांकर्मदुष्करम्॥ अस्तंगिरिमथारूढेअप्रकाशतिभास्करे॥ ४२॥ प्रावर्ततनदीघोराशोणितौघतरंगिणी॥ गोमायुगणसंकीर्णाक्षणेनक्षणदामुखे॥ ४३॥ शिवाभिरशिवाभिश्चरुद्रिभैरवंरवम्॥ घोरमायोधनंजज्ञेभूतसंघैःसमाकुलम्॥ ४४॥ राक्षसाश्चपिशाचाश्चतथान्येपिशिताशिनः॥ समंततोव्यदृश्यंतशतशोथसहस्रशः॥ ४५॥ अर्जुनोथसुशर्मादीन्राज्ञस्तान्सपदानुगान्॥ विजित्यधृतनामध्येययौस्वशिबिरंप्रति॥ ४६॥ युधिष्ठिरोपिकौरव्योभ्रातृभ्यांसहितस्तथा॥ ययौस्वशिबिरंराजानिशायांसेनयावृतः॥ ४७॥ भीमसेनोपिराजेंद्रदुर्योधनमुखान्रथान्॥ अवजित्यततःसंख्येययौस्वशिबिरंप्रति॥ ४८॥ दुर्योधनोपिनृपतिःपरिवार्यमहारणे॥ भीष्मंशांतनवंतूर्णंप्रयातःशिबिरंप्रति॥ ४९॥

॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ॥ इतिश्री०नै०भा०षड्शीतितमोऽध्यायः ॥ ८६ ॥ ॥ ७ ॥ ॥ परिणाम्यगमयित्वा ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

द्रोणोद्रौणिःकृपःशल्यःकृतवर्माचसात्वतः ॥ परिवार्यचमूंसर्वांप्रययुःशिबिरंप्रति ॥ ५० ॥ तथैवसात्यकीराजन्धृष्टद्युम्नश्चपार्षतः ॥ परिवार्यरणेयोधान्व्रयतुः शिबिरंप्रति ॥ ५१ ॥ एवमेतेमहाराजतावकाःपांडवैःसह ॥ पर्यवर्ततसहितानिशाकालेपरंतप ॥ ५२ ॥ ततःस्वशिबिरंगत्वापांडवाःकुरवस्तथा ॥ न्यवसंतमहाराजपूजयंतःपरस्परम् ॥ ५३ ॥ रक्षांकृत्वाततःशूरान्यस्यगुल्मान्यथाविधि ॥ अपनीयचशल्यानिस्नात्वाचविविधैर्जलैः ॥ ५४ ॥ कृतस्वस्त्ययनाःसर्वेसंस्तूयंतश्चबंदिभिः ॥ गीतवादित्रशब्देनव्यक्रीडंतयशस्विनः ॥ ५५ ॥ मुहूर्तादिवतत्सर्वमभवत्स्वर्गसन्निभम् ॥ नहियुद्धकथांकांचित्तत्राकुर्वन्महारथाः ॥ ५६ ॥ तेप्रसुप्तेबलेतत्रपरिश्रांतजनेनृप ॥ हस्त्यश्वबहुलेरात्रौप्रेक्षणीयेबभूवतुः ॥ ५७ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्व०सप्तमदिवसयुद्धावहारेषडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ परिणाम्यनिशांतांतुसुखंप्राप्याजनेश्वराः ॥ कुरवःपांडवाश्चैवपुनर्युद्धायनिर्ययुः ॥ १ ॥ ततःशब्दोमहानासीत्सैन्ययोरुभयोर्नृप ॥ निर्गच्छमानयोःसंख्येसागरप्रतिमोमहान् ॥ २ ॥ ततोदुर्योधनोराजाचित्रसेनोविविंशतिः ॥ भीष्मश्चरथिनांश्रेष्ठोभारद्वाजश्चवैनृप ॥ ३ ॥ एकीभूताःसुसंयत्ताःकौरवाणांमहाचमूम् ॥ व्यूहायविदधूराजन्पांडवान्प्रतिदंशिताः ॥ ४ ॥ भीष्मःकृत्वामहाव्यूहंपितातवविशांपते ॥ सागरप्रतिमंघोरंवाहनोर्मितरंगिणम् ॥ ५ ॥ अग्रतःसर्वसैन्यानांभीष्मःशांतनवोययौ ॥ मालवैर्दाक्षिणात्यैश्चआवंत्यैश्चसमन्वितः ॥ ६ ॥ ततोनंतरमेवासीद्द्रोणाद्रारद्वाजःप्रतापवान् ॥ कुलिंदैःपारदैश्चैवतथाक्षुद्रकमालवैः ॥ ७ ॥ द्रोणादनंतरंयत्तोभगदत्तःप्रतापवान् ॥ मगधैश्चकलिंगैश्चपिशाचैश्चविशांपते ॥ ८ ॥ प्राग्ज्योतिषादनुनृपःकौसल्योथबृहद्बलः ॥ मेकलैःकुरुविंदैश्चत्रैपुरैश्चसमन्वितः ॥ ९ ॥ बृहद्बलात्ततःशूरस्त्रिगर्तःप्रस्थलाधिपः ॥ कांबोजैर्बहुभिःसार्धंयवनैश्चसहस्रशः ॥ १० ॥ द्रौणिस्तुरभसःशूरस्त्रैगर्तादनुभारत ॥ प्रययौसिंहनादेननादयानोधरातलम् ॥ ११ ॥ तथासर्वेणसैन्येनराजादुर्योधनस्तदा ॥ द्रौणेरनंतरंप्रायात्सोदर्यैःपरिवारितः ॥ १२ ॥ दुर्योधनादनुततःकृपःशारद्वतोययौ ॥ एवमेषमहाव्यूहःप्रययौसागरोपमः ॥ १३ ॥ रेजुस्तत्रपताकाश्चश्वेतच्छत्राणिवाविभो ॥ अंगदान्यत्रचित्राणिमहार्हाणिधनूंषिच ॥ १४ ॥ तंतुदृष्ट्वामहाव्यूहंतावकानांमहारथः ॥ युधिष्ठिरोब्रवीत्तूर्णंपार्षतंधृतनापतिम् ॥ १५ ॥ पश्यव्यूहंमहेष्वासनिर्मितंसागरोपमम् ॥ प्रतिव्यूहंत्वमपिहिकुरुपार्षतसत्वरम् ॥ १६ ॥

॥ १४७ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

शृंगाटकंचतुष्पथाकारं ॥ १७ ॥ शृंगाभ्यांशृंगयोः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

ततःसपार्षतःक्रूरोव्यूहंचक्रेसुदारुणम् ॥ शृंगाटकंमहाराजपरव्यूहविनाशनम् ॥ १७ ॥ शृंगाभ्यांभीमसेनश्चसात्यकिश्चमहारथः ॥ रथैरनेकसाहस्रैस्तथाहयपदातिभिः ॥ १८ ॥ ताभ्यांबभौनरश्रेष्ठःश्वेताश्वःकृष्णसारथिः ॥ मध्येयुधिष्ठिरोराजामाद्रीपुत्रौचपांडवौ ॥ १९ ॥ अथोत्तरेमहेष्वासाःसहसैन्यानराधिपाः ॥ व्यूहंतंपूरयामासुर्व्यूहशास्त्रविशारदाः ॥ २० ॥ अभिमन्युस्ततःपश्चाद्विराटश्चमहारथः ॥ द्रौपदेयाश्चसंहृष्टाराक्षसश्चघटोत्कचः ॥ २१ ॥ एवमेतंमहाव्यूहंव्यूह्यभारतपांडवाः ॥ अतिष्ठन्समरेशूरायोद्धुकामाजयैषिणः ॥ २२ ॥ भेरीशब्दैश्चविमलैर्विमिश्रैःशंखनिःस्वनैः ॥ क्ष्वेडितास्फोटितोत्कुष्टैर्नादिताःसर्वतोदिशः ॥ २३ ॥ ततःशूराःसमासाद्यसमरेतेपरस्परम् ॥ नेत्रैरनिमिषैराजन्नवैक्षंतपरस्परम् ॥ २४ ॥ नामभिस्तेमनुष्येंद्रपूर्वंयोधाःपरस्परम् ॥ युद्धायसमवर्ततसमाहूयेतरेतरम् ॥ २५ ॥ ततःप्रववृतेयुद्धंघोररूपंभयावहम् ॥ तावकानांपरेषांचनिघ्नतामितरेतरम् ॥ २६ ॥ नाराचानिशिताःसंख्येसंपतंतिस्मभारत ॥ व्यात्तानन्नाभयकराउरगाइवसंघशः ॥ २७ ॥ निष्पेतुर्विमलाःशक्त्यस्तैलधौताःसुतेजनाः ॥ अंबुदेभ्योयथाराजन्भ्राजमानाःशतह्रदाः ॥ २८ ॥ गदाश्चविमलैःपट्टैःपिनद्धाःस्वर्णभूषितैः ॥ पतंत्यस्तत्रदृश्यंतेगिरिशृंगोपमाःशुभाः ॥ २९ ॥ निस्त्रिंशाश्चव्यदृश्यंतविमलांबरसंनिभाः ॥ आर्षभाणिविचित्राणिशतचंद्राणिभारत ॥ ३० ॥ अशीर्यंतरणेराजन्पात्यमानानिसर्वशः ॥ तेन्योन्यंसमरेसेनेयुध्यमानेनराधिप ॥ ३१ ॥ अशोभंतायथादेवदैत्यसेनेसमुद्यते ॥ अभ्यद्रवंतसमरेतेऽन्योन्यंवैसमंततः ॥ ३२ ॥ रथास्तुरथिभिस्तूर्णंप्रेषिताःपरमाहवे ॥ युगैर्युगानिसंश्लिष्ययुयुधुःपार्थिवर्षभाः ॥ ३३ ॥ दंतिनांयुध्यमानानांसंघर्षात्पावकोऽभवत् ॥ दंतेषुभरतश्रेष्ठ सधूमःसर्वतोदिशम् ॥ ३४ ॥ प्रासैरभिहताःकेचिद्गजयोधाःसमंततः ॥ पतमानाःस्मदृश्यंतेगिरिशृंगान्नगाइव ॥ ३५ ॥ पादाताश्चाप्यदृश्यंतनिघ्नंतोऽथपरस्परम् ॥ चित्ररूपधराःशूरानखरप्रासयोधिनः ॥ ३६ ॥ अन्योन्यंतेसमासाद्यकुरुपांडवसैनिकाः ॥ अस्त्रैर्नानाविधैर्घोरैरणेनिन्युर्यमक्षयम् ॥ ३७ ॥ ततःशांतनवोभीष्मोरथघोषेणनादयन् ॥ अभ्यागमद्रणेपार्थान्धनुःशब्देनमोहयन् ॥ ३८ ॥ पांडवानांरथाश्चापिनदंतोभैरवंस्वनम् ॥ अभ्यद्रवंतसंयत्ताधृष्टद्युम्नपुरोगमाः ॥ ३९ ॥ ततःप्रववृतेयुद्धंतवतेषांचभारत ॥ नराश्वरथनागानांव्यतिषक्तंपरस्परम् ॥ ४० ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०अष्टमदिवसयुद्धारंभेसप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ ७ ॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ॥ इतिश्री०नै०भा०सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ ७ ॥ ॥ ७ ॥

भीष्ममिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

॥ संजय उवाच ॥ ॥ भीष्मंतुसमरेक्रुद्धंप्रतपंतंसमंततः॥ नशेकुःपांडवाद्रष्टुंतपंतमिवभास्करम्॥ १॥ ततःसर्वाणिसैन्यानिधर्मपुत्रस्यशासनात्॥ अभ्यद्रवंत गांगेयंमर्दयंतंशितैःशरैः॥ २॥ सतुभीष्मोरणश्लाघीसोमकान्सहसृंजयान्॥ पंचालांश्चमहेष्वासान्यातयामाससायकैः॥ ३॥ तेवध्यमानाभीष्मेणपंचालाः सोमकैःसह॥ भीष्ममेवाभ्ययुस्तूर्णंत्यक्त्वाम्रत्युकृतंभयम्॥ ४॥ सतेषांरथिनांवीरोभीष्मःशांतनवोयुधि॥ चिच्छेदसहसाराजन्बाहूनथशिरांसिच॥ ५॥ वि रथान्रथिनश्चक्रेपितादेवव्रतस्तव॥ पतितान्युत्तमांगानिहयेभ्योहयसादिनाम्॥ ६॥ निर्मनुष्यांश्चमातंगान्शयानान्पर्वतोपमान्॥ अपश्यामहाराजभी ष्मास्त्रेणप्रमोहितान्॥ ७॥ ततत्रासीत्पुमान्कश्चित्पांडवानांविशांपते॥ अन्यत्ररथिनांश्रेष्ठाद्भीमसेनान्महाबलात्॥ ८॥ सहिभीष्मंसमासाद्यताडयामाससं युगे॥ ततोनिष्टानकोघोरोभीष्मभीमसमागमे॥ ९॥ बभूवसर्वसैन्यानांघोररूपोभयानकः॥ तथैवपांडवाहृष्टाःसिंहनादमथानदन्॥ १०॥ ततोदुर्योधनोरा जासोदर्यैःपरिवारितः॥ भीष्मंजुगोपसमरेवर्तमानेजनक्षये॥ ११॥ भीमस्तुसारथिंहत्वाभीष्मस्यरथिनांवरः॥ प्रद्रुताश्वेरथेतस्मिन्द्रवमाणेसमंततः॥ १२॥ सुनाभस्यशरेणाशुशिरश्चिच्छेदभारत॥ क्षुरप्रेणसुतीक्ष्णेनसहतोन्यपतद्भुवि॥ १३॥ हतेतस्मिन्महाराजतवपुत्रेमहारथे॥ नाभ्यपद्यंतरणेशूराःसोदराःसमसंयु गे॥ १४॥ आदित्यकेतुर्बह्वाशीकुंडधारोमहोदरः॥ अपराजितःपंडितकोविशालाक्षःसुदुर्जयः॥ १५॥ पांडवंचित्रसन्नाहाविचित्रकवचध्वजाः॥ अभ्यद्रवंत संग्रामेयोद्धुकामाःपरिमर्दनाः॥ १६॥ महोदरस्तुसमरेभीमंविव्याधपत्रिभिः॥ नवभिर्वज्रसंकाशैर्नमुचिंवत्रहायथा॥ १७॥ आदित्यकेतुःसप्तत्याबह्वाशीचापि पंचभिः॥ नवत्याकुंडधारश्चविशालाक्षश्चपंचभिः॥ १८॥ अपराजितोमहाराजपराजिष्णुर्महारथम्॥ शरैर्बहुभिरानर्च्छद्भीमसेनंमहाबलम्॥ १९॥ रणेपं डितकश्चैनंत्रिभिर्बाणैःसमार्पयत्॥ सतन्नमन्नृषेभीमःशत्रुभिर्वधमाहवे॥ २०॥ धनुःप्रपीड्यवामेनकरेणामित्रकर्शनः॥ शिरश्चिच्छेदसमरेशरेणानतपर्व णा॥ २१॥ अपराजितस्यसुनसंतवपुत्रस्यसंयुगे॥ पराजितस्यभीमेननिपपातशिरोमहीम्॥ २२॥ अथापरेणभल्लेनकुंडधारंमहारथम्॥ प्राहिणोन्मृत्युलो कायसर्वलोकस्यपश्यतः॥ २३॥ ततःपुनरमेयात्माप्रसंधायशिलीमुखम्॥ प्रेषयामाससमरेपंडितंप्रतिभारत॥ २४॥ सशरःपंडितंहत्वाविवेशधरणीतलम्॥ यथानरंनिहत्याशुभुजगःकालचोदितः॥ २५॥ विशालाक्षशिरश्छित्त्वापातयामासभूतले॥ त्रिभिःशरैरदीनात्मास्मरन्क्लेशंपुरातनम्॥ २६॥

॥ १४८ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ॥ इतिश्री० ने० भा० अष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ ७ ॥ दृष्टेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

महोदरंमहेष्वासंनाराचेनस्तनांतरे॥ विव्याधसमरेराजन्सहतोन्यपतद्भुवि॥ २७॥ आदित्यकेतोःकेतुंचच्छित्त्वाबाणेनसंयुगे॥ भल्लेनाहरतीक्ष्णेनशिरश्चिच्छे दभारत॥ २८॥ बह्वाशिनंततोभीमःशरेणानतपर्वणा॥ प्रेषयामाससंक्रुद्धोयमस्यसदनंप्रति॥ २९॥ प्रद्रुद्रुवुस्ततस्तेन्येपुत्रास्तवविशांपते॥ मन्यमानाहितत्स त्यंसभार्यांतस्यभाषितम्॥ ३०॥ ततोदुर्योधनोराजाभ्रातृव्यसनकर्शितः॥ अब्रवीत्तावकान्योधान्भीमोयंयुधिबध्यताम्॥ ३१॥ एवमेतेमहेष्वासाःपुत्रास्त वविशांपते॥ भ्रातॄन्संदृश्यनिहतान्प्रास्मरंस्तेहितद्वचः॥ ३२॥ यदुक्तवान्महाप्राज्ञःक्षत्ताहितमनामयम्॥ तदिदंसमनुप्राप्तंवचनंदिव्यदर्शिनः॥ ३३॥ लोभमो हसमाविष्टःपुत्रप्रीत्याजनाधिप॥ नबुध्यसेपुरायत्तत्तथ्यमुक्तंवचोमहत्॥ ३४॥ तयैवचवधार्थायपुत्राणांपांडवोबली॥ नूनंजातोमहाबाहुर्यथाहंतिस्मकौर वान्॥ ३५॥ ततोदुर्योधनोराजाभीष्ममासाद्यसंयुगे॥ दुःखेनमहताविष्टोविललापसुदुःखितः॥ ३६॥ निहताभ्रातरःशूराभीमसेनेनमेयुधि॥ यतमानास्तथा न्येपिहन्यंतेसर्वसैनिकाः॥ ३७॥ भवांश्चमध्यस्थतयानित्यमस्मानुपेक्षते॥ सोहंकुपथमारूढःपश्यदैवमिदंमम॥ ३८॥ एतच्छ्रुत्वावचःक्रूरंपितादेवव्रतस्तव॥ दुर्योधनमिदंवाक्यमब्रवीत्साश्रुलोचनः॥ ३९॥ उक्तमेतन्मयापूर्वंद्रोणेनविदुरेणच॥ गांधार्याचयशस्विन्यातत्त्वंतातनबुद्धवान्॥ ४०॥ समयश्चमयापूर्वंरु तावैशत्रुकर्शन॥ नाहंयुधिनियोक्तव्योनाप्याचार्यःकथंचन॥ ४१॥ यंयंहिधार्तराष्ट्राणांभीमोद्रक्ष्यतिसंयुगे॥ हनिष्यतिरणेनित्यंसत्यमेतद्ब्रवीमिते॥ ४२॥ स त्वंराजन्स्थिरोभूत्वारणेकृत्वाद्दढांमतिम्॥ योधयस्वरणेपार्थान्स्वर्गंकृत्वापरायणम्॥ ४३॥ नशक्याःपांडवाजेतुंसेंद्रैरपिसुरासुरैः॥ तस्माद्युद्धेस्थिरांकृत्वाम तिंयुध्यस्वभारत॥ ४४॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप० सुनाभादिधृतराष्ट्रपुत्रवधेऽष्टाशीतितमोऽध्यायः॥८८॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच॥ दृष्ट्वामेनिहतान्पुत्रान्बहूनेकेनसंजय॥ भीष्मोद्रोणःकृपश्चैवकिमकुर्वतसंयुगे॥ १॥ अहन्यहनिमेपुत्राःक्षयंगच्छंतिसंजय॥ मन्येहंसर्वथासूतदैवेनोपहता भृशम्॥ २॥ यत्रमेतनयाःसर्वेजीयंतेनजयंत्युत॥ यत्रभीष्मस्यद्रोणस्यकृपस्यचमहात्मनः॥ ३॥ सौमदत्तेश्चवीरस्यभगदत्तस्यचोभयोः॥ अश्वत्थाग्नस्तथाता तशूराणामनिवर्तिनाम्॥ ४॥ अन्येषांचैवशूराणांमध्यगास्तनयामम॥ यदहन्यंतसंग्रामेकिमन्यद्भागधेयतः॥ ५॥ नहिदुर्योधनोमंदःपुराप्रोक्तमबुध्यत॥ वार्यमाणोमयातातभीष्मेणविदुरेणच॥ ६॥ गांधार्याचैवदुर्मेधाःसततंहितकाम्यया॥ नाबुध्यतपुरामोहात्तस्यप्राप्तमिदंफलम्॥ ७॥

॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥२३॥२४॥ कूजतांअव्यक्तंध्वनतां स्तनतांउच्चैःशब्दायमानानां॥ २५॥२६॥ २७॥२८॥ २९॥ ३०॥३१॥३२॥३३॥

यद्भीमसेनःसमरेपुत्रान्ममविचेतसः॥ अहन्यहनिसंक्रुद्धोनयतेयमसादनम्॥८॥ ॥संजयउवाच॥ ॥इदंतत्समनुप्राप्तंक्षत्तुर्वचनमुत्तमम्॥ नवुद्धवानसिन्धि भोप्रोच्यमानंहितंतदा॥ ९॥ निवारयसुतान्द्यूतात्पांडवान्माह्वहेतिच॥ सुहृदांहितकामानांब्रुवतांतत्तदेवच॥ १०॥ नशुश्रूषसियद्वाक्यंमर्त्यःपथ्यमिवौषधम्॥ तदेवत्वांमनुप्राप्तंवचनंसाधुभाषितम्॥ ११॥ विदुरद्रोणभीष्माणांतथान्येषांहितैषिणाम्॥ अकृत्वावचनंपथ्यंक्षयंगच्छंतिकौरवाः॥ १२॥ तदेतत्समनुप्राप्तंपूर्वमेवविशांपते॥ तस्मात्त्वंशृणुतत्त्वेनयथायुद्धमवर्तत॥१३॥ मध्याह्नेसुमहारौद्रःसंग्रामःसमपद्यत॥ लोकक्षयकरोराजंस्तन्मेनिगदतःशृणु॥१४॥ततः सर्वाणिसैन्यानिधर्मपुत्रस्यशासनात्॥ संरब्धान्यभ्यवर्तंतभीष्ममेवजिघांसया॥ १५॥ धृष्टद्युम्नःशिखंडीचसात्यकिश्चमहारथः॥ युक्तानीकामहाराजभीष्ममेवसमभ्ययुः॥ १६॥ विराटोद्रुपदश्चैवसहिताःसर्वसोमकैः॥ अभ्यद्रवंतसंग्रामेभीष्ममेवमहारथम्॥ १७॥ केकयाधृष्टकेतुश्चकुंतिभोजश्चदंशितः॥ युक्तानीकामहाराजभीष्ममेवसमभ्ययुः॥ १८॥ अर्जुनोद्रौपदेयाश्चचेकितानश्चवीर्यवान्॥ दुर्योधनसमादिष्टान्राज्ञःसर्वान्समभ्ययुः॥ १९॥ अभिमन्युस्तथाशूरोहैडिंबश्चमहारथः॥ भीमसेनश्चसंक्रुद्धस्तेभ्यधावंतकौरवान्॥ २०॥ त्रिधाभूतैरवध्यंतपांडवैःकौरवायुधि॥ तथैवकौरवैराजन्नवध्यंतपरेरणे॥ २१॥ द्रोणस्तुरथिनःश्रेष्ठान्सोमकान्सृंजयैःसह॥ अभ्यधावतसंक्रुद्धःप्रेषयिष्यन्यमक्षयम्॥ २२॥ तत्राक्रंदोमहानासीत्सृंजयानांमहात्मनाम्॥ वध्यतांसमरेराजन् भारद्वाजेनधन्विना॥ २३॥ द्रोणेननिहतास्तत्रक्षत्रियावह्वोरणे॥ विचेष्टंतोत्यदृश्यंतव्याधिक्लिष्टानराइव॥ २४॥ कूजतांक्रंदतांचैवस्तनतांचैवभारत॥ अनिशंशुश्रुवेशब्दःक्षुत्क्लिष्टानांनृणामिव॥ २५॥ तथैवकौरवेयाणांभीमसेनोमहाबलः॥ चकारकदनंघोरंक्रुद्धःकालइवापरः॥ २६॥ वध्यतांतत्रसैन्यानामन्योन्येनमहारणे॥ प्रावर्ततनदीघोरारुधिरौघप्रवाहिनी॥ २७॥ ससंग्रामोमहाराजघोररूपोभवन्महान्॥ कुरूणांपांडवानांचयमराष्ट्रविवर्धनः॥ २८॥ ततोभीमोरणेकुद्धोरभसश्चविशेषतः॥ गजानीकंसमासाद्यप्रेषयामासस्वत्यवे॥ २९॥ तत्रभारतभीमेननाराचाभिहतागजाः॥ पेतुर्नेदुश्चसेदुश्चदिशश्चपरिबभ्रमुः॥ ३०॥ छिन्नहस्तामहानागाश्छिन्नगात्राश्चमारिष॥ क्रौंचवद्भनदन्भीताःपृथिवीमधिशेरते॥ ३१॥ नकुलःसहदेवश्चहयानीकमभिद्रुतौ॥ तेहयाःकांचनापीडारुक्मभांडपरिच्छदाः॥ ३२॥ वध्यमानाव्यदृश्यंतशतशोथसहस्रशः॥ पतद्भिस्तुरगैराजन्समास्तीर्यतमेदिनी॥ ३३॥

॥ १४९ ॥

॥३४॥ ३५॥ ३६॥ निष्कैरुरोभूषणैः॥ ३७॥ योक्त्रैरीषायोजनरज्जुभिः रश्मिभिरश्वबंधनरज्जुभिः॥ ३८॥ ३९॥ ४०॥ ॥ इतिभी०नै०भा०ऊननवतितमोऽध्यायः॥ ८९॥ ॥ ७ ॥

निर्जिह्वैश्चश्वसद्भिश्चकूजद्भिश्चगतासुभिः॥ हयैर्वभौनरश्रेष्ठनानारूपधरैर्धरा॥ ३४॥ अर्जुनेनहतैःसंख्येतथाभारतराजभिः॥ प्रवभौवसुधाघोरातत्रतत्र विशांपते॥ ३५॥ रथैर्भग्नैर्ध्वजैश्छिन्नैर्निकृत्तैश्चमहायुधैः॥ चामरैर्व्यजनैश्चैवच्छत्रैश्चसुमहाप्रभैः॥३६॥ हारैर्निष्कैःसकेयूरैःशिरोभिश्चसकुंडलैः॥ उष्णीषैरपविद्धैश्चपताकाभिश्चसर्वशः॥ ३७॥ अनुकर्षैःशुभैराजन्योक्त्रैश्चैवसरश्मिभिः॥ संकीर्णावसुधाभातिवसंतेकुसुमैरिव॥ ३८॥ एवमेषक्षयोवृत्तःपांडूनामंपिभारत॥ कुद्धेशांतनवेभीष्मेद्रोणेचरथसत्तमे॥ ३९॥ अश्वत्थाम्निकृपेचैवतथैवकृतवर्मणि॥ तथेतरेषुकुद्धेषुतावकानामपिक्षयः॥ ४०॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्व०अष्टमदिवसयुद्धेऊननवतितमोऽध्यायः॥ ८९॥ ॥७॥ ॥संजयउवाच॥ ॥वर्तमानेतथारौद्रेराजन् वीरवरक्षये॥ शकुनिःसौबलःश्रीमान्पांडवान्समुपाद्रवत्॥ १॥ तथैवसात्वतोराजन्हार्दिक्यःपरवीरहा॥ अभ्यद्रवतसंग्रामेपांडवानांवरूथिनीम्॥ २॥ ततःकांबोजमुख्यानांनदीजानांचवाजिनाम्॥ आरट्टानांमहीजानांसिंधुजानांचसर्वशः॥ ३॥ वनायुजानांशुभ्राणांतथापर्वतवासिनाम्॥ वाजिनांबहुभिःसंख्येसमंतात्परिवारयन्॥ ४॥ येचापरेतित्तिरिजाजवनावातरंहसः॥ सुवर्णालंकृतैरेतैर्वर्मवद्भिःसुकल्पितैः॥ ५॥ हयैर्वातजवैर्मुख्यैःपांडवस्यसुतोबली॥ अभ्यवर्ततततस्तैन्यंहृष्टरूपःपरंतपः॥ ६॥ अर्जुनस्यसुतःश्रीमानिरावान्नामवीर्यवान्॥ स्नुषायांनागराजस्यजातःपार्थेनधीमता॥७॥ ऐरावतेनसादत्तानअनपत्या महात्मना॥ पत्यौहतेसुपर्णेनकृपणादीनचेतना॥ ८॥ भार्यार्थंतांचजग्राहपार्थःकामवशानुगाम्॥ एवमेषसमुत्पन्नःपरक्षेत्रेर्जुनात्मजः॥ ९॥ सनागलोकेसंवृद्धोमात्राचपरिरक्षितः॥ पितृव्येणपरित्यक्तःपार्थद्वेषाद्दुरात्मना॥ १०॥ रूपवान्बलसंपन्नोगुणवान्सत्यविक्रमः॥ इंद्रलोकंजगामाशुश्रुत्वातत्रार्जुनंगतं॥ ११॥ सोभिगम्यमहाबाहुःपितरंसत्यविक्रमः॥ अभ्यवादयदव्यग्रोविनयेनकृतांजलिः॥ १२॥ न्यवेदयतचात्मानमर्जुनस्यमहात्मनः॥ इरावानस्मिभद्रंते पुत्रश्चाहंतवप्रभो॥ १३॥ मातुःसमागमोयश्चतत्सर्वंप्रत्यवेदयत्॥ तच्चसर्वंयथावृत्तमनुसस्मारपांडवः॥ १४॥

वर्तमानइति॥१॥ २॥ वाजिनांवेगवतांवाजिनामश्वानांबहुभिर्गणैःपरिवारयन्तितिगणशब्दाध्याहारेणद्वयोःसंबंधः॥ ३॥ ४॥ ५॥ पांडवस्यार्जुनस्य सुतइरावान्॥ ६॥ नागराजस्यऐरावतस्य॥७॥ ८॥ ९॥ पितृव्येणअश्वसेनेन॥ १०॥ ११॥ १२॥ १३॥ १४॥

॥ १५ ॥ १६ ॥ सात्वतसाहाय्यं ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७॥ २८ ॥२९॥३०॥३१॥३२॥ ३३ ॥३४॥ ३५॥ ३६॥ ३७॥३८ ॥३९ ॥ ४०॥

परिष्वज्यसुतंचापिआत्मनःसदृशंगुणैः॥ प्रीतिमाननयत्पार्थोदेवराजनिवेशने॥ १५॥सोर्जुनेननसनाद्यमोदेवलोकेतदानृप॥ प्रीतिपूर्वंमहाबाहुःस्वकार्यंप्रति
भारत॥ १६॥युद्धकालेत्वयास्माकंसात्यंदेयमितिप्रभो॥ बाढमित्येवमुक्त्वातुयुद्धकालइहागतः॥ १७॥ कामवर्णजवैरश्वैर्बहुभिःसंवृतोनृप॥ तेहयाःकांच
नापीडानानावर्णामनोजवाः॥ १८॥उत्पेतुःसहसाराजन्हंसाइवमहोदधौ॥ तेत्वदीयान्समासाद्यहयसंघान्मनोजवान्॥ १९॥ क्रोडैःक्रोडानभिघ्नंतोघोणा
भिश्चपरस्परम्॥ निपेतुःसहसाराजन्सुवेगाभिहताभुवि॥२०॥ निपतद्भिस्ततातैश्चहयसंघैःपरस्परम्॥ शुश्रुवेदारुणःशब्दःसुपर्णपतनेयथा॥२१॥तथैवताव
काराजन्समेत्यान्योन्यमाहवे॥ परस्परवधंघोरंचक्रुस्तेहयसादिनः॥२२॥ तस्मिंस्तथावर्तमानेसंकुलेतुमुलेभृशम्॥उभयोरपिसंशांताहयसंघाःसमंततः॥२३॥
प्रक्षीणसायकाःशूरानिहताश्चाश्रमातुराः॥ विलयंसमनुप्राप्तास्तक्ष्यमाणाःपरस्परम्॥ २४॥ततःक्षीणेहयानीकेकिंचिच्छेषेचभारत॥ सौबलस्यानुजाःशूरा
निर्गतारणमूर्द्धनि॥ २५॥ वायुवेगसमस्पर्शान्जवेवायुसमांश्चते॥ आरुह्यबलसंपन्नान्वयःस्थांस्तुरगोत्तमान्॥ २६॥ गजोगवाक्षोवृषभश्चर्मवानार्जवः
शुकः॥ षडेतेबलसंपन्नानिर्ययुर्महतोबलात्॥ २७॥ वार्यमाणाःशकुनिनातैश्चयोधैर्महाबलैः॥ सन्नद्धायुद्धकुशलारौद्ररूपामहाबलाः॥ २८॥ वदनीकंमहा
बाहोभित्त्वापरमदुर्जयम्॥ बलेनमहतायुक्ताःस्वर्गायविजयैषिणः॥ २९॥ विविशुस्तेतदाहृष्टागांधारायुद्धदुर्मदाः॥ तान्प्रविष्टांस्तदादृष्ट्वाइरावानपिवीर्यवा
न्॥ ३०॥ अब्रवीत्समरेयोधान्विचित्रान्दारुणायुधान्॥ ययैतेधार्तराष्ट्रस्ययोधाःसानुगवाहनाः॥ ३१॥ हन्यंतेसमरेसर्वेतथानीतिर्विधीयताम्॥ बाढमित्ये
वमुक्त्वातेसर्वेयोधाइरावतः॥ ३२॥ जघ्नुस्तेषांबलानीकंदुर्जयंसमरेपरैः॥ तदनीकमनीकेनसमरेवीक्ष्यपातितम्॥३३॥ अमृष्यमाणास्तेसर्वेसुबलस्यात्मजा
रणे॥ इरावंतमभिद्रुत्यसर्वतःपर्यवारयन्॥ ३४॥ ताडयंतःशितैःप्रासैश्चोदयंतःपरस्परम्॥ तेशूराःपर्यधावंतकुर्वंतोमहदाकुलम्॥ ३५॥ इरावानथनिर्भिन्नः
प्रासैस्तीक्ष्णैर्महात्मभिः॥ स्ववतारुधिरेणाक्तस्तोत्रैर्विद्धइवद्विपः॥ ३६॥ पुरतोपिचपृष्ठेचपार्श्वयोश्चभृशाहतः॥ एकोबहुभिरत्यर्थंधैर्याद्राजन्नविव्यथे॥ ३७॥
इरावानपिसंक्रुद्धःसर्वास्तान्निशितैःशरैः॥ मोहयामाससमरेविद्धापरपुरंजयः॥ ३८॥ प्रासानुत्कृष्यतरसास्वशरीरादरिंदमः॥ तैरेवताडयामाससुबलस्या
त्मजान्रणे॥ ३९॥ विकृष्यचशितंखड्गंगृहीत्वाचशरावरम्॥ पदातिर्द्रुतमागच्छज्जिघांसुःसौबलान्युधि॥ ४०॥

॥ १५० ॥

॥ ४१ ॥ ४२ ॥४३॥४४ ॥ असिहस्तोदक्षिणबाहुविभांतच्छेदः अपहस्तोवामबाहुविभांतच्छेदः ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥५७॥

ततःप्रत्यागतप्राणाःसर्वेतेसुबलात्मजाः॥ भूयःक्रोधसमाविष्टाइरावंतमभिद्रुताः॥ ४१॥ इरावानपिखड्गेनदर्शयन्पाणिलाघवम्॥ अभ्यवर्ततताःसर्वान्सौब
लान्बलदर्पितः॥ ४२॥लाघवेनाथचरतःसर्वेतेसुबलात्मजाः॥ अंतरंनाभ्यगच्छंतचरंतःशीघ्रगैर्हयैः॥४३॥ भूमिष्ठमथतंसंख्येसंप्रदृश्यततःपुनः॥परिवार्यभृशं
सर्वेग्रहीतुमुपचक्रमुः॥ ४४॥ अथाभ्यागतानांसखड्गेनामित्रकर्शनः॥ असिहस्तापहस्ताभ्यांतेषांगात्राण्यकृंतत॥ ४५॥ आयुधानिचसर्वेषांबाहूनपिवि
भूषितान्॥ अपतंतनिकृत्तांगास्ततोभूमौगतासवः॥ ४६॥ दृष्ट्वातान्निहतान्भूमौतदासुबलात्मजः॥ अमुच्यतमहारौद्रात्तस्माद्वीरावकर्तनात्॥ ४७॥ तान्सर्वा
न्पतितान्दृष्ट्वाभीतोदुर्योधनस्ततः॥ अभ्यधावतसंक्रुद्धोराक्षसंघोरदर्शनम्॥४८॥ आर्ष्यशृंगिमहेष्वासंमायाविनमरिंदमम्॥वैरिणंभीमसेनस्यपूर्वंबकवधे
नवै॥ ४९॥ पश्यवीरयथात्यंतफाल्गुनस्यसुतोबली॥ मायावीविप्रियंकर्तुमकार्षीन्मेबलक्षयम्॥ ५०॥ त्वंचकामगमत्रातमायाश्चेचविशारदः॥ कृतवैरश्च
पार्थेनतस्मादेनंरणेजहि॥ ५१॥ बाढमित्येवमुक्त्वातुराक्षसोघोरदर्शनः॥ प्रययौसिंहनादेनयत्रार्जुनसुतोयुवा॥ ५२॥ आरुढैर्युद्धकुशलैर्विमलप्रासयोधि
भिः॥ वीरैःप्रहारिभिर्युक्तैःस्वैरनीकैःसमावृतः॥५३॥हतशेषैर्महाराजहृिसाहस्तैर्हयोत्तमैः॥ निहंतुकामःसमरेइरावंतंमहाबलम्॥ ५४॥ इरावानपिसंक्रुद्धस्त्वर
माणःपराक्रमी॥ हंतुकाममभित्रघ्नोराक्षसंप्रत्यवारयत्॥ ५५॥ तंमापतंतंसंप्रेक्ष्यराक्षसःसुमहाबलः॥ त्वरमाणस्ततोमायांप्रयोक्तुमुपचक्रमे॥ ५६॥ तेन
मायामयाःसृष्टाहयास्तावंतएवहि॥ स्वारूढाराक्षसैर्घोरैःशूलपट्टिशधारिभिः॥ ५७॥ तेसंरब्धाःसमागम्यहृिसाहस्ताःप्रहारिणः॥ अचिराद्भमयामासुःप्रेत
लोकंपरस्परम्॥ ५८॥ तस्मिंस्तुनिहतेसैन्येतावुभौयुद्धदुर्मदौ॥ संग्रामेसमतिष्ठेतांयथावैदत्रवासवौ॥५९॥आद्रवंतमभिप्रेक्ष्यराक्षसंयुद्धदुर्मदम्॥इरावानथ
संरब्धःप्रत्यधावन्महाबलः॥ ६०॥ समभ्याशगतंस्याजौतस्यखड्गेनदुर्मतेः॥ चिच्छेदकार्मुकंदीप्तंशरावापंचसत्वरम्॥ ६१॥ सनिकृत्तंधनुर्दृष्ट्वाखंजवेनसमा
विशत्॥ इरावंतमभिक्रुद्धंमोहयन्निवमायया॥ ६२॥ ततोंतरिक्षमुत्पत्यइरावानपिराक्षसम्॥ विमोहयित्वामायाभिस्तस्यगात्राणिसायकैः॥६३॥ चिच्छेद
सर्वमर्मज्ञःकामरूपोदुरासदः॥ तयासराक्षसश्रेष्ठःशरैःकृत्तःपुनःपुनः॥ ६४॥ संबभूवमहाराजसमवापचयौवनम्॥ मायाहिसहजातेषांवयोरूपंचकामजं
॥६५॥एवंतद्राक्षसस्यांगंछिन्नंछिन्नंबभूवह॥ इरावानपिसंक्रुद्धोराक्षसंतंमहाबलम्॥६६॥ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥

॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥८२॥८३॥८४॥८५॥८६॥८७॥८८॥८९॥९०॥९१॥आविष्टाःपहायाविष्टाः॥ ९२॥

परश्वधेनतीक्ष्णेनचिच्छेदचपुनःपुनः॥ सतेनबलिनावीरश्छिद्यमानइरावता॥६७॥राक्षसोप्यनदद्घोरंसशब्दंसुमुलोभवत्॥ परश्वधंक्षतंरक्षःसुस्रावबहुशो णितम्॥ ६८॥ ततश्चुक्रोधबलवांश्चकेवेगंचसंयुगे॥ आर्ष्यशृंगिस्तथादृष्ट्वासमरेशत्रुमूर्जितम्॥ ६९॥कृत्वाघोरंमहद्रूपंगृहीतुमुपचक्रमे॥ अर्जुनस्यसुतंवीर मिरावंतंयशस्विनम्॥ ७०॥संग्रामशिरसोमध्येसर्वेषांतत्रपश्यताम्॥तांदृष्ट्वातादृशींमायांराक्षसस्यदुरात्मनः॥७१॥ इरावानपिसंक्रुद्धोमायांस्तृंप्रचक्रमे॥ तस्यक्रोधाभिभूतस्यसमरेष्वनिवर्तिनः॥ ७२॥ योन्वयोमातृकस्तस्यसएनमभिपेदिवान्॥ सनागैर्बहुभीराजन्निरावान्संवृतोरणे ॥ ७३॥ दधारसुमहद्रूपम नंतइवभोगवान्॥ ततोवहुविधैर्नागैश्छादयामासराक्षसम्॥ ७४॥ छाद्यमानस्तुनागैःसध्यात्वाराक्षसपुंगवः॥ सौपर्णरूपमास्थायभक्षयामासपन्नगान् ॥ ७५॥ माययाभक्षितेतस्मिन्नन्वयेतस्यमातृके॥ विमोहितमिरावंतंन्यहद्राक्षसोसिना॥ ७६॥ सकुंडलंसमुकुटंपद्मेंदुसदृशप्रभम्॥ इरावतःशिरोरक्षःपात यामासभूतले॥ ७७॥ तस्मिंस्तुविहतेवीरेराक्षसेनार्जुनात्मजे॥ विशोकाःसमपद्यंतधार्तराष्ट्राःसराजकाः॥ ७८॥ तस्मिन्महतिसंग्रामेतादृशेभैरवेपुनः॥ म हान्व्यतिकरोघोरःसेनयोःसमपद्यत॥ ७९॥ गजाहयाःपदात्याश्चविमिश्रादंतिभिर्हताः॥ रथाश्चादंतिनश्चैवपत्तिभिस्तत्रसूदिताः॥८०॥तथापत्तिरथौघाश्च हयाश्चबहवोरणे॥ रथिभिर्निहताराजंस्तवतेषांचसंकुले॥८१॥ अजानन्नर्जुनश्चापिनिहतंपुत्रमौरसम्॥ जघानसमरेशूरान्राज्ञस्तान्भीष्मरक्षिणः॥८२॥ तथैवतावकाराजन्स्तंजयाश्चसहस्रशः॥ जुह्वंतःसमरेप्राणान्निजघ्नुरितरेतरम्॥८३॥ मुक्तकेशाविकवचाविरथाश्छिन्नकार्मुकाः॥ बाहुभिःसमयुध्यंतसमवे ताःपरस्परम्॥८४॥ तथामर्मातिगैर्भीष्मोनिजघानमहारथान्॥ कंपयन्समरेसेनांपांडवानांपरंतपः॥८५॥ तेनयौधिष्ठिरैसैन्यवहवोमानवाहताः॥ दंतिनःसा दिनश्चैवरथिनोथहयास्तथा॥८६॥ तत्रभारतभीष्मस्यरणेदृष्ट्वापराक्रमम्॥ अत्यद्भुतमपश्यामशक्रस्येवपराक्रमम्॥८७॥तथैवभीमसेनस्यपार्षतस्यचभार त॥ रौद्रमासीद्रणेयुद्धंसात्यकस्यचधन्विनः८८॥ दृष्ट्वाद्रोणस्यविक्रांतंपांडवान्भयमाविशत्॥ एकएवरणेशक्तोनिहंतुंसर्वसैनिकान्॥ ८९॥ किंपुनःपृथि वीशूरैर्योधव्रातैःसमावृतः॥ इत्यब्रुवन्महाराजरणेद्रोणेनपीडिताः॥ ९०॥ वर्तमानेतथारौद्रेसंग्रामेभरतर्षभ॥ उभयोःसेनयोःशूरानाम्नृण्यंतपरस्परम्॥ ९१॥ आविष्टाइवयुध्यंतेरक्षोभूतामहाबलाः॥ तावकाःपांडवेयाश्चसंरब्धास्तातधन्विनः॥ ९२॥

॥ १५१ ॥

॥ ९३ ॥ इतिश्री० नै० भा० नवतितमोऽध्यायः॥ ९० ॥ ॥७॥ ॥इरावंतमिति॥ १॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥२३॥२४॥

नस्मपश्यामहेकंचित्प्राणान्यःपरिरक्षति॥ संग्रामेदैत्यसंकाशेतस्मिन्वीरवरक्षये॥ ९३॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्व०इरावद्वधेनवतित मोऽध्यायः॥ ९०॥ ॥७॥ ॥७॥ ॥धृतराष्ट्रउवाच॥ ॥इरावंतंतुनिहतंदृष्ट्वापार्थोमहारथः॥ संग्रामेकिमकुर्वंततन्ममाचक्ष्वसंजय॥ १॥ संजयउवाच॥ ॥इरावंतंतुनिहतंसंग्रामेवीक्ष्यराक्षसः॥ व्यनदत्सुमहानादंभैमसेनिर्घटोत्कचः॥ २॥ नदतस्तस्यशब्देनपृथिवीसागरांवरा ॥ सपर्वतवनारा जंश्चचालसुभृशंनदा॥ ३॥ अंतरिक्षंदिशश्चैवसर्वाश्चप्रदिशस्तथा॥ तंश्रुत्वासुमहानादंतवसैन्यस्यभारत॥ ४॥ ऊरुस्तंभःसमभवद्वेपथुःस्वेदएवच॥ सर्वए वमहाराजतावकादीनचेतसः॥ ५॥ सर्वतःसमचेष्टंतसिंहभीतागजाइव॥ नर्दित्वासुमहानादंनिर्घातमिवराक्षसः॥ ६॥ ज्वलितंशूलमुद्यम्यरूपंकृत्वाविभी षणम्॥ नानारूपप्रहरणैर्वृतोराक्षसपुंगवैः॥ ७॥ आजघानसुसंक्रुद्धःकालांतकयमोपमः॥ तमापतंतंसंप्रेक्ष्यसंक्रुद्धंभीमदर्शनम्॥ ८॥ स्वबलंचभयात्तस्यप्रा यशोविमुखीकृतम्॥ ततोदुर्योधनोराजाघटोत्कचमुपाद्रवत्॥ ९॥ प्रगृह्यविपुलंचापंसिंहवद्विनदन्मुहुः॥ पृष्ठतोनुययौचैनंस्ववद्भिःपर्वतोपमैः॥ १०॥ कुंजरै र्दशसाहस्रैर्वेगानामधिपःस्वयम्॥ तमापतंतंसंप्रेक्ष्यगजानीकेनसंवृतम्॥ ११॥ पुत्रंतवमहाराजचुकोपसनिशाचरः॥ ततःप्रवव्रतेयुद्धंतुमुलंलोमहर्षणम्॥ १२॥ राक्षसानांचराजेंद्रदुर्योधनबलस्यच॥ गजानीकंचसंप्रेक्ष्यमेघवृंदमिवोदितम्॥ १३॥ अभ्यधावंतसंक्रुद्धाराक्षसाःशस्त्रपाणयः॥ नदंतोविविधान्नादान्मेघा इवसविद्युतः॥ १४॥ शरशक्त्यृष्टिनाराचैर्निघ्नंतोगजयोधिनः॥ भिंदिपालैस्तथाशूलैर्मुद्गरैःसपरश्वधैः॥ १५॥ पर्वताग्रैश्चवृक्षैश्चनिजघ्नुस्तेमहागजान्॥ भिन्न कुंभान्विरुधिरान्भिन्नगात्रांश्चवारणान्॥ १६॥ अपश्यामहाराजवध्यमानान्निशाचरैः॥ तेषुप्रक्षीयमाणेषुभग्नेषुगजयोधिषु॥ १७॥ दुर्योधनोमहाराज राक्षसान्समुपाद्रवत्॥ अमर्षवशमापन्नस्त्यक्त्वाजीवितमात्मनः॥ १८॥ मुमोचनिशितान्बाणान्राक्षसेषुपरंतप॥ जघानचमहेष्वासःप्रधानांस्तत्रराक्षसान्॥ १९॥ संक्रुद्धोभरतश्रेष्ठपुत्रोदुर्योधनस्तव॥ वेगवंतंमहारौद्रंविद्युज्जिह्वंप्रमाथिनम्॥ २०॥ शरैश्चतुर्भिश्चतुरोनिजघानमहाबलः॥ ततःपुनरमेयात्माशरवर्ष दुरासदम्॥ २१॥ मुमोचभरतश्रेष्ठोनिशाचरबलंप्रति॥ तत्तुदृष्ट्वामहत्कर्मपुत्रस्यतवमारिष॥ २२॥ क्रोधेनाभिप्रजज्वालभैमसेनिर्महाबलः॥ सविस्फार्यमहच्चापमिंद्राशनिसमप्रभम्॥ २३॥ अभिदुद्राववेगेनदुर्योधनमरिंदमम्॥ तमापतंतमुद्वीक्ष्यकालस्यदृष्टिमिवांतकम्॥ २४॥

॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ इतिश्री० नै० भा० एकनवतितमोऽध्यायः ॥ ९१ ॥७॥ ॥ ततइति॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥

नविव्यथेमहाराजपुत्रोदुर्योधनस्तव ॥ अथैनमब्रवीत्क्रुद्धःक्रूरःसंरक्तलोचनः ॥ २५ ॥ अद्यानृण्यंगमिष्यामिपितॄणांमातुरेवच ॥ येत्वयासुनृशंसेनदीर्घकालं प्रवासिताः ॥ २६ ॥ यच्चतेपांडवाराजंश्छलद्यूतेपराजिताः ॥ यच्चैवद्रौपदीकृष्णाएकवस्त्रारजस्वला ॥ २७ ॥ सभामानीयदुर्बुद्धेवद्दुधाक्लेशितात्वया ॥ तर्वच प्रियकामेनआश्रमस्थादुरात्मना ॥ २८ ॥ सैंधवेनपराम्दृष्टापरिभूयपितृन्मम ॥ एतेषामपमानानामन्येषांचकुलाधम ॥ २९ ॥ अंतमद्यगमिष्यामियदिनोत्सृजसेरणम् ॥ एवमुक्त्वातुहैडिंबोमहद्विस्फार्यकार्मुकम् ॥ ३० ॥ संदश्यदशनैरोष्ठंस्तक्किणीपरिसंलिहन् ॥ शरवर्षेणमहतादुर्योधनमवाकिरत् ॥ पर्वतंवारिधारा भिःप्रावृषीववलाहकः ॥ ३१ ॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्व०हैडिंबयुद्धेएकनवतितमोऽध्यायः ॥ ९१ ॥ ॥७॥ ॥७ ॥सं जयउवाच ॥ ॥ततस्तद्बाणवर्षंतुदुःसहंदानवैरपि ॥ दधारयुधिराजेंद्रोयथावर्षंमहाद्विपः ॥ १ ॥ ततःक्रोधसमाविष्टोनिःश्वसन्निवपन्नगः ॥ संशयंपरमंप्राप्तः पुत्रस्तेभरतर्षभ ॥ २ ॥ मुमोचनिशितांस्तीक्ष्णान्नाराचान्पंचविंशति ॥ तेऽपतन्सहसाराजंस्तस्मिन्राक्षसपुंगवे ॥ ३ ॥ आशीविषाइवक्रुद्धाःपर्वतेगंधमादने ॥ सतैर्विद्धःस्ववन्रक्तंप्रभिन्नइवकुंजरः ॥ ४ ॥ दध्रेमतिंविनाशायराज्ञःसपिशिताशनः ॥ जग्राहचमहाशक्तिंगिरीणामपिदारिणीं ॥ ५ ॥ संप्रदीप्तांमहोल्काभामंशनिज्वलितामिव ॥ समुद्यच्छन्महाबाहुर्जिघांसुस्तनयंतव ॥ ६ ॥ तामुद्यतामभिप्रेक्ष्यवंगानामधिपस्त्वरन् ॥ कुंजरंगिरिसंकाशंराक्षसंप्रत्यचोदयत् ॥ ७ ॥ स नागप्रवरेणाजौबलिनाशीघ्रगामिना ॥ ततोदुर्योधनरथस्तंमार्गंप्रत्यवर्तत ॥ ८ ॥ रथंचवारयामासकुंजरेणसुतस्यते ॥ मार्गमावारितंदृष्ट्वाराज्ञावंगेनधीम ता ॥ ९ ॥ घटोत्कचोमहाराजक्रोधसंरक्तलोचनः ॥ उद्यतांतांमहाशक्तिंतस्मिंश्चिक्षेपवारणे ॥ १० ॥ सतयाभिहतोराजंस्तेनबाहुप्रमुक्तया ॥ संजातरुधिरोत्पी डःपपातचममारच ॥ ११ ॥ पतत्यथगजेचापिवंगानामीश्वरोबली ॥ जवेनसमभिद्रुत्यजगामधरणीतलम् ॥ १२ ॥ दुर्योधनोपिसंप्रेक्ष्यपतितंवरवारणम् ॥ प्रभ ग्नंचबलंदृष्ट्वाजगामापरमांव्यथाम् ॥ १३ ॥ क्षत्रधर्मंपुरस्कृत्यआत्मनश्चाभिमानिताम् ॥ प्राप्तेपक्रमणेराजातस्थौगिरिरिवाचलः ॥ १४ ॥ संधायचशितंबाणंका लाग्निसमतेजसम् ॥ मुमोचपरमक्रुद्धस्तस्मिन्घोरेनिशाचरे ॥ १५ ॥ तमापतंतंसंप्रेक्ष्यबाणमिंद्राशनिप्रभम् ॥ लाघवान्मोचयामासमहात्मावैघटोत्कचः ॥ १६ ॥ भूयश्चविननादोग्रंक्रोधसंरक्तलोचनः ॥ त्रासयामाससैन्यानियुगांतेजलदोयथा ॥ १७ ॥

॥ १५२ ॥

॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

तंश्रुत्वानिनदंघोरंतस्यभीमस्यरक्षसः ॥ आचार्यमुपसंगम्यभीष्मःशांतनवोब्रवीत् ॥ १८ ॥ ययैषनिनदोघोरःश्रूयतेराक्षसेरितः ॥ हैडिंबोयुध्यतेनूनंराज्ञादुर्योधनेनह ॥ १९ ॥ नैषशक्योहिसंग्रामेजेतुंभूतेनकेनचित् ॥ तत्रगच्छंतभद्रंवोराजानंपरिरक्षत ॥ २० ॥ अभिद्रुतोमहाभागोराक्षसेनमहात्मना ॥ एतद्धिवः परंकृत्यंसर्वेषांनःपरंतपाः ॥ २१ ॥ पितामहवचःश्रुत्वात्वरमाणामहारथाः ॥ उत्तमंजवमास्थायप्रययुर्यत्रकौरवः ॥ २२ ॥ द्रोणश्चसोमदत्तश्चबाह्लीकोथजय द्रथः ॥ कृपोभूरिश्रवाःशल्यआवंत्यःसवृहद्बलः ॥ २३ ॥ अश्वत्थामाविकर्णश्चचित्रसेनोविविंशतिः ॥ रथाश्चानेकसाहस्रायेतेषामनुयायिनः ॥ २४ ॥ अभि द्रुतंपरीप्संतःपुत्रंदुर्योधनंतव ॥ तदनीकमनाधृष्यंपालितंतुमहारथैः ॥ २५ ॥ आततायिनमायांतंप्रेक्ष्यराक्षससत्तमः ॥ नाकंपतमहाबाहुर्मैनाकइवपर्वतः ॥ २६ ॥ प्रगृह्यविपुलंचापंज्ञातिभिःपरिवारितः ॥ शूलमुद्गरहस्तैश्चनानाप्रहरणैरपि ॥ २७ ॥ ततःसमभवद्युद्धंतुमुलंलोमहर्षणम् ॥ राक्षसानांचमुख्यस्यदुर्योधनबल स्यच ॥ २८ ॥ धनुषांकूजतांशब्दःसर्वतस्तुमुलोरणे ॥ अश्रूयतमहाराजवंशानांदत्यतामिव ॥ २९ ॥ अस्त्राणांपात्यमानानांकवचेषुशरीरिणाम् ॥ शब्दःसमभ वद्राजन्गिरीणामिवभिद्यताम् ॥ ३० ॥ वीरबाहुविसृष्टानांतोमराणांविशांपते ॥ रूपमासीद्वियत्स्थानांसर्पाणामिवसर्पताम् ॥ ३१ ॥ ततःपरमसंक्रुद्धोविस्फार्य सुमहद्धनुः ॥ राक्षसेंद्रोमहाबाहुर्विनदन्भैरवंरवम् ॥ ३२ ॥ आचार्यस्यार्द्धचंद्रेणकुद्धश्चिच्छेदकार्मुकम् ॥ सोमदत्तस्यभल्लेनध्वजंचोन्मथ्यचानदत् ॥ ३३ ॥ बा ह्लीकंचत्रिभिर्बाणैःप्रत्यविध्यत्स्तनांतरे ॥ कृपमेकेनविव्याधचित्रसेनंत्रिभिःशरैः ॥ ३४ ॥ पूर्णायतविसृष्टेनसम्यक्प्रणिहितेनच ॥ जत्रुदेशेसमासाद्यविकर्णंस मताडयत् ॥ ३५ ॥ न्यषीदत्स्वरथोपस्थेशोणितेनपरिप्लुतः ॥ ततःपुनरमेयात्मानाराचान्द्वादशपंचच ॥ ३६ ॥ भूरिश्रवसिसंक्रुद्धःप्राहिणोद्भरतर्षभ ॥ तेवर्मभित्त्वा तस्याशुविविशुर्धरणीतलम् ॥ ३७ ॥ विविंशतेश्चद्रौणेश्चयंतारौसमताडयत् ॥ तौपेततूरथोपस्थेरश्मीनुत्सृज्यवाजिनाम् ॥ ३८ ॥ सिंधुराज्ञोर्द्धचंद्रेणवाराहं स्वर्णभूषितम् ॥ उन्ममाथमहाराजद्वितीयेनाच्छिनद्धनुः ॥ ३९ ॥ चतुर्भिरथनाराचैरावंत्यस्यमहात्मनः ॥ जघानचतुरोवाहान्क्रोधसंरक्तलोचनः ॥ ४० ॥ तूर्ण यतविसृष्टेनपीतेननिशितेनच ॥ निर्बिभेदमहाराजराजपुत्रंबृहद्बलम् ॥ ४१ ॥ सगाढविद्धोव्यथितोरथोपस्थउपाविशत् ॥ भृशंक्रोधेनचाविष्टोरथस्थोराक्षसा धिपः ॥ ४२ ॥

॥४३॥ ॥इतिभीष्म०नै०भा०द्विनवतितमोऽध्यायः॥९२॥ ॥७॥ ॥विमुखीकृत्येति॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥२३॥२४॥

चिक्षेपनिशितांस्तीक्ष्णाञ्छरानाशीविषोपमान्॥ बिभिदुस्तेमहाराजशल्यंयुद्धविशारदम्॥ ४३॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्व०हैडिंबयुद्धेद्विनवतितमोऽध्यायः॥९२॥ ॥७॥ ॥संजयउवाच॥ ॥विमुखीकृत्यसर्वांस्तुतावकान्युधिराक्षसः॥ जिघांसुर्भरतश्रेष्ठदुर्योधनमुपाद्रवत्॥१॥ तमापतंतंसंप्रेक्ष्यराजानंप्रतिवेगितम्॥ अभ्यधावन्जिघांसंतस्तावकायुद्धदुर्मदाः॥ २॥ तालमात्राणिचापानिविकर्षंतोमहारथाः॥ तमेकमभ्यधावंतनदंतः सिंहसंघवत्॥ ३॥ अथैनंशरवर्षेणसमंतात्पर्यवाकिरन्॥ पर्वतंवारिधाराभिःशरदीववलाहकाः॥ ४॥ सगाढविद्धोव्यथितस्तोत्रार्दितइवद्विपः॥ उत्पपातत दाकाशंसमंताद्घ्नतेयवत्॥ ५॥ व्यनदत्सुमहानादंजीमूतइवशारदः॥ दिशःखंविदिशश्चैवनादयन्भैरवस्वनः॥ ६॥ राक्षसस्यतुतंशब्दंश्रुत्वाराजायुधिष्ठिरः॥ उवाचभरतश्रेष्ठभीमसेनमरिंदमम्॥७॥ युध्यतेराक्षसोनूनंधार्तराष्ट्रैर्महारथैः॥यथास्यश्रूयतेशब्दोनदतोभैरवंस्वनम्॥८॥ अतिभारंचपश्यामितस्मिन्राक्षस पुंगवे॥ पितामहश्चसंक्रुद्धःपंचालान्हंतुमुद्यतः॥ ९॥ तेषांचरक्षणार्थायययुध्यतेफाल्गुनःपरैः॥ एतज्ज्ञात्वामहाबाहोकार्यद्वयमुपस्थितम्॥ १०॥ गच्छरक्षस्वहै डिंबंसंशयंपरमंगतम्॥ भ्रातुर्वचनमाज्ञायत्वरमाणोवृकोदरः॥११॥ प्रययौसिंहनादेनत्रासयन्सर्वपार्थिवान्॥ वेगेनमहताराजन्पर्वकालेयथोदधिः॥ १२॥ तमन्वगात्सत्यधृतिःसौचित्तिर्युद्धदुर्मदः॥ श्रेणिमान्वसुदानश्चपुत्रःकाश्यस्यचाभिभूः॥ १३॥ अभिमन्युमुखाश्चैवद्रौपदेयामहारथाः॥ क्षत्रदेवश्चविक्रांतः क्षत्रधर्मातथैवच॥ १४॥ अनूपाधिपतिश्चैवनीलःस्वबलमास्थितः॥ महतारथवंशेनहैडिंबंपर्यवारयन्॥ १५॥ कुंजरैश्चसदामत्तैःषट्सहस्रैःप्रहारिभिः॥ अ भ्यरक्षंतसहितारात्रक्षसेंद्रंघटोत्कचम्॥ १६॥ सिंहनादेनमहतानेमिघोषेणचैवह॥ खुरशब्दनिपातैश्चकंपयंतोवसुंधराम्॥१७॥ तेषामापततांश्रुत्वाशब्दंतंतावकंबलम्॥ भीमसेनभयोद्विग्नंविवर्णवदनंतथा॥१८॥ परिवृत्तंमहाराजपरित्यज्यघटोत्कचम्॥ ततःप्रवृत्तेयुद्धंतत्रतेषांमहात्मनाम्॥ १९॥ तावकानांपरेषांच संग्रामेष्वनिवर्तिनाम्॥ नानारूपाणिशस्त्राणिविसृजंतोमहारथाः॥ २०॥ अन्योन्यमभिधावंतःसंप्रहारंप्रचक्रिरे॥ व्यतिष्वक्तंमहारौद्रंयुद्धंभीरुभयावहम्॥ २१॥ हयागजैःसमाजग्मुःपादातारथिभिःसह॥ अन्योन्यंसमरेराजन्प्रार्थयानाःसमभ्ययुः॥२२॥ सहसाचाभवत्तीव्रंसंनिपातान्महद्रजः॥ गजाश्वरथपत्ती नांपदनेमिसमुद्भवम्॥ २३॥ धूम्रारुणंरजस्तीव्रंरणभूमिंसमावृणोत्॥ नैवस्वेनपरेराजन्समजानन्परस्परम्॥ २४॥

॥ १५३ ॥

॥२५॥२६॥२७॥२८॥२९॥३०॥३१॥३२॥३३॥३४॥३५॥३६॥३७॥३८॥३९॥४०॥४१॥४२॥४३॥ ॥इतिभी०नै०भा०त्रिनवतितमोऽध्यायः॥९३॥ ॥७॥ ॥स्वसैन्यमिति॥१॥२॥३॥४॥५॥

पितापुत्रंनजानीतेपुत्रोवापितरंतथा॥ निर्मर्यादंतथाभूतेवैशसेलोमहर्षणे॥ २५॥ शस्त्राणांभरतश्रेष्ठमनुष्याणांचगर्जताम्॥ सुमहानभवच्छब्दःप्रेतानामिवभारत॥ २६॥ गजवाजिमनुष्याणांशोणितांत्रतरंगिणी॥ प्रावर्ततनदीतत्रकेशशैवलशाद्वला॥ २७॥ नराणांचैवकायेभ्यःशिरसांपततांरणे॥ शुश्रुवे सुमहाञ्छब्दःपततामश्मनामिव॥ २८॥ विशिरस्कैर्मनुष्यैश्चच्छिन्नगात्रैश्चवारणैः॥ अश्वैःसंभिन्नदेहैश्चसंकीर्णाभूद्वसुंधरा॥ २९॥ नानाविधानिशस्त्राणि विसृजंतोमहारथाः॥ अन्योन्यमभिधावंतःसंप्रहारार्थमुद्यताः॥ ३०॥ हयाहयान्समासाद्यप्रेषिताहयसादिभिः॥ समाहत्यरणेन्योन्यंनिपेतुर्गतजीविताः॥३१॥ नरानरान्समासाद्यक्रोधरक्तेक्षणाभृशम्॥ उरांस्युरोभिरन्योन्यंसमाश्लिष्यनिजघ्निरे॥ ३२॥ प्रेषिताश्चमहामात्रैर्वारणाःपरवारणैः॥ अभ्यघ्नंतविषाणाग्रैर्वारणानेवसंयुगे॥ ३३॥ तेजातरुधिरोत्पीडाः पताकाभिरलंकृताः॥ संसक्ताःप्रत्यदृश्यंतमेघाइवसविद्युतः॥ ३४॥ केचिद्भिन्नाविषाणाग्रैर्भिन्नकुंभा श्चतोमरैः॥ विनदंतोभ्यधावंतगर्जमानाघनाइव॥ ३५॥ केचिद्वस्तैर्द्विधाच्छिन्नैश्छिन्नगात्रास्तथापरे॥ निपेतुस्तुमुलेतस्मिंश्छिन्नपक्षाइवाद्रयः॥ ३६॥ पा र्श्वैस्तुदारितैरन्येवारणैर्वरवारणाः॥ मुमुचुःशोणितंभूरिधातूनिवमहीधराः॥ ३७॥ नाराचनिहतास्त्वन्येतथाविद्धाश्चतोमरैः॥ विनदंतोभ्यधावंतविभ्रंगाइवपर्वताः॥ ३८॥ केचित्क्रोधसमाविष्टामदांधानिरवग्रहाः॥ रथानहयान्पदातींश्चमन्नदुःशतशोरणे॥ ३९॥ तथाहयाहयारोहैस्ताडिताःप्रासतोमरैः॥ तेनतेनाभ्य वर्तंतकुर्वंतोव्याकुलादिशः॥ ४०॥ रथिनोरथिभिःसार्धंकुलपुत्रास्तनुत्यजः॥ परांशक्तिसमास्थायचक्रुःकर्माण्यभीतवत्॥ ४१॥ स्वयंवरइवामर्देप्रजहुरितरेतरम्॥ प्रार्थयानायशोराजन्स्वर्गंवायुद्धशालिनः॥ ४२॥ तस्मिंस्तथावर्तमानेसंग्रामेलोमहर्षणे॥ धार्तराष्ट्रंमहत्सैन्यंप्रायशोविमुखीकृतम्॥ ४३॥ ॥इतिश्री महाभारतेभीष्मपर्वणिभीष्मवधपर्व०संकुलयुद्धेत्रिनवतितमोऽध्यायः॥९३॥ ॥७॥ ॥संजयउवाच॥ ॥स्वसैन्यंनिहतंदृष्ट्वाराजादुर्योधनःस्वयम्॥ अभ्यधावतसंक्रुद्धोभीमसेनमरिंदमम्॥ १॥ प्रगृह्यसुमहच्चापमिंद्राशनिसमस्वनम्॥ महताशरवर्षेणपांडवंसमवाकिरत्॥ २॥ अर्धचंद्रंचसंधायसु तीक्ष्णंलोमवाहिनम्॥ भीमसेनस्यचिच्छेदचापंक्रोधसमन्वितः॥ ३॥ तदंतरंचसंप्रेक्ष्यत्वरमाणोमहारथः॥ प्रसंदधेशितंबाणंगिरीणामपिदारणम्॥ ४॥ ते नोरसिमहाराजभीमसेनमताडयत्॥ सगाढविद्धोव्यथितःस्रक्किणीपरिसंलिहन्॥ ५॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

समालर्बेतेजस्वीध्वजंहेमपरिष्कृतम् ॥ तथाविमनसंदृष्ट्वाभीमसेनंघटोत्कचः ॥ ६ ॥ क्रोधेनाभिप्रजज्वालदिधक्षन्निवपावकः ॥ अभिमन्युमुखाश्चापिपांडवानांमहारथाः ॥ ७ ॥ समभ्यधावन्क्रोशंतोराजानंजातसंभ्रमाः ॥ संप्रेक्ष्यैतान्संपततःसंक्रुद्धान्जातसंभ्रमान् ॥ ८ ॥ भारद्वाजोब्रवीद्वाक्यंतावकानांमहारथान् ॥ क्षिप्रंगच्छतभद्रंवोराजानंपरिरक्षत ॥ ९ ॥ संशयंपरमंप्राप्तमज्जंतंव्यसनार्णवे ॥ एतेक्रुद्धामहेष्वासाःपांडवानांमहारथाः ॥ १० ॥ भीमसेनंपुरस्कृत्यदुर्योधनमुपाद्रवन् ॥ नानाविधानिशस्त्राणिविसृजंतोजयेधृताः ॥ ११ ॥ नदंतोभैरवान्नादान्त्रासयंतश्चभूमिपान् ॥ तदाचार्यवचःश्रुत्वासौमदत्तिपुरोगमाः ॥ १२ ॥ तावकाःसमवर्तंतपांडवानामनीकिनीम् ॥ कृपोभूरिश्रवाःशल्योद्रोणपुत्रोविविंशतिः ॥ १३ ॥ चित्रसेनोविकर्णश्चसैंधवोथबृहद्बलः ॥ आवंत्यौचमहेष्वासौकोसलपर्यवारयन् ॥ १४ ॥ तेविंशतिपदंगत्वासंप्रहारंप्रचक्रिरे ॥ पांडवाधार्तराष्ट्राश्चपरस्परजिघांसवः ॥ १५ ॥ एवमुक्त्वामहाबाहुर्मरुद्विस्फार्यकार्मुकम् ॥ भारद्वाजस्ततोभीमंषड्विंशत्यासमार्पयत् ॥ १६ ॥ भूयश्चैनंमहाबाहुःशरैःशीघ्रमवाकिरत् ॥ पर्वतंवारिधाराभिःप्रावृषीवबलाहकः ॥ १७ ॥ तंप्रत्यविध्यद्दशभिर्भीमसेनःशिलीमुखैः ॥ त्वरमाणोमहेष्वासःसव्येपार्श्वेमहाबलः ॥ १८ ॥ सगाढविद्धोव्यथितोवयोवद्दृश्यभारत ॥ प्रनष्टसंज्ञःसहसारथोपस्थउपाविशत् ॥ १९ ॥ गुरुंप्रव्यथितंदृष्ट्वाराजादुर्योधनःस्वयम् ॥ द्रौणायनिश्चसंक्रुद्धौभीमसेनमभिद्रुतौ ॥ २० ॥ तावापतंतौसंप्रेक्ष्यकालांतकयमोपमौ ॥ भीमसेनोमहाबाहुर्गदामादायसत्वरम् ॥ २१ ॥ अवप्लुत्यरथात्तूर्णंतस्थौगिरिरिवाचलः ॥ समुद्यम्यगदांगुर्वींयमदंडोपमांरणे ॥ २२ ॥ तमुद्यतगदंदृष्ट्वाकैलासमिवशृंगिणम् ॥ कौरवोद्रोणपुत्रश्चसहितावभ्यधावताम् ॥ २३ ॥ तावापतंतौसहितौत्वरितौबलिनांवरौ ॥ अभ्यधावतवेगेनत्वरमाणोवृकोदरः ॥ २४ ॥ तमापतंतंसंप्रेक्ष्यसंक्रुद्धंभीमदर्शनम् ॥ समभ्यधावंस्त्वरिताःकौरवाणांमहारथाः ॥ २५ ॥ भारद्वाजमुखाःसर्वेभीमसेनजिघांसया ॥ नानाविधानिशस्त्राणिभीमस्योरस्यपातयन् ॥ २६ ॥ सहिताःपांडवंसर्वेपीडयंतःसमंततः ॥ तंदृष्ट्वासंशयंप्राप्तंपीड्यमानंमहारथम् ॥ २७ ॥ अभिमन्युप्रभृतयःपांडवानांमहारथाः ॥ अभ्यधावन्परीप्संतःप्राणांस्त्यक्त्वासुदुस्त्यजान् ॥ २८ ॥ अनुपाधिपतिःशूरोभीमस्यदयितःसखा ॥ नीलोनीलांबुदप्रख्यःसंक्रुद्धोद्रौणिमभ्ययात् ॥ २९ ॥ स्पर्धंतेहिमहेष्वासोनित्यंद्रोणसुतेनसः ॥ सविस्फार्यमहच्चापंद्रौणिर्विव्याधपत्रिणा ॥ ३० ॥ यथाशक्रोमहाराजपुराविव्याधदानवम् ॥ विप्रचित्तिंदुराधर्षंदेवतानांभयंकरम् ॥ ३१ ॥

॥ १५४ ॥

॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ द्रोणादींश्चापृश्यतेतिसंबंधः ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ॥ इतिभीष्मपर्वणिनै० भा० चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ॥ ७ ॥ ॥ तस्मिन्निति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

येनलोकत्रयंक्रोधात्रासितंस्वेनतेजसा ॥ तथानीलेननिर्भिन्नःसुमुक्तेनपतत्रिणा ॥ ३२ ॥ संजातरुधिरोत्पीडोद्रौणिःक्रोधसमन्वितः ॥ सविस्फार्यधनुश्चित्रमिंद्राशनिसमस्वनम् ॥ ३३ ॥ दध्मेनीलविनाशायमतिंमतिमतांवरः ॥ ततःसंधायविमलान्भल्लान्कर्मारमार्जितान् ॥ ३४ ॥ जघानचतुरोवाहान्पातयामासचध्वजम् ॥ सप्तमेनचभल्लेननीलंविव्याधवक्षसि ॥ ३५ ॥ सगाढविद्धोव्यथितोरथोपस्थउपाविशत् ॥ मोहितंवीक्ष्यराजानंनीलमभ्रचयोपमम् ॥ ३६ ॥ घटोत्कचोभिसंक्रुद्धोज्ञातिभिःपरिवारितः ॥ अभिदुद्राववेगेनद्रौणिमाहवशोभिनम् ॥ ३७ ॥ तथेतरेचाभ्यधावन्राक्षसायुद्धदुर्मदाः ॥ तमापतंतंसंप्रेक्ष्यराक्षसंघोरदर्शनं ॥ ३८ ॥ अभ्यधावततेजस्वीभारद्वाजात्मजस्त्वरन् ॥ निजघानचसंक्रुद्धोराक्षसान्भीमदर्शनान् ॥ ३९ ॥ येभवन्नग्रतःक्रुद्धाराक्षसस्यपुरःसराः ॥ विमुखांश्चैवतान्दृष्ट्वाद्रौणिश्चापच्युतैःशरैः ॥ ४० ॥ अकुध्यतमहाकायोभैमसेनिर्घटोत्कचः ॥ प्रादुश्चक्रेततोमायांघोररूपांसुदारुणाम् ॥ ४१ ॥ मोहयन्समरेद्रौणिंमायावीराक्षसाधिपः ॥ ततस्तेतावकाःसर्वेमायायाविमुखीकृताः ॥ ४२ ॥ अन्योन्यंसमपश्यंतनिरुत्तामेदिनीतले ॥ विचेष्टमानाःकृपणाःशोणितेनपरिप्लुताः ॥ ४३ ॥ द्रोणंदुर्योधनंशल्यमश्वत्थामानमेवच ॥ प्रायशश्चमहेष्वासायेप्रधानाःस्मकौरवाः ॥ ४४ ॥ विध्वस्तारथिनःसर्वेराजानश्चनिपातिताः ॥ हयाश्चैवह्यारोहाःसनिरुत्ताःसहस्रशः ॥ ४५ ॥ तदृष्ट्वातावकंसैन्यंविद्रुतंशिबिरंप्रति ॥ ममप्राक्रोशतोराजंस्ततयादेवबत्तस्यच ॥ ४६ ॥ युध्यध्वंमापलायध्वंमायैषाराक्षसीरणे ॥ घटोत्कचप्रमुक्तेनातिष्ठंतविमोहिताः ॥ ४७ ॥ नैवतेश्रद्दधुर्भीतावदतोरावयोर्वचः ॥ तांश्चप्रद्रवतोदृष्ट्वाजयंप्राप्ताश्चपांडवाः ॥ ४८ ॥ घटोत्कचेनसहिताःसिंहनादान्प्रचक्रिरे ॥ शंखदुंदुभिनिर्घोषैःसमंतान्नेदिरेभृशम् ॥ ४९ ॥ एवंतवबलंसर्वंहैडिंबेनदुरात्मना ॥ सूर्यास्तमनवेलायांप्रभग्नंविद्रुतंदिशः ॥ ५० ॥

इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव० अष्टमयुद्धदिवसेघटोत्कचयुद्धेचतुरधिकनवतितमोऽध्यायः ॥ ९४ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ तस्मिन्महतिसंक्रंदेराजादुर्योधनस्तदा ॥ गांगेयमुपसंगम्यविनयेनाभिवाद्यच ॥ १ ॥ तस्यसर्वंयथावृत्तमाख्यातुमुपचक्रमे ॥ घटोत्कचस्यविजयमात्मनश्चपराजयम् ॥ २ ॥ कथयामासदुर्धर्षोविनिःश्वस्यपुनःपुनः ॥ अब्रवीच्चतदाराजन्भीष्मंकुरुपितामहम् ॥ ३ ॥ भवंतंसमुपाश्रित्यवासुदेवंयथापरैः ॥ पांडवैर्विग्रहोघोरःसमारब्धोमयाप्रभो ॥ ४ ॥ एकादशसमाख्याताअक्षौहिण्यश्चयाममं ॥ निदेशेतवतिष्ठंतिमयासार्धंपरंतप ॥ ५ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ अनुशयःपश्चात्तापः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

सोहंभरतशार्दूलभीमसेनपुरोगमैः ॥ घटोत्कचंसमाश्रित्यपांडवैर्युधिनिर्जितः ॥ ६ ॥ तन्मेदहतिगात्राणिशुष्कवृक्षमिवानलः ॥ तदिच्छामिमहाभागत्वत्प्रसादात्परंतप ॥ ७ ॥ राक्षसापसदंहंतुंस्वयमेवपितामह ॥ त्वांसमाश्रित्यदुर्धर्षंतन्मेकर्तुंत्वमर्हसि ॥ ८ ॥ एतच्छ्रुत्वातुवचनंराज्ञोभरतसत्तम ॥ दुर्योधनमिदंवाक्यं भीष्मःशांतनवोब्रवीत् ॥ ९ ॥ शृणुराजन्ममवचोयत्त्वांवक्ष्यामिकौरव ॥ यथात्वयामहाराजवर्तितव्यंपरंतप ॥ १० ॥ आत्मारक्ष्योरणेतातसर्वावस्थास्वरिंदम ॥ धर्मराजेनसंग्रामस्त्वयाकार्यःसदानघ ॥ ११ ॥ अर्जुनेनयमाभ्यांवाभीमसेनेनवापुनः ॥ राजधर्मपुरस्कृत्यराजाराजानमार्छति ॥ १२ ॥ अहंद्रोणःकृपोद्रौणिः कृतवर्माचसात्वतः ॥ शल्यश्चसौमदत्तिश्चविकर्णश्चमहारथाः ॥ १३ ॥ तवचभ्रातरःश्रेष्ठादुःशासनपुरोगमाः ॥ त्वदर्थेप्रतियोत्स्यामोराक्षसंतंमहाबलम् ॥ १४ ॥ रौद्रेतस्मिन्राक्षसेंद्रेयदितेनुशयोमहान् ॥ अयंवागच्छतुरणेतस्ययुद्धायदुर्मतेः ॥ १५ ॥ भगदत्तोमहीपालःपुरंदरसमोयुधि ॥ एतावदुक्त्वाराजानंभगदत्तम थाब्रवीत् ॥ १६ ॥ समक्षंपार्थिवेंद्रस्यवाक्यंवाक्यविशारदः ॥ गच्छशीघ्रंमहाराजहैडिंबंयुद्धदुर्मदम् ॥ १७ ॥ वारयस्वरणेयत्तोमिषतांसर्वधन्विनाम् ॥ राक्षसंक्रूर कर्माणंयथैंद्रस्तारकंपुरा ॥ १८ ॥ तवदिव्यानिचास्त्राणिविक्रमश्चपरंतप ॥ समागमश्चबहुभिःपुराभूदमरैःसह ॥ १९ ॥ त्वंतस्यनृपशार्दूलप्रतियोद्धामहाहवे ॥ स्व बलेनोच्छ्रितोराजन्जहिराक्षसपुंगवम् ॥ २० ॥ एतच्छ्रुत्वातुवचनंभीष्मस्यपृतनापतेः ॥ प्रययौसिंहनादेनपरानभिमुखोद्धतम् ॥ २१ ॥ तमाद्रवंतंसंप्रेक्ष्यगर्जंतमि वतोयदम् ॥ अभ्यवर्ततसंक्रुद्धाःपांडवानांमहारथाः ॥ २२ ॥ भीमसेनोभिमन्युश्चराक्षसश्चघटोत्कचः ॥ द्रौपदेयाःसत्यधृतिःक्षत्रदेवश्चभारत ॥ २३ ॥ चेदिपोव सुदानश्चदशार्णाधिपतिस्तथा ॥ सुप्रतीकेनतांश्चापिभगदत्तोप्युपाद्रवत् ॥ २४ ॥ ततःसमभवद्युद्धंघोररूपंभयानकम् ॥ पांडूनांभगदत्तेनयमराष्ट्रविवर्धनम् ॥ २५ प्रयुक्तारथिभिर्बाणाभीमवेगाःसुतेजनाः ॥ तेनिपेतुर्महाराजनागेषुचरथेषुच ॥ २६ ॥ प्रभिन्नाश्वमहानागाविनीताहस्तिसादिभिः ॥ प्ररस्परंसमासाद्यसंनि पेतुरभीतवत् ॥ २७ ॥ मदांधारोषसंरब्धाविषाणाग्रैर्महाहवे ॥ बिभिदुर्दंतमुसलैःसमासाद्यपरस्परम् ॥ २८ ॥ हयाश्चचामरापीडाःप्रासपाणिभिरास्थिताः ॥ चो दिताःसादिभिःक्षिप्रंनिपेतुस्तिरेतरम् ॥ २९ ॥ पादाताश्चपदात्यौघैस्ताडिताःशक्तितोमरैः ॥ न्यपतंततदाभूमौशतशोथसहस्रशः ॥ ३० ॥ रथिनश्चरथैराजन्कर्णि नालीकसायकैः ॥ निहत्यसमरेवीरान्सिंहनादान्विनेदिरे ॥ ३१ ॥ तस्मिंस्तथावर्तमानेसंग्रामेलोमहर्षणे ॥ भगदत्तोमहेष्वासोभीमसेनमथाद्रवत् ॥ ३२ ॥

॥ ३५५ ॥

॥३३॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

कुंजरेणप्रभिन्नेनसमाद्यावतामदम् ॥ पर्वतेनयथातोयंस्रवमाणेनसर्वशः ॥ ३३ ॥ किरञ्छरसहस्राणिसुप्रतीकशिरोगतः ॥ ऐरावतस्योमघवान्वारिधाराइ वानघ ॥ ३४ ॥ सभीमंशरधाराभिस्ताडयामासपार्थिवः ॥ पर्वतंवारिधाराभिस्तपतोजलदोयथा ॥ ३५ ॥ भीमसेनस्तुसंक्रुद्धःपादरक्षान्परःशतान् ॥ निजघा नमहेष्वासःसंरब्धःशरवृष्टिभिः ॥ ३६ ॥ तान्दृष्ट्वानिहतान्कुद्धोभगदत्तःप्रतापवान् ॥ चोदयामासनागेंद्रंभीमसेनरथंप्रति ॥ ३७ ॥ सन्नागःप्रेषितस्तेनबाणो ज्याचोदितोयथा ॥ अभ्यधावतवेगेनभीमसेनमरिंदमम् ॥ ३८ ॥ तमापतंतंसंप्रेक्ष्यपांडवानांमहारथाः ॥ अभ्यवर्ततवेगेनभीमसेनपुरोगमाः ॥ ३९ ॥ केकया श्चाभिमन्युश्चद्रौपदेयाश्चसर्वशः ॥ दशार्णाधिपतिःशूरःक्षत्रदेवश्चमारिष ॥ ४० ॥ चेदिपश्चित्रकेतुश्चसंरब्धाःसर्वएवते ॥ उत्तमास्त्राणिदिव्यानिदर्शयंतोमहा बलाः ॥ ४१ ॥ तमेकंकुंजरंक्रुद्धाःसमंतात्पर्यवारयन् ॥ सविद्धोबहुभिर्बाणैर्व्यरोचतमहाद्विपः ॥ ४२ ॥ संजातरुधिरोत्पीडोधातुचित्रइवाद्विराट् ॥ दशार्णाधि पतिश्चापिगजंभूमिधरोपमम् ॥ ४३ ॥ समास्थितोभिदुद्रावभगदत्तस्यवारणम् ॥ तमापतंतंसमरेगजंगजपतिःसच ॥ ४४ ॥ दधारसुप्रतीकोपिवेलेवमकरा लयम् ॥ वारितंप्रेक्ष्यनागेंद्रंदशार्णस्यमहात्मनः ॥ ४५ ॥ साधुसाध्विति सैन्यानिपांडवेयान्यपूजयन् ॥ ततःप्राग्ज्योतिषःक्रुद्धस्तोमरान्वैचतुर्दश ॥ ४६ ॥ प्राहिणो त्तस्यनागस्यप्रमुखेनृपसत्तम ॥ वर्ममुख्यंतनुत्राणंशातकुंभपरिष्कृतम् ॥ ४७ ॥ विदार्यप्राविशन्क्षिप्रंवल्मीकमिवपन्नगाः ॥ सगाढविद्धोव्यथितोनागोभरत सत्तम ॥ ४८ ॥ उपादत्तमदःक्षिप्रमभ्यवर्ततवेगितः ॥ सप्रदुद्राववेगेनप्रणदन्भैरवंरवम् ॥ ४९ ॥ संमर्दयानःस्वबलंवायुर्वृक्षानिवौजसा ॥ तस्मिन्प्रराजितेनागे पांडवानांमहारथाः ॥ ५० ॥ सिंहनादंविनद्योच्चैर्युद्धायैवावतस्थिरे ॥ ततोभीमंपुरस्कृत्यभगदत्तमुपाद्रवन् ॥ ५१ ॥ किरंतोविविधान्बाणान्शस्त्राणिविविधा निच ॥ तेषामापततांराजन्संक्रुद्धानाममर्षिणाम् ॥ ५२ ॥ श्रुत्वासनिनदंघोरममर्षाद्भृतसाध्वसः ॥ भगदत्तोमहेष्वासःस्वनागंप्रत्यचोदयत् ॥ ५३ ॥ अंकुशांगु ष्ठनुदितःसगजप्रवरोयुधि ॥ तस्मिन्क्षणेसमभवत्सांवर्तकइवानलः ॥ ५४ ॥ रथसंघांस्तथानागान्हयांश्चहयसादिभिः ॥ पादातांश्चसुसंक्रुद्धःशतशोथसहस्र शः ॥ ५५ ॥ अभद्नात्समरेनागःसंप्रधावंस्ततस्ततः ॥ तेनसंलोड्यमानंतुपांडवानांबलंमहत् ॥ ५६ ॥ संचुकोचमहाराजचर्मेवाग्नौसमाहितम् ॥ भग्नंतुस्वबलंदृ ष्ट्वाभगदत्तेनधीमता ॥ ५७ ॥ घटोत्कचोथसंक्रुद्धोभगदत्तमुपाद्रवत् ॥ विकटःपरुषोराजन्दीप्तास्योदीप्तलोचनः ॥ ५८ ॥

॥५८॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥७६॥ प्रचस्कंदश्चवततार ॥ ७७ ॥ ७८ ॥ ७९ ॥८०॥८१॥८२॥८३॥

रूपंविभीषणंकृत्वारोषेणप्रज्वलन्निव॥ जग्राहविमलंशूलंगिरीणामपिदारणम्॥५९॥ नागंजिघांसुःसंहसाचिक्षेपचमहाबलः॥ संविस्फुलिंगमालाभिःसमंतात्परिवेष्टितः॥ ६० ॥ तमापतंतंसहसादृष्ट्वाप्राग्ज्योतिषोनृपः॥ चिक्षेपपरुचिरंतीक्ष्णमर्धचंद्रंसुदारुणम्॥ ६१ ॥ चिच्छेदतन्महच्छूलंतेनबाणेनवेगवान्॥ उत्पातद्विधाच्छिन्नंशूलंहेमपरिष्कृतम्॥६२॥ महाशनिर्यथाभ्रष्टाशक्रमुक्तानभोगता॥शूलंनिपतितंदृष्ट्वाद्विधाकृत्तंचपार्थिव॥ ६३॥ रुक्मदंडांमहाशक्तिंज ग्राहाग्निशिखोपमाम्॥ चिक्षेपतांराक्षसस्यतिष्ठतिष्ठेतिचाब्रवीत्॥ ६४ ॥ तामापतंतींसंप्रेक्ष्यवियत्स्थामशनीमिव॥ उत्पत्यराक्षसस्तूर्णंजग्राहचननादच ॥६५॥ बभंजचैनांत्वरितोजानुन्यारोप्यभारत॥ पश्यतःपार्थिवेंद्रस्यतद्द्भुतमिवाभवत्॥६६॥ तदवेक्ष्यकृतंकर्मराक्षसेनबलीयसा॥ दिविदेवाःसगंधर्वामुनयश्चापिविस्मिताः॥६७॥ पांडवाश्चमहाराजभीमसेनपुरोगमाः॥ साधुसाध्वितिनादेनपृथिवीमन्वनादयन्॥६८॥तंतुश्रुत्वामहानादंप्रहृष्टानांमहात्मनाम्॥ नामृष्यतमहेष्वासोभगदत्तःप्रतापवान्॥ ६९॥ सविस्फार्यमहच्चापमिंद्राशनिसमप्रभम्॥ तर्जयामासवेगेनपांडवानांमहारथान्॥७०॥ विसृजन्विमलांस्ती क्ष्णान्नाराचान्ज्वलनप्रभान्॥ भीममेकेनविव्याधराक्षसंनवभिःशरैः॥ ७१॥ अभिमन्युंत्रिभिश्चैवकेकयान्पंचभिस्तथा॥ पूर्णायतविसृष्टेनशरेणानतपर्वणा ॥७२॥ बिभेददक्षिणंबाहुंक्षत्रदेवस्यचाहवे॥ पपातसहसातस्यसशरंधनुरुत्तमम्॥७३॥ द्रौपदेयांस्ततःपंचपंचभिःसमताडयत्॥ भीमसेनस्यचक्रोधान्निज घानतुरंगमान्॥ ७४ ॥ ध्वजंकेसरिणंचास्यचिच्छेदविशिखैस्त्रिभिः॥ निर्बिभेदत्रिभिश्चान्यैःसारथिंचास्यपत्रिभिः॥ ७५॥ सगाढविद्धोव्यथितोरथोपस्थउ पाविशत्॥ विशोकोभरतश्रेष्ठभगदत्तेनसंयुगे ॥ ७६॥ ततोभीमोमहाबाहुर्विरथोरथिनांवरः॥ गदांप्रगृह्यवेगेनप्रचस्कंदरथोत्तमात्॥ ७७ ॥ तमुद्यतगदंदृ ष्ट्वासशृंगमिवपर्वतम्॥ तावकानांभयंघोरंसमपद्यतभारत॥ ७८ ॥ एतस्मिन्नेवकालेतुपांडवःकृष्णसारथिः॥ आजगाममहाराजनिघ्नन्शत्रून्समंततः ॥७९॥ यत्रतौपुरुषव्याघ्रौपितापुत्रौमहाबलौ॥ प्राग्ज्योतिषेणसंयुक्तौभीमसेनघटोत्कचौ॥ ८० ॥ दृष्ट्वाचपांडवोभ्रातॄन्युध्यमानान्महारथान्॥ त्वरितोभरत श्रेष्ठतत्रायुध्यत्किरञ्छरान्॥८१॥ ततोदुर्योधनोराजात्वरमाणोमहारथः॥ सेनामचोदयत्क्षिप्रंरथनागाश्वसंकुलाम्॥ ८२॥ तामापतंतींसहसाकौरवाणां महाचमूम्॥ अभिदुद्राववेगेनपांडवःश्वेतवाहनः॥ ८३॥

॥८४॥८५॥८६॥ ॥ इतिश्री०नै०भा०पंचनवतितमोऽध्यायः॥ ९५॥ ॥७॥ ॥ पुत्रेति ॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥ २२॥

भगदत्तश्चसमरेतेननागेनभारत ॥ विमृद्नन्पांडवबलंयुधिष्ठिरमुपाद्रवत्॥ ८४ ॥ तदासीत्सुमहद्युद्धंभगदत्तस्यमारिष॥ पंचालैःपांडवैश्चैकेकयैश्चोद्यतायु धैः॥८५॥ भीमसेनोपिसमरेतावुभौकेशवार्जुनौ॥ अश्रावयद्यथाशक्तमिरावद्वधमुत्तमम्॥८६॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्व०भगदत्त युद्धेपंचनवतितमोऽध्यायः॥ ९५॥ ७॥ ॥ संजयउवाच॥ ॥पुत्रंविनिहतंश्रुत्वाइरावंतंधनंजयः॥ दुःखेनमहताविष्टोनिःश्वसन्पन्नगोयथा॥ १॥ अब्रवीत्स मरेराजन्वासुदेवमिदंवचः॥ इदंनूनंमहाप्राज्ञोविदुरोदृष्टवान्पुरा॥ २॥ कुरूणांपांडवानांचक्षयंघोरंमहामतिः॥ सततोनिवारितवान्धृतराष्ट्रंजनेश्वरम्॥ ३॥ अन्येचबहवोवीराःसंग्रामेमधुसूदन॥ निहताःकौरवैःसंख्येतथास्माभिश्चकौरवाः॥ ४॥ अर्थहेतोर्नरश्रेष्ठक्रियतेकर्मकुत्सितम्॥ धिगर्थान्यत्कृतेत्येवंक्रियते ज्ञातिसंक्षयः॥५॥ अधनस्यमृतंश्रेयोनचज्ञातिवधाद्धनम्॥ किंनुप्राप्स्यामहेकृष्णहत्वाज्ञातीन्समागतान्॥६॥ दुर्योधनापराधेनशकुनेःसौबलस्यच॥ क्षत्रि यानिधनंयांतिकर्णदुर्मंत्रितेनच॥ ७॥ इदानींचविजानामिसुकृतंमधुसूदन॥ कृतंराज्ञामहाबाहोयाचताचसुयोधनम्॥ ८ ॥ राज्यार्धंपंचवाग्रांमांन्नाकार्षीत्सचदुर्मतिः॥ दृष्ट्वाहिक्षत्रियान्शूरान्शयानान्धरणीतले॥९॥ निंदामिश्नशमात्मानंधिगस्तुक्षत्रजीविकाम्॥ अशक्तमितिमामेतेज्ञास्यंतेक्षत्रियारणे॥१०॥ युद्धंतुमेनरुचितंज्ञातिभिर्मधुसूदन॥ संचोदयहयान्शीघ्रंधार्तराष्ट्रचमूंप्रति॥ ११॥ प्रतरिष्येमहापारंभुजाभ्यांसमरोदधिम्॥ नार्यंयापयितुंकालोविद्यतेमाध वक्वचित्॥ १२॥ एवमुक्तस्तुपार्थेनकेशवःपरवीरहा॥ चोदयामासतानश्वान्पांडुरान्वातरंहसः॥ १३॥ अथशब्दोमहानासीत्तवसैन्यस्यभारत॥ मारुतोद्भूत वेगस्यसागरस्येवपर्वणि॥ १४॥ अपराह्णेमहाराजसंग्रामःसमपद्यत॥ पर्जन्यसमनिर्घोषोभीष्मस्यसहपांडवैः॥ १५॥ ततोराजंस्तवसुताभीमसेनमुपा द्रवन्॥ परिवार्यरणेद्रोणंवसवोवासवंयथा॥ १६॥ ततःशांतनवोभीष्मःकृपश्चरथिनांवरः॥ भगदत्तःसुशर्माचधनंजयमुपाद्रवन्॥ १७॥ हार्दिक्योबाह्लि कश्चैवसात्यकिंसमभिद्रुतौ॥ अंबष्ठकस्तुनृपतिरभिमन्युमवस्थितः॥१८॥ शेषास्त्वन्येमहाराजशेषानेवमहारथान्॥ ततःप्रवव्रतेयुद्धंघोररूपंभयावहम्॥१९॥ भीमसेनस्तुसंप्रेक्ष्यपुत्रांस्तवजनेश्वर॥ प्रजज्वालरणेक्रुद्धोहविषाहव्यवाडिव॥ २०॥ पुत्रास्तुतवकौतेयंच्छादयांचक्रिरेशरैः॥ प्रावृषीवमहाराजजलदाइवपर्वतम्॥ २१॥ सछाद्यमानोबहुधापुत्रैस्तवविशांपते॥ रुक्मिणीसंलिहन्वीरःशार्दूलइवदर्पितः॥ २२॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ अपविद्धा

व्यूढोरस्कंततोभीमःपातयामासभारत ॥ क्षुरप्रेणसुतीक्ष्णेनसोभवद्गतजीवितः ॥ २३ ॥ अपरेणतुभल्लेनपीतेननिशितेनतु ॥ अपातयत्कुंडलिनंसिंहःक्षुद्रमृगं
यथा ॥ २४ ॥ ततःसुनिशितान्पीतान्समादत्तशिलीमुखान् ॥ ससर्जत्वरयायुक्तःपुत्रांस्तेप्राप्यमारिष ॥ २५ ॥ प्रेषिताभीमसेनेनशरास्तेदृढधन्वना ॥ अपातयं
तपुत्रांस्तेरथेभ्यःसुमहारथान् ॥ २६ ॥ अनावृष्टिंकुंडभेदिंवैराटंदीर्घलोचनम् ॥ दीर्घबाहुंसुबाहुंचतथैवकनकध्वजम् ॥ २७ ॥ प्रपतंतस्मवीरास्तेविरेजुर्भरतर्ष
भ ॥ वसंतेपुष्पशबलाश्च्युताःप्रपतिताइव ॥ २८ ॥ ततःप्रदुद्रुवुःशेषास्तवपुत्रामहाहवे ॥ तंकालमिवमन्यंतोभीमसेनंमहाबलम् ॥ २९ ॥ द्रोणस्तुसमरेवीरंनिर्द
हंतंसुतांस्तव ॥ यथाद्रिंवारिधाराभिःसमंताद्घकिरच्छरैः ॥ ३० ॥ तत्राद्भुतमपश्यामकुंतीपुत्रस्यपौरुषम् ॥ द्रोणेनवार्यमाणोपिनिजघ्नेयत्सुतांस्तव ॥ ३१ ॥ य
थागोवृषभोवर्षसंधारयतिखात्पतत् ॥ भीमस्तथाद्रोणमुक्तंशरवर्षमदीधरत् ॥ ३२ ॥ अद्भुतंचमहाराजतत्रचक्रेवृकोदरः ॥ यत्पुत्रांस्तेऽवधीत्संख्येद्रोणंचैवन्य
वारयत् ॥ ३३ ॥ पुत्रेषुतववीरेषुचिक्रीडार्जुनपूर्वजः ॥ मृगेष्विवमंहाराजचरन्व्याघ्रोमहाबलः ॥ ३४ ॥ यथाहिपशुमध्यस्थोदारयेतपशून्दृकः ॥ वृकोदरस्तव
सुतांस्तथाव्यद्रावयद्रणे ॥ ३५ ॥ गांगेयोभगदत्तश्चगौतमश्चमहारथाः ॥ पांडवंरभसंयुद्धेवारयामासुरर्जुनम् ॥ ३६ ॥ अस्त्रैरस्त्राणिसंवार्यतेषांसोतिरथोरणे ॥
प्रवीरांस्तवसैन्येषुप्रेषयामासमृत्यवे ॥ ३७ ॥ अभिमन्युस्तुराजानमंबष्ठंलोकविश्रुतम् ॥ विरथंरथिनांश्रेष्ठंवारयामाससायकैः ॥ ३८ ॥ विरथेावध्यमानस्तुसौ
भद्रेणयशस्विना ॥ अवप्लुत्यरथात्तूर्णमंबष्ठोवसुधाधिपः ॥ ३९ ॥ असिंचिक्षेपसमरेसौभद्रस्यमहात्मनः ॥ आरुरोहरथंचैवहार्दिक्यस्यमहाबलः ॥ ४० ॥
आपतंतंतुनिस्त्रिंशंयुद्धमार्गविशारदः ॥ लाघवाद्ध्वंसयामाससौभद्रःपरवीरहा ॥ ४१ ॥ व्यंसितंवीक्ष्यनिस्त्रिंशंसौभद्रेणरणेतदा ॥ साधुसाध्वितिसैन्यानांप्रणा
दोभूद्विशांपते ॥ ४२ ॥ धृष्टद्युम्नमुखास्त्वन्येतवसैन्यमयोधयन् ॥ तथैवतावकाःसर्वेपांडुसैन्यमयोधयन् ॥ ४३ ॥ तत्राक्रंदोमहानासीत्तत्रतेषांचभारत ॥ निघ्न
तांदृढमन्योन्यंकुर्वतांकर्मदुष्करम् ॥ ४४ ॥ अन्योन्यंहरिणेशूराःकेशेष्वाक्षिप्यमानिनः ॥ नखदंतैरयुध्यंतमुष्टिभिर्जानुभिस्तथा ॥ ४५ ॥ तलैश्चैवाथनिस्त्रिंशैर्बाहु
भिश्चसुसंस्थितैः ॥ विवरंप्राप्यचान्योन्यमनयन्यमसादनम् ॥ ४६ ॥ न्यहनच्चपितापुत्रंपुत्रश्चपितरंतथा ॥ व्याकुलीकृतसर्वांगायुयुधुस्तत्रमानवाः ॥ ४७ ॥ र
णेचारूणिचापानिहेमपृष्ठानिमारिष ॥ हतानामपविद्धानिकलापाश्चमहाधनाः ॥ ४८ ॥ निपतितानि ॥ ४८ ॥

॥ १५७ ॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥

जातरूपमयैःपुंखैराजतैर्निशिताःशराः ॥ तैलधौताव्यराजंतनिर्मुक्तभुजगोपमाः ॥ ४९ ॥ हस्तिदंतत्सरून्खड्गान्जातरूपपरिष्कृतान् ॥ चर्माणिचापविद्धानि
रुक्मचित्राणिधन्विनाम् ॥ ५० ॥ सुवर्णविकृतप्रासान्पट्टिशान्हेममूषितान् ॥ जातरूपमयाश्चर्ष्टीःशक्तीश्चकनकोज्वलाः ॥ ५१ ॥ सुसन्नाहाश्वपतितामुसला
निगुरूणिच ॥ परिघान्पट्टिशांश्चैवभिंदिपालांश्चमारिष ॥ ५२ ॥ पतितान्विविधांश्चापांश्चित्रान्हेमपरिष्कृतान् ॥ कुथाबहुविधाकाराश्चामरसन्व्यजनानिच ॥ ५३ ॥
नानाविधानिशस्त्राणिप्रगृह्यपतितानराः ॥ जीवंतइवदृश्यंतेगतसत्वामहारथाः ॥ ५४ ॥ गदाविमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकाः ॥ गजवाजिरथक्षुण्णाःशेरते
स्मनराःक्षितौ ॥ ५५ ॥ तयैवाश्वनृनागानांशरीरैर्विवभौतदा ॥ संछन्नावसुधाराजन्पर्वतैरिवसर्वशः ॥ ५६ ॥ समरेपतितैश्चैवशक्त्यृष्टिशरतोमरैः ॥ निस्त्रिंशैः
पट्टिशैःप्रासैरयस्कुंतैःपरश्वधैः ॥ ५७ ॥ परिघैर्भिंदिपालैश्चशतघ्नीभिश्चमारिष ॥ शरीरैःशस्त्रनिर्भिन्नैःसमास्तीर्यतमेदिनी ॥ ५८ ॥ विशब्दैरल्पशब्दैश्चशोणितौ
घपरिप्लुतैः ॥ गतासुभिरमित्रघ्नविवभौनिचितामही ॥ ५९ ॥ सतलत्रैःसकेयूरैर्बाहुभिश्चंदनोक्षितैः ॥ हस्तिहस्तोपमैश्छिन्नैरूरुभिश्चतरस्विनाम् ॥ ६० ॥ बद्धचू
डामणिवरैःशिरोभिश्चसकुंडलैः ॥ पातितैर्नृषभाक्षाणांबभौभारतमेदिनी ॥ ६१ ॥ कवचैःशोणितादिग्धैर्विप्रकीर्णैश्चकांचनैः ॥ रराजसुभृशंभूमिःशांतार्चि
रिवानलैः ॥ ६२ ॥ विप्रविद्धैःकलापैश्चपतितैश्चशरासनैः ॥ विप्रकीर्णैःशरैश्चैवरुक्मपुंखैःसमंततः ॥ ६३ ॥ रथैश्चसर्वतोभग्नैःकिंकिणीजालभूषितैः ॥ वाजि
भिश्चहतैर्बाणैःस्रस्तजिह्वैःसशोणितैः ॥ ६४ ॥ अनुकर्षैःपताकाभिरुपासंगैर्ध्वजैरपि ॥ प्रवीराणांमहाशंखैर्विप्रकीर्णैश्चपांडुरैः ॥ ६५ ॥ स्रस्तहस्तैश्चमातंगैःश
यानैर्विवभौमही ॥ नानारूपैरलंकारैःप्रमदेवाभ्यलंकृता ॥ ६६ ॥ दंतिभिश्चापरैस्तत्रसप्रासैर्गाढवेदनैः ॥ करैःशब्दंविमुंचद्भिःशीकरंचमुहुर्मुहुः ॥ ६७ ॥ विव
भौतद्रणस्थानंस्यंदमानैरिवाचलैः ॥ नानारागैःकंबलैश्चपरिस्तोमैश्चदंतिनाम् ॥ ६८ ॥ वैदूर्यमणिदंडैश्चपतितैरंकुशैःशुभैः ॥ घंटाभिश्चगजेंद्राणांपतिताभिःसमं
ततः ॥ ६९ ॥ विपाटितविचित्राभिःकुथाभिरंकुशैस्तथा ॥ ग्रैवेयैश्चित्ररूपैश्चरुक्मकक्ष्याभिरेवच ॥ ७० ॥ यंत्रैश्चबहुधाच्छिन्नैस्तोमरैश्चापिकांचनैः ॥ अश्वानां
रेणुकपिलैरुक्मच्छन्नैरुरश्छदैः ॥ ७१ ॥ सादिनांभुजगैश्छिन्नैःपतितैःसांगदैस्तथा ॥ प्रासैश्चविमलैस्तीक्ष्णैर्विमलाभिस्तथर्ष्टिभिः ॥ ७२ ॥ उष्णीषैश्चतथोंचि
त्रैर्विप्रविद्धैस्ततस्ततः ॥ विचित्रैर्बाणवर्षैश्चजातरूपपरिष्कृतैः ॥ ७३ ॥

अश्वास्तरपरिस्तोमैरांकवैर्ध्वदितैस्तथा ॥ नरेंद्रचूडामणिभिर्विचित्रैश्चमहाधनैः ॥ ७४ ॥ छत्रैस्तथोपविद्धैश्चचामरैर्व्यजनैरपि ॥ पद्मेंदुद्युतिभिश्चैववदनैश्चारु कुंडलैः ॥ ७५ ॥ कृष्णश्मश्रुभिरत्यर्थवीराणांसमलंकृतैः ॥ अपविद्धैर्महाराजसुवर्णोज्ज्वलकुंडलैः ॥ ७६ ॥ ग्रहनक्षत्रशबलाद्यौरिवासीद्वसुंधरा ॥ एवमेतेमहा सेनेष्वदितेतत्रभारत ॥ ७७ ॥ परस्परंसमासाद्यतवतेषांचसंयुगे ॥ तेषुश्रांतेषुभग्नेषुष्वदितेषुचभारत ॥ ७८ ॥ रात्रिःसमभवत्तत्रनापश्यामततोनुगान् ॥ ततोव हारंसैन्यानांप्रचक्रुःकुरुपांडवाः ॥ ७९ ॥ रजनीमुखेसुरौद्रेतुवर्तमानेमहाभये ॥ अवहारंततःकृत्वासहिताःकुरुपांडवाः ॥ न्यविशंतयथाकालंगत्वास्वशिबिरंत दा ॥ ८० ॥ ॥इतिश्रीमहाभा०भीष्मपर्वणिभीष्मवध०अष्टमदिवसयुद्धावहारेषण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ततोदु र्योधनोराजाशकुनिश्चापिसौबलः ॥ दुःशासनश्चपुत्रस्तेसूतपुत्रश्चदुर्जयः ॥ १ ॥ समागम्यमहाराजमंत्रंचक्रुर्विवक्षितम् ॥ कथंपांडुसुताःसंख्येजेतव्याःसगणा इति ॥ २ ॥ ततोदुर्योधनोराजासर्वांस्तानाहमंत्रिणः ॥ सूतपुत्रंसमाभाष्यसौबलंचमहाबलम् ॥ ३ ॥ द्रोणोभीष्मःकृपःशल्यःसौमदत्तिश्चसंयुगे ॥ नपार्थान्प्रतिबा धंतेनजानेतच्चकारणम् ॥ ४ ॥ अवध्यमानास्तेचापिक्षपयंतिबलंमम ॥ सोस्मिक्षीणबलःकर्णक्षीणशस्त्रश्चसंयुगे ॥ ५ ॥ निकृतःपांडवैःशूरैरवध्यैर्दैवतैरपि ॥ सो हंसंशयमापन्नःप्रहरिष्येकथंरणे ॥ ६ ॥ तमब्रवीन्महाराजसूतपुत्रोनराधिपम् ॥ ॥ कर्णउवाच ॥ ॥ माशोचभरतश्रेष्ठकरिष्येहंप्रियंतव ॥ ७ ॥ भीष्मःशांतनव स्तूर्णमपयातुमहारणात् ॥ निवृत्तेयुधिगांगेयेन्यस्तशस्त्रेचभारत ॥ ८ ॥ अहंपार्थान्हनिष्यामिसहितान्सर्वसोमकैः ॥ पश्यतोयुधिभीष्मस्यशपेसत्येनतेनृप ॥ ९ ॥ पांडवेषुद्व्यांनित्यंसहिभीष्मःकरोतिवै ॥ अशक्तश्चरणेभीष्मोजेतुमेतान्महारथान् ॥ १० ॥ अभिमानीरणेभीष्मोनित्यंचापिरणप्रियः ॥ सकथंपांडवा न्युद्धेजेष्यतेतातसंगतान् ॥ ११ ॥ सत्वंशीघ्रमितोगत्वाभीष्मस्यशिबिरंप्रति ॥ अनुमान्यगुरुंवृद्धंशस्त्रंन्यासयभारत ॥ १२ ॥ न्यस्तशस्त्रेततोभीष्मेनिहतान्पश्य पांडवान् ॥ मयैकेनरणेराजन्समुद्यतान्बांधवान् ॥ १३ ॥ एवमुक्तस्तुकर्णेनपुत्रोदुर्योधनस्तव ॥ अब्रवीद्भ्रातरंतत्रदुःशासनमिदंवचः ॥ १४ ॥ अनुयात्रंयथा सर्वेसज्जीभवंतिसर्वशः ॥ दुःशासनतथाक्षिप्रंसर्वमेवोपपादय ॥ १५ ॥ एवमुक्त्वाततोराजन्कर्णमाहजनेश्वरः ॥ अनुमान्यरणेभीष्ममेषोहंद्विपदांवरम् ॥ १६ ॥ आगमिष्येततःक्षिप्रंत्वत्सकाशमरिंदम ॥ अपक्रांततोभीष्मेप्रहरिष्यसिसंयुगे ॥ १७ ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ ॥ १५८ ॥

॥ १८ ॥ हयंहययानंरथमितियावत् ॥ १९ ॥ २० ॥ भंडीपुष्पंभंजिष्ठापुष्पं ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ अन्वीयमानः अनुगम्यमानः ॥ २७ ॥ दक्षिणंदक्षिणःकालेसंभृत्यस्वभुजंतदा ॥ हस्तिहस्तोपमंशैक्षंसर्वशस्त्रनि

निष्पपाततत्तस्तूर्णंपुत्रस्तवविशांपते ॥ सहितोभ्रातृभिस्तैस्तुदेवैरिवशतक्रतुः ॥ १८ ॥ ततस्तंनृपशार्दूलंशार्दूलसमविक्रमम् ॥ आरोहयद्रथंतूर्णंभ्रातादुःशासन स्तदा ॥ १९ ॥ अंगदीवद्दमुकुटोहस्ताभरणवान्नृप ॥ धार्तराष्ट्रोमहाराजविबभौसपथिव्रजन् ॥ २० ॥ भंडीपुष्पनिकाशेनतपनीयनिभेनच ॥ अनुलिप्तःपरार्घ्ये नचंदनेनसुगंधिना ॥ २१ ॥ अरजोंबरसंवीतःसिंहखेलगतिर्नृप ॥ शुशुभेविमलार्चिष्मान्नभसीवदिवाकरः ॥ २२ ॥ तंप्रयांतंनरव्याघ्रंभीष्मस्यशिबिरंप्रति ॥ अनुजग्मुर्महेष्वासाःसर्वलोकस्यधन्विनः ॥ २३ ॥ भ्रातरश्चमहेष्वासास्त्रिदशाइववासवम् ॥ हयानन्येसमारुत्यगजानन्येचभारत ॥ २४ ॥ रथानन्येनरश्रेष्ठंप रिवव्रुःसमंततः ॥ आत्तशस्त्राश्चसुहृदोरक्षणार्थंमहीपतेः ॥ २५ ॥ प्रादुर्बभूवुःसहिताःशक्रस्येवामरादिवि ॥ सपूज्यमानःकुरुभिःकौरवाणांमहाबलः ॥ २६ ॥ प्र ययौसदनंराजागांगेयस्ययशस्विनः ॥ अन्वीयमानःसततंसोदरैःपरिवारितः ॥ २७ ॥ दक्षिणंदक्षिणःकालेसंभृत्यस्वभुजंतदा ॥ हस्तिहस्तोपमंशैक्षंसर्वशस्त्रनि बर्हणम् ॥ २८ ॥ प्रगृह्यन्नंजलीन्नृणामुद्यतान्सर्वतोदिशः ॥ शुश्रावमधुरावाचोनानादेशनिवासिनाम् ॥ २९ ॥ संस्तूयमानःसूतैश्चमागधैश्चमहायशाः ॥ पूज यानश्चतान्सर्वान्सर्वलोकेश्वरेश्वरः ॥ ३० ॥ प्रदीपैःकांचनैस्तत्रगंधतैलावसेचितैः ॥ परिवव्रुर्महाराजप्रज्वलद्भिःसमंततः ॥ ३१ ॥ सतैःपरिवृतोराजाप्रदीपैःकां चनैर्ज्वलन् ॥ शुशुभेचंद्रमायुक्तोदीप्तैरिवमहाग्रहैः ॥ ३२ ॥ कांचनोष्णीषिणस्तत्रवेत्रझर्झरपाणयः ॥ प्रोत्साहयंतःशनकैस्तंजनंसर्वतोदिशम् ॥ ३३ ॥ संप्राप्यतु ततोराजाभीष्मस्यसदनंशुभम् ॥ अवतीर्यहयाच्चापिभीष्मंप्राप्यजनेश्वरः ॥ ३४ ॥ अभिवाद्यततोभीष्मंनिषण्णःपरमासने ॥ कांचनेसर्वतोभद्रेस्पर्द्धास्तरणसं वृते ॥ ३५ ॥ उवाचप्रांजलिर्भीष्मंबाष्पकंठोश्रुलोचनः ॥ त्वांवयंहिसमाश्रित्यसंयुगेशत्रुसूदन ॥ ३६ ॥ उत्सहेमरणेजेतुंसेंद्रानपिसुरासुरान् ॥ किमुपांडुसुता न्वीरान्समुद्यतान्बांधवान् ॥ ३७ ॥ तस्मादर्हसिगांगेयकृपांकर्तुमयिप्रभो ॥ जहिपांडुसुतान्वीरान्महेंद्रइवदानवान् ॥ ३८ ॥ अहंसर्वान्महाराजनिहनिष्यामिसो मकान् ॥ पंचालान्केकयैःसार्धंकरूषांश्चेतिभारत ॥ ३९ ॥ त्वद्वचःसत्यमेवास्तुजहिपार्थान्समागतान् ॥ सोमकांश्चमहेष्वासान्सत्यवाग्भवभारत ॥ ४० ॥ दय यार्थंदिवाराजन्द्वेष्यभावान्ममप्रभो ॥ मंदभाग्यतयावापिममरक्षसिपांडवान् ॥ ४१ ॥ अनुजानीहिसमरेकर्णमाहवशोभिनम् ॥ सजेष्यतिरणेपार्थान्ससुहृद्ग णंबांधवान् ॥ ४२ ॥

शस्त्रादिशिक्षासंपन्नं ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

सएवमुक्त्वानृपतिःपुत्रोदुर्योधनस्तव ॥ नोवाचवचनंकिंचिद्भीष्मंसत्यपराक्रमम् ॥ ४३ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवं० भीष्मंप्रतिदुर्योधनवाक्येसप्तनवतितमोऽध्यायः ॥ ९७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ वाक्शल्यैस्तवपुत्रेणसोतिविद्धोमहामनाः ॥ दुःखेनमहताविष्टोनोवाचाप्रियमण्वपि ॥ १ ॥ सध्यात्वासुचिरंकालंदुःखरोषसमन्वितः ॥ श्वसमानोयथानागःप्रणुन्नोवाक्शलाकया ॥ २ ॥ उद्दृत्यचक्षुषीकोपान्निर्दहन्निवभारत ॥ सदेवासुरगंधर्वलोकंलोकविदांवरः ॥ ३ ॥ अब्रवीत्तवपुत्रंससामपूर्वमिदंवचः ॥ किंत्वंदुर्योधनैवंमांवाक्शल्यैरपकृंतसि ॥ ४ ॥ घटमानंयथाशक्तिकुर्वाणंचतवप्रियम् ॥ जुह्वानंसमरेप्राणांस्तवैवप्रियकाम्यया ॥ ५ ॥ यदातुपांडवःशूरःखांडवेग्निमतर्पयत् ॥ पराजित्यरणेशक्रंपर्यामंत्रणन्निदर्शनम् ॥ ६ ॥ यदाचत्वांमहाबाहोगंधर्वैर्हृतमोजसा ॥ अमोचयत्पांडुसुतःपर्यामंत्रणन्निदर्शनम् ॥ ७ ॥ द्रवमाणेषुशूरेषुसोदरेषुतवप्रभो ॥ सूतपुत्रेचराधेयेपर्यामंत्रणन्निदर्शनम् ॥ ८ ॥ यच्चनःसहितान्सर्वान्विराटनगरेतदा ॥ एकएवसमुद्यांतःपर्यामंत्रणन्निदर्शनम् ॥ ९ ॥ द्रोणंचयुधिसंरब्धंमांचनिर्जित्यसंयुगे ॥ वासांसिससमादत्तपर्यामंत्रणन्निदर्शनम् ॥ १० ॥ तथाद्रौणिंमहेष्वासंशारद्वतमथापिच ॥ गोग्रहेजितवान्पूर्वंपर्यामंत्रणन्निदर्शनम् ॥ ११ ॥ विजित्यचयदाकर्णंसदापुरुषमानिनम् ॥ उत्तरायैददौवस्त्रंपर्यामंत्रणन्निदर्शनम् ॥ १२ ॥ निवातकवचान्युद्धेवासवेनापिदुर्जयान् ॥ जितवान्समरेपार्थःपर्यामंत्रणन्निदर्शनम् ॥ १३ ॥ कोहिशक्तोरणेजेतुंपांडवंरभसंतदा ॥ यस्यगोप्ताजगद्गोप्ताशंखचक्रगदाधरः ॥ १४ ॥ वासुदेवोनंतशक्तिःसृष्टिसंहारकारकः ॥ सर्वैश्वरैर्देवदेवःपरमात्मासनातनः ॥ १५ ॥ उक्तोसिबहुशोराजन्नारदाद्यैर्महर्षिभिः ॥ त्वंतुमोहान्नजानीषेवाच्यावाच्यंसुयोधन ॥ १६ ॥ मुमूर्षुर्हिनरःसर्वान्वृक्षान्पश्यतिकांचनान् ॥ तथात्वमपिगांधारेविपरीतानिपश्यसि ॥ १७ ॥ स्वयंवैरंमहत्कृत्वापांडवैःसहसृंजयैः ॥ युद्ध्यस्वतानद्यरणेपश्यामःपुरुषोभव ॥ १८ ॥ अहंतुसोमकान्सर्वान्पंचालांश्चसमागतान् ॥ निहनिष्येनरव्याघ्रवर्जयित्वाशिखंडिनम् ॥ १९ ॥ तेवाहंनिहतःसंख्येगमिष्येयमसादनम् ॥ तान्वानिहत्यसमरेप्रीतिंदास्याम्यहंतव ॥ २० ॥ पूर्वंहिस्त्रीसमुत्पन्नाशिखंडीराजवेश्मनि ॥ वरदानात्पुमान्जातः सैषावैस्त्रीशिखंडिनी ॥ २१ ॥ तमहंनहनिष्यामिप्राणत्यागेपिभारत ॥ यासौप्राङ्निर्मिताधात्रासैषावैस्त्रीशिखंडिनी ॥ २२ ॥ सुखंस्वपिहिगांधारेश्वास्मिकर्तामहारणम् ॥ यंजनाःकथयिष्यंतियावत्स्थास्यतिमेदिनी ॥ २३ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ ॥ १५९ ॥

॥ २४ ॥ महाजनंजनसमूहं क्षयंगहं ॥ २५ ॥ २६ ॥ २७ ॥ प्रत्यादेशंनिराकरणं ॥ २८ ॥ निर्वेदंखेदं ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ उद्योगेयुद्धात्पाक् ॥ ३७ ॥ ३८ ॥

एवमुक्तस्तवसुतोनिर्जगामजनेश्वर ॥ अभिवाद्यगुरुंमूर्ध्नाप्रययौस्वंनिवेशनम् ॥ २४ ॥ आगम्यतुततोराजाविसृज्यचमहाजनम् ॥ प्रविवेशततस्तूर्णंक्षयंशत्रुक्षयंकरः ॥ २५ ॥ प्रविष्टःसनिशांतांचगमयामासपार्थिव ॥ प्रभातायांचशर्वर्यांप्रातरुत्थायतान्नृपः ॥ २६ ॥ राज्ञःसमाज्ञापयतसेनांयोजयतेतिह ॥ अद्यभीष्मोरणेकुद्धोनिहन्यात्सोमकान् ॥ २७ ॥ दुर्योधनस्यतच्छ्रुत्वाराज्ञोविलपितंबहु ॥ मन्यमानःसतंराजन्प्रत्यादेशमिवात्मनः ॥ २८ ॥ निर्वेदंपरमंगत्वाविनिंद्यपरवश्यताम् ॥ दीर्घदध्यौशांतनवोयोद्धुकामोर्जुनंरणे ॥ २९ ॥ इंगितेनतुतज्ज्ञात्वागांगेयेनविचिंतितम् ॥ दुर्योधनोमहाराजदुःशासनमचोदयत् ॥ ३० ॥ दुःशासनरथास्तूर्णंयुज्यंतांभीष्मरक्षिणः ॥ द्वाविंशतिमनीकानिसर्वाण्येवाभिचोदय ॥ ३१ ॥ इदंहिसमनुप्राप्तंवर्षपूगाभिरर्चितम् ॥ पांडवानांससैन्यानांवधो राज्यस्यचागमः ॥ ३२ ॥ तत्रकार्यतमंमन्येभीष्मस्यैवाभिरक्षणम् ॥ सनोगुप्तःसहायःस्याद्धन्यात्पार्थांश्चसंयुगे ॥ ३३ ॥ अब्रवीद्विविशुद्धात्मानाहंहन्यांशिखंडिनम् ॥ स्त्रीपूर्वकोत्यसौराजंस्तस्माद्धर्म्योमयारणे ॥ ३४ ॥ लोकस्तद्वेदयदहंपितुःप्रियचिकीर्षया ॥ राज्यंस्फीतंमहाबाहोत्रियश्चत्यक्तवान्पुरा ॥ ३५ ॥ नैवचाहंस्त्रियंजातुनस्त्रीपूर्वंकथंचन ॥ हन्यांयुधिनरश्रेष्ठसत्यमेतद्ब्रवीमित्ते ॥ ३६ ॥ अयंस्त्रीपूर्वकोराजञ्छिखंडीयदितेश्रुतः ॥ उद्योगेकथितंयत्तत्तथाजाताशिखंडिनी ॥ ३७ ॥ कन्याभूत्वापुमान्जातःसचमांयोधयिष्यति ॥ तस्याहंप्रमुखेबाणान्नमुंचेयंकथंचन ॥ ३८ ॥ युद्धेहिक्षत्रियांस्तातपांडवानांजयैषिणः ॥ सर्वानन्यान्हनिष्यामिसंप्राप्तान्रणमूर्धनि ॥ ३९ ॥ एवंमांभरतश्रेष्ठगांगेयःप्राहशास्त्रवित् ॥ तत्रसर्वात्मनामान्येगांगेयस्यैवपालनम् ॥ ४० ॥ अरक्ष्यमाणंहिवकोहन्यात्सिंहंहाहवे ॥ मात्रकेणेवगांगेयंघातयेमशिखंडिना ॥ ४१ ॥ मातुलःशकुनिःशल्यःकृपोद्रोणोविविंशतिः ॥ यत्तारक्षंतुगांगेयंतस्मिन्गुप्तेध्रुवोजयः ॥ ४२ ॥ एतच्छ्रुत्वातुतेसर्वेदुर्योधनवचस्तदा ॥ सर्वतोरथवंशेनगांगेयंपर्यवारयन् ॥ ४३ ॥ पुत्राश्चतवगांगेयंपरिवार्यययुर्मुदा ॥ कंपयंतोभुवंयांचक्षोभयंतश्चपांडवान् ॥ ४४ ॥ तेरथैःसुप्रसंयुक्तैर्दंतिभिश्चमहारथाः ॥ परिवार्यरणेभीष्मंदंशिताःसमवस्थिताः ॥ ४५ ॥ यथादेवासुरेयुद्धेन्द्रिदशावज्रधारिणम् ॥ सर्वेतेस्मव्यतिष्ठंतरक्षंतस्तंमहारथम् ॥ ४६ ॥ ततोदुर्योधनोराजापुनर्भ्रातरमब्रवीत् ॥ सव्यंचक्रंयुधामन्युरुत्तमौजाश्चदक्षिणम् ॥ ४७ ॥ गोप्तारावर्जुनस्यैतावर्जुनोपिशिखंडिनः ॥ रक्ष्यमाणःसपार्थेनतथास्माभिर्विवर्जितः ॥ ४८ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ॥ इतिश्रीभीष्मपर्वणिनै० भा० अष्टनवतितमोऽध्यायः ॥ ९८ ॥ ॥ ७ ॥ ॥ ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

यथाभीष्मंननोहन्याद्दुःशासनतथाकुरु ॥ भ्रातुस्तद्वचनंश्रुत्वापुत्रोदुःशासनस्तव ॥ ४९ ॥ भीष्मंप्रमुखतःकृत्वाप्रययौसहसेनया ॥ भीष्मंतुरथवंशेनदृष्ट्वाभरतर्षभ ॥ सिसंवृतम् ॥ ५० ॥ अर्जुनोरथिनांश्रेष्ठोधृष्टद्युम्नमुवाचह ॥ शिखंडिनंनरव्याघ्रंभीष्मस्यप्रमुखेनृप ॥ स्थापयस्वाद्यपांचाल्यतस्यगोप्ताहमित्युत ॥ ५१ ॥ ॥इति श्रीमहाभा० भीष्मपर्वणिभीष्मव० भीष्मदुर्योधनसंवादेअष्टनवतितमोऽध्यायः ॥ ९८ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ ततःशांतनवोभीष्मोनिर्ययौ सहसेनया ॥ व्यूहंचाव्यूहतमहत्सर्वतोभद्रमात्मनः ॥ १ ॥ कृपश्चकृतवर्माचशैब्यश्चैवमहारथः ॥ शकुनिःसैंधवश्चैवकांबोजश्चसुदक्षिणः ॥ २ ॥ भीष्मेणसहिताः सर्वेपुत्रैश्चतवभारत ॥ अग्रतःसर्वसैन्यानांव्यूहस्यप्रमुखेस्थिताः ॥ ३ ॥ द्रोणोभूरिश्रवाःशल्योभगदत्तश्चमारिष ॥ दक्षिणंपक्षमाश्रित्यस्थिताव्यूहस्यदंशिताः ॥ ४ ॥ अश्वत्थामासोमदत्तश्चावंत्यौचमहारथौ ॥ महत्यासेनयायुक्तावामंपक्षमपालयन् ॥ ५ ॥ दुर्योधनोमहाराजत्रिगर्तैःसर्वतोवृतः ॥ व्यूहमध्येस्थितोराजन्पांडवान्प्रतिभारत ॥ ६ ॥ अलंबुषोरथश्रेष्ठःश्रुतायुश्चमहारथः ॥ पृष्ठतःसर्वसैन्यानांस्थितौव्यूहस्यदर्शितौ ॥ ७ ॥ एवंचतंतदाव्यूहंकृत्वाभारततावकाः ॥ सन्नद्धाःसमदृश्यंतप्रतपंतइवाग्नयः ॥ ८ ॥ ततोयुधिष्ठिरोराजाभीमसेनश्चपांडवः ॥ नकुलःसहदेवश्चमाद्रीपुत्रावुभावपि ॥ ९ ॥ अग्रतःसर्वसैन्यानांस्थिताव्यूहस्यदंशिताः ॥ धृष्टद्युम्नोविराटश्चसात्यकिश्चमहारथः ॥ १० ॥ स्थिताःसैन्येनमहतापरानीकविनाशनाः ॥ शिखंडीविजयश्चैवराक्षसश्चघटोत्कचः ॥ ११ ॥ चेकितानोमहाबाहुःकुंतिभोजश्चवीर्यवान् ॥ स्थितारणेमहाराजमहत्यासेनयावृताः ॥ १२ ॥ अभिमन्युर्महेष्वासोद्रुपदश्चमहाबलः ॥ युयुधानोमहेष्वासोयुधामन्युश्चवीर्यवान् ॥ १३ ॥ केकयाश्चभ्रातरश्चैवस्थितायुद्धायदंशिताः ॥ एवंतेपिमहाव्यूहंप्रतिव्यूह्यसुदुर्जयम् ॥ १४ ॥ पांडवाःसमरेशूराःस्थितायुद्धायदंशिताः ॥ तावकास्तुरणेयत्ताःसहसेनानराधिपाः ॥ १५ ॥ अभ्युद्ययूरणेपार्थान्भीष्मंकृत्वाग्रतोनृप ॥ तथैवपांडवाराजन्भीमसेनपुरोगमाः ॥ १६ ॥ भीष्मंयोद्धुमभीप्संतःसंग्रामेविजयैषिणः ॥ क्ष्वेडाःकिलकिलाःशंखान्ककचान्गोविषाणिकाः ॥ १७ ॥ भेरीमृदंगपणवान्नादयंतश्चपुष्करान् ॥ पांडवाअभ्यवर्तंतनदंतोभैरवान्रवान् ॥ १८ ॥ भेरीमृदंगशंखानांदुंदुभीनांचनिःस्वनैः ॥ उत्कृष्टसिंहनादैश्चवल्गितैश्चपृथग्विधैः ॥ १९ ॥ वयंप्रतिनदंतस्तानगच्छामत्वरान्विताः ॥ सहसैवाभिसंक्रुद्धास्तदासीत्तुमुलंमहत् ॥ २० ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

॥ १६० ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ बलवायसाः बलोदयाःकाकाः ॥ २७ ॥ २८ ॥ महासमुच्छ्रयेमहतियुद्धे युद्धेसमुच्छ्रयःपुमानितिमेदिनी ॥ २९ ॥ अभ्यायतीनामभिमुखमागच्छंतीनां

ततोन्योन्यंप्रधावंतःसंप्रहारंप्रचक्रिरे ॥ ततःशब्देनमहताप्रचकंपेवसुंधरा ॥ २१ ॥ पक्षिणश्चमहाघोरंव्याहरंतोविवभ्रमुः ॥ सप्रभश्चोदितःसूर्योनिष्प्रभःसमपद्यत ॥ २२ ॥ ववुश्चवातास्तुमुलाःशंसंतःसुमहद्भयम् ॥ घोराश्चघोरनिर्ह्रादाःशिवास्तत्रववाशिरे ॥ २३ ॥ वेदयंत्योमहाराजमहद्वैशसमागतम् ॥ दिशःप्रज्वलिताराजन्पांसुवर्षंपपातच ॥ २४ ॥ रुधिरेणसमुन्मिश्रमस्थिवर्षंतथैवच ॥ रुदतांवाहनानांचनेत्रेभ्यःप्रापतज्जलम् ॥ २५ ॥ सुसुबुश्चशकृन्मूत्रंप्रध्यायंतोविशांपते ॥ अंतर्हितामहानादाःश्रूयंतेभरतर्षभ ॥ २६ ॥ रक्षसांपुरुषादानांनदतांभैरवान्रवान् ॥ संपतंतश्चदृश्यंतेगोमायुबलवायसाः ॥ २७ ॥ श्वानश्चविविधैर्नादैर्वाशंतस्तत्रमारिष ॥ ज्वलिताश्चमहोल्कावैसमाहत्यदिवाकरम् ॥ निपेतुःसहसाभूमौवेदयंत्योमहद्भयम् ॥ २८ ॥ महात्यनीकानिमहासमुच्छ्रयेततस्तयोःपांडवधार्तराष्ट्र्योः ॥ चकंपिरेशंखशब्दंगनिःस्वनैःप्रकंपितानीववनानिवायुना ॥ २९ ॥ नरेंद्रनागाश्वसमाकुलानामभ्यायतीनामशिवेमुहूर्ते ॥ बभूवघोषस्तुमुलश्चमूनांवातोद्धुतानामिवसागराणाम् ॥ ३० ॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिपरस्परव्यूहरचनायांउत्पातदर्शनेऊनशततमोऽध्यायः ॥ ९९ ॥ ॥ ७ ॥ ॥संजयउवाच॥ ॥अभिमन्यूरथोदारःप्रिशंगैस्तुरगोत्तमैः॥ अभिदुद्रावतेजस्वीदुर्योधनबलंमहत् ॥ १ ॥ विकिरन्शरवर्षाणिवारिधाराइवांबुदः॥ नशोकुःसमरेकुद्धंसौभद्रमरिसूदनम् ॥ २ ॥ शस्त्रौघिणंगाहमानंसेनासागरमक्षयम् ॥ निवारयितुमप्याजौवदीयाःकुरुनंदन ॥ ३ ॥ तेनमुक्तारणेराजन्शराःशत्रुनिबर्हणाः ॥ क्षत्रियाननयन्शूरान्श्वेतराजनिवेशनम् ॥ ४ ॥ यमदंडोपमान्घोरान्ज्वलिताशीविषोपमान् ॥ सौभद्रःसमरेकुद्धःप्रेषयामाससायकान् ॥ ५ ॥ सरथान्रथिनस्तूर्णंहयांश्चैवससादिनः ॥ गजारोहांश्चसगजान्दारयामासफाल्गुनिः ॥ ६ ॥ तस्यतत्कुर्वतःकर्ममहत्संख्येमहीक्षितः ॥ पूजयांचक्रिरेहृष्टाःप्रशशंसुश्चफाल्गुनिम् ॥ ७ ॥ वान्यनीकानिसौभद्रोद्रावयामासभारत ॥ तूलराशीनिवाकाशेमारुतःसर्वतोदिशम् ॥ ८ ॥ तेनविद्राव्यमाणानितवसैन्यानिभारत ॥ त्रातारंनाध्यगच्छंतपंकमग्नाइवद्विपाः ॥ ९ ॥ विद्राव्यसर्वसैन्यानितावकानिनरोत्तम ॥ अभिमन्युःस्थितोराजन्विधूमोग्निरिवज्वलन् ॥ १० ॥ नचैनंतावकाराजन्विषेहुररिघातिनम् ॥ प्रदीप्तंपावकंयद्वत्पतंगाःकालचोदिताः ॥ ११ ॥

॥ ३० ॥ इतिभीष्मपर्वणिनै० भा० ऊनशततमोऽध्यायः ॥ ९९ ॥ ॥७॥ ॥ अभिमन्युरिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ लघुसुचशीघ्रंशोभनंक्षयथास्यात्तथा ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ आर्ष्यशृंगिमलंबुषं ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

प्रहरन्सर्वशत्रुभ्यःपांडवानांमहारथः॥ अदृश्यतमहेष्वासःसवज्रइववासवः ॥ १२ ॥ हेमपृष्ठंधनुश्चास्यदृश्यतेविचरद्दिशः॥ तोयदेषुयथाराजन्राजमानाशत ह्रदा ॥ १३ ॥ शराश्वनिशिताःपीतानिश्चरंतिस्मसंयुगे॥ वनात्फलद्रुमाद्राजन्भ्रमराणामिवव्रजाः ॥ १४ ॥ तथैवचरतस्तस्यसौभद्रस्यमहात्मनः॥ रथेनकांच नांगेनदृश्युर्नातरंजनाः॥ १५॥ मोहयित्वारुपंद्रोणंद्रौणिंचसबृहद्बलम्॥ सैंधवंचमहेष्वासोव्यचरद्बधुसुषुच ॥ १६ ॥ मंडलीकृतमेवास्यधनुःपश्यामभारत॥ सूर्यमंडलसंकाशंदहतस्तववाहिनीम्॥ १७ ॥ तंदृष्ट्वाक्षत्रियाःशूराःप्रतपंतंतरस्विनम्॥ द्वितीयाल्गुनमिमंलोकंमेनिरेतस्यकर्मभिः॥ १८ ॥ तेनार्दितामहाराजभा रतीसामहाचमूः॥ व्यभ्रमत्तत्रतत्रैवयोषिन्मदवशादिव ॥ १९ ॥ द्रावयित्वामहासैन्यंकंपयित्वामहारथान्॥ नंदयामाससुहृदोमयंजित्वेववासवः॥ २० ॥ ते नविद्राव्यमाणानितवसैन्यानिसंयुगे॥ चक्रुरार्तस्वनंघोरंपर्जन्यनिनदोपमम्॥ २१ ॥ तंश्रुत्वानिनदंघोरंतवसैन्यस्यभारत॥ मारुतोद्धूतवेगस्यसागरस्येवपर्व णि ॥ २२ ॥ दुर्योधनस्तदाराजन्नार्ष्यशृंगिमभाषत ॥ एषकार्ष्णिर्महाबाहोद्वितीयइवफाल्गुनः॥ २३ ॥ चमूंद्रावयतेक्रोधाद्दात्रोदेवचमूमिव॥ तस्यचान्यन्नप श्यामिसंयुगेभेषजंमहत् ॥ २४ ॥ कृतेत्वांराक्षसश्रेष्ठंसर्वविद्यासुपारगम्॥ सगत्वात्वरितंवीरंजहिसौभद्रमाहवे ॥ २५ ॥ वयंपार्थहनिष्यामोभीष्मद्रोणपुरोग माः॥ सएवमुक्तोबलवान्राक्षसेंद्रःप्रतापवान्॥ २६ ॥ प्रययौसमरेतूर्णंतवपुत्रस्यशासनात् ॥ नर्दमानोमहानादंप्रावृषीवबलाहकः ॥ २७ ॥ तस्यशब्देनमह तापांडवानांबलंमहत्॥ प्राचलत्सर्वतोराजन्वातोद्धूतइवार्णवः ॥ २८ ॥ बहवश्चमहाराजतस्यनादेनभीषिताः॥ प्रियान्प्राणान्परित्यज्यनिपेतुर्धरणीतले॥ २९॥ कार्ष्णिश्चापिमुदायुक्तःप्रगृह्यसशरंधनुः ॥ नृत्यन्निवरथोपस्थेतद्रक्षःसमुपाद्रवत् ॥ ३० ॥ ततःसराक्षसःक्रुद्धःसंप्राप्यैवार्जुनिंरणे॥ नातिदूरेस्थितांतस्यद्राव यांमासवैचमूम् ॥ ३१ ॥ तांवध्यमानांचतथापांडवानांमहाचमूम् ॥ प्रत्युद्ययौरणेरक्षोदेवसेनांयथाबलः ॥ ३२ ॥ विमर्दःसुमहानासीत्तस्यसैन्यस्यमारि ष॥ रक्षसाघोररूपेणवध्यमानस्यसंयुगे ॥ ३३ ॥ ततःशरसहस्रैस्तांपांडवानांमहाचमूम् ॥ व्यद्रावयद्रणेरक्षोदर्शयन्स्वपराक्रमम्॥ ३४ ॥ सावध्यमानाचत यापांडवानामनीकिनी॥ रक्षसाघोररूपेणप्रदुद्रावरणेभयात्॥ ३५ ॥ प्रद्युम्नचरणेसेनांपद्मिनींवारणोयथा ॥ ततोभिदुद्रावरणेद्रौपदेयान्महाबलान्॥ ३६ ॥ तेतुक्रुद्धामहेष्वासाद्रौपदेयाःप्रहारिणः॥ राक्षसंदुद्रुवुःसंख्येग्रहाःपंचरविंयथा॥ ३७॥

॥ १६१ ॥

॥ ३० ॥ ३१॥३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

॥ ३८ ॥ सर्वपारशवैःसर्वलोहमयैः॥ ३९ ॥ संस्यूतोग्रथितः ॥४०॥४१॥४२॥४३॥४४॥४५॥४६॥४७॥४८॥४९॥५०॥५१॥५२॥५३॥५४॥ ॥इतिभीष्मपर्वणिनै०भा०शततमोऽध्यायः ॥१००॥

वीर्यवद्भिस्ततस्तैस्तुपीडितोराक्षसोत्तमः॥ यथायुगक्षयेघोरेचंद्रमाःपंचभिर्ग्रहैः ॥ ३८ ॥ प्रतिविध्यस्ततोरक्षोबिभेदनिशितैःशरैः ॥ सर्वपारशवैस्तूर्णैरकुंठा ग्रैर्महाबलः॥ ३९॥ सतैर्भिन्नतनुत्राणःशुशुभेराक्षसोत्तमः॥ मरीचिभिरिवार्कस्यसंस्यूतोजलदोमहान्॥ ४० ॥ विषक्तैःसशरैश्चापितपनीयपरिच्छदैः ॥ आ र्ष्यशृंगिर्वभौराजन्दीप्तशृंगइवाचलः॥ ४१ ॥ ततस्तेभ्रातरःपंचराक्षसेंद्रंमहाहवे॥ विव्यधुर्निशितैर्बाणैस्तपनीयविभूषितैः ॥ ४२ ॥ सनिर्भिन्नःशरैर्घोरैर्भुजगैः कीपितैरिव॥ अलंबुषोमहाराजन्नागेंद्रइवचुक्रुधे ॥ ४३ ॥ सोतिविद्धोमहाराजमुहूर्तमथमारिष॥ प्रविवेशतमोदीर्घंपीडितस्तैर्महारथैः ॥ ४४ ॥ प्रतिलभ्यत तःसंज्ञांक्रोधेनद्विगुणीकृतः॥ चिच्छेदसायकांस्तेषांध्वजांश्चैवधनूंषिच ॥ ४५ ॥ एकैकंपंचभिर्बाणैराजघानस्मयन्निव ॥ अलंबुषोरथोपस्थेनृत्यन्निवमहार थः॥ ४६॥ त्वरमाणःसुसंरब्धोहयांस्तेषांमहात्मनाम्॥ जघानराक्षसःक्रुद्धःसारथींश्चमहाबलः॥ ४७ ॥ विभेदचसुसंरब्धःपुनश्चैनान्सुसंशितैः॥ शरैर्बहुविधा कारैःशतशोथसहस्रशः॥ ४८ ॥ विरथांश्चमहेष्वासान्कृत्वातत्रसराक्षसः॥ अभिदुद्राववेगेनहंतुकामोनिशाचरः ॥ ४९ ॥ तानर्दितान्रणेतेनराक्षसेनदुरा त्मना॥ दृष्ट्वार्जुनसुतःसंख्येराक्षसंसमुपाद्रवत् ॥ ५० ॥ तयोःसमभवद्युद्धंवृत्रवासवयोरिव ॥ ददृशुस्तावकाःसर्वेपांडवाश्चमहारथाः ॥ ५१ ॥ तौसमेतौमहा युद्धेक्रोधदीप्तौपरस्परम्॥ महाबलौमहाराजक्रोधसंरक्तलोचनौ॥५२॥ परस्परमवेक्षेतांकालानलसमौयुधि॥ तयोःसमागमोघोरोबभूवकटुकोदयः॥५३॥ यथादेवासुरेयुद्धेशक्रशंबरयोःपुरा॥५४॥ ॥इतिश्रीमहाभा०भीष्मपर्वणिभीष्मव०अलंबुषाभिमन्युसमागमेशततमोऽध्यायः॥ १००॥ ॥७३॥

धृतराष्ट्रउवाच ॥ आर्जुनिंसमरेशूरंविनिघ्नंतंमहारथान्॥ अलंबुषःकथंयुद्धेप्रत्ययुध्यतसंजय ॥ १॥ आर्ष्यशृंगिंकथंचैवसौभद्रःपरवीरहा॥ तन्ममाचक्ष्व तत्त्वेनयथाह्यत्तंस्मसंयुगे॥ २॥ धनंजयश्चकिंचक्रेममसैन्येषुसंयुगे॥ भीमोवारथिनांश्रेष्ठोराक्षसोवापटोत्कचः॥३॥ नकुलःसहदेवोवासात्यकिर्वामहारथः॥ एतदाचक्ष्वमेसत्यंकुशलोत्यसिसंजय॥ ४॥ ॥संजयउवाच॥ ॥हंततेहंप्रवक्ष्यामिसंग्रामंलोमहर्षणम्॥ यथाभूद्राक्षसेंद्रस्यसौभद्रस्यचमारिष ॥ ५ ॥ अर्जुनश्चययासंख्येभीमसेनश्चपांडवः॥ नकुलःसहदेवश्चरणेचक्रुःपराक्रमम्॥ ६॥ तथैवतावकाःसर्वेभीष्मद्रोणपुरःसराः॥ अद्भुतानिविचित्राणिचक्रुःकर्मा ण्यभीतवत्॥ ७॥ अलंबुषस्तुसमरेअभिमन्युंमहारथम्॥ विनद्यसुमहानादंतर्जयित्वामुहुर्मुहुः॥८॥

आर्जुनिमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

अभिदुद्राववेगेनतिष्ठतिष्ठेतिचाब्रवीत्॥ अभिमन्युश्चवेगेनसिंहवद्विनदन्मुहुः॥ ९ ॥ आर्ष्यशृंगिंमहेष्वासंपितुरत्यंतवैरिणम्॥ ततःसमीयतुःसंख्येत्वरितौनर राक्षसौ॥ १० ॥ रथाभ्यांरथिनौश्रेष्ठौयथावैदेवदानवौ॥ माय्रावीराक्षसश्रेष्ठोदिव्यास्त्रश्चैवफाल्गुनिः॥ ११ ॥ ततःकार्ष्णिर्महाराजनिशितैःसायकैस्त्रिभिः॥ आर्ष्यशृंगिंरणेविद्धापुनर्विव्याधपंचभिः॥ १२ ॥ अलंबुषोपिसंक्रुद्धःकार्ष्णिनवभिराशुगैः॥ हृदिविव्याधवेगेनतोत्रैरिवमहाद्विपम्॥ १३॥ ततःशरसहस्रेण क्षिप्रकारीनिशाचरः॥ अर्जुनस्यसुतंसंख्येपीडयामासभारत॥ १४॥ अभिमन्युस्ततःक्रुद्धोनवभिर्नतपर्वभिः॥ विभेदनिशितैर्बाणैराक्षसेंद्रंमहोरसि॥ १५॥ तेतस्यविविशुस्तूर्णकायंनिर्भिद्यमर्मसु॥ सतैर्विभिन्नसर्वांगःशुशुभेराक्षसोत्तमः॥ १६॥ पुष्पितैःकिंशुकैराजन्संस्तीर्णइवपर्वतः॥ संधारयांणश्चशरान्हेम पुंखान्महाबलः॥ १७॥ विबभौराक्षसश्रेष्ठःसज्वालइवपर्वतः॥ ततःक्रुद्धोमहाराजआर्ष्यशृंगिरमर्षणः॥ १८॥ महेंद्रप्रतिमंकार्ष्णिछादयामासपत्रिभिः॥ ते नतेविशिखामुक्तायमदंडोपमाःशिताः॥ १९॥ अभिमन्युंविनिर्भिद्यप्राविशंतधरातलम्॥ तथैवार्जुनिनामुक्ताःशराःकनकभूषणाः॥ २०॥ अलंबुषंविनिर्भि द्यप्राविशंतधरातलम्॥ सौभद्रस्तुरणेरक्षःशरैःसन्नतपर्वभिः॥ २१॥ चक्रेविमुखमासाद्यमयंशक्रइवाहवे॥ विमुखंचरणेरक्षोवध्यमानंरणेरिणा॥ २२॥ प्रादु श्चक्रेमहामायांतामसींपरतापनाम्॥ ततस्तेतमसासर्वेवृताश्चासन्महीपते॥ २३॥ नाभिमन्युमपश्यंतनैवस्वान्नपरान्रणे॥ अभिमन्युश्चतदृष्ट्वाघोररूपंमहत्तमः ॥ २४॥ प्रादुश्चक्रेस्वमत्युग्रंभास्करंकुरुनंदनः॥ ततःप्रकाशमभवज्जगत्सर्वंमहीपते॥ २५॥ तांचाभिजघ्निवान्मायांराक्षसस्यदुरात्मनः॥ संक्रुद्धश्चमहावीर्यो राक्षसेंद्रंनरोत्तमः॥ २६॥ छादयामाससमरेशरैःसन्नतपर्वभिः॥ बह्वीस्तथान्यामायाश्चप्रयुक्तास्तेनरक्षसा॥ २७॥ सर्वास्त्रविदमेयात्मावारयामासफाल्गु निः॥ हतमायंततोरक्षोवध्यमानंचसायकैः॥ २८॥ रथंतत्रैवसंत्यज्यप्राद्रवन्महतोभयात्॥ तस्मिन्विनिर्जितेतूर्णंकूटयोधिनिराक्षसे॥ २९॥ आर्जुनिःसमरे सैन्यंतावकंसंममर्दह॥ मदांधोगंधनागेंद्रःसपद्मांपद्मिनीमिव॥ ३०॥ ततःशांतनवोभीष्मःसैन्यंदृष्ट्वाभिविद्रुतम्॥ महताशरवर्षेणसौभद्रंपर्यवारयत्॥ ३१॥ कोष्ठीकृत्यचतंवीरंधार्तराष्ट्रामहारथाः॥ एकंसुबहवोयुद्धेततक्षुःसायकैर्दृढम्॥ ३२॥ सतेषांरथिनांवीरःपितुस्तुल्यपराक्रमः॥ सदृशोवासुदेवस्यविक्रमेणबले नच॥ ३३॥ उभयोःसदृशंकर्मसपितुर्मातुलस्यच॥ रणेबहुविधंचक्रेसर्वशस्त्रभृतांवरः॥ ३४॥

॥ १६२ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

ततोधनंजयोवीरोविनिघ्नंस्तवसैनिकान्॥ आससादरणेभीष्मंपुत्रप्रेप्सुरमर्षणः॥ ३५॥ तथैवसमरेराजन्पितादेवव्रतस्तव॥ आससादरणेपार्थस्वर्भानुरिव भास्करम्॥ ३६॥ ततःसरथनागाश्वाःपुत्रास्तवजनेश्वर॥ परिवव्रूरणेभीष्मंजुगुपुश्चसमंततः॥ ३७॥ तथैवपांडवाराजन्परिवार्यधनंजयम्॥ रणायमहतेयुक्ता दंशिताभरतर्षभ॥ ३८॥ शारद्वतस्ततोराजन्भीष्मस्यप्रमुखेस्थितम्॥ अर्जुनंपंचविंशत्यासायकानांसमाचिनोत्॥ ३९॥ प्रत्युद्गम्याथविव्याधसात्यकिस्तंशि तैःशरैः॥ पांडवप्रियकामार्थंशार्दूलइवकुंजरम्॥ ४०॥ गौतमोपित्वरायुक्तोमाधवंनवभिःशरैः॥ हृदिविव्याधसंक्रुद्धःकंकपत्रपरिच्छदैः॥ ४१॥ शैनेयोपिततः क्रुद्धश्चापमानम्यवेगवान्॥ गौतमांतकरंतूर्णंसमाधत्तशिलीमुखम्॥ ४२॥ तमापतंतंवेगेनशक्राशनिसमद्युतिम्॥ द्विधाचिच्छेदसंक्रुद्धोद्रौणिःपरमकोपनः ॥ ४३॥ समुत्सृज्याथशैनेयोगौतमंरथिनांवरः॥ अभ्यद्रवद्रणेद्रौणिंराहुःखेशशिनंयथा॥ ४४॥ तस्यद्रोणसुतश्चापंद्विधाचिच्छेदभारत॥ अथैनंछिन्नधन्वानंताड यामाससायकैः॥ ४५॥ सोन्यत्कार्मुकमादायशत्रुघ्नंभारसाधनम्॥ द्रौणिंषष्ट्यामहाराजबाह्वोरुरसिचार्पयत्॥ ४६॥ सविद्धोव्यथितश्चैवमुहूर्तंकश्मलायुतः॥ निषसादरथोपस्थेध्वजयष्टिंसमाश्रितः॥ ४७॥ प्रतिलभ्यततःसंज्ञांद्रौणपुत्रःप्रतापवान्॥ वार्ष्णेयंसमरेकुद्धोनाराचेनसमार्पयत्॥ ४८॥ शैनेयंसतुनिर्भिद्य प्राविशद्धरणीतलम्॥ वसंतकालेबलवान्बिलंसर्पइवाशुयथा॥ ४९॥ अथापरेणभल्लेनमाधवस्यध्वजोत्तमम्॥ चिच्छेदसमरेद्रौणिःसिंहनादंमुमोचह॥ ५०॥ पु नश्चैनंशरैर्घोरैश्छादयामासभारत॥ निदाघांतेमहाराजयथामेघोदिवाकरम्॥ ५१॥ सात्यकोपिमहाराजशरजालंनिहत्यतत्॥ द्रौणिमभ्याकिरत्तूर्णंशरजालै रनेकधा॥ ५२॥ तापयामासचद्रौणिंशैनेयःपरवीरहा॥ विमुक्तोमेघजालेनयथैवतपनस्तथा॥ ५३॥ शराणांचसहस्रेणपुनरेवसमुद्यतः॥ सात्यकिश्छादया मासननादचमहाबलः॥ ५४॥ दृष्ट्वापुत्रंक्षतंग्रस्तंराहुणेवनिशाकरम्॥ अभ्यद्रवत्शैनेयंभारद्वाजःप्रतापवान्॥ ५५॥ विव्याधचसुतीक्ष्णेनपृषत्केनमहाहवे परीप्सन्सुतंराजन्वार्ष्णेयेनाभिपीडितम्॥ ५६॥ सात्यकिस्तुरणेहित्वागुरुपुत्रंमहारथम्॥ द्रोणंविव्याधविंशत्यासर्वपारशवैःशरैः॥ ५७॥ तदंतरमभेयात्मा कैतियःशत्रुतापनः॥ अभ्यद्रवद्रणेक्रुद्धोद्रोणंप्रतिमहारथः॥ ५८॥

॥ ५९ ॥ ॥ इतिभीष्मपर्वणिनै०भा० एकाधिकशततमोऽध्यायः ॥ १०१ ॥ ॥ ७ ॥ ॥ कृयमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

ततोद्रोणश्चपार्थश्चसमेयातांमहाहवे ॥ यथाबुधश्चशुक्रश्चमहाराजनभस्तले ॥ ५९ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव० अलंबुषाभिमन्युयुद्धेएकाधिकशततमोऽध्यायः ॥ १०१ ॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ कथंद्रोणोमहेष्वासःपांडवश्चधनंजयः ॥ समीयतूरणेयत्तौतावुभौपुरुषर्षभौ ॥ १ ॥ प्रियोहिपांडवोनित्यंभारद्वाजस्यधीमतः ॥ आचार्यश्चरणेनित्यंप्रियःपार्थस्यसंजय ॥ २ ॥ तावुभौरथिनौसंख्येहृशौसिंहाविवोत्कटौ ॥ कथंसमीयतुर्यत्तौभारद्वाजधनंजयौ ॥ ३ ॥ ॥ संजयउवाच ॥ ॥ नद्रोणःसमरेपार्थंजानीतेप्रियमात्मनः ॥ क्षत्रधर्मंपुरस्कृत्यपार्थोवागुरुमाहवे ॥ ४ ॥ नक्षत्रियारणेराजन्वर्जयंतिपरस्परम् ॥ निर्मर्यादंहियुध्यंतेपितृभिर्भ्रातृभिःसह ॥ ५ ॥ रणेभारतपार्थेनद्रोणोविद्धस्त्रिभिःशरैः ॥ नाचिंतयच्चतान्बाणान्पार्थचापच्युतान्युधि ॥ ६ ॥ शरवृष्ट्यापुनःपार्थश्छादयामासतंरणे ॥ सप्रजज्वालरोषेणगहनेग्निरिवोर्जितः ॥ ७ ॥ ततोर्जुनंरणेद्रोणःशरैःसन्नतपर्वभिः ॥ छादयामासराजेंद्रनचिरादेवभारत ॥ ८ ॥ ततोदुर्योधनोराजासुशर्माणमचोदयत् ॥ द्रोणस्यसमरेराजन्पार्ष्णिग्रहणकारणात् ॥ ९ ॥ त्रिगर्तराडपिकुद्धोभृशमायम्यकार्मुकम् ॥ छादयामाससमरेपार्थं बाणैरयोमुखैः ॥ १० ॥ ताभ्यांमुक्ताःशराराजन्नंतरिक्षेविरेजिरे ॥ हंसाइवमहाराजशरत्कालेनभस्तले ॥ ११ ॥ तेशराःप्राप्यकैतियंसमंताद्विशुःप्रभो ॥ फलभारनतंयद्वत्स्वादुवृक्षंविहंगमाः ॥ १२ ॥ अर्जुनस्तुरणेनादंविनद्यरथिनांवरः ॥ त्रिगर्तराजंसमरेसपुत्रंविव्यधेशरैः ॥ १३ ॥ तेवध्यमानाःपार्थेनकालेनेवयुगक्षये ॥ पार्थमेवाभ्यवर्तंतमरणेकृतनिश्चयाः ॥ १४ ॥ मुमुचुःशरवृष्टिंचपांडवस्यरथंप्रति ॥ शरवृष्टिंततस्तांतुशरवर्षैःसमंततः ॥ १५ ॥ प्रतिजग्राहराजेंद्रतोयवृष्टिमिवाचलः ॥ तत्राद्भुतमपश्यामबीभत्सोर्हस्तलाघवम् ॥ १६ ॥ विमुक्तांबहुभिर्योधैःशस्त्रवृष्टिंदुरासदाम् ॥ यदेकोवारयामासमारुतोऽभ्रगणानिव ॥ १७ ॥ कर्मणातेनपार्थस्यतुतुषुर्देवदानवाः ॥ अथकुद्धोरणेपार्थस्त्रिगर्तान्प्रतिभारत ॥ १८ ॥ मुमोचास्त्रंमहाराजवायव्यंधृतनामुखे ॥ प्रादुरासीत्ततोवायुःक्षोभयाणोनभस्तलम् ॥ १९ ॥ पातयन्वैतरुगणान्विनिघ्नंश्चैवसैनिकान् ॥ ततोद्रोणोभिवीक्ष्यैववायव्यास्त्रंसुदारुणम् ॥ २० ॥ शैलमन्यन्महाराजघोरमस्त्रंमुमोचह ॥ द्रोणेनयुधिनिर्मुक्तेतस्मिन्नस्त्रेनराधिप ॥ २१ ॥ प्रशशामततोवायुःप्रसन्नाश्चदिशोदश ॥ ततःपांडुसुतोवीरस्त्रिगर्तस्यरथव्रजान् ॥ २२ ॥ निरुत्साहान्रणेचक्रेविमुखान्विपराक्रमान् ॥ ततोदुर्योधनश्चैवकृपश्चरथिनांवरः ॥ २३ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

॥ १६३ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेद्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

अश्वत्थामातयाशल्यःकांबोजश्चसुदक्षिणः ॥ विंदानुविंदावावंत्यौबाह्लिकःसहबाह्लिकैः ॥ २४ ॥ महतारथवंशेनपार्थस्यावारयन्दिशः ॥ तथैवभगदत्तश्चश्रुतायुश्चमहाबलः ॥ २५ ॥ गजानीकेनभीमस्यतावावारयतांदिशः ॥ भूरिश्रवाःशलश्चैवसौबलश्चविशांपते ॥ २६ ॥ शरौघैर्विमलैस्तीक्ष्णैर्माद्रीपुत्रावावारयन् ॥ भीष्मस्तुसंहतःसंख्येधार्तराष्ट्रैःससैनिकैः ॥ २७ ॥ युधिष्ठिरंसमासाद्यसर्वतःपर्यवारयन् ॥ आपतंतंगजानीकंदृष्ट्वापार्थोऽकोदरः ॥ २८ ॥ लेलिहन्स्रक्किणीवीरोग्रगराडिवकानने ॥ भीमस्तुरथिनांश्रेष्ठोगदांगृह्यमहाहवे ॥ २९ ॥ अवप्लुत्यरथात्तूर्णंतवसैन्यान्यभीषयन् ॥ तमुद्वीक्ष्यगदाहस्तंततस्तेगजसादिनः ॥ ३० ॥ परिवव्रूरणेयत्ताभीमसेनंसमंततः ॥ गजमध्यमनुप्राप्तःपांडवःसव्यराजत ॥ ३१ ॥ मेघजालस्यमहतोयथामध्यगतोरविः ॥ व्यधमत्सगजानीकंगदयापांडवर्षभः ॥ ३२ ॥ महाभ्रजालमतुलंमातरिश्वेवसंततम् ॥ तेवध्यमानाबलिनाभीमसेनेनदंतिनः ॥ ३३ ॥ आर्तनादंरणेचक्रुर्गर्जंतोजलदाइव ॥ बहुधादारितश्चैववि षाणैस्तत्रदंतिभिः ॥ ३४ ॥ फुल्लाशोकनिभःपार्थःशुशुभेरणमूर्धनि ॥ विषाणेदंतिनंगृह्यनिर्विषाणमथाकरोत् ॥ ३५ ॥ विषाणेनचतेनैवकुंभेभ्याहत्यदंतिनम् ॥ पातयामाससमरेदंडहस्तइवांतकः ॥ ३६ ॥ शोणिताक्तांगदांविभ्रन्मेदोमज्जाकृतच्छविः ॥ कृताभ्यंगःशोणितेनरुद्रवत्प्रत्यदृश्यत ॥ ३७ ॥ एवंतेवध्यमानाश्चहतशेषामहागजाः ॥ प्राद्रवंतदिशोराजन्विमृद्नंतःस्वकंबलम् ॥ ३८ ॥ द्रवद्भिस्तैर्महानागैःसमंताद्भरतर्षभ ॥ दुर्योधनबलंसर्वंपुनरासीत्पराङ्मुखम् ॥ ३९ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव० भीमपराक्रमेद्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ मध्यंदिनेमहाराजसंग्रामःसमपद्यत ॥ लोकक्षयकरोरौद्रोभीष्मस्यसहसोमकैः ॥ १ ॥ गांगेयोरथिनांश्रेष्ठःपांडवानामनीकिनीम् ॥ व्यधमन्निशितैर्बाणैःशतशोयसहस्रशः ॥ २ ॥ संममर्दचतत्सैन्यंपितादेवव्रतस्तव ॥ धान्यानामिवलूनानांप्रकरंगोगणाइव ॥ ३ ॥ धृष्टद्युम्नशिखंडीचविराटोद्रुपदस्तथा ॥ भीष्ममासाद्यसमरेशरैर्जघ्नुर्महारथम् ॥ ४ ॥ धृष्टद्युम्नंततोविद्धाविराटंचशरैस्त्रिभिः ॥ द्रुपदस्यचनाराचंप्रेषयामासभारत ॥ ५ ॥ तेनविद्धामहेष्वासाभीष्मेणामित्रकर्षिणा ॥ चुक्रुधुःसमरेराज न्पार्ष्णिस्पृष्टाइवोरगाः ॥ ६ ॥ शिखंडीतंचविव्याधभरतानांपितामहम् ॥ स्त्रीमयंमनसाध्यात्वानास्मैप्राहरदच्युतः ॥ ७ ॥

मध्यंदिनइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ स्त्रीमयंअयंभीष्मःस्त्रीभ्यात्प्रीतियित्वा यद्वास्त्रीमयं स्वार्थेमयट् ॥ ७ ॥

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ वैश्रवणंकुबेरंचातिअतिक्रांताः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ अद्राक्षमहंसंजयः

धृष्टद्युम्नसुसंमरेकोधेनाग्निरिवज्वलन् ॥ पितामहंत्रिभिर्बाणैर्बाह्वोरुरसिचार्पयत् ॥ ८ ॥ द्रुपदःपंचविंशत्याविराटोदशभिःशरैः ॥ शिखंडीपंचविंशत्याभीष्मं विव्याधसायकैः ॥ ९ ॥ सोतिविद्धोमहाराजशोणितौघपरिप्लुतः ॥ वसंतेपुष्पशबलोरक्ताशोकइवाबभौ ॥ १० ॥ तान्प्रत्यविध्यद्भांगेयस्त्रिभिस्त्रिभिरजिह्मगैः ॥ द्रुपदस्यचभल्लेनधनुश्चिच्छेदमारिष ॥ ११ ॥ सोन्यत्कार्मुकमादायभीष्मंविव्याधपंचभिः ॥ सारथिंचत्रिभिर्बाणैःसुशितैरणमूर्धनि ॥ १२ ॥ तथाभीमोमहाराजद्रौपद्याःपंचचात्मजाः ॥ केकयाभ्रातरःपंचसात्यकिश्चैवसात्वतः ॥ १३ ॥ अभ्यद्रवंतगांगेयंयुधिष्ठिरपुरोगमाः ॥ रिरक्षिषंतःपांचाल्यंधृष्टद्युम्नपुरोगमाः ॥ ॥ १४ ॥ तथैवतावकाःसर्वेभीष्मरक्षार्थमुद्यताः ॥ प्रत्युद्ययुःपांडुसेनांसहसैन्यानराधिप ॥ १५ ॥ तत्रासीत्सुमहद्युद्धंतवतेषांचसंकुलम् ॥ नराश्वरथनागानांयम राष्ट्रविवर्धनम् ॥ १६ ॥ रथीरथिनमासाद्यप्राहिणोद्यमसादनम् ॥ तथेतरान्समासाद्यनरनागाश्वसादिनः ॥ १७ ॥ अनयन्परलोकायशरैःसंनतपर्वभिः ॥ शरै श्चविविधैर्घोरैस्तत्रतत्रविशांपते ॥ १८ ॥ रथास्तुरथिभिर्हीनाहतसारथयस्तथा ॥ विप्रद्रुताश्चसमरेदिशोजग्मुःसमंततः ॥ १९ ॥ मृद्नंतस्तेनरान्राजन्हयांश्च सुबहून्रणे ॥ वातायमानादृश्यंतेगंधर्वनगरोपमाः ॥ २० ॥ रथिनश्चरथैर्हीनावर्मिणस्तेजसायुताः ॥ कुंडलोष्णीषिणःसर्वेनिष्कांगदविभूषणाः ॥ २१ ॥ देवपु त्रसमाःसर्वेशौर्येशक्रसमायुधि ॥ ऋद्ध्यावैश्रवणंचातिनयेनचबृहस्पतिम् ॥ २२ ॥ सर्वलोकेश्वराःशूरास्तत्रतत्रविशांपते ॥ विप्रद्रुताव्यदृश्यंतप्राकृंताइवमानवाः ॥ २३ ॥ दंतिनश्चनरश्रेष्ठहीनाःपरमसादिभिः ॥ मृद्नंतःस्वान्यनीकानिनिपेतुःसर्वशब्दगाः ॥ २४ ॥ चर्मभिश्चामरैश्चित्रैःपताकाभिश्चमारिष ॥ छत्रैःसितै र्हेमदंडैश्चामरैश्चसमंततः ॥ २५ ॥ विशीर्णैर्विप्रधावंतोदृश्यंतेस्मदिशोदश ॥ नवमेघप्रतीकाशाजलदोपमनिःस्वनाः ॥ २६ ॥ तथैवदंतिभिर्हीनागजारोहा विशांपते ॥ प्रधावंतोन्वदृश्यंततवतेषांचसंकुले ॥ २७ ॥ नानादेशसमुत्थांश्चतुरगान्हेमभूषितान् ॥ वातायमानानद्राक्षंशतशोथसहस्रशः ॥ २८ ॥ अश्वारोहा न्हतैरश्वैर्गृहीतासीन्समंततः ॥ द्रवमाणानपश्यामद्राव्यमाणांश्चसंयुगे ॥ २९ ॥ गजोगजसमासाद्यद्रवमाणंमहाहवे ॥ ययौप्रमृद्यतरसापादातान्वाजिनस्त था ॥ ३० ॥ तथैवचरथान्राजन्प्रममर्दरणेगजः ॥ रथाश्चैवसमासाद्यपतितांस्तुरगान्भुवि ॥ ३१ ॥ व्यमृद्नन्समरेराजंस्तुरगांश्चनरान्रणे ॥ एवंतेबहुधाराज न्प्रत्यमृद्नन्परस्परम् ॥ ३२ ॥

॥ १६४ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ आगस्कृत्परापी ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेऽष्यधिकशततम

तस्मिन्रौद्रेतथायुद्धेवर्तमानेमहाभये ॥ प्रावर्ततनदीघोराशोणितांत्रतरंगिणी ॥ ३३ ॥ अस्थिसंघातसंबाधाकेशशैवलशाद्वला ॥ रथह्रदाशरावर्ताहयमीना द्रुरासदा ॥ ३४ ॥ शीर्षोपलसमाकीर्णाहस्तिग्राहसमाकुला ॥ कवचोष्णीषफेनौघानुर्वेगासिकच्छपा ॥ ३५ ॥ पताकाध्वजवृक्षाढ्यामर्त्यकूलापहारिणी ॥ क व्यादहंससंकीर्णायमराष्ट्रविवर्धनी ॥ ३६ ॥ तांनदींक्षत्रियाःशूरारथनागहयप्लवैः ॥ प्रतेरुर्बहवोराजन्भयंत्यक्त्वामहारथाः ॥ ३७ ॥ अपोवाहरणेभीरून्कदमले नाभिसंवृतान् ॥ ययावैतरणीप्रेताव्येतराजपुरंप्रति ॥ ३८ ॥ प्राक्रोशन्क्षत्रियास्तत्रदृष्ट्वातद्वैशसंमहत् ॥ दुर्योधनापराधेनगच्छंतिक्षत्रियाःक्षयम् ॥ ३९ ॥ गुण वत्सुकर्यद्वैपंधृतराष्ट्रोजनेश्वरः ॥ कृतवान्पांडुपुत्रेषुपापात्मालोभमोहितः ॥ ४० ॥ एवंबहुविधावाचःश्रूयंतेस्मपरस्परम् ॥ पांडवस्यवसंयुक्ताःपुत्राणांतेसुदारुणाः ॥ ४१ ॥ तानिशम्यततोवाचःसर्वयोधैरुदाहृताः ॥ आगस्कृत्सर्वलोकस्यपुत्रोदुर्योधनस्तव ॥ ४२ ॥ भीष्मद्रोणंकृपंचैवशल्यंचोवाचभारत ॥ युध्यध्वमनहंकाराःकिंचिरंकुरुयेतिच ॥ ४३ ॥ ततःप्रवृत्तेयुद्धंकुरूणांपांडवैःसह ॥ अक्षद्यूतकृतंराजन्सुघोरंवैशसंतदा ॥ ४४ ॥ यत्पुरानिगृढ्यासिवार्यमाणोमहात्मभिः ॥ वै चित्रवीर्यस्यैदंफलंपश्यसुदारुणम् ॥ ४५ ॥ नहिपांडुसुतारांजन्सैन्याःसपदानुगाः ॥ रक्षंतिसमरेप्राणान्कौरवावापिसंयुगे ॥ ४६ ॥ एतस्मात्कारणाद्घोरो वर्ततेस्वजनक्षयः ॥ दैवाद्वापुरुषव्याघ्रतवचापनयान्नृप ॥ ४७ ॥ ॥ इतिश्रीम० भीष्मपर्वणिभीष्मव० संकुलयुद्धेऽष्यधिकशततमोऽध्यायः ॥ १०३ ॥ ॥ ७ ॥

संजयउवाच ॥ ॥ अर्जुनस्तान्नरव्याघ्रःसुशर्मानुचरान्नृपान् ॥ अनयत्परतराजस्यसदनंसायकैःशितैः ॥ १ ॥ सुशर्मापिततोबाणैःपार्थविव्याधसंयुगे ॥ वासुदे वंचसप्तत्यापार्थंचनवभिःपुनः ॥ २ ॥ तंनिवार्यशरौघेणशक्रसूनुर्महारथः ॥ सुशर्माणोरणेयोधान्प्राहिणोद्यमसादनम् ॥ ३ ॥ तेवध्यमानाःपार्थेनकालेनेवयुग क्षये ॥ व्यद्रवंतरणेराजन्भयेजातेमहारथाः ॥ ४ ॥ उत्सृज्यतुरगान्केचिद्रथान्केचिच्चमारिष ॥ गजानन्येसमुत्सृज्यप्राद्रवंतदिशोदश ॥ ५ ॥ अपरेतुततोदायवाजि नागरथान्रणे ॥ त्वरयापरयायुक्ताःप्राद्रवंतविशांपते ॥ ६ ॥ पादाताश्चापिशस्त्राणिसमुत्सृज्यमहारणे ॥ निरपेक्षाव्यधावंततेनतेनस्मभारत ॥ ७ ॥ वार्यमाणाः सुबहुशस्त्रैर्गर्तेनसुशर्मणा ॥ तथान्यैःपार्थिवश्रेष्ठैर्नव्यतिष्ठंतसंयुगे ॥ ८ ॥ तद्बलंप्रद्रुतंदृष्ट्वापुत्रोदुर्योधनस्तव ॥ पुरस्कृत्यरणेभीष्मंसर्वसैन्यपुरस्कृतः ॥ ९ ॥

मोऽध्यायः ॥ १०३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ अर्जुनइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ तेनतेनपथा ॥ ७ ॥ ८ ॥ ९ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ महामात्रौश्रेष्ठौ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ भारतंभीष्मं लोमवाहिभिःलोमच्छे

सर्वौद्योगेनमहताधनंजयमुपाद्रवन् ॥ त्रिगर्ताधिपतेरर्थेजीवितस्यविशांपते ॥ १० ॥ सएकःसमरेतस्थौकिरन्बहुविधान्शरान् ॥ आढभिःसहितःसर्वैःशेषाहिप्र
द्रुतानराः ॥ ११ ॥ तथैवपांडवाराजन्सर्वौद्योगेनदंशिताः ॥ प्रययुःफाल्गुनार्थाययत्रभीष्मोव्यतिष्ठत ॥ १२ ॥ ज्ञायमानारणेवीर्यंघोरंगांडीवधन्वनः ॥ हाहाका
रकृतोत्साहाभीष्मंजग्मुःसमंततः ॥ १३ ॥ ततस्तालध्वजःशूरःपांडवानांवरूथिनीम् ॥ छादयामाससमरेशरैःसंनतपर्वभिः ॥ १४ ॥ एकीभूतास्ततःसर्वेकुरवः
सहपांडवैः ॥ अयुध्यंतमहाराजमध्यंप्राप्तेदिवाकरे ॥ १५ ॥ सात्यकिःकृतवर्माणंविद्धापंचभिराशुगैः ॥ अतिष्ठदाहवेशूरःकिरन्बाणान्सहस्रशः ॥ १६ ॥ तथै
वद्रुपदोराजाद्रोणंविद्धाशितैःशरैः ॥ पुनर्विव्याधसप्तत्यासारथिंचास्यपंचभिः ॥ १७ ॥ भीमसेनस्तुराजानंबाह्लीकंप्रपितामहम् ॥ विद्धानदन्महानादंशार्दूलइ
वकानने ॥ १८ ॥ आर्जुनिश्चित्रसेनेनविद्धोबहुभिराशुगैः ॥ अतिष्ठदाहवेशूरःकिरन्बाणान्सहस्रशः ॥ १९ ॥ चित्रसेनंत्रिभिर्बाणैर्विव्याधसमरेभृशम् ॥ समाग
तौतौतुरणेमहामात्रौव्यरोचताम् ॥ २० ॥ यथादिविमहाघोरौराजन्बुधशनैश्चरौ ॥ तस्याश्वांश्चतुरोहत्वासूतंचनवभिःशरैः ॥ २१ ॥ ननादबलवान्नादंसौभद्रः
परवीरहा ॥ हताश्वात्तुरथात्तूर्णंसोवप्लुत्यमहारथः ॥ २२ ॥ आरुरोहरथंतूर्णंद्रुमुखस्यविशांपते ॥ द्रोणश्चद्रुपदंभित्त्वाशरैःसंनतपर्वभिः ॥ २३ ॥ सारथिंचास्यवि
व्याधत्वरमाणःपराक्रमी ॥ पीड्यमानस्ततोराजाद्रुपदोवाहिनीमुखे ॥ २४ ॥ अपायाज्जवनैरश्वैःपूर्ववैरमनुस्मरन् ॥ भीमसेनस्तुराजानंमुहूर्तादिवबाह्लिकम् ॥
॥ २५ ॥ व्यश्वसूतरथंचक्रेसर्वसैन्यस्यपश्यतः ॥ ससंभ्रमोमहाराजसंशयंपरमंगतः ॥ २६ ॥ अवप्लुत्यततोवाहाद्बाह्लीकःपुरुषोत्तमः ॥ आरुरोहरथंतूर्णंलक्ष्मण
स्यमहारणे ॥ २७ ॥ सात्यकिःकृतवर्माणंवारयित्वामहारणे ॥ शरैर्बहुविधैराजन्नाससादपितामहम् ॥ २८ ॥ सविद्धाभारतंषष्ट्यानिशितैर्लोमवाहिभिः ॥ तूर्ण
न्निवरथोपस्थेविधुन्वानोमहद्धनुः ॥ २९ ॥ तस्यायसींमहाशक्तिंचिक्षेपाथपितामहः ॥ हेमचित्रांमहावेगांनागकन्योपमांशुभाम् ॥ ३० ॥ तामापतंतींसहसा
मृत्युकल्पांसुदुर्जयाम् ॥ व्यंसयामासवार्ष्णेयोलाघवेनमहायशाः ॥ ३१ ॥ अनासाद्यतुवार्ष्णेयंशक्तिःपरमदारुणा ॥ न्यपतद्धरणीपृष्ठेमहोल्केवमहाप्रभा
॥ ३२ ॥ वार्ष्णेयस्तुततोराजन्स्वांशक्तिंकनकप्रभाम् ॥ वेगवद्भृत्यचिक्षेपपितामहरथंप्रति ॥ ३३ ॥ वार्ष्णेयभुजवेगेनप्रणुन्नासामहाहवे ॥ अभिदुद्रावववेगेन ॥ १६५ ॥
कालरात्रिर्यथानरम् ॥ ३४ ॥

दकैः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

मेदिनीप्राप्येतिशेषः ॥ ३५ ॥ ३६ ॥ माधवःसात्यकिः ॥ ३७ ॥ ३८ ॥ ॥ इतिभीष्मपर्वणिनै०भा०चतुरधिकशततमोऽध्यायः ॥ १०४ ॥ ॥ ७ ॥ ॥ दृष्ट्वेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

तामापतंतींसहसाद्विधाचिच्छेदभारतः ॥ क्षुरप्राभ्यांसुतीक्ष्णाभ्यांसाव्यशीर्यतमेदिनीम् ॥ ३५ ॥ छित्त्वाशक्तिंतुगांगेयःसात्यकिंनवभिःशरैः ॥ आजघानोर
सिक्रुद्धःप्रहसञ्छचुकर्शनः ॥ ३६ ॥ ततःसरथनागाश्वाःपांडवाःपांडुपूर्वजाः ॥ परिवव्रुरणेभीष्मंमाधवत्राणकारणात् ॥ ३७ ॥ ततःप्रवव्रतेयुद्धंतुमुलंलोमहर्ष
णम् ॥ पांड्वानांकुरूणांचसमरेविजयैषिणाम् ॥ ३८ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधप०वार्ष्णेययुद्धेचतुरधिकशततमोऽध्यायः ॥ १०४ ॥ ॥ ७ ॥
संजयउवाच ॥ ॥ दृष्ट्वाभीष्मंरणेक्रुद्धंपांडवैरभिसंवृतम् ॥ यथामेघैर्महाराजतपंतेदिविभास्करम् ॥ १ ॥ दुर्योधनोमहाराजद्रुःशासनमभाषत ॥ एषशूरोमहेष्वा
सोभीष्मःशूरनिषूदनः ॥ २ ॥ छादितःपांडवैःशूरैःसमंताद्रथसत्तमः ॥ तस्यकार्यंत्वयावीररक्षणंसुमहात्मनः ॥ ३ ॥ रक्ष्यमाणोहिसमरेभीष्मोस्माकंपितामहः ॥
निहन्यात्समरेयत्तान्पंचालान्पांडवैःसह ॥ ४ ॥ तत्रकार्यतमंमन्येभीष्मस्यैवाभिरक्षणम् ॥ गोप्तात्र्येषमहेष्वासोभीष्मोस्माकंमहाव्रतः ॥ ५ ॥ सभवान्सर्वसैन्ये
नपरिवार्यपितामहम् ॥ समरेकर्मकुर्वाणंदुष्करंपरिरक्षतु ॥ ६ ॥ सएवमुक्तःसमरेपुत्रोदुःशासनस्तव ॥ परिवार्यस्थितोभीष्मंसैन्येनमहताततः ॥ ७ ॥ ततःशतस
हस्राणांहयानांसुवलात्मजः ॥ विमलप्रासहस्तानामृष्टितोमरधारिणाम् ॥ ८ ॥ दर्पितानांसुवेशानांबलस्थानांपताकिनाम् ॥ शिक्षितैर्युद्धकुशलैरुपेतानांनरोत्तमैः
॥ ९ ॥ नकुलंसहदेवंचधर्मराजंचपांडवम् ॥ न्यवारयन्नरश्रेष्ठान्परिवार्यसमंततः ॥ १० ॥ ततोदुर्योधनोराजाशूराणांहयसादिनाम् ॥ अयुतंप्रेषयामासपांडवानां
निवारणे ॥ ११ ॥ तैःप्रविष्टैर्महावेगैर्गरुत्मद्भिरिवाहवे ॥ खुराहताधरांराजंश्चक्रंपेचननादच ॥ १२ ॥ खुरशब्दश्चसुमहान्वाजिनांशुश्रुवेतदा ॥ महावंशवनस्ये
वदह्यमानस्यपर्वते ॥ १३ ॥ उत्पतद्भिश्चतैस्तत्रसमुद्भूतंमहद्रजः ॥ दिवाकररथप्राप्यच्छादयामासभास्करम् ॥ १४ ॥ वेगवद्भिर्हयैस्तैस्तुक्षोभितापांडवीचमूः ॥ नि
पतद्भिर्महावेगैर्हंसैरिवमहत्सरः ॥ १५ ॥ हेषतांचैवशब्देननप्राज्ञायतकिंचन ॥ ततोयुधिष्ठिरोराजामाद्रीपुत्रौचपांडवौ ॥ १६ ॥ प्रत्यघ्नंस्तरसावेगंसमरेहयसादि
नाम् ॥ उद्दत्तस्यमहाराजप्रावृट्कालेतिपूर्यतः ॥ १७ ॥ पौर्णमास्यामंबुवेगंयथावेलामहोदधेः ॥ ततस्तेरथिनोराजन्शरैःसंनतपर्वभिः ॥ १८ ॥ न्यकृंतन्नुत्तमांगा
निशरेणहयसादिनाम् ॥ तेनिपेतुर्महाराजनिहताहढधन्विभिः ॥ १९ ॥ नागैरिवमहानागायथाबद्धिरिगह्वरे ॥ तेपिप्रासैःसुनिशितैःशरैःसंनतपर्वभिः ॥ २० ॥

ततइति सैन्येनेतिपूर्वस्मादनुकृष्यते हयानांसैन्येनपरिवार्यन्यवारयदितितृतीयेनान्वयः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ॥ इतिश्रीभीष्मपर्वणिनै० भा० पंचाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥ ७ ॥ ॥ ततइति ॥ १ ॥ २ ॥ ३ ॥ द्वादशाख्यैः

व्यंकतन्मुक्तमांगानिविचरंतोदिशोदश ॥ अभ्याहताहयारोहाःक्षिप्तिर्भरतर्षभ ॥ २१ ॥ अत्यजन्मुक्तमांगानिफलानीवमहाद्रुमाः ॥ ससादिनोहयाराजंस्तत्र तत्रनिषूदिताः ॥ २२ ॥ पतिताःपात्यमानाश्चप्रत्यदृश्यंतसर्वशः ॥ वध्यमानाहयाश्चैवत्राद्रवंतभयार्दिताः ॥ २३ ॥ ययासिंहसमासाद्यद्विगाःप्राणपरायणाः ॥ पांडवाश्वमहाराजजित्वाशत्रून्महाद्युधे ॥ २४ ॥ दध्मुःशंखांश्चभेरीश्चताडयामासुराहवे ॥ ततोदुर्योधनोदीनोदृष्ट्वासैन्यंपराजितम् ॥ २५ ॥ अब्रवीद्भरतश्रेष्ठमद्र राजमिदंवचः ॥ एषपांडुसुतोज्येष्ठोयमाभ्यांसहितोरणे ॥ २६ ॥ पश्यतांवोमहाबाहोसेनांद्रावयतिप्रभो ॥ तंवारयमहाबाहोवेलेवमकरालयम् ॥ २७ ॥ त्वंहिसं श्रूयसेत्यर्थमसत्यबलविक्रमः ॥ पुत्रस्यतवतद्वाक्यंश्रुत्वाशल्यःप्रतापवान् ॥ २८ ॥ सयवैरथवंशेनयत्रराजायुधिष्ठिरः ॥ तदापतद्वैसहसाशल्यस्यंसुमहद्बलम् ॥ २९ ॥ महौघवेगंसमरेवारयामासपांडवः ॥ मद्रराजंचसमरेधर्मराजोमहारथः ॥ ३० ॥ दशभिःसायकैस्तूर्णमाजघानस्तनांतरे ॥ नकुलःसहदेवश्चतंसप्तभिर जिह्मगैः ॥ ३१ ॥ मद्रराजोपितान्सर्वानाजघानत्रिभित्रिभिः ॥ युधिष्ठिरंपुनःषष्ट्याविध्याधनिशितैःशरैः ॥ ३२ ॥ माद्रीपुत्रौचसंक्रांतौद्वाभ्यांद्वाभ्यामताडयत् ॥ ततोभीमोमहाबाहुर्दृष्ट्वाराजानमाहवे ॥ ३३ ॥ मद्रराजरथंप्राप्तंस्त्यौरास्यगतंयथा ॥ अभ्यपद्यतसंग्रामेयुधिष्ठिरमभित्रजित् ॥ ३४ ॥ ततोयुद्धंमहाघोरंप्राव र्तसुदारुणम् ॥ अपरांदिशमास्थायपतमानेदिवाकरे ॥ ३५ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव० पंचाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥ ७ ॥ ॥ ७ ॥

संजयउवाच ॥ ॥ ततःपितातवकुद्धोनिशितैःसायकोत्तमैः ॥ आजघानरणेपार्थान्सहसेनान्समंततः ॥ १ ॥ भीमंद्वादशभिर्विद्धासात्यकिंनवभिःशरैः ॥ नकुलं चत्रिभिर्विद्धासहदेवंचसप्तभिः ॥ २ ॥ युधिष्ठिरंद्वादशभिर्बाह्वोरुरसिचार्पयत् ॥ धृष्टद्युम्नंततोविद्धाननादसुमहाबलः ॥ ३ ॥ तंद्वादशाख्यैर्नकुलोमाधवश्चत्रिभिः शरैः ॥ धृष्टद्युम्नश्चसप्तत्याभीमसेनश्चसप्तभिः ॥ ४ ॥ युधिष्ठिरोद्वादशभिःप्रत्यविध्यत्पितामहम् ॥ द्रोणस्तुसात्यकिंविद्धाभीमसेनमविध्यत ॥ ५ ॥ एकैकंपंचभिर्बा णैर्यमदंडोपमैःशितैः ॥ तौचतंप्रत्यविध्येतांत्रिभित्रिभिरजिह्मगैः ॥ ६ ॥ तोत्रैरिवमहानागंद्रोणंब्राह्मणपुंगवम् ॥ सौवीराःकितवाःप्राच्याःप्रतीच्योदीच्यमालवाः ॥ ७ ॥ अभीषाहाःशूरसेनाःशिबयोथवसातयः ॥ संग्रामेनाजहुर्भीष्मंवध्यमानाःशितैःशरैः ॥ ८ ॥ तथैवान्येमहीपालानानादेशसमागताः ॥ पांडवानभ्यवर्त तविविधायुधपाणयः ॥ ९ ॥ तथैवपांडवाराजन्परिवव्रुःपितामहम् ॥ ससमंतात्परिक्षतोरथौघैरपराजितः ॥ १० ॥

द्वादशसंख्यैः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

गहनेग्निरिवोत्सृष्टःप्रजज्वालदहन्परान् ॥ रथाभ्यगारश्वापार्चिरसिशक्तिगदेंधनः ॥ ११ ॥ शरस्फुलिंगोभीष्माग्निर्ददाहक्षत्रियर्षभान् ॥ सुवर्णपुंखैरिषुभिर्गा र्ध्रपक्षैःसुतेजनैः ॥ १२ ॥ कर्णिनालीकनाराचैश्छादयामासतद्बलम् ॥ अपातयद्ध्वजांश्चैवरथिनश्चशितैःशरैः ॥ १३ ॥ मुंडतालवनानीवचकारसरथव्रजान् ॥ निर्मनुष्यान्रथान्राजन्गजानश्वांश्चसंयुगे ॥ १४ ॥ अकरोत्समहाबाहुःसर्वशस्त्रभृतांवरः ॥ तस्यज्यातलनिर्घोषंविस्फूर्जितमिवाशनेः ॥ १५ ॥ निशम्यसर्व भूतानिसमकंपंतभारत ॥ अमोघाह्यपतन्बाणाःपितुस्तेभरतर्षभ ॥ १६ ॥ नासज्जंततनुत्रेषुभीष्मचापच्युताःशराः ॥ हतवीरान्रथान्राजन्संयुक्तान्जवनैर्हयैः ॥ १७ ॥ अपश्याममहाराजह्रियमाणान्रणाजिरे ॥ चेदिकाशिकरूषाणांसहस्राणिचतुर्दश ॥ १८ ॥ महारथाःसमाख्याताःकुलपुत्रास्तनुत्यजः ॥ अपरावर्तिनः सर्वेसुवर्णविकृतध्वजाः ॥ १९ ॥ संग्रामेभीष्ममासाद्यव्यादितास्यमिवांतकम् ॥ निमग्नाःपरलोकायसवाजिरथकुंजराः ॥ २० ॥ भग्नाक्षोपस्करान्कांश्चिद्भग्न चक्रांश्चभारत ॥ अपश्याममहाराजशतशोथसहस्रशः ॥ २१ ॥ सवरूथैरथैर्भग्नैरथिभिश्चनिपातितैः ॥ शरैःसुकवचैश्छिन्नैःपट्टिशैश्चविशांपते ॥ २२ ॥ मदा भिर्भिंदिपालैश्चनिशितैश्चशिलीमुखैः ॥ अनुकर्षैरुपासंगैश्चक्रैर्भग्नैश्चमारिष ॥ २३ ॥ बाहुभिःकार्मुकैःखड्गैःशिरोभिश्चसकुंडलैः ॥ तलत्रैरंगुलित्रैश्चध्वजैश्चवि निपातितैः ॥ २४ ॥ चापैश्चबहुधाच्छिन्नैःसमास्तीर्यतमेदिनी ॥ हतारोहागजाराजन्हयाश्चह्रयसादिनः ॥ २५ ॥ न्यपतंतगतप्राणाःशतशोथसहस्रशः ॥ यतमा नाश्चतेवीराद्रवमाणान्महारथान् ॥ २६ ॥ नाशक्नुवन्वारयितुंभीष्मबाणप्रपीडितान् ॥ महेंद्रसमवीर्येणवध्यमानामहाचमूः ॥ २७ ॥ अभज्यतमहाराजनच द्वौसहधावतः ॥ आविद्धरथनागाश्वंपतितध्वजसंकुलम् ॥ २८ ॥ अनीकंपांडुपुत्राणांहाहाभूतमचेतनम् ॥ जघानात्रपितापुत्रंपुत्रश्चपितरंतथा ॥ २९ ॥ प्रियंस खायंचाकंदेसखादैवबलात्कृतः ॥ विमुच्यकवचान्येपांडुपुत्रस्यसैनिकाः ॥ ३० ॥ प्रकीर्यकेशान्धावंतःप्रत्यदृश्यंतसर्वशः ॥ तद्गोकुलमिवोद्भांतमुद्भांतरथकूब रम् ॥ ३१ ॥ ददृशेपांडुपुत्रस्यसैन्यमार्तस्वरंतदा ॥ प्रभज्यमानंसैन्यंतुदृष्ट्वायादवनंदनः ॥ ३२ ॥ उवाचपार्थंबीभत्सुंनिगृह्यरथमुत्तमम् ॥ अयंसकालःसंग्रामःपा र्थयःक्षिप्तस्तव ॥ ३३ ॥ प्रहरास्मिन्नरव्याघ्रनचेन्मोहाद्विमुह्यसे ॥ यत्पुराकथितंवीरराज्ञातिषांसमागमे ॥ ३४ ॥ विराटनगरेतातसंजयस्यसमीपतः ॥ भी ष्मद्रोणमुखान्सर्वान्धार्तराष्ट्रस्यसैनिकान् ॥ ३५ ॥ सानुबंधान्हनिष्यामियेमांयोत्स्यतिसंगरे ॥ इतित्कुरुकौंतेयसत्यंवाक्यमरिंदम ॥ ३६ ॥

॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३॥४४॥ ४५ ॥ ४६॥४७॥४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥५६॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ मणिरिद्रनीलः ॥६१॥६२॥

क्षत्रधर्ममनुस्मृत्ययुध्यस्वविगतज्वरः॥ इत्युक्तोवासुदेवेनतिर्यग्दृष्टिरधोमुखः ॥ ३७ ॥ अकामइववीभत्सुरिदंवचनमब्रवीत्॥ अवध्यानांवधंकृत्वाराज्यंवान रकोत्तरम् ॥ ३८ ॥ द्रुःखानिवनवासेवार्किनुमेसुकृतंभवेत् ॥ चोदयाश्वान्यतोभीष्मःकरिष्येवचनंतव ॥ ३९ ॥ पातयिष्यामिदुर्धर्षभीष्मंकुरुपितामहम् ॥ स चाश्वान्रजतप्रख्यांश्चोदयामासमाधवः ॥ ४० ॥ यतोभीष्मस्ततोराजन्द्रुश्रेक्ष्योरश्मिवानिव ॥ ततस्तपुनरावर्त्ययुधिष्ठिरबलंमहत्॥ ४१ ॥ दृष्ट्वापार्थंमहा वाहुंभीष्मायोद्यतमाहवे ॥ ततोभीष्मःकुरुश्रेष्ठःसिंहवद्विनदन्मुहुः ॥ ४२ ॥ धनंजयरथंशीघ्रंशरवर्षैरवाकिरत् ॥ क्षणेनसरथस्तस्यसहयःसहसारथिः ॥ ४३ ॥ शरवर्षेणमहतानप्राज्ञायतभारत॥ वासुदेवस्त्वसंभ्रांतोधैर्यमास्थायसत्वरः ॥ ४४ ॥ चोदयामासतानश्वान्विनुन्नान्भीष्मसायकैः ॥ ततःपार्थोधनुर्गृह्यदिव्यं जलदनिःस्वनम् ॥ ४५ ॥ पातयामासभीष्मस्यधनुश्छित्त्वाशितैःशरैः ॥ सच्छिन्नधन्वाकौरव्यःपुनरन्यन्महद्धनुः ॥ ४६ ॥ निमेषांतरमात्रेणसज्यंचकेपितातव॥ चकर्षचततोदोर्भ्यांधनुर्जलदनिःस्वनम् ॥ ४७ ॥ अथास्यवदपिकुद्धश्चिच्छेदधनुरर्जुनः ॥ तस्यतत्पूजयामासलाघवंशांतनोःसुतः ॥ ४८ ॥ गांगेयस्त्वब्रवी त्पार्थंधन्विश्रेष्ठमरिंदम ॥ साधुसाधुमहाबाहोसाधुकुंतीसुतेतिच ॥ ४९ ॥ समाभाप्यैवमपरंप्रगृह्यरुचिरंधनुः ॥ मुमोचसमरेभीष्मःशरान्पार्थरथंप्रति ॥ ५० ॥ अदर्शयद्वासुदेवोहययानेपरंबलम् ॥ मोघान्कुर्वन्शरांस्तस्यमंडलानिनिदर्शयन् ॥ ५१ ॥ शुशुभातेनरव्याघ्रौतौभीष्मशरविक्षतौ ॥ गोवृषाविवसंरब्धौविषा णोल्लिखितांकितौ ॥ ५२ ॥ वासुदेवस्तुसंप्रेक्ष्यपार्थस्यस्मृद्धयुद्धताम्॥ भीष्मंचशरवर्षाणिसृजंतमनिशंयुधि ॥ ५३॥ प्रतपंतमिवादित्यंमध्यमासाद्यसेनयोः॥ व रान्वरान्निघ्नंतंपांडुपुत्रस्यसैनिकान् ॥ ५४ ॥ युगांतमिवकुर्वाणंभीष्मंयौधिष्ठिरेबले ॥ नाभृष्यतमहाबाहुर्माधवःपरवीरहा ॥ ५५ ॥ उत्सृज्यरजतप्रख्यान्हय यान्पार्थस्यमारिष ॥ वासुदेवस्ततोयोगीप्रचस्कंदमहारथात् ॥ ५६ ॥ अभिदुद्रावभीष्मंसभुजप्रहरणोबली ॥ प्रतोदपाणिस्तेजस्वीसिंहवद्विनदन्मुहुः ॥ ५७ ॥ दारयन्निवपद्भ्यांसजगतींजगदीश्वरः ॥ क्रोधतामेक्षणःकृष्णोजिघांसुरमितद्युतिः ॥ ५८ ॥ ग्रसंतइवचेतांसितावकानांमहाहवे ॥ दृष्ट्वामाधवमाक्रंदेभीष्मा योद्यतमंतिके ॥ ५९ ॥ हतोभीष्महतोभीष्मस्तत्रतत्रवचोमहत्॥ अश्रूयतमहाराजवासुदेवभयात्तदा ॥ ६० ॥ पीतकौशेयसंवीतोमणिश्यामोजनार्दनः ॥ शुशु भेविद्रवन्भीष्मंविद्युन्मालीयथांबुदः ॥ ६१ ॥ ससिंहइवमातंगंयूथर्षभइवर्षभम् ॥ अभिदुद्रावर्वेगेनविनदन्यादवर्षभः ॥ ६२ ॥

॥ १६७ ॥

॥ ६३ ॥ ६४ ॥ ६५ ॥ सर्वतःइहामुत्रच ॥ ६६ ॥ अन्वक्पश्चाद्गामी ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ आपूर्णकलाभिरितिशेषः ॥ ७५ ॥ ७६ ॥ ७७ ॥. ७८ ॥ ७९ ॥

तमापतंतंसंप्रेक्ष्यपुंडरीकाक्षमाहवे ॥ असंभ्रमंरणेभीष्मोविचकर्षमहद्धनुः ॥६३॥ उवाचचैवगोविंदमसंभ्रांतेनचेतसा ॥ एत्येहिपुंडरीकाक्षदेवदेवनमोस्तुते ॥ ६४ ॥ मामद्यसात्वतश्रेष्ठपातयस्वमहाहवे ॥ त्वयाहिदेवसंग्रामेहतस्यापिममानघ ॥ ६५ ॥ श्रेयएवपरंकृष्णलोकेभवतिसर्वतः ॥ संभावितोस्मिगोविंदत्रै लोक्येनाद्यसंयुगे ॥६६॥ प्रहरस्वययेष्टंवैदासोस्मितवचानघ ॥ अन्वगेवततःपार्थःसमभिद्रुत्यकेशवम्॥ ६७॥ निजग्राहमहाबाहुर्बाहुभ्यांपरिगृह्यवै ॥ निगृ ह्यमाणःपार्थेनकृष्णोराजीवलोचनः॥ ६८॥ जगामैवैनमादायवेगेनपुरुषोत्तमः ॥ पार्थस्तुविष्टभ्यबलाच्चरणौपस्वीरहा ॥ ६९ ॥ निजग्राहहृषीकेशंकथंचि दृशमेपदे ॥ ततएवमुवाचार्तःक्रोधपर्याकुलेक्षणम् ॥ ७० ॥ निःश्वसंतंयथानागमर्जुनःप्रणयात्सखा ॥ निवर्तस्वमहाबाहोनानृतंकर्तुमर्हसि ॥ ७१ ॥ यत्त्वयाक थितंपूर्वंनयोत्स्यामीतिकेशव ॥ मिथ्यावादीतिलोकास्त्वांकथयिष्यंतिमाधव ॥ ७२ ॥ ममैषभारःसर्वोहिहनिष्यामिपितामहम् ॥ शपेकेशवशस्त्रेणसुत्येनसुकृ तेनच ॥ ७३ ॥ अंतंयथागमिष्यामिशत्रूणांशत्रुसूदन ॥ अद्यैवपश्यदुर्धर्षपात्यमानंमहारथम् ॥ ७४ ॥ तारापतिमिवापूर्णमंतकालेयदृच्छया ॥ माधवस्तुवचः श्रुत्वाफाल्गुनस्यमहात्मनः ॥ ७५ ॥ नर्किंचिदुक्त्वासक्रोधआरुरोहरथंपुनः ॥ तौरथस्थौनरव्याघ्रौभीष्मःशांतनवःपुनः ॥ ७६ ॥ ववर्षशरवर्षेणमेघोद्यायथा चलौ ॥ प्राणानादत्तयोधानांपितादेववतस्तव ॥ ७७ ॥ गजस्त्रिभिरिवादित्यस्तेजांसिशिशिरात्यये ॥ यथाकुरूणांसैन्यानिवभंजुर्युधिपांडवाः ॥ ७८ ॥ तथापांड वसैन्यानिवभंजयुधितेपिता ॥ हतविद्रुतसैन्यास्तुनिरुत्साहाविचेतसः ॥ ७९ ॥ निरीक्षितुंनशेकुस्तेभीष्ममप्रतिमंरणे ॥ मध्यंगतमिवादित्यंप्रतपंतंस्वतेजसा ॥ ८० ॥ तेवध्यमानाभीष्मेणशतशोथसहस्रशः॥ कुर्वाणंसमरेकर्माण्यतिमानुषविक्रमम् ॥ ८१ ॥ वीक्षांचक्रुर्महाराजपांडवाभयपीडिताः ॥ तथापांडवसै न्यानिद्राव्यमाणानिभारत ॥ ८२ ॥ त्रातारंनाध्यगच्छंतगावःपंकगताइव ॥ पिपीलिकाइवक्षुण्णादुर्बलाबलिनारणे ॥ ८३ ॥ महारथंभारतदुष्प्रकंपंशरौघिणंप्र तपंतंनरेंद्रान् ॥ भीष्मंनशेकुःप्रतिवीक्षितुंतेशरार्चिषंसूर्यमिवातपंतम् ॥ ८४ ॥ विद्यद्वतस्तस्यतुपांडुसेनामस्तंजगामाथसहस्ररश्मिः ॥ ततोबलानांश्रमकर्शितानांमनोऽवहारंप्रतिसंबभूव ॥ ८५ ॥ ॥इतिश्रीम० भीष्मपर्वणिभीष्मव० नवमदिवसयुद्धसमाप्तौषडधिकशततमोऽध्यायः॥१०६॥ ॥ ७ ॥ ॥ ७ ॥

॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ॥ इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेषडधिकशततमोऽध्यायः ॥ १०६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

युध्यतामिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ एकतइतिद्वितीयांतात्तसिः एकंकेवलंमृत्युमेवाभ्येतीत्य

संजयउवाच ॥ युध्यतामेवतेषांतुभास्करेऽस्तमुपागते ॥ संध्यासमभवद्घोरानापश्यामततोरणम् ॥ १ ॥ ततोयुधिष्ठिरोराजासंध्यांसंदृश्यभारत ॥ वध्यमानंच
भीष्मेणत्यक्तात्मानंभयविह्वलम् ॥ २ ॥ स्वसैन्यंचपराद्रवंतंपलायनपरायणम् ॥ भीष्मंचयुधिसंरब्धंपीडयंतंमहारथम् ॥ ३ ॥ सोमकांश्चजितान्दृष्ट्वानिरुत्साहान्म
हारथान् ॥ चिंतयित्वाततोराजाअवहारमरोचयत् ॥ ४ ॥ ततोऽवहारंसैन्यानांचकेराजायुधिष्ठिरः ॥ तथैवतवसैन्यानामवहारोत्यभूत्तदा ॥ ५ ॥ ततोवहारंसै
न्यानांकृत्वातत्रमहारथाः ॥ न्यविशंतकुरुश्रेष्ठसंग्रामेक्षतविक्षताः ॥ ६ ॥ भीष्मस्यसमरेकर्मचिंतयानास्तुपांडवाः ॥ नालभंतदाशांतिंभीष्मबाणप्रपीडिताः ॥
॥ ७ ॥ भीष्मोपिसमरेजित्वापांडवान्सहस्रंजयान् ॥ पूज्यमानस्तवसुतैर्वर्द्धमानश्चभारत ॥ ८ ॥ न्यविशत्कुरुभिःसार्धंहृष्टरूपैःसमंततः ॥ ततोरात्रिःसमभवत्सर्व
भूतप्रमोहिनी ॥ ९ ॥ तस्मिन्रात्रिमुखेघोरेपांडवाद्यैर्भिःसह ॥ संजयाश्वदुराधर्षामंत्रायसमुपाविशन् ॥ १० ॥ आत्मनिःश्रेयसंसर्वेप्राप्तकालंमहाबलाः ॥
मंत्रयामासुरव्यग्रामंत्रनिश्चयकोविदाः ॥ ११ ॥ ततोयुधिष्ठिरोराजामंत्रयित्वाचिरंनृप ॥ वासुदेवंसमुद्दीक्ष्यवचनंचेदमाददे ॥ १२ ॥ कृष्णपश्यमहात्मानंभीष्मं
भीमपराक्रमम् ॥ गजंनलवनानीवविमृद्नंतंबलंमम ॥ १३ ॥ नचवैवंमहात्मानमुत्सहामोनिरीक्षितुम् ॥ लेलिह्यमानंसैन्येषुप्रदहंतमिवपावकम् ॥ १४ ॥ यथा
घोरोमहानागस्तक्षकोवैविषोल्बणः ॥ तथाभीष्मोरणेकुद्धस्तीक्ष्णशस्त्रःप्रतापवान् ॥ १५ ॥ गृहीतचापःसमरेप्रमुंचन्निशिताञ्छरान् ॥ शक्योजेतुंयमःक्रुद्धोव
ज्रपाणिश्चदेवराट् ॥ १६ ॥ वरुणःपाशभृच्चापिसगदोवाधनेश्वरः ॥ नतुभीष्मःसुसंकुद्धःशक्योजेतुंमहाहवे ॥ १७ ॥ सोहमेवंगतेकृष्णनिमग्नःशोकसागरे ॥ आ
त्मनोबुद्धिदौर्बल्याद्भीष्ममासाद्यसंयुगे ॥ १८ ॥ वनंयास्यामिदुर्धर्षश्रेयोवैतत्रमेगतम् ॥ नयुद्धंरोचतेकृष्णहंतिभीष्मोहिनःसदा ॥ १९ ॥ यथाप्रज्वलितंवह्निंपतं
गःसमभिद्रवन् ॥ एकतोमृत्युमभ्येतितथाहंभीष्ममीयिवान् ॥ २० ॥ क्षयंनीतोस्मिवार्ष्णेयराज्यहेतोःपराक्रमी ॥ भ्रातरश्चैवमेशूराःसाध्यकैर्भशपीडिताः ॥ २१ ॥
मत्कृतेभ्रातृसौहार्दाद्राज्यभ्रष्टावनंगताः ॥ परिक्लिष्टातथाकृष्णामत्कृतेमधुसूदन ॥ २२ ॥ जीवितंबहुमन्येहंजीवितंत्ययदुर्लभम् ॥ जीवितस्याद्यशेषेणचरिष्ये
धर्ममुत्तमम् ॥ २३ ॥ यदितेहमनुग्राह्योभ्रातृभिःसहकेशव ॥ स्वधर्मस्याविरोधेन हितंव्याहरकेशव ॥ २४ ॥ एवंश्रुत्वावचस्तस्यकारुण्याद्बहुविस्तरम् ॥ प्रत्युवाच
ततःकृष्णःसांत्वयानोयुधिष्ठिरम् ॥ २५ ॥

र्थः ॥ २० ॥ २१ ॥ २२ ॥ अथेदानीं ॥ २३ ॥ २४ ॥ २५ ॥

२६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ विपरीतःक्षुद्रेषुपराक्रमी गतसत्त्वोगतबुद्धिः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

धर्मपुत्रविषादंत्वंमाकृथाःसत्यसंगर ॥ यस्यतेभ्रातरःशूरादुर्जयाःशत्रुसूदनाः ॥ २६ ॥ अर्जुनोभीमसेनश्चवाय्वग्निसमतेजसौ ॥ माद्रीपुत्रौचविक्रांतौत्रिद्
शानामिवेश्वरौ ॥ २७ ॥ मांवानियुंक्ष्वसौहार्दाद्योत्स्येभीष्मेणपांडव ॥ त्वत्प्रयुक्तोमहाराजकिंनकुर्यांमहाहवे ॥ २८ ॥ हनिष्यामिरणेभीष्ममाहूयपुरुषर्षभम् ॥
पश्यतांधार्तराष्ट्राणांयदिनेच्छतिफाल्गुनः ॥ २९ ॥ यदिभीष्महतेवीरेजयंपश्यसिपांडव ॥ हंताम्येकरथेनाद्यकुरुवृद्धंपितामहम् ॥ ३० ॥ पश्यमेविक्रमंराजन्म
हेंद्रस्येवसंयुगे ॥ विमुंचंतंमहास्त्राणिपातयिष्यामितंरथात् ॥ ३१ ॥ यःशत्रुःपांडुपुत्राणांमद्धत्रुःसनसंशयः ॥ मदर्थाभवदीयायेयेमदीयास्तवैवते ॥ ३२ ॥ तव
भ्रातामसखासंबंधीशिष्यएवच ॥ मांसान्युत्कृत्यदास्यामिफाल्गुनार्थेमहीपते ॥ ३३ ॥ एषचापिनरव्याघ्रोमत्कृतेजीवितंत्यजेत् ॥ एषनःसमयस्तातातारयेमप
रस्परम् ॥ ३४ ॥ समांनियुंक्ष्वराजेंद्रयथायोद्धाभवाम्यहम् ॥ प्रतिज्ञातमुपप्लव्येयत्तत्पार्थेनपूर्वतः ॥ ३५ ॥ घातयिष्यामिगांगेयमितिलोकस्यसंनिधौ ॥ परिरक्ष्य
मिदंतावद्वचःपार्थस्यधीमतः ॥ ३६ ॥ अनुज्ञातंतुपार्थेनमयाकार्यंनसंशयः ॥ अथवाफाल्गुनस्यैषभारःपरिमितोरणे ॥ ३७ ॥ सहनिष्यतिसंग्रामेभीष्मंपरपुरं
जयम् ॥ अशक्यमपिकुर्याद्धिरणेपार्थःसमुद्यतः ॥ ३८ ॥ त्रिदशान्वासमुद्युक्तान्सहितान्दैत्यदानवैः ॥ निहन्यादर्जुनःसंख्येकिमुभीष्मंनराधिप ॥ ३९ ॥ विपरीतो
महावीर्योगतसत्त्वोल्पजीवनः ॥ भीष्मःशांतनवोनूनंकर्तव्यंनावबुध्यते ॥ ४० ॥ ॥ युधिष्ठिरउवाच ॥ ॥ एवमेतन्महाबाहोयथावदसिमाधव ॥ सर्वेत्येतेनप
र्याप्तास्तववेगविधारणे ॥ ४१ ॥ नियतंसमवाप्स्यामिसर्वमेतद्यथेप्सितम् ॥ यस्यमेपुरुषव्याघ्रभवान्पक्षेव्यवस्थितः ॥ ४२ ॥ सेंद्रानपिरणेदेवान्जयेयंजयतां
वर ॥ त्वयानाथेनगोविंदकिमुभीष्मंमहारथम् ॥ ४३ ॥ नतुत्वामनृतंकर्तुमुत्सहेस्वात्मगौरवात् ॥ अयुध्यमानःसाहाय्यंयथोक्तंकुरुमाधव ॥ ४४ ॥ संमयस्तुकृतः
कश्चिन्ममभीष्मेणसंयुगे ॥ मंत्रयिष्येत्ववार्थायनतुयोत्स्येकथंचन ॥ ४५ ॥ दुर्योधनार्थंयोत्स्यामिसत्यमेतदितिप्रभो ॥ सहिराज्यस्यमेदातामंत्रस्यैवचमाधव
॥ ४६ ॥ तस्माद्देवव्रतंभूयोवधोपायार्थमात्मनः ॥ भवतासहिताःसर्वेप्रयाममधुसूदन ॥ ४७ ॥ तद्वयंसहितागत्वाभीष्ममाशुनरोत्तमम् ॥ नचिरात्सर्ववार्ष्णेयमं
त्रंपृच्छामकौरवम् ॥ ४८ ॥ सवक्ष्यतिहितंवाक्यंसत्यमस्मान्जनार्दन ॥ यथाचवक्ष्यतेकृष्णतथाकर्तास्मिसंयुगे ॥ ४९ ॥ सनोजयस्यदातास्यान्मंत्रस्यचदृढव्रतः
॥ बालाःपित्राविहीनाश्चतेनसंवर्धितावयम् ॥ ५० ॥ तंचेत्पितामहंवृद्धंहंतुमिच्छामिमाधव ॥ पितुःपितरमिष्टंचधिगस्तुक्षत्रजीविकाम् ॥ ५१ ॥

संजयउवाच ॥ ॥ ततोब्रवीन्महाराजवार्ष्णेयःकुरुनंदनम् ॥ रोचतेमेमहाप्राज्ञराजेंद्रतवभाषितम् ॥ ५२ ॥ देवव्रतःकृतीभीष्मःप्रेक्षितेनापिनिर्दहेत् ॥ गम्यतांस
वधोपायंप्रष्टुंसागरगासुतः ॥ ५३ ॥ वक्तुमर्हतिसत्यंसत्वयापृष्टोविशेषतः ॥ तेवयंतत्रगच्छामःप्रष्टुंकुरुपितामहम् ॥ ५४ ॥ गत्वाशांतनवंवृद्धंमंत्रंपृच्छामभारत ॥
सवोदास्यतिमंत्रंयंतेनयोत्स्यामहेपरान् ॥ ५५ ॥ एवमामंत्र्यतेवीराःपांडवाःपांडुपूर्वजम् ॥ जग्मुस्तेसहिताःसर्वेवासुदेवश्चवीर्यवान् ॥ ५६ ॥ विमुक्तशस्त्रकव
चाभीष्मस्यसदनंप्रति ॥ प्रविश्यचतदाभीष्मंशिरोभिःप्रणिपेदिरे ॥ ५७ ॥ पूजयंतोमहाराजपांडवाभरतर्षभम् ॥ प्रणम्यशिरसाचैनंभीष्मंशरणमभ्ययुः ॥ ५८ ॥
तानुवाचमहाबाहुर्भीष्मःकुरुपितामहः ॥ स्वागतंतवचार्ष्णेयस्वागतंतेधनंजय ॥ ५९ ॥ स्वागतंधर्मपुत्रायभीमायचमयोत्तदा ॥ किंवाकार्यंकरोम्यद्ययुष्माकं
प्रीतिवर्धनम् ॥ ६० ॥ सर्वात्मनापिकर्तास्मियदपिस्यात्सुदुष्करम् ॥ तथाब्रुवाणंगांगेयंप्रीतियुक्तंपुनःपुनः ॥ ६१ ॥ उवाचराजादीनात्माप्रीतियुक्तमिदंवचः ॥
कथंजयेमसर्वज्ञकथंराज्यंलभेमहि ॥ ६२ ॥ प्रजानांसंशयानस्याक्कथंतन्मेवदप्रभो ॥ भवान्हिनोवधोपायंब्रवीतुस्वयमात्मनः ॥ ६३ ॥ भवंतंसमरेवीरविषहे
मकथंवयम् ॥ नहितेसूक्ष्ममप्यस्तिरंध्रंकुरुपितामह ॥ ६४ ॥ मंडलेनैवधनुषादृश्यसेसंयुगेसदा ॥ आददानंसंदधानंविकर्षंतंधनुर्नच ॥ ६५ ॥ पश्यामस्त्वांमहा
बाहोरथेसूर्यमिवापरम् ॥ रथाश्वनरनागानांहंतारंपरवीरहन् ॥ ६६ ॥ कोथवोत्सहतेजेतुंत्वांपुमान्भरतर्षभ ॥ वर्षताशरवर्षाणिसंयुगेवैशसंकृतम् ॥ ६७ ॥ क्षयं
नीताहिपृतनासंयुगेमहतीमम ॥ यथायुधिजयेमत्वांयथाराज्यंभृशंमम ॥ ६८ ॥ ममसैन्यस्यचक्षेमंतन्मेब्रूहिपितामह ॥ ततोब्रवीच्छांतनवःपांडवान्पांडुपूर्वजः
॥ ६९ ॥ नकथंचनकौंतेयमयिजीवतिसंयुगे ॥ जयोभवतिसर्वज्ञसत्यमेतद्ब्रवीमिते ॥ ७० ॥ निर्जितेमयियुद्धेनरणेजेष्यथपांडवाः ॥ क्षिप्रंमयिप्राहरध्वंयदी
च्छथरणेजयम् ॥ ७१ ॥ अनुजानामिवःपार्थाःप्रहरध्वंयथासुखम् ॥ एवंहिसुकृतंमन्येभवतांविदितोत्यहम् ॥ ७२ ॥ हतेमयिहतंसर्वंतस्मादेवंविधीयतां ॥ ॥ यु
धिष्ठिरउवाच ॥ ॥ ब्रूहितस्माद्वुपायंनोयथायुद्धेजयेमहि ॥ ७३ ॥ भवंतंसमरेकुद्धंदंडहस्तमिवांतकम् ॥ शक्योवज्रधरोजेतुंवरुणोथयमस्तथा ॥ ७४ ॥ नभवा
न्समरेशक्यःसेंद्रैरपिसुरासुरैः ॥ ॥ भीष्मउवाच ॥ ॥ सत्यमेतन्महाबाहोयथावदसिपांडव ॥ ७५ ॥ नाहंजेतुंरणेशक्यःसेंद्रैरपिसुरासुरैः ॥ आत्तशस्त्रोरणेयत्तो
गृहीतवरकार्मुकः ॥ ७६ ॥ ततोमांन्यस्तशस्त्रंतुएतेहन्युर्महारथाः ॥ निक्षिप्तशस्त्रेपतितेविमुक्तकवचध्वजे ॥ ७७ ॥ ॥ १६९ ॥

॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ परुषीकृतःरूक्षीकृतः ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ युद्धदुर्मदंयुद्धोत्सुकं ॥ १७ ॥ गमिष्यतियमक्षयंभीष्मइतिशेषः ॥ ९८ ॥
द्रवमाणेचभीतेचतवास्मीतिचवादिनि ॥ स्त्रियांस्त्रीनामधेयेचविकलेचैकपुत्रिणि ॥ ७८ ॥ अप्रशस्तेनरेचैवनयुद्धंरोचतेमम ॥ इममेशृणुराजेंद्रसंकल्पंपूर्वचिं
तितम् ॥ ७९ ॥ अमंगल्यध्वजंदृष्ट्वानयुध्येयंकदाचन ॥ यएषद्रौपदीराजंस्तवसैन्येमहारथः ॥ ८० ॥ शिखंडीसमरामर्षीशूरश्चसमितिंजयः ॥ यथाभवच्चस्त्रीपूर्व
पश्चात्पुंस्त्वंसमागतः ॥ ८१ ॥ जानंतिचभवंतोपिसर्वमेतद्यथातथम् ॥ अर्जुनःसमरेशूरःपुरस्कृत्यशिखंडिनम् ॥ ८२ ॥ मामेवविशिखैस्तीक्ष्णैरभिद्रवतुदंशितः ॥
अमंगल्यध्वजेतस्मिन्स्त्रीपूर्वेचविशेषतः ॥ ८३ ॥ नप्रहर्तुमभीप्सामिगृहीतेषुःकथंचन ॥ तदंतरंसमासाद्यपांडवोमांधनंजयः ॥ ८४ ॥ शरैर्घातयतुक्षिप्रंसमं
ताद्भरतर्षभ ॥ नतंपश्यामिलोकेषुमांहन्याद्यःसमुद्यतम् ॥ ८५ ॥ कृतेकृष्णान्महाभागात्पांडवाद्वाधनंजयात् ॥ एषतस्मात्पुरोधायकंचिदन्यंममाग्रतः ॥ ८६ ॥ आ
त्तशस्त्रोरणेयत्तोगृहीतवरकार्मुकः ॥ मांपातयतुबीभत्सुरेवंतवजयोधुवम् ॥ ८७ ॥ एतत्कुरुष्वकौंतेययथोक्तंममसुव्रत ॥ संग्रामेधार्तराष्ट्रांश्चहन्याःसर्वान्समा
गतान् ॥ ८८ ॥ ॥ संजयउवाच ॥ ॥ तेतुज्ञात्वाततःपार्थाजग्मुःस्वशिविरंप्रति ॥ अभिवाद्यमहात्मानंभीष्मंकुरुपितामहम् ॥ ८९ ॥ तथोक्तवतिगांगेयेपरलो
कायदीक्षिते ॥ अर्जुनोद्धुःखसंतप्तःसव्रीडमिदमब्रवीत् ॥ ९० ॥ गुरुणाकुरुवृद्धेनकृतप्रज्ञेनधीमता ॥ पितामहेनसंग्रामेकथंयोद्धास्मिमाधव ॥ ९१ ॥ क्रीडता
हिमयाबाल्येवासुदेवमहामनाः ॥ पांसुरूषितगात्रेणमहात्मापरुषीकृतः ॥ ९२ ॥ यस्याहमधिरुह्यांकंबालःकिलगदाग्रज ॥ तातेत्यवोचंपितरंपितुःपांडोर्महा
त्मनः ॥ ९३ ॥ नाहंतातस्तवपितुस्तातोस्मितवभारत ॥ इतिमामब्रवीद्बाल्येयःसवध्यःकथंमया ॥ ९४ ॥ कामंवध्यतुसैन्यंमेनाहंयोत्स्येमहात्मना ॥ जयोवास्तु
वधोवामेकथंवाकृष्णमन्यसे ॥ ९५ ॥ ॥ वासुदेवउवाच ॥ ॥ प्रतिज्ञायवधंजिष्णोपुराभीष्मस्यसंयुगे ॥ क्षत्रधर्मेस्थितःपार्थकथंनैनंहनिष्यसि ॥ ९६ ॥ पातयै
नंरथात्पार्थक्षत्रियंयुद्धदुर्मदम् ॥ नाहत्वायुधिगांगेयंविजयस्तेभविष्यति ॥ ९७ ॥ दृष्टमेतत्पुरादेवैर्गमिष्यतियमक्षयम् ॥ यदृष्टंहिपुरापार्थतत्तथानतदन्यथा ॥ ९८
नहिभीष्मंदुराधर्षंव्यात्ताननमिवांतकम् ॥ त्वदन्यःशक्रयाद्युमपिवज्रधरःस्वयम् ॥ ९९ ॥ जहिभीष्मंस्थिरोभूत्वाभृणुचेदंबचोमम ॥ यथोवाचपुराशक्रंम
हाबुद्धिर्बृहस्पतिः ॥ १०० ॥ ज्यायांसमपिचेद्दृढंगुणैरपिसमन्वितम् ॥ आततायिनमायांतंहन्याद्घातकमात्मनः ॥ १०१ ॥ शाश्वतोयंस्थितोधर्मःक्षत्रियाणांध
नंजय ॥ योद्धव्यंरक्षितव्यंचयशष्टव्यंचानसूयुभिः ॥ १०२ ॥ ॥ ९९ ॥ १०० ॥ आततायिनमित्यस्यघातकमितिविशेषणमन्येभ्यआततायिभ्योव्यवच्छेदायोक्तं ॥ १०१ ॥ १०२ ॥

निधनंनिधनहेतुः ॥ १०२ ॥ १०४ ॥ १०५ ॥ १०६ ॥ १०७ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेसप्ताधिकशततमोऽध्यायः ॥ १०७ ॥ ॥ ७ ॥ ॥ कथमिति ॥ १ ॥ २ ॥ ३ ॥

अर्जुनउवाच ॥ ॥ शिखंडीनिधनंकृष्णाभीष्मस्यप्रसमीक्ष्यताम्रवम् ॥ दृष्ट्वैवहिसदाभीष्मःपांचाल्यंविनिवर्तते ॥ १०३ ॥ तेवयंप्रमुखेतस्यपुरस्कृत्यशिखंडिनम् ॥ गां गेयंपातयिष्यामउपायेनेतिमेमतिः ॥ १०४ ॥ अहमन्यान्महेष्वासान्वारयिष्यामिसायकैः ॥ शिखंड्यपियुधांश्रेष्ठंभीष्ममेवाभियोधयेत् ॥ १०५ ॥ श्रुतंहिकुरुमुख्यस्यनार्हंहन्यांशिखंडिनम् ॥ कन्यात्वेषापुराभूत्वापुरुषःसमपद्यत ॥ १०६ ॥ इत्येवंनिश्चयंकृत्वापांडवाःसहमाधवाः ॥ अनुमान्यमहात्मानंप्रययुर्हृष्टमानसाः ॥ शयनानियथास्वानिप्रेजिरेपुरुषर्षभाः ॥ १०७ ॥' ॥ इ० भी० प० भीष्मवध० नवमदिवसावहारोत्तरमंत्रेसप्ताधिकशततमोऽध्यायः ॥ १०७ ॥ ॥ ७ ॥

धृतराष्ट्रउवाच ॥ ॥ कथंशिखंडीगांगेयमभ्यवर्ततसंयुगे ॥ पांडवांश्चकथंभीष्मस्तन्ममाचक्ष्वसंजय ॥ १ ॥ ॥ संजयउवाच ॥ ॥ ततस्तेपांडवाःसर्वेसूर्यस्योदयनंप्रति ॥ ताड्यमानासुभेरीषुहृदंगेष्वानकेषुच ॥ २ ॥ ध्मायत्सुदधिवर्णेषुजलजेषुसमंततः ॥ शिखंडिनंपुरस्कृत्यनिर्याताःपांडवायुधि ॥ ३ ॥ कृत्वाव्यूहंमहाराजसर्वशत्रुनिबर्हणम् ॥ शिखंडीसर्वसैन्यानामग्र आसीद्विशांपते ॥ ४ ॥ चक्ररक्षौततस्तस्यभीमसेनधनंजयौ ॥ पृष्ठतोद्रौपदेयाश्चसौभद्रश्चैववीर्यवान् ॥ ५ ॥ सात्यकिश्चेकितानश्चतेषांगोप्तामहारथः ॥ धृष्टद्युम्नस्ततःपश्चात्पंचालैरभिरक्षितः ॥ ६ ॥ ततोयुधिष्ठिरोराजायमाभ्यांसहितःप्रभुः ॥ प्रययौसिंहनादेननादयंन्भरतर्षभ ॥ ७ ॥ विराटस्तुततःपश्चात्स्वेनसैन्येनसंवृतः ॥ द्रुपदश्चमहाबाहोततःपश्चादुपाद्रवत् ॥ ८ ॥ केकयाभ्रातरःपंचधृष्टकेतुश्चवीर्यवान् ॥ जघनंपालयामासुःपांडुसैन्यस्यभारत ॥ ९ ॥ एवंव्यूत्यमहासैन्यंपांडवास्तववाहिनीम् ॥ अभ्यद्रवंतसंग्रामेत्यक्त्वाजीवितमात्मनः ॥ १० ॥ तथैवकुरवोराजन्भीष्मंकृत्वामहारथम् ॥ अग्रतःसर्वसैन्यानांप्रययुःपांडवान्प्रति ॥ ११ ॥ पुत्रैस्तवदुराधर्षैरक्षितःसुमहाबलैः ॥ ततोद्रोणोमहेष्वासःपुत्रश्चास्यमहाबलः ॥ १२ ॥ भगदत्तस्ततःपश्चाद्वृजानीकेनसंवृतः ॥ रुपश्चकृतवर्माचभगदत्तमनुव्रतौ ॥ १३ ॥ कांबोजराजोबलवांस्ततःपश्चात्सुदक्षिणः ॥ मागधश्चजयत्सेनःसौबलश्चबृहद्बलः ॥ १४ ॥ तथैवान्येमहेष्वासाःसुशर्मप्रमुखानृपाः ॥ जघनंपालयामासुस्तवसैन्यस्यभारत ॥ १५ ॥ दिवसेदिवसेप्राप्तेभीष्मःशांतनवोयुधि ॥ आसुरानकरोद्व्यूहान्दैशाचानयराक्षसान् ॥ १६ ॥ ततःप्रवव्रतेयुद्धंतवतेषांचभारत ॥ अन्योन्यंनिघ्नतांराजन्यमराष्ट्रविवर्धनम् ॥ १७ ॥ अर्जुनप्रमुखाःपार्थाःपुरस्कृत्यशिखंडिनम् ॥ भीष्मंयुद्धेभ्यवर्ततकिरंतोविविधान्शरान् ॥ १८ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

॥ १७० ॥

॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ कामंस्वच्छंदं अभ्यसप्रक्षिप ॥ ४३ ॥ ४४ ॥

तत्रभारतभीमेनताडितास्तावकाःशरैः ॥ रुधिरौघपरिक्लिन्नाःपरलोकंययुस्तदा ॥ १९ ॥ नकुलःसहदेवश्चसात्यकिश्चमहारथः ॥ तवसैन्यंसमासाद्यपीडयामासुरोजसा ॥ २० ॥ तेवध्यमानाःसमरेतावकाभरतर्षभ ॥ नाशक्नुवन्वारयितुंपांडवानांमहद्बलम् ॥ २१ ॥ ततस्तुतावकंसैन्यंवध्यमानंसमंततः ॥ सुसंग्रामंदशदिशःकाल्यमानंमहारथैः ॥ २२ ॥ त्रातारंनाध्यगच्छंततावकाभरतर्षभ ॥ वध्यमानाःशितैर्बाणैःपांडवैःसहस्रंजयैः ॥ २३ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ पीड्यमानंबलंदृष्ट्वापार्थैर्भीष्मःपराक्रमी ॥ यदकार्षीद्रणेकृद्धस्तन्ममाचक्ष्वसंजय ॥ २४ ॥ कथंवापांडवान्युद्धेप्रत्युद्यातःपरंतपः ॥ विनिघ्नन्सोमकान्वीरस्तदाचक्ष्वममानघ ॥ २५ ॥ ॥ संजयउवाच ॥ ॥ आचक्षेतेमहाराजयदकार्षीत्पितातव ॥ पीडितेतवपुत्रस्यसैन्येपांडवस्तंजयैः ॥ २६ ॥ प्रहृष्टमनसःशूराःपांडवाःपांडुपूर्वज ॥ अभ्यवर्ततनिघ्नंतस्तवपुत्रस्यवाहिनीम् ॥ २७ ॥ तंविनाशंमनुष्येंद्रनरवारणवाजिनाम् ॥ नाशक्ष्यततदाभीष्मःसैन्यघातंरणेपरैः ॥ २८ ॥ सपांडवान्महेष्वासःपंचालांश्चैवसंजयान् ॥ नाराचैर्वत्सदंतैश्चशितैरंजलिकैस्तथा ॥ २९ ॥ अभ्यवर्षतदुर्धर्षस्त्यक्त्वाजीवितमात्मनः ॥ सपांडवानांप्रवरान्पंचराजन्महारथान् ॥ ३० ॥ आत्तशस्त्रोरणेयत्नाद्वारयामाससायकैः ॥ नानाशस्त्रास्त्रवर्षैस्तान्वीर्यामर्षप्रवेरितैः ॥ ३१ ॥ निजघ्नेसमरेक्रुद्धोहस्त्यश्वंचामितंबहु ॥ रथिनोऽपात्यद्राजन्रथेभ्यःपुरुषर्षभ ॥ ३२ ॥ सादिनश्चाश्वपृष्ठेभ्यःपादातांश्चसमागतान् ॥ ३३ ॥ गजारोहान्गजेभ्यश्चपरेषांजयकारिणः ॥ तमेकंसमरेभीष्मंत्वरमाणंमहारथम् ॥ ३४ ॥ पांडवाःसमवर्ततवज्रहस्तमिवासुराः ॥ शक्राशनिसमस्पर्शान्विमुंचन्निशिताञ्छरान् ॥ ३५ ॥ दिक्ष्वदृश्यतसर्वासुघोरंसंधारयन्वपुः ॥ मंडलीभूतमेवास्यनित्यंधनुरदृश्यत ॥ ३६ ॥ संग्रामेयुध्यमानस्यशक्रचापोपमंमहत् ॥ तदृष्ट्वासमरेकर्मपुत्रास्तवविशांपते ॥ ३७ ॥ विस्मयंपरमंगत्वापितामहमपूजयन् ॥ पार्थाविमनसोभूत्वाप्रैक्षंतपितरंतव ॥ ३८ ॥ युध्यमानंरणेशूरंविप्रचित्तिमिवामराः ॥ नचैनंवारयामासुर्व्यात्ताननमिवांतकम् ॥ ३९ ॥ दशमेहनिसंप्राप्तेरथानीकंशिखंडिनः ॥ अदहन्निशितैर्बाणैःकृष्णवर्त्मेवकाननम् ॥ ४० ॥ तंशिखंडीत्रिभिर्बाणैरभ्यविध्यत्स्तनांतरे ॥ आशीविषमिवक्रुद्धंकालसृष्टमिवांतकम् ॥ ४१ ॥ सतेनातिभृशंविद्धःप्रेक्ष्यभीष्मःशिखंडिनम् ॥ अनिच्छन्निधनंकृद्धःप्रहसन्निदमब्रवीत् ॥ ४२ ॥ काममभ्यसवामावानत्वांयोत्स्येकथंचन ॥ यैवहित्वंकृताधात्रासैवहित्वंशिखंडिनी ॥ ४३ ॥ तस्यतद्वचनंश्रुत्वाशिखंडीक्रोधमूर्छितः ॥ उवाचैनंतथाभीष्मंतक्षिणीपरिसंलिहन् ॥ ४४ ॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ सुदृष्टःक्रियतां नृपुनर्द्रक्ष्यसिलोकमिममितिभावः॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥५४॥ साधयस्वस्वीकुरुजहिद्वा ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

जानामित्वांमहाबाहोक्षत्रियाणांक्षयंकरम्॥ मयाश्रुतंचतेपुत्रंजामदग्न्येनवैसह ॥ ४५ ॥ दिव्यश्चतेप्रभावोयंमयाचबहुशःश्रुतः ॥ जानन्नपिप्रभावंतेयोत्स्ये द्याहंत्वयासह॥ ४६ ॥पांडवानांप्रियंकुर्वन्नात्मनश्चनरोत्तम ॥अग्रत्वांयोधयिष्यामिरणेपुरुषसत्तम ॥ ४७ ॥ ध्रुवंचत्वांहनिष्यामिशपेसत्येनतेऽग्रतः॥ एतच्छ त्वाचमद्वाक्यंयत्कृत्यंतत्समाचर॥ ४८ ॥ काममभ्यसवामावानमेजीवन्प्रमोक्ष्यसे॥ सुदृष्टःक्रियतांभीष्मलोकोयंसमितिंजय ॥ ४९ ॥ ॥संजयउवाच॥ ॥ एवमुक्त्वाततोभीष्मंपंचभिर्नतपर्वभिः॥ अविध्यतरणेभीष्मंप्रणुन्नंवाक्यसायकैः॥ ५० ॥ तस्यतद्वचनंश्रुत्वासव्यसाचीमहारथः ॥ कालोयमितिसंचिंत्यशि खंडिनमचोदयत्॥ ५१ ॥ अहंत्वामनुयास्यामिपरान्विद्रावयन्शरैः ॥ अभिद्रवसुसंरब्धोभीष्मंभीमपराक्रमम्॥ ५२ ॥ नहितेसंयुगेपीडांशक्तःकर्तुंमहाबलः॥ तस्मादद्यमहाबाहोयत्नाद्भीष्ममभिद्रव ॥ ५३ ॥ अहत्वासमरेभीष्मंयदियास्यसिमारिष ॥ अवहास्योस्यलोकस्यभविष्यसिमयासह ॥ ५४ ॥ नावहास्यायथा वीरभवेमपरमाहवे॥ तथाकुरुरणेयत्नंसाधयस्वपितामहम्॥ ५५ ॥ अहंतरक्षणंयुद्धेकरिष्यामिमहाबल॥ वारयन्रथिनःसर्वान्साधयस्वपितामहम्॥ ५६ ॥ द्रो णंचद्रोणपुत्रंचकृपंचाथसुयोधनम्॥ चित्रसेनंविकर्णंचसैंधवंचजयद्रथम्॥ ५७॥ विंदानुविंदावावंत्यौकांबोजंचसुदक्षिणम्॥ भगदत्तंतथाशूरंमागधंचमहाब लम्॥ ५८ ॥ सौमदत्तिंतथाशूरमार्ष्यशृंगिंचराक्षसम् ॥ त्रिगर्तराजंचरणेसहसर्वैर्महारथैः॥ ५९ ॥अहमावारयिष्यामिवेलेवमकरालयम्॥ कुरुश्रेष्ठसहितान्सर्वा नयुध्यमानान्महाबलान्॥ नवारयिष्यामिरणेसाधयस्वपितामहम्॥ ६० ॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिभीष्मशिखंडिसमागमेअष्टाधिक शततमोऽध्यायः॥ १०८॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥धृतराष्ट्रउवाच ॥ ॥ कथंशिखंडीगांगेयमभ्यधावत्पितामहम्॥पांचाल्यःसमरेकुद्धोध र्मात्मानंयतव्रतम्॥ १ ॥ केऽरक्षन्पांडवानीकेशिखंडिनमुदायुधाः ॥त्वरमाणास्त्वराकालेजिगीषंतोमहारथाः॥ २॥ कथंशांतनवोभीष्मःसतस्मिन्दशमेहनि॥अ युध्यतमहाबीर्यःपांडवैःसहसृंजयैः॥ ३॥ नमृष्यामिरणेभीष्मंप्रत्युद्यातंशिखंडिना ॥ कच्चिन्नरथभंगोस्यधनुर्वाशीर्यतास्यतः॥ ४॥ ॥संजयउवाच॥ ॥नाशीर्यतधनुश्चास्यरथभंगोनचाप्यभूत्॥ युध्यमानस्यसंग्रामेभीष्मस्यभरतर्षभ॥ ५॥

इतिश्रीष्मपर्वणिनैलकंठीयेभारतभावदीपेअष्टाधिकशततमोऽध्यायः ॥ १०८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ कथमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

॥ १७१ ॥

॥ ६ ॥ ७ ॥ समितिंजयःसंग्रामजित् समितियुद्धे ॥ ८ ॥ ९ ॥१०॥ ११ ॥१२॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ द्रवतेद्रावयति ॥ २० ॥ २१ ॥ गतिधामआश्रयमितियावत् स्था

निघ्नतःसमरेशत्रूनशरैःसंनतपर्वभिः ॥ अनेकशतसाहस्रास्तावकानांमहारथाः ॥ ६ ॥ तथादंतिगणाराजन्हयाश्चैवसुसज्जिताः ॥ अभ्यवर्ततयुद्धायपुररुक्त्य पितामहम्॥ ७॥ यथाप्रतिज्ञंकौरव्यसचापिसमितिंजयः॥ पार्थानामकरोद्भीष्मःसततंसमितिक्षयम्॥ ८ ॥युध्यमानंमहेष्वासंविनिघ्नंतंपरान्शरैः॥ पंचालाः पांडवैःसार्धंसर्वेतेनाभ्यवारयन् ॥ ९ ॥ दशमेहनिसंप्राप्तेततस्तांरिपुवाहिनीम् ॥ कीर्यमाणांशितैर्बाणैःशतशोथसहस्रशः ॥ १० ॥ नहिभीष्मंमहेष्वासंपांडवाः पांडुपूर्वज ॥ अशक्नुवन्रणेजेतुंपाशहस्तमिवांतकम् ॥ ११ ॥ अथोपायान्महाराजसव्यसाचीधनंजयः ॥ त्रासयन्रथिनःसर्वान्बीभत्सुरपराजितः॥ १२ ॥ सिंह वद्विनदन्धनुश्चैर्धनुर्ज्यांविक्षिपन्मुहुः॥ शरौघान्विसृजन्पार्थोव्यचरत्कालवद्रणे ॥ १३॥ तस्यशब्देनवित्रस्तास्तावकाभरतर्षभ ॥ सिंहस्येवमृगाराजन्व्यद्रवंतमहा भयात्॥ १४॥ जयंतंपांडवंदृष्ट्वात्वत्सैन्यंचाभिपीडितम्॥ दुर्योधनस्ततोभीष्ममब्रवीद्भृशपीडितः॥ १५॥ एषपांडुसुतस्तातश्वेताश्वःकृष्णसारथिः ॥दहतेमाम कान्सर्वान्कृष्णवर्त्मेवकाननम् ॥ १६ ॥ पश्यसैन्यानिगांगेयद्रवमाणानिसर्वशः॥ पांडवेनयुधांश्रेष्ठकाल्यमानानिसंयुगे ॥ १७॥ यथापशुगणान्याल्लःसंकालय तिकानने ॥ तथेदंमामकंसैन्यंकाल्यतेशत्रुतापन ॥ १८ ॥ धनंजयशरैर्भग्नंद्रवमाणंततस्ततः ॥ भीमोप्येवंदुराधर्षोविद्रावयतिमेबलम्॥ १९॥ सात्यकिश्चेकितां नश्चमाद्रीपुत्रौचपांडवौ ॥ अभिमन्युःसुविक्रांतोवाहिनींद्रवतेमम ॥ २० ॥ धृष्टद्युम्नस्तथाशूरोराक्षसश्चघटोत्कचः ॥ व्यद्रावयेतांसहसासैन्यंममहारणे ॥ २१ ॥ वध्यमानस्यसैन्यस्यसर्वैरेतैर्महारथैः ॥ नान्यांगतिंप्रपश्यामिस्थानेयुद्धेचभारत ॥ २२ ॥ ऋतेत्वांपुरुषव्याघ्रदेवतुल्यपराक्रमम्॥ पर्याप्तस्तुभवान्शीघ्रंपीडिता नांगतिर्भव ॥ २३ ॥ एवमुक्तोमहाराजपितादेवव्रतस्तव ॥ चिंतयित्वामुहूर्ततुकृत्वानिश्चयमात्मनः ॥ २४ ॥ तवसंधारयन्पुत्रमब्रवीच्छांतनोःसुतः॥ दुर्योधन विजानीहिस्थिरोभूत्वाविशांपते ॥ २५॥ पूर्वकालंतवमयाप्रतिज्ञातंमहाबल ॥ हत्वादशसहस्राणिक्षत्रियाणांमहात्मनाम्॥ २६॥संग्रामाद्यपयातव्यमेतत्कर्मम माह्निकम्॥ इतितत्कृतवांश्चाहंत्वयोक्तंभरतर्षभ ॥ २७॥ अद्यचापिमहत्कर्मप्रकरिष्येमहाबल ॥ अहंवाद्यहतःशेष्येहनिष्येवाद्यपांडवान् ॥ २८ ॥ अद्यतेपुरुषव्या घ्रप्रतिमोक्ष्येकृणंतव ॥ भर्तृपिंडकृतंराजन्निहतःपृतनामुखे ॥ २९ ॥ इत्युक्त्वाभरतश्रेष्ठक्षत्रियान्यवपच्छरैः ॥ आससाददुराधर्षःपांडवानामनीकिनीम् ॥ ३० ॥

भेअवस्थाने ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ आह्निकंदिवसकार्यं ॥ २७ ॥ शेष्येस्वप्स्यामि ॥ २८ ॥ २९ ॥ ३० ॥

॥ २१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ॥इतिश्री०नै०भारतभावदीपेनवाधिकशततमोऽध्यायः ॥ १०९ ॥ ॥९॥ ॥९॥ ॥ अर्जुनइति ॥ १ ॥ २ ॥ ३ ॥

अनीकमध्येतिष्ठंतंगांगेयंभरतर्षभ॥ आशीविषमिवक्रुद्धंपांडवाःप्रत्यवारयन्॥ ३१ ॥ दशमेहनिभीष्मस्तुदर्शयन्शक्तिमात्मनः ॥ राजन्शतसहस्राणिसोव
धीत्कुरुनंदन॥ ३२॥पंचालानांचयेश्रेष्ठाराजपुत्रामहारथाः॥तेषामादत्ततेजांसिजलंसूर्यइवांशुभिः ॥ ३३॥ हत्वादशसहस्राणिकुंजराणांतरस्विनाम्॥सा
रोहाणांमहारजहयानांचायुतंतथा॥ ३४॥पूर्णेशतसहस्रेद्वेपादातानांनरोत्तमः ॥प्रजज्वालरणेभीष्मोविधूमइवपावकः ॥ ३५ ॥ नचैवंपांडवेयानांकेचिच्छे
कुर्निरीक्षितुम्॥उत्तरंमार्गमास्थायतपंतमिवभास्करम्॥ ३६॥तेपांडवेयाःसंरब्धामहेष्वासेनपीडिताः॥वधायाभ्यद्रवन्भीष्मंसृंजयाश्चमहारथाः॥ ३७ ॥
संयुद्ध्यमानावद्रुभिर्भीष्मःशांतनवस्तथा॥अवकीर्णोमहामेरुःशैलोमेघैरिवावृतः॥ ३८॥पुत्रास्तुतवगांगेयंसमंतात्पर्यवारयन्॥ महत्यासेनयासार्धंततोयुद्ध
मवर्तत॥ ३९॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिभीष्मदुर्योधनसंवादेनवाधिकशततमोऽध्यायः॥ १०९॥ ॥९॥ ॥९॥

संजयउवाच॥ ॥अर्जुनस्तुरणेराजन्दृष्ट्वाभीष्मस्यविक्रमम्॥ शिखंडिनमथोवाचसमभ्येहिपितामहम्॥१॥नचापिभीस्त्वयाकार्याभीष्मादद्यकथंचन॥अ
हमेनंशरैस्तीक्ष्णैःपातयिष्येरथोत्तमात्॥ २॥एवमुक्तस्तुपार्थेनशिखंडीभरतर्षभ ॥ अभ्यद्रवतगांगेयंश्रुत्वापार्थस्यभाषितम्॥ ३ ॥ धृष्टद्युम्नस्तथाराजन्सौभद्र
श्चमहारथः॥ हृष्टावाद्रवतांभीष्मंश्रुत्वापार्थस्यभाषितम्॥ ४॥विराट्द्रुपदौवृद्धौकुंतिभोजश्चदंशितः॥ अभ्यद्रवतगांगेयंपुत्रस्यतवपश्यतः॥ ५॥ नकुलःसहदे
वश्चधर्मराजश्चवीर्यवान्॥ तथेतराणिसैन्यानिसर्वाण्येवविशांपते॥ ६॥ समाद्रवंतगांगेयंश्रुत्वापार्थस्यभाषितम्॥ प्रत्युद्ययुस्तावकाश्चसमेतांस्तान्महारथान्
॥ ७॥ यथाशक्तियथोत्साहंतन्मेनिगदतःशृणु॥ चित्रसेनोमहाराजचेकितानसमभ्ययात्॥ ८॥ भीष्मप्रेप्सुंरणेयांतंदृष्व्याघ्रशिशुर्यथा॥ धृष्टद्युम्नंमहाराजभी
ष्मांतिकमुपागतम्॥ ९॥ त्वरमाणंरणेयत्तंरुतवर्मान्यवारयत्॥ भीमसेनंसुसंक्रुद्धंगांगेयस्यवधैषिणम्॥१०॥त्वरमाणोमहाराजसौमदत्तिन्यवारयत्॥ तथै
वनकुलंशूरंकिरंतंसायकान्बहून्॥ ११॥ विकर्णोवारयामासइच्छन्भीष्मस्यजीवितम्॥ सहदेवंतथाराजन्यांतंभीष्मरथंप्रति॥ १२॥वारयामाससंक्रुद्धःकृपः
शारद्वतोयुधि॥ राक्षसंक्रूरकर्माणंभैमसेनिंमहाबलम्॥ १३॥भीष्मस्यनिधनंप्रेप्सुंदुर्मुखोऽभ्यद्रवद्बली॥ सात्यकिंसमरेयांतंतवपुत्रोन्यवारयत्॥ १४॥ अभि
मन्युंमहाराजयांतंभीष्मरथंप्रति॥ सुदक्षिणोमहाराजकांबोजःप्रत्यवारयत्॥ १५॥ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १७२ ॥

॥ १६ ॥ १७ ॥ रणसंरुतोत्साहं ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ प्रलयानिवप्रलयकालीनानिव ॥ २४ ॥ २५ ॥ २६ ॥ अद्भुतंअभूतपूर्वं ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

विराट्द्रुपदौवृद्धौसमेतावरिमर्दनौ॥ अश्वत्थामाततःक्रुद्धोवारयामासभारत ॥ १६ ॥तथापांडुसुतंज्येष्ठंभीष्मस्यवधकांक्षिणम्॥ भारद्वाजोरणेयत्तोधर्मपुत्र
मवारयत्॥ १७॥ अर्जुनंरभसंयुद्धेपुरस्कृत्यशिखंडिनम्॥ भीष्मप्रेप्सुंमहाराजभासयंतंदिशोदश॥ १८ ॥दुःशासनोमहेष्वासोवारयामाससंयुगे॥ अन्येचता
वकायोधाःपांडवानांमहारथान्॥ १९ ॥ भीष्मस्याभिमुखान्यातान्वारयामासुराहवे॥ धृष्टद्युम्नस्तुसैन्यानिप्राक्रोशंस्तुपुनःपुनः ॥ २०॥अभ्यद्रवतसंरब्धोभी
ष्ममेकंमहारथः॥ एषोर्जुनोरणेभीष्मंप्रयातिकुरुनंदनः ॥ २१ ॥ अभ्यद्रवतमाभैष्टभीष्मोहिप्राप्स्यतेनवः॥ अर्जुनंसमरेयोद्धुंनोत्सहेतापिवासवः॥ २२ ॥कि
मुभीष्मोरणेवीरागतसत्वोऽल्पजीवितः ॥ इतिसेनापतेःश्रुत्वापांडवानांमहारथाः ॥. २३ ॥ अभ्यद्रवंतसंहृष्टागांगेयस्यरथंप्रति॥ आगच्छमानान्समरेवार्यो
घान्प्रलयानिव॥ २४॥अवारयंतसंहृष्टास्तावकाःपुरुषर्षभाः॥दुःशासनोमहाराजभयंत्यक्त्वामहारथः॥ २५ ॥भीष्मस्यजीविताकांक्षीधनंजयमुपाद्रवन्॥
तथैवपांडवाःशूरागांगेयस्यरथंप्रति॥ २६ ॥ अभ्यद्रवंतसंग्रामेतवपुत्रान्महारथाः॥तत्राद्भुतमपश्यामचित्ररूपंविशांपते ॥ २७ ॥ दुःशासनरथंप्राप्ययत्पा
र्थोनात्यवर्तत॥ यथावारयतेवेलाक्षुब्धतोयंमहार्णवम् ॥ २८ ॥ तथैवपांडवंक्रुद्धंतवपुत्रोन्यवारयत्॥ उभौतौरथिनांश्रेष्ठावुभौभारतदुर्जयौ ॥ २९॥उभौचं
द्रार्कसदृशौकांत्यादीप्याचभारत ॥ तथातौजातसंरंभावन्योन्यवधकांक्षिणौ ॥ ३० ॥ समीयतुर्महासंख्येमयशक्रौयथापुरा ॥ दुःशासनोमहाराजपांडवंवि
शिखैस्त्रिभिः ॥ ३१ ॥ वासुदेवंचविंशत्याताडयामाससंयुगे॥ ततोर्जुनोजातमन्युर्वार्ष्णेयंवीक्ष्यपीडितम् ॥ ३२ ॥दुःशासनंशतेनाजौनाराचानांसमार्पयत्
॥ तेतस्यकवचंभित्त्वापपुःशोणितमाहवे ॥ ३३ ॥दुःशासनस्त्रिभिःक्रुद्धःपार्थंविव्याधपत्रिभिः॥ ललाटेभरतश्रेष्ठशरैःसंनतपर्वभिः॥ ३४॥ ललाटस्थैस्तुतैर्बाणैः
शुशुभेपांडवोरणे॥ यथामेरुर्महाराजशृंगैरत्यर्थमुच्छ्रितैः ॥ ३५ ॥ सोतिविद्धोमहेष्वासःपुत्रेणतवधन्विना ॥ व्यराजतरणेपार्थःकिंशुकःपुष्पवानिव ॥ ३६ ॥
दुःशासनंततःक्रुद्धःपीडयामासपांडवः॥ पर्वणीवसुसंक्रुद्धोराहुःपूर्णनिशाकरम्॥ ३७ ॥पीड्यमानोबलवतापुत्रस्तवविशांपते ॥ विव्याधसमरेपार्थंकंकपत्रैः
शिलाशितैः ॥ ३८ ॥ तस्यपार्थोधनुश्छित्त्वारथंचास्यत्रिभिःशरैः॥आजघानततःपश्चात्पुत्रंतेनिशितैःशरैः॥ ३९॥सोन्यत्कार्मुकमादायभीमस्यप्रमुखेस्थि
तः॥ अर्जुनंपंचविंशत्याबाह्वोरुरसिचार्पयत्॥ ४०॥ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

अप्रैषीत् उपसर्गात्पूर्वोऽङ्गमस्तुच्छांदसः एवमन्यत्रापि ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ द्वीप आश्रयः ॥ ४६ ॥ ४७ ॥ ४८ ॥ इतिश्री० नै० भा० दशाधिकशततमोऽध्यायः ॥ ११० ॥ ॥ ७ ॥

तस्यकुद्धोमहाराजपांडवःशत्रुतापनः ॥ अप्रैषीद्विशिखान्घोरान्यमदंडोपमान्रणे ॥ ४१ ॥ अप्राप्तानेवतान्बाणांश्चिच्छेदतनयस्तव ॥ यतमानस्यपार्थस्यत
दद्भुतमिवाभवत् ॥ ४२ ॥ पार्थचनिशितैर्बाणैरविध्यत्तनयस्तव ॥ ततःकुद्धोरणेपार्थःशरान्संधायकार्मुके ॥ ४३ ॥ प्रेषयामाससमरेस्वर्णपुंखाञ्छिलाशिता
न् ॥ न्यमज्जंस्तेमहाराजतस्यकायेमहात्मनः ॥ ४४ ॥ यथाहंसामहाराजतडागंप्राप्यभारत ॥ पीडितश्चैवपुत्रस्तेपांडवेनमहात्मना ॥ ४५ ॥ हित्वापार्थरणेतूर्णं
भीष्मस्यरथमाव्रजत् ॥ अगाधेमज्जतस्तस्यद्वीपोभीष्मोऽभवत्तदा ॥ ४६ ॥ प्रतिलभ्यततःसंज्ञांपुत्रस्तवविशांपते ॥ अवारयत्ततःशूरोभूयएवपराक्रमी ॥ ४७ ॥
शरैःसुनिशितैःपार्थंयथावत्रंपुरंदरः ॥ निर्विभेदमहाकायोविव्यथेनैवचार्जुनः ॥ ४८ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्व० अर्जुनदुःशासनसमा
गमेदशाधिकशततमोऽध्यायः ॥ ११० ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ सात्यकिंदंशितंयुद्धेभीष्मायाभ्युद्यतंरणे ॥ आर्ष्यशृंगिर्महेष्वासोवारयामास
संयुगे ॥ १ ॥ माधवस्तुसुसंक्रुद्धोराक्षसंनवभिःशरैः ॥ आजघानरणेराजन्महसंनिवभारत ॥ २ ॥ तथैवराक्षसोराजन्माधवंनवभिःशरैः ॥ अर्दयामासराजेंद्र
संक्रुद्धःशिनिपुंगवं ॥ ३ ॥ शैनेयःशरसंघंतुप्रेषयामाससंयुगे ॥ राक्षसायसुसंक्रुद्धोमाधवःपरवीरहा ॥ ४ ॥ ततोरक्षोमहाबाहुःसात्यकिंसत्यविक्रमम् ॥ वि
व्याधविंशतिस्तीक्ष्णैःसिंहनादंननादच ॥ ५ ॥ माधवस्तुभृशंविद्धोराक्षसेनरणेतदा ॥ वार्यमाणश्चतेजस्वीजहासचननादच ॥ ६ ॥ भगदत्तस्ततःक्रुद्धोमाध
वंनिशितैःशरैः ॥ ताडयामाससमरेतोत्रैरिवमहागजम् ॥ ७ ॥ विहायराक्षसंयुद्धेशैनेयोरथिनांवरः ॥ प्राग्ज्योतिषायचिक्षेपशरान्संनतपर्वणः ॥ ८ ॥ तस्यप्रा
ग्ज्योतिषोराजामाधवस्यमहद्धनुः ॥ चिच्छेदशतधारेणभल्लेनकृतहस्तवत् ॥ ९ ॥ अथान्यद्धनुरादायवेगवत्परवीरहा ॥ भगदत्तंरणेक्रुद्धंविव्याधनिशितैःशरैः
॥ १० ॥ सोतिविद्धोमहेष्वासःस्रक्किणीपरिसंलिहन् ॥ शक्तिंकनकवैदूर्यभूषितामायसींदृढाम् ॥ ११ ॥ यमदंडोपमांघोरांचिक्षेपपरमाहवे ॥ तामापतंतींसहसा
तस्यबाहुबलेरिताम् ॥ १२ ॥ सात्यकिःसमरेराजन्द्विधाचिच्छेदसायकैः ॥ ततःपपातसहसामहोल्केवहतप्रभा ॥ १३ ॥ शक्तिंविनिहतांदृष्ट्वापुत्रस्तवविशांपते ॥
महतारथवंशेनवारयामासमाधवम् ॥ १४ ॥ तथापरिवृतंदृष्ट्वावार्ष्णेयानांमहारथम् ॥ दुर्योधनोभृशंकुद्धोभ्रातॄन्सर्वानुवाचह ॥ १५ ॥ तथाकुरुतकौरव्यायथा
वःसात्यकोयुधि ॥ नजीवन्प्रतिनिर्यातिमहतोस्माद्रथव्रजात् ॥ १६ ॥ सात्यकिमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

तस्मिन्हतेहतंमन्येपांडवानांमहद्बलम् ॥ तथेतिचवचस्तस्यपरिगृह्यमहारथाः ॥ १७ ॥ शैनेयंयोधयामासुर्भीष्मायाभ्युद्यतंरणे ॥ कांबोजराजोबलवान्वारयामा
ससंयुगे ॥ १८ ॥ आर्जुनिंनृपतिर्विद्धाशरैःसन्नतपर्वभिः ॥ पुनरेवचतुःषष्ट्याराजन्विव्याधतंनृप ॥ १९ ॥ सुदक्षिणस्तुसमरेपुनर्विव्याधपंचभिः ॥ सारथिंचा
स्यनवभिरिच्छन्भीष्मस्यजीवितम् ॥ २० ॥ तद्युद्धमासीत्सुमहत्तयोस्तत्रसमागमे ॥ यदाभ्यधावद्वांगेयंशिखंडीशत्रुकर्शनः ॥ २१ ॥ विराटद्रुपदौदौवीरयं
तौमहाचमूम् ॥ भीष्मंचयुधिसंरब्धावाद्रवंतौमहारथौ ॥ २२ ॥ अश्वत्थामारणेक्रुद्धःसमियाद्रथसत्तमः ॥ ततःप्रवव्रतेयुद्धंतयोस्तस्यचभारत ॥ २३ ॥ विराटोद्
शभिर्भल्लैराजघानपरंतप ॥ यत्तमानंमहेष्वासंद्रौणिमाहवशोभिनम् ॥ २४ ॥ द्रुपदश्चत्रिभिर्बाणैर्विव्याधनिशितैस्तदा ॥ गुरुपुत्रंसमासाद्यप्रहरंतौमहाबलौ
॥ २५ ॥ अश्वत्थामाततस्तौतुविव्याधपदुभिःशरैः ॥ विराटद्रुपदौवीरौभीष्मंप्रतिसमुद्यतौ ॥ २६ ॥ तत्राद्भुतमपश्यामत्द्वयोश्चरितंमहत् ॥ यद्द्रौणिसायकान्
घोरान्प्रत्यवारयतांयुधि ॥ २७ ॥ सहदेवंतथायांतंकृपःशारद्वतोऽभ्ययात् ॥ यथानागोवनेनागंमत्तोमत्तमुपाद्रवत् ॥ २८ ॥ कृपश्चसमरेशूरोमाद्रीपुत्रंमहारथं ॥
आजघानशरैस्तूर्णंसप्तत्यारुक्मभूषणैः ॥ २९ ॥ तस्यमाद्रीसुतश्चापंद्विधाचिच्छेदसायकैः ॥ अथैनंछिन्नधन्वानंविव्याधनवभिःशरैः ॥ ३० ॥ सोन्यत्कार्मुक
मादायसमरेभारसाधनम् ॥ माद्रीपुत्रंसुसंहृष्टोदशभिर्निशितैःशरैः ॥ ३१ ॥ आजघानोरसिक्रुद्धइच्छन्भीष्मस्यजीवितम् ॥ तथैवपांडवोराजञ्छारद्वतममर्ष
णम् ॥ ३२ ॥ आजघानोरसिक्रुद्धोभीष्मस्यवधकांक्षया ॥ तयोर्युद्धंसमभवद्घोररूपंभयावहम् ॥ ३३ ॥ नकुलंतुरणेक्रुद्धोविकर्णःशत्रुतापनः ॥ विव्याधसायकैः
षष्ट्यारक्षन्भीष्मंमहाबलम् ॥ ३४ ॥ नकुलोपिभृशंविद्धस्तवपुत्रेणधीमता ॥ विकर्णंसप्तसप्तत्यानिर्विभेदशिलीमुखैः ॥ ३५ ॥ तत्रतौनरशार्दूलौभीष्महेतोःपरंत
पौ ॥ अन्योन्यंजघ्नतुर्वीरौगोष्ठेगोवृषभाविव ॥ ३६ ॥ घटोत्कचंरणेयांतंनिघ्नंतंतववाहिनीम् ॥ दुर्मुखःसमरेप्रायाद्भीष्महेतोःपराक्रमी ॥ ३७ ॥ हैडिंबस्तुरणेराजन्दुर्मु
खंशत्रुतापनम् ॥ आजघानोरसिक्रुद्धःशरेणानतपर्वणा ॥ ३८ ॥ भीमसेनसुतंचापिदुर्मुखःसुमुखैःशरैः ॥ षष्ट्यावीरोनदन्हृष्टोविव्याधरणमूर्धनि ॥ ३९ ॥ धृष्टद्युम्नं
तथायांतंभीष्मस्यवधकांक्षिणम् ॥ हार्दिक्योवारयामासरथश्रेष्ठंमहारथः ॥ ४० ॥ हार्दिक्यःपार्षतंचापिविद्धापंचभिरायसैः ॥ पुनःपंचाशतातूर्णंतिष्ठतिष्ठेतिचा
ब्रवीत् ॥ ४१ ॥ आजघानमहाबाहुःपार्षतंतंमहारथम् ॥ तंचैवपार्षतोराजन्हार्दिक्यंनवभिःशरैः ॥ ४२ ॥

॥ १७३ ॥

॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ लोड्यतेआकुलीक्रियते ॥ ५८ ॥ ॥ इतिश्री० नी० भारतभावदीपेएकादशाधिकशततमोऽध्या

विव्याधनिशितैस्तीक्ष्णैःकंकपत्रैरजिह्मगैः॥ तयोःसमभवद्युद्धंभीष्महेतोर्महाहवे ॥ ४३ ॥ अन्योन्यातिशयेयुक्तंयथावृत्रमहेंद्रयोः॥ भीमसेनंतथायांतंभीष्मंप्र
तिमहारथम् ॥ ४४ ॥ भूरिश्रवाभ्ययात्तूर्णंतिष्ठतिष्ठेतिचाब्रवीत्॥ सौमदत्तिरथोभीममाजघानस्मनांतरे ॥ ४५ ॥ नाराचेनसुतीक्ष्णेनरुक्मपुंखेनसंयुगे ॥ उरः
स्थेनबलौतेनभीमसेनःप्रतापवान् ॥ ४६ ॥ स्कंदशक्त्यायथाक्रौंचःपुरानृपतिसत्तम ॥ तौशरान्सूर्यसंकाशान्कर्मारपरिमार्जितान् ॥ ४७ ॥ अन्योन्यस्यरणे
कुद्धौचिक्षिपतुरंतकौ ॥ भीमोभीष्मवधाकांक्षीसौमदत्तिंमहारथम् ॥ ४८ ॥ तथाभीष्मजयेगृध्नुःसौमदत्तिस्तुपांडवम् ॥ कृतप्रतिकृतेयत्तौयोधयामासतूरणे
॥ ४९ ॥ युधिष्ठिरंतुकौंतेयंमहत्यासेनयावृतम् ॥ भीष्माभिमुखमायांतंभारद्वाजोन्यवारयत् ॥ ५० ॥ द्रोणस्यरथनिर्घोषपर्जन्यनिनदोपमम् ॥ श्रुत्वाप्रभद्रकाराज
न्समकंपंतमारिष ॥ ५१ ॥ सासेनामहतीराजन्पांडुपुत्रस्यसंयुगे ॥ द्रोणेनवारितायत्तानचचालपदात्पदम् ॥ ५२ ॥ चेकितानंरणेयत्तंभीष्मंप्रतिजनेश्वर ॥ चि
त्रसेनस्तवसुतःकुद्धरूपमवारयत् ॥ ५३ ॥ भीष्महेतोःपराक्रांतंश्चित्रसेनःपराक्रमी ॥ चेकितानंपरंशक्त्यायोधयामासभारत ॥ ५४ ॥ तथैवचेकितानोपिचि
त्रसेनमवारयत् ॥ तद्युद्धमासीत्सुमहत्तयोस्तत्रसमागमे ॥ ५५ ॥ अर्जुनोवार्यमाणस्तुबहुशस्तत्रभारत ॥ विमुखीकृत्यपुत्रंतेसेनांतवममर्दह ॥ ५६ ॥ द्रुःशा
सनोपिपरयाशक्त्यापार्थमवारयत् ॥ कर्यंभीष्मंननोहन्यादितिनिश्चित्यभारत ॥ ५७ ॥ सावध्यमानासमरेपुत्रस्यतववाहिनी ॥ लोड्यतेरथिभिःश्रेष्ठैस्तत्रतत्रैव
भारत ॥ ५८ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभी० द्वंद्वयुद्धेएकादशाधिकशततमोऽध्यायः ॥ १११ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ अथवीरो

महेष्वासोमत्तवारणविक्रमः ॥ समादायमहच्चापंमत्तवारणवारणम् ॥ १ ॥ विधुन्वानोनरश्रेष्ठोद्रावयाणोवरूथिनीम् ॥ पृतनांपांडवेयानांगाहमानोमहाबलः
॥ २ ॥ निमित्तानिनिमित्तज्ञःसर्वतोवीक्ष्यवीर्यवान् ॥ प्रतपंतमनीकानिद्रोणःपुत्रमभाषत ॥ ३ ॥ अयंहिदिवसस्तातयत्रपार्थोमहाबलः ॥ जिघांसुःसमरेभी
ष्मंपरंयत्नंकरिष्यति ॥ ४ ॥ उत्पतंतिहिमेबाणाधनुःप्रस्फुरतीवच ॥ योगमस्राणिगच्छंतिक्रूरेमेवर्ततेमतिः ॥ ५ ॥ दिक्ष्वशांतानिघोराणिव्याहरंतिमृगद्विजाः ॥
नीचैर्गृध्रानिलीयंतेभारतानांचमूंप्रति ॥ ६ ॥ नष्टप्रभश्चादित्यःसर्वतोलोहितादिशः ॥ रसतेव्यथतेभूमिःकंपतीवचसर्वशः ॥ ७

॥ १७४ ॥

यः ॥ १११ ॥ ॥७॥ ॥ अथेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ घोराणिभयंकराणि अशांतानिअनुपरतानि ॥ ६ ॥ रसतेशब्दायतेव्यथतेविभेतीवकंपतइवच ॥ ७ ॥

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ अलक्ष्माणंप्रचंडलक्षणलक्षितं अवाक्शिराअधोमुखकोट्टियः ॥ १२ ॥ १३ ॥ १४ ॥ आस्थायआलंब्य ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ अस्रसमारंभः

कंकगृध्रावलाकाश्चव्याहरंतिमुहुर्मुहुः ॥ शिवाश्चैवाशिवाघोरावेदयंत्योमहद्भयम् ॥ ८ ॥ पपातमहतीचोल्कामध्येनादित्यमंडलात् ॥ सकबंधश्चपरिघोभानुमा
नुत्पतिष्यति ॥ ९ ॥ परिवेषस्तथाघोरश्चंद्रभास्करयोरभूत् ॥ वेदयानोभयंघोरंराज्ञांदेहावकर्तनम् ॥ १० ॥ देवतायतनस्थाश्चकौरवेंद्रस्यदेवताः ॥ कंपंतेचहसंतेच
नृत्यंतिचरुदंतिच ॥ ११ ॥ अपसव्यंग्रहाश्चकुरलक्ष्माणंदिवाकरम् ॥ अवाक्शिराश्चभगवानुपातिष्ठतचंद्रमाः ॥ १२ ॥ वपूंषिचनरेंद्राणांविगताभानिलक्षये ॥
धार्तराष्ट्रस्यसैन्येषुनचभ्राजंतिदंशिताः ॥ १३ ॥ सेनयोरुभयोश्चापिसमंताच्छ्रयतेमहान् ॥ पांचजन्यस्यनिर्घोषोगांडीवस्यचनिःस्वनः ॥ १४ ॥ ध्रुवमास्थाय
वीभत्सुरुत्तमास्त्राणिसंयुगे ॥ अपास्यान्यान्रणेयोधानभ्येष्यतिपितामहम् ॥ १५ ॥ हृष्यंतिरोमकूपाणिसीदतीवचमेमनः ॥ चिंतयित्वामहाबाहोभीष्मार्जुन
समागमम् ॥ १६ ॥ तंचेहनिकृतिप्रज्ञंपांचाल्यंपापचेतसम् ॥ पुरस्कृत्यरणेपार्थोभीष्मस्यायोधनंगतः ॥ १७ ॥ अब्रवीच्चपुराभीष्मोनाहंहन्यांशिखंडिनम् ॥ स्त्रीत्येषा
विहिताधात्रादैवाच्चसपुनःपुमान् ॥ १८ ॥ अमंगल्यध्वजश्चैवयाज्ञसेनिर्महाबलः ॥ नचामंगलिकेतस्मिन्प्रहरेदापगासुतः ॥ १९ ॥ एतद्विचिंतयानस्यमज्जा
सीदतिमेभृशम् ॥ अभ्युद्यतोरणेपार्थःकुरुवृद्धमुपाद्रवत् ॥ २० ॥ युधिष्ठिरस्यचक्रोधोभीष्मश्चार्जुनसंगतः ॥ ममचास्रसमारंभःप्रजानामशिवंध्रुवम् ॥ २१ ॥ म
नस्वीबलवान्शूरःकृतास्त्रोलघुविक्रमः ॥ दूरपातीदृढेषुश्चनिमित्तज्ञश्चपांडवः ॥ २२ ॥ अजेयःसमरेचापिदेवैरपिसवासवैः ॥ बलवान्बुद्धिमांश्चैवजितक्लेशो
युधांवरः ॥ २३ ॥ विजयीचरणेनित्यंशैरवास्त्रश्चपांडवः ॥ तस्यमार्गंपरिहरन्द्रुतंगच्छयतव्रत ॥ २४ ॥ पश्याद्यैतन्महाघोरंसंयुगंवैशसंमहत् ॥ हेमवर्त्राणिशु
राणांमहांतिचशुभानिच ॥ २५ ॥ कवचान्यवदीर्यंतेशरैःसंनतपर्वभिः ॥ छिद्यंतेचध्वजाग्राणितोमराश्चधनूंषिच ॥ २६ ॥ प्रासाश्चविमलास्तीक्ष्णाःशक्त्य
श्चकनकोज्ज्वलाः ॥ वैजयंत्यश्चनागानांसंकुद्धेनकिरीटिना ॥ २७ ॥ नायंसंरक्षितुंकालःप्राणान्पुत्रोपजीविभिः ॥ याहिस्वर्गंपुररूक्त्यशसेविजयायच ॥ २८ ॥
रथनागहयावर्तांमहाघोरांसुदुर्गमाम् ॥ रथेनसंग्रामनदींतरत्येषकपिध्वजः ॥ २९ ॥ ब्रह्मण्यतादमोदानंतपश्चचरितंमहत् ॥ इहैवदृश्यतेपार्थेभ्रातायस्यधनंज
यः ॥ ३० ॥ भीमसेनश्चबलवान्माद्रीपुत्रौचपांडवौ ॥ वासुदेवश्चवार्ष्णेयोयस्यनाथोव्यवस्थितः ॥ ३१ ॥

उद्यममाख्रं ननुपूर्ववदस्त्राणामुपस्थितिः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ हेपुत्र उपजीविभिरनुगतैः ॥ २८ ॥ २९ ॥ पार्थेयुधिष्ठिरे ॥ ३० ॥ ३१ ॥

तस्यधर्मस्यमन्युर्वैन्यं भारतीसेनामितिरोषः ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ॥ इतिश्रीमन्नी० भा० द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥ ॥७॥

तस्यैषमन्युप्रभवोधार्तराष्ट्रस्यदुर्मतेः॥ तपोदग्धशरीरस्यकोपोदहतिभारतीम्॥ ३२॥ एषसंदृश्यतेपार्थोवासुदेवव्यपाश्रयः॥ दारयन्सर्वसैन्यानिधार्तराष्ट्राणि सर्वशः॥ ३३॥ एतदालोक्यतेसैन्यंक्षोभ्यमाणंकिरीटिना॥ महोर्मिनद्दंसुमहत्तिमिनेवमहाजलम्॥ ३४॥ हाहाकिलकिलाशब्दाःश्रूयंतेचचमूमुखे॥ याहिपां चालदायादमहंयास्येयुधिष्ठिरम्॥ ३५॥ दुर्गमंत्वंतरंराज्ञोव्यूहस्यामिततेजसः॥ समुद्रकुक्षिप्रतिमंसर्वतोतिरथैःस्थितैः॥ ३६॥ सात्यकिश्चाग्निमन्युश्चधृष्टद्युम्नवृकोदरौ॥ पर्यरक्षंतराजानंयमौचमनुजेश्वरम्॥ ३७॥ उपेंद्रसदृशःश्यामोमहाशालइवोद्गतः॥ एषगन्धत्यनीकाग्रेद्वितीयइवफाल्गुनः॥ ३८॥ उत्तमास्त्राणि चाधत्स्वगृहीत्वाचमहद्धनुः॥ पार्षतंयाहिराजानंयुध्यस्वचवृकोदरम्॥ ३९॥ कोहिनेच्छेत्प्रियंपुत्रंजीवंतंशाश्वतीःसमाः॥ क्षत्रधर्मंतुसंप्रेक्ष्यततस्त्वांनियुनज्म्यहम्॥ ४०॥ एषचातिरणेभीष्मोदहतेवैमहाचमूम्॥ युद्धेषुसदृशस्तातयमस्यवरुणस्यच॥ ४१॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिद्रोणाश्वत्थामसंवादेद्वादशाधिकशततमोऽध्यायः॥ ११२॥ ॥७॥ ॥७॥ ॥संजयउवाच॥ ॥भगदत्तःकृपःशल्यःकृतवर्मातथैवच॥ विंदानुविंदावावंत्यौसैंधवश्चजयद्रथः॥ १॥ चित्रसेनोविकर्णश्चतथादुर्मर्षणादयः॥ दशैतेतावकायोधाभीमसेनमयोधयन्॥ २॥ महत्यासेनयायुक्तानानादेशसमुत्थया॥ भीष्मस्यसमरेराजन्नार्ययानामहद्यशः॥ ३॥ शल्यस्तुनवभिर्बाणैर्भीमसेनमताडयत्॥ कृतवर्माचत्रिभिर्बाणैःकृपश्चनवभिःशरैः॥ ४॥ चित्रसेनोविकर्णश्चभगदत्तश्चमारिष॥ दशभिर्दशभिर्बाणैर्भीमसेनमताडयन्॥ ५॥ सैंधवश्चत्रिभिर्बाणैर्भीमसेनमताडयत्॥ विंदानुविंदावावंत्यौपंचभिःपंचभिःशरैः॥ ६॥ दुर्मर्षणस्तुविंशत्यापांडवंनिशितैःशरैः॥ सतान्सर्वान्महाराजराजमानान्पृथक्पृथक्॥ ७॥ प्रवीरान्सर्वलोकस्यधार्तराष्ट्रान्महारथान्॥ जघानसमरे वीरःपांडवःपरवीरहा॥ ८॥ समभिःशल्यमाविध्यत्कृतवर्माणमषष्टिभिः॥ कृपस्यसशरंचापंमध्येचिच्छेदभारत॥ ९॥ अथैनंछिन्नधन्वानंपुनर्विव्याधसप्तभिः॥ विंदानुविंदौचतथात्रिभिस्त्रिभिरताडयत्॥ १०॥ दुर्मर्षणंचविंशत्याचित्रसेनंचपंचभिः॥ विकर्णंदशभिर्बाणैःपंचभिश्चजयद्रथम्॥ ११॥ विद्धाभीमोनदद्धृष्टःसैंधवंचपुनस्त्रिभिः॥ अथान्यद्धनुरादायगौतमोरथिनांवरः॥ १२॥ भीमंविव्याधसंरब्धोदशभिर्निशितैःशरैः॥ सविद्धोदशभिर्बाणैस्तोत्रैरिवमहाद्विपः॥ १३॥ ततःक्रुद्धोमहाराजभीमसेनःप्रतापवान्॥ गौतमंताडयामाससशरैर्बहुभिराहवे॥ १४॥ भगदत्तइति॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥

॥ १७५ ॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ कर्मसिद्धोल्लेखनमेवं ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ सात्वतस्यकृतवर्मणः ॥ ३२ ॥ ३३ ॥ ३४ ॥

सैंधवस्यतथाश्वांश्चसारथिंचत्रिभिःशरैः॥ प्राहिणोन्मृत्युलोकायकालांतकसमद्युतिः॥ १५॥ हताश्वात्तुरथात्तूर्णमवप्लुत्यमहारथः॥ शरांश्चिक्षेपनिशितान्भीमसेनस्यसंयुगे॥ १६॥ तस्यभीमोधनुर्मध्येद्वाभ्यांचिच्छेदमारिष॥ भल्लाभ्यांभरतश्रेष्ठसैंधवस्यमहात्मनः॥ १७॥ सच्छिन्नधन्वाविरथोहताश्वोहतसारथिः॥ चित्रसेनरथंराजन्नारुरोहत्वरान्वितः॥ १८॥ अत्यद्भुतंरणेकर्मकृतवांस्तत्रपांडवः॥ महारथान्शरैर्विद्धावारयित्वाचमारिष॥ १९॥ विरथंसैंधवंचक्रे सर्वलोकस्यपश्यतः॥ तदानमन्दपेशल्योभीमसेनस्यविक्रमम्॥ २०॥ ससंधायशरांस्तीक्ष्णान्कर्मारपरिमार्जितान्॥ भीमंविव्याधसमरेतिष्ठतिष्ठेतिचाब्रवीत्॥ २१॥ कृपश्चकृतवर्माचभगदत्तश्चवीर्यवान्॥ विंदानुविंदावावंत्यौचित्रसेनश्चसंयुगे॥ २२॥ दुर्मर्षणोविकर्णश्चसिंधुराजश्चवीर्यवान्॥ भीमंतेविव्यधुस्तूर्णंशल्यस्तोत्रेरिदमाः॥ २३॥ सचतान्प्रतिविव्याधपंचभिःपंचभिःशरैः॥ शल्यंविव्याधसप्तत्यापुनश्चदशभिःशरैः॥ २४॥ तंशल्योनवभिर्भित्त्वापुनर्विव्याधपंचभिः॥ सारथिंचास्यभल्लेनगाढंविव्याधमर्मणि॥ २५॥ विशोकंप्रेक्ष्यनिर्भिन्नंभीमसेनःप्रतापवान्॥ मद्रराजंत्रिभिर्बाणैर्बाह्वोरुरसिचार्पयत्॥ २६॥ तयेतरान्महेष्वासांस्त्रिभिस्त्रिभिरजिह्मगैः॥ ताडयामाससमरेसिंहवद्विननादच॥ २७॥ तेहियत्तामहेष्वासाःपांडवंयुद्धकोविदम्॥ त्रिभिस्त्रिभिरकुंठाग्रैर्भृशंमर्मस्वताडयन्॥ २८॥ सोतिविद्धोमहेष्वासोभीमसेनोनविव्यथे॥ पर्वतोवारिधाराभिर्वर्षमाणैरिवांबुदैः॥ २९॥ सतुक्रोधसमाविष्टःपांडवानांमहारथः॥ मद्रेश्वरंत्रिभिर्बाणैर्भृशंविद्धामहायशाः॥ ३०॥ कृपंचनवभिर्बाणैर्भृशंविद्धासमंततः॥ प्राग्ज्योतिषंशतैराजौराजन्विव्याधसायकैः॥ ३१॥ ततस्तुसशरंचापंसात्वतस्यमहात्मनः॥ क्षुरप्रेणसुतीक्ष्णेनचिच्छेदकृतहस्तवत्॥ ३२॥ तथान्यद्धनुरादायकृतवर्माद्रकोदरम्॥ आजघानभ्रुवोर्मध्येनाराचेनपरंतपः॥ ३३॥ भीमस्तुसमरेविद्धाशल्यंनवभिरायसैः॥ भगदत्तंत्रिभिश्चैवकृतवर्माणमष्टभिः॥ ३४॥ द्वाभ्यांद्वाभ्यांतुविव्याधगौतमप्रमुखांस्त्रयान्॥ तेपितंसमरेराजन्विव्यधुर्निशितैःशरैः॥ ३५॥ सतयापीड्यमानोपिसर्वशस्त्रैर्महारथैः॥ मत्वातृणेनतांस्तुल्यान्विचचारगतव्यथः॥ ३६॥ तेचापिरथिनांश्रेष्ठाभीमायनिशितान्शरान्॥ प्रेषयामासुरव्यग्राःशतशोथसहस्रशः॥ ३७॥ तस्यशक्तिंमहावेगांभगदत्तोमहारथः॥ चिक्षेपसमरेवीरःस्वर्णदंडांमहामते॥ ३८॥

॥ ३५ ॥ मत्वातृणेनतांस्तुल्यानितितुल्यशब्दोपादानान्नद्वितीयाचतुर्थ्यौकिंतुतृज्यर्थैरतुलोपमाभ्यामितितृतीया ॥ ३६ ॥ ३७ ॥ ३८ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ इतिश्री० नै० भा० त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥ ॥ ७ ॥ ॥ अ

तोमरंसैंधवोराजापट्टिशंचमहाभुजः ॥ शतघ्नींचरुपोराजञ्छरंशल्यश्चसंयुगे ॥ ३९ ॥ अथेतरमहेष्वासाःपंचपंचशिलीमुखान् ॥ भीमसेनंसमुद्दिश्यप्रेषयामासुरोजसा ॥ ४० ॥ तोमरंचद्विधाचक्रेक्षुरप्रेणानिलात्मजः ॥ पट्टिशंचत्रिभिर्बाणैश्चिच्छेदतिलकांडवत् ॥ ४१ ॥ सविद्धेदशतघ्नींचनवभिःकंकपत्रिभिः ॥ मद्वराजप्रयुक्तंचशरंछित्त्वामहारथः ॥ ४२ ॥ शक्तिंचिच्छेदसहसाभगदत्तेरितांरणे ॥ तथेतरान्शरान्घोरान्शरैःसंनतपर्वभिः ॥ ४३ ॥ भीमसेनोरणश्लाघीत्रिभिश्चैकैकमाच्छिनत् ॥ तांश्चसर्वान्महेष्वासांस्त्रिभिस्त्रिभिरताडयत् ॥ ४४ ॥ ततोधनंजयस्तत्रवर्तमानेमहारणे ॥ आजगामरथेनाजौभीमंदृष्ट्वामहारथम् ॥ ४५ ॥ निघ्नंतंसमरेशत्रून्योधयानंचसायकैः ॥ तौतुतत्रमहात्मानौसमेतौवीक्ष्यपांडवौ ॥ ४६ ॥ नशशंसुर्जयंतत्रतावकाःपुरुषर्षभाः ॥ अथार्जुनोरणेभीमंयोधयंतंमहारथान् ॥ ४७ ॥ भीष्मस्यनिधनाकांक्षीपुरस्कृत्यशिखंडिनम् ॥ आससादरणेवीरांस्तावकान्दशभारत ॥ ४८ ॥ येस्मभीमंरणेराजन्योधयंतोव्यवस्थिताः ॥ वीभत्सुस्तानथाविध्यद्भीमस्यप्रियकाम्यया ॥ ४९ ॥ ततोदुर्योधनोराजासुशर्माणमचोदयत् ॥ अर्जुनस्यवधार्थायभीमसेनस्यचोभयोः ॥ ५० ॥ सुशर्मन्गच्छशीघ्रंत्वंबलौघैःपरिवारितः ॥ जहिपांडुसुतावेतौधनंजयंवृकोदरौ ॥ ५१ ॥ तच्छ्रुत्वावचनंतस्यत्रैगर्तःप्रस्थलाधिपः ॥ अभिद्रुत्यरणेभीममर्जुनंचैवधन्विनौ ॥ ५२ ॥ रथैरनेकसाहस्रैःसमंतात्पर्यवारयत् ॥ ततःप्रववृतेयुद्धमर्जुनस्यपरैःसह ॥ ५३ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिभीमपराक्रमेत्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥ ॥ ७ ॥ ॥ ७ ॥ संजयउवाच ॥ ॥ अर्जुनस्तुरणेशल्यंयतमानंमहारथम् ॥ छादयामाससमरेशरैःसंनतपर्वभिः ॥ १ ॥ सुशर्माणंत्रिभिश्चैवत्रिभिस्त्रिभिरविध्यत ॥ प्राग्ज्योतिषंचसमरेसैंधवंचजयद्रथम् ॥ २ ॥ चित्रसेनंविकर्णंचकृतवर्माणमेवच ॥ दुर्मर्षणंचराजेंद्रत्यावंत्यौचमहारथौ ॥ ३ ॥ एकैकंत्रिभिरानर्छत्कंकबर्हिणवाजितैः ॥ शरैरतिरथोयुद्धेपीडयन्वाहिनींतव ॥ ४ ॥ जयद्रथोरणेपार्थंविद्धाभारतसायकैः ॥ भीमंविव्याधतरसाचित्रसेनरथेस्थितः ॥ ५ ॥ शल्यश्चसमरेजिष्णुंकृपश्चरथिनांवरः ॥ विव्यधातेमहाराजबहुधामर्मभेदिभिः ॥ ६ ॥ चित्रसेनादयश्चैवपुत्रास्तवविशांपते ॥ पंचभिःपंचभिस्तूर्णंसंयुगेनिशितैःशरैः ॥ ७ ॥ आजघ्नुरर्जुनंसंख्येभीमसेनंचमारिष ॥ तौतत्ररथिनांश्रेष्ठौकौंतेयौभरतर्षभौ ॥ ८ ॥ अपीडयेतांसमरेत्रिगर्तानांमहद्बलम् ॥ सुशर्मापिरणेपार्थंशरैर्नवभिराशुगैः ॥ ९ ॥

जुर्नइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

॥ १७६ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ बर्हिणवाजानांमयूरपक्षवतांबाणानां ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ मागधोजयत्सेनः ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

ननादबलवन्नादंत्रासयानोमहद्बलम् ॥ अन्येचरथिनःशूराभीमसेनधनंजयौ ॥ १० ॥ विव्यधुर्निशितैर्बाणैरुक्मपुंखैरजिह्मगैः ॥ तेषांचरथिनांमध्येकौंतेयौभरतर्षभौ ॥ ११ ॥ क्रीडमानौरथोदारौचित्ररूपौव्यदृश्यताम् ॥ आमिषेप्सूगवांमध्येसिंहाविवमदोत्कटौ ॥ १२ ॥ छित्त्वाधनूंषिशूराणांशरांश्चबहुधारणे ॥ पातयामासतुर्वीरौशिरांसिशतशोनृणाम् ॥ १३ ॥ रथाश्चबहवोभग्नाहयाश्चशतशोहताः ॥ गजाश्चसगजारोहाःपेतुरुर्व्यांमहाहवे ॥ १४ ॥ रथिनःसादिनश्चापितत्रतत्रनिषूदिताः ॥ दृश्यतेबहवोराजन्वेपमानाःसमंततः ॥ १५ ॥ हतैर्गजपदात्योघैर्वाजिभिश्चनिषूदितैः ॥ रथैश्चबहुधाभग्नैःसमास्तीर्यतमेदिनी ॥ १६ ॥ छत्रैश्चबहुधाच्छिन्नैर्ध्वजैश्चविनिपातितैः ॥ अंकुशैरपविद्धैश्चपरिस्तोमैश्चभारत ॥ १७ ॥ केयूरैरंगदैर्हारैरांकवैर्भूदितैस्तथा ॥ उष्णीषैर्कृष्टिभिश्चैवचामरव्यजनैरपि ॥ १८ ॥ तत्रतत्रापविद्धैश्चवाहुभिश्चंदनोक्षितैः ॥ ऊरुभिश्चनरेंद्राणांसमास्तीर्यतमेदिनी ॥ १९ ॥ तत्राद्भुतमपश्यामरणेपार्थस्यविक्रमम् ॥ शरैःसंवार्यतान्वीरान्यज्ञघानमहाबलः ॥ २० ॥ पुत्रस्तुतवतंदृष्ट्वाभीमार्जुनपराक्रमम् ॥ गांगेयस्यरथाभ्याशमुपजग्मेमहाबलः ॥ २१ ॥ रुपश्चकृतवर्माचसैंधवश्चजयद्रथः ॥ विंदानुविंदावावंत्यौनाजद्भुःसंयुगंतदा ॥ २२ ॥ ततोभीमोमहेष्वासःफाल्गुनश्चमहारथः ॥ कौरवाणांचमूंघोरांभृशंदुद्रुवतूरणे ॥ २३ ॥ ततोबर्हिणवाजानामयुतान्यर्बुदानिच ॥ धनंजयरथेतूर्णंपातयंतिस्मभूमिपाः ॥ २४ ॥ ततस्तान्शरजालेनसंनिवार्यमहारथान् ॥ पार्थःसमंतात्समरेप्रेषयामासमृत्यवे ॥ २५ ॥ शल्यस्तुसमरेजिष्णुंक्रीडन्निवमहारथः ॥ आजघानोरसिक्रुद्धोभल्लैःसंनतपर्वभिः ॥ २६ ॥ तस्यपार्थोधनुश्छित्त्वाहस्तावापंचपंचभिः ॥ अथैनंसायकैस्तीक्ष्णैर्भृशंविव्याधमर्मणि ॥ २७ ॥ अथान्यद्धनुरादायस्मरेभारसाधनम् ॥ मद्रेश्वरोरणेजिष्णुंताडयामाससरोषितः ॥ २८ ॥ त्रिभिःशरैर्महाराजवासुदेवंचपंचभिः ॥ भीमसेनंचनवभिर्बाह्वोरुरसिचार्पयत् ॥ २९ ॥ ततोद्रोणोमहाराजमागधश्चमहारथः ॥ दुर्योधनसमादिष्टौतंदेशमुपजग्मतुः ॥ ३० ॥ यत्रपार्थोमहाराजभीमसेनश्चपांडवः ॥ कौरव्यस्यमहासेनांजघ्नतुःसुमहारथौ ॥ ३१ ॥ जयत्सेनस्तुसमरेभीमंभीमायुधंयुधि ॥ विव्याधनिशितैर्बाणैरष्टभिर्भरतर्षभ ॥ ३२ ॥ तंभीमोदशभिर्विद्धापुनर्विव्याधपंचभिः ॥ सारथिंचास्यभल्लेनरथनीडादपातयत् ॥ ३३ ॥ उद्भ्रांतैस्तुरगैःसोथद्रवमाणैःसमंततः ॥ मागधोपस्तदोराजासर्वसैन्यस्यपश्यतः ॥ ३४ ॥ द्रोणश्चविवरंदृष्ट्वाभीमसेनंशिलीमुखैः ॥ विव्याधबाणैर्निशितैःपंचषष्टिभिरायसैः ॥ ३५ ॥

अपसृतःपलायितः ॥ ३४ ॥ ३५ ॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ॥ इतिश्री० भारतभावदीपेचतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥ ॥ ७ ॥ ॥ कथमि

तंभीमःसमरश्लाघीगुरुंपितृसमंरणे ॥ विव्याधपंचभिर्भल्लैस्तथाषष्ट्याचभारत ॥ ३६ ॥ अर्जुनस्तुसुशर्माणंविद्धाबहुभिरायसैः ॥ व्यधमत्तस्यतत्सैन्यंमहाग्राणियथानिलः ॥ ३७ ॥ ततोभीष्मश्चराजाचकौसल्यश्चबृहद्बलः ॥ समवर्ततसंक्रुद्धाभीमसेनधनंजयौ ॥ ३८ ॥ तथैवपांडवाःशूराधृष्टद्युम्नश्चपार्षतः ॥ अभ्यद्रवद्रणेभीष्मंव्यादितास्यमिवांतकम् ॥ ३९ ॥ शिखंडीतुसमासाद्यभरतानांपितामहम् ॥ अभ्यद्रवत्संहृष्टोभयंत्यक्त्वामहारथात् ॥ ४० ॥ युधिष्ठिरमुखाःपार्थाःपुरस्कृत्यशिखंडिनम् ॥ अयोधयन्रणेभीष्मंसहिताःसर्वसृंजयैः ॥ ४१ ॥ तथैवतावकाःसर्वेपुरस्कृत्यधनंजयम् ॥ शिखंडिप्रमुखान्पार्थान्योधयंतिस्मसंयुगे ॥ ४२ ॥ ततःप्रवव्रतेयुद्धंकौरवाणांभयावहम् ॥ तत्रपांडुसुतैःसार्धंभीष्मस्यविजयंप्रति ॥ ४३ ॥ तावकानांजयेभीष्मोमोहआसीद्विशांपते ॥ तत्रह्यूतमासक्तंविजयायेतरायवा ॥ ४४ ॥ धृष्टद्युम्नस्तुराजेंद्रसर्वसैन्यान्यचोदयत् ॥ अभ्यद्रवतगांगेयंमाभैष्टरथसत्तमाः ॥ ४५ ॥ सेनापतिवचःश्रुत्वापांडवानांवरूथिनी ॥ भीष्मंसमभ्ययात्तूर्णंप्राणांस्त्यक्त्वामहाहवे ॥ ४६ ॥ भीष्मोपिरथिनांश्रेष्ठःप्रतिजग्राहतांचमूम् ॥ आपतंतींमहाराजवेलामिवमहोदधिः ॥ ४७ ॥ ॥इतिश्री महाभारतेभीष्मपर्वणिभीष्मवधपर्वणिभीमार्जुनपराक्रमेचतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ कथंशांतनवोभीष्मोदशमेहनिसंजय ॥ अयुध्यतमहावीर्यःपांडवैःसहसृंजयैः ॥ १ ॥ कुरवश्चकथंयुद्धेपांडवान्प्रत्यवारयन् ॥ आचक्ष्वमेमहायुद्धंभीष्मस्याहवशोभिनः ॥ २ ॥ ॥ संजयउवाच ॥ ॥ कुरवःपांडवैःसार्धंयदयुध्यंतभारत ॥ यथाचतदभूद्युद्धंतत्तुवक्ष्यामिसांप्रतम् ॥ ३ ॥ गमिताःपरलोकायपरमास्त्रैःकिरीटिना ॥ अहन्यहनि संकुद्धास्तावकानांमहारथाः ॥ ४ ॥ यथाप्रतिज्ञंकौरव्यःसचापिसमितिंजयः ॥ पार्थानामकरोद्भीष्मःसततंसमितिक्षयम् ॥ ५ ॥ कुरुभिःसहितंभीष्मंयुध्यमानंपरंतपं ॥ अर्जुनंचसपांचाल्यंसंशयोविजयेभवत् ॥ ६ ॥ दशमेहनितस्मिंस्तुभीष्मार्जुनसमागमे ॥ अवर्ततमहारौद्रःसततंसमितिक्षयः ॥ ७ ॥ तस्मिन्नयुतशोराजन्भूयशश्चपरंतपः ॥ भीष्मःशांतनवोयोधान्जघानपरमास्त्रवित् ॥ ८ ॥ येषामज्ञातकल्पानिनामगोत्राणिपार्थिव ॥ तेहतास्तत्रभीष्मेणशूराःसर्वेऽनिवर्तिनः ॥ ९ ॥ दशाहानिततस्त्वाभीष्मःपांडववाहिनीम् ॥ निरविद्यतधर्मात्माजीवितेनपरंतप ॥ १० ॥

॥ १७७ ॥

ति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ निरविद्यतनिर्वेदंजगाम ॥ १० ॥

॥ ११ ॥ १२ ॥ १३ ॥ निर्विण्णोविरक्तः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ ब्रह्मलोकपराःबृहत्त्वान्महांतंलोकंप्रतियतमानाः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

सक्षिप्रंवधमन्विच्छन्नात्मनोभिमुखेरणे ॥ नहन्यांमानवश्रेष्ठान्संग्रामेसुबहूनिति ॥ ११ ॥ चिंतयित्वामहाबाहुःपितादेवव्रतस्तव ॥ अभ्याशस्थंमहाराजपांडवंवाक्यमब्रवीत् ॥ १२ ॥ युधिष्ठिरमहाप्राज्ञसर्वशास्त्रविशारद ॥ शृणुष्ववचनंतातधर्म्यंस्वर्ग्यंचजल्पतः ॥ १३ ॥ निर्विण्णोस्मिभृशंतातदेहेनानेनभारत ॥ व्रतश्चमेगृतःकालःसुबहून्प्राणिनोरणे ॥ १४ ॥ तस्मात्पार्थपुरोधायपंचालान्सृंजयांस्तथा ॥ मद्वधेकृतयत्नोममचेदिच्छसिप्रियम् ॥ १५ ॥ तस्यतन्मतमाज्ञायपांडवःसत्यदर्शनः ॥ भीष्मंप्रतिययौराजासंग्रामेसहसृंजयैः ॥ १६ ॥ धृष्टद्युम्नस्तोराजन्पांडवश्चयुधिष्ठिरः ॥ श्रुत्वाभीष्मस्यतांवाचंचोदयामासतुर्बलम् ॥ १७ ॥ अभिद्रवध्वंयुध्यध्वंभीष्मंजयतसंयुगे ॥ रक्षिताःसत्यसंधेनजिष्णुनारिपुजिष्णुना ॥ १८ ॥ अयंचापिमहेष्वासःपार्षतोवाहिनीपतिः ॥ भीमसेनश्चसमरेपालयिष्यतिवोध्रुवम् ॥ १९ ॥ मावोभीष्माद्भयंकिंचिदस्त्वद्ययुधिसृंजयाः ॥ ध्रुवंभीष्मंविजेष्यामःपुरस्कृत्यशिखंडिनम् ॥ २० ॥ तेतथासमयंकृत्वादशमेहनिपांडवाः ॥ ब्रह्मलोकपराभूत्वासंजग्मुःक्रोधमूर्छिताः ॥ २१ ॥ शिखंडिनंपुरस्कृत्यपांडवंचधनंजयम् ॥ भीष्मस्यपातनेयत्नंपरमंतेसमास्थिताः ॥ २२ ॥ ततस्तवसुतादिष्टानानाजनपदेश्वराः ॥ द्रोणेनसहपुत्रेणसहसेनामहाबलाः ॥ २३ ॥ दुःशासनश्चबलवान्सहसर्वैःसहोदरैः ॥ भीष्मंसमरमध्यस्थंपालयांचक्रिरेतदा ॥ २४ ॥ ततस्तुतावकाःशूराःपुरस्कृत्यमहाव्रतम् ॥ शिखंडिप्रमुखान्पार्थान्योधयंतिस्मसंयुगे ॥ २५ ॥ चेदिभिस्तुसपंचालैःसहितोवानरध्वजः ॥ ययौशांतनवंभीष्मंपुरस्कृत्यशिखंडिनम् ॥ २६ ॥ द्रोणपुत्रंशिनेर्नप्तावृष्णिकेतुस्तुपौरवम् ॥ अभिमन्युःसहामात्यंदुर्योधनमयोधयत् ॥ २७ ॥ विराटस्तुसहानीकःसहसेनंजयद्रथम् ॥ वृद्धक्षत्रस्यदायादमाससादपरंतप ॥ २८ ॥ मद्रराजंमहेष्वासंसहसैन्यंयुधिष्ठिरः ॥ भीमसेनोभिगुप्तस्तुनागानीकमुपाद्रवत् ॥ २९ ॥ अप्रधृष्यमनाधृष्यंसर्वशस्त्रभृतांवरम् ॥ द्रौणिंप्रतिययौयत्तःपांचाल्यःसहसोदरैः ॥ ३० ॥ कर्णिकारध्वजंचैवसिंहकेतुररिंदमः ॥ प्रत्युज्जगामसौभद्रंराजपुत्रोबृहद्बलः ॥ ३१ ॥ शिखंडिनंचपुत्रास्तेपांडवंचधनंजयम् ॥ राजभिःसमरेपार्थमभिपेतुर्जिघांसवः ॥ ३२ ॥ तस्मिन्नतिमहाभीमेसेनयोर्वैपराक्रमे ॥ संप्रधावत्स्वनीकेषुमेदिनीसमकंपत ॥ ३३ ॥ तान्यनीकान्यनेकेषुसमसज्जंतभारत ॥ तावकानांपरेषांचदृष्ट्वाशांतनवंरणे ॥ ३४ ॥ ततस्तेषांप्रतप्तानामन्योन्यमभिधावताम् ॥ प्रादुरासीन्महाशब्दोदिक्षुसर्वासुभारत ॥ ३५ ॥ शंखदुंदुभिघोषश्चवारणानांचबृंहितैः ॥ सिंहनादश्चसैन्यानांदारुणःसमपद्यत ॥ ३६ ॥

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ॥ इतिश्री०नै०भा०पंचदशाधिकशततमोऽध्यायः ॥ ११५ ॥ ॥ ७ ॥ ॥ अभिमन्युरिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

सात्वतसर्वनरेंद्राणांचंद्रार्कसदृशीप्रभा ॥ वीरांगदकिरीटेषुनिष्प्रभासमपद्यत ॥ ३७ ॥ रजोमेघास्तुसंजज्ञुःशस्त्रविद्युद्विरावताः ॥ धनुषांचापिनिर्घोषोदारुणः समपद्यत ॥ ३८ ॥ बाणशंखप्रणादाश्वभेरीणांचमहास्वनाः ॥ रथघोषश्चसंजज्ञेसेनयोरुभयोरपि ॥ ३९ ॥ पाशशक्त्यृष्टिसंघैश्चबाणौघैश्चसमाकुलम् ॥ निष्प्रकाशमिवाकाशंसेनयोःसमपद्यत ॥ ४० ॥ अन्योन्यंरथिनःपेतुर्वाजिनश्चमहाहवे ॥ कुंजरान्कुंजराजघ्नुःपादातांश्चपदातयः ॥ ४१ ॥ तत्रासीत्सुमहद्युद्धंकुरूणांपांडवैःसह ॥ भीष्महेतोर्नरव्याघ्रश्येनयोरामिषेयया ॥ ४२ ॥ तेषांसमागमोघोरोबभूवयुधिसंगतः ॥ अन्योन्यस्यवधार्थायजिगीषूणांमहाहवे ॥ ४३ ॥ ॥ इतिश्री महाभारतेभीष्मपर्वणिभीष्मवधपर्वणिभीष्मोपदेशेपंचदशाधिकशततमोऽध्यायः ॥ ११५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ अभिमन्युर्महाराजतवपुत्रमयोधयत् ॥ महत्यासेनयायुक्तंभीष्महेतोःपराक्रमी ॥ १ ॥ दुर्योधनोरणेकार्ष्णिनवभिर्नतपर्वभिः ॥ आजघानोरसिक्रुद्धःपुनश्चैनंत्रिभिःशरैः ॥ २ ॥ तस्यशक्तिंरणेकार्ष्णिर्मृत्योर्घोरांस्वसामिव ॥ प्रेषयामाससंक्रुद्धोदुर्योधनरथंप्रति ॥ ३ ॥ तामापतंतींसहसाघोररूपांविशांपते ॥ द्विधाचिच्छेदृतेपुत्रःक्षुरप्रेणमहारथः ॥ ४ ॥ तांशक्तिंपतितांदृष्ट्वाकार्ष्णिःपरमकोपनः ॥ दुर्योधनंत्रिभिर्बाणैर्बाह्वोरुरसिचार्पयत् ॥ ५ ॥ पुनश्चैनंशरैर्घोरैराजघानस्तनांतरे ॥ दशभिर्भरतश्रेष्ठभरतानांमहारथः ॥ ६ ॥ तद्युद्धमभवद्घोरंचित्ररूपंचभारत ॥ इंद्रियप्रीतिजननंसर्वपार्थिवपूजितम् ॥ ७ ॥ भीष्मस्यनिधनार्थायपार्थस्यविजयायच ॥ युयुधातेरणेवीरौसौभद्रकुरुपुंगवौ ॥ ८ ॥ सात्यकिंरभसंयुद्धेद्रौणिर्ब्राह्मणपुंगवः ॥ आजघानोरसिक्रुद्धोनाराचेनपरंतपः ॥ ९ ॥ शैनेयोपिगुरोःपुत्रंसर्वमर्मसुभारत ॥ अताडयदमेयात्मानवभिःकंकवाजितैः ॥ १० ॥ अश्वत्थामातुसमरेसात्यकिंनवभिःशरैः ॥ त्रिंशताचपुनस्तूर्णंबाह्वोरुरसिचार्पयत् ॥ ११ ॥ सोतिविद्धोमहेष्वासोद्रोणपुत्रेणसात्वतः ॥ द्रोणपुत्रंत्रिभिर्बाणैराजघानमहायशाः ॥ १२ ॥ पौरवोवृष्टकेतुंचशरैराच्छाद्यसंयुगे ॥ बहुधादारयांचक्रेमहेष्वासंमहारथः ॥ १३ ॥ तथैवपौरवंयुद्धेवृष्टकेतुर्महारथः ॥ त्रिंशतानिशितैर्बाणैर्विव्याधाशुमहाभुजः ॥ १४ ॥ पौरवस्तुधनुश्छित्त्वावृष्टकेतोर्महारथः ॥ ननादबलवन्नादं विव्याधचशितैःशरैः ॥ १५ ॥ सोन्यत्कार्मुकमादायपौरवंनिशितैःशरैः ॥ आजघानमहाराजत्रिसप्तत्याशिलीमुखैः ॥ १६ ॥ तौतुतत्रमहेष्वासौमहामात्रौमहारथौ ॥ महताशरवर्षेणपरस्परमविध्यताम् ॥ १७ ॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

॥ १७८ ॥

॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ चित्रसेनइति पांडवपक्षीयःसुशर्मायमपरोबार्धक्षेमिर्नतुत्रैगर्तः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

अन्योन्यस्यधनुश्छित्त्वाहयान्हत्वाचभारत ॥ विरथावसियुद्धायसमीयतुरमर्षणौ ॥ १८ ॥ आर्षभेचर्मणीचित्रेशतचंद्रपुरस्कृते ॥ तारकाशतचित्रेचनिस्त्रिंशौसुमहाप्रभौ ॥ १९ ॥ प्रगृह्यविमलौराजंस्तावन्योन्यमभिद्रुतौ ॥ वासितासंगमेयत्तौसिंहाविवमहावने ॥ २० ॥ मंडलानिविचित्राणिगतप्रत्यागतानिच ॥ चेरतुर्दर्शयंतौचप्रार्थयंतौपरस्परं ॥ २१ ॥ पौरवोवृष्टकेतुंतुशंखदेशेमहासिना ॥ ताडयामाससंक्रुद्धस्तिष्ठतिष्ठेतिचाब्रवीत् ॥ २२ ॥ चेदिराजोपिसमरेपौरवंपुरुषर्षभम् ॥ आजघानशिताग्रेणजत्रुदेशेमहासिना ॥ २३ ॥ तावन्योन्यंमहाराजसमासाद्यमहाहवे ॥ अन्योन्यवेगाभिहतौनिपेततुररिंदमौ ॥ २४ ॥ ततःस्वरथमारोप्यपौरवंतनयस्तव ॥ जयत्सेनोरथेनाजावपोवाहरणाजिरात् ॥ २५ ॥ वृष्टकेतुंतुसमरेमाद्रीपुत्रःप्रतापवान् ॥ अपोवाहरणेक्रुद्धःसहदेवःपराक्रमी ॥ २६ ॥ चित्रसेनःसुशर्माणंविद्धावद्दुभिरायसैः ॥ पुनर्विव्याधतंषष्ट्यापुनश्चैनवभिःशरैः ॥ २७ ॥ सुशर्मातुरणेक्रुद्धस्तवपुत्रंविशांपते ॥ दशभिर्दशभिश्चैवविव्याधनिशितैःशरैः ॥ २८ ॥ चित्रसेनश्चतंराजन्त्रिंशतानतपर्वभिः ॥ आजघानरणेक्रुद्धःसचतंप्रत्यविध्यत ॥ २९ ॥ भीष्मस्यसमरेराजन्यशोमानंचवर्धयन् ॥ सौभद्रोराजपुत्रंतुबृहद्बलमयोधयत् ॥ ३० ॥ पार्थहेतोःपराक्रांतोभीष्मस्यायोधनंप्रति ॥ आर्जुनिकोसलेंद्रस्तुविद्धापंचभिरायसैः ॥ ३१ ॥ पुनर्विव्याधविंशत्याशरैःसंनतपर्वभिः ॥ सौभद्रःकोसलेंद्रंतुविव्याधाष्टभिरायसैः ॥ ३२ ॥ नाकंपयतसंग्रामेविव्याधचपुनःशरैः ॥ कौसल्यस्यधनुश्चापिपुनश्चिच्छेदफाल्गुनिः ॥ ३३ ॥ आजघानशरैश्चापित्रिंशताकंकपत्रिभिः ॥ सोन्यत्कार्मुकमादायराजपुत्रोबृहद्बलः ॥ ३४ ॥ फाल्गुनिंसमरेक्रुद्धोविव्याधबहुभिःशरैः ॥ तयोर्युद्धंसमभवद्भीष्महेतोःपरंतप ॥ ३५ ॥ संरब्धयोर्महाराजसमरेचित्रयोधिनोः ॥ यथादेवासुरेयुद्धेबलिवासवयोरभूत् ॥ ३६ ॥ भीमसेनोरथानीकंयोधयन्बहुशोभत ॥ यथाशक्रोवज्रपाणिर्दारयन्पर्वतोत्तमान् ॥ ३७ ॥ तेवध्यमानाभीमेनमातंगागिरिसंनिभाः ॥ निपेतुरुर्व्यांसहिताभादयंतोवसुंधराम् ॥ ३८ ॥ गिरिमात्राहितेनागाभिन्नांजनचयोपमाः ॥ विरेजुर्वसुधांप्राप्ताविकीर्णाइवपर्वताः ॥ ३९ ॥ युधिष्ठिरोमहेष्वासोमद्रराजानमाहवे ॥ महत्यासेनयागुप्तंपीडयामाससंगतम् ॥ ४० ॥ मद्रेश्वरश्चसमरेधर्मपुत्रंमहारथम् ॥ पीडयामाससंरब्धोभीष्महेतोःपराक्रमी ॥ ४१ ॥ विराटसैंधवोराजाविद्धासंनतपर्वभिः ॥ नवभिःसायकैस्तीक्ष्णैस्त्रिंशतापुनरार्पयत् ॥ ४२ ॥ विराटश्चमहाराजसैंधवंवाहिनीपतिः ॥ त्रिंशद्भिर्निशितैर्बाणैराजघानस्तनांतरे ॥ ४३ ॥

॥ ४१ ॥ ४२ ॥ ४३ ॥

॥ ४४ ॥ समुदयंसंयामं भवेत्समुदयःसंघेसंयुगेचसमुद्गमेइतिमेदिनी ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

चित्रकार्मुकनिर्ह्रादौचित्रवर्मायुधध्वजौ ॥ रेजतुश्चित्ररूपौतौसंग्रामेमत्स्यसैंधवौ ॥ ४४ ॥ द्रोणःपांचालपुत्रेणसमागम्यमहारणे ॥ महासमुदयंचक्रेशरैःसंनतपर्वभिः ॥ ४५ ॥ ततोद्रोणोमहाराजपार्षतस्यमहद्धनुः ॥ छित्त्वापंचाशतेपूर्णांपार्षतंसमविध्यत ॥ ४६ ॥ सोन्यत्कार्मुकमादायपार्षतःपरवीरहा ॥ द्रोणस्यमिषतोयुद्धेप्रेषयामाससायकान् ॥ ४७ ॥ ताञ्छराञ्छरघातेनचिच्छेदसमहारथः ॥ द्रोणोद्रुपदपुत्रायप्राहिणोत्पंचसायकान् ॥ ४८ ॥ ततःक्रुद्धोमहाराजपार्षतःपरवीरहा ॥ द्रोणायचिक्षेपगदांयमदंडोपमांरणे ॥ ४९ ॥ तामापतंतींसहसाहेमपट्टविभूषिताम् ॥ शरैःपंचाशताद्रोणोवारयामाससंयुगे ॥ ५० ॥ साछिन्नाबहुधाराजन्द्रोणचापच्युतैःशरैः ॥ चूर्णीकृताविशीर्यंतीपपातवसुधातले ॥ ५१ ॥ गदांविनिहतांदृष्ट्वापार्षतःशत्रुतापनः ॥ द्रोणायशक्तिंचिक्षेपसर्वपारसवींशुभाम् ॥ ५२ ॥ तांद्रोणोनवभिर्बाणैश्चिच्छेदयुधिभारत ॥ पार्षतंचमहेष्वासंपीडयामाससंयुगे ॥ ५३ ॥ एवमेतन्महायुद्धंद्रोणपार्षतयोरभूत् ॥ भीष्मंप्रतिमहाराज घोररूपंभयानकम् ॥ ५४ ॥ अर्जुनःप्राप्यगांगेयंपीडयन्निशितैःशरैः ॥ अभ्यद्रवत्समत्तोवनेमत्तमिवद्विपम् ॥ ५५ ॥ प्रत्युद्ययौचतंराजाभगदत्तःप्रतापवान् ॥ त्रिधाभिन्ननागेननागेनमदांधेनमहाबलः ॥ ५६ ॥ तमापतंतंसहसामहेंद्रगजसंनिभम् ॥ परंयत्नंसमास्थायबीभत्सुःप्रत्यपद्यत ॥ ५७ ॥ ततोगजगतौराजाभगदत्तःप्रतापवान् ॥ अर्जुनंशरवर्षेणवारयामाससंयुगे ॥ ५८ ॥ अर्जुनस्तुततोनागमायांतंरजतोपमैः ॥ विमलैरायसैस्तीक्ष्णैरविध्यतमहारणे ॥ ५९ ॥ शिखंडिनं चकौंतेयोयाहियाहीत्यचोदयत् ॥ भीष्मंप्रतिमहाराजजत्येनमितिचाब्रवीत् ॥ ६० ॥ प्राग्ज्योतिषस्ततोहित्वापांडवंपांडुपूर्वज ॥ प्रययौत्वरितोराजन्द्रुपदस्यरथं प्रति ॥ ६१ ॥ ततोर्जुनोमहाराजभीष्ममभ्यद्रवद्रुतम् ॥ शिखंडिनंपुरस्कृत्यततोयुद्धमवर्त्तत ॥ ६२ ॥ ततस्तेतावकाःशूराःपांडवंरभसंयुधि ॥ समभ्यधावन्क्रोशंतस्तदद्भुतमिवाभवत् ॥ ६३ ॥ नानाविधान्यनीकानिपुत्राणांतेजनाधिप ॥ अर्जुनोव्यधमत्कालेदिवीवाभ्राणिमारुतः ॥ ६४ ॥ शिखंडीतुसमासाद्यभरतानांपितामहम् ॥ इषुभिस्तूर्णमव्यग्रोबहुभिःससमाचिनोत् ॥ ६५ ॥ रथाभ्यगारश्वापार्चिरसिशक्तिगदेंधनः ॥ शरसंघमहाज्वालःक्षत्रियान्समरेदहत् ॥ ६६ ॥ यथाग्निःसुमहानिद्धःकक्षेचरतिसानिलः ॥ तथाजज्वालभीष्मोपिदिव्यान्यस्त्राण्युदीरयन् ॥ ६७ ॥ सोमकांश्चरणेभीष्मोजघ्नेपार्थपदानुगान् ॥ न्यवारयतत्सैन्यंपांडवस्यमहारथः ॥ ६८ ॥

॥ १७९ ॥

॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥

॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ॥ इतिश्री०भीष्मव०नैलकंठीयेभारतभावदीपेषोडशाधिकशततमोऽध्यायः ॥ ११६ ॥ ॥ ७ ॥

सुवर्णपुंखैरिषुभिःशितैःसंनतपर्वभिः ॥ नादयन्सदिशोभीष्मःप्रदिशश्चमहाहवे ॥ ६९ ॥ पातयन्रथिनोराजन्हयांश्चसहसादिभिः ॥ मुंडतालवनानीवचकारसरथव्रजान् ॥ ७० ॥ निर्मनुष्यान्रथान्राजन्गजानश्वांश्चसंयुगे ॥ चकारसमरेभीष्मःसर्वशस्त्रभृतांवरः ॥ ७१ ॥ तस्यज्यातलनिर्घोषंविस्फूर्जितमिवाशनेः ॥ निशाम्यसर्वतोरांजन्समकंपंतसैनिकाः ॥ ७२ ॥ अमोघान्यपतंश्चाणाःपितुस्तेमनुजेश्वर ॥ नासज्जंतशरीरेषुभीष्मचापच्युताःशराः ॥ ७३ ॥ निर्मनुष्यान्रथान्राजन्सुयुक्तान्जवनैर्हयैः ॥ वातायमानानद्राक्षंक्रियमाणान्विशांपते ॥ ७४ ॥ चेदिकाशिकरूषाणांसहस्राणिचतुर्दश ॥ महारथाःसमाख्याताःकुलपुत्रास्तनुत्यजः ॥ ७५ ॥ अपरावर्त्तिनःशूराःसुवर्णविकृतध्वजाः ॥ संग्रामेभीष्ममासाद्यसवाजिरथकुंजराः ॥ ७६ ॥ जग्मुस्तेपरलोकायव्यादितास्यमिवांतकम् ॥ नतत्रासीद्रणेराजन्सोमकानांमहारथः ॥ ७७ ॥ यःसंप्राप्यरणेभीष्मंजीवितेस्ममनोदधे ॥ तांश्चसर्वान्रणेयोधान्प्रेतराजपुरंप्रति ॥ ७८ ॥ नीतान्मन्यंतजनाद्दृष्ट्वाभीष्मस्यविक्रमम् ॥ नकश्चिदेनंसमरेप्रत्युद्यातिमहारथः ॥ ७९ ॥ ऋतेपांडुसुतंवीरंश्वेताश्वंकृष्णसारथिम् ॥ शिखंडिनंचसमरेपांचाल्यममितौजसम् ॥ ८० ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिसंकुलयुद्धेषोडशाधिकशततमोऽध्यायः ॥ ११६ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ शिखंडीतुरणेभीष्ममासाद्यपुरुषर्षभम् ॥ दशभिर्निशितैर्भल्लैराजघानस्तनांतरे ॥ १ ॥ शिखंडिनंतुगांगेयःक्रोधदीप्तेनचक्षुषा ॥ संप्रेक्षतकटाक्षेणनिर्दहन्निवभारत ॥ २ ॥ स्त्रीत्वंतस्यस्मरन्राजन्सर्वलोकस्यपश्यतः ॥ नाजघानरणेभीष्मःसचतन्नावबुद्धवान् ॥ ३ ॥ अर्जुनस्तुमहाराजशिखंडिनमभाषत ॥ अभिद्रवस्वत्वरितं जहिचैनंपितामहम् ॥ ४ ॥ किंतेविवक्षयावीरजहिभीष्मंमहारथम् ॥ नत्यन्यमनुपश्यामिकंचिद्योधिष्ठिरेबले ॥ ५ ॥ यःशक्तःसमरेभीष्मंप्रतियोद्धुंमिहाहवे ॥ क्रतेत्वांपुरुषव्याघ्रसत्यमेतद्ब्रवीमिते ॥ ६ ॥ एवमुक्तस्तुपार्थेनशिखंडीभरतर्षभ ॥ शरैर्नानाविधैस्तूर्णंपितामहमवाकिरत् ॥ ७ ॥ अचिंतयित्वातान्बाणान्पितादेवव्रतस्तव ॥ अर्जुनंसमरेक्रुद्धंवारयामाससायकैः ॥ ८ ॥ तथैवचचमूंसर्वांपांडवानांमहारथः ॥ अप्रैषीत्सशरैस्तीक्ष्णैःपरलोकायमारिष ॥ ९ ॥ तथैवपांडवाराजन्सैन्येनमहताऽवृताः ॥ भीष्मंसंछादयामासुर्मेघाइवदिवाकरम् ॥ १० ॥ ससंमंतात्परिवृतोभारत्योऽरतर्षभ ॥ निर्दहाहरणेशूरान्वनेवह्निरिवज्वलन् ॥ ११ ॥

शिखंडीति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ विवक्षयाविचारेणसंशयेनवा ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥ १२ ॥ १३ ॥ उल्बणमुर्ष ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ भारतमहामात्रभरतवंशश्रेष्ठं ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ शर्म सुखहेतुत्वात्

तत्राद्भुतमपश्यामतवपुत्रस्यपौरुषम्॥ अयोधयच्चयत्पार्थंजुगोपचपितामहम्॥ १२ ॥ कर्मणातेनसमरेतवपुत्रस्यधन्विनः ॥ दुःशासनस्यतुतुषुःसर्वेलोकाम
हात्मनः॥ १३ ॥ यदेकःसमरेपार्थान्सार्जुनान्समयोधयत्॥ नचैनंपांडवायुद्धेवारयामासुरुल्बणम्॥ १४ ॥ दुःशासनेनसमरेरथिनोविरथीकृताः ॥ सादिनश्च
महेष्वासाहस्तिनश्चमहाबलाः॥ १५ ॥ विनिर्भिन्नाःशरैस्तीक्ष्णैर्निपेतुर्वसुधातले ॥ शरातुरास्तथैवान्येदंतिनोविद्रुतादिशः ॥ १६ ॥ यथाग्निरिंधनंप्राप्यज्वले
दीप्तार्चिरुल्बणम् ॥ तथाजज्वालपुत्रस्तेपांडुसैनांविनिर्दहन्॥ १७ ॥ तंभारतमहामात्रंपांडवानांमहारथः॥ जेतुंनोत्सहतेकश्चिन्नाभ्युद्यातुंकथंचन॥ १८॥ क्र
तेमहेंद्रतनयाच्छ्वेताश्चात्कृष्णसारथेः॥ सहितंसमरेराजन्निर्जित्यविजयोर्जुनः ॥ १९ ॥ भीष्ममेवाभिदुद्रावसर्वसैन्यस्यपश्यतः ॥ विजितस्तवपुत्रोपिभीष्म
बाहुव्यपाश्रयः॥ २० ॥ पुनःपुनःसमाश्वस्यप्रायुध्यतमदोत्कटः॥ अर्जुनस्तुरणेराजन्योधयन्संव्यराजत ॥ २१ ॥ शिखंडीतुरणेराजन्विव्याधैवपितामहम्॥ श
रैरशनिसंस्पर्शैस्तथासर्पविषोपमैः ॥ २२ ॥ नचस्मतेरुर्जंचक्रुःपितुस्तवजनेश्वर ॥ स्मयमानस्तुगांगेयस्तान्बाणान्जगृहेतदा ॥ २३ ॥ उष्णार्त्तोहिनरोयद्वज्ज
लधाराःप्रतीच्छति॥ तथाजग्राहगांगेयःशरधाराःशिखंडिनः॥ २४ ॥ तंक्षत्रियामहाराजदृष्ट्वापुर्घोरमाहवे॥ भीष्मंदहंतंसैन्यानिपांडवानांमहात्मनाम्॥ २५॥
ततोब्रवीत्तवसुतःसर्वसैन्यानिमारिष॥ अभिद्रवतसंग्रामेफाल्गुनंसर्वतोरणे॥ २६॥ भीष्मोवःसमरेसर्वान्पालयिष्यतिधर्मवित् ॥ तेभयंसुमहत्त्यक्त्वापांडवा
नप्रतियुध्यत॥ २७॥ हेमतालेनमहताभीष्मस्तिष्ठतिपालयन्॥ सर्वेषांधार्तराष्ट्राणांसमरेशर्मवर्मच॥ २८॥ त्रिदशापिसमुयुक्तानालंभीष्मंसमासितुम्॥ किमु
पार्थामहात्मानंमर्त्यभूतामहाबलाः॥ २९॥ तस्माद्व्रतमायोधाःफाल्गुनंप्राप्यसंयुगे ॥ अहमद्यरणेयत्तोयोधयिष्यामिपांडवम्॥ ३० ॥ सहितःसर्वतोयत्तैर्भ
वद्भिर्वसुधाधिपैः॥ तच्छ्रुत्वातुवचोराजंस्तवपुत्रस्यधन्विनः॥ ३१ ॥ सर्वेयोधाःसुसंरब्धाबलवंतोमहाबलाः ॥ तेविदेहाःकलिंगाश्चदासेरकगणाश्चह॥ ३२॥
अभिषेतुर्निषादाश्चसौवीराश्चमहारणे॥ बाह्लीकादरदाश्चैवप्रतीच्योदीच्यमालवाः ॥ ३३ ॥ अभीषाहाःशूरसेनाःशिबयोथवसातयः ॥ शाल्वाःशाकास्त्रिगर्ता
श्चअंबष्ठाःकेकयैःसह॥ ३४॥ अभिषेतूरणेपार्थंपतंगाइवपावकम्॥ (शलभाइवराजेंद्रपार्थमप्रतिमंरणे)॥ एतान्सर्वान्सहानीकान्महाराजमहारथान्॥ ३५॥ ॥ १८० ॥

वर्मरक्षाहेतुत्वात् ॥ २८ ॥ समासितुंउपसर्पितुं नाशयितुंवा मर्त्यभूताःमर्त्यस्वरूपाः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ भूतेषुप्रेतेषु ॥ ५८ ॥

दिव्यान्यस्त्राणिसंचिंत्यप्रसंधायधनंजयः॥ सतैरस्त्रैर्महावेगैर्ददाहसुमहाबलः ॥ ३६ ॥ शरप्रतापैर्वीभत्सुःपतंगानिवपावकः ॥ तस्यबाणसहस्राणिस्रजतोदृढ
धन्विनः॥ ३७॥ दीप्यमानमिवाकाशेगांडीवंसमदृश्यत॥ तेशरार्तामहाराजविप्रकीर्णमहाध्वजाः॥ ३८ ॥ नाभ्यवर्ततराजानःसहितावानरध्वजम् ॥ सध्वजा
रथिनःपेतुर्हयारोहाहयैःसह॥ ३९ ॥ सगजाश्वगजारोहाःकिरीटिशरताडिताः ॥ ततोर्जुनभ्रुजोत्सृष्टैराततासीद्वसुंधरा ॥ ४० ॥ विद्रवद्भिश्चबहुधाबलैराज्ञांस
मंततः॥ अथपार्थोमहाराजद्रावयित्वावरूथिनीम्॥ ४१ ॥ दुःशासनायसुबहून्प्रेषयामाससायकान्॥ तेतुभित्त्वातवसुतंदुःशासनमयोमुखाः॥ ४२ ॥ धरणीं
विविशुःसर्ववल्मीकमिवपन्नगाः ॥ हयांश्चास्यततोजघ्नेसारथिंचन्यपातयत् ॥ ४३ ॥ बिर्विंशतिंचविंशत्याविरथंकृतवान्प्रभुः॥ अजघानचशंचैवपंचभि
र्नतपर्वभिः॥ ४४ ॥ कृपंविकर्णंशल्यंचविद्धावद्दुभिरायसैः॥ चकारविरथांश्चैवकैतेयःश्वेतवाहनः ॥ ४५ ॥ एवंतेविरथाःसर्वेकृपःशल्यश्चमारिष ॥ दुःशास
नोविकर्णश्चतथैवचविविंशतिः॥ ४६॥ संप्राद्रवंतसमरेनिर्जिताःसव्यसाचिना॥ पूर्वाह्णेभरतश्रेष्ठपराजित्यमहारथान्॥ ४७ ॥ प्रजज्वालरणेपार्थोविधूमइ
वपावकः॥ तथैवशरवर्षेणभास्करोरश्मिवानिव ॥ ४८ ॥ अन्यानपिमहाराजतापयामासपार्थिवान् ॥ पराङ्मुखीकृत्यतथाशरवर्षैर्महारथान्॥ ४९ ॥ प्राव
र्तयतसंग्रामेशोणितोदांमहानदीम्॥ मध्येनकुरुसैन्यानांपांडवानांचभारत॥ ५० ॥ गजाश्वरथसंघाश्चबहुधारथिभिर्हताः ॥ रथाश्चनिहतानागैर्हयाश्चैवपदा
तिभिः॥ ५१ ॥ अंतराच्छिद्यमानानिशरीराणिशिरांसिच ॥ निपेतुर्दिक्षुसर्वासुगजाश्वरथयोधिनाम्॥ ५२ ॥ छन्नमायोधनंराजन्कुंडलांगदधारिभिः॥ पतितैः
पात्यमानैश्चराजपुत्रैर्महारथैः ॥ ५३ ॥ रथनेमिनिकृत्तैश्चगजैश्चैवापोथितैः॥ पादाताश्चाप्यधावंतसाश्वाश्चहययोधिनः ॥ ५४ ॥ गजाश्वरथयोधाश्चपरिपे
तुःसमंततः॥ विकीर्णाश्चरथाभूमौभग्नचक्रयुगध्वजाः॥ ५५ ॥ तद्गजाश्वरथौघानांरुधिरेणसमुक्षितम्॥ छन्नमायोधनंरेजेरक्ताभ्रमिवशारदम्॥ ५६॥ श्वानः
काकाश्चगृध्राश्चवटकागोमायुभिःसह ॥ प्रणेदुर्भक्ष्यमासाद्यविकृताश्चमृगद्विजाः॥ ५७ ॥ ववुर्वद्भुविधाश्चैवदिक्षुसर्वासुमारुताः ॥ दृश्यमानेषुरक्षःसुभूतेषुचन
दत्सुच ॥ ५८ ॥ कांचनानिचदामानिपताकाश्चमहाधनाः ॥ धूयमानाव्यदृश्यंतसहसामारुतेरिताः ॥ ५९ ॥ श्वेतच्छत्रसहस्राणिसध्वजाश्चमहारथाः॥ विकी
र्णाःसमदृश्यंतशतशोथसहस्रशः॥ ६० ॥

महाधनाःबहुमूल्याः ॥ ५९ ॥ ६० ॥

॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ॥ इतिश्री०नै० भारतभावदीपेसप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ सममिति ॥ १ ॥ २ ॥ ३ ॥ व्यतिकरःक्षोभः

सपताकाश्चमातंगादिशोजग्मुःशरातुराः॥ क्षत्रियाश्चमनुष्येंद्रगदाशक्तिधनुर्धराः ॥ ६१ ॥ समंततश्चदृश्यंतेपतिताधरणीतले॥ ततोभीष्मोमहाराजदिव्यम स्त्रमुदीरयन्॥ ६२॥ अभ्यधावतकौंतेयंमिषतांसर्वधन्विनाम्॥ तंशिखंडीरणेयांतमभ्यद्रवतदर्शितः ॥ ६३॥ ततःसमाहरद्भीष्मस्तदस्त्रंपावकोपमम्॥ त्वरितः पांडवोराजन्मध्यमःश्वेतवाहनः॥ ६४॥ निजघ्नेतावकंसैन्यंमोहयित्वापितामहम् ॥ ६५॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिसंकुलयुद्धेसप्तद शाधिकशततमोऽध्यायः॥ ११७॥ ॥ ७॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ समंव्यूढेष्वनीकेषुभूयिष्ठेष्वनिवर्तिनः॥ ब्रह्मलोकपराःसर्वेसमपद्यंतभारत ॥ १ ॥ तत्यनीकमनीकेनसमसज्जतसंकुले॥ रथानरथिभिःसार्धंपादातानपदातिभिः ॥ २ ॥ अश्वानाश्वैरयुध्यंतगजानगजयोधिभिः ॥ उन्मत्तवन्महाराजयु ध्यंतेतत्रभारत ॥ ३ ॥ महान्व्यतिकरोरौद्रःसेनयोःसमपद्यत ॥ नरनागगणेष्वेवंविकीर्णेषुचसर्वशः॥ ४॥ क्षयेतस्मिन्महारौद्रेनिर्विशेषमजायत॥ ततःशल्यः कृपश्चैवचित्रसेनश्चभारत ॥ ५॥ दुःशासनोविकर्णश्चरथानास्थायभास्वरान्॥ पांडवानांरणेशूराध्वजिनींसमकंपयन् ॥ ६॥ सावध्यमानासमरेपांडुसेनाम हात्मभिः॥ भ्राम्यतेवद्रुधाराजन्मारुतेनेवनौर्जले ॥ ७॥ यथाहिशैशिरःकालोगवांमर्माणिकृंतति ॥ तथापांडुसुतानांवैभीष्मोममर्माणिकृंतति ॥ ८ ॥ तथैवतव सैन्यस्यपार्थेनचमहात्मना॥ नवमेघप्रतीकाशाःपातिताबहुधागजाः ॥ ९ ॥ म्रद्यमानाश्चदृश्यंतेपार्थेननरयूथपाः ॥ इषुभिस्ताड्यमानाश्चनाराचैश्चसहस्रशः ॥ १० ॥ पेतुरार्तस्वरंघोरंकृत्वातत्रमहागजाः॥ आनद्धाभरणैःकायैर्निहतानांमहात्मनाम्॥ ११ ॥ छन्नमायोधनंरेजेशिरोभिश्चसकुंडलैः॥ तस्मिन्नेवमहाराज महावीरवरक्षये॥ १२॥ भीष्मेचयुधिविक्रांतेपांडवेचधनंजये॥ तेपराक्रांतमालोक्यराजन्युधिपितामहम्॥ १३॥ अभ्यवर्ततपुत्राःसर्वेसैन्यपुरस्कृताः॥ इच्छं तोनिधनंयुद्धेस्वर्गंकृत्वापरायणम्॥ १४॥ पांडवानभ्यवर्ततस्मिन्वीरवरक्षये॥ पांडवापिमहाराजस्मरंतोविविधान्वहून्॥ १५॥ क्लेशानुक्तान्सपुत्रेणत्वया पूर्वंनराधिप ॥ भयंत्यक्त्वारणेशूराब्रह्मलोकायतत्पराः ॥ १६ ॥ तावकांस्तवपुत्रांश्चयोधयंतिप्रहृष्टवत् ॥ सेनापतिस्तुसमरेप्राहसेनांमहारथः॥ १७॥ अभिद्र वतगांगेयंसोमकाःसृंजयैःसह॥ सेनापतिवचःश्रुत्वासोमकाःसृंजयाश्चते॥ १८॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

॥ १८१ ॥

॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

अभ्यद्रवंतगगियंशरवृष्यासमाहताः॥ वध्यमानस्ततोराजन्पितासांतनवस्तव ॥ १९॥ अमर्षवशमापन्नोयोधयामासस्ंजयान्॥ तस्यकीर्तिमतस्तातपुरा रामेणधीमता॥ २०॥ संप्रदत्तास्त्रशिक्षावैपरानीकविनाशनी॥ सतांशिक्षामधिष्ठायकुर्वन्परबलक्षयम्॥ २१ ॥ अहन्यहनिपार्थानांवृद्धःकुरुपितामहः॥ भी ष्मोदशसहस्राणिजघानपरवीरहा ॥ २२ ॥ तस्मिंस्तुदशमेप्राप्तेदिवसेभरतर्षभ ॥ भीष्मेणैकेनमत्स्येषुपंचालेषुचसंयुगे॥ २३॥ गजाश्वममितंहत्वाहताःसप्त महारथाः ॥ हत्वापंचसहस्राणिरथानांप्रपितामहः॥ २४ ॥ नराणांचमहायुद्धेसहस्राणिचतुर्दश॥ दंतिनांचसहस्राणिहयानामयुतंपुनः ॥ २५ ॥ शिक्षाबलेन निहतंपित्रातवविशांपते॥ ततःसर्वमहीपानांक्षपयित्वावरूथिनीम्॥ २६॥ विराटस्यप्रियोभ्राताशतानीकोनिपातितः॥ शतानीकंचसमरेहत्वाभीष्मःप्रतापवा न्॥ २७॥ सहस्राणिमहाराजराज्ञांभल्लैरपातयत्॥ उद्विग्नाःसमरेयोधाविक्रोशंतिधनंजयम्॥ २८॥ येचकेचनपार्थानामभियाताधनंजयम्॥ राजानोभीष्ममासाद्यगतास्तेयमसादनम्॥ २९॥ एवंदशदिशोभीष्मःशरजालैःसमंततः॥ अतीत्यसेनांपार्थानामवतस्थेचमूमुखे ॥ ३०॥ सकृत्वासुमहत्कर्मतस्मिन्वैदशमेहनि॥ सेनयोरंतरेतिष्ठन्प्रगृहीतशरासनः॥ ३१॥ नचैनंपार्थिवाःकेचिच्छक्ताराजन्निरीक्षितुम्॥ मध्यंप्राप्तंयथाग्रीष्मेतपंतंभास्करंदिवि॥ ३२॥ यथादैत्यंचमू शक्रस्तापयामाससंयुगे ॥ तथाभीष्मःपांडवेयांस्तापयामासभारत ॥ ३३ ॥ तथाचैनंपराक्रांतमालोक्यमधुसूदनः ॥ उवाचदेवकीपुत्रःप्रीयमाणोधनंजयं ॥ ३४॥ एषशांतनवोभीष्मःसेनयोरंतरेस्थितः ॥ संनिहत्यबलादेनंविजयस्तेभविष्यति ॥ ३५ ॥ बलात्संस्तंभयस्वैनंयत्रैषाभिद्यतेचमूः ॥ नहिभीष्मशरानन्यः सोढुमुत्सहतेविभो॥ ३६॥ ततस्तस्मिन्क्षणेराजंश्वोदितोवानरध्वजः ॥ सध्वजंसरथंसाश्वंभीष्ममंतर्दधेशरैः ॥ ३७॥ सचापिकुरुमुख्यानाम्नृपान्पांडवेरिता न्॥ शरव्रातैःशरव्रातान्बहुधाविदुधावतान्॥ ३८॥ ततःपंचालराजश्चधृष्टकेतुश्चवीर्यवान्॥ पांडवोभीमसेनश्चधृष्टद्युम्नश्चपार्षतः॥ ३९ ॥ यमौचचेकितान श्चकेकयाःपंचचैवह॥ सात्यकिश्चमहाबाहुःसौभद्रोयघटोत्कचः ॥ ४० ॥ द्रौपदेयाःशिखंडीचकुंतिभोजश्चवीर्यवान्॥ सुशर्माचविराटश्चपांडवेयामहाबलाः ॥ ४१ ॥ एतेचान्येचबहवःपीडिताभीष्मसायकैः॥ समुद्वृताःफाल्गुनेननिमग्नाःशोकसागरे॥ ४२॥ ततःशिखंडीवेगेनप्रगृह्यपरमायुधम्॥ भीष्ममेवाभिदुद्रा वरक्ष्यमाणःकिरीटिना॥ ४३॥ ततोस्यानुंचरान्हत्वासर्वान्रणविभागवित्॥ भीष्ममेवाभिदुद्रावबीभत्सुरपराजितः॥ ४४॥

सात्यकिश्चेकितानश्चधृष्टद्युम्नश्चपार्षतः॥ विराटोद्रुपदश्चैवमाद्रीपुत्रौचपांडवौ॥ ४५ ॥ द्रुद्रुवुर्भीष्ममेवाजौरक्षितादृढधन्वना॥ अभिमन्युश्चसमरेद्रौपद्याःपंच चात्मजाः॥ ४६ ॥ द्रुद्रुवुःसमरेभीष्मंसमुद्यतमहायुधाः॥ तेसर्वेदृढधन्वानःसंयुगेष्वपलायिनः॥ ४७॥ बहुधाभीष्ममानर्छुर्मार्गणैःक्षतमार्गणैः॥ विधूयता न्बाणगणान्येमुक्ताःपार्थिवोत्तमैः॥ ४८॥ पांडवानामदीनात्माव्यगाहतवरूथिनीम्॥ चक्रेशरविघातंचक्रीडन्निवपितामहः॥ ४९॥ नाभिसंधत्तपांचाल्येस्म यमानोमुहुर्मुहुः॥ स्त्रीत्वंतस्यानुसंस्मृत्यभीष्मोबाणान्शिखंडिने॥ ५० ॥ जघानद्रुपदानीकेरथान्सप्तमहारथः॥ ततःकिलकिलाशब्दःक्षणेनसमभूत्तदा ॥ ५१ ॥ मत्स्यपांचालचेदीनांतमेकमभिधावताम्॥ तेनराश्चरथव्रातैर्मार्गणैश्चपरंतप॥ ५२॥ तमेकंछादयामासुर्मेघाइवदिवाकरम्॥ भीष्मंभागीरथीपुत्रंप्रत पंतंरणेरिपून्॥ ५३॥ ततस्तस्यचतेषांचयुद्धेदेवासुरोपमे॥ किरीटीभीष्ममानर्छत्पुरस्कृत्यशिखंडिनम्॥ ५४॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव० भीष्म पराक्रमेअष्टादशाधिकशततमोऽध्यायः॥ ११८॥ ॥ ॥ ७ ॥ ॥ संजयउवाच॥ ॥ एवंतेपांडवाःसर्वेपुरस्कृत्यशिखंडिनम्॥ विव्यधुःसमरेभीष्मं परिवार्यसमंततः॥ १॥ शतघ्नीभिःसुघोराभिःपरिघैश्चपरश्वधैः॥ मुद्गरैर्मुसलैःप्रासैःक्षेपणीयैश्चसर्वशः॥ २॥ शरैःकनकपुंखैश्चशक्तितोमरकंपनैः॥ नाराचै र्वत्सदंतैश्चभुशुंडीभिश्चसर्वशः॥ ३॥ अताडयन्रणेभीष्मंसंहिताःसर्वसृंजयाः॥ सविशीर्णतनुत्राणःपीडितोबहुभिस्तदा॥ ४॥ नविव्यथेतदाभीष्मोभिद्यमा नेषुमर्मसु॥ संदीप्तशरचापाग्निरस्त्रप्रस्तमारुतः॥ ५॥ नेमिनिर्ह्रादसंतापोमहास्त्रोदयपावकः॥ चित्रचापमहाज्वालोवीरक्षयमहेंधनः॥ ६॥ युगांताग्निसम प्रख्यःपरेषांसमपद्यत॥ विरथ्यरथसंघानामन्तरेणविनिःसृतः॥ ७॥ दृश्यतेस्मनरेंद्राणांपुनर्मध्यगतश्चरन्॥ ततःपंचालराजंचधृष्टकेतुमचिंत्यच॥ ८॥ पांडवा नीकिनीमध्यमाससादविशांपते॥ ततःसात्यकिभीमौचपांडवंचधनंजयम्॥ ९॥द्रुपदंचविराटंचधृष्टद्युम्नंचपार्षतम्॥ भीमघोषैर्महावेगैर्मर्मावरणभेदिभिः॥ १०॥ षडेतान्निशितैर्भीष्मःप्रविव्याधोत्तमैःशरैः॥ तस्यतेनिशितान्बाणात्संनिवार्यमहारथाः॥ ११॥ दशभिर्दशभिर्भीष्ममर्दयामासुरोजसा॥ शिखंडीतुमहाबा णान्यान्मुमोचमहारथः॥ १२॥ नचकुस्तेरुजंतस्यस्वर्णपुंखाःशिलाशिताः॥ ततःकिरीटीसंरब्धोभीष्ममेवाभ्यधावत॥ १३॥

एवमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ मर्मावरणंवर्मदेहचर्मवा ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

॥ १८२ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ आत्तमात्तंगृहीतंगृहीतं॥ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

शिखंडिनंपुरस्कृत्यधनुश्चास्यसमाच्छिनत्॥ भीष्मस्यधनुषश्छेदंनाप्यंतमहारथाः॥ १४ ॥ द्रोणश्चकृतवर्माचसैंधवश्चजयद्रथः॥ भूरिश्रवाःशलःशल्यो भगदत्तस्तथैवच॥ १५॥ समेतेपरमक्रुद्धाःकिरीटिनमभिद्रुताः॥ तत्रशस्त्राणिदिव्यानिदर्शयंतोमहारथाः॥ १६॥ अभिपेतुर्भृशंक्रुद्धाश्छादयंतश्चपांडवम्॥ ते षामापततांशब्दःशुश्रुवेफाल्गुनंप्रति॥ १७ ॥ उद्धूतानांयथाशब्दःसमुद्राणांयुगक्षये॥ प्रतानयतगृह्णीतविध्यध्वमवकर्तत॥ १८॥ इत्यासीत्तुमुलःशब्दः फाल्गुनस्यरथंप्रति॥ तंशब्दंतुमुलंश्रुत्वापांडवानांमहारथाः॥ १९॥ अभ्यधावन्परीप्संतःफाल्गुनंभरतर्षभ॥ सात्यकिर्भीमसेनश्चधृष्टद्युम्नश्चपार्षतः॥ २०॥ विराट्द्रुपदौचोभौराक्षसश्चघटोत्कचः॥ अभिमन्युश्चसंक्रुद्धःसमेतेक्रोधमूर्च्छिताः॥ २१॥ समभ्यधावंस्त्वरिताश्चित्रकार्मुकधारिणः॥ तेषांसमभवद्युद्धंतुमु लंलोमहर्षणम्॥ २२॥ संग्रामेभरतश्रेष्ठदेवानांदानवैरिव॥ शिखंडीतुरणेश्रेष्ठोरक्ष्यमाणःकिरीटिना॥ २३॥ अविध्यद्दशभिर्भीष्मंछिन्नधन्वानमाहवे॥ सार थिंदशभिश्चास्यध्वजंचैकेनचिच्छिदे॥ २४॥ सोन्यत्कार्मुकमादायगांगेयोवेगवत्तरम्॥ तदप्यस्यशितैर्बाणैश्चिच्छेदफाल्गुनः॥ २५॥ एवंसपांडवःक्रुद्ध आत्तमात्तंपुनःपुनः॥ धनुश्चिच्छेदभीष्मस्यसव्यसाचीपरंतपः॥ २६॥ सच्छिन्नधन्वासंक्रुद्धःस्फिक्किणीपरिसंलिहन्॥ शक्तिंजग्राहतरसागिरीणामपिदारणीम् ॥ २७॥ तांचचिक्षेपसंक्रुद्धःफाल्गुनस्यरथंप्रति॥ तामापततींसंप्रेक्ष्यज्वलंतीमशनीमिव॥ २८॥ समादत्तशितान्भल्लान्पंचपांडवनंदनः॥ तस्यचिच्छेदतां शक्तिंपंचधापंचभिःशरैः॥ २९॥ संक्रुद्धोभरतश्रेष्ठभीष्मबाहुप्रवेरिताम्॥ सापपाततथाच्छिन्नासंक्रुद्धेनकिरीटिना॥ ३०॥ मेघवंदपरिभ्रष्टाविच्छिन्नेवशत ह्रदा॥ छिन्नांतांशक्तिमालोक्यभीष्मःक्रोधसमन्वितः॥ ३१॥ अचिंतयद्रणेवीरोवृद्ध्यापरपुरंजयः॥ शक्तोहंधनुषैकेननिहंतुंसर्वपांडवान्॥ ३२॥ यद्येषांनभ वेद्गोप्तावि ष्वक्सेनोमहाबलः॥ कारणद्वयमास्थायनाहंयोत्स्यामिपांडवान्॥ ३३॥ अवध्यत्वाच्चपांडूनांस्त्रीभावाच्चशिखंडिनः॥ पित्रातुष्टेनमेपूर्वंयदाकालीमु दावहम्॥ ३४॥ स्वच्छंदमरणंदत्तमवध्यत्वंरणेतथा॥ तस्मान्हत्युमहंमन्येप्रामकालमिवात्मनः॥ ३५॥ एवंज्ञात्वाव्यवसितंभीष्मस्यामिततेजसः॥ ऋषयो वसवश्चैवव्यत्स्याभीष्ममब्रुवन्॥ ३६॥ यत्तेव्यवसितंतातततदस्माकमपिप्रियम्॥ तत्कुरुष्वमहाराजयुद्धेबुद्धिंनिवर्तय॥ ३७॥ अस्यवाक्यस्यनिधनेप्रादुरा सीच्छिवोनिलः॥ अनुलोमःसुगंधीचपृषतैश्चसमन्वितः॥ ३८॥

व्यवसितंनिश्चितं ॥ ३७ ॥ निधनेसमाप्तौ ॥ ३८ ॥

॥ ३९ ॥ मुनितेजसाव्यासप्रभावेण ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

देवदुंदुभयश्चैवसंप्रणेदुर्महास्वनाः ॥ पपातपुष्पवृष्टिश्चभीष्मस्योपरिमारिष ॥ ३९ ॥ नचतच्छ्रुश्रुवेकश्चित्तेषांसंवदतांनृप ॥ कृतेभीष्मंमहावाहुंमांचापिमु
नितेजसा ॥ ४० ॥ संभ्रमश्चमहानासीत्रिदशानांविशांपते ॥ पतिष्यतिरथाद्भीष्मेसर्वलोकप्रियेतदा ॥ ४१ ॥ इतिदेवगणानांचवाक्यंश्रुत्वामहातपाः ॥ ततः
शांतनवोभीष्मोवीभत्सुंनात्यवर्तत ॥ ४२ ॥ भिद्यमानःशितैर्बाणैःसर्वावरणभेदिभिः ॥ शिखंडीतुमहाराजभरतानांपितामहम् ॥ ४३ ॥ आजघानोरसिक्रुद्धो
नवभिर्निशितैःशरैः ॥ सतेनाभिहतःसंख्येभीष्मःकुरुपितामहः ॥ ४४ ॥ नाकंपतमहाराजक्षितिकंपेयथाचलः ॥ ततःप्रहस्यबीभत्सुर्व्याक्षिपन्गांडिवंधनुः ॥ ४५ ॥
गांगेयंपंचविंशत्याक्षुद्रकाणांसमार्पयत् ॥ पुनःपुनःशतैरेनंत्वरमाणोधनंजयः ॥ ४६ ॥ सर्वगात्रेषुसंक्रुद्धःसर्वमर्मस्वताडयत् ॥ एवमन्यैरपिभृशंविद्ध्यमानःस
हस्रशः ॥ ४७ ॥ तानप्याशुशरैर्भीष्मःप्रविव्याधमहारथः ॥ तैश्चमुक्ताञ्छरान्भीष्मोयुधिसत्यपराक्रमः ॥ ४८ ॥ निवारयामासशरैःसमंसंनतपर्वभिः ॥ शि
खंडीतुरणेबाणान्यान्मुमोचमहारथः ॥ ४९ ॥ नचकुरुरुजंतस्यरुक्मपुंखाःशिलाशिताः ॥ ततःकिरीटीसंक्रुद्धोभीष्ममेवाभ्यवर्तत ॥ ५० ॥ शिखंडिनंपुरस्कृ
त्यधनुश्चास्यसमाच्छिनत् ॥ अथैनंनवभिर्विद्ध्वाध्वजमेकेनचिच्छिदे ॥ ५१ ॥ सारथिंविशिखैश्चास्यदशभिःसमकंपयत् ॥ सोन्यत्कार्मुकमादायगांगेयोब
लवत्तरम् ॥ ५२ ॥ तदप्यस्यशितैर्भल्लैस्त्रिधात्रिभिरघातयत् ॥ निमेषार्धेनकौंतेयआत्तमात्तंमहारणे ॥ ५३ ॥ एवमस्यधनूंष्याजौचिच्छेदसुबहून्यथ ॥ ततःशांत
नवोभीष्मोवीभत्सुंनात्यवर्तत ॥ ५४ ॥ अथैनंपंचविंशत्याक्षुद्रकाणांसमार्पयत् ॥ सोतिविद्धोमहेष्वासोदुःशासनमभाषत ॥ ५५ ॥ एषपार्थोरणेक्रुद्धःपांडवानां
महारथः ॥ शरैरनेकसाहस्रैर्मामेवाभ्यहनद्रणे ॥ ५६ ॥ नचैषसमरेशक्योजेतुंवज्रभृतापि ॥ नचापिसहितावीरादेवदानवराक्षसाः ॥ ५७ ॥ मांचापिशक्ता
निर्जेतुंकिमुमर्त्यामहारथाः ॥ एवंतयोःसंवदतोःफाल्गुनोनिशितैःशरैः ॥ ५८ ॥ शिखंडिनंपुरस्कृत्यभीष्मंविव्याधसंयुगे ॥ ततोदुःशासनंभूयःस्मयमानइवात्र
वीत् ॥ ५९ ॥ अतिविद्धःशितैर्बाणैर्भृशंगांडीवधन्वना ॥ वज्राशनिसमस्पर्शाञ्छरान्नैनशरायुधि ॥ ६० ॥ मुक्ताःसर्वेऽव्यवच्छिन्नानेमेबाणाःशिखंडिनः ॥ निकृं
तमानामर्माणिदृढावरणभेदिनः ॥ ६१ ॥ मुसलाइवमेघ्नंतिनेमेबाणाःशिखंडिनः ॥ वज्रदंडसमस्पर्शावज्रवेगदुरासदाः ॥ ६२ ॥

अव्यवच्छिन्नाःसंततताः ॥ ६१ ॥ ६२ ॥

॥ १८३ ॥

॥ ६३ ॥ ६४ ॥ ६५ ॥ माघमाकर्कटीप्रोक्तादपत्यंतुसेगवा यथामाघमांकर्कटीमातरंसेगवास्तदपत्यानिकृंतंति उदरस्थान्यपत्यानिपृष्ठंविदार्यबर्हिर्निर्गच्छंतिनद्वदित्यर्थः तेनप्राणापहारिवेदनाजनकत्वं
ममप्राणानारुजंतिनेमेबाणाःशिखंडिनः ॥ नाशयंतीवमेप्राणान्यमदूताइवाहिताः ॥ ६३ ॥ गदापरिघसंस्पर्शानेमेबाणाःशिखंडिनः ॥ भुजगाइवसंक्रुद्धाले
लिहानाविषोल्वणाः ॥ ६४ ॥ समाविशंतिममर्माणिनेमेबाणाःशिखंडिनः ॥ अर्जुनस्यइमेबाणानेमेबाणाःशिखंडिनः ॥ ६५ ॥ कृंतंतिममगात्राणिमाघमांसेग
वाइव ॥ सर्वेत्यपिनमेदुःखंकुर्युरन्येनराधिपाः ॥ ६६ ॥ वीरंगांडीवधन्वानमृतेजिष्णुंकपिध्वजम् ॥ इतिब्रुवञ्छांतनवोदिधक्षुरिवपांडवान् ॥ ६७ ॥ शर्किभीष्मः
सपार्थायततश्चिक्षेपभारत ॥ तांमस्यविशिखैश्छित्त्वात्रिधात्रिभिरपातयत् ॥ ६८ ॥ पश्यतांकुरुवीराणांसर्वेषांतवभारत ॥ चर्मार्थादत्तगांगेयोजातरूपपरि
ष्कृतम् ॥ ६९ ॥ खड्गंचान्यतरप्रेप्सुर्मृत्योरग्रेजयायवा ॥ तस्यतच्छतधाचर्मव्यधमत्सायकैस्तथा ॥ ७० ॥ रथादनवरूढस्यतद्भुतमिवाभवत् ॥ ततोयुधिष्ठिरो
राजास्वान्यनीकान्यचोदयत् ॥ ७१ ॥ अभिद्रवतगांगेयंमावोस्तुभयमण्वपि ॥ अथतेतोमरैःप्रासैर्वाणौघैश्चसमंततः ॥ ७२ ॥ पट्टिशैश्चसुनिस्त्रिंशैर्नाराचैश्चत
याशितैः ॥ वत्सदंतैश्चभल्लैश्चतमेकमभिदुद्रुवुः ॥ ७३ ॥ सिंहनादस्ततोघोरःपांडवानामभूत्तदा ॥ तथैवतवपुत्राश्चनेदुर्भीष्मजयैषिणः ॥ ७४ ॥ तमेकमभ्यरक्षं
तसिंहनादांश्चचक्रिरे ॥ तत्रासीत्तुमुलंयुद्धंतावकानांपरैःसह ॥ ७५ ॥ दशमेहनिराजेंद्रभीष्मार्जुनसमागमे ॥ आसीद्गांगइवावर्तोमुहूर्तमुदधेरिव ॥ ७६ ॥ सै
न्यानांयुध्यमानानांनिघ्नतामितरेतरम् ॥ असौम्यरूपापृथिवीशोणिताक्ताभवत्तदा ॥ ७७ ॥ समंचविषमंचैवनप्राज्ञायतकिंचन ॥ योधानामयुतंहत्वातस्मिन्स
दशमेहनि ॥ ७८ ॥ अतिष्ठदाहवेभीष्मोभिद्यमानेषुमर्मसु ॥ ततःसेनामुखेतस्मिन्स्थितःपार्थोधनुर्धरः ॥ ७९ ॥ मध्येनकुरुसैन्यानांद्रावयामासवाहिनीम् ॥
वयंश्वेतहयाद्गीताःकुंतीपुत्राद्धनंजयात् ॥ ८० ॥ पीड्यमानाःशितैःशस्त्रैःप्राद्रवामरणेतदा ॥ सौवीराःकितवाःप्राच्याःप्रतीच्योदीच्यमालवाः ॥ ८१ ॥ अभीषा
हाःशूरसेनाःशिबयोथवसातयः ॥ शाल्वाःशयास्त्रिगर्ताश्चअंबष्ठाःकेकयैःसह ॥ ८२ ॥ सर्वएतेमहात्मानःशरार्तावणपीडिताः ॥ संग्रामेनजदुर्भीष्मंयुध्यमानं
किरीटिना ॥ ८३ ॥ ततस्तमेकंबहवःपरिवार्यसमंततः ॥ परिकाल्यकुरून्सर्वान्शरवर्षैरवाकिरन् ॥ ८४ ॥ निपातयतगृह्णीतयुध्यध्वमवकृंतत ॥ इत्यासीत्तुमुलः
शब्दोराजन्भीष्मरथंप्रति ॥ ८५ ॥ निहत्यसमरेराजन्शतशोथसहस्रशः ॥ नतस्यासीदनिर्भिन्नंगात्रेह्यंगुलमंतरम् ॥ ८६ ॥

बाणानानेदुःशिखंडिबाणेपुसंभव

ति तेषांमदंगेपुष्पतुल्यत्वात् ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ अथैतेषां मृत्योरितिचतुर्थ्यर्थेषष्ठी मृत्यवेइत्यर्थः ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥

॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ कालंमृत्युं ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ दक्षिणेनदक्षिणमार्गस्थंभास्करंचदृष्ट्वेत्यन्वयः ॥ १०१ ॥ संस्थातामरिष्य

एवंभूतस्तवपिताशरैर्विशकलीकृतः॥ शिताग्रैःफाल्गुनेनाजौप्राक्शिराःप्रापतद्रथात्॥ ८७॥ किंचिच्छेषेदिनकरेपुत्राणांतवपश्यताम्॥ हाहेतिदिविदेवानांपृथिवानांचभारत॥ ८८॥ पतमानेरथाद्भीष्मेबभूवसुमहास्वनः॥ संपतंतमभिप्रेक्ष्यमहात्मानंपितामहम्॥ ८९॥ सहभीष्मेणसर्वेषांप्रापतन्हृदयानिनः॥ सपपातमहाबाहुर्वसुधामनुनादयन्॥ ९०॥ इंद्रध्वजइवोत्सृष्टःकेतुःसर्वधनुष्मताम्॥ धरणींनसपस्पर्शशरसंघैःसमावृतः॥ ९१॥ शरतल्पेमहेष्वासंशयानंपुरुषर्षभम्॥ रथात्पपतितंचैनंदिव्योभावःसमाविशत्॥ ९२॥ अभ्यवर्षच्चपर्जन्यःप्राकंपतचमेदिनी॥ पतन्सदृशेचापिदक्षिणेनदिवाकरम्॥ ९३॥ संज्ञांचोपलभद्वीरःकालंसंचिंत्यभारत॥ अंतरिक्षेचशुश्रावदिव्यावाचःसमंततः॥ ९४॥ कथंमहात्मागांगेयःसर्वशस्त्रभृतांवरः॥ कालंकर्तानरव्याघ्रःसंप्राप्तेदक्षिणायने॥ ९५॥ स्थितोस्मीतिचगांगेयस्तच्छ्रुत्वावाक्यमब्रवीत्॥ धारयामासचप्राणान्यतितोपिमहीतले॥ ९६॥ उत्तरायणमन्विच्छन्भीष्मःकुरुपितामहः॥ तस्यतन्मतमाज्ञायगंगाहिमवतःसुता॥ ९७॥ महर्षीन्हंसरूपेणप्रेषयामासतत्रवै॥ ततःसंपातिनोहंसास्त्वरितामानसौकसः॥ ९८॥ आजग्मुःसहिताद्रष्टुंभीष्मंकुरुपितामहम्॥ यत्रशेतेनरश्रेष्ठःशरतल्पेपितामहः॥ ९९॥ तेतुभीष्मंसभासाद्यऋषयोहंसरूपिणः॥ अपश्यञ्छरतल्पस्थंभीष्मंकुरुकुलोद्वहम्॥ १००॥ तेतंदृष्ट्वामहात्मानंकृत्वाचापिप्रदक्षिणम्॥ गांगेयंभरतश्रेष्ठंदक्षिणेनचभास्करम्॥ १०१॥ इतरेतरमामंत्र्यप्राद्रुस्तत्रमनीषिणः॥ भीष्मःकथंमहात्मासन्संस्थातादक्षिणायने॥ १०२॥ इत्युक्त्वाप्रस्थिताहंसादक्षिणामभितोदिशम्॥ संप्रेक्ष्यचैवमहाबुद्धिश्चिंतयित्वाचभारत॥ १०३॥ तानब्रवीच्छांतनवोनाहंगंताकथंचन॥ दक्षिणावर्तआदित्येएतन्मेमनसिस्थितम्॥ १०४॥ गमिष्यामिस्वकंस्थानमासीद्यन्मेपुरातनम्॥ उदगायनआदित्येहंसाःसत्यंब्रवीमिवः॥ १०५॥ धारयिष्याम्यहंप्राणानुत्तरायणकांक्षया॥ ऐश्वर्यभूतःप्राणानामुत्सर्गोहियतोमम॥ १०६॥ तस्मात्प्राणान्धारयिष्येमुमूर्षुरुदगायने॥ यश्चदत्तोवरोमह्यंपित्रातेनमहात्मना॥ १०७॥ छंदतोमृत्युरित्येवंतस्यचास्तुवरस्तथा॥ धारयिष्येततःप्राणानुत्सर्गेनियतेसति॥ १०८॥ इत्युक्त्वातांस्तदाहंसान्सशेतेशरतल्पगः॥ एवंकुरूणांपतितेशृंगेभीष्मेमहौजसि॥ १०९॥ पांडवाःसृंजयाश्चैवसिंहनादंप्रचक्रिरे॥ तस्मिन्हतेमहासत्त्वेभरतानांपितामहे॥ ११०॥

॥ १८४ ॥

ति ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ऐश्वर्येणत्वसामर्थ्येनभूतःप्राप्तःस्वच्छंदमृत्युत्वात् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

॥ १११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ १२२ ॥ ॥ इतिश्री०नै०भा०ऊनविंशाधिकशततमोऽध्यायः ॥ ११९ ॥ ॥ ७ ॥ ॥७॥

नकिंचित्प्रत्यपद्यंतपुत्रास्तेभरतर्षभ॥ संमोहश्चैवतुमुलःकुरूणामभवत्तदा॥ १११॥ कृपदुर्योधनमुखानिःश्वस्यरुरुदुस्ततः॥ विषादाच्चचिरंकालमतिष्ठन्विगतेंद्रियाः॥ १२॥ दध्युश्चैवमहाराजनयुद्धेदधिरेमनः॥ ऊरुग्राहगृहीताश्चनाभ्यधावंतपांडवान्॥ १३॥ अवध्येशांतनोःपुत्रेहतेभीष्मेमहौजसि॥ अभावःसहसाराजन्कुरुराजस्यतर्कितः॥ १४॥ हतप्रवीरास्तुवयंनिकृत्ताश्वशितैःशरैः॥ कर्तव्यंनाभिजानीमोनिर्जिताःसव्यसाचिना॥ १५॥ पांडवाश्चजयंलब्ध्वापरत्रचपरांगतिम्॥ संवेदयुर्मुहाशंखान्शूराःपरिघबाहवः॥ १६॥ सोमकाश्चसपंचालाःप्राहृष्यंतजनेश्वर॥ ततस्तूर्यसहस्रेषुनदत्सुसमहाबलः॥ १७॥ आस्फोटयामासभृशंभीमसेनोननादच॥ सेनयोरुभयोश्चापिगांगेयेनिहतेविभौ॥ १८॥ संन्यस्यवीराःशस्त्राणिप्राध्यायंतसमंततः॥ प्राक्रोशन्प्राद्रवंश्चान्येजग्मुर्मोहंतथापरे॥ १९॥ क्षत्रंचान्येभ्यर्निदंतभीष्मंचान्येभ्यपूजयन्॥ ऋषयःपितरश्चैवप्रशशंसुर्महाव्रतम्॥ २०॥ भरतानांचयेपूर्वेतेचैनंप्रशशंसिरे॥ महोपनिषदं चैवयोगमास्थायवीर्यवान्॥ २१॥ जपन्शांतनवोधीमान्कालाकांक्षीस्थितोभवत्॥ १२२॥ ॥इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिभीष्मनिपातनेऊनविंशत्यधिकशततमोऽध्यायः॥ ११९॥ ॥ ७॥ ॥ ७॥ ॥ धृतराष्ट्रउवाच ॥ ॥ कथमासंस्तदायोधाहीनाभीष्मेणसंजय॥ बलिनादेवकल्पेनगुर्वर्थेब्रह्मचारिणा॥ १॥ तदैवनिहतान्मन्येकुरूनन्यांश्चपांडवैः॥ नप्राहरयदाभीष्मोघृणित्वाद्वृपदात्मजम्॥ २॥ ततोदुःखतरंमन्येकिमन्यत्प्रभविष्यति॥ अद्याहंपितरंश्रुत्वानिहतंस्मसुदुर्मतिः॥ ३॥ अश्मसारमयंनूनंहृदयंममसंजय॥ श्रुत्वाविनिहतंभीष्मंशतधायन्नदीर्यते॥ ४॥ यदन्यन्निहतेनाजौभीष्मेणजयमिच्छता॥ चेष्टितंकुरुसिंहेनतन्मेकथयसुव्रत॥ ५॥ पुनःपुनर्नृष्यामिहर्तदेवव्रतंरणे॥ नहतोजामदग्न्येनदिव्यैरस्त्रैरयंपुरा॥ ६॥ सहतोद्रौपदेयेनपांचाल्येनशिखंडिना॥ ॥ संजयउवाच ॥ ॥ सायाह्नेनिहतोभूमौधार्तराष्ट्रान्विषादयन्॥ ७॥ पंचालानांददौहर्षंभीष्मःकुरुपितामहः॥ सशेतेशरतल्पस्थोमेदिनीमस्पृशंस्तदा॥ ८॥ भीष्मेरथात्पपतितेप्रच्युतेधरणीतले॥ हाहेतितुमुलःशब्दोभूतानांसमपद्यत॥ ९॥

कथमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

सीमाद्यक्षेइति ननुकौरवाणांतावद्भीष्मेसेनापतौपतितेभयमुचितंप्रधानविनाशेजयाशाविच्छेदात् पांडवानांतुकथंभयमयमपेतोहर्षस्यकथनात् उच्यते पांडवानामपिमहद्भयमुपपद्यतएव संधिवांछाविच्छेदात् अयंभावः उभयोःसीमास्थानीयोभीष्मोजीवन्नस्माकंसंधिकरिष्यति तेनचपुत्रसुहृद्विनाशधनव्ययप्रत्यवायानभविष्यंति हतेत्वेतस्मिन्सुतरांसंध्याशाविच्छेदएवेजातइतिपुत्रसुहृद्विनाशादिभयु

सीमाद्यक्षेनिपतितेकुरूणांसमितिंजये॥ सेनयोरुभयोराजन्सत्रियान्भयमाविशत् ॥ १० ॥ भीष्मंशांतनवंदृष्ट्वाविशीर्णकवचध्वजम्॥ कुरवःपर्यवर्ततपांडवाश्चविशांपते॥ ११ ॥ खंतमःसंवृतमभूदासीद्भानुर्गतप्रभः॥ रराजपृथिवीचैवभीष्मेशांतनवेहते॥ १२ ॥ अयंब्रह्मविदांश्रेष्ठोत्ययंब्रह्मविदांवरः ॥ इत्यभाषंत भूतानिशयानंपुरुषर्षभम्॥ १३ ॥ अयंपितरमाज्ञायकामात्तेशांतनुंपुरा॥ ऊर्ध्वरेतसमात्मानंचकारपुरुषर्षभः ॥ १४ ॥ इतिस्मशरतल्पस्थंभरतानांमहत्तमम्॥ ऋषयस्त्वभ्यभाषंतसहिताःसिद्धचारणैः ॥ १५ ॥ हतेशांतनवेभीष्मेभरतानांपितामहे॥ नकिंचित्प्रत्यपद्यंतपुत्रास्तवहिमारिष ॥ १६ ॥ विषण्णवदनाश्वासन्हतश्रीकाश्चभारत॥ अतिष्ठन्व्रीडिताश्चैवह्रियायुक्तात्यधोमुखाः॥ १७॥ पांडवाश्चजयंलब्ध्वासंग्रामशिरसिस्थिताः ॥ सर्वेदध्मुर्महाशंखान्हेमजालपरिष्कृतान्॥१८॥ हर्षात्तूर्यसहस्रेषुवाद्यमानेषुचानघ॥ अपश्याममहाराजभीमसेनंमहाबलम्॥ १९॥ विक्रीडयानंकौरव्यंहर्षेणमहतायुतम्॥ निहत्यतरसाशत्रुंमहाबलसमन्वितम्॥ २० ॥ संमोहश्चापितुमुलःकुरूणामभवत्ततः॥ कर्णदुर्योधनौचापिनिःश्वसेतांमुहुर्मुहुः॥ २१॥ तथानिपातितेभीष्मेकौरवाणांपितामहे॥ हाहाभूतमभूत्सर्वंनिर्मर्यादमवर्तत ॥ २२॥ दृष्ट्वाचपतितंभीष्मंपुत्रोदुःशासनस्तव॥ उत्तमंजवमास्थायद्रोणानीकमुपाद्रवत्॥ २३॥ आत्राप्रस्थापितोवीरःस्वेनानीकेनदंशितः॥ प्रययौपुरुषव्याघ्रःस्वसैन्यंसविषादयन्॥ २४॥ तमायांतमभिप्रेक्ष्यकुरवःपर्यवारयन्॥ दुःशासनंमहाराजकिमयंवक्ष्यतीतिच ॥ २५ ॥ ततोद्रोणायनिहतंभीष्ममाचष्टकौरवः॥ द्रोणस्त्रात्रियंश्रुत्वामुमोहभरतर्षभ॥ २६ ॥ ससंज्ञामुपलभ्याशुभारद्वाजःप्रतापवान्॥ निवारयामासतदास्वान्यनीकानि मारिष॥ २७॥ विनिवृत्तान्कुरून्दृष्ट्वापांडवापिस्वसैनिकान्॥ दूतैःशीघ्राश्वसंयुक्तैःसमंतात्पर्यवारयन्॥ २८॥ निवृत्तेषुचसैन्येषुपारंपर्येणसर्वशः॥ निर्मुक्तकवचाःसर्वेभीष्ममीयुर्नराधिपाः॥ २९॥ व्युपरम्यततोयुद्धाद्योधाःशतसहस्रशः॥ उपतस्थुर्महात्मानंप्रजापतिमिवामराः॥ ३०॥

कंभयंयुज्यतइति तस्माद्युक्तमुक्तंसेनयोरुभयोरितिहर्षकथनंत्वापाततोज्ञेयं ॥ १० ॥ पर्यवर्ततेपरिवृत्तवंतः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ व्रीडिताःव्रीडावंतः व्रीडाचान्यतः ह्रीश्चाकार्यकरणात् ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ पारंपर्येणक्रमेण ॥ २९ ॥ ३० ॥

॥ १८५ ॥

॥ ३१ ॥ ३२ ॥ ३३ ॥ उपधानंउपबर्हं ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ इहवीरशय्यायां ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ व्यवसायमुचितोयोगं ॥ ४३ ॥ ४४ ॥ अन्वगृह्णात्अवतष्टंभे ॥ ४५ ॥

तेतुभीष्मंसमासाद्यशयानंभरतर्षभम्॥ अभिवाद्यावतिष्ठंतपांडवाःकुरुभिःसह॥ ३१ ॥ अथपांडूनकुरूंश्चैवप्रणिपत्याग्रतःस्थितान् ॥ अभ्यभाषतधर्मात्माभीष्मःशांतनवस्तदा ॥ ३२ ॥ स्वागतंवोमहाभागाःस्वागतंवोमहारथाः ॥ तुष्यामिदर्शनाच्चाहंयुष्माकममरोपमाः ॥ ३३ ॥ अभिमंत्र्याथतानेवंशिरसालंबताब्रवीत्॥ शिरोमेलंबतेत्यर्थमुपधानंप्रदीयताम्॥ ३४॥ ततोनृपाःसमाजह्रुस्तूनिचमृदूनिच॥ उपधानानिमुख्यानिनैच्छत्तानिपितामहः ॥ ३५॥ अथाब्रवीन्नरव्याघ्रःप्रहसन्निवताञ्नृपान्॥ नैतानिवीरशय्यासुयुक्तरूपाणिपार्थिवाः ॥ ३६ ॥ ततोवीक्ष्यनरश्रेष्ठमभ्यभाषतपांडवम्॥ धनंजयंदीर्घबाहुंसर्वलोकमहारथम्॥ ३७॥ धनंजयमहाबाहोशिरोमेतातलंबते॥ दीयतामुपधानंवैयद्युक्तमिहमन्यसे॥ ३८ ॥ ॥संजयउवाच॥ ॥समारोप्यमहच्चापमभिवाद्यपितामहम्॥ नेत्राभ्यामश्रुपूर्णाभ्यामिदंवचनमब्रवीत्॥ ३९ ॥ आज्ञापयकुरुश्रेष्ठसर्वशस्त्रभृतांवर॥ प्रेष्योहंतवदुर्धर्षकियतांकिंपितामह ॥ ४० ॥ तमब्रवीच्छांतनवःशिरोमेतातलंबते॥ उपधानंकुरुश्रेष्ठफाल्गुनोपदधत्स्वमे ॥ ४१ ॥ शयनस्यानुरूपंवैशीघ्रंवीरप्रयच्छमे ॥ त्वंहिपार्थसमर्थोवैश्रेष्ठःसर्वधनुष्मताम्॥ ४२ ॥ क्षत्रधर्मस्यवेत्ताचबुद्धिसत्त्वगुणान्वितः॥ फाल्गुनोपितयेत्युक्त्वाव्यवसायमरोचयत् ॥ ४३ ॥ गृह्यानुमंत्र्यगांडीवंशरान्संनतपर्वणः॥ अनुमान्यमहात्मानंभरतानांमहारथम्॥ ४४॥ त्रिभिस्तीक्ष्णैर्महावेगैरन्वगृह्णाच्छिरःशरैः॥ अभिप्रायेतुविदितेधर्मात्मासव्यसाचिना ॥ ४५ ॥ अतुष्यद्भरतश्रेष्ठोभीष्मोधर्मार्थतत्त्ववित् ॥ उपधानेनदत्तेनप्रत्यनंदद्धनंजयम् ॥ ४६॥ प्राहसर्वान्समुद्वीक्ष्यभरतान्भारतंप्रति ॥ कुंतीपुत्रंयुधांश्रेष्ठंसुहृदांप्रीतिवर्धनम् ॥ ४७ ॥ शयनस्यानुरूपंमेपांडवोपहितंत्वया ॥ यद्यन्यथाप्रपद्येयाःशपेयंत्वामहंरुषा ॥ ४८ ॥ एवमेवमहाबाहोधर्मेषुपरितिष्ठता ॥ स्वधर्व्यक्षत्रियेणाजौशरतल्पगतेनवै ॥ ४९ ॥ एवमुक्त्वातुबीभत्सुंसर्वांस्तानब्रवीद्वचः॥ राज्ञश्चराजपुत्रांश्चपांडवानभिसंस्थितान् ॥ ५० ॥ पश्यध्वमुपधानंमेपांडवेनाभिसंधितम् ॥ शिश्येहमस्यांशय्यायांयावदावर्तनंरवेः ॥ ५१ ॥ येतदामांगमिष्यंतितेचप्रेक्ष्यंतिमांनृपाः ॥ दिशंवैश्रवणाकांतांयदागंतादिवाकरः ॥ ५२ ॥ नूनंसमाश्वसुकेनरथेनोत्तमतेजसा ॥ विमोक्ष्येहंतदाप्राणान्सुहृदःसुप्रियानिव ॥ ५३ ॥ परिखाःखन्यतामत्रममावसदनेनृपाः ॥ उपासिष्येविवस्वंतमेवंशरशताचितः ॥ ५४ ॥

॥ ४६ ॥ ४७ ॥ उपहितंउपधानीयंदत्तं ॥ ४८ ॥ ४९ ॥ पांडवानभिसंस्थितान्पांडवानांसमीपवर्तिनः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ममावसदनेमन्निवासस्थाने ॥ ५४ ॥

५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ चक्षुषाहंनीतिनथातं दृष्टिमात्रेणहननक्षमं ॥ ६८ ॥ ६९ ॥७०॥७१॥ ॥ इतिभी०नै०भा०विशाधि

उपारमध्वंसंग्रामाद्वैरमुत्सृज्यपार्थिवाः॥ ॥संजयउवाच॥ ॥उपातिष्ठन्नथोवैद्याःशल्योद्धरणकोविदाः॥ ५५॥ सर्वोपकरणैर्युक्ताःकुशलैःसाधुशिक्षिताः॥
तान्दृष्ट्वाराजाद्रवीपुत्रःप्रोवाचतनयंतव ॥ ५६॥ धनंदत्त्वाविसृज्यैतांपूजयित्वाचिकित्सकाः ॥ एवंगतमपेदानींवैद्यैःकार्यमिहास्तिकिं ॥ ५७ ॥ क्षत्रधर्मेप्रश
स्तांहिप्राप्तोस्मिपरमांगतिं ॥ नैषधर्मोमहीपालाःशरतल्पगतस्यमे ॥ ५८ ॥ एभिरेवशरैश्चाहंदग्धव्योस्मिनराधिपाः ॥ तच्छ्रुत्वावचनंतस्यपुत्रोदुर्योधनस्तव
॥ ५९॥ वैद्यान्विसर्जयामासपूजयित्वायथार्हतः॥ततस्तेविस्मयंजग्मुर्नानाजनपदेश्वराः ॥ ६०॥ स्थितिंधर्मेपरांदृष्ट्वाभीष्मस्यामिततेजसः॥उपधानंततोद
त्त्वापितुल्यंमनुजेश्वराः ॥ ६१ ॥ सहिताःपांडवाःसर्वेकुरवश्चमहारथाः ॥ उपगम्यमहात्मानंशयानंशयनेशुभे ॥ ६२ ॥ तेभिवाद्यततोभीष्मंकृत्वाचत्रिःप्रद
क्षिणम्॥विधायरक्षांभीष्मस्यसर्वएवसमंततः॥६३॥वीराःस्वशिबिराण्येवध्यायंतःपरमातुराः॥ निवेशायाभ्युपागच्छन्सायाह्नेरुधिरोक्षिताः॥ ६४॥ निवि
ष्टान्पांडवांश्चैवप्रीयमाणान्महारथान्॥भीष्मस्यपतनेहृष्टानुपगम्यमहाबलः॥ ६५॥ उवाचमाधवःकालेधर्मपुत्रंयुधिष्ठिरम्॥ दिष्ट्याजयसिकौरव्यदिष्ट्याभी
ष्मोनिपातितः॥ ६६ ॥ अवध्योमानुषैरेवसत्यसंधोमहारथः ॥ अथवादैवतैःसार्धंसर्वशास्त्रस्यपारगः ॥ ६७॥त्वांतुचक्षुर्हणंप्राप्यदग्धोघोरेणचक्षुषा॥एवमु
क्तोधर्मराजःप्रत्युवाचजनार्दनम्॥६८॥तवप्रसादाद्विजयःक्रोधात्तवपराजयः॥त्वंहिनःशरणंकृष्णभक्तानामभयंकरः॥ ६९ ॥ अनाश्वर्योजयस्तेषांयेषांत्व
मसिकेशव॥रक्षितासमरेनित्यंनित्यंचापिहितेरतः॥ ७० ॥सर्वथात्वांसमासाद्यनाश्वर्यमितिमेमतिः॥एवमुक्तःप्रत्युवाचस्मयमानोजनार्दनः॥तवैवैतद्युक्त
रूपंवचनंपार्थिवोत्तम ॥ ७१॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिभीष्मोपधानदानेविंशाधिकशततमोऽध्यायः ॥ १२० ॥ ॥७॥ ॥७॥

॥संजयउवाच॥ ॥व्युष्टायांतुमहाराजशर्वर्यांसर्वपार्थिवाः॥पांडवाधार्तराष्ट्राश्चउपातिष्ठन्पितामहम्॥ १॥तंवीरशयनेवीरंशयानंकुरुसत्तम॥अभिवाद्यो
पंतस्थुर्वैक्षत्रियाःक्षत्रियर्षभम्॥ २॥ कन्याश्चंदनचूर्णैश्चलाजैर्माल्यैश्चसर्वशः॥ अवाकिरञ्छांतनवंतत्रगत्वासहस्रशः॥ ३॥ स्त्रियोवृद्धास्तथाबालाःप्रेक्षका
श्चपृथग्जनाः॥ समभ्ययुःशांतनवंभूतानीवतमोनुदम्॥ ४॥ तूर्याणिशतसंख्यानितथैवनटनर्तकाः॥शिल्पिनश्चतथाजग्मुःकुरुवृद्धंपितामहम्॥ ५॥

कशततमोऽध्यायः ॥ १२० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ व्युष्टायामिति ॥ १ ॥ २ ॥ ३ ॥ पृथग्जनाःप्राकृताजनाः भूतानिप्राणिनोगंधर्वादीनिवा तमोनुदंसूर्यं ॥ ४ ॥ ५ ॥

॥ १८६ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ परिदूयंतेपरितप्यंते ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ विकुर्वतोविशेषेणकुर्वतः ॥ २६ ॥

उपारम्यचयुद्धेभ्यःसन्नाहान्विप्रमुच्यते॥ आयुधानिचनिक्षिप्यसहिताःकुरुपांडवाः॥ ६॥ अन्वासंतदुराधर्षंदेवव्रतमरिंदमम्॥ अन्योन्यंप्रीतिमंतस्तेयथापूर्वंय
थावयः॥ ७॥ सापार्थिवशताकीर्णासमितिर्भीष्मशोभिता॥ शुशुभेभारतीदीप्तादिवीवादित्यमंडलम्॥ ८॥विबभौचनृपाणांसागंगासुतमुपासताम्॥देवाना
मिवदेवेशंपितामहमुपासताम्॥ ९॥ भीष्मस्तुवेदनांधैर्यान्निगृह्यभरतर्षभ॥ अभितप्तःशरैश्चैवनिःश्वसन्नुरगोयथा॥ १०॥ शराभितप्तकायोपिशस्त्रसंपातमू
र्छितः॥ पानीयमितिसंप्रेक्ष्यराज्ञस्तान्प्रत्यभाषत ॥ ११ ॥ ततस्तेक्षत्रियाराजन्नुपाजह्रुःसमंततः॥ भक्ष्यानुच्चावचान्राजन्वारिकुंभांश्चशीतलान्॥ १२॥ उपा
नीतंतुपानीयंदृष्ट्वाशांतनवोब्रवीत्॥ नाद्यातीतामयाशक्याभोगाःकेचनमानुषाः॥ १३॥ अपक्रांतोमनुष्येभ्यःशरशय्यांगतोत्यहम्॥ प्रतीक्षमाणस्तिष्ठामिनि
वृत्तिंशशिसूर्ययोः॥ १४॥एवमुक्त्वाशांतनवोनिंदन्वाक्येनपार्थिवान्॥ अर्जुनंद्रष्टुमिच्छामीत्यभ्यभाषतभारत॥ १५॥ अथोपेत्यमहाबाहुरभिवाद्यपिताम
हम्॥ अतिष्ठत्पांजलिःप्रह्वःकिंकरोमीतिचाब्रवीत्॥ १६॥ तंदृष्ट्वापांडवंराजन्नभिवाद्याग्रतःस्थितम्॥अभ्यभाषतधर्मात्माभीष्मःप्रीतोधनंजयम्॥ १७॥दृष्ट्यतीव
शरीरंमेसंदृतस्यतवेषुभिः ॥ मर्माणिपरिदूयंतेमुखंचपरिशुष्यति ॥ १८ ॥ वेदनार्तशरीरस्यप्रयच्छापोममार्जुन ॥ त्वंहिशक्तोमहेष्वासदातुमापोयथाविधि
॥ १९ ॥ अर्जुनस्तुतथेत्युक्त्वारथमारुह्यवीर्यवान्॥अधिज्यंबलवत्कृत्वागांडीवंव्याक्षिपद्धनुः॥ २० ॥ तस्यज्यातलनिर्घोषंविस्फूर्जितमिवाशनेः॥ वित्रेसुःस
र्वभूतानिसर्वेश्रुत्वाचपार्थिवाः॥ २१॥ततःप्रदक्षिणंकृत्वारथेनरथिनांवरः॥शयानंभरतश्रेष्ठंसर्वशास्त्रभृतांवरम्॥ २२॥संधायचशरंदीप्तमभिमंत्र्यसपांडवः
पर्जन्यास्त्रेणसंयोज्यसर्वलोकस्यपश्यतः॥ २३॥अविध्यत्पृथिवींपार्थःपार्श्वेभीष्मस्यदक्षिणे ॥ उत्पपाततदोधारावारिणोविमलाशुभा ॥ २४ ॥ शीतस्याम्बत
कल्पस्यदिव्यगंधरसस्यच॥ अतर्पयत्ततःपार्थःशीतयाजलधारया ॥ २५ ॥ भीष्मंकुरूणामृषभंदिव्यकर्मपराक्रमम् ॥ कर्मणातेनपार्थस्यशक्रस्येवविकुर्वतः
॥ २६॥ विस्मयंपरमंजग्मुस्तत्रतस्तेवसुधाधिपाः॥ तत्कर्मप्रेक्ष्यवीभत्सोरतिमानुषविक्रमम्॥ २७ ॥ संप्रावेपंतकुरवोगावःशीतार्दिताइव ॥ विस्मयाच्चोत्तरीया
णिव्याविध्यन्सर्वतोनृपाः॥ २८॥ शंखदुंदुभिनिर्घोषस्तुमुलःसर्वतोभवत्॥ दृष्ट्वाशांतनवश्चापिराजन्वीभत्सुमब्रवीत्॥ २९॥

॥२७॥ व्याविध्यन्भामितवंतः ॥ २८ ॥ २९ ॥

॥ २० ॥ २१ ॥ निधनंनिधनहेतुः तद्विदोदेवरहस्यज्ञाः ॥ २२ ॥ २३ ॥ जगतिभूलोके ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७॥४८ ॥

सर्वपार्थिववीराणांसंनिधौपूजयन्निव ॥ नैतच्चित्रंमहाबाहोत्वयिकौरवनंदन ॥ ३० ॥ कथितोनारदेनासिपूर्वंर्षिरमितद्युते ॥ वासुदेवसहायस्त्वंमहत्कर्मकरिष्यसि ॥ ३१ ॥ यन्नोत्सहतिदेवेंद्रःसहदेवैरपिध्रुवम् ॥ विदुस्त्वांनिधनंपार्थसर्वक्षत्रस्यतद्विदः ॥ ३२ ॥ धनुर्धराणामेकत्वंकृथिव्यांप्रवरांनृपु ॥ ३३ ॥ मनुष्याजगतिश्रेष्ठाःपक्षिणांपतगेश्वरः ॥ सरितांसागरःश्रेष्ठोगौर्वरिष्ठाचतुष्पदाम् ॥ ३४ ॥ आदित्यस्तेजसांश्रेष्ठोगिरीणांहिमवान्वरः ॥ जातीनांब्राह्मणःश्रेष्ठःश्रेष्ठस्त्वमसिधन्विनाम् ॥ ३५ ॥ नवैश्रुतंभारतराष्ट्रेणवाक्यंमयोच्यमानंविदुरेणचैव ॥ द्रोणेनरामेणजनार्दनेनमुहुर्मुहुःसंजयेनापिचोक्तम् ॥ ३६ ॥ परीतबुद्धिर्हिविसंज्ञकल्पोदुर्योधनोनचतच्छ्रद्दधाति ॥ सशेष्यतेवैनिहतश्चिरायशास्त्रातिगोभीमबलाभिभूतः ॥ ३७ ॥ एतच्छ्रुत्वातद्वचःकौरवेंद्रोदुर्योधनोदीनमनाबभूव ॥ तमब्रवीच्छांतनवोभिवीक्ष्यनिबोधराजन्भववीतमन्युः ॥ ३८ ॥ दृष्टंदुर्योधनैतत्तेयथापार्थेनधीमता ॥ जलस्यधाराजनिताशीतस्यामृतगंधिनः ॥ ३९ ॥ एतस्यकर्तालोकेस्मिन्नान्यःकश्चनविद्यते ॥ आग्नेयंवारुणंसौम्यंवायव्यमथवैष्णवम् ॥ ४० ॥ ऐंद्रंपाशुपतंब्राह्मंपारमेष्ठ्यंप्रजापतेः ॥ धातुस्त्वष्टुश्चसवितुर्वैवस्वतमथापिवा ॥ ४१ ॥ सर्वस्मिन्मानुषेलोकेवेत्तिकोहिधनंजयः ॥ कृष्णोवादेवकीपुत्रोनान्योवेदेहकश्चन ॥ ४२ ॥ अशक्यःपांडवस्तातयुद्धेजेतुंकथंचन ॥ अमानुषाणिकर्माणियस्यैतानिमहात्मनः ॥ ४३ ॥ तेनसत्त्ववतासंख्येशूरेणाहवशोभिना ॥ कृतिनासमरेराजन्संधिर्भवतुमाचिरम् ॥ ४४ ॥ यावत्कृष्णोमहाबाहुःस्वाधीनःकुरुसत्तम ॥ तावत्पार्थेनशूरेणसंधिस्तेतातयुज्यताम् ॥ ४५ ॥ यावन्नतेचमूःसर्वाःशरैःसंनतपर्वभिः ॥ नाशयत्यर्जुनस्तावत्संधिस्तेतातयुज्यताम् ॥ ४६ ॥ यावत्तिष्ठंतिसमरेहतशेषाःसहोदराः ॥ नृपाश्चबहवोराजंस्तावत्संधिःप्रयुज्यताम् ॥ ४७ ॥ ननिर्दहतितेयावत्क्रोधदीप्तेक्षणश्चमूम् ॥ युधिष्ठिरोरणेतावत्संधिस्तेतातयुज्यतां ॥ ४८ ॥ नकुलःसहदेवश्चभीमसेनश्चपांडवः ॥ यावच्चमूंमहाराजनाशयंतिनसर्वशः ॥ ४९ ॥ तावत्तेपांडवैर्वीरैःसौहार्दंममरोचते ॥ युद्धंमदंतमेवास्तुतातसंशाम्यपांडवैः ॥ ५० ॥ एतत्तुरोचतांवाक्यंयदुक्तोसिमयानघ ॥ एतत्क्षेममहंमन्येतवचैवकुलस्यच ॥ ५१ ॥ त्यक्त्वामन्युंव्युपशाम्यस्वपार्थैःपर्याप्तमेतद्यत्कृतंफाल्गुनेन ॥ भीष्मस्यांतादस्तुवःसौहृदंचजीवंतुशेषाःसाधुराजन्प्रसीद ॥ ५२ ॥

॥ १८७ ॥

॥ ४९ ॥ ५० ॥ क्षेममहितं ॥ ५१ ॥ फाल्गुनेनयत्कृतंएतदेतावदेवपर्याप्तमस्तु चराच्चादेनावनांभूतानांप्रतादपीति ॥ ५२ ॥

॥ ५३ ॥ ५४ ॥ ५५ ॥ योज्ययोगधारणायुक्तंकृत्वा ॥ ५६ ॥ ५७ ॥ इतिश्री० नै० भारतभावदीपेएकविंशाधिकशततमोऽध्यायः ॥ १२१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ततइति ॥ १ ॥

राज्यस्यार्धंदीयतांपांडवानामिंद्रप्रस्थंधर्मराजोभियातु ॥ मामित्रध्रुक्पार्थिवानांजघन्यःपापांकीर्तिंप्राप्स्यसेकौरवेंद्र ॥ ५३ ॥ ममावसानाच्छांतिरस्तुप्रजानांसंगच्छंतांपार्थिवाःप्रीतिमंतः ॥ पितापुत्रंमातुलंभागिनेयोभ्राताचैवभ्रातरंप्रैतुराजन् ॥ ५४ ॥ नचेदेवंप्राप्तकालंवचोमेमोहाविष्टःप्रतिपत्स्यस्यबुद्ध्या ॥ तप्स्यस्यंतेसृतदंताःस्यसर्वेसत्यामेतांभारतीमीरयामि ॥ ५५ ॥ एतद्वाक्यंसौहृदादापगेयोमध्येराज्ञांभारतंश्रावयित्वा ॥ तूष्णीमासीच्छल्यसंतप्तमर्मायोज्यात्मानंवेदनांसंनियम्य ॥ ५६ ॥ संजयउवाच ॥ ॥ धर्मार्थसहितंवाक्यंश्रुत्वाहितमनामयम् ॥ नारोचयतपुत्रस्तेमुमूर्षुरिवभेषजम् ॥ ५७ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मवधपर्वणिदुर्योधनंप्रतिभीष्मवाक्येएकविंशाधिकशततमोऽध्यायः ॥ १२१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ ततस्तेपार्थिवाःसर्वेजग्मुःस्वानालयान्पुनः ॥ तूष्णींभूतेमहाराजभीष्मेशांतनुनंदने ॥ १ ॥ श्रुत्वातुनिहतंभीष्मंराधेयःपुरुषर्षभः ॥ ईषदागतसंत्रासस्त्वरयोपजगामह ॥ २ ॥ सदर्शमहात्मानंशरतल्पगतंतदा ॥ जन्मशाप्यागतंवीरंकार्तिकेयमिवप्रभुम् ॥ ३ ॥ निमीलिताक्षंतंवीरंसाश्रुकंठस्तदाव्रषः ॥ भीष्मभीष्ममहाबाहोइत्युवाचमहाद्युतिः ॥ ४ ॥ राधेयोहंकुरुश्रेष्ठनित्यमक्षिगतस्तव ॥ द्वेष्योहंतवसर्वत्रइतिचैनमुवाचह ॥ ५ ॥ तच्छ्रुत्वाकुरुवृद्धोहिवलीसंवृतलोचनः ॥ शनैरुद्वीक्ष्यसस्नेहमिदंवचनमब्रवीत् ॥ ६ ॥ रहितंधिष्ण्यमालोक्यसमुत्सार्यचरक्षिणः ॥ पितेवपुत्रंगांगेयःपरिरभ्यैकपाणिना ॥ ७ ॥ एह्येहिमेविप्रतीपस्पर्धसेत्वंमयासह ॥ यदिमांनाधिगच्छेयानतेश्रेयोध्रुवंभवेत् ॥ ८ ॥ कौंतेयस्त्वंनराधेयोनतवाधिरथःपिता ॥ सूर्यजस्त्वंमहाबाहोविदितोनारदान्मया ॥ ९ ॥ कृष्णद्वैपायनाच्चैवतच्चसत्यंनसंशयः ॥ नचद्वेष्योस्मिमेतातत्वयिसत्यंब्रवीमिते ॥ १० ॥ तेजोवधनिमित्तंतुपरुषंत्वाहमब्रुवम् ॥ अकस्मात्पांडवान्सर्वानवाक्षिपसिसुव्रत ॥ ११ ॥ येनासिवद्दुशोराज्ञाचोदितःसूतनंदन ॥ जातोसिधर्मलोपेननततस्त्वेबुद्धिरीदृशी ॥ १२ ॥ नीचाश्रयान्मत्सरेणद्वेषिणीगुणनामपि ॥ तेनासिवद्दुशोरूक्षंश्रावितःकुरुसंसदि ॥ १३ ॥ जानामिसमरेवीर्यंशत्रुभिर्दुःसहंभुवि ॥ ब्रह्मण्यतांचशौर्यंचदानेचपरमांस्थितिम् ॥ १४ ॥ नत्वयासदृशःकश्चित्पुरुषेष्वमरोपम ॥ कुलभेदभयाच्चाहंसदापरुषमुक्तवान् ॥ १५ ॥

॥ २ ॥ जन्मशाप्यागतंजन्मकालेशरशाप्यागतं शरजन्मत्वात् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ पुरुषेषुमानुषेषु एवंसत्यपिअतिसंभाविनःपांडवाननतिपीडयेरितिनिश्चित्यातिरथोप्यधीरथत्वेनगणितइतिभावः ॥ १५ ॥

॥ १६ ॥ १७ ॥ त्वंयासदृशोनाभवत्त्वयाजितइत्यर्थः इयंकथाराजधर्मे अनेननागायुतबलत्वंकर्णस्यसूचितं ॥१८॥ युधिसंप्रहारे ॥ १९ ॥ २० ॥२१ ॥ निर्दग्धंसमासं ॥ २२ ॥ २३ ॥ अवकीर्णस्य

इष्वस्त्रेचास्त्रसंधानेलाघवेस्त्रबलेतथा॥ सदृशःफाल्गुनेनासिकृष्णेनचमहात्मना ॥ १६ ॥ कर्णकाशिपुरंगत्वात्वयैकेनधनुष्मता ॥ कन्यार्थेकुरुराजस्यराजानोहृदितायुधि ॥ १७ ॥तथाचबलवान्राजाजरासंधोदुरासदः॥ समरेसमरश्लाघिन्नत्वयासदृशोभवत् ॥ १८ ॥ ब्रह्मण्यःसत्त्वयोधीचतेजसाचबलेनच॥ देवगर्भसमःसंख्येमनुष्यैरधिकोयुधि॥ १९॥व्यपनीतोद्यमन्युर्मेयस्त्वांप्रतिपुराकृतः॥ दैवंपुरुषकारेणनशक्यमतिवर्तितुम् ॥ २० ॥सोदर्याःपांडवावीराभ्रातरस्तेऽरिसूदन॥ संगच्छतैर्महाबाहोममचेदिच्छसिप्रियम् ॥ २१ ॥ मयाभवतुनिर्दग्धंवैरमादित्यनंदन॥ पृथिव्यांसर्वराजानोभवंत्वद्यनिरामयाः॥ २२ ॥ ॥ कर्ण उवाच॥ ॥जानाम्येवमहाबाहोसर्वमेतन्नसंशयः॥ यथावदस्मिमेभीष्मकौंतेयोहंनसूतजः॥२३॥ अवकीर्णस्त्वहंकुंत्यासूतेनचविवर्धितः॥ भुक्त्वादुर्योधनेश्वर्यंनमिथ्याकर्तुमुत्सहे॥ २४ ॥ वसुदेवसुतोयद्वत्पांडवायदृढव्रतः॥ वसुचैवशरीरंचपुत्रदारंतथायशः॥ २५ ॥ सर्वंदुर्योधनस्यार्थेत्यक्तंमेभूरिदक्षिण॥ मत्तश्चैतद्व्याधिमरणंक्षत्रंस्यादितिकौरव॥ २६॥कोपिताःपांडवानित्यंसमाश्रित्यसुयोधनम्॥ अवश्यभावीत्यर्थोयंयोनशक्योनिवर्तितुम् ॥ २७॥दैवंपुरुषकारेणकोनिवर्तितुमुत्सहेत्॥ पृथिवीक्षयशंसीनिनिमित्तानिपितामह॥ २८ ॥भवद्भिरुपलब्धानिकथितानिचसंसदि ॥ पांडवावासुदेवश्चविदितामममसर्वशः॥ २९ ॥ अजेयाःपुरुषैरन्यैरितितांश्चोत्सहामहे॥ विजयिष्येरणेपांडूनितिमेनिश्चितंमनः॥ ३० ॥नचशक्यमवस्रष्टुंवैरमेतत्सुदारुणम्॥ धनंजयेनयोत्स्येहंस्वधर्मप्रीतमानसः॥ ३१ ॥अनुजानीष्वमांतातयुद्धायकृतनिश्चयम्॥ अनुज्ञातस्त्वयावीरयुध्येयमितिमेमतिः॥ ३२ ॥दुरुक्तंविप्रतीपंवारभसाच्चापलात्तथा ॥ यन्मयेहकृतंकिंचित्तन्मेत्वंक्षंतुमर्हसि॥ ३३॥ ॥ भीष्मउवाच॥ ॥नचेच्छक्यमवस्रष्टुंवैरमेतत्सुदारुणम्॥ अनुजानामिकर्णत्वांयुध्यस्वस्वर्गकाम्यया॥ ३४॥

॥ १८८ ॥

क्तः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ निवर्तितुंनिवर्तयितुं ॥ २८ ॥ २९ ॥ पांडूनर्जुनंविहायचतुरः अर्जुनेनयोत्स्येअन्यान्विजेष्येइतिभावः ॥ ३० ॥ ३१ ॥ ३२ ॥ विप्रतीपंविरुद्धं ॥ ३३ ॥ ३४ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ॥ इतिश्री०नै०भारतभावदीपेद्वाविंशाधिकशततमोऽध्यायः ॥ १२२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ समाप्तोभीष्मपर्वार्थप्रकाशः ॥ ७ ॥

निर्मन्युर्गतसंरंभःकृतकर्मारणेस्मह ॥ यथाशक्तियथोत्साहंसतांवृत्तेपुवृत्तवान् ॥ ३५ ॥ अहंत्वामनुजानामियदिच्छसितदाप्रभु॥ क्षत्रधर्मजितांल्लोकानवाप्स्यसिधनंजयात् ॥ ३६॥ युध्यस्वनिरहंकारोबलवीर्यव्यपाश्रयः ॥ धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते ॥ ३७ ॥ प्रशमेहिकृतोयत्नःसुमहान्सुचिरंमया ॥ नचैवशकितःकर्तुंकर्णसत्यंब्रवीमिते ॥ ३८ ॥ ॥ संज उवाच ॥ ॥ इत्युक्तवतिगांगेयेअभिवाद्योपमंन्यच ॥ राधेयोरथमारुत्यप्रायात्तवसुतंप्रति ॥ ॥३९॥ ॥इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासक्यांभीष्मपर्वणिभीष्मवधपर्वणिभीष्मकर्णसंवादेद्वाविंशाधिकशततमोऽध्यायः॥ १२२॥ ॥७॥ समाप्तंभीष्मवधपर्वभीष्मपर्वच॥ ॥अस्यानंतरंद्रोणपर्वभविष्यति॥ तस्यायमाद्यःश्लोकः॥ तमप्रतिमसत्त्वौजोबलवीर्यसमन्वितम्॥ हतंदेवव्रतंश्रुत्वापांचाल्येनशिखंडिना ॥ १ ॥

श्वेतोपाख्यानसमाप्त्यनंतरंयथप्रभृतिआपर्वसमाप्तिलिखिताटीकाअन्यैवनचतुर्धरणीतेतिभाति टीकांतरपुस्तकेषूपलंभाल्लेखसादृश्याभावाच्च ॥

॥ अस्मिन्पर्वणिआदिपर्वोक्ताध्यायश्लोकसंख्यान्यूनाधिकत्वंचेल्लिपिकरप्रमादात्तद्बोध्यं ॥

इदं भीष्मपर्व मुंबय्याख्यराजधान्यां गणपतकृष्णाजीत्यभिधानां मुद्रायंत्रालये मुद्रितं शकाब्दाः ॥ १८१० ॥

॥ इति श्रीमहाभारते भीष्मपर्व समाप्तम् ॥